॥ श्रीः ॥

अथ शब्दकौस्तुभः ।

॥ श्रीगणेशाय नमः ॥

विश्वेशं सच्चिदानन्दं वन्देहं योखिलं जगत् ॥
चरीकर्त्ति वरीभर्त्ति संजरीहर्ति लीलया ॥ १ ॥
नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम् ॥
श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान्बुधान् ॥ २ ॥
नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम् ॥
फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥ ३ ॥
परिभाव्य बहून् ग्रन्थान्योर्थः क्लेशेन लभ्यते ॥
तमशेषमनायासादितो गृह्णीत सज्जनाः ॥ ४ ॥
समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभम् ॥
भट्टोजिभट्टो जनुषः साफल्यं लब्धुमीहते ॥ ५ ॥

प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् अथ शब्दानुशासनमिति । अथशब्दः प्रारम्भस्य द्योतकः न तु वाचकः निपातत्वात् उपसर्गवत् । न च तेपि वाचका एवेति वाच्यम् । उपास्यते गुरुरनुभूयते सुखमित्या-

दौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैव युक्तत्वात् । ननूक्तयुक्त्या ऽस्तूपसर्गाणां द्योतकता निपातान्तरं तु वाचकमेवेति चेन्न । साक्षात्क्रियते अलंक्रियते ऊरीक्रियतइत्यादौ कर्मणि लकारेण कर्मीभूतस्य गुर्वादेराभिधानसिद्धये धात्वर्थं प्रति कर्मत्वस्य वाच्यत्वात् । उपसर्गत्वापेक्षया निपातत्वस्याधिकवृत्तितया तदवच्छेदेनैव द्योतकताकल्पनाच्च । सामान्ये प्रमाणानां पक्षपातात् । निपातत्वं चाखण्डोपाधिरूपं जातिरूपं शब्दस्वरूपमेव चेति पक्षत्रयेपि प्रादिचादिसाधारणमेव । प्रत्वादिप्रत्येकपर्यवसन्नं तादिति पक्षेपि प्रादीनां चादिभ्यो वैलक्षण्यानिरुक्तेः केवलानामप्रयोगेण अन्यलभ्यतापि तुल्यैव । विजयतइत्यत्र धातोर्विशिष्टजयइव घटश्चेत्यत्र समुच्चितघटे घटशब्दस्यापि लक्षणायाः संभवात् । किं च चादीनां वाचकत्वे समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इति व्युत्पत्तिर्निपातेतरविषयकतया विना प्रमाणं संकोचनीया स्यात् । स्याच्च समुच्चयादिशब्दयोगइव चादियोगेपि घटादेः षष्ठी । किं च समुच्चयादिपदैरुपस्थिते यथा विशेषणसम्बन्धस्तथा चादिभिरुपस्थिते स्यात् । द्योतकत्वपक्षे तु पदार्थैकदेशत्वान्न तत्र विशेषणान्वयः । अपि च शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिवेत्यादौ उस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यादिरर्थः । स च उस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य च तात्पर्यग्राहकत्वे सत्येव लभ्यते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकतापि भज्येत । इवशब्दात्तु तृतीया दुर्लभा । असत्वार्थकतया कारकविभक्त्ययोगात् । एवमप्युस्रादिभ्यस्तृतीयाऽनन्वयस्यानुद्धाराच्च । नन्वेवं नञ्तत्पुरुषस्यो-

त्तरपदार्थादिप्राधान्यमित्यादिसिद्धान्ता भज्येरन्निति चेन्न । पूर्वपदद्योत्यं प्रति प्राधान्यमिति तदर्थात् । द्योत्यार्थेनाप्यर्थवत्तेति प्रातिपदिकत्वसिद्धिः । अत एव येषां द्योत्योप्यर्थो नास्ति तु हि च स्म ह वै पादपूरणे इत्यमरकोशात् कमीमिद्विति पादपूरणार्था इति निरुक्ताच्च । तदर्थं निपातस्यानर्थकस्येति वार्तिकारम्भ इत्यवधेयम् । स्फुटञ्चेदङ्कैयटादिग्रन्थेषु । अत एवाकृत्यधिकरणे भट्टैरुक्तम् । चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः । क्रियते संशयोत्पत्तेर्नोपसर्ग्गनिपातयोः ॥ तयोरर्थाभिधाने हि व्यापारो नैव विद्यते । यदर्थद्योतकौ तौ तु वाचकस्स विचार्यतइति ॥ यत्तु अर्थवत्सूत्रे अधीतइत्यादौ धातोरनर्थकता उपसर्ग्गविशिष्टस्य वाचकतेति कैश्चिदुक्तं तदभ्युच्चयमात्रम् । सर्वस्यद्वे इतिसूत्रे कैयटादिग्रन्थोप्येवमेव । पूर्वोत्तरमीमांसयोस्तत्रतत्र नञः पर्य्युदासे लक्षणेति ग्रन्था अप्येवमेव, उक्तयुक्तेः । अस्तु वा मतान्तरं निपाता वाचका इति सर्वथापि प्रादयो द्योतकाश्चादयस्तु वाचका इत्येवंरूपमर्द्धजरतीयं नैयायिकाभ्युपगतमप्रामाणिकमेवेति दिक् । अनुपूर्वकः शासिर्विविच्य ज्ञापने दृष्टः । तद्यथा । अक्षेत्रवित् क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः । यथा वा । " संपूषन्विदुषानययोअज्ञसानुशासति । य एवेदमिति ब्रवत् " । अत्र हि गुणत्रयोपेतेन सद्गुरुणास्मान् शिक्षयेति पूषा प्रार्थ्यते तत्र अञ्जसेति शैघ्र्यमुक्तम् । अनुशासतीति विविच्य बोधकत्वं बहुलञ्छन्दसीति शपो न लुक् । इदमित्थमेवेति यो ब्रूयादिति प्रमेयनिष्कर्ष उक्तः ब्रवदित्यत्र लेटोडाटाविति यट् । तथा च अनुशिष्यन्ते विविच्य असाधुभ्यो विभज्य बोध्यन्ते येनेति करणे ल्युट् । ततश्शब्दानामिति कर्मणि ष-

ष्ठी तदन्तेन समासः । न च कर्म्मणिचेति सूत्रेण समासनिषेधः शङ्क्यः । तत्र चशब्दार्थतया कर्म्मणीति शब्दवता उभयप्राप्ताविति सूत्रेण या षष्ठी तदन्तं न समस्यतइत्यर्थात् । इयं तु कर्तृकर्मणोरिति विहिता षष्ठी न तूभयप्राप्ताविति । आचार्यस्य कर्तुर्वस्तुतः सत्वेपीहानुपादानात् । चित्रं गवां दोहो ऽगोपेनेत्यत्र हि आश्चर्यं प्रतिपाद्यं तच्च यद्यशिक्षितो दोग्धा दुर्दोहा गावश्च दोग्धव्यास्तदैव निर्वहति न त्वन्यथा, अतः कर्तृकर्मणोर्वैशिष्ट्योपादानादस्त्युभयप्राप्तिः । इह तु शब्दानामिदमनुशासनं न त्वर्थानामित्यर्थनिवृत्तिपरं वाक्यं न तु कर्तृविशेषानिवृत्तिपरमतो नास्त्युभयप्राप्तिः । अस्तु वा यथाकथंचिदुभयप्राप्तिः तथापि न क्षतिः । उभयप्राप्ताविति सूत्रे अविशेषेण विभाषेति पक्षस्यापि वक्ष्यमाणतया नियमाप्रवृत्तिपक्षे आचार्यस्य शब्दानुशासनमिति प्रयोगसंभवात्, शेषलक्षणा षष्ठी वास्तु । तस्माद्वैदिका लौकिकाश्च साधवः शब्दा इह विषय इति स्थितम् । वेदे भवा वैदिका अध्यात्मादित्वाठञ् । एवं लोके भवा लौकिकाः । यद्वा लोके विदिता लौकिकाः तत्र विदित इति वर्त्तमाने लोकसर्वलोकाठञ् । प्रातिशाख्येष्विव न वैदिकैकदेशमात्रमिह विषयः । न वा व्याकरणान्तरेष्विव छांदसपरित्याग इति सूचयितुमुभयोपादानम् ॥

॥ इति विषयनिरूपणम् ॥

स्यादेतत्, गौरित्यादिः शब्द इह विषयः । तत्र च गकार औकारो विसर्गश्च घटकः । व्युत्पाद्यते तु डौप्रत्ययसुप्रत्ययवर्णादेशादिकम्, न चैतद्गौरिति बोधे भासते तथा चार्थान्तरता । गौरित्यनेन परिनिष्ठितेन सह डोप्रभृतीनां सम्बन्धविशेषस्तत्प्रतिपत्त्युपयोगिता चास्तीति तद्व्युत्पादनमिति चेन्न ।

शब्दान्तरव्यावृत्तस्य सम्बन्धस्य उपयोगस्य च दुर्वचत्वात् । द्रव्यगुणादिपदार्थानामिह व्युत्पाद्यतापत्तेश्च । अस्ति हि तेषां गौरित्यनेन वाच्यवाचकभावादिः सम्बन्धः । अत एव शाब्दबोधे गवि समवायेन गोत्वमिव शक्त्याख्यसम्बन्धेन शब्दो विशेषणतया भासते । चाक्षुषबोधेपि व्यक्त्या स्मारितः शब्दो विशेषणमित्यभ्युपगमः । आह च, न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वशब्दानामेते पृथगवस्थितइति॥यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् । पिण्डएव हि दृष्टः सन् संज्ञां स्मारयितुं क्षम, इति च ॥ युक्तं चैतत् । गृहीतशक्तिकं प्रति शब्देनार्थस्येव अर्थेन शब्दस्यापि स्मरणे बाधकाभावात् । अत एव गोत्वस्येव गोशब्दस्यापि व्यक्तिविशेषणत्वाविशेषात्संसर्गोपि तादात्म्यमेवास्तु । एवं गोगुणादिभिरपि तदभिन्नाभिन्नस्य तदभेदादित्याशयेनाथ गौरित्यत्र कः शब्द इति प्रघट्टके द्रव्यगुणकर्मसामान्यैः सह शब्दस्याभेदो भाष्यकृद्भिराशङ्क्य निराकृतः । तत्र निराकरणग्रन्थस्यायमाशयः । समसत्ताकभेदाभेदौ विरुद्धावेव । अन्यथा त्वदुक्तरीत्या सत्तागुणत्वाद्यभेदात्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौ प्रवृत्तिनिवृत्तिव्यवस्था न स्यात्, न स्याच्च भेदग्रहाद्भ्रमनिवृत्तिः । जातिव्यक्त्यादिसम्बन्धस्त्वतिरिक्त एवेति । एवमेव शब्देनापि सहास्त्येव सम्बन्धो द्रव्यादीनामिति स्थितम् । अस्ति च द्रव्यादिव्युत्पादनस्य प्रकृते उपयोगोपि । अस्मिन्नर्थे ऽयं साधुरित्यर्थविशेषं पुरस्कृत्यैव साधुत्वस्य वक्तव्यत्वात् । अत एव वाजिनि दरिद्रे च क्रमेण अश्वशब्दो अस्वशब्दश्च साधुव्युत्क्रमेण त्वसाधुरिति सिद्धान्तः । ननु यथा वैशे-

षिकादीनामेतच्छास्त्रसिद्धमेव प्रकृतिप्रत्ययविभागमुपजीव्य पदार्थव्युत्पादनाय प्रवृत्तिः प्रकृतिप्रत्ययादिविचारस्तु क्वाचित्कः प्रासङ्गिकस्तथेहापि लोकप्रसिद्धं दर्शनान्तरसिद्धं च पदार्थजातमुपजीव्य शब्दमात्रव्युत्पादनं न विरुध्यतइति चेत् । अस्तु तावदेव,न्तथापि डोप्रभृतिव्युत्पादनं निष्फलमेवेति चेत् । अत्रोच्यते । गौस्तिष्ठति देवदत्तः पचतीत्यादयः शृङ्गग्राहिकया तावज्जन्मसहस्रेणापि बोधयितुम्बोद्धुं चाशक्याः । आनन्त्यात् । अतः प्रकृतिप्रत्ययविभागकल्पनारूपो लघुभूत उपायः समाश्रीयते लिपिवत् । आरोपित एव च तत्र संम्बन्धः । प्रसिद्धो हि स्थूलारुन्धतीशाखाचन्द्रादिन्यायो लोके पञ्चकोशावतरणन्यायश्चोत्तरमीमांसायाम् । तत्पार्यविषयाबाधाच्च प्रामाण्यम् । एषैव स्त्यर्थवादेष्वपि गतिः । आत्मवपोत्खेदनप्रभृतीनां बाधेपि तात्पर्यविषयीभूतस्य प्राशस्त्यस्याबाधितत्वात् । उक्तं च हरिणा । उपायाः शिक्षमाणानां बालानामुपलालनाः । असत्ये वर्त्मन्नि स्थित्वा ततः सत्यं समीहतइति ॥ उपेयप्रतिपात्त्यर्था उपाया अव्यवस्थिता इति च ॥ अत एव हि के चित्सुप्रत्ययं विदधति, अपरे सिं, तथा सूत्ररीत्या पाठितमित्यत्र इतप्रत्ययः भाष्यरीत्या तप्रत्ययः, सूत्ररीत्या तावानिति वतुप् डावतावर्थवैशेष्यादितिवार्त्तिकोक्तरीत्या डावतुरिति दिक् । एतेन पचतीत्यादौ आदेशैः स्मार्यमाणा लडादयो बोधका इति वदन्तः परास्ताः । तथा हि । वृद्धव्यवहाराच्छक्तिग्रह इति निर्विवादम्, ततश्च प्रयोगसमवायिनामेव तिप्रभृतीनां शक्तिः सिध्यति न त्वलौकिकानां लादीनाम्, एवं डुपचष् डुकृञ् इत्यादिप्रकृतयो विच्क्विबादिप्रत्ययाश्च न शक्ताः किं तु अपाक्षीत् पपाच पापच्यते करोति चकरीतीत्यादिप्रयोगसमवायिनः अपाक् पपाच् इत्या-

दय एव। श्रूयमाणेन डुपचष्प्रभृतीनां स्मारणं तेनार्थबोध इति चेन्न। लाघवाद्व्यवस्थितत्वाच्च श्रूयमाणानामेवार्थसंबन्धकल्पनात्, औत्प्रेक्षिकस्य स्मरणकल्पने गौरवात्, अव्यवस्थापत्तेश्च। पचति देवदत्तः पचन्तं तं पश्येति तिप्शतृभ्यां स्मारितस्य लट एव बोधकत्वे एकत्र आधाराधेयभावेन संसर्गेण देवदत्ते आख्यातार्थो यत्नो विशेषणमितरत्र तु अभेदेन संसर्गेण कृदर्थः कर्त्ता विशेषणमिति त्वत्सिद्धांतभङ्गापत्तेश्च। एतेन कर्त्रधिकरणे आख्यातार्थत्वं कर्तुर्निरस्य जञ्जभ्यमानाधिकरणे शानजर्थत्वं स्वीकुर्वन्तो मीमांसका अपि परास्ताः। यत्तु तैरुक्तं शानजंशे कर्त्तरि कृदितिव्याकरणं शक्तिग्राहकमस्तीति। तदप्यापाततः। कृद्वाक्यशेषोयमनिर्दिष्टार्थेषु ण्वुलादिषूपतिष्ठते न तु शत्रादिषु स्थान्यर्थेन निराकांक्षत्वादिति वक्ष्यमाणत्वात्। आकांक्षितविधानं ज्याय इति न्यायात्। अन्यथा क्रियमाण इति कर्म्मणि शानचो दौर्लभ्यापत्तेश्च। किं च कर्त्तरि कृदिति यत्कर्तृग्रहणं तदेव लः कर्मणीत्यत्राप्यनुवृत्तं तत्कथं कृतां तिङां च वैलक्षण्यम्। अन्यलभ्यत्वादेरुभयत्र साम्यात्। यत्तु नामार्थयोरभेद एव संसर्ग इति हि शानजादौ कर्त्ता वाच्य इत्युक्तम्। तत्तु पचतिकल्पं पचतिरूपं देवदत्त इत्याद्यनुरोधात्तिङ्क्ष्वापि तुल्यम्। तस्मात्परीत्या न कश्चिच्छत्रन्तात्तिङन्ते वैषम्यहेतुः। अस्मद्रीत्या तु भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति निरुक्तकारोक्तेःप्रत्ययार्थप्राधान्यमौत्सर्गिकं तिङ्षु त्यज्यते। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वादितिसूत्राच्च। शतृशानज्विधौ रूपत्रिधौ च भाष्येपि स्फुटमेतत् पाचकोव्रजतीतिवत्पचतिव्रजतीति प्रयोगोप्यत एव नोपपद्यते। पचतिभवतीत्यादि चोपपद्यते पचतोरूपं पचन्ति रूपमित्यादौ रूपबाध्यन्ते द्विवचनादि न भवति। तस्मात्तिङ्षु

कृत्सु च विशेषणविशेष्यभावव्यत्यासमात्रमस्तीति वक्ष्यते । यत्तु भट्टैरुक्तं । कर्त्तरि यदेकत्वं तत्रैकवचनं तिबिति लादिविधेर्द्वयेकयोरित्यादेश्चैकवाक्यतया व्याख्यानान्न कर्तुर्वाच्यता सूत्रादायातीति,तदप्यापाततः । द्विवचनादिसंज्ञा ह्यादेशनिष्ठा ततश्च तद्विधिना द्व्येकयोरित्यस्य एकवाक्यता । न च तत्र कर्त्तरीत्यस्ति यत् द्वित्वादिविशेषणतया कर्थं चिद्योज्येत।लविधितिबादिविध्योरप्येकवाक्यतास्तीति चेत्,सत्यम् । वाक्यैकवाक्यता सा न तु पदैकवाक्यता । आदेशविधेर्लविधिलभ्यलकारानुवादेन प्रवृत्तेः । लविधौ तु कर्तृग्रहणं स च द्विवचनादिसंज्ञाविनिर्मुक्त एव । अत एव आदेशस्मारिता लकारा बोधका इति पक्षे एकत्वादिभानायादेशा एव शरणीकर्तव्याः । एवं णलादौ तिबादिद्वारकं लिडादिस्मरणं कल्प्यमिति महदेव गौरवम् । न च परंपरासंबन्धेन णलेव बोधकः । वृत्तिशून्यत्वात् । अत एवापभ्रंशानां साधुस्मारकताभ्युपगमस्तवापीति दिक् । तस्मात्पूर्वत्रासिद्धमित्यादौ यथा आहार्यारोपेणैव व्याख्यानं सर्वसंमतं तथा शास्त्रीयप्रक्रियायां सर्वत्र । वस्तुतस्तु वाचकता स्फोटैकनिष्ठा । तत्र चाष्टौ पक्षाः ॥ वर्णस्फोटः १ पदस्फोटः २ वाक्यस्फोटः ३ अखण्डपदस्फोटः ४ तादृग्वाक्यस्फोटः ५ इत्थं पञ्च व्यक्तिस्फोटाः । वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोट इति । तथा हि । किंचिद्वर्णव्यत्यासादिना शक्तावच्छेदकानुपूर्वीभङ्गस्य प्रतिपदमौत्सर्गिकत्वात्तत्र च केन चित्कचित्प्रथमं शक्तिग्रहात्केन कस्य स्मारणमित्यत्र विनिगमनाविरहाद्वृशभो वृषभो वृष इत्यादाविव कर् कार् कुर् चकर् इत्यादीनां प्रयोगसमवायिनां सर्वेषामेव वर्णानां तत्तदानुपूर्व्यवच्छिन्नानां वाचकतेति वर्णस्फोटपक्षः । कर्प्रभृतयो वाचका न वेति चेह विप्रति-

पत्तिशरीरम् ॥ १ ॥ रामं रामेण रामाय हरये हरौ हरीनित्यादौ परिनिष्ठिते रूपे कियानंशो द्रव्यादिवाचकः कियांश्च कर्मत्वादेरित्यस्य विनिगन्तुमशक्यतया राममित्यादिपरिनिष्ठितं पदमेव वाचकं कर्मत्वादिविशिष्टस्येति पदस्फोटपक्षः ॥ २ ॥ दधीदं हरेव विष्णोवेत्यादावपि विनिगमनाविरहतौल्याद्वाक्यमेव विशिष्टार्थे शक्तमिति वाक्यस्फोटः ॥ ३ ॥ एकः पट इति वदेकं पदं वाक्यं वेत्यबाधितप्रतीतेर्वर्णातिरिक्तमेव पदं वाक्यं वा अखण्डं वर्णव्यंग्यम् । एकत्वप्रतीतिरौपाधिकीति चेत् । पटेपि तथात्वापत्तेः । कः पदार्थोसाविति चेत् । भावः । भावविशेषेषु क्वान्तर्भवतीति चेत् । त्वत्परिभाषितेषु द्रव्यादिषु मान्तर्भूत् । नत्वेतावता प्रमाणसिद्धं प्रत्याख्यातुं शक्यते । अनियतपदार्थवादे गौरवमिति चेत् । व्यक्तीयत्ता तवापि नास्ति । उपाधीयत्ता तु सर्वैः सुवचा । भावत्वाभावत्वाभ्यां नित्यत्वानित्यत्वादिना वा विभजनात् । भावविभाजकोपाधयस्तु घटविभाजकोपाधिवदेवानावश्यकाः । अस्मिंश्च पक्षद्वये वर्णा अप्यनावश्यकाः । नन्वनुभवसिद्धास्तइति चेत् । व्यञ्जकध्वनिविशेषोपहितस्फोट एव ककाराद्यात्मना व्यवह्रियतइत्यभ्युपगमात् । भाट्टमते तारो मन्दो गकार इतिवत् अद्वैतसिद्धान्ते विषयसंबन्धजन्यवृत्तिवैचित्र्येण व्यङ्ग्ये स्वरूपसुखे वैचित्र्यवच्च । अत एव वाचस्पतिमिश्राः तत्त्वबिन्दौ वस्तुतः ककारादतिरिच्यमानमूर्त्तेर्गकारस्याभावादिति स्फोटवादिमतमुपन्यास्थत् । यथा वा अखण्डेष्वपि ऋकारादिषु वर्णेषु वर्णान्तरसमानाकारैकदेशावभासः तथात्र पक्षे वर्णावभासोपि भविष्यति । उक्तं च वोपदेवेन । शक्यत्वइव शक्तत्वे जातेर्लाघवमीक्ष्यताम् । औपाधिको वा भेदोस्तु वर्णानां तारमन्दवत् इति । भर्तृहरिरप्याह । पदे न वर्णा विद्यन्ते वर्णेष्व-

वयवा न च । वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेति ॥ तस्मादखण्डं पदं वाक्यं वेति पञ्चापि व्यक्तिस्फोटावान्तरभेदाः ॥ ५ ॥ जातिस्फोटवादिनस्तु घोत्तरटत्वादिकं शक्तावच्छेदकतया आद्यपक्षत्रयेपि यथायथं वाच्यम्। अन्यथा सरो रस इत्यादावर्थविशेषप्रतीत्यनापत्तेः। तच्च उपाधिरूपम्। उपाधिश्च परंपरासंबद्धा जातिरेव । सा च सर्वाधिष्ठानब्रह्मस्वरूपात्मिका । तथा च शक्यांशइव शक्तांशेपि न्यायसाम्येनाकृत्यधिकरणरीत्या ब्रह्मतत्त्वमेव तत्तदुपहितं वाच्यं वाचकं च । अविद्याविद्यकधर्मविशेषो वा जातिरिति पक्षे तु सैव वाचिकास्त्वित्याहुः ॥ ८ ॥ अष्टाव्ष्येते पक्षाः सिद्धान्तग्रन्थेषु तत्रतत्रोपनिबद्धाः। तथा हि । स्थानिवत्सूत्रे सर्वे सर्वपदादेशा इतिभाष्यग्रन्थः । पद्यतेर्थो ऽनेनेति अर्थवदिह पदं न तु सुप्तिङन्तमेव । तथाच एरुरित्यस्य तेस्तुरित्यर्थ इति टीकाग्रन्थश्च वर्णस्फोटेनुकूलः । तथा स्थान्यर्थाभिधानसमर्थस्यैवादेशत्त्वमिति स्थानेन्तरतमपरिभाषयैव तस्थस्थमिपामित्यादिषु निर्वाहात्तदर्थं यथासंख्यसूत्रं नारब्धव्यमिति भाष्यमपि । पदस्फोटवाक्यस्फोटौ तु इहैव प्रघट्टके येनोच्चारितेनेति भाष्यप्रतीकमुपादाय कैयटेन भाष्यार्थतया वर्णितौ । वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वेति वदता तयोरखण्डताप्युक्ता । नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमिति तत्रतत्र भाष्ये सखण्डतोक्ता। मायानिश्चलयन्त्रेषु कैतवानृतराशिषु । अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियामित्यमरः । पस्पशायामेव प्रघट्टकान्तरे किंपुनरित्यादि भाष्यमुपादाय के चिद्वर्णस्फोटमपरे पदस्फोटं वाक्यस्फोटं चाहुरिति वदता कैयटेन अइउण्इत्यत्र व्यक्तिस्फोटजातिस्फोटयोर्बलाबलं चिन्तयता प्रत्याहारान्हिकान्ते अक्षरं न क्षरं विद्यादिति भाष्यव्याख्यावसरे व्यव-

हारनित्यता तु वर्णपदवाक्यस्फोटानां नित्यत्वं तु जातिस्फोटस्येति प्रतिपादयता अनुपदमेव ब्रह्मतत्त्वमेव हि शब्दरूपतया प्रतिभातीत्यर्थ इति व्याचक्षाणेन सर्वे पक्षाः सूचिता एव। यदा तु अविद्यैव जातिरिति पक्षस्तदभिप्रायेण जातिस्फोटस्यापि व्यवहारनित्यतेति अक्षरं न क्षरं विद्यादित्यस्य कैयटीये पाठान्तरम्। आद्यन्तौटकितावितिसूत्रे च भाष्यएव वर्णस्फोटपदस्फोटावुक्तौ। असत्यमेव प्रकृतिप्रत्ययाविभागं तदर्थं चाश्रित्य रेखागवयन्यायेन सत्यस्य पदस्फोटस्य व्युत्पादनमभिप्रेतमिति तत्रैव कैयटः। अर्थवदधातुः, स्वंरूपंशब्दस्य, तपरस्तत्कालस्येत्यादि सूत्रेष्वपि स्पष्टमिदं भाष्यकैयटादावित्यलं बहुना। जातेश्च ब्रह्मात्मकत्वमुक्तं हरिणा। सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥ तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्त्वतलादय इति॥ जातेः स्फोटत्वमपि प्रघट्टकान्तरे स एवाह। अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता। कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता इति॥ यद्यपीहाष्टौ पक्षा उक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम्। तत्रापि जातिस्फोटइत्यवधेयम्। पूर्वपूर्वोपमर्देनैवोत्तरोत्तरोपन्यासात्। तथा च प्रथमव्युत्पत्तेर्व्यवहाराधीनतया संपूर्णस्य वाक्यस्य विशिष्टे प्राथमिकः शक्तिग्रह इति निर्विवादम्। स चावापोद्वापाभ्यामवयवानां शक्तिरिति न्यायोपष्टम्भेन त्यज्यतइति दर्शनान्तराणां पन्थाः। एकादेशादिस्थले उक्तरीत्या विनिगमनाविरहेण कैश्चित्पररूपादिस्थले पूर्वलोपाद्यभ्युपगमेन च व्याकरणानां कलहे सति अवयवशक्तेर्दुरुपपादतया प्राथमिकशक्तिग्रह एव प्रमारूप इति तु सैद्धान्तिकः प-

न्थाः। उक्तं च हरिणा। तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्यय इति। ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव स्युरनर्थका इति च। एवंस्थिते निपाता द्योतका विकरणा अनर्थका इत्यादिविचारोपि प्रक्रियादशायामेव। आह च। अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्। धातूपसर्गयोः शास्त्रे धातुरेव तु तादृश इति॥ तादृशो ऽखण्ड इत्यर्थः। एवं च नामार्थयोरभेद एव संसर्गः प्रत्ययार्थः प्रधानमित्यादिव्युत्पत्तयोपि प्रक्रियाश्रया एव। उक्तं च। किंगर्भजन्ये किंगर्भ कीदृग्भातीति नो मते। विचारः फलितः सर्वः प्रकृतिप्रत्ययाश्रय इति। आरोपितस्यापि परिमार्थिके उपायता न विरुद्धा। लिपिस्थूलारुन्धतीशाखाचन्द्रादीनां लौकिकदृष्टान्तानामर्थवादवाक्यपञ्चकोशावतरणादीनां तन्त्रान्तरसिद्धानां पूर्वत्रासिद्धादीनां चैतच्छास्त्रसिद्धानां प्रागेव दर्शितत्वात्। तदेवं पक्षभेदेन अविद्यैव ब्रह्मैव वा स्फुटत्यर्थो ऽस्मादिति व्युत्पत्त्या स्फोट इति स्थितम्। आह च। शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यतइति। समारम्भस्तु भावानामनादि ब्रह्म शाश्वतमिति च। तदेवं वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ताभाणकन्यायेन शब्दविचाराय प्रवृत्तः सन् प्रसङ्गाद्द्वैते औपनिषदे ब्रह्मण्यपि व्युत्पद्यतामित्यभिप्रायेण भगवान्भर्तृहरिर्विवर्त्तवादादिकमपि प्रसङ्गाद् व्युदपादयत्, तत्तु तन्त्रान्तरे स्फुटं प्रकृते नातीवोपयुक्तं चेति नेह तन्यते।

इति स्फोटस्वरूपव्युत्पादनम्॥

स्यादेतत्। चं लिख चकारस्त्रुटित इत्यादिव्यवहाराल्लिपावेव शब्दभ्रमवतां तत्रैव वाचकत्वाभिमानजुषां बालानां पुस्तकमुपयुज्यते यथा तथैव भेदग्रहवतामपीति वस्तुस्थितिः। एवमिहा

पि प्रकृत्यादिविभागे परिमार्थिकत्वाभिमानवतामपि उपयुज्यतएव शास्त्रं तत्किमर्थं कल्पनाव्युत्पादनक्लेशः । अत एव हि भाष्यकारोपि शब्दो नित्यो ऽनित्यो वेति विकल्प्य उभयथापि व्याकरणारम्भस्य निष्प्रत्यूहत्वाद्यथातथास्त्वित्युदासिष्यतेति चेत् । सत्यं, व्युत्पत्त्यर्थं वस्तुस्थितिः कथिता । पक्षभेदेषु हि गौणमुख्येषु व्युत्पादितेषु तत्र परस्परविरुद्धतया भासमाना अपि सिद्धान्तग्रन्था व्यवस्थापयितुं शक्यन्ते।स्वार्थद्रव्यादीनां पंचनां क्रमेण भानमित्यादिवक्ष्यमाणमपि कल्पनयैवोपपादयितुं शक्यतइति दिक् । नन्वस्तु साधुशब्दो विषयः । अस्तु च प्रकृतिप्रत्ययादिकल्पनया तद्व्युत्पादनोपपत्तिः तथापि व्याकरणाध्ययनस्यानुष्ठापकं किमिति चेत् । नित्याध्ययनविधिरिति गृहाण । श्रूयते हि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ध्येयो ज्ञेयश्चेति । निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत् । कार्यतेनुष्ठाप्यतेनेनेति कारणं फलम् । ब्राह्मणेन षडङ्गो वेदो ध्येयो ज्ञेयश्चेत्यन्वयः । तथा च साङ्गवेदाध्ययनतदर्थज्ञानरूपोयं धर्मो नित्यः सन्ध्योपासनादिवदित्यर्थः । श्रुतिरेषेति हरदत्तादयः । स्मृतिरिति तु भट्टाचार्याः । तत्र यदि स्मृतिरेवेति प्रामाणिकं तार्हि आगमः खल्वपीति भाष्येप्यागममूलकत्वादागमः स्मृतिरेवेति व्याख्येयम् । अङ्गत्वं चाङ्गत्वेन संस्तवात् । उक्तं हि शिक्षायाम् । मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते । निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ॥ शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षतइति ॥ उपकारकतयाप्यङ्गत्वम् । व्याकरणं हि अर्थविशेषमाश्रित्य स्वरविशेषादीन् विदधत् पदार्थविशेषनिर्णये उपयुज्यते । ज्योतिषमपि स्वाध्यायोपयोगिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयति । निरुक्तं तु व्याकरणस्यैव प-

रिशिष्टप्रायं बाहुलकादिसाध्यानां लोपागमवर्णविकारादीनां प्रायशस्तत्र संग्रहात् । छन्दोविचितिरपि गायत्र्यादिलक्षणद्वारा गायत्र्या यजतीत्यादिविध्यर्थनिर्णये उपयुज्यते । शिक्षापि वर्णोच्चारणप्रकारं दर्शयति । कल्पसूत्राण्यपि प्रकरणान्तरपठितस्य न्यायलभ्यस्य शाखान्तराधीतस्य चाङ्गजातस्योपसंहारेण प्रयोगं दर्शयन्ति । तस्मात्षडङ्गानि । तेष्वपि प्रधानं व्याकरणम् । पदपदार्थावगमस्य व्याकरणाधीनत्वात् । वाक्यार्थज्ञानस्य तन्मूलकत्वात् । अत एव तस्य शिक्षायां मुखत्वेन निरूपणं कृतम् । मन्वादिस्मृतिष्वपि अङ्गाध्ययनविधयः प्रसिद्धा एव । तथा चाध्ययनविधिव्याकरणाध्ययनस्यानुष्ठापक इति स्थितम् । तथा च सन्ध्योपासनादेरभावे प्रत्यवायो ऽनुष्ठाने च पापक्षय इति यथाभ्युपेयते तथा व्याकरणाध्ययनस्याप्यननुष्ठाने अनुष्ठाने च बोध्यम् । रक्षाप्रभृतीनि फलान्तराण्यपि सन्ति । तथा च भाष्यम् । कानि पुनरस्य प्रयोजनानि । रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति । अत्र प्रयुज्यते प्रवर्त्यते ऽनेनेति करणल्युडन्तः । प्रयोजयतीति कर्तृव्युत्पत्त्या बाहुलकात्कर्तृल्युडन्तो वा । उभयथापि प्रवर्त्तकविधिपरः पुल्लिङ्गः प्रयोजनशब्द एकः । फलपरः क्लीबो ऽपरः । उभयोर्नपुंसकमितिनपुंसकैकशेषे एकवद्भावस्य वैकल्पिकतया प्रश्ने बहुवचनमुत्तरे एकवचनं च बोध्यम् । तत्र आगमः प्रवर्त्तकः । रक्षोहलाघवासन्देहास्तु फलानीति विवेकः । तत्र प्रवर्त्तक आगमो व्याख्यातः । फलानि व्याख्यायन्ते । तत्र रक्षा वेदसंरक्षणम् । तथाहि । भाषायामदृष्टा लोपागमवर्णविकाराश्छन्दसि दृश्यन्ते । ते केवलप्रयोगशरणैः प्रामादिकाः सम्भाव्येरन् । वैयाकरणस्तु लक्षणदर्शी तदेव रूपं स्थापयति । तत्र लोपोदाहरणम् । त्मना देवेषु विविदे मितद्रुः । त्मना, आत्मनेत्यर्थः ।

मन्त्रेष्वाङ्यादेरात्मन इत्याकारलोपः। आगमो यथा। देवासः ब्राह्मणासः। आज्जसेरसुगित्यसुगागमः। लोपागमौ यथा। देवा अदुह्र। अदुहतेत्यर्थः। दुहेर्लङो झस्यादादेशे कृते लोपस्तआत्मनेपदेष्विति तलोपः। बहुलंछन्दसीतिरुडागमः। एतेन नाशिरं दुह्रेविश्वाइत्ते धेनवो दुह्र इत्यादिलडन्तमपि व्याख्यातम्। वर्णविकारो यथा। गृभ्णामितेसौभगत्वाय। हग्रहोर्भश्छन्दसि हस्येति वक्तव्यमिति भकारः। प्रत्ययोपि छान्दसोस्ति, यथा। उद्भ्राभं च निग्राभं चेति। उदिग्रह इतिसूत्रे उद्भ्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोरिति वचनादुन्निपूर्वाद्ग्रहेर्घञ्। तत्र उत्पूर्वात्सूत्रेण लोकेपि सिद्धो घञ्। निपूर्वात्तु वार्त्तिकोक्तश्छन्दस्येव। सन्निवेशविशेषयुक्ताः पात्रविशेषाः स्रुचः। इह तु जुहूपभृतोरेव ग्रहणम्। उद्भ्राभं चेति जुहूमुद्यच्छति, निग्राभञ्चेत्युपभृतं नियच्छतीति वचनात्। भकारादेशः प्राग्वत्। ऊहोपि प्रयोजनम्। तथाहि। यत्राङ्गजातं सम्पूर्णमुपदिष्टं सा प्रकृतिः। यथा दर्शपूर्णमासौ। यत्र नोपादिष्टं सा विकृतिः। यथा सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति विहितो यागः। तत्र वैकृतस्य विधेर्विषयभूतायां भावनायां करणीभूते यागे उपकारकाकांक्षायां तन्मुखेन प्राकृतमङ्गजातं प्राप्यते। वैदिके करणे तादृशानामेवाङ्गानामपेक्षितत्वात्। तेषामेव प्रकृतौ कल्पसामर्थ्यात्। तद्विशेषस्य चैकदेवतात्वादिना शक्यज्ञानत्वात्। तस्मात्प्रकृतिवद्विकृतिःकर्त्तव्येति पूर्वमीमांसायां स्थितम्। तत्र यस्याङ्गस्य प्रकृतौ य उपकारः कल्पस्तस्य विकृतावसंभवे निवृत्तिः। यथा प्रकृतावबघातस्य वैतुष्यमुपकारतया कल्पं तस्य कृष्णलेष्वसंभवादवघातस्य निवृत्तिः। मन्त्रा अप्यङ्गम्। तेषां चानुष्ठेयार्थप्रकाशनं कार्यम्। तत्र प्रकृतौ यस्य मन्त्रस्य यदभिधेयं तच्चे-

द्विकृतौ साकल्येन नास्ति तदा कृत्स्नस्य मन्त्रस्य निवृत्तिः । यथा । अवरक्षो दिवः सपत्नं वध्यासमित्यवघातमन्त्रस्य कृष्णलेषु । यस्य त्वेकदेशस्याभिधेयं नास्ति तस्य तावन्मात्रं निवर्तते । यथा । अग्नये त्वा जुष्टं निर्वपामीत्यस्य मन्त्रस्यावयवभूतं देवताभिधायि पदमौषधद्रव्यकत्वेन एकदेवताकत्वेन चाग्नेयविकारभूते सौर्ये निवर्त्तते अग्निशब्दे च लुप्तद्वारकतया निवर्तमाने एकारोपि निवर्त्तते । अकारान्तेतरप्रकृतिसन्निधानेनैव हि एकारस्य सम्प्रदानं वाच्यम् । अकारान्तात्तु यशब्दस्य । ततश्चतुर्थ्यन्तसूर्यायेत्याद्युदात्तम् अग्नयइत्यस्य मध्योदात्तस्य स्थाने ऊह्यम् । सोयं प्रकृत्यूहः । लिङ्गस्य क्वचिदूहः । यथा । देवीरापः शुद्धाः स्थेत्यप्सु विनियुक्तो मन्त्रः तस्याज्ये ऊहः । देवाज्यशुद्धमसीति । प्रत्ययमात्रस्य क्व चिदूहः । यथा । माभेर्मासं विक्था इति पुरोडाशेवदानमन्त्रः तस्य धानासूहः । माभैष्टमासंविजिध्वमित्यादिरिति हरदत्तादयः । याज्ञिकास्तु संविग्ध्वमित्यूहमाहुः । युक्तं चैतत् । प्रकृतावनिट्कतया विजिर्पृथग्भावइत्यस्य प्रयोगो न तु ओविजी भयचलनयोरित्यस्येत्यवधारणात् । लाघवमपि प्रयोजनम् । तथाहि । अध्यापनं ब्राह्मणस्य वृत्तिः । तन्निर्वाहश्च वैदुष्याधीनः । वैदुष्यं च साध्वसाधुविवेकः । स च न प्रतिपदपाठादिना सम्भवति । शब्दानामानन्त्यात् । तस्मादुत्सर्गापवादरूपलक्षणद्वारा तद्बोधने लाघवम् । अन्यथा तु गौरवम् । असन्देहोपि प्रयोजनम् । तथाहि । स्थूलपृषतीमनड्वाहीमालभेतेति श्रूयते । तत्र सन्देहः कर्मधारयोयं बहुव्रीहिर्वेति । तत्र कर्मधारयपक्षे पृषतीशब्देन मत्वर्थलक्षणया पृषत्त्वतीबिंदुमती गौरेवाभिधीयते स्थूलापि सैव बिन्दूनां स्थौल्यं तानवं वा यथा तथास्तु । बहुव्रीहौ तु स्थौल्यं पृषत्स्वे-

वेति । गौस्तु स्थूला कृशा वेत्यत्रानादरः । तत्र लकाराकारे उदात्तत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहिं वैयाकरणो निश्चिनोति । ततश्च निश्चयेन प्रतिबन्धात्संशयानुत्पादः । स एवासन्देहः । अर्थाभावेव्ययीभावादसन्देहमिति स्यादिति चेन्न । पर्यायेणाव्ययीभावतत्पुरुषसंज्ञाद्वयमपीह भवतीति द्वितीये उपपादयिष्यमाणत्वात् । अत एवोभयथा मुनिप्रयोगः । अद्रुतायामसंहितामिति, अथासंहितयेति च । एवं इन्द्रपीतस्योपहूतो भक्षयामीत्यादावपि स्वरेणैव बहुव्रीहिनिर्णये इन्द्रपीताधिकरणमवैयाकरणान्प्रति सार्थकम् । कृत्वाचिन्तान्यायेन वा नेयमिति दिक् । तदेवं रक्षोहलाघवासन्देहाख्यानि चत्वारि फलानि व्याख्यातानि । आगमस्तु प्रवर्त्तक इत्युक्तम् । भाष्ये तु सन्दर्भशुध्यर्थं फलचतुष्टयस्य प्राक् पश्चाद्वा प्रवर्त्तके वक्तव्ये मध्ये तदुक्त्या फलसन्दंशेन नित्यानामपि फलपर्यवसानमस्तीति सूचितम् । फलं तु पापक्षयः प्रत्यवायानुत्पत्तिर्वा । धर्मेण पापमपनुदति । विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमिच्छतीत्यादिवचनानीह साधकानीति दिक् । इमानि च भूयइत्यादिभाष्येण प्रवर्त्तकवचनान्तराणि उदात्तत्य व्याख्यातानि । तद्यथा । ते सुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुस्तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति ब्राह्मणम् । अत्र न म्लेच्छितवा एतस्य विवरणं नापभाषितवै इति । उभयत्रापि कृत्यार्थे तवैकेन्केन्यत्वन इति तवैप्रत्ययः । धातूनामनेकार्थतया निन्दावचनान्म्लेच्छधातोः कर्मणि घञ् । तेनापशब्दसामानाधिकरण्यं न विरुध्यते । अत्र न म्लेच्छितव्यमितिनिषेधस्य ते सुरा इत्यर्थवादः । न चेह रात्रिसत्रन्यायेन आर्थवादिकं फलमस्त्व-

ति वाच्यम् । द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति न्यायेन अपाघश्लोकश्रवणवत्प्राशस्त्यमात्रपरत्वात् । प्रकरणात्कृत्वसुचो ह्ययन्निषेध इति यर्वाणस्तर्वाणो नामेत्यादावुत्तरग्रन्थे भाष्यकारैरेव स्फुटीकरिष्यते । अत एव इहापि पराभूता मा भूमेत्यध्येयं व्याकरणमिति नोपसंहृतम् । किं तु म्लेच्छा मा भूमेत्येव । म्लेच्छा निन्द्याः । शास्त्रबोधितविपरीतानुष्ठानादिति भावः । अत्र हैहेमयोगे हैहयोरितिप्लुते प्लुतत्वप्रयुक्ते प्रकृतिभावे च कर्त्तव्ये तदकरणं म्लेच्छनामित्येके । ननु सर्वः प्लुतः साहसमनिच्छता विभाषा कर्त्तव्य इति भाष्यकृता वक्ष्यमाणत्वान्नैष दोष इति चेत् । सत्यम् । अत एवापरितोषाद्वाक्यद्विर्वचनं म्लेच्छनामित्यपरैर्व्याख्यातम् । सर्वस्य द्वेइत्यत्र पदग्रहणस्य चोदितत्त्वादिति तेषां भावः । ननु नेदं शास्त्रीयं द्विर्वचनं किं तु तात्पर्यद्योतनार्थमैच्छिकः पुनः प्रयोगः । अनावृत्तिः शब्दादिनावृत्तिः शब्दादिति वदिति चेत्, तर्ह्याम्रेडितस्वरानुपपत्तिः । यदि तु तत्राम्रेडितस्वरविनिर्मुक्त एव पाठस्तर्हि अरिशब्दे रेफस्य लत्वमपशब्द इत्यवधेयम् । इदं च भाष्यादिषु प्रसिद्धं श्रुतिपाठमनुसृत्य व्याख्यातम् । अयं च पाठः क्व चिच्छास्त्रायामन्वेषणीयः । माध्यन्दिनानां शतपथब्राह्मणे तु हेलवो हेलव इति वदत इति पठित्वा तस्माद् ब्राह्मणो न म्लेच्छेदिति पठ्यते । तत्र यकारस्थाने वकारोपशब्द इति स्पष्टमेव । तथा शिक्षासु पठ्यते । मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधादिति । स्वरेण स्वरतः । हीयमानपापयोगाच्चेति तसिः । मिथ्याप्रयुक्तः । यदर्थप्रतिपादनाय प्रयुक्तस्ततोर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन् । अत एव तमर्थं नाहेत्यर्थः । वागेव वज्रः हिंसकत्वात् । य-

जमानं हिनस्तीति । यथाध्वर्युकृताद्धोमाद्यजमाने धर्मोत्पत्तिः एवमध्वर्युकृतादपशब्दप्रयोगाद्यजमाने प्रत्यवाय इत्यर्थः । यथेत्युदाहरणे । इन्द्रशत्रुः । इन्द्रशत्रुशब्दः पुरा किल विश्वरूपाख्ये त्वष्टुः पुत्रे इन्द्रेण हते सति कुपितस्त्वष्टा इन्द्रस्य हन्तारं वृत्राख्यं पुत्रान्तरमुत्पिपादयिषुराभिचारिकं यागं कृतवान् । तत्र च इन्द्रस्य शातयिता शत्रुः हिंसक इति यावत् तथाभूतः सन् वर्धस्वेतिप्रतिपादितुं इन्द्रशत्रुर्वर्धस्वेति प्रयुक्तम् । ण्यन्ताच्छदेरौणादिकः क्नुप्रत्ययः । प्रज्ञादिगणे निपाताद् ह्रस्वः । इन्द्रशत्रुत्वस्य विधेयत्वान्न सम्बोधनविभक्तिः । तस्या अनुवाद्यविषयकत्वात् । अत एव राजन् युध्यस्व राजा भव युध्यस्वेत्यनयोर्व्यवस्थयैव प्रयोगः । राजत्वस्य सिद्धत्वे सम्बोधनविभक्तिर्न तु विधेयत्वेपीति । एवं स्थिते इन्द्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्तेन्तोदात्ते वक्तव्ये प्रमादादाद्युदात्तः किलोक्तः । तथा च पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थो लब्धः । इन्देर्हि धातोरौणादिके ऋजेन्द्रेत्यादिना रन्प्रत्यये कृते इन्द्रशब्द आद्युदात्तो व्युत्पादितः । तेनेन्द्र एवास्य हिंसकः सम्पन्न इति श्रुतीतिहासपुराणादिषु प्रसिद्धम् । तदिहोदाहरणतयोक्तम् । स्यादेतत्, यज्ञकर्मण्यैकश्रुत्येह भवितव्यम् । सा च तत्पुरुषबहुव्रीह्योरविशिष्टेति । अत्राहुः । जपादिपर्युदासेन मन्त्रेष्वेव एकश्रुतिर्विधीयते । स्वेच्छया प्रयुज्यमानश्च मन्त्रो न भवति । तदुक्तं भेदलक्षणे जैमिनिना । अनाम्नातेष्वमन्त्रत्वमिति । आपस्तम्बश्चाह । अनाम्नाता अमन्त्रा यथा प्रवरोहनामधेयग्रहणानीति । अत एव मन्त्रो हीन इति पाठस्य शिक्षायां प्रसिद्धेत्वपि ऊह्यमानस्यामन्त्रतया यथन्द्रेशत्रुरिति वाक्यशेषो ऽसङ्गतः स्यादतो मन्त्रशब्दः शब्दमात्रपर इत्याशयेन भाष्ये दुष्टः शब्द इति पठितम् । ननु स्वार्हे-

द्रशत्रुर्वर्द्धस्वेति वेदे पठ्यतएवेति । सत्यम् । ऊहितं यदमन्त्रभूतं अनुकार्यं तदनुकरणस्य पाठेपि अर्थपरस्यानुकार्यस्य लौकिकत्वानपायात् । नन्विन्द्रशत्रुशब्दस्य लौकिकत्वे कथं स्वरप्रयुक्तयोर्गुणदोषयोः प्रसक्तिः स्वरस्य वेदमात्रविषयकत्वादिति चेन्न । स्वरविधौ छन्दोधिकाराभावात् । एतावानेव हि भेदः । यच्छन्दसि त्रैस्वर्यमेकश्रुतिश्च व्यवस्थया ऽऽश्रीयते । लोके त्वैच्छिको विकल्पः । अत एव एकश्रुत्या सूत्रपाठस्त्रैस्वर्येण वेति पक्षद्वयमपि तत्रतत्रोपन्यस्तमिति वक्ष्यामः । नन्वेवं उच्चैस्तरांवेतिसूत्राद्विकल्पानुवृत्त्यैव सिद्धौ विभाषाछन्दसीत्यत्र विभाषाग्रहो व्यर्थः स्यात् । प्रसज्यप्रतिषेधे तु नायं दोषः । यज्ञकर्मणीत्यस्य निवृत्तये पुनर्विभाषाग्रहणात् । न च पर्युदासपक्षेप्येवमेवास्त्विति वाच्यम् । नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतया आरम्भसामर्थ्यादेव तन्निवृत्तिसिद्धेः । प्रसज्यप्रतिषेधे तु नारम्भसामर्थ्यं, ऊहादिष्वमन्त्रेषु चरितार्थस्य पूर्वविधेरुत्तरेण छन्दोमात्रविषयकेण बाधसम्भवात् । नह्यूहादीनां छन्दस्त्वमस्ति । मन्त्रब्राह्मणेतरत्त्वात् । तस्मादसमर्थसमासमाश्रित्यापि प्रसज्यप्रतिषेध एवागत्या स्वीकर्तुमुचित इति चेन्न । पर्युदासपक्षेपि मन्त्रे नित्यं ब्राह्मणे वेति विषयविभागसंभवेन यज्ञकर्मनिवृत्तये विभाषाग्रहणसम्भवात् । उक्तापरितोषादेव तु केचिज्जपादिषु प्रसज्यप्रतिषेधमाश्रित्य इहाप्येकश्रुतेः प्राप्तौ सत्यांतदकरणं बहुव्रीहिस्वरकरणं च स्वरतोपराधादित्यस्यार्थ इत्याहुः । श्रूयते च यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हि चित् ॥ निगदेन, पाठमात्रेण । शुष्कैधइति सान्तेन क्लीबेन एधशब्देन अकारान्तेन वा पुल्लिंगेन निर्वाह्यम् । न ज्वलति, न प्रकाशते निष्फलं भवतीत्य-

र्थः। निरुक्ते तु। अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा चेत्युपक्रम्य स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योर्थं योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मेति मन्त्रमुदात्तत्य यद्गृहीतमविज्ञातमित्यादि पठितम्। तत्रापि गृहीतं शब्दतः, अविज्ञातं तु अर्थतः। प्रकृतिप्रत्ययादिविभागेन वेत्यादि शेषं प्राग्वत्। अन्यत्रापि श्रूयते। एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। एतच्च एकः पूर्वपरयोरिति सूत्रे भाष्यकृद्वक्ष्यति। एतन्मूलकमेव कात्यायनप्रणीतेषु भ्राजाख्येषु श्लोकेषु स्मर्यते। यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले। सोनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैरिति॥ दुष्यति चापशब्दैरित्यत्र अवैयाकरणः कर्त्ता सामर्थ्याद्बोध्यः। तथा। अविद्वांसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्॥ अयमहमित्यस्य अनुकरणं चानिति परमिति गतिसंज्ञा। ततो गतिसमासेपि अस्य वामीयमित्यादाविवानुकरणत्वादेव विभक्तेर्लुङ्न। याज्ञिकाः पठन्ति प्रयाजाः सविभक्तिकाः कार्या इति॥ यद्यपि प्रकृतौ प्रयाजमन्त्राः सविभक्तिका एव पठ्यन्ते। तथापि यदि आधानादनन्तरं यजमान उदरव्यथावान् स्याद्यदि वा संवत्सरमध्ये तस्य महती विपत्स्यात्तदा नैमित्तिकीं पुनराधेयेष्टिं विधाय तत्रेदमाम्नातं प्रयाजाः सविभक्तिका इति। तत्र केवलविभक्तेः प्रयोगानर्हत्वात्प्रकृतिराक्षिप्यते सा चाग्निशब्दरूपा न तु या का चित्। निरुक्ते देवताकाण्डे, अथ किं देवताः प्रयाजानुयाजा इति प्रश्नमवतार्य मन्त्रवर्णादीनुदात्तत्य आग्नेया इति तु स्थितिरित्युपसंहारात्। तस्मा-

दादितश्चतुर्षु प्रयाजेषु चतस्रो विभक्तयो ऽग्निशब्दप्रकृतिकाः पठ्यन्ते इत्यादिश्रौतग्रन्थेषु द्रष्टव्यम्। तथान्यत्रापि यो वा इमां पदशः स्वरशो ऽक्षरशो वाचं विदधाति स आर्त्विजीन इति। पदंपदमिति संख्यैकवचनाच्च वीप्सायामिति शस्। स्वर उदात्तादिः। अक्षरं व्यञ्जनसहितोच्। ऋत्विजमर्हतीत्यार्त्विजीनो यजमानः। ऋत्विक्कर्मार्हतीत्यार्त्विजीनो याजकः। यज्ञर्त्विग्भ्यां घखञावितिसूत्रेण यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानमितिवार्त्तिकेन च खञ्। यजने याजने च विदुष एवाधिकार इति भावः। ऋग्वेदेपि बहवो मन्त्रवर्णाः। चत्वारिशृङ्गा, चत्वारिवाक्, उतत्वः पश्यन्, सक्तुमिवेत्यादयः। तितउपरिपवनं भवतीति भाष्यम्। चालनी तितउः पुमानिति तु अमरस्य प्रमाद इत्येके। वस्तुतस्तूक्तभाष्यानुरोधादमरग्रन्थे पुंस्त्वायोगमात्रं व्यवच्छेद्यं न त्वन्ययोगोपि। तथा च पुंनपुंसकवर्गे, स्याद्वास्तु हिंगु तितउ इतित्रिकाण्डशेषः। अत एव तितउमाचष्टे तितापयतीत्यभियुक्तग्रन्था अपि संगच्छन्तइति दिक्। याज्ञिकाः पठन्ति। आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति। तथा। दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यन्तरन्तस्थमहद्धं त्रिपुरुषानुकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति। नामकरणे अधिकारिणः पितुर्ये त्रयः पुरुषास्ताननु कायति अभिधत्ते इति त्रिपुरुषानूकम्। अन्येषामपि दृश्यतइति दीर्घः। त्रिपुरुषेत्यत्र पात्रादित्वात्स्त्रीत्वाभावः। मूलविभुजादित्वात्कः। यत्तु उपपदाविवक्षया आतश्चोपसर्गइति कं कृत्वा ततः षष्ठीतत्पुरुष इति। तत्तु कर्मण्यणितिसूत्रे अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेति वार्त्तिकस्य नदीसूत्रे स्त्रियाख्यावितिमूलविभुजा-

दित्वात्क इति भाष्यस्य च अननुगुणम्। अत एव गङ्गाधरादि-शब्दानां संज्ञाशब्दत्वमिति प्राञ्चः। वस्तुतस्तु प्रथमं कर्मविव-क्षायामनूकपदं व्युत्पाद्य पश्चात्कर्मसंबन्धेप्यदोषः वार्त्तिकादिकं तु प्रथमभेव कर्मविवक्षामभिप्रेत्य, अन्यथा कृतपूर्व्यादिषु का ग-तिः। अत एव शक्यं चक्षुरुपहन्तुमिति भाष्यव्याख्यायां बहि-रङ्गस्त्रीत्वप्रतीत्या अन्तरङ्गः पदसंस्कारो न विहन्यतइति कैयटो-पि वक्ष्यति। विवक्षा च लोकप्रसिद्ध्यनुसारिणी न तु स्वायत्ते-ति विपराभ्यांजेरित्यादावपि पूर्वं धातुः साधनेन युज्यतइति पक्षमुपष्टभ्य विजयतीत्यादि नापादनीयमिति दिक्। तथा च ऋग्वेदएव पठ्यते। सुदेवो असि वरुण यस्य ते सप्तसिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिवेति। अस्यार्थः। हे वरुण सत्यदेवोसि यस्य ते काकुदं तालु काकुर्जिव्हा सा उद्यते उ-त्क्षिप्यते ऽस्मिन्निति काकुदं वदेरुत्क्षेपणमर्थः। धातूनामनेकार्थत्वा-त्। ततो घञर्थे कविधानमित्यधिकरणे कः सम्प्रसारणं षष्ठी-तत्पुरुषे शकन्ध्वादित्वात्पररूपम्। नुद प्रेरणे इत्यस्मादाधिकरणे कः पृषोदरादित्वान्नुशब्दस्य लोप इत्यन्ये। निरुक्तस्वरसोप्ये-वम्। सप्तसिन्धव इव सिन्धवो विभक्तयः। अनुक्षरन्ति तालु प्रा-प्य प्रकाशन्तेइत्यर्थः। अत्र दृष्टान्तः। यथा सच्छिद्रां लोहमयीं प्रतिमां प्रविश्याग्निः प्रकाशते तथेति। अग्निर्हि तत्रत्यं मलं भ-स्मीकृत्य प्रतिमां शुद्धां करोति तथा विभक्तयोपि शारीरं पापमपाकुर्वन्तीति भावः। सूर्मी स्थूणा ऽयःप्रतिमेत्यम-रः। स्मर्यते च। सूर्मी ज्वलन्तीमालिङ्गेन्मृत्यवे गुरु-तल्पग इति। अमिपूर्व इत्यत्र वाच्छन्दसीत्यनुवृत्तेर्यणादेशः। सुषिरामित्यत्रार्शआद्यच् अभेदोपचारो वेत्याहुः। वस्तुतस्तु ऊषसुषिमुष्कमधोर इति मत्वर्थीयो रप्रत्ययः। रन्धूं श्वभ्रं वपा-

सुषिरित्यमरः । सरन्ध्रे सुषिरं त्रिष्विति च सुष्ठु स्यतीति सुषिरिति क्षीरस्वामी । गर्ते गर्त्तान्विते वाद्ये विशेषे सुषिरं त्रिष्विति शाश्वतः ॥ इति प्रयोजनप्रपञ्चः ॥ इत्येवं विषयप्रयोजनयोरुक्तयोः सम्बन्धाधिकारिणावुक्तप्रायावेवेति पृथङ्नोक्तौ । इह येन प्रयोजनं पृष्टन्ततोन्य एव तटस्थइत्थम्प्रत्यवतिष्ठते । ननु यथा धीष्वेत्याचार्येणोक्ते प्रयोजनप्रश्नमकृत्वैव वेदमधीयते । तद्वदङ्गभूतं व्याकरणमप्यध्येष्यन्ते तत्किं प्रयोजनवर्णनक्लेशेनेति । अत्रेदमुत्तरम् । प्रायेणेदानीन्तनानामल्पायुष्कत्वाद्विघ्नबहुलत्वाच्च प्रधानभूतो वेदस्तावत्पाठ्यते । तदध्ययनकाले च बाल्यात्प्रयोजनादिकं प्रष्टुमसमर्थाः शिष्या गुरुणा उपदिश्यमानं वेदं गृह्णन्तीति युक्तम् । ततो गृहीतवेदाः प्रौढिमापन्ना विवाहार्थं त्वरमाणा व्याकरणाध्ययनाय गुरुणा प्रेर्यमाणा अपि न सहसा प्रवर्त्तन्ते । वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः । अनर्थकं व्याकरणं, इति प्रत्यवतिष्ठन्ते । तान्प्रति युक्तमेव प्रयोजनादिवर्णनम् । पूर्वकल्पेषु व्याकरणशिक्षादीनि लक्षणानि प्रथमं पाठयित्वा तत्तल्लक्षणानुसन्धापनपूर्वकं लक्ष्यभूतं वेदं ग्राहयन्तः स्थिताः । तदा परं बाल्यावस्थायां व्याकरणपाठात्प्रयोजनप्रश्नविरहे तत्प्रतिपादनमपि न कर्त्तव्यमेवेति । यद्यपि, श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान्विप्रोर्द्धपञ्चमान् ॥ ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत् । वेदाङ्गानि रहस्यं च कृष्णपक्षेषु सम्पठेदिति मनुवचनस्य इत ऊर्ध्वमनध्यायेष्वङ्गान्यधीयीतेत्यादिस्मृत्यन्तराणां च पर्यालोचनया वेदवेदाङ्गाध्ययनसमकालता लभ्यते । तथापि ऋषिवचनत्वाविशेषाद्भाष्यकारोक्तैर्मानवादेश्च व्रीहियववद्विकल्प एवेति तत्त्वम् । तदेवमनुबन्धचतुष्टयस्य सुस्थत्वात्साधुशब्दव्यु-

त्पादनं कर्त्तव्यमिति स्थितम्। ननु किमिदं साधुत्वम्। साधयति बोधयतीति साधुरिति व्युत्पत्त्या बोधकत्वं तदिति चेन्न। गाव्यादावपि तत्सत्त्वात्। शक्तत्वं तदिति चेन्न। पचतीत्यादौ विकरणानामसाधुतापत्तेः। तेषामनर्थकत्वात्। डुपचष्लट्इत्यादीनां साधुतापत्तेश्च। लाक्षणिकेष्वव्याप्तेश्च। तेषामपि लक्ष्येर्थे ऽशक्तेः। क्व चिच्छक्तितायास्तु अश्वास्वादिष्वतिप्रसक्तेः। वृत्तिमत्त्वं तदिति चेत्। न। द्योतकेषु निपातेष्वव्याप्तेः। औपसंदानिकी शक्तिरेव द्योतनेति चेत्। न। प्रोत्तराजित्वघोत्तरटत्वयोरविशेषेण विनिगमनाविरहाच्छक्तितापत्तौ व्यासज्यवृत्तिशक्तौ विश्रान्तेः। ततश्च अद्द्विर्वचनाद्यव्यवस्थापत्तिः। न च जातिविशेष एव साधुतेति वाच्यम्। कत्वादिना सङ्करापत्तेरिति। अत्राहुः। अनपभ्रष्टतानादिर्यद्वाभ्युदययोग्यता। व्याक्रिया व्यञ्जनीया वा जातिः काऽपीह साधुतेति। अस्यार्थः। शक्तिवैकल्यादिप्रयुक्तमन्यथोच्चारणमपभ्रष्टता तद्विरहोऽनपभ्रष्टता॥ सैव साधुता सा चार्थविशेषान्तर्भावेणैव। तथाहि। यमर्थं शक्त्या लक्षणया वा बोधयितुं द्योतयितुं वा यादृक्शब्दोनादिः प्रयुक्तस्तस्मिन्नर्थे दोषादन्यथात्वं प्राप्तः सोसाधुः। अन्यथा तु साधुरिति। येपि गाव्यादिष्वेव प्रथमं व्युत्पन्नाः सन्तस्तान्प्रयुञ्जते तेषामप्यन्यथोच्चारणमस्त्येव। तत्र च दोषप्रयोज्यतास्त्येव। मूलप्रयोक्तुर्भ्रमाद्यन्यतमत्वात्। यद्वा अनादिता साधुता। अनादिरिति तु श्लोके भावप्रधानो निर्देशः। आदेरभावो ऽनादिरिति वा। असन्देह इतिवत्तत्पुरुषः। अभ्युदययोग्यता वा ऽस्तु साधुता। रत्नतत्त्ववच्छास्त्रपरिशीलनशालिभिर्गम्यो जातिविशेषो वेति। यत्तु जातिसङ्कर इत्युक्तं, तन्न। गुणगतजातौ तस्यादोषत्वात्। तथाहि। यस्य देवदत्तादेरनो-

ष्ठ्या वर्णा एव पूर्वं श्रुतास्तस्य कुड्यादिव्यवहितस्य ओष्ठ्यवर्णेषु श्रुतेषु यदनुमानं जायते तदोष्ठ्यानोष्ठ्यसाधारणतदनुमापकजात्यंगीकारे सत्येव घटते न तु तत्तद्व्याप्यनानाजातिस्वीकारे। ओष्ठ्यवर्णवृत्त्यसाधारणजातेः प्रागगृहीतत्वेनानुमितिसामग्रीवैकल्यात् । वस्तुतस्तु उपाधिसङ्करवदेव जातिसङ्करोपि सर्वत्रास्तु। दूषकताबीजानिरुक्तेः । विनिगमकाभावेन भूतत्वमूर्त्तत्वयोरिव शरीरत्वपृथिवीत्वयोर्द्वयोरपि जातित्वभङ्गापत्तेश्च । तस्माच्चतुर्विधमपि साधुत्वं निर्दोषं व्याकरणैकगम्यं च । एवमसाधुत्वमपि चतुर्द्धा । अपभ्रष्टता, सादिता, प्रत्यवाययोग्यता, तदवच्छेदकजातिविशेषो वेति । टिघुभादिसंज्ञासु यद्यपि पुण्यपापजनकतारूपे साधुत्वासाधुत्वे न स्तस्तथापि अनपभ्रष्टत्वरूपं साधुत्वमस्त्येव । तदेवानुशासनप्रवृत्तावुपयोगि । भस्येत्यादिसौत्रनिर्देशात् कुत्वं कस्मान्न भवतीत्यादिभाष्याच्चेत्याहुः । एवं चानादित्वमभ्युदययोग्यत्वं वा अनपभ्रष्टतामात्रेण न सिध्यति । किं तु पौरुषेयसङ्केतविरहविशिष्टेनेत्यवधेयम् । तदेतदुक्तम् । यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः । कथं नु तासां साधुत्वं नैव ताः साधवो मताः । अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता । हस्तचेष्टा यथा लोके तथा सङ्केतिता इमाः । ततश्च, नासां प्रयोगे ऽभ्युदयः प्रत्यवायोपि वा भवेत् । लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलमिति । तदयं निर्गलितोर्थः । यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्तइति पक्षे । अनिदंप्रथमाः शब्दाः साधवः परिकीर्त्तिताः । तएव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः पुम्भिरपशब्दा इतीरिता, इति च साध्वसाधुलक्षणे आश्रीयमाणे टिघुभादीनां साध्वसाधुबहिर्भावः स्पष्ट एव । तेषामप्यनादितेति पक्षे तु चतुर्विधापि प्रागुक्ता साधुतास्त्येव । उ-

क्तश्च। व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्। नित्यएव तु सम्बन्धो डित्थादिषु गवादिवत्। वृद्ध्यादीनां च शास्त्रेस्मिञ्छक्त्यवच्छेदलक्षणः। अकृत्रिमोभिसम्बन्धो विशेषणविशेष्यवदिति। पक्षद्वयेप्यनुशासनविषयता निर्विवादेति। नामकरणे त्वयं विशेषः। कृतं कुर्यान्न तद्धितमित्यादिगृह्यसूत्राविरोधिनामेव साधुता। ताद्विरोधिनां तु देशभाषानुसारेण क्रियमाणानां कूचीमञ्चीत्यादिनामधेयानामसाधुतैव। तदेतदृक्तन्त्रसूत्रे वार्तिकव्याख्यावसरे स्फुटीकरिष्यते॥ इति साधुत्वनिर्वचनम्॥ व्युत्पादनं च प्रकृतिप्रत्ययादिकल्पनया उत्सर्गापवादरूपलक्षणैरेव। न तु साध्वसाध्वोर्वा अन्यतरस्य वा प्रतिपदपाठेन। शब्दानामानन्त्येन तदसम्भवादित्युक्तम्। स्यादेतत्, लक्षणप्रणयनमपि किं जातिपक्षमाश्रित्य उत व्यक्तिपक्षम्। आद्ये सकृद्गतौ यद्बाधितं तद्बाधितमेवेति न सिध्येत्। तथाहि। जातौ पदार्थे द्वयोर्विध्योः परस्परपरिहारेण तत्तज्जात्याक्रान्तव्यक्तिविशेषे चरितार्थयोः क्वचिदेकत्र प्रसङ्गे परस्परप्रतिबन्धादप्रतिपत्तिरेव स्यात् सत्प्रतिपक्षवत्। तथा च वक्ष्यति। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति। तत्र च विप्रतिषेधसूत्रं विध्यर्थं परं तावद्भवतीति। तस्मिंश्च कृते यदि पूर्वस्य निमित्तमस्ति तर्हि भवत्येव तत्। यथा भिन्धकीत्यत्र भिनद् हि इति स्थिते परत्वाद्धिभावे कृते पुनःप्रसङ्गविज्ञानादकञ्भवति। तदेवं जातिपक्षे पुनः प्रसङ्गविज्ञानं यद्यपि सिध्यति तथापि सकृद्गताविति न सिध्यति। तथा च जुहुतात्त्वमित्यत्र जुहु हि इति स्थिते धिभावं बाधित्वा परत्वात्तातङि कृते स्थानिवद्भावेन स्यादेव धिः। व्यक्तिपक्षे तु सकलव्यक्त्युद्देश्यकस्य शास्त्रस्य व्यक्त्यन्तरे चरितार्थत्वासम्भवाद्विकल्पप्रसङ्गे नियमार्थं सूत्रं परमेव भवति न तु पूर्वमिति। तथा चैतत्सूत्रबलेन तत्र

पूर्वलक्षणस्य व्यक्त्यन्तरमात्रविषयकत्वं कल्प्यतइति एतद्व्यक्ति-विषयकलक्षणाभाव एव पर्यवस्यति। तथा च जुहुताच्चमित्यादेः सिद्धावपि भिन्धकीत्यादि व्यक्तिपक्षे न सिध्यति। तस्मादशक्यमन्यतरपक्षाश्रयणेन लक्षणप्रणयनमिति चेत्। सत्यम्। अत एव लक्ष्यानुरोधात्पक्षद्वयमप्याश्रीयते। क्वचित्कश्चित्पदार्थ इति। तत्र जातिवादिनामयं भावः। लाघवाज्जातिर्वाच्या। व्यक्तीनामानन्त्येन तासां वाच्यत्वे गौरवम्। वाहदोहाद्यन्वयस्तु लक्षितायां व्यक्ताविति। व्यक्तिवादिनस्त्वाहुः। अनुपपत्तिं विनापि व्यक्तिप्रतीतेरनुभवसिद्धतया व्यक्तिरेव वाच्या। त्वप्रत्ययादिकं विना जातेः प्राधान्येनाप्रतीतेश्च। वाहाद्यन्वयोप्येवं समञ्जसः। यत्तूक्तं व्यक्तीनामानन्त्यमिति, नैतद्बाधकम्। शक्यतावच्छेदिकाया जातेरैक्यात्। नन्वेवं जातेरपि वाच्यत्वमायातमिति चेन्न। अकार्यत्वेपि कार्यतावच्छेदकत्ववदशक्यत्वेपि शक्यतावच्छेदकत्वसम्भवात्। अत एव लक्ष्यतावच्छेदके लक्षणा नेति नैयायिकाभ्युपगमः। तस्माज्जातिरुपलक्षणं व्यक्तिमात्रं तु वाच्यमिति। यत्तु सरूपसूत्रे भाष्ये वक्ष्यते। नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थ इत्यादि। तत्तु जातिव्यक्त्योरन्यतरेण विशिष्टस्यापरस्य वाच्यतेत्येवंरूपं मतान्तरम्। तथा चाकृत्यधिकरणे भट्टैरुक्तम्। नियोगेन विकल्पेन द्वे वा सह समुच्चिते। सम्बन्धः समुदायो वा विशिष्टा वैकयेतरेति। तत्र जातिरेव व्यक्तिरेव वा वाच्येति इहत्यं मतद्वयं नियोगेनेत्यनेनोपनिबद्धम्। चतुर्थचरणेन तु सरूपसूत्रोक्तं मतद्वयमुपनिबद्धमिति विवेकः। यद्यपि जातिव्यक्तिपक्षयोरन्यतरस्य न्यायेन बाध आवश्यकस्तथापीह शास्त्रे संज्ञापरिभाषादिवल्लक्ष्यसिद्ध्युपायतया उभयाश्रयणे किमपि बाधकं नास्तीत्यवधेयम्। वस्तुतस्तु भट्टोक्ताष्टप-

क्षीमध्ये विकल्पेनेति तृतीयः पक्षोत्र प्रक्रियादशायां स्थितः । विकल्पश्च लक्ष्यानुरोधाद्व्यवस्थितो न त्वैच्छिक इत्यन्यदेतत् । समुच्चयपक्षं चतुर्थमाश्रित्यापि क्व चित्कस्य चिद्विवक्षा अपरस्य त्वविवक्षेति गृहीत्वा प्रक्रियानिर्वाहः सुकर इति दिक् । यदि हि व्यक्तिरेवेत्येतत्सार्वत्रिकमभिमतं स्यात्तर्हि जात्याख्यायामिति सूत्रं नारभेत । यदि च जातिरेवेति तर्हि सरूपसूत्रं नारभेतेति भाष्यम् । ननु यस्मिन्वने एक एवाम्रवृक्षस्तत्रापि लक्षणया जातिपरत्वे इह आम्राः सन्तीति प्रयोगं साधयितुं जात्याख्यायामिति सूत्रमस्तु । तथा जातिपक्षेपि नानार्थानुरोधात्सरूपसूत्रमस्तु । वक्ष्यति हि वार्त्तिककृत् । व्यर्थेषु च मुक्तसंशयमिति । सत्यम् । लक्ष्यानुरोध एव पक्षद्वयाश्रये शरणम् । अत एवोदाहृतसूत्रयोर्भाष्यकृता प्रत्यारव्यास्यमानत्वेप्यदोषः।इदानीं वार्तिककारः शास्त्रस्य नियमविधिरूपतया सार्थक्यमाह । सिद्धे शब्दार्थसम्बन्धेलोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु । लोकादेव हि प्रथमव्युत्पत्तिः । अव्युत्पन्नं प्रति व्याकरणादीनामप्रवृत्तेः।अर्थवदधातुरित्यादि हि व्याकरणं शक्तिग्रहोपजीवकम् । तथा च समर्थसूत्रेपि वार्त्तिकम् । "अर्थानादेशनादिति" । अनेकमन्यपदार्थइत्यादिकं हि लोकसिद्धमर्थमनूद्य साधुत्वान्वाख्यानपरम् । ततश्च लोकादेव शब्दे अर्थे तयोः सम्बन्धे च सिद्धे अर्थबोधनाय शब्दप्रयोगेपि प्रसक्ते गवादय एव प्रयोक्तव्या न तु गाव्यादय इति नियमार्थं शास्त्रम् । नियमफलं तु धर्मः । तत्र स्मार्त्तो दृष्टान्तः । प्राङ्मुखो-ऽनानि भुञ्जीतेत्यादिर्लौकिकशब्देनोक्तः । व्रीहीनवहन्तीत्यादिश्च वैदिकशब्देनोक्तः । धर्मनियम इति च षष्ठीतत्पुरुषः । अश्वघासादिवत् । न तु चतुर्थीतत्पुरुषः । प्रकृतिविकृतिभावविरहा-

त्। ननु यदि प्रयुक्तानामिदमन्वाख्यानं तर्हि किमर्थमप्रयुक्ता अपि ऊष तेर चक्र पेचेत्यादयो व्युत्पाद्यन्तइति चेन्न। आर्षज्ञानं विना अप्रयुक्तताया दुरवधारणत्वात्। महान्हि प्रयोगविषयः। तथा च भाष्यम्। सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाको वाक्यमितिहासः पुराणं वैद्यकमित्येतावान् प्रयोगस्य विषय इति। बह्वृचानामाम्नायो बाह्वृच्यम्। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्य इति ञ्यप्रत्ययः। चरणाद्धर्माम्नाययोरित्युक्तत्वादाम्नाये। अथर्वणा प्रोक्तो वेदो अथर्वा उपचारात्प्रयोग इत्येके। वसन्तादिषु अथर्वन् आथर्वण इत्युभयोः पाठसामर्थ्यात्प्रोक्तप्रत्ययस्य वैकल्पिको लुगिति तु तत्त्वम्। अत एव भाष्ये वक्ष्यते। तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लुग्वक्तव्यः। वसिष्ठानुवाकः। ततो वक्तव्यमथर्वणो वेति। तमधीते आथर्वणिकः वन्सतादित्वाट्ठक्। दाण्डिनायनादिसूत्रे निपातनाट्टिलोपाभावः। आथर्वणिकस्याम्नाय आथर्वणः आथर्वणिकस्येकलोपश्चेति आथर्वणिकादण् तत्सन्नियोगेनेकलोपश्च। प्रकृतमनुसरामः। एतावन्तं प्रयोगविषयं पर्यालोचयितुमशक्तैरप्यस्मदादिभिर्लक्षणानुगतानां प्रयोगोस्तीत्यनुमेयम्। अस्ति च त्वयोदात्तदतानामपि वेदे प्रयोगः। सप्तास्ये रेवती रेव दूष। यन्मे नरः श्रुत्यं ब्रह्म चक्र। यत्रानश्चक्राजरसं तनूनामिति। ननु यदि लक्षणेनानादितासिद्धिस्तर्हि वचन्त्यादीनामपि स्यादिति चेत्, न। नहि वाचिरन्तिपरः प्रयुज्यतइत्यभियुक्तानामविगीतव्यवहारेण सामान्यशास्त्रस्य सङ्कोचात्। अभ्युपगतो हि विशेषविषयिण्या पतितस्य कर्मानधिकारस्मृत्या अग्निहोत्रादिश्रुती-

नां सङ्कोचः विशेषविषयेण शिष्टाचारेण सामान्यस्मृतेः सङ्कोचश्च । तदुक्तम्, आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति । यत्र तु अप्रयोगः सन्दिग्धः शास्त्रानुगमश्च तत्र निष्पत्यूहमनुमानम् । तदुक्तम् । यथालक्षणमप्रयुक्ते इति । अप्रयुक्ते अनिश्चितप्रयोगे इत्यर्थः । निश्चितप्रयोगे तु लक्षणं न प्रवर्त्ततएवेति निष्कर्षः । न चैवं ब्राह्मणोब्रवणादिति कल्पसूत्रप्रयोगरूपेणापि विशेषविषयकाचारेण ब्रुवोवचिरित्यादीनां सङ्कोचापत्तिः । त्रिशङ्क्वाद्ययाज्ययाजनेनापि स्मृतिसङ्कोचापत्तेस्तुल्यत्वात् । तत्र धर्मबुद्ध्यानुष्ठानं नास्तीति चेत् । इहापि साधुत्वबुद्ध्या प्रयोगो नास्तीति तुल्यम् । यर्वाणस्तर्वाण इति वदभियुक्तानामपि असाधुप्रयोगस्य क्रतोर्बहिरुपपत्तेश्च । अत एवेतिहासपुराणादिष्वपशब्दा अपि सन्तीति हरदत्तः । नदीसंज्ञासूत्रे भाष्येपि स्पष्टमेतत् । के चित्तु आर्षग्रन्थेष्वपि छन्दसि विहितस्य व्यत्ययस्य प्रवृत्त्या साधुतां समर्थयन्ते । न च गौणमुख्यन्यायेन मुख्ये छन्दस्येव तत्प्रवृत्तिः । स्वरितत्वप्रतिज्ञया तद्बाधात् । वक्ष्यति हि स्वरितेनाधिकार इति सूत्रे ऽविशेषायाधिकं कार्यमिति । गौणमुख्यन्यायो हि स्वरितत्वप्रतिज्ञास्थले न प्रवर्त्तते इत्यर्थः । उपपादयिष्यते चेदम् । अत एवार्षत्वात्साधुतेति तत्र तत्रोद्घोषः सङ्गच्छतइति दिक् । यद्यपि अप्राप्तांशपूरणफलको नियमविधिः । इतरव्यावृत्तिफलकस्तु नित्यप्राप्तिविषयकः परिसंख्याविधिरिति पूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीह शास्त्रे परिसंख्यापि नियमशब्देन व्यवह्रियते । तेन पञ्च पञ्चनखा भक्ष्या इत्यस्य नियमोदाहरणतया उपन्यासो न विरुद्धः । न चासौ मीमांसकरीत्यापि नियमो भवत्विति वाच्यम् । पञ्चातिरिक्तभक्षणे प्रायश्चित्तविधेरसङ्ग-

तत्वापत्तेः । पञ्चानामभक्षणे प्रायश्चित्तापत्तौ गृहेपि निवसन् विप्रो मुनिर्मांसविवर्जनादित्यादिस्मृतिव्याकोपाच्च । अत एव त्रिदोषापि परिसंख्यैव तत्राश्रितेति दिक् । अत्रेदमवधेयम् । नियमातिक्रमे कृते अपूर्वं परं न भवति । दृष्टस्त्वर्थावबोधो भवत्येव । अवहननातिक्रमे कृतेपि वैतुष्यवत् दिगन्तराभिमुखभोजने तृप्तिवच्च । न चापभ्रंशानामवाचकतया कथमर्थावबोधइति वाच्यम् । शक्तिभ्रमवतां बाधकाभावात् । विशेषदर्शिनस्तु द्विविधाः । तत्तद्वाचकसंस्कृतविशेषज्ञानवन्तस्तद्विकलाश्च । तत्र आद्यानां साधुस्मरणद्वारा अर्थबोधः । द्वितीयानां तु बोध्यार्थसंबद्धार्थान्तरवाचकस्य स्मृतौ सत्यां ततो लक्षणया बोधः । सर्वनामस्मृतेर्वा । तदर्थज्ञापकत्वेन रूपेण साधुस्मृतेर्वा । अर्थाध्याहारपक्षाश्रयणाद्वेति यथायथं बोध्यम् । अपरे त्वाहुः । अपभ्रंशा अपि वाचका एव । तथाहि । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छाशक्तिरिति मते भगवदिच्छायाः सन्मात्रविषयकत्वादपभ्रंशैस्तु बोधजननस्य शक्तिभ्रमदशायां तेनाप्यभ्युपगमाद्दुर्वारा शक्तिः । पदार्थान्तरं तादिति मतेपि कल्पकं साध्वसाध्वोस्तुल्यमेव । असाधुस्मरणद्वारा साधुर्बोधक इति वैपरीत्यस्यापत्तेश्च । स्वीकृतं हि परेण तिबादिस्मारितानां लादीनामसाधूनामपि बोधकत्वम् । ननु साधूनामल्पत्वात्तत्रैव लाघवाच्छक्तिः कल्प्यतइति चेत् । न वयमपूर्वं किंचित्कल्पयामः । किं तु यथा घटजननसामर्थ्यमेव दण्डादेः शक्तिः तथा घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिः । सा च कारणत्वापरपर्याया शक्तिभ्रमाद्बोधं वदतां त्वयाप्यभ्युपैतैव । शक्तिग्रहस्य भ्रमत्वं परं त्यज्यतां विषयाबाधादिति ब्रूमः । नन्वेवं गौणमुख्यविभागोच्छेदः सर्वे सर्वस्य वाचका इति पर्यवसाना-

दिति चेत् । त्वत्पक्षेपीश्वरेच्छाया गौणादावतिप्रसङ्गस्य तुल्यत्वात् । मुहृद्भावेन पृच्छामीतिचेत् । प्रचुरतरप्रयोगतद्विरहाभ्यां गौणमुख्यविभाग इति गृहाण । ननु जनकत्वेनागृहीतादपि तर्हि कारणात्कार्योदयः स्यादेवेति चेत् । पदार्थस्मृतिरापाद्यते वाक्यार्थबोधो वा । नाद्यः । सम्बन्धग्रहं विना तदयोगात् । नान्त्यः । द्वाराभावात् । पदार्थस्मरणं हि द्वारम् । एवं च महदेव लाघवम् । साधुस्मारणकल्पनाक्लेशश्च न भवतीति । साधुत्वं तु जातिविशेषात्मकामित्युक्तमेव । समानायामर्थावगतौ शब्दैश्चापशब्दैश्चेतिभाष्यमप्येतत्पक्षपातीति दिक् ॥

इति अपशब्दानां वाचकत्वावाचकत्वविचारः ।

प्रयोगशब्दमुपाददानो वार्त्तिककारः प्रयोगाद्धर्मो न तु ज्ञानमात्रादिति सूचयति । युक्तं चैतत् । एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्त इत्यत्र ज्ञानप्रयोगयोरुपादानस्याविशेषेपि प्रतिपदाधिकरणन्यायेन यदैकस्मादपूर्वं तदेतरत्तदर्थमितिप्रयोगात्फलं ज्ञानं तु तदङ्गमित्यभ्युपगमात् । प्रयोगस्य फलम्प्रति सान्निहितत्वाच्च । ज्ञानस्य तु व्यवहितत्वात् । ज्ञानस्य प्रयोगाङ्गतायां दृष्टार्थतालाभाच्च । उक्तं च भट्टैः । सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते । पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति । अत एव तरति ब्रह्महत्यां योश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिष्वपि ज्ञानपूर्वकानुष्ठानात्फलमित्येव सिद्धान्तः । तदुक्तं वार्तिककृता । तत्तुल्यं वेदशब्देनेति । वेदः शब्दो विधायको यस्यार्थस्य अश्वमेधादेस्तेनेदं तुल्यमित्यर्थः । तेन वैदिकशब्दानामपि पक्षकोटिप्रविष्टतया दृष्टान्तासङ्गतिरिति नाशङ्कनीयम् । ते सुरा इति पूर्वोदाहृतश्रुतिरपि अपशब्दप्रयोगात्प्रत्यवायं बोधयन्ती साधुप्रयोगाद्धर्मं गमयति । वाजसनेयिनां ब्राह्मणे-तस्मादेषाव्याकृता वा

गुद्यत इति श्रुतिरप्येवम् । भाष्ये तु अभ्युपेत्यवादेन साधुज्ञानात्फलमित्ययमपि पक्षः समर्थितः । नचैवमपशब्दज्ञानादधर्मोपि स्यादिति वाच्यम् । यावद्वचनं वाचनिकमित्यभ्युपगमात् । नम्लेच्छितवाइत्यादिना असाधुप्रयोगस्यैव निषेधाच्च । न च व्याकरणाध्ययने प्रवृत्तस्य परिनिष्ठितपचत्यादिबोधार्थं डुपचष्प्रभृतीनां प्रयोगोप्यावश्यक एवेति वाच्यम् । तदीयज्ञानमात्रेण निर्वाहात् । अत एवालौकिकम्प्रक्रियावाक्यमूहमात्रस्य गोचर इति नित्यसमासेष्वस्वपदविग्रहाभ्युपगमः । अथ व्युत्पादनार्थं तत्प्रयोग आवश्यक इत्याग्रहस्तथापि न क्षतिः । अनपभ्रष्टत्वेन तेषां प्रत्यवायाजनकत्वात् । नह्येते शक्तिवैकल्यादिप्रयुक्ताः येन गाव्यादिसाम्यं भजेरन् । अथ सादित्वादसाधुतेत्याग्रहस्तथापि न क्षतिः । शब्दस्वरूपपरत्वात् । अनुकरणानां सर्वत्र साधुताभ्युपगमात् । नाहि हेलयो हेलय इति श्रुतिपाठोपि प्रत्यवायजनकः । शब्दस्वरूपमात्रपरा एते भिन्ना एव साधवश्चेति तु तुल्यम् । अत एव स्वाहेन्द्रशत्रुर्वर्द्धस्वेतिश्रुतावाद्युदात्तस्य पाठेपि तत्प्रत्याय्यस्यार्थपरस्य ऊहितस्यानाम्नानादमन्त्रतया जपादिपर्युदासेन मन्त्रे विधीयमाना एकश्रुतिर्न प्रसक्तेति प्रागुक्तम् । अत एव साधुत्वासाधुत्वयोरेकस्मिन् सद्भावो अभावश्चेति विरुद्धस्य दुरुपपादतया अर्थभेदाच्छब्दभेदइति दर्शनं प्रवृत्तम् । न च प्रकृतिवदनुकरणमित्यतिदेशेन अपशब्दानुकरणस्य असाधुता शङ्क्या । असाधूनां शास्त्रीयप्रकृतित्वाभावात् । असाधुत्वस्य शास्त्रीयकार्यत्वाभावाच्च । नत्यशास्त्रीयमप्यतिदिश्यतइति ऋलृक्सूत्रे भाष्ये स्फुटमेतत् । डुपचष्प्रभृतिप्रयोगादपशब्दज्ञानाद्वा प्रत्यवायो नास्तीति प्रागुक्तरीत्या स्थितेपि अभ्युपेत्यापि प्रत्यवायं भाष्ये कूपखानकन्याय उदात्तदतः । तथाहि । कू-

पं खनन् यद्यपि कर्दमेन लिप्यत एव तथापि ततो लब्धेन जलेन तं मलं दूरीकरोति फलांतरं च लभते तथेहापि परिनिष्ठितरूपज्ञानात्पूर्वोत्पन्नप्रत्यवायनिरासं फलान्तरं च लभतइति। सोयं कूपखानकन्यायः। कूपं खनतीति विग्रहे कर्मण्यणि प्राप्ते वासरूपन्यायेन ण्वुल्। नित्यसमासत्वाभावात्कूपस्य खानक इति स्वपदाविग्रहः। न च शिल्पिनिष्वुना सरूपेण ण्वुलो बाधः स्यादिति वाच्यम्। इह खननकर्तृत्वमात्रस्य विवक्षया शिल्पित्वस्याविवक्षितत्वात्। तस्मात्सर्वथापि गाव्यादिप्रयोगे प्रत्यवाय इति स्थितम्। तत्रेदं भाष्ये सिद्धान्तितम्। याज्ञे कर्मण्येवायम्। न म्लेच्छितवायित्यस्य क्रतुप्रकरणे पाठात्। क्रतुप्रयोगाद्धहिस्तु अपशब्दं प्रयुञ्जानो न दुष्यति। एवं हि श्रूयते। यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परावरज्ञा इति। प्रत्यक्षधर्माणो योगजधर्मबलेन साक्षात्कृतधर्माः। अत्रायं श्रुतेराशयः। योगिन एते विरक्तयतिशयाल्लौकिकेष्वर्थेष्वाग्रहविरहेण यथा तथास्माकं भवत्वितिविवक्षवो यद्वानस्तद्वान इति वक्तव्ये यर्वाणस्तर्वाण इत्यूचुः। याज्ञे कर्मणि पुनः साधूनेव प्रयुक्तवन्तस्तेन यर्वाणस्तर्वाणइत्येवंरूपामेव संज्ञां मुनयो लेभिरइति। भट्टाश्चाहुः। स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः। प्रतिषेधः क्रतोरंगमिष्टः प्रकरणाश्रयादिति। अपरे त्वाहुः। क्रतोर्बहिः प्रयोगेपि पुरुषः प्रत्यवैतीति। तेषामयमाशयः। नानृतं वदेदित्यनारभ्याधीतः पुरुषार्थोपि निषेधस्तावदस्तीति निर्विवादम्। तत्र निषेध्यमनृतं द्विधा। शब्दानृतमर्थानृतं चेति। शब्दस्यार्थस्य वा विपरीतप्रतिपत्तिहेतुभूतमुच्चारणमनृतवदनम्। एवं च यथार्थानृतं वदतः प्रत्यवायस्तथा शाब्दानृतमपीति तुल्यम्। क्रतुमध्ये पुनरपभाषणे पुरुषोपि प्रत्यवैति क्रतुरपि विगुण इति

वचनद्वयबलात्सिध्यतीतिदिक् । यथा च प्रयोगे साधूनां नियमस्तथा साधुत्वज्ञानेपि व्याकरणस्य नियम एवेत्यवधेयम् । व्याकृता वागुद्यतइतिभागुक्तश्रुतेः । व्याकृता व्याकरणसंस्कृतेति हि तदर्थः । व्याकरणशब्दश्च योगरूढ्या लक्ष्यलक्षणसमुदायपरः सूत्रमात्रपरो वेति पक्षद्वयमपि भाष्ये स्थितम् । तत्राद्ये पक्षे सूत्रमात्रमधीयाने वैयाकरणशब्दप्रयोगो भाक्तः समुदायवाचका हि शब्दाः क्वचिदवयवेपि प्रयुज्यन्ते । यथा पूर्वे पञ्चाला उत्तरे पञ्चाला इति । द्वितीयपक्षे तु व्याकरणस्य सूत्रमितिप्रयोगो राहोः शिर इतिवन्नेयः । अष्टाध्याय्या एकदेशः सूत्रमित्यवयववावयविभावे षष्ठीति वास्तु । अस्य वनस्यायं वृक्ष इत्यादिवत् । नचैवमपि सूत्रमात्राच्छब्दाप्रतिपत्तेर्नियमानुपपत्तिः । पदच्छेदविग्रहयोजनादिभिः सूत्रार्थस्यैवाभिव्यञ्जनात् । अत एव ह्युत्सूत्रमुच्यमानमप्युपेक्ष्यते । यत्रैव तु सूत्रस्य तात्पर्यलेशोप्यस्ति तदेव तु गृह्यते । तदुक्तम् । सूत्रेष्वेव हि तत्सर्वं यद् वृत्तौ यच्च वार्त्तिकइति । अत एव बहुलग्रहणादिकं सार्थकमिति दिक् । नन्वेवं किं वर्णोपदेशेन । न हि तद्बलेन कस्य चिच्छब्दस्य साधुत्वमवगम्यते । न च कलध्मातादिदोषरहितवर्णस्वरूपप्रतिपत्तिरेव तत्फलमिति वाच्यम् । लोकत एवाविप्लुतवर्णप्रतीतेरवश्यं वाच्यत्वात् । अन्यथा प्लुतादिपाठस्यापीह कर्त्तव्यतापत्तेः । तदुक्तम् । इष्टबुद्ध्यर्थश्चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेश इति । एकश्रुत्या सूत्रपाठादुदात्तादिस्वरत्रयस्यापि कर्त्तव्यः पाठ इत्युक्तम् । त्रैस्वर्येण पाठे हि अन्यतमस्य उच्चारणादेव सिद्धौ द्वयोरेव कर्त्तव्यतां ब्रूयात् । अत एव च लोके त्रैस्वर्यमेकश्रुत्या सह विकल्प्यत इति ज्ञाप्यते । एतच्च विभाषा छन्दसीत्यत्र स्फुटीकरिष्यामः । ननु निर्देशस्य जातिपरत्वा-

त्प्लुतादिसंग्रहः सेत्स्यतीतिचेन्न । संवृतकलप्रभृतीनामपि संग्रहापत्तेः । तदुक्तम् । आकृत्युपदेशात्सिद्धमितिचेत्संवृतादीनां प्रतिषेध इति । तत्र ऱ्हस्वस्य अवर्णस्य संवृतगुणकत्वेपि तादितरेषामचां संवृतत्वं दोषः । आदिशब्दात्कलः । स च स्वोचितस्थानभ्रष्टः । तथा श्वासभूयिष्ठतया ऱ्हस्वोपि दीर्घवल्लक्ष्यमाणो ध्मातः। एवं दीर्घोपि ऱ्हस्ववत्कालसंकोचेनोच्यमानोर्धकः । एवं करणादिभ्रंशादपि बहवो दोषाः शिक्षाप्रातिशाख्यादिषु प्रसिद्धाः । तत्तद्दोषविशिष्टानामपि अत्वादिजात्याक्रांतत्वाज्जातिपरानिर्देशपक्षे तेष्वनिव्याप्तिरितिस्थितम् । न च गर्गादिबिदादिपाठस्य तंत्रेणोभयार्थतया वर्णशुद्धिलाभः । अपठितेषु प्रातिपदिकेषु तथाप्यगतेः । स्यादेतत् । सर्वा अज्व्यक्तयो हल्व्यक्तयश्च शास्त्रान्ते शुद्धाः पठिष्यन्ते । अ अ इतिवत् । नचैवं गौरवम् । तद्भलेन सर्वेषामनुबंधानां प्रत्याख्यानात् । इत्संज्ञालोपयोरपि त्यागात् । तथाहि । शीङ्धातोर्ङकारं परित्यक्ष्यामः । ईकारं च कलं पठिष्यामः । ङित. आत्मनेपदमित्यस्य स्थाने कलादात्मनेपदमिति पठिष्यामः । कलश्च प्रक्रियादशायामेव । यथा ङकारः । प्रयोगे तु शुद्ध एव । प्रत्यापत्तेः शास्त्रान्ते करणमपि शास्त्रीयसकलकार्यं प्रत्यसिद्धतालाभाय । एवं च प्रक्रियायां दोषस्य कलादेराश्रयणेपि परिनिष्ठितरूपे न कश्चिद्दोषः । यथा यथान्यासपक्षेपि अकारस्य विवृतता प्रक्रियामात्रविषया न तु प्रयोगसमवायिनी तद्वदिह पक्षे कलादयोपीति न कश्चिद्विशेषः । धर्मिकल्पनात इति न्यायश्चेह बोध्यः। ङकारादयो हि धर्मिण एव त्वया पाठ्याः । मया तु उभयपठनीयस्य ईकारस्य कलत्वमात्रं कल्प्यमिति । नन्वस्मिन्यक्षे स्वरितञितइत्यत्र कथं कार्यमिति चेत् । ध्मातात्कर्त्राभिप्राय इति ।

एवमाद्यन्तौ टकितावित्यत्र आद्यन्तौ कलध्मातावितिं। इडाद्यागमाश्च निरनुबन्धाः कलाः पाठ्याः। आनुगादयो ध्माताः। डुकृञित्यस्य स्थाने कृ इति द्विदोषं पाठ्यम्। आदिरन्त्येनेत्यत्रापि आदिकलौ सहेत्युक्त्वा अउइत्यादिकाः संज्ञाः करिष्यन्ते। कलेनेति तृतीयानिर्देशे सति तु अप्राधान्यात्सिद्धान्तइव चरमवर्णस्य संज्ञा न स्यात्। दूलोपइत्यादौ अणइत्यपनीय अओरिति करिष्यते। स्वरसन्धिस्त्वसन्देहाय न करिष्यते। तस्मात्सर्वमनुबन्धकार्यादिकङ्कलादिभिरेव सिध्यतीति चेत्। सत्यम्। सिध्यत्येवम्। अपाणिनीयं तु भवतीति चेत्। अत्रोच्यते। इष्टसिद्ध्यर्थो वर्णोपदेशः। एवं चाकृत्युपदेशादेव उदात्तादिसिद्धिमङ्गीकृत्य कलादिष्वतिप्रसङ्गइत्थं परिहार्यः। आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः। उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादय इति। यत्तु अग्रहणेषु प्रातिपदिकेषु प्राप्ता एवेति। तन्न। त्वयापि प्रतिपदपाठस्यावश्याश्रयणीयत्वात्। अन्यथा शशइत्यत्र षषइत्यपि स्यात्। मञ्चके मञ्जक इति। पलाशे पलाष इति स्यादेतत्। स्वरवर्णानुपूर्वीनिर्णयाय यदि प्रतिपदपाठस्तर्हि कलादिनिवृत्तिरपि तत एवास्तु। उणादिसूत्रात्पृषोदरादिसूत्राद्वा साधुत्वाभ्यनुज्ञानं विशेषावधारणं तु निघण्ट्वादिनेति चे,त्कलादिनिवृत्तिरपि शिक्षादिग्रन्थेनास्तु। सत्यम्। आनुषङ्गिकी कलादिनिवृत्तिः। वर्णोपदेशस्य मुख्यं फलं तु प्रत्याहारनिष्पत्तिः। प्रत्याहारशब्दस्तु अणादिसंज्ञापरः। प्रत्याह्रियन्ते वर्णा एष्विति व्युत्पत्तेः। न च ग्रहणकशास्त्रेण निष्पादितासु अकारादिसंज्ञास्वतिप्रसक्तिः। योगरूढ्यभ्युपगमात्। तस्मादादिरन्त्येनेत्यतत्सूत्रसिद्धाः संज्ञाः प्रत्याहारशब्दवाच्यास्तन्निष्पत्तये च वर्णोपदेश इति स्थितम्।

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य
प्रथमपादे प्रथममान्हिकं समाप्तम् ॥ १ ॥

अइउण् । संज्ञासूत्रमिदम् । आदिरन्त्येन सहेतेत्यनेन सहैकवाक्यत्वात् । अइउणित्येषामादिरकारः अन्त्येन णकारादिना सहितः सन् आद्यन्ताभ्यामाक्षिप्तानां मध्यगानां स्वस्य च संज्ञेति हि वाक्यार्थः । अत्र अकारादीनां स्वरूपेण अनुकार्येण वा सतोप्यर्थवत्त्वस्याविवक्षितत्वात्प्रातिपदिकत्वं नेति गवित्यथमाहेत्यादाविव विभक्तेरनुत्पत्तिः सुपां सुलुगिति लुग्वा । छन्दोवत्सूत्राणीतिभाष्यकारेष्टया छन्दोगेषु व्याकरणसूत्रेष्वपि छान्दसकार्यातिदेशात् । यूस्त्याख्याविति सूत्रे छन्दःप्रदेशेषु गौणमुख्यन्यायो न प्रवर्त्तते इति वक्ष्यमाणत्वाद्वा । स्यादेतत् । स्वरसन्धिनेह भाव्यम् । तत्र अ इत्यत्र विभक्तेः रुत्वयत्वलोपेषु वृक्षइहेत्यादाविव लोपासिद्ध्या सन्धिर्नेति समाधानेपि इकारस्य इकोसवर्णइति ऋकारस्य ऋत्यक इतिप्रकृतिभावसम्भवेपि एदैतोरयायौ दुर्वारौ । यत्तु वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्सन्धिर्नेति । तच्चिन्त्यम् । वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे च तिष्पन्ने प्रवर्त्तमानानां यणादीनां सुध्युपास्यइत्यादौ तटस्थइव उद्देश्यतावच्छेदकरूपाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात् । अन्यथा तुल्यास्यप्रयत्नमित्यादौ सवर्णदीर्घो न स्यात् । तथार्थवत्सूत्रान्तर्गतानां प्रातिपदिकत्वं प्रत्ययः परश्चेत्यादौ सुप्रत्ययो ङ्याप्प्रातिपदिकात् द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यादौ तत्तद्विभक्तिः ससजुषोरित्यत्र रुः खरवसानयोरितिसूत्रे विसर्गश्च न स्यादिति सर्वोपप्लवः स्यात् । स्वाध्यायोध्येतव्य इत्यस्य नेह नानेत्यादिश्रुतेश्च स्वस्मिन्नपि यथा प्रवृत्तिस्तथा दीर्घादीनामपीति चेत्तुल्यं यणादाव-

पि । नन्वेवं ग्रहणकशास्त्रमपि अणोप्रगृह्यस्येत्यादौ तट-स्थइव स्वस्मिन्नपि प्रवर्त्तेत । ततश्च दीर्घाणामनण्त्वेन सवर्ण-ग्राहकत्वं नास्तीतिसिद्धान्तोपि भज्येतेति चेन्न । वैषम्यात् । पदार्थसंसर्गो हि वाक्यार्थः । तद्बोधश्च पदार्थबोधोत्तरभावी। तथा च अण्शब्देन ये उपस्थितास्तेषां सवर्णग्राहकत्वं सूत्रार्थः। अण्शब्दश्च आदिरन्त्येनेतिसूत्रेण अक्षरसमाम्नायपठितेषु संकेतितइति तानेवात्रोपस्थापयति । तथा च अष्टादशानामपि अकारः संज्ञेति पर्यवसन्ने सूत्रांतरेष्वस्य च्वावित्यादिषु अ-कारोष्टादशानामुपस्थापक इत्युचितम् । नतु ग्रहणकसूत्रेपि । एतद्वाक्यार्थबोधात्प्रागष्टादशस्वगृहीतशक्तिकत्वात् । नहि सिचि वृद्धिरित्यादावादैचामुपस्थापकोपि वृद्धिशब्दो वृद्धिरादैजिति-संज्ञासूत्रे तानुपस्थापयति । किन्तु स्वरूपमेव । संज्ञासूत्रे च सामानाधिकरण्यादादैचां वृद्धिशब्दवाच्यत्वावधारणे सू-त्रान्तरेषु संज्ञिनामुपस्थितिर्निर्बाधेति दिक् । तस्मादइउणित्या-दौ स्वरसंधिः प्राप्नोत्येवेति चेत् । सत्यम् । संहताविरहान्न यणादयः । अनित्या हि वाक्ये संहिता । उक्तञ्च । संहितै-कपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षत इति । समासस्य पृथग्ग्रहणं गोवलीवर्द-न्यायेन । एकपदइत्यनेनैव तत्सङ्ग्रहसिद्धेः । इयं च प्राचां परिभाषा एकदेशानुमतिद्वारा संहिताधिकारेणैव ज्ञापिता । अ-संहितायां यणादिनिवृत्त्यर्थो हि संहिताधिकारः । अत एव । हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम् । जालान्तरेण मम वासगृहं प्रविष्टः श्रोणीतटं स्पृश-ति किं कुलधर्म एष इत्यत्र धन्या एनमित्यस्य नासाधुता । अत एव आलङ्कारिकैरच्युतसंस्कृतित्वापेक्षया पृथगे-

व विसंधितानामदोषान्तरङ्गणितम् । तच्चेहास्तीत्यन्यदेतत् । नन्वेवमप्यसंहितायां कालव्यवायादेव यणादेरप्राप्तौ किं संहिताधिकारेणेति चेन्न । संहिताधिकारबहिर्भूतानां कालव्यवायेपि प्रवृत्तिं ज्ञापयितुं तदारम्भात् । तेन अग्नाविष्णू इत्यग्ना विष्णू इत्यादावग्रहेप्यानङादयः । अग्निमीळे इत्यत्र पदविभागेपि निघातः । ते नो रासंतामित्यादौ नसादयश्च सिद्ध्यन्ति । नन्वेवं पुरः हितमित्यग्रहे हितशब्दस्य स्वरितत्वं बह्वृचैः पठ्यमानमसङ्गतं स्यात् । तयोर्य्वावचीति संहिताधिकार आशास्त्रसमाप्तेरिति सिद्धान्तात् । स्वरितविधेश्च तदन्तर्भूतत्वात् । अत एव तैत्तिरीया अग्रहे हितशब्दमनुदात्तं पठन्ति । अत एव बह्वृचा अप्यग्निमीळइत्यस्य पदविभागपाठे निघातमेव कुर्वन्ति न तु स्वरितमपीति चेत् । सत्यम् । प्रातिशाख्ये विशेषविधानात्स्वरितसिद्धिः । उक्तं हि । यथा संधीयमानानामनेकीभवतां स्वरः । उपदिष्टस्तथा विद्यादक्षराणामवग्रह इति । तदेवमइउणित्यादौ संहिताविरहान्न संधिरिति स्थितम् । के चित्तु चादिषु पाठान्निपातसंज्ञा । निपातएकाजित्यप्रगृह्यत्वम् । ततः प्रकृतिभावः । यद्यपि अनिपातानामपीह ग्रहणमिष्टं दध्यश्वो दाक्षिः प्लाक्षिरित्यादिसिद्धये तथापि न सर्वा व्यक्तयः साक्षान्निर्देष्टव्याः । आनन्त्यात् । किं तु काचिद्व्यक्तिर्निर्दिश्यमाना स्वसदृशीरितरा अपि गृह्णातीति वक्ष्यते । तत्र किं निपातव्यक्तिरेव निर्दिश्यतामुत तदितरेति संशये आद्यकोटिरेव युक्ता । संहिताकार्यविरहेण निर्दिश्यमानरूपस्य स्फुटप्रतीतिसिद्धेरित्याहुः । कारप्रत्ययस्तु न भवति बहुलग्रहणात् । स हि रोगाख्यायां ण्वुल् बहुलमित्यत्रोपसंख्यातः । अन्ये तु इकाश्तिपौ धातुनिर्देश इत्यतो निर्देशशब्दः [illegible] विधावनुवर्तते । नि-

र्देशश्च प्रतिपादनम् । तेन प्रयोगविशेषनिष्ठानां वर्णानां प्रतिपादने प्रत्यय इह तु आनुपूर्वीसंपादनमात्रे तात्पर्यं न तु कविपुत्रइत्यादौ दृष्टानामकारादीनां प्रतिपादने, अतः कारप्रत्ययाभाव इत्याहुः । अनुकार्यानुकरणयोरभेदविवक्षापक्षे तु अर्थवत्त्वस्याविवक्षिततया वर्णवाचित्वाभावात्कारप्रत्ययाभावः । अत्रेदमवधेयम् । अकारः संवृतः । विवृतकरणाः स्वराः तेभ्य एओ विवृततरौ ताभ्यामैऔ विवृततरतरौ ताभ्यामप्याकारः संवृतोकार इति शिक्षावाक्यात् । विवृतसंवृतादयः शब्दाः शुक्लादिवद्धर्मे धर्मिणि च प्रयुज्यन्ते तेन विवृतं करणं प्रयत्नो येषां ते तथाभूताः स्वरा इकारादय इत्यर्थः । यत्तु छन्दोगविशेषैरिवर्णोवर्णऋकाराणां संवृततामिच्छद्भिरुक्तं ऋतः संवृता अन्यत्राभवसाम्न इति । तत्तु तदीयशाखाविशेषमात्रपरं न तु सार्वत्रिकम् । यथा सात्यमुग्रिराणायनीयानामेव सुजाते ए अश्वसूनृते अध्वर्यो ओ अद्रिभिः सुतमित्यादावेकमात्र एकारओकारश्च न त्वनेकेषां, तद्वत् । इकारादौ वा यथा तथास्तु । अकारस्य संवृतत्वं तु निर्विवादमेव । तथाप्यसौ प्रक्रियादशायामाकारेण दीर्घेण प्लुतेन च सह सावर्ण्यसिद्धये विवृततरोस्मिन्सूत्रे निर्दिश्यते । विवृततरत्वं च प्रयोगदशायां मा भूदित्येतदर्थं शास्त्रांते अ अ इति सूत्रं कृतम् । तेन हि विवृततरमनूद्य संवृतो विधीयते । न चानुवाद्यसमर्पकेणाकारेण दीर्घप्लुतयोरपि ग्रहणकशास्त्रबलात्सङ्ग्रहः स्यादिति वाच्यम् । अद इति तपरनिर्देशस्य एकशेषेण ह्रस्वषट्कनिर्देशस्य वा सिद्धांतयिष्यमाणत्वात् । वक्ष्यति हि तत्र वार्तिककारः । सिद्धं तु तपरनिर्देशाद्, एकशेषनिर्देशाद्वा स्वरानुनासिकभिन्नानां भगवतः पाणिनेः सिद्धमिति । शास्त्रान्ते च विधीयमानं प्रत्यापत्तिवचनमेव ज्ञापक-

मिह विवृततर उपदिष्ट इत्यस्यार्थस्य । यत्तु अत्रत्यं वार्त्तिकमकारस्य विवृतोपदेश आकारग्रहणार्थ इति । तत्र विवृतशब्दो विवृततरत्वपरः उदाहृतशिक्षानुरोधात् । ननु शुक्लतरोपि शुक्लो भवत्येव यथा तथेह विवृततरस्याकारस्य विवृतत्त्वानपायात्सावर्ण्यं यथाश्रुतेपि सेत्स्यतीति चेत् । न । सवर्णसंज्ञायां तुल्यप्रयत्नत्वस्य विवृततरत्वाद्यवान्तरधर्मपुरस्कारेणैव वक्तव्यत्वात् । अन्यथा ओदौतोरपि सावर्ण्यापत्तौ गां गाइत्यत्रेव नावं नावः ग्लावं ग्लाव इत्यादावपि औतोम् शसोरित्यात्वं प्रवर्त्तेत । ईदूदेदित्येकारान्तस्य विधीयमाना प्रगृह्यसंज्ञा करवावहै इत्यादावपि प्रवर्त्तेत । एङः पदान्तादतीति पूर्वरूपं कस्मै अदात् विष्णौ अस्तीत्यादावपि स्यात् । किंचैवं हकारादीनामीषद्विवृतत्वादकारादीनाञ्च विवृतत्वात्सावर्ण्याप्रसक्तेर्नाज्झलाविति सूत्रं न कर्त्तव्यमिति भाष्यसिद्धान्तो व्याकुप्येत । एओङित्यादिसूत्रद्वये ङकारचकाररूपानुबन्धद्वयकरणं चेह लिङ्गम् । अन्यथा हि अन्यतरेणैव सर्वत्र व्यवहरेत् । किम्बहुना ऐकारौकारावपि न निर्दिशेदाकारादीनामिव सावर्ण्येन सिद्धेरिति दिक् । तस्मादत्रत्यभाष्यवार्तिकयोर्विवृतशब्दो विवृततरं लक्षयतीत्येव तत्त्वम् । यद्वा । विवृतप्रतिज्ञानसामर्थ्याद्विवृततरेण सह सावर्ण्यं सेत्स्यतीत्यवधेयम् । एवं च भाष्यादिग्रन्थो यथाश्रुत एवास्तु । एतच्च न्यासकारहरदत्तयोर्ग्रन्थमनुसृत्य उदाहृतशिक्षावाक्योपष्टम्भेन व्याख्यातम् । परमार्थतस्तु । आकारो विवृत इत्येव भाष्यवार्तिकस्वरससिद्धं न तु निवृततरइति । तथा च पाणिनीयशिक्षा । स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् । तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव चेति । प्रागुक्तं तु मतां-

तरं, न तु पाणिनीयम् । अत एव एओङ्सूत्रे भाष्यकैयटादौ अकारस्य विवृतत्वाद्विवृततराभ्यां संध्यक्षरभागाभ्यां न सावर्ण्यमित्युक्तम् । एवं च वृत्तिग्रन्थस्यापि यथाश्रुतस्य सौष्ठवे न्यासकारहरदत्ताभ्यां कृतं भङ्क्त्वा व्याख्यानमनादेयम् । अथ वा नाज्झलाविति पठतः सूत्रकृतो मते विवृततरस्यापि विवृतत्वमात्रेण सावर्ण्यमस्तु । चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयंत इति वृत्तिग्रन्थस्वरसात् । न चैवमेङैचोरतिप्रसंगः । वर्णसमाम्नाये पृथक् निर्देशसामर्थ्यात् अनुबंधद्वयसामर्थ्याद्वा तत्र सावर्ण्याप्रवृत्तेरिति दिक् । ननु दंडाढकमित्यादौ दीर्घेण सह दीर्घ एकादेशः सावर्ण्यस्य फलमित्यस्तु प्लुतेन तु सावर्ण्ये किं फलमिति चेत् । इह अ३ग्निदत्तेति गुरोरनृत इति प्लुते कृते तेन सह पूर्वस्य दीर्घ एकादेशः फलमिति गृहाण । न च दीर्घे कर्तव्ये प्लुतस्यासिद्धत्वं शंक्यम् । प्लुतप्रगृह्याअचीतिज्ञापकेन सिद्धः प्लुतः स्वरसंधिष्वातिवक्ष्यमाणत्वात्। स्यादेतत् । आक्षरसमाम्नायिकस्य अकारस्य कृतोपि विवृतत्वे धातुप्रातिपदिकप्रत्ययनिपातस्थस्य संवृतत्वादचत्वं न स्यात् । आक्षरसमाम्नायिकेन भिन्नप्रयत्नानाममीषामग्रहणात् । ततश्च शमामष्टानामितिदीर्घोलोन्त्यपरिभाषयान्त्यस्यैव स्यान्न त्वकारस्य । अचश्चेतिपरिभाषाया बाधादनुपस्थितेः । तथा इषदित्यत्र प्रातिपदिकस्यान्तउदात्तो भवतीत्येतन्न स्यात् । नायक इत्यत्र प्रत्ययाकारस्यानचत्वादायादेशो न स्यात् । अवनमतीत्यत्र निपाता आद्युदात्ता उपसर्गाश्चाभिवर्जमित्याद्युदात्तत्वं न स्यात् । किं च । अस्य च्वावित्यादौ अकारस्य संवृतत्वेनानण्त्वादसाति ग्राहकत्वे शुक्लीभवतीत्यादावेत्वं स्यान्न तु मालीभवतीत्यादौ । न चाक्षरसमाम्नायिकस्य विवृतत्वप्रतिज्ञासा-

मर्थ्यात्तत्सदृशेषु धात्वादिस्थेष्वपि तत्कार्यप्रवृत्तिरितिवाच्यम्। खट्वाढकमित्यादौ दीर्घसम्पादनेन विवृतत्वप्रतिज्ञायाः साफल्ये सति सामर्थ्यविरहात्। तथाहि। अकः सवर्ण इत्यत्र आदिरन्त्येनेतिवचनादनयोरेवाकारककारयोरनुकरणमितिनिर्णीतंते न प्रत्याहारगतेन विवृतेनाकारेण सावर्ण्यादीर्घप्लुतयोर्ग्रहणे खट्वाढकमित्यादि सिध्यति। असति तु विवृतत्वे अस्य च्वाविति्यादिष्विव प्रत्याहारेष्वपि संवृतस्य ह्रस्वस्यैव कार्यं स्यान्न तु दीर्घप्लुतयोरितिफलभेदस्य स्पष्टतया क्व विवृतत्वप्रतिज्ञायाः सामर्थ्यम्। अथोच्येत। प्रत्यापत्त्या ऽऽक्षरसमाम्नायिकस्यैव विवृतत्वं ज्ञाप्यते इति न ब्रूमः। किं तु सामान्यापेक्षं ज्ञापकम् इह शास्त्रे यावानकारः स सर्वोपि प्राक्रियायां विवृतो बोद्धव्य इति। एवमपि प्रत्युच्चारणं वर्णानां भेदेनास्य च्वाविति्यादावुच्चारितस्यानण्त्वेन सवर्णग्राहकता न स्यात् किं त्वकः सवर्णइत्यादौ प्रत्याहारएव सवर्णग्राहकत्वं स्यात्। एवमिकारादयोपीकोयणचीत्यादावेव ग्राहकाः स्युर्न तु एरनेकाचो यस्येतिचेत्यादौ। ननु एक एवाकारः तत्कस्यानण्त्वमाशंक्यते। नचैवमुदात्तानुदात्तत्वादिविरुद्धधर्मानुपपत्तिः। तेषां व्यञ्जकध्वनिधर्मत्वात्। अनुबन्धव्यवस्थापि लोकवद्भविष्यति। लोके हीह मुण्डो भव इह जटिलो भवेत्यादिक्रमेण एकस्यानेकधर्मोपदेशेपि तत्तद्देशभेदेन धर्मा व्यवतिष्ठन्ते तथेहापि कर्मण्यणित्यत्रैव णित्वं चरेष्ट इत्यत्र टित्त्वं गापोष्टगित्यत्र टित्वकित्त्वे असाम्प्रतिकइत्यादौ तु नैकमप्यनुबन्धकार्यमिति व्यवस्था।अत एव प्राग्दीव्यतोण् शिवादिभ्योणित्यादौ पुनःपुनर्णित्करणं सार्थकम्। कथं तर्हि घटेन तरतीति घाटिकः। तरतीत्यधिकारे नौद्व्यचष्ठन्निति ठन्। कथं च धनस्य निमित्तं संयोग उत्पातो वा

धन्यः । तस्य निमित्तं संयोगोत्पातावित्यधिकारे गोह्यचो संख्यापरिमाणाश्वादेर्यदितिचेत् । आवृत्तिकृताद्व्यज्व्यपदेशाद्भविष्यति । न च बाहुक इत्यादौ मुख्यद्व्यचि चरितार्थत्वाद्गौणे कार्यासम्भव इति वाच्यम् । अश्वादिप्रतिषेधेनेह गौणस्यापि मुख्यसमकक्षताया ज्ञापनात् । अत एव किरिणेत्यादौ सावेकाचइतिविभक्तेरुदात्तत्वं न भवति । आवृत्तिकृतेन द्व्यज्व्यपदेशेन स्वाश्रयस्य एकाज्व्यपदेशस्य निवार्त्तितत्वात् । नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते । तस्मादुक्तरीत्या बाधकाभावाल्लाघवरूपसाधकबलाच्चाकारव्यक्तिरेकैवेति सर्वं सुस्थमितिचेन्न । उदात्तत्वादिविरुद्धधर्माध्यासेन व्यक्त्यैक्यस्य बाधात् । ध्वनिधर्मा एवैतइत्युक्तमितिचेत्तर्हि कत्वगत्वादिकमपि तस्यैवास्त्विति अकारेकारादीनामप्यैक्यप्रसङ्गः । तदेतदुच्यते । अखण्डं पदं वाक्यं वा वाचकमिति । किं बहुना मास्त्वेव व्यंग्यो वर्णः व्यञ्जकत्वाभिमतैर्ध्वनिभिरेव सर्वनिर्वाहात् । उक्तं च हरिणा । अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता । कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता इति । तस्माद्यदि ध्वनिभिरेव निर्वाहस्तर्हि जातिस्फोट एव,नो चेत् कखयोरिवोदात्तानुदात्तादीनामपि भेद एवेति न्यायतः परिनिष्ठिते सति 'एवं ध्वनिगतान् भेदानुदात्तस्वरितादिकान् । वर्णा अनुपतन्तः स्युरर्थावगतिहेतव, इतिमामांसकमतमर्द्धजरतीयत्वादुपेक्ष्यमितिस्थितम् । एवं च अनन्ता वर्णा इतिनैयायिकाद्यभ्युपगतरीत्या यद्ययं जातिपरो निर्देशस्तर्हि अस्य च्वावित्यत्रापि तथैवास्त्विति किं ग्रहणकशास्त्रेण । तदुक्तम् । सवर्णेणग्रहणमपरिभाष्यमाकृतिग्रहणादिति । तपरसूत्रं तु जातिनिर्देशप्रयुक्तस्यैवातिप्रसङ्गस्य भङ्गाय । त्यदादीनाम इत्यादौ तु एकमात्रव्यक्तिरपि जातिविशेषणतया विवक्ष्य-

ते। विधेयविशेषणत्वात्। पश्वेकत्ववत्। अस्य च्वावित्यादौ तु अनुवाद्यविशेषणत्वान्न व्यक्तिर्विवक्षिता। ग्रहैकत्ववत्। किं तु अण्ग्रहणं कुर्वतः सूत्रकृतो नायं पक्षोऽभिप्रेतः। एका अवर्णव्यक्तिरिति पक्षस्तु दूषित एव। अष्टादश अवर्णव्यक्तय इति पक्षे तु अइउणिति यदि जातिपरो निर्देशस्तर्हि पुनरण्ग्रहणवैयर्थ्यम्। व्यक्तिनिर्देशे तूक्तरीत्या अस्य च्वावित्यादौ सवर्णग्रहणानुपपत्तिरिति महत्सङ्कटम्। तस्मादिह सूत्रकारस्याशयो दुर्वच इति चेत्। उच्यते। त्रिष्वपि पक्षेषु अस्त्येव सूत्रस्योपपत्तिः। तथा हि। स एवायमकार इतिप्रत्यभिज्ञाबलादकार एक एवेति पक्षे धर्मव्यवस्थायास्त्वयैवोपपादनाद्यथा के अण्कार्यं न भवति यथा चाप्रत्ययादिविधिस्थले न दीर्घादिप्रवृत्तिः। तथास्य च्वाविति विधिरपि मालीभवतीत्यादौ न प्रवर्तेतेति ग्रहणकशास्त्रं क्रियते। तच्च सावर्ण्याधीनमिति ह्रस्वस्य विवृतत्वं प्रतिज्ञायते। तत्तु आक्षरसमाम्नायिकस्यैव चेत्पुनरपि न व्यवतिष्ठेतेति सार्वत्रिकी प्रतिज्ञा। एवमपि अस्य च्वावित्यादौ अनण्त्वादेव ग्राहकत्वं न स्यादिति चेत्। विवृतह्रस्वत्वादेरविशेषेण तस्याप्यण्त्वात्। नहि मुण्डत्वजटिलत्वादिवदेशभेदेनानुपात्ताः स्वरूपमात्रानुवादेन विहिता अपि श्यामो दीर्घश्चतुर्बाहुरित्यादयो व्यवतिष्ठन्ते। उदात्तानुदात्तस्वरितानुनासिकत्वगुणास्तु शब्देनानुपात्ता न भेदका इति वृद्धिसूत्रे वक्ष्यते। अनन्ता एव व्यक्तय इति पक्षे अष्टादशअवर्णव्यक्तयइतिपक्षे च यद्यपि ह्रस्वदीर्घप्लुतसाधारणी एका जातिः कण्ठादिजन्यतावच्छेदिका तज्जन्यध्वनिव्यंग्यतावच्छेदिका वास्त्येव तथापि तद्व्याप्यह्रस्वमात्रवृत्तिरपि जातिरास्ति। तथा च। अइउण्सूत्रे व्याप्यजातिपरो निर्देशः तेन तज्जातीये एकत्र कृतं विवृतत्वं सर्वेष्वपि सिध्यति। अत

एव सर्वेपि ह्रस्वा अणो भवन्त्येवेति अस्यच्चावित्यादौ न कश्चिद्दोषः। अवात्तामित्यादिष्वपि ह्येषैव गतिः। अन्यथा अवात्स्तामिति स्थिते सिचः पूर्वपरयोस्तकारयोर्मध्ये अन्यतरस्यैव झलत्वं स्यान्न तूभयोः। अक्षरसमाम्नाये उभयोरपाठात्। ततश्च झलोझलीति न प्रवर्तेत सूत्रस्यावकाशस्तु अभित्था इत्यादिः स्यात्। एवं च दीर्घाणामनणत्वेन सवर्णग्राहकत्वं नास्तीत्यपि सिद्धान्तः सगच्छते। अथ व्यापकजातिपरमेव निर्देशं स्वीकृत्य अणग्रहणं त्यज्यतामिति चेत्। एवमपि उपसर्गादृतीत्यादौ ऌवर्णग्रहणाय ग्रहणकशास्त्रस्यावश्यकत्वात्। न च ऋऌवर्णयोरिति सावर्ण्यविधानसामर्थ्यात्तद्ग्रहः। अकः सवर्णइत्यादौ चारितार्थ्यात्। किञ्च। अस्य च्वावित्यादौ व्यापकजातिनिर्देशः त्यदादीनाम इत्यादौ तु व्याप्यजातिनिर्देश इत्यस्य नियामकाभावे सङ्करोपि स्यात्। न चानुवाद्यविशेषणं विधेयविशेषणं च ग्रहैकत्वपश्चैकत्ववद्विवक्षितमविवक्षितं चेतिमीमांसकमर्यादा वैयाकरणैः स्वीकर्तुं शक्या। उपेयिवाननाश्वाननूचानश्चेत्यत्र उपेत्याविवक्षितं नञ्प्रभृति तु विवक्षितमिति स्वीकारात्। आर्द्धधातुकस्येड्वलादेरित्यादावनुवाद्यविशेषणस्यापि बहुशो विवक्षणाच्च। तस्माद्व्याख्यानतो विशेषप्रतिपत्तिरिति परिभाषैव सिद्धांते शरणम्। व्याख्यानं तु लक्ष्यानुरोधीति यद्यप्यगत्या तत्र तत्राश्रीयते तथापि नैतद्बलेन ग्रहणकशास्त्रस्य प्रत्याख्यानं चमत्कारमावहते। ग्रहणकशास्त्रबलेन हि अप्रत्ययोऽविधीयमानः सवर्णग्राहक इति स्फुटतरं प्रतीयते। उल्लंघिता चेयं मीमांसकमर्यादा धर्मशास्त्रेपि बहुशः श्रेयांसं न प्रबोधयेदित्यादिषु। एकः पूर्वपरयोरितिसूत्रे एकग्रहणमपीह ज्ञापकम्। अन्यथाद्गुण इत्येकत्वस्य पश्चैकत्ववद्विवक्षासंभवात्किं तेनेति

दिक्। अथवार्थवत्त्वस्याविवक्षायामपि इहोच्चारितो ऽकारादिः स्वसदृशीः षड् व्यक्तीः सादृश्याख्यसम्बन्धेनोपस्थापयति। नचैवमपि वृत्या ऽनुपस्थितानां शाब्दबोधे ऽन्वयप्रतियोगितानुपपत्तिः। अर्थाध्याहारवादे बाधकाभावात्। अतिप्रसंगभंगस्तु तात्पर्यग्राहकबलेनैव। अन्यथा तवापि लक्षणाध्याहारादेरतिप्रसङ्गस्य तदवस्थत्वात्। स्पृहेरीप्सितइत्यनुशासनबलात्पुष्पेभ्य इत्यादौ पदाध्याहारः क्लृप्त इति चेन्न। ल्यब्लोपे कर्मणि क्रियार्थोपपदस्य च कर्मणि स्थानिन इत्याद्यनुशासनादर्थाध्याहारस्यापि स्थलविशेषे क्लृप्तत्वात्। अन्यथा गवित्ययमाहेत्यादावगतेश्चेति वक्ष्यते॥

ऋलृक्। ननु विधिवाक्येषु ऋकारो ग्रहणकशास्त्रबलेन ऋकारादीनष्टादश यथा गृण्हाति तथा लृवर्णानपि द्वादश ग्रहीष्यति तत्किं पृथग्लृकारोपदेशेन। न च भिन्नस्थानतया सावर्ण्यविरहादग्रहणमिति वाच्यम्। ऋकारलृकारयोः सवर्णविधिरिति वार्त्तिकबलेन वाचनिकस्य सावर्ण्यस्यावश्यं वाच्यत्वात्। अन्यथा इहोपदिष्टेपि लृकारे प्राल्कारीयतीत्यादौ उपसर्गादिति धातौ वासुप्यापिशलेरित्यस्याप्रवृत्तिप्रसंगात्। ननु क्लृपिस्थस्य लृकारस्येदमनुकरणम्। तस्य च स्वरकार्येष्वसिद्धत्वादृकार एवायमिति उपसर्गादृतीत्यादि सेत्स्यतीति चेन्न। कृपोरोल इति विहितस्यासिद्धत्वेपि तदनुकरणस्यास्यासिद्धत्वविरहात्। स्यादेतत्। प्रकृतिवदनुकरणमित्यतिदेशादयमप्यसिद्ध एव। स चातिदेशोवश्याश्रयणीयः। द्विः पचन्त्वित्याहेति तैत्तिरीयवाक्ये यद्यपि पचन्त्वित्याद्युदात्तं पठ्यते तथापि भाष्योदाहृते शाखान्तरीये पचन्तुशब्दस्य तिङ्ङतिङ इति निघातो यथा स्यात्। नह्येतत्तिङन्तम्। तिङन्तपदार्थक-

त्वात् । स्वाद्युत्पत्तिस्त्विह विवक्षाभेदेन वैकल्पिकीत्यर्थवत्सूत्रे वक्ष्यते । अग्नी इत्याहेत्यादौ प्रगृह्यत्वमप्यतिदेशादेव । अतिदेशे ज्ञापकं तु यत्तदेतेभ्यः परिमाणइति सौत्रनिर्देशः । नह्यत्रातिदेशं विना त्यदाद्यत्वं लभ्यते । अभिव्यक्तपदार्था ये इति न्यायेन लोकप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः । तथा च प्रयुज्यते, यत्तदोर्नित्यसम्बन्ध इति । नन्वनेनैवातिदेशेन अत्वस्यावश्यकत्वादुदाहृतप्रयोगोनुपपन्न एवेति चेत् । न । उदाहृतज्ञापकसूत्रएव त्यदादीनि सर्वैरित्येकशेषस्याकरणेन एतत्तदोः सुलोप इत्यादिनिर्देशैश्चातिदेशस्यानित्यताज्ञापनात् । अथवा प्रावृट्शरत्कालदिवां जइति सूत्रे ऽपोयोनियन्मतुषु चेति वार्तिकेनेयं परिभाषा अस्या अनित्यता चेत्युभयमपि ज्ञाप्यते। तथाहि । कारीर्यामप्सुमन्तावाज्यभागाविति श्रुतम् । अप्सुमे सोमः, अप्स्वग्ने सधिष्टवेति हि तत्र मन्त्रौ । तत्राप्सुशब्दादनुकरणभूतान्मतुप्यस्यवामीयमित्यादाविवानुकरणस्य विभक्तित्वाभावादेव लुक्को प्रसङ्गादलुग्विधानमुक्तपरिभाषां ज्ञापयति । मतुबुत्पत्तेश्च प्रथमान्ततां विना दुर्लभत्वात्प्रातिपदिकताप्यावश्यकी सा च प्रत्ययान्तत्वे सति दुर्लभेति प्रातिपदिकसंज्ञायामतिदेशप्रवृत्तिरिहाभ्यनुज्ञानादनित्यतापि सिद्धा । एतेन युष्मदस्मत्प्रत्ययगोचरयोरित्यादिप्रयोगा व्याख्याताः । प्रकृतमनुसरामः । लृकारानुकरणस्याप्यतिदेशेनासिद्धत्वात्प्राल्कारीयतीत्यादावुपसर्गादृतीत्यस्य प्रवृत्तिसिद्धौ किं सावर्ण्येनेति चेन्न । तथा सति रेफपरत्वप्राप्तावपि लकारपरत्वासिद्ध्या प्रकृते ऽनित्यत्वेनातिदेशप्रवृत्तेरेव त्वयापि वाच्यत्वात् । ननु रेफपरत्वे सिद्धे ऽतिदेशाद्रेफस्य लकारो भविष्यतीति चेन्न । एवमपि गम्लृसृप्लृइत्यादिस्थस्य लृकारस्यानुकरणे त्वदुक्तांति-

देशादेरुक्तिसम्भवाभावात् । तस्मात्सवर्णत्वस्यावश्यके ऌकारोपदेशो व्यर्थ एवेति चेत् । अत्रोच्यते । न तावद्वार्त्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्तिः । आस्ब्धे ऽपि वार्त्तिके ऋकारऌकारयोः सावर्ण्यस्यानित्यतां ज्ञापयितुं कर्त्तव्य एव ऌकारोपदेशः । तेन क्लृ३प्तशिखेत्यत्र गुरोरनृत इति प्लुतः सिध्यति । अन्यथा ऽनृत इति निषेधः स्यात् । ऋकारेण ऌकारग्रहणात् । क्लृप्यमानश्चलीक्लृप्यमान इत्यादौ ऋवर्णान्नस्येत्यौपसंख्यानिकणत्वस्याप्रवृत्तिस्तु क्षुभ्नादित्वेनापि सुवचा । अन्यथा प्रक्लृप्यमानादौ कृत्यच इति णत्वस्य दुर्वारत्वात् । इदं त्ववधेयम् । वार्त्तिकमते सवर्णेणग्रहणमपरिभाष्यमितिसिद्धांताद्दकारे ऌकारसाधारणजातिविरहेणाकृतिग्रहणासंभवाच्च प्राल्कारीयतीत्यत्र कार्यानिर्वाहस्तदवस्थः । सावर्ण्यविधिस्तु सवर्णदीर्घे होतृ ऌकार इत्यत्र इकोसवर्णइत्यस्य प्रवृत्तिप्रतिबन्धेन चरितार्थः । न च ऋत्यक इत्यस्य प्राप्तिः । ग्रहणकशास्त्राभावादेव । एवं च दीर्घे संपाद्य कृतार्थं ऌकारपाठः सावर्ण्यानित्यत्वमपि कथं ज्ञापयेदिति । तस्मादणग्रहणं प्रत्याचक्षाणस्य तत्स्थाने ऋग्रहणं कर्त्तव्यम्, अप्रत्ययग्रहणं च न कार्यमित्याशयः कल्प्यः । यद्यप्येवं पत्लृप्रभृतीनां लृदितां नाग्लोपीत्यृदित्कार्यं प्राप्नोति, पृथगनुबन्धकरणं तु लृदित्वप्रयुक्तस्य अङादेशस्य ऋदित्स्वप्रवृत्त्या चरितार्थत्वादसङ्करं ज्ञापयितुमसमर्थं तथापि सावर्ण्यस्यानित्यतयैवेदमपि समाधेयम् । यद्वा । स्वरसन्धिप्रकरणे लृवर्णस्य ऋवद्भाव एव वाच्यः । सावर्ण्यं च नोपसंख्येयं प्लुतस्तु प्रकरणांतरस्थ इति न तत्रातिदेशप्रवृत्तिः । उरण्रपरइतिपरिभाषा तु कार्यकालतया स्वरसन्धिप्रकरणस्थेति उरित्यनेन लृवर्णग्रहणोपपत्तिः । अस्मिन्नपि पक्षे ऌकारोपदेश इह कर्त्तव्य एव । क्लृ३

प्तशिख इत्यत्र प्लुतो यथा स्यात्। क्लृप्त इति च द्वित्वम्। प्रक्लृप्त इति च स्वरितः। अत्र ह्यन्तर्भावितण्यर्थात् कर्मणि क्तः। तेन गतिरनन्तर इतिपूर्वपदप्रकृतिस्वरः। कर्मणि यः क्तस्तदन्ते उत्तरपदे तद्विधानात्। ततः शेषनिघाते कृते उदात्तादनुदात्तस्य स्वरितः। न चात्र कृपोरोलइत्यस्यासिद्धत्वाशङ्कापि। पूर्वत्वात्। परं हि पूर्वं प्रत्यसिद्धं न तु परं प्रति पूर्वम्। एवं च गम्लृप्रभृतीनां लृकारस्येत्संज्ञाप्यनायासेन सिध्यति। अन्यथा तु पुषादिद्युताद्यॢलृदितइति लृकारे परतः कृतेन यणादेशेन इत्संज्ञानुवादेन च ज्ञापकेन कथंचित्साधनीया स्यात्। एवम् इदितोनुमित्याद्यनुवादानाम् ऋत्यक इत्यादिनिर्देशानां च साम्यादिकारादयोपि न निर्दिश्येरन्। यथाश्रुतसूत्ररीत्या तु ब्रूमः। ऋकारमुच्चारयितुं प्रवृत्ता कुमारी करणापाटवाद्यदा लृकारमुच्चारयति तदनुकरणस्याप्यच्कार्यसिद्धिः फलम्। अनुकरणानामनुकार्येणार्थवतां सर्वत्र साधुताभ्युपगमात्। नन्वेवं लृवर्णस्य दीर्घा न सन्तीति व्याहन्येत। अनुकरणस्य तत्रापि सुलभत्वादिति चेन्न। न्यायप्राप्तस्यापि वचनेन बाधात्। इदञ्च न्याय्यभावात्कल्पनं संज्ञादिष्वितिवार्त्तिकालुभ्यते। तथाहि। लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थ इति पूर्ववार्त्तिकेन लृकारोपदेशस्य प्रयोजनत्रयमुक्तम्। दध्यॢतकाय देहीति यदृच्छाशब्दः। कुमारीलृजु इत्याहेत्यशक्तिजानुकरणम्। प्लुतादिर्वचनस्वरिताश्च प्लुत्यादयः। एतदर्थं लृकारोपदेश इति हि तस्यार्थः। तत्र प्रथमप्रयोजननिराकरणायेदं वार्त्तिकम्। न्याय्यभावादिति। अस्यार्थः। ऋतिस्तावदृतेरीयङितिनिर्दिष्टः सौत्रो धातुस्तस्मादौणादिकः क्वुन्। तत्र ह्येवं सूत्रितम्। क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापीति। शिल्पिन्यभिधेये संज्ञायां च सोपपदान्निरुपपदाच्च धातोः क्वुन् स्यादित्यर्थः।

रजकः तक्षक इत्यादि शिल्पिनि। चरकः भषकः कटकं कनकमित्यादि संज्ञायामुदाहरणम्। तथा च ऋतकशब्दः शास्त्रानुगतत्वान्न्याय्यः। तत्सद्भावात्स एव संज्ञा तथा च कृतं कुर्यान्न तद्धितमित्यादि गृह्यस्मृतिरप्यनुकूलिता भवतीति। एवं वदता शास्त्राननुगतन्देशभाषया यत्कूचीत्यादि नाम क्रियते तदसाध्विति स्फुटीकृतम्। आदिशब्दादनुकरणेपि शिष्टानुरोधं दर्शयता लृवर्णस्य दीर्घा न सन्तीति शास्त्रमर्यादामुल्लंघ्य क्रियमाणस्य दीर्घानुकरणस्याप्यसाधुता दर्शिता। तस्माट्टिघुभादिभ्यः कूचीमञ्चीत्यादीनामिव गावीगोण्याद्यनुकरणेभ्यो दीर्घलृवर्णानुकरणस्यापि न्यायतो न किं चिद्वैलक्षण्यं किन्तु वाचनिकमिति स्थितम्। मन्त्रशास्त्रे तु मातृकान्यासादौ दीर्घ लृवर्णौ यद्यपि स्वीकृतस्तथापि प्रातिशाख्यन्यायेन अन्यत्रासौ नोपयुज्यतएवेत्यवधेयम्। एवं वचंत्यादीनामपि शिष्टैरनङ्गीकृतानां न्यायसाम्यादसाधुतोक्ता। तथा चाहुः। नहि वाचिरान्तिपरः प्रयुज्यत इति। एवं च न्याय्यभावादिति वार्तिकेन पूर्ववार्तिकोक्तप्रयोजनत्रयमध्ये प्रथमप्रयोजनं निराकृतम्। लृतकश्चासाधुरेव। इदं च त्रयीशब्दानां प्रवृत्तिर्न संति यदृच्छा शब्दा इति पक्षेणोक्तम्। पक्षान्तरैरपि हि परिहारा भवंतीति भाष्यकारः। एतद्ग्रन्थपर्यालोचनया तु चतुष्टयीति पक्षे लृतकादयोपि टिघुभादिवत्साध्वसाधुबहिर्भूताः साधव एव न तु टिघुभादिविलक्षणा इति लभ्यते। अन्यथा हि पक्षांतरैरिति न ब्रूयादिति। न च गृह्यस्मृतिविरोधः। तावतापि कृतं कुर्यान्न तद्धितमिति गृह्यमुल्लंघ्य कृतस्याप्यौपगवादेरिव शब्दसाधुताभ्युपगमे बाधकाभावात्। पुरुषस्तु साधूनपि प्रयुंजानो देवब्राह्मणादिनिन्दकवद्धर्मशास्त्रोल्लंघनात्प्रत्यवैतीत्यन्यदेतत्। यत्तु द्वितीयप्रयोजननिराक-

रणार्थं वार्त्तिकम् अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेष्विति। तस्यायमर्थः। शिष्टस्य साधोरनुकरणं साध्वेव। अशिष्टं च तदप्रतिषिद्धं च साध्वसाधुबहिर्भूतं टिघुभादि तस्यानुकरणमपि तादृगेवा ऽऽर्थादसाधोरनुकरणमप्यसाध्वेवेति। इदं तु भाष्ये दूषितमेव। हेलयो हेलय इत्यादीनां शिष्टपरिगृहीतानामसाधुतायां बीजाभावात्। नत्र्यपशब्दवाचकत्वमात्रेण तथात्वम्। अपशब्द इत्यस्याप्यसाधुतापत्तेः। न च प्रकृतिवदनुकरणमित्यनेन साधुतातिदेशः। अशास्त्रीयस्यातिदेशायोगादिति दिक्। तस्माद्वार्तिककृता दूषितमपि द्वितीयप्रयोजनं भाष्यरीत्या स्थितम्। यदपि तृतीयप्रयोजननिराकरणपरं वार्त्तिकम्। एकदेशविकृतस्यानन्यत्वात्प्लुत्यादय इति, तस्यायमर्थः। नुड्विधिलादेशविनामेषु प्रतिविधानमितिवक्ष्यमाणत्वादृकारैकदेशस्य रेफस्य लत्त्वे कृते एकदेशविकृतन्यायेनाच्कार्यसिद्धिरिति। न चैवमनृत इति प्रतिषेधापत्तिः। अरवत इति न्यासात्। नह्येकदेशविकृतन्यायेन रेफवत्त्वाप्यायाति। लोकेपि हि छिन्नपुच्छस्य पुच्छवत्त्वप्रयुक्तकार्यं नायात्येव। न चैवं होतृकारादेर्दीर्घस्याप्यरवत इति प्लुतप्रतिषेधापत्तिः, ह्रस्वस्य रवतो नेति न्यासात्। किं त्वेवं सति एकस्य लृकारस्य प्रत्याख्यानाय सूत्रभंगाश्रयणे विपरीतमेव गौरवमिति तदेतदाह भाष्यकारः। सेयं महतो वंशस्तम्बाल्लट्वानुकृष्यतइति। लट्वा पक्षिविशेषः फलविशेषो वा। लठलौल्ये इति धातोरशूरुषिलटिकणिखटिविशिभ्यः क्वन्त्रित्यौणादिकः क्वन्। नेड्वशिकृतीतीडभावः। लट्वा करञ्जभेदे स्यात्फले ऽवद्ये खगान्तरे इति विश्वः। ननु कृपोरोलइति सूत्रम् अअइत्यस्मात्पूर्वमस्तु। एवं च लत्वस्यासिद्धत्वादेव प्लुत्यादयः सेत्स्यन्तीति चेन्न। एवं हि सति ग्रोयङ्ङित्यस्याप्यु-

त्कर्षः स्यात्ततश्च लत्वस्यासिद्धतया निजेगिलियतइत्यत्र हलि चेति दीर्घः स्यात् । ननु बह्वृचप्रातिशाख्ये ऋकारलृकारावथ षष्ठोष्मा जिह्वामूलीया इति ऋलृवर्णयोः स्थानसाम्योक्तेस्तद्रीत्या ग्रहणकशास्त्रेणैव निर्वाहाद् लृकारोपदेशो मास्त्विति चेन्न । उक्तरीत्या ऋलृवर्णयोः सावर्ण्योपसंख्यानं परं प्रत्याख्यायतां लृकारोपदेशस्तूक्तरीत्या कॢप्तशिखे प्लुतसिद्धये सावर्ण्यानित्यतां ज्ञापयितुं कर्त्तव्य एवेति दिक् ॥

एओङ् । ऐऔच् । यद्यपि छन्दोगानां मध्ये सात्यमुग्रिराणायनीया अर्द्धमेकारम् अर्द्धमोकारं चाधीयते सुजाते एअश्वसूनृते अध्वर्यो ओअद्रिभिः सुतमिति अन्तःपादस्थस्याव्यपरस्य तदीयप्रातिशाख्ये ऽर्द्धमेकारमोकारं च विदधति तथापि प्रातिशाख्यसमाख्याबलादेव सर्वशाखासाधारणे ऽस्मिन् शास्त्रे तस्य न ग्रहणम् । ज्ञापकाच्च । यदि हि अकारादिभिरष्टादशानामिव एङ्भिरपि एकमात्राणां ग्रहणं संमतं स्यात्तर्हीह लाघवार्थमेकमात्रावेव एङावुपदिशेत् । अकारादिवत् । न चैवमदेङ् गुण इत्यत्र तपरत्वान्मात्रिकयोरेव गुणसंज्ञा स्यादिति वाच्यम् । तत्र एओइतिस्वरूपेणैव दीर्घयोर्निर्देशे ऽनणत्वेन सवर्णाग्रहणोपपत्तेः । एवमप्यर्द्धमात्रालाघवात् । तव हि वर्णोपदेशे एओइतिदीर्घयोर्मात्राचतुष्टयम् । गुणसंज्ञायां तु एङितिसार्द्धद्वयम् । संकलनया सार्धाः षण्मात्राः मम तु वर्णोपदेशे मात्राद्वयम् । गुणसंज्ञायां तु चतस्र इति मिलिताः षडेव मात्राः । तस्माद् द्विमात्रनिर्देशसामर्थ्यादप्येकमात्रयोरनभिमतत्वं निर्णीयते । नन्वेवं एच इग्घ्रस्वादेशइति व्यर्थं स्यात् । तद्धि स्थानेन्तरतमपरिभाषया प्राप्नुवतोरर्द्धैकाराद्धौकारयोर्निवृत्त्यर्थं क्रियतइतिचेन्न । वैकल्पिकप्राप्तिमतो ऽकारस्य व्यावृत्तये तदारम्भात् । एचां हि

पूर्वो भागो ऽकारसदृश उत्तरस्तु इवर्णोवर्णसदृशः तत्र उभयांतरतमस्य ह्रस्वस्याभावात्पर्यायेणाकारः स्यात् । इकारोकारौ च स्यातां तस्मान्मा कदाप्यवर्णं भूदिति सूत्रारम्भः । वस्तुतस्तु प्रत्याख्यास्यते सूत्रम् । तथा च तत्र वार्तिककारो वक्ष्यति । सिद्धमेङः सस्थानत्वात् । ऐचोश्चोत्तरभूयस्त्वादिति । अस्यार्थः । शब्दपरविप्रतिषेधेन एङ उत्तरभागान्तरतमौ इउवर्णावेवेति सिद्धम् । यद्वा । एकारः शुद्धतालव्यः औकारस्तु शुद्धौष्ठ्य इति मते सिद्धमित्यर्थः । तथा च बह्वृचानां प्रातिशाख्यम् । तालव्यावेकारचवर्गाविकारैकारौ यकारः शकार इति । शेष ओष्ठ्योपपाद्य इति च । पूर्वोक्तेभ्यः शेषो वर्णराशिरोष्ठाभ्यामुपपादयितव्यः । उवर्णः पवर्गः ओ औ उपध्मानीयश्च ओष्ठ्य इति सूत्रार्थः । इदं च प्रातिशाख्यवृत्तिकृता व्याख्यातम् । तद्भाष्ये तु शेष ओष्ठ्योपवाद्येति पाठः । तत्र अपवाद्येत्यस्य उत्तरसूत्रे वक्ष्यमाणान् विहायेत्यर्थः । न्यायसिद्धस्यैव बाध्यबाधकभावस्य स्फुटीकरणार्थं चेदं सूत्रम् । तदेवं शब्दपरविप्रतिषेधान्मतभेदेन स्थानसाम्याद्वा सिद्धमिति समाधानद्वयं एङ्क्षु फलितम् । एतच्च यद्यप्यैक्ष्वपि तुल्यं तथापि तत्र समाधानान्तरमप्यस्तीत्याह । ऐचोश्चेति । चकारो भिन्नक्रमः । हेतोरनन्तरं बोध्यः । अर्द्धमात्रा ऽवर्णस्य । अध्यर्द्धमात्रा इवर्णोवर्णयोरितिपक्षे मल्लग्रामादिवद्भूयसा व्यपदेशादपि इकरोकारौ भविष्यत इत्यर्थः । समप्रविभागपक्षोप्यस्तीत्यष्टमे वक्ष्ये । तत्र तु पूर्वोक्तसमाधानद्वयमेव शरणम् । तत्रापि शब्दपरविप्रतिषेधपरं प्रथमव्याख्यानं यद्यपि विवरणे स्थितम् । तथापि तदभ्युपगमे ऽप्रतिपत्तिर्वोमयोरित्यादिविप्रतिषेधे परमितिसूत्रे वार्त्तिकं भाष्यं च विरुध्येत । नहि गोस्त्रियोरितिसूत्रेण गोशब्दे विधीयमानो ह्रस्वोन्यत्र चरितार्थः । येनाप्रतिपत्तिः स्यात् ।

ननु प्रतिलक्ष्यं लक्षणभेदेन विकल्पे प्राप्ते परमेवेति नियमोस्त्वि-
ति चेन्न । एवं हि सति अचः परिस्मिन्नितिसूत्रे नित्यः पर-
णादेशः परश्चासौ व्यवस्थया । युगपत्सम्भवो नास्ति बहिरङ्गेण
सिध्यतीत्यादिभाष्यसन्दर्भो विरुध्येत । तद्बलेन हि लक्षणवा-
क्ययोः पूर्वापरीभाव एव विप्रतिषेधसूत्रस्य विषयो ऽन्यस्तु अ-
न्तरङ्गम्बलवदित्यस्येति लभ्यते । इदं च तत्रैव स्फुटीकरिष्या-
मः । द्वितीयव्याख्यानमपि अर्द्धैकारादिवत्प्रातिशाख्योक्तस्य
प्रायेणानादराद्दुर्बलम् । अथ छन्दोगाभिमतस्यापि चतुर्मात्रस्य
तपरकरणव्यावर्त्यतोक्तेस्तद्वदिहाप्यभ्युपगमस्तर्हि ऋलृक्सूत्रोक्त-
रीत्या ऋकारलृकारयोः सवर्णविधिरितिवार्त्तिकमपि प्रत्याख्या-
तुं शक्यम् । अथ शिक्षान्तरानुसारेण वार्त्तिकारम्भस्तर्हि एच-
इगितिसूत्रारम्भोपि तथैवास्त्विति दिक् । तस्मादेच इगितिसूत्र-
बलेनार्द्धैकाराद्धौकारौ न लभ्येते इति स्थितम् । ननु प्रातिशा-
ख्योक्तावपि ताविह गृह्येते चेत्तदा किमनिष्टमापद्येत येन तयोर-
ग्रहणं यत्नतः प्रतिपादयसीति चेत् । न । एचो ह्रस्वविधौ अ-
न्तरतमत्वेन तयोरेव प्रसङ्गात् । एच इगिति सूत्रं तु प्रत्याख्या-
तमेव । एतदर्थमेव सूत्राभ्युपगमे तु गौरवमेव दोषः । स्यादेत-
त् । एत् ओत् ङ् इत्यादिक्रमेण तपरानेव निर्देक्ष्यामः ।
तथा च ऊकालसूत्रे अच्शब्देन तपराणामेवोपस्थितौ सत्यां
तत्कालग्रहणादर्धं एकार ओकारो वा ह्रस्वसंज्ञां न लभेत तेन
ह्रस्वविधिविधेयोप्यसौ नेति । मैवम् । त्रिमात्राणामप्यनच्त्वा-
पत्तेः । ततश्च गो ३ त्रात इत्यत्र अनचिचेत्यचः परस्य विधी-
यमानं द्वित्वं तकारस्य न स्यात् । प्रत्यङ्ङैतिकायन उदङ्ङौ-
पगव इति ङमुट् न स्यात् । प्लुतसंज्ञाविरहात् प्लुतविधिर्न प्रवर्त्ते-
त । न च ओमभ्यादानइत्यादिविधिसामर्थ्यात्तत्सिद्धिः ।

उवर्णविधानेन चरितार्थत्वापत्तेरिति दिक् । तदेतदाह वार्त्तिककारः । सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम्, प्लुत्यादिष्वज्विधिः । प्लुतसंज्ञा च । अतपर एच इग्घ्रस्वादेशे एकादेशे दीर्घग्रहणमिति । अस्यार्थः । श्लिष्यमाणवर्णद्वयसदृशावयवत्वात्संधीयमानमक्षरं सन्ध्यक्षरमित्यन्वर्था पूर्वाचार्यसिद्धा एचां संज्ञा । तपर उपदिश्यतेनेनेति करणव्युत्पत्त्या प्रयोजनमुच्यते । तथा च एचां तपरत्वोच्चारणे फलमस्ति चेत्तर्हि तपरोच्चारणं तावत्कर्त्तव्यम् । प्लुतत्वे सत्यप्यज्विधिर्द्वित्वङमुडादिर्न सिद्ध्यति । तत्र प्लुतस्यैव ङमुडादिः, तस्मात्परस्य द्वित्वमिति सूचयितुमादिशब्दः । प्लुते तदुत्तरवर्णेषु चेष्टकार्यं सिध्यतीत्यर्थः । अभ्युपत्येवादो ऽयम् । वस्तुतस्तु अनचत्वात्प्लुतसंज्ञैव न सिध्यति । तस्माद्दुष्टस्तपरानिर्देश इति वार्त्तिकत्रयेणोक्तम् । यथान्यासपाठे त्वाह । अतपर इति । सूत्रं कर्त्तव्यं स्यादर्द्धैकारादिनिवृत्तये इत्यर्थः । वस्तुतस्तु उभाभ्यामपि सूत्रं कर्त्तव्यम् । उभाभ्यामपि वा न कर्त्तव्यमिति समनंतरमेवोपपादितम् । तस्मान्नायं दोष उद्भावनार्हः पक्षद्वयसाधारण्यात् । स्यादेतत् । तपरत्वाभावपक्षे गङ्गोदकं रमेश इत्यादौ त्रिमात्रचतुर्मात्राणां स्थाने त्रिमात्रचतुर्मात्रा एवादेशाः स्युः । आन्तरतम्यात् । नचाकः सवर्ण इति सूत्रे दीर्घ इति योगं विभज्य एकः पूर्वपरयोरित्यधिकारे यो विहितः स दीर्घो भवतीति व्याख्यानान्न त्रिमात्राद्यादेश इति वाच्यम् । पशुं त्रिद्धं पचंतीत्यत्र दोषप्रसंगात् । ननु अमीत्येव सूत्रमस्तु । प्रथमयोरिति सूत्रात्पूर्वसवर्णोनुवर्त्तते । एकः पूर्वपरयोरिति च । एवं सिद्धे पूर्वग्रहणं यथाजातीयकः पूर्वः स एव यथा स्यात् दीर्घो मा भूदिति । तेन पशुमिति तावत्सिद्धम् । सम्प्रसारणाच्चेत्यत्रापि स एव पूर्वश-

न्दोनुवर्त्तते। हल इति सूत्रारंभसामर्थ्याद्वा संप्रसारणाच्चेत्यनेन दीर्घो न विधीयते। तेन विद्धमित्यपि सिद्धम्। अतो गुण इत्यत्रापि पर इत्येव सिद्धे रूपग्रहणसामर्थ्याद्यादृशः परस्तादृश एवादेशो न तु तद्विलक्षणः। तेन पचन्तीत्यपि सिद्धम्। तस्माद्योगविभागेन एकादेशो दीर्घो भवतीति पक्षो निर्दोष एवेति चेन्न। एवं सति कृष्णर्द्धिस्तवत्कार इत्याद्यसिद्धिप्रसंगात्। इह हि दीर्घवचनादकारो न। अनान्तर्यादेदोतौ न। तस्मादीर्घ इति योगविभागो दुष्ट एव। तेन गङ्गोदकं रमेश इत्यत्र त्रिमात्रचतुर्मात्रप्रसक्तिर्दुर्वारैवेति। न च प्लुतश्च विषये स्मृत इति वाच्यम्। प्लुताप्लुतप्रसङ्गे सत्येव तदिति वक्ष्यमाणत्वात्। ननु तथापि चतुर्मात्रः कथमापद्यते तस्य लोकवेदयोरप्रसिद्धेरिति चेन्न। छान्दोग्ये प्रसिद्धेरित्याहुः। वस्तुतस्तु लोकेप्यस्ति प्रसिद्धिः। तथा च प्लुतावैच इदुतावितिसूत्रे भाष्यकारो वक्ष्यति। इष्यतएव चतुर्मात्रः प्लुत इति। अत्रोच्यते। गुणसंज्ञायां वृद्धिसंज्ञायां च तपरनिर्देशान्नोक्तदोषः। तदेतदुक्तं वार्त्तिककृता, एकादेशे दीर्घग्रहणमिति। तस्यैव संज्ञित्वादिति भावः। न त्वेतद्वार्त्तिकं दीर्घग्रहणांतरकर्त्तव्यतापरं नापि योगविभागपरम्। उक्तयुक्तेः। स्यादेतत्। संज्ञासूत्रे अदातोस्तपरकरणेपि एङैचोः कथं तत्कालग्राहकता। सहिवहोरोदिति सूत्रे वर्णग्रहणेन तात्पर इति पञ्चमीसमासस्यापि ज्ञापितत्वादिति चेत्। एवमपि तात्पराभ्यामेङैच्छब्दाभ्यामस्तु दीर्घाणामेवोपस्थितिरुपस्थितैस्तु दीर्घैः स्वसवर्णानामशेषाणां ग्रहणं दुर्वारमेव। नहि तेपि तात्पराः। अनुच्चारितत्वात्। ग्राहकत्वं परमनुच्चारितानामपि प्रत्याहारैरुपस्थितानामस्त्येव। दीर्घाज्जसिचेति ज्ञापकात्। ल्वादिभ्यः प्वादीनामित्यादिनिर्देशाच्च। तेन

चमूष्वित्यादिषु षत्वादिकं सिध्यतीति वक्ष्यते । तात्पर-स्तत्कालस्येति तु उच्चारितेष्वेव स्यादिति चेत्सत्यम् । ङ-मोह्रस्वादिति सूत्रे ङ्मुडिति प्रत्याहारे कृतं टित्वं संज्ञायां व्यर्थं तत्सामर्थ्यात्संज्ञिषु ङादिषु उपकरोतीति यथा स्वीकृतं तथेहापि तात्परत्त्वं संज्ञायामनुपयुज्यमानं तदुपस्थाप्येषु संज्ञिषु तत्काला-वधारणं सामर्थ्यात्करोतीति न कश्चिद्दोषः । यद्वा । अणुदित्सू-त्रे ऽशब्दसंज्ञेत्यनुवर्त्तते । शब्दस्य संज्ञायां विधेयायामण् सव-र्णान्न गृह्णातीति ऊकालोज्जित्यत्र भाष्ये स्फुटम् । उपपादयि-ष्यामश्चेदं तत्रैव । अतो गुणवृद्धिसंज्ञाविधावपि न सवर्णग्रह-णम् । तपरकरणं तु स्पष्टार्थम्, ईदूदेदितिवत् । अन्यथा हि किमेचावेवेह निर्दिष्टौ किं वा आकारोपीत्यादिसन्देहः स्यात्। तत्र च मालादीनांचेत्यादिज्ञापकानुसरणक्लेशः स्यादिति दिक् । युक्ततरश्चायमेव पक्षः । आद्यपक्षे हि वृद्धिसंज्ञायाम् आ इति दीर्घस्यानण्त्वेन सवर्णाग्राहकतया तपरकरणमैजर्थमिति स्थिते ङ्मुटीव सामर्थ्यमस्तु गुणसंज्ञायां तु तपरकरणस्योभयार्थताभ्यु-पगमात्पूर्वत्र चरितार्थस्य क्व सामर्थ्यं येनेदं संज्ञिनोरेदोतोरुप-कुर्यादिति तत्र सवर्णग्रहणं स्यादेव । अस्मिन्नपि पक्षे एकादेशे दीर्घग्रहणमिति वार्त्तिकं दीर्घस्यैव संज्ञित्वादिति पूर्ववदेव व्या-ख्येयम् । स्यादेतत् । प्रथमपक्षे तादपि परस्य तत्कालग्राहक-त्वाद् ऋदोरप् यवः स्तव इत्यादावेव स्यान्न तु लवः पव इत्या-दावपीति चेत् । अत्र भाष्यम् । नायं तकारः किं तर्हि अस-न्देहार्थः मुखसुखार्थो वा दकारोयमिति । नन्वेतद्भाष्यं तिति प्रत्ययग्रहणमित्येतद्वार्त्तिकप्रत्याख्यानपरेण तित्स्वरितमित्यत्र-त्यभाष्येण सह विरुध्येत । तथाहि । तत्र तिति प्रत्ययग्रहणं कर्त्तव्यम् इह मा भूत् दिवउत् द्युभिरक्तुभिरिति पूर्वपक्षयित्वा

दित्त्वमाश्रित्य समाहितम् । ततो भाव्यमानस्याप्युकारस्यादसो-सेर्दादित्यत्रेव सवर्णग्राहकता स्यादित्याशंक्य तपरसूत्रे दकारस्यापि चर्त्वभूतस्य निर्देशादपरोपि तत्कालग्राहक इति परिहृतम् । एवं च उर्ऋदित्यादावपि दपरत्वमेव । अन्यथा स्वरितप्रसङ्गात् । अयमेव च दपरानिर्देशो भाव्यमानस्याप्युकारस्य सवर्णग्राहकतां ज्ञापयतीति स्थितम् । इह तु ऋदोरिति दकारानिर्देशाल्लवः पव इत्यादौ दीर्घेपीष्टं साध्यते । अत्र प्राञ्चः । थकारस्थानिको धकारस्थानिको वा दकारोत्र भाष्यकृतो विवक्षितः अतो न पूर्वोत्तराविरोध इति । ऋजवस्तु वार्त्तिकमते स्थित्वेदं भाष्यमतो न विरोध इत्याहुः । वस्तुतस्तु तपरस्तत्कालस्येत्यत्र दकारो न निर्दिश्यते प्रयोजनाभावात् । दिवउत् ऋतउदित्यादौ तु तपरत्वादेवेष्टसिद्धिः । नन्वेवं तित्स्वरितामित्यस्य प्रसङ्ग इति चेन्न । प्रत्ययाप्रत्ययोः प्रत्ययस्य ग्रहणमिति परिभाषया तत्समाधानात् । यत्तु तित्स्वरितमिति सूत्रे हरदत्तेनोक्तम्, तस्यास्तु परिभाषाया भाष्यवार्त्तिकयोरिहादर्शनादयं यत्नो महानस्माभिरादृत इति । तत्रेदं वक्तव्यम् । थकारस्थानिको धकारस्थानिको वा दकार इत्येवंरूपो यत्नस्तावदेओङ्सूत्रे स्थित्वा पूर्वाचार्यैरेवोक्त इत्यत्रत्यकैयटग्रन्थएव स्फुटम् । नन्वत एवास्माभिरादृत इति ब्रूमो नतून्नीत इतीति चेत् । सत्यमादृतः । तथापि परिभाषायाअदर्शनादित्यसिद्धो हेतुरङ्गस्येति सूत्रप्रत्याख्यानाय भाष्ये कण्ठरवेणैव एतत्परिभाषोपन्यासात् । निरुतं दुरुतमित्यादिसिद्धये सूत्रं कर्त्तव्यमिति स्थिते व्यर्थेयं परिभाषेत्याशय इति चेत् । तथापि थकारधकारस्थानिको दकार इत्यर्थ इति व्याख्यानक्लेशो निष्फलतया मूलस्वरसविरुद्धतया चादरणानर्ह एव । दिव उदित्यादौ तित्स्वरितमित्यस्य प्राप्तेरेव वि-

रहेण दकारप्रश्लेषादानैर्बीजत्वात् । तथाहि । उदित्येषा उकारस्य संज्ञा तया प्रत्यायित उकारस्तु विधीयते । तथा च संज्ञायास्तित्त्वेपि संज्ञिनः किमायातम् । वस्तुतस्तु संज्ञापि तान्ता न तु तित् । तपरइति हि सूत्रितं न तु तिदिति । यदि हि संज्ञावत् संज्ञ्यपि तान्त एव तर्हि अतो भिस ऐस् भवद्भिरित्यादावेव स्यान्न तु वृक्षैरित्यादौ । तपरस्तत्कालस्येति सूत्रं च व्यर्थमेव स्यात्स्वं रूपं शब्दस्येत्यनेनैव गतार्थत्वात् । न च ङ्मुडादाविव संज्ञायां कृतं लिङ्गं संज्ञिनि लब्धुं शक्यम् । तद्वदिह सामर्थ्यविरहात् । एवञ्च तित्स्वरितमिति सूत्रे भाष्यवार्तिकग्रन्थः सर्वोप्यभ्युपेत्यवाद एव । स्थाघ्वोरिच्चेति सूत्रे इच्चकस्य तकारत्वमित्यादिग्रन्थोप्येवमेव तस्मान्नायं तकारःकिन्तर्हि दकार इति इहत्यभाष्यग्रन्थो यथाश्रुत एव साधुरिति सहृदयैराकलनीयम् । अयमेव च ग्रन्थोभ्युपेत्यवादरूपतामुत्तरग्रन्थानां गमयति । एतेन औत्, इटोदित्यादिष्वपि विधेयस्य तपरत्वाभावो व्याख्यातः । तित्त्वं तु दूरापास्तमिति दिक् । इह अकारादयो वर्णाः सांशाः इष्यन्ते । यदाह तस्यादित उदात्तमर्द्धह्रस्वं, पूर्वस्यार्द्धस्यादुत्तरस्येदुताविति । वार्तिककारोप्याह । ऐचोश्चोत्तरभूयस्त्वादिति । तत्र सन्ति के चिदंशाः स्वतन्त्रवर्णांतर सदृशाः । यथा । आकारादिष्वकारस्य सदृशौ भागौ । एषु पूर्वभागो ऽकार उत्तर इवर्णोवर्णयोः । ऋकारे उभयतोऽभक्तेरर्द्धमात्रा मध्ये रेफस्य सदृशोर्द्धमात्राभागः ऌकारेप्युभयतोऽभक्तिः मध्ये स्वतन्त्रलकरसदृशो भागः तत्र स्वतन्त्रतत्तद्वर्णग्रहणेन विधीयमानं कार्यं तत्तत्सदृशेष्वंशेषु न प्रवर्त्तते । तत्सदृशा हीमे न तु तएव नरसिंहवज्जात्यन्तराक्रान्तत्वात् । गोनौग्रहणं चात्र ज्ञापकम् । यदि हि भागा अपि स्वतन्त्रवर्णप्रयुक्तं कार्यं प्रवर्तयेयुस्तर्हि गोद्व्यचोऽ

संख्यापरिमाणाश्वादेर्यदिति नौद्व्यचष्ठन्निति च सूत्रद्वये द्व्यज्ग्रहणेनैव गतार्थत्वाद्नोशब्दं नौशब्दं च नोपाददीत। तेनाग्ने इन्द्र, वायो उदकमित्यत्र सवर्णदीर्घो न। न चैचोयवायाव इत्यनेन तस्य बाधोस्त्विति वाच्यम्। अयादयो हि येननाप्राप्तिन्यायेन मध्येपवादन्यायेन वा यण एव बाधकतया अग्नआयाहीत्यादौ चरितार्था अग्ने इन्द्रमित्यादौ परेण दीर्घेण बाध्येरन्। अन्तरङ्गोपि दीर्घोवयवमात्रापेक्षत्वात्। तथाग्नएतीति एङःपदान्तादित्येतन्न। आलूय प्रमायेत्यत्र तुङ्न मालाभिरित्यत्र ऐस्न यातेत्यादावतोलोपो न वाचा तरति वाचो निमित्तमित्यत्र द्व्यज्लक्षणौ ठन्यतौ नेति दिक्। नुड्विधिलादेशविनामेषु तु प्रतिविधेयम्। तथाहि द्विहल्ग्रहणमपनीय तस्मान्नुडित्येव सूत्रं कर्त्तव्यम्। नचैवमानृधतुरित्यत्रेव आटतुरित्यादावपि नुट्प्रसङ्गः अश्नोतेश्चेत्यस्य नियमार्थत्वात्। नियमश्च सामान्यापेक्षः। अकारोपधस्य यदि भवत्यश्नोतेरेव न तु अटत्यादेरिति। यदि त्वश्नातिमात्रं निवर्त्य स्यात्तर्हि नाश्न इत्येव ब्रूयात् रोल इत्यत्र स्वतंत्रास्वतन्त्रसाधारणी जातिरनुवाद्ये विधेये च विवक्षिता। एकदेशस्य च पृथङ्निष्कर्षायोगात्तद्द्वारा ऋकारस्यैव लृकारादेशः फलति। स्वतन्त्रवर्णवृत्तिजातेर्नायं निर्देशः किं तु अंशांशिसाधारण्या एवेत्यत्र ज्ञापकं तु लुटि च क्लृपस्तासि च क्लृपः ऋदुपधाच्चाक्लृपिचृतेरिति निर्देशाः। यद्वा। कृप उः रः ल इति छेदः कृप इति लुप्तषष्ठीकं पदम्। तच्च तंत्रेणावृत्त्या वा योज्यम्। कृपेर्यो रेफस्तस्य लः कृपेर्ऋकारस्यावयवो यो रेफः रेफसदृश इति यावत्, तस्य च लकार इति तेन चलीक्लृप्यतइत्यादि सिद्धम्। ईदृशपदविभागप्रदर्शनपरभाष्यादेव कृपेरिति सूत्रपाठस्य प्रामादिकत्वं निर्णीयते। तदेवं नुड्विधिलाः

देशयोः समाहितम् । विनामो नतिः, तल्लक्षणं चोक्तं प्रातिशाख्ये, नतिर्दंत्यमूर्द्धन्यभाव इति । प्रकृते तु नस्य णत्वं नतिः, तत्रे, दं प्रतिविधानम् । छन्दस्यृदवग्रहादित्यत्र योगविभागः कार्यः, ऋतः, ऋतः परस्य नस्य णः स्यात् । गृणाति वृणोतीत्यादि । ततः छन्दस्यवग्रहात् । ऋत इत्येव, पितृयाणं द्युमदित्यादि । नन्वेवमपि तपरकरणात् पितृणामित्यादौ णत्वं न स्यादिति चेत् । एवं तर्हि लत्वविधाविवेहापि रषाभ्यामिति रेफतत्सदृशभागसाधारणी जातिर्निर्दिश्यते क्षुभ्नादिषु तृम्रोतिशब्दपाठाज् ज्ञापकात् । न च परयाज्भक्त्या व्यवधानं, व्यवायेपीति विभज्य सामान्येन व्यवायेपि णत्वविधानात् । न चैवं कृतेनेत्यादावतिप्रसङ्गः । अट्कुप्वाङ्नुम्भिरिति नियमात् । आक्षरसमाम्नायिकैस्तत्प्रत्यायितैर्वा व्यवाये यदि भवति तर्ह्येतैरेवेति नियमसूत्रस्यार्थः । यद्वा तृम्रोतिशब्दपाठेन होतृपोतृप्रशास्तृणामित्यादिनिर्देशेन च ऋवर्णान्नस्य णत्वमेव ज्ञाप्यते लाघवात् । एवं हि व्यवायेपीति योगविभागोपि न कर्त्तव्यो भवतीति । भाष्ये तु वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते इति द्वितीयोपि पक्षः समर्थितः । स तु बहुप्रतिविधयत्वेन गौरवभयान्नेह प्रपञ्च्यते । ननु यदि वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते तर्हि कुक्कुटः पिप्पली पित्तमित्यादौ संयोगसंज्ञा न स्यात् । अखंडस्य मात्राकालस्य क्वप्प्त्त इत्यस्य एकहल्त्वात् । तदवयवयोश्च हल्ग्रहणेनाग्रहणात् । नन्वखंडस्यानुपदेशात् कथं हल्त्वमिति चेत् मा भूत्तर्हि तदपि । अवयवानां हल्त्वं तु कुतः सँय्यत्ता सँवत्सरः यँल्लोकंमित्यादौ तु एकवर्णानामपि हल्त्वं भविष्यति । अणूसूपदिष्टैर्ग्रहणात् । तदवयवयोस्तु हल्त्वं न स्यादेव । ततश्च संयोगसंज्ञाविरहे ततः पूर्वस्य

गुरुत्वाभावे प्लुतो न स्यादिति। अत्राहुः। व्यञ्जनमर्धमात्रमेव। आशूच्चारणात्तु तुल्यरूपयोर्द्वयोरेकत्वभ्रमः। इदं च शिष्टसमाचारात् प्रक्रियादशायामवश्यं स्वीकार्यम्। परमार्थदशायां तु,पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च। वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेति वाक्यपदीयोक्तरीत्या स्फोटं सिद्धान्तयतां क्वास्य पूर्वपक्षस्यावसरः॥

हयवरट्॥ हकारोयं द्विरुपदिश्यते। यदि तु परत्रैवोपदिश्येत अडशढधझइण्ग्रहणेषु न गृह्येत।ततश्च अर्हेणेत्यत्राड्व्यवायेपीति णत्वं न स्यात्। महान् हीति स्थिते महाँहीति न स्यात्। अत्र हि दीर्घादटि समानपादइति रुः। आतोटिनित्यमित्यनुनासिकः। भोभगोअघोअपूर्वस्येति यत्वम्। हलिसर्वेषामिति यलोपः। तत्राप्यशीत्यनुवर्त्ततइति वक्ष्यते। ब्राह्मणो हसतीत्यत्र हशि चेत्युत्वं न स्यात्। तथा लिलिहिद्वे लिलिहिध्वइत्यत्र विभाषेट इति मूर्द्धन्यविकल्पो न स्यात्। तत्र हि इणः षीध्वमितिसूत्रादिण इत्यनुवर्त्तते। तदेवमटि अशि हशि इणि चेति चतुर्षु ग्रहणं प्रथमोपदेशस्य फलमिति स्थितम्। यदि तु परत्र नोपदिश्येत। वलूरल्झल्शल्ग्रहणेषु न गृह्येत। ततश्च रुदिहि स्वपिहीत्यत्र रुदादिभ्यः सार्वधातुकइति वलादित्वप्रयुक्त इण्न स्यात्। ष्णिह प्रीतौ। स्निहित्वा स्नेहित्वा सिस्निहिषाति सिस्नेहिषतीत्यत्र रलोव्युपधादिति कित्त्वं न स्यात्। अदाग्धां अदाग्धमित्यत्र घत्वस्यासिद्धत्वाद्धकारादझलः परः सिजिति झलोझलीति न प्रवर्त्तेत। अधुक्षत् अलिक्षादित्यत्र शल इगुपधादनिट इति क्सो न स्यात्। तस्मात्प्रत्याहाराणां चतुष्टये प्रथमोपदेशस्य चतुष्टये च द्वितीयोपदेशस्य फलमस्तीति स्थितम्। स्यादेतत्। रेफस्य यरकार्याणि प्राप्नुवन्ति। तद्यथा भद्रहृदो भद्रहृद इत्यत्र अचः प-

राद्धकारात् परस्य यर इति विधीयमानं द्वित्वं नह्यस्तीत्यादौ यकारस्येव प्राप्नोति । न च रोरीति लोपः सुकरः । लोपं प्रति द्वित्वस्यासिद्धेः । हलो यमामिति लोपस्तु वैकल्पिक इति वक्ष्यमाणत्वात् । पक्षे रेफद्वयं श्रूयेत । न च व्यञ्जनपरस्यैकस्यानेकस्य वा उच्चारणे विशेषो नास्तीत्यसिद्धवत्सूत्रे भाष्यकृता वक्ष्यमाणत्वान्नायं दोष इति वाच्यम् । सूक्ष्मत्वाद्दुर्लक्ष्यो विशेष इति तदर्थात् । ननु सर्वथा विशेषविरहो ऽभिप्रेतः । शरोचि हलो यमामित्यादिशास्त्रवैयर्थ्यापत्तेः । तथा चतुर्मुख इत्यादौ यरोनुनासिकेनुनासिको वेति पक्षे णकारः प्रवर्त्तेत । स्थानसाम्यात् । कुण्डं रथेनेत्यादौ वा पदान्तस्येति पक्षे रेफः प्रवर्त्तेत । रेफोष्मणां सवर्णा न सन्तीत्येत,द्विजातीयः सवर्णो नास्तीत्येवंपरम् । स्वस्य स्वयं सवर्णो भवत्येव । तुल्यास्यप्रयत्नत्वात् । रोरीति लोपस्तु नास्ति । तं प्रति परसवर्णस्यासिद्धत्वात् । अथ द्वित्वानुनासिकपरसवर्णनिवृत्तये यवाभ्यां पूर्वत्र रेफोनुकृष्येत । हरयवडिति । तर्हि रलो व्युपधादित्येतद्वकारान्तेष्वपि प्रवर्त्तत । ततश्च देवित्वा दिदेविषतीत्यत्र पक्षे गुणो निषिध्येत । नन्वव्युपधादिति छित्वा अवकारांताद् व्युपधादिति व्याख्यास्यतइति चेत् । एवमपि गौधेरः पचेरन्नित्यादौ लोपो व्योरिति न प्रवर्त्तेत । रेफस्य वल्यनन्तर्भावात् । रलीति वक्ष्यामीति चेत् । हयगतौ, ह्यादित्यादौ यकारेतिप्रसङ्गः । ननु यथाश्रुतएव सूत्रे वलीति सरेफं पदं छित्वा रेफे वलि चेति व्याख्यानान्नोक्तदोष इति चेत् । एवमपीकोरणचि संयोगादेरातोधातोरण्वतः उदात्तरणो हल्पूर्वादिग्रणः सम्प्रसारणमित्यादिक्रमेण यण्ग्रहणानि सर्वाणि रेफेण ग्राह्याणि स्युः । न चैतावतापीष्टनिर्वाहः । इकोरणित्यत्र संख्यातानुदेशेनेकारस्य रेफः उकारस्य यकारः ऋका-

रस्य वकार इति बहूपप्लवप्रसङ्गात् । ननु यथाश्रुतेपि यथासंख्येन निर्वाहो दुरुपपादः । तथाहि । विधीयमानतया यवलाः सवर्णान्न गृह्णन्तीति चत्वारस्तावद् यणः । गुणानामभेदकतयानुनासिकसंग्रहेपि पृथग्गणनाविरहात् । इकस्तु सवर्णग्रहणात् षट्षष्टिः । न च षट्षष्टेरुपस्थापकानामिक्शब्दवाच्यानामिकारादीनां चतुष्ट्वमस्त्येवेति वाच्यम् । तृतीयचतुर्थाभ्यामृकाराभ्यां प्रत्येकं तस्या एव त्रिंशत उपस्थितौ सत्यामॢकारे रेफादेशस्य ऋकारे च लकारादेशस्य दुर्वारत्वात् । तस्मात्स्थानेन्तरतम इत्यनेनैव प्रकृते निर्वाहः । यथासंख्यसूत्रं तु नन्दिग्रहिपचादिभ्यइत्यादिषूपयोक्ष्यतइत्येव निष्कर्षः।तथा चेकोरणिति न्यासेपि तेनैव निर्वाहोस्त्विति चेन्न । वैषम्यात् । यथाश्रुते ह्यविरोधात्परिभाषाद्वयमपीकोयणित्यत्र प्रवर्त्तते । इको यथासंख्यमन्तरतमो यण् स्यादिति । रणिति न्यासे तु परिभाषयोर्विरोधात् परत्वेन यथासंख्यमेव प्रवर्त्तेत । तस्मादनुचितो रेफस्य स्वस्थानादपकर्षः, यथाश्रुते तु द्वित्वादिदोषत्रयं दुर्वारमिति । अत्रोच्यते । रेफस्याविशेषतः श्रुतेन द्वित्वं प्रति निमित्तत्वेन सामान्यतः श्रुतं कार्यित्वं बाध्यते । यथा ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टामिति विशेषतः श्रुतेन परिवेषणेन माठरकौण्डिन्ययोः सामान्यतः प्राप्तं भोजनं बाध्यते तद्वत् । यद्यपीह लक्ष्यव्यक्तिभेदेनोभयं सम्भवति तथापि सत्यपि सम्भवे सामान्यतः प्राप्तं विशेषप्राप्तेन बाध्यतइत्यभ्युपगमान्न दोषः । एवं चाचोरहाभ्यामिति सूत्रे यर इति रेफभिन्नपरमेवेति स्थिते अनचिचेत्यत्रापि तथैव । अर्थाधिकाराश्रयणात् । तेन हर्यनुभव इत्यादावपि रेफस्य न द्वित्वम् । नन्वेवं दध्युदकादौ यण् न स्यात् । विशेषतः श्रुतेन स्थानित्वेनेकां निमित्तत्वस्य बाधादिति चेन्न ।

तत्र लक्ष्यानुरोधेन व्यक्तिपक्षाश्रयणात् व्यक्तिपक्षे हि प्रतिलक्ष्यमसकृल्लक्षणं प्रवर्त्तते। यद्वा। प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तंत्रेणोच्चारणमिकोयणचीति। ततश्चैकामपि तात्पर्यतो निमित्तत्वप्रतिपादनाददोषः। नचैवं श्रीश इत्यादावपि यण् प्रसंगः। व्यक्तिपक्षे विप्रतिषेधे परमेवेति नियमबलेन तद्व्यक्तिविषयकशास्त्रस्यैव विरहकल्पनात्। एवमपवादविषयेपि सुश्रियावित्यादौ बोध्यम्। परिहृत्यापवादविषयं तत उत्सर्गोभिनिविशतइति न्यायात्। जातिव्यक्तिपक्षौ च लक्ष्यानुरोधाद्व्यवस्थया ऽऽश्रीयेते इति पस्पशायामेवोक्तम्। तस्मादित्युत्तरस्य पत्युत्तरपदाण्ण्य इत्यादिनिर्देशश्चेह लिङ्गम्। भाष्ये तु नेमौ रहौ कार्यिणौ द्विर्वचनस्य किं तर्हि निमित्तमिमावित्युक्तम्। तत्र हकारग्रहणं दृष्टान्तार्थं तस्य यर्बहिर्भूततया यथा न द्वित्वे कार्यिता तथा यरन्तर्भूतस्यापि रेफस्येति। एवमनुनासिकपरसवर्णविधी अपि स्थानेन्तरतमपरिभाषासंस्कृतौ स्थानप्रयत्नोभयान्तरतमे एतन्मुरारिस्त्वङ्करोषीत्यादौ क्वचिल्लब्धावकाशौ अनंतरतमे प्रागुक्ते न प्रवर्त्तेते जातिपक्षाश्रयणादेवेति संक्षेपः। अत्र वार्त्तिकम्। अयोगवाहानामट्सु णत्वं शर्षु जश्भावषत्वे। अविशेषेण संयोगोपधसंज्ञालोंत्यविधिर्द्विर्वचनंस्थानिवत्वानिषेधा इति। अस्यार्थः। अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां ते ऽयोगाः अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः। वाहयंति निर्वाहयन्ति प्रयोगमिति वाहाः। अयोगाश्च ते वाहा श्चेति कर्मधारयः। अनुपदिष्टत्वे उपदिष्टैरगृहीतत्वे च सति श्रूयमाणा इत्यर्थः। ते च विसर्जनीयजिव्हामूलीयोपध्मानीयानुस्वारयमा इति भाष्यम्। एतच्च ऋति ऋ वा ऌति ऌ वेति विहितयोरीषत्स्पृष्टयोरप्युपलक्षणम्। तथा च तु-

ल्यास्यसूत्रे भाष्यम् । तयोरचत्वं वक्ष्यामीति । तत्फलं तु तत्रैव स्पष्टम् । तत्र यमानां लक्षणमनुनासिकसंज्ञासूत्रे प्रपंचयिष्यामः । एषामट्सूपदेशः कर्त्तव्यः णत्वं फलम् । उरः केण उरः पेण उरःकेण उरःपेण अट्व्यवायइति णत्वं विसर्जनीयजिव्हामूलीयोपध्मानीयैर्व्यवायेपि सिध्यति । नायमज्ञाताद्यर्थे कः । सोपदादाविति सत्वप्रसङ्गात् । किं तु उरः कायति उरः पातीति विग्रहः । कै शब्दे । पा रक्षणे । आभ्यामातोनुपसर्गे कः । कुप्वोःकःपौ चेति चकारात् पाक्षिको विसर्गः । न चैवमपि गतिकारकोपपदानां प्राक्सुबुत्पत्तेः समासाभ्युपगमात् सोपदादाविति प्रवर्त्तेतेति वाच्यम् । तस्य दाधिसेचौ धनक्रीतेत्यादिसिद्ध्यर्थमनित्यताया वक्ष्यमाणत्वात् पाशकल्पेत्यादिपरिगणनाच्च । प्रोम्भणम्, अट्कुप्वाङितिसूत्रे नुम्ग्रहणं न कर्त्तव्यं भवति । अत्रेदमवधेयम् । अट्सु क्रियमाण उपदेशो ऽकारानन्तरमिकारात् प्राक्कर्त्तव्यः । तेनेण्सु अनन्तर्भावात्पयःसुयशःस्वित्यादौ इण् कोरित्यधिकृत्य विधीयमानमादेशप्रत्ययययोरिति षत्वं न भवति । अक्षु चान्तर्भावात्संस्कर्त्तेत्यत्रानुस्वारादचः परत्वमाश्रित्य सकारस्य द्वित्वं कैयटेनाष्टमे वक्ष्यमाणं संगच्छते । न चैवं हरिः करोतीत्यादाविको यणचीति यणप्रसङ्गः । विसर्गस्यासिद्धत्वात् । एवं हरिं पश्यतीत्यादावनुस्वारस्यासिद्धत्वं बोध्यम् । शर्षु चोपदेशः कर्त्तव्यः । जश्भावस्तावत्प्रयोजनम् । तथाहि । वार्त्तिकमते उब्ज आर्जवइति धातुरुपध्मानीयोपधः पठ्यते । तत्र झलां जशझशीति जश्भावे आन्तरतम्याद्धकारादेशः । उब्जिता उब्जितुं । शर्षूपदेशाद्धि नांतरीयकत्वादेव झलूत्वमप्यायाति । भाष्यकारस्तु नैतन्मेने । तथाहि । उपध्मानीयोपधत्वपक्षे उब्जिजिषतीति न सिध्यति । अभ्या-

से बकारमात्रश्रवणप्रसङ्गात् । हलादिःशेषेण जकारस्य निवृत्तेः । यदि तु पूर्वत्रासिद्धमद्विर्वचन इत्युक्तेः सबकारस्य द्वित्वं तदा स्पष्ट एव बकारस्य शेषः । अथ उभौ साभ्यासस्येत्यनेनानित्यताज्ञापनाद् द्विर्वचनेष्यसिद्धत्वमाश्रीयते । औजिढदित्यत्र यथा । तथाप्यभ्यासे उपध्मानीयस्य शेषे अभ्यासे चर्चेति जश्त्वेन बकार एव श्रूयेत । इष्यते त्वभ्यासे जकार इति प्राञ्चः । वस्तुतस्तु द्वितीयपक्षे उपध्मानीयमात्रमभ्यासे श्रूयेत तच्चोच्चारयितुमप्यशक्यम् । जश्त्वं तु दुर्लभम् । प्रकृतिचरां प्रकृतिचर इत्यष्टमे सिद्धांतयिष्यमाणत्वात् । उपध्मानीये ऽच्त्वस्यापि सत्वेन तावन्मात्रद्वित्वापत्त्याभ्यासे इकारदौर्लभ्याच्च । किं च । अत्र पक्षे अस्मात् घञि कृते उपध्मानीयस्य जश्त्वे अभ्युब्जाः समुब्जा इति स्यात् । इष्यते त्वभ्युद्गः समुद्ग इति । नन्वत एव कुप्वोरित्यधिकारे सोपदादाविति सूत्रे उपध्मानीयस्य चेति वार्त्तिकेन कवर्गे परत उपध्मानीयस्य सकारो विधीयते ततो जश्त्वेन दत्वं विधीयते इति चेत्सत्यम् । उपध्मानीयस्य चेति वार्त्तिकारंभ एव तु गौरवार्ह इति ब्रूमः । बकारोपधोयमितिवृत्तिकारमते तु बकारस्य द्वित्वनिषेधः समुद्ग इत्यादौ दकारादेशश्चेत्युभयमपि वचनेनैव साधनीयं स्यात् । तस्माद्दकारोपध एवायमभ्युद्गः समुद्ग इति यथा स्यात् । कथं तार्हि उब्जिता उब्जितुमित्यादि सिध्यतीति चेत् । शृणु । भुजन्युब्जौ पाण्युपतापयोरित्यस्मिन्कुत्वाभावनिपातनार्थे सूत्रे बकारोच्चारणेनानुमीयते । उब्जेरकुत्वविषये दकारस्य भकारविधायकं बकारविधायकं वा वचनमस्तीति तच्चानुमीयमानं वचनं भउद्जेरिति वा । बउद्जेरिति वा उभयथापि स्तोश्चुना श्चुरित्यस्यानन्तरं कल्यते । उद्जः

स्तोर्दकारस्येति यावत्। श्चुना योगे भकारो बकारो वा भवतीति सूत्रार्थः। उद्जेरिति किम्। तज्जः। श्चुनेति किम्। अभ्युद्गः समुद्गः इह हि चजोः कुघिण्ण्यतोरिति कुत्वे कृते श्चुना योगो नास्ति, स्तोः श्चुनेति पदद्वयोपजीवनार्थं चोक्तस्थलएव कल्पनं युक्तम्। अन्यथा बहुतरकल्पने गौरवं स्यात्। एवमुब्जिजिषतीत्यपि सिद्धम्। नन्द्रा इति दकारस्य द्वित्वनिषेधात्। न च परत्वाद्धत्वबत्वे। पूर्वत्रासिद्धे नास्ति विप्रतिषेधो ऽभावादुत्तरस्येति वक्ष्यमाणत्वात्। अन्तरङ्गत्वाद्धत्वबत्वे इत्यपि न। असिद्धत्वादेव। न च पूर्वत्रासिद्धीयमद्वित्वेचने इत्यसिद्धत्वप्रतिषेधः शक्यः। द्वित्वे कर्त्तव्ये सति हि स निषेधः। न तु द्वित्वनिषेधेपि। इह तु नन्द्रा इति सूत्रेण द्वित्वनिषेधे कर्त्तव्ये निर्बाधमेवासिद्धत्वामिति दिक्। अथवा मास्तु वाक्यशेषानुमानं भुजन्युब्जाविति निपातनादेव बकारो स्तु। नचैवमसिद्धताविरहाद्धकारस्यैव द्वित्वं स्यादिति वाच्यम्। दकारोपधनिर्देशसामर्थ्याज्जिशब्दस्य द्वित्वे कृते ततो दकारस्य बकारप्रवृत्तेः। न चास्मिन्पक्षे ऽभ्युद्ग इत्यादावपि बकारप्रसङ्गः। अकुत्वविषये एव बकारो निपात्यतइत्यभ्युपगमात्। नन्वेवं कुत्वविषये चरितार्थत्वात्कथं दकारोपदेशस्य सामर्थ्यमुक्तम्। येन द्वित्वानन्तरमेव बकारः प्रवर्त्तेतेति चेत्। अनभिधानादतो घञादि मास्तु निपातनं चैवमविशेषेणास्तु। अभ्युद्गः समुद्ग इत्येतन्नोब्जे रूपम्। किं तु उपसर्गद्वयपूर्वकाद्गमेरन्येष्वपि दृश्यतइति डप्रत्ययः। व्युत्पत्तिमात्रं चेदम्। रूढिशब्दत्वात्। समुद्गकः सम्पुटक इत्यमरः। तदेवमयोगवाहानां शर्षूपदेशस्य जश्त्वाभावरूपं प्रयोजनं वार्त्तिकमते ऽस्ति। भाष्यकारमते तु नास्तीति स्थितम्। तथा षत्वमपि प्रयोजनं सार्पिःषु धनुषु। नुम्विसर्जनी-

यशर्व्यवायेपीति सूत्रे विसर्जनीयग्रहणं न कर्त्तव्यं भवति । शर्व्यवायइत्येव सिद्धत्वात् । नुम्ग्रहणं तूभयथापि कर्त्तव्यमेव नुम्स्थानिकेनैवानुस्वारेण व्यवधाने यथा स्यात् । इह मा भूत् । पुंस्विति । नुम्ग्रहणं हि स्वस्थानिकस्यानुस्वारस्य लक्षकम् । अन्यथा ऽसम्भवात् । नहि इण्कवर्गाभ्यामुत्तरः सकारो नुमा व्यवहितः षत्वविधौ सम्भवति । अनुस्वारे षत्वस्यासिद्धत्वादित्याहुः । अस्तु वा स्थानिवद्भावेन नुमत्वम् । तथापि स्वाश्रयस्यानुस्वारत्वस्यापि सत्वात् शर्त्वेनैव सिद्धे नियमार्थता युक्ता । नियमश्च सजातीयापेक्ष इत्यनुस्वारेण व्यवाये चेद्भवति तर्हि नुमैव न त्वन्येनेति फलितम् । वस्तुतस्त्वतिदेशं प्रति अनुस्वारस्यासिद्धत्वादतिदेश एव दुर्लभः सुहिन्स्वित्यादौ विधायकत्वसम्भवे नियामकत्वानुपपत्तिश्च । तथापि लक्ष्यानुरोधाल्लक्षणेत्येव शरणम् । यथाट्कुप्वाङ्सूत्रे । तत्र प्रेन्वनादौ णत्वं मा भूत् प्रोम्भणादौ च स्यादित्येवमर्थं लक्षणेति चेत् । इहापि सुहिन्सु पुंस्वित्यादौ मा भूदिति तुल्यम् । णत्वविधावनुस्वारमात्रे लक्षणा षत्वे तु नुम्स्थानिकएवेत्यन्यदेतत् । अस्मिंश्च पक्षे शर्पूपदेशेपि झल्त्वामिव हल्त्वयर्त्वे अपि नान्तरीयकत्वादेव सिद्धे । तत्फलं तूत्तरवार्त्तिकव्याख्यानात्समनन्तरमेव स्फुटीभविष्यति । तथा खर्त्वमपि । तेन कुप्वो ×क× पौचेति सूत्रान्तर्गतो विसर्गः सिद्धः । एवं च सौत्रनिर्देशेनैवोक्तवार्त्तिकस्यार्थो ज्ञाप्यतइति बोध्यम् । अनेन सौत्रं विसर्गग्रहणमेवोपष्टभ्य शर्पूपदेशं प्रत्याचक्षाणा यथाश्रुतमट्सूपदेशपरं वृत्तिग्रन्थं व्याचक्षाणाः परास्ताः । अट्सूपदेशेनाल्त्वाच्चत्वयोर्लाभेपि हल्त्वयर्त्वालाभात् । तत्फलस्य च वक्ष्यमाणत्वात् । न चाट्स्वेव यकारोत्तरमुपदेशात्तल्लाभ इति वाच्यम् । तथा सति पयःस्वित्यादाविणः परत्वेन षत्वा-

पत्तेः । अच्त्वासिद्धया समःसुटीत्यत्रत्यकैयटादिग्रन्थाविरोधापत्तेश्चेति दिक् । अविशेषेणेत्यादि वार्त्तिकस्यायमर्थः । यत्र यत्र प्रदेशे प्रयोजनं दृश्यते तत्र तत्रोपदेशः कर्त्तव्यः प्रयोजनानि तु संयोगसंज्ञादीनि पञ्चेति । तथाहि । वार्त्तिकमते उञ्जेरुपध्मानीयोपधतया उपध्मानीयस्य हल्संज्ञां विना संयोगसंज्ञा न सिद्ध्यति जश्त्वं त्वसिद्धं ततश्च संयोगे गुर्वीति गुरुसंज्ञाया अपि विरहादुञ्जक इत्यत्र गुरोरनृत इति प्लुतो न स्यात् । तस्मात्प्लुतगुरुसंज्ञासंयोगसंज्ञाहल्संज्ञानामुत्तरोत्तरसापेक्षतया प्लुतसिद्ध्यर्थं हल्संज्ञा एषितव्या । तदेतदभिप्रेत्योक्तं संयोगसंज्ञा प्रयोजनमिति । तथोपधासंज्ञापि प्रयोजनम् । निष्कृतं दुष्कृतमिदुदुपधस्य चेति षत्वं यथा स्यात् । भाष्यकारस्त्वाह । इदुदुपधस्थानिको यो विसर्ग इति व्याख्यानान्नेदं प्रयोजनम् । उपधाग्रहणप्रत्याख्यानाद्वा । इदुद्भ्यां परस्य विसर्गस्येत्येवेष्टसिद्धिरिति । अलोन्त्यविधिश्च प्रयोजनम् । वृक्षस्तरति विसर्जनीयान्तस्य पदस्य स इति पक्षे अन्त्यस्य सत्वं यथा स्यात् । पदस्य यो विसर्जनीय इति व्याख्यानान्निर्दिश्यमानस्येति परिभाषया वा सिद्धत्वादिदमपि न प्रयोजनम् । द्विर्वचनं च प्रयोजनम् । उरः कः उरः पः,अनचि चेत्यच उत्तरस्य यरो विधीयमानं द्वित्वं सिद्धं भवति । तथा स्थानिवद्भावप्रतिषेधोपि प्रयोजनम् । यथा उरःकेणेत्यादौ अड्व्यवायेति णत्वं सिद्धं भवति । एवं व्यूढोरस्केनेत्यादावपि प्राप्नोति स्थानिवद्भावात्सकारस्य तत्रानल्विधाविति प्रतिषेधो ऽल्त्वे सति सिध्यति । न च पूर्वत्रासिद्धे न स्थानिवदिति निषेधोस्त्विति वाच्यम् । न पदान्तसूत्रशेषभूतस्य तस्याचः परस्मिन्नित्येतद्विषयकत्वात् । स्थानिवद्भावं प्रति त्रिपादीस्थस्यासिद्धतया न्यायसिद्धं तदिति

पक्षे तु नेदं प्रयोजनम् । उरःकेणेति णत्वं संस्कर्त्तेत्यत्र सकारस्य द्वित्वं चाधिकं प्रयोजनं बोध्यमिति दिक् । यद्यपि सर्वमिदमदृशरोरुपदेशेन सिद्ध्यत्येव तथापि वार्त्तिकाक्षररचनाया द्वैधापि सम्भव इति भावः ॥

लण् । अत्राकारोनुनासिकः प्रतिज्ञायते । न तु हकारादिष्विवोच्चारणार्थः । तेनोरण् रपर इत्यत्र रप्रत्याहारग्रहणं भवति । प्रत्याहारग्रहणे ज्ञापकस्तु ऋकारलृकारयोः सवर्णविधिरिति वार्तिकनिर्देशः । ननु अइउणित्यत्रानुबद्धो णकारः स एवेहानुबध्यते तेनाण्ग्रहणेष्विण्ग्रहणेषु च पूर्वेण परेण वेति सन्देहः प्राप्नोति । तस्मादसन्देहायेहानुबन्धान्तरमेव कुतो न कृतमिति चेत् । न । व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति परिभाषां ज्ञापयितुमनुबद्धस्यैव पुनरनुबन्धात् ।

अमङ्णनम् । झभञ् । अत्र मकारानुबन्धो भाष्ये प्रत्याख्यातः । स हि प्रत्याहारत्रये उपयुज्यते । अम् यम् ङमिति तच्च त्रयं अकारेणैव निर्वहति । तथाहि । पुमः खय्यम्परे इत्येवास्तु । न च झकारभकारपरः खयस्ति येनातिप्रसङ्गः स्यात् । तथा हलो यञां यञि लोप इत्येव पाठ्यम् । न च झकारभकारौ झकारभकारपरौ स्तः । हल उत्तरयोस्तयोः सम्भवे तु झरोझरीति लोपेन भाव्यमेव । तथा ङ्ओोद्स्वादिचि ङ्णुण्नित्यामिति पाठ्यम् । न च झकारभकारौ पदान्तौ स्तः । उज्झेर्लभेश्च क्विपि तौ स्त एवेति चेन्न । उज्झेर्दोपधतया संयोगान्तलोपेसत्युदिति रूपाभ्युपगमात् । लभेस्तु जश्त्वविधानात् । नन्वेवमप्यागमिनस्त्रयो ङ्णनेभ्यः परे अच आगमास्तु पञ्चेति संख्यातानुदेशो न स्यादिति चेन्न । यथासंख्यामित्यत्र हि विध्यर्थमितिवेलायां निर्दिश्यमानगतसंख्यासाम्यमाश्रीयते । न तु लक्ष्यसंस्कारवेला-

यां प्रयोगगतम् । तस्मान्मास्तु मकारोनुबन्ध इति स्थितम् ।

घढधष्॥जबगडदश्॥खफछठथचटतव् ॥ कपय्॥ शषसर् ॥ हल् ॥ इति माहेश्वराण्यक्षरसमाम्नायसूत्राणि । अत्रायं संग्रहः । एकस्मान्ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाःस्युः । ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ शड्भ्य इति । अस्यार्थः । ङञणवटा एकस्मात्परे ग्राह्याः स्युः । तथाहि । ङकार एकारादेव परो ग्राह्यः । एङि पररूपमिति यथा । ननु षिद्भिदादिभ्योङ् अस्यतिवक्तिख्यातिभ्योङित्यकारेण ग्रहणमस्त्विति चेन्न । आदिरन्त्येनेत्यत्राणुदित्सवर्णस्य चेत्यतोऽप्रत्यय इत्यनुवृत्तेः । अत एव रोःसुपीति न प्रत्याहारग्रहणम् । सुपि चेत्यत्र तु अप्रत्यय इति प्रतिषेधो नास्ति । यत्रादाविति विशेषणात् । उत्तरत्र च बहुवचने झलीति विशेषणात् । सुप्तिङन्तंपदमित्यत्र तिङ्साहचर्याच्छास इदङ्हलोरित्यत्र तु अङ्ग्रहणसामर्थ्यादपि प्रत्याहारग्रहणं न भवति । अङादौ हलादौ चेति हि व्याख्याने अङ्हलोरिति व्यर्थमेव स्यात् । द्विविधा एव हि कृङ्तिः प्रत्यया अङादयो हलादयश्च । व्यतिशासै इत्यत्र तु किङ्त्वमेव नास्ति । अटा सहैकादेशस्य स्थानिवद्भावेनाङादित्वाच्च । ऋदृशोङीत्यपि न प्रत्याहारः । ऋकारान्तेषु ऋच्छत्यृतामिति गुणविधानाज्ज्ञापकात् । सनि च इङश्चेति न प्रत्याहारः । इको झलिति कित्त्वविधानात् । अज्झनगमां सनीति दीर्घविधानाच्च । इङन्तानां सनि गम्यादेशे हि सति उदात्तसूत्रद्वयं निर्विषयं स्यात् । परिमाणाख्यायां सर्वेभ्यः इङश्चेत्यपि न प्रत्याहारः । वैयर्थ्यप्रसङ्गात् । तथाहि । इकारान्तेभ्य एरचा भाव्यम् । उकारान्तेभ्य ऋदोरबित्यपा । लृकारान्तास्सन्त्येव न । एजन्तानामप्यनैमित्तिकेनात्वेन प्रत्ययोत्पत्तेः प्रागेव भाव्यम् ।

अतः प्रत्ययोत्पत्तिवेलायामेजन्ता न सन्त्येव। ऋदन्ताः परमवशिष्यन्ते। तत्रोरित्येव लाघवाद् ब्रूयात्। वस्तुतस्तु सामान्यलक्षणेनैव ऋदन्तेषु घञः सिद्धत्वात्सूत्रमेवेदं न कुर्यात्। अथोच्येत। इङश्चेत्यारंभसामर्थ्यादिवर्णोवर्णान्तेष्वेवाजभ्यां सह वैकल्पिको घञ् समाविशतीति। तदपि न। एवं हि सति अजपोर्विधावेव वाग्रहणं कुर्यात्। क्रीङ्जीनां णाविति न प्रत्याहारः। क्रीज्योः पृथग्ग्रहणवैयर्थ्यापत्तेः। न चेकारान्तानां मध्ये एतयोरेवेति नियमार्थं पृथग्ग्रहणमिति वाच्यम्। एवं हीक इत्येव ब्रूयात्। एङन्तानां सामान्यलक्षणेनैवात्वस्य सिद्धत्वात्। इङ्धार्योरित्यपि न प्रत्याहारः। धारिणा साहचर्यात्। तस्मात्सिद्धं ङकार एकस्मादेवेति। तथा ञकारोप्येकस्मादेव। अतो दीर्घो यञीति। तथा अइउणित्येष णकारोप्येकस्मादेव। अणिति यथा। अथेणः षीध्वमित्यादाविण्प्रत्याहारोप्यनेन कुतो नेति चेन्न। अचि श्नुधातुभ्रुवां य्वोरित्यत्रेकारोकारयोः स्वरूपेण निर्देशात्। अन्यथा हि संहितायां मात्रालाघवात्पदच्छेदेप्यर्द्धमात्रालाघवादिण इत्येव ब्रूयात्। व्याख्यानाच्च पूर्वेण न तु परेण ग्रहीष्यते। व्याख्यानं च सिद्धान्तेपि शरणम्। य्वोरित्यपि हि निर्देशे किं ह्रस्वयोर्ग्रहणमुत दीर्घयोरुत यकारवकारयोरिति सन्देहः स्यादेव। एवं चैच इग्यूस्वादेश इति सूत्रे इणित्येव प्रतिपत्तिलाघवार्थं वक्तव्ये इग्ग्रहणमपीह लिङ्गम्। इण्ग्रहे हि तत्र यथासंख्यप्राप्तिरेव नेति न तत्परिहाराय यतितव्यमिति दिक्। एवं वकारोप्येकस्मादेव। नश्छव्यप्रशानिति। एचोयवायाव इति सूत्रे अविति न प्रत्याहारः। अयादिसाहचर्यात्। एवं टकारोप्येकस्मात्। अट् क्कुप्वाङिति। द्वाभ्यां षः। एकाचो बशो भष् झषन्तस्य स्ध्वोरिति यथा। ककार-

स्त्रिभ्यः। अकः सवर्णे। इको यण्। इसुसुक्तान्तात्क इति यथा। लणित्यत्रत्यो णकारोपि त्रिभ्यः। अणुदित्सवर्णस्येत्येक एवाण्। इणः षीध्वमित्यादयः सर्वे इण इको यणित्यादौ यण् च। तत्र यण् तावत्पूर्वेण न सम्भवत्येव। इण्तु सम्भवन्नपि ज्ञापकात्त्यक्तः। अणस्तु उभाभ्यां ग्रहणे स्थिते क्व पूर्वेण क्व वा परेणेति विवक्षायां ग्रहणकशास्त्रे परेणैवान्यत्र तु पूर्वेणेवेति सिद्धान्तः। उक्तं हि व्याख्यानतो विशेषप्रतिपत्तिरिति। न हि परेश्चघाङ्कयोरित्यादौ व्याख्यानादन्यन्नियामकमस्ति। किं च। अण् ग्रहणानि तावत्पञ्च। उरण् रपरः अणुदित्सवर्णस्य चाप्रत्ययस्य लोपे पूर्वस्य दीर्घोणः केणः अणो ऽप्रगृह्यस्येति। तत्र उरण् रपर इति तावत्पूर्वेण। ऋत इद्धातोरिति धातुग्रहणाज्ज्ञापकात्। तद्धि मातॄणामित्यादिव्यावृत्त्यर्थं क्रियते। परेण च ग्रहणे नामीति दीर्घस्यापि रपरत्वापत्त्या व्यावर्त्त्याप्रसिद्धिः। ननु चिकीर्षतीत्यत्राञ्ज्ञनगमामिति दीर्घे रपरत्वे च सति उपधायाश्चेतीत्वमेषितव्यम्। तद्वन्मातॄणामित्यत्रापि प्रसङ्गे तद्व्यावर्त्तकतयोत्तरार्थं धातुग्रहणं भविष्यतीति चेत्। न। एवं हि सत्युत्तरत्रैव कुर्यात्। इह करणं ज्ञापकमेव। तथा च वक्ष्यति। नुड्वाच्यउत्तरार्थं तु इह किंचिन्नपोइतीति। किञ्च। अणग्रहणसामर्थ्यादपि पूर्वेणैवायम्। यदि हि परेण स्यादुरजित्यञ्ग्रहणमेव कुर्यात्। कृत्तिः कृतं प्रकृतं नृःपाहि मातॄणामित्यादौ वाद्युदात्तानुदात्तस्वरितानुनासिकदीर्घाणां रपरतायाः परेणाण्ग्रहेणोपपादयितव्यायास्तावतापि लाभात्। कर्त्ता कारक इत्यादौ गुणवृद्धिप्रसङ्गे एचामवर्णस्य चाविशेषाद्रपरत्वस्य विकल्पेन प्रसङ्ग इत्यप्यञ्ग्रहणेन सिध्यत्येव। स्यादेतत्। कर्त्रर्थमित्यत्र इको यणि रपरत्वे रेफद्वय-

श्रवणार्थमणग्रहणं स्यात्। नञ्चैतदञ्ग्रहणेन सिध्यति। हलो-यमामिति लोपस्तु वैकल्पिकः। झयोहोन्यतरस्यामित्यतोन्य-तरस्यांग्रहणानुवृत्तेः। अत्र च ज्ञापकं ग्रहणकशास्त्रे ऽण्ग्रहणम्। तद्धि सय्यँन्ता सव्वँत्सरः यलँ्लोकमित्यादौ परसवर्णस्य सानु-नासिकस्य यरग्रहणेन ग्रहणादनचिचेति द्वित्वे कृते पक्षे यव-लानां त्रिकस्य श्रवणार्थं क्रियते। हलोयमामित्यस्य नित्यत्वे तु व्यर्थमेव तत्स्यात्। यद्यपि गुणानामभेदकत्वेनैव सानुनासिक-यवलानां द्वित्वसिद्धेर्ग्रहणकशास्त्रे ऽञ्ग्रहणमेवोचितं न त्वण्ग्रह-णं,तथापि गुणा भेदका इत्यपि पक्षं ज्ञापयितुमणग्रहणम्। भेदका-भेदकपक्षयोश्च जातिव्यक्तिपक्षयोरिव लक्ष्यानुरोधाद्व्यवस्था। अत एव चतसर्याद्युदात्तनिपातनमित्यादि सङ्गच्छते। अत ए-व चाषून आ विभक्ताविवादाविदमस्त्यदाद्यत्वे चानुनासिको नेति वक्ष्यामः। यत्तु विकल्पानुवृत्तौ ज्ञापकान्तरवर्णनम्। अ-नुवर्त्तते विभाषा शरोचि यद्वारयत्ययं द्वित्वं,नित्ये हि तस्य लो-पे प्रतिषेधार्थो न कश्चित्स्यादिति। तत्तु भाष्ये दूषितम्। तथा-हि। लोपस्य नित्यत्वे ऽचो रहाभ्यामिति द्वित्वेनारम्भसाम-र्थ्यात्तद्बाधः। द्विविधा एव हि यरः यमो झरश्चेति। तत्र हलो-यमामिति झरोझरीति च लोपे कृते द्वित्वं वृथा स्यात्। किं त-र्हि तयोर्योगयोरुदाहरणमिति चेत्। यत्रान्तरेण द्वित्वं व्यञ्जन-त्रयं लभ्यते। यथा ऽऽदित्यो देवतास्य आदित्यः प्रत्तं अवत्त-मिति। एवं स्थिते चतुर्ष्वित्यत्रापि यदि द्वित्वं स्यात्तर्हि लोपो न स्यादेव। ततश्च सार्थकः शरोचीति निषेधः कथं विभाषानुवृ-त्तिं ज्ञापयेदित्यास्तां तावत्। सर्वथापि विकल्पानुवृत्तेः स्थित-त्वात्पाक्षिकरेफद्वयश्रवणार्थमणग्रहणमस्त्विति। अत्रोच्यते। कर्त्रर्थमित्यादौ सत्यपि रपरत्वे रेफद्वयश्रवणं दुर्लभम्। रोरी-

ति लोपात् । न च तत्र पदान्तस्येति व्याख्यातुं युक्तं, जर्गृधेर्लङ् अजर्घाः पास्पर्द्धे लङ् अपास्पा इत्यादेरसिद्धिप्रसङ्गात् । न चाणग्रहणसामर्थ्यात्तद्बाधः । पूर्वेणापि ग्रहणे ऽबाधेनैवोपपत्तेरिति दिक् । तस्माद्धातुग्रहणसामर्थ्यादणग्रहणसामर्थ्याद्वोरण् रपर इति पूर्वेण ग्रहणमिति स्थितम् । वस्तुतस्तु धातुग्रहणमेव ज्ञापकम् । अणग्रहणस्य लाकृतिरित्यादौ लपरताफलमित्यपि वक्तुं शक्यत्वात् । अणुदित्सवर्णस्य चाप्रत्यय इति तु परेणैव । उर्ऋदिति लिङ्गात् । तत्र हि कृतसंशब्दन इत्यस्माच्चुरादिण्यन्ताल्लुङि चङ्यचीकृतदित्यत्र ऋकारस्य दीर्घस्यापि स्थाने ह्रस्व एव यथा स्यादित्येवमर्थं तपरकरणं कृतं, ग्रहणकशास्त्रे पूर्वेण ग्रहणे तु दीर्घस्य ऋकारस्य न स्थानित्वं न वादेशत्वं प्रसक्तमिति व्यर्थं तपरत्वं स्यात् । ननु सत्यपि परेण ग्रहणे उर्ऋदित्यत्र तपरत्वं वृथैव । भाव्यमानेन सवर्णग्रहणाप्रसक्तेरिति चेन्न । वक्ष्यति हि तत्र वृत्तिकारः । न चायम्भाव्यमानोण् किन्तु आदेशान्तरनिवृत्त्यर्थं स्वरूपेणाभ्यनुज्ञायतइति । कृते तु तपरत्वे तद्बलादेव दीर्घस्थाने भाव्यमानतापि लभ्यतइत्यन्यदेतत् । तस्माद् ग्रहणकशास्त्रेण परेणेति स्थितम् । तत्फलं तूरण् रपर इत्यत्र उरित्यनेन ऋकारस्य ग्रहणाद्वृतइद्धातोरुदोष्ठ्यपूर्वस्येत्यादौ रपरत्वसिद्धिः । ढ्रलोपे पूर्वस्य दीर्घाण इत्यत्रापि हलामणामसम्भवादेचान्तु विशेषाभावादनर्थकमेवाणग्रहणं स्यात् । ततश्चाचश्चेत्येव सिद्धमित्यणग्रहणसामर्थ्यात्पूर्वेण।ननु वृहूद्यमने अस्माच्चृचि ऊदित्वादिडभावे गुणे ढत्वधत्वष्टुत्वढलोपेषु रेफस्य दीर्घे स्थानसाम्याद्ऋकारे ढलोपस्यासिद्धत्वादुपधायाश्चेतीत्वे पूर्ववद् गुणे वर्ढेति यथा स्यादिति परेण ग्रहणं स्यात्।एवं तर्हि तृतीयेति निर्देशाल्लिङ्गात्पूर्वेणैव । परेण हि ग्रहणे हल

इत्रत्राप्यस्यैवाणग्रहणस्यानुवृत्तेस्त्रेः संप्रसारणे कृते दीर्घः स्यात् । तथा दृढादिषु वृढशब्दस्य पाठोपि ज्ञापको बोध्यः । वृहूउद्यमने अस्मान्निष्ठायां ढत्वधस्वष्टुत्वढलोपेषु कृतेषु वृढ इति रूपम् । दन्त्योष्ठ्यादिश्चायम् । उद्वृहरक्षः सह मूलमिन्द्रेति दर्शनात् । मूलमस्याबर्हीति सूत्रे हरदत्तादिग्रन्थे स्पष्टमेतत् । तुदादौ एतद्धातूत्तरत्वेन पठ्यमानयोः तृहू स्तृंहू हिंसायामिति धात्वोरपि निष्ठायां तृढः स्तृढ इति रूपं बोध्यम् । दृढः स्थूलबलयोरिति तु इडभावे नकारहकारयोर्लोपो निष्ठातकारस्य ढत्वं च निपात्यते न त्वसिद्धकांडस्थढत्वादेरिह प्रवृत्तिरिति वक्ष्यते । तेन परिद्रढय्य पारिद्रढी कन्येत्यादौ लघुत्वप्रयुक्तो णेरयादेशः ष्यङ्भावश्च सिध्यतीति दिक् । तेन दूलोपसूत्रे परेणाण्ग्रहणपक्षेपि वृढतृढस्तृढेष्वेवातिप्रसङ्गो न तु दृढेपीति विवेकः । केण इत्यत्र परेणाण्ग्रहणे गोका नौका गीष्का उपानत्का चतुष्कमिति धत्वविसर्जनीययोरसिद्धत्वाद्धस्वप्रसङ्गः,तथापीह ह्रस्वश्रुत्योपस्थितस्याच इत्यस्यावाधाय पूर्वेण भविष्यति । अबाधेनोपपत्तौ हि बाधो न न्याय्यः । अणो ऽप्रगृह्यस्येत्यत्र परेण सति,कर्तृ । अग्ने । वायो । मत्यै । पपौ । मालामाचक्षाणो माल् । वृक्षवयतेरप्रत्ययः वृक्षव् । अत्रापि प्राप्नोति । रेफवर्जिता अन्तस्थाः सानुनासिकनिरनुनासिकभेदेन द्विधेत्युक्तत्वात् । तस्मादिहामगृह्यस्येति पर्युदासादच एवानुनासिको बोध्यः । न चाणग्रहणसामर्थ्यान्नञ्त्रिवयुक्तन्यायस्य बाधः । तस्य पूर्वेणाप्युपपन्नत्वात् । अत्र लणसूत्रे स्थित्वा वृक्षव्शब्दमित्थं कैयटो व्युदपादयत् । वृक्षं वृश्चतीति क्विपि कृते वृक्षवृश्चमाचष्ट इति णिचि टिलोपे च कृते वृक्षवयतेर्विचि वृक्षव् इति भवति । क्विपि तु क्वौ लुप्तं न स्थानिवत् । क्वौ विधिं प्रति न

स्थानिवदित्युभयथापि स्थानिवद्भावनिषेधात्सम्प्रसारणप्रसङ्गो लोपोव्योर्वलीति लोपम्बाधित्वा तदपवादस्येठः प्रसङ्गश्च । विचि तु स्थानिवद्भावाद्वलनिमित्तो वलोपो न भवति । नन्वेवमपि वृक्षव्करोतीत्यत्र हलि सर्वेषामिति प्राप्नोति । न च स्थानिवद्भावः । पूर्वत्रासिद्धे तन्निषेधादिति चेन्न । भो भगो इत्यतोशीत्यनुवर्त्त्याशि हलि तद्विधानादिति । न च विच्पक्षेपि णिचः प्राग्भाविनं क्विपमेवाश्रित्योद् प्रसञ्जनीयः । अन्तर्भूतक्विबाश्रयतयान्तरङ्गे कर्त्तव्ये बहिर्भूतणिजपेक्षतया बहिरङ्गस्य टिलोपस्यासिद्धत्वात् । इदं त्विह वक्तव्यम् । विच्पक्षेप्येकदेशविकृतस्यानन्यत्वेन वृश्चतिग्रहणेन ग्रहणाद् वृश्चेति षत्वं दुर्वारम्। न च णिलोपस्य स्थानिवत्त्वम् । पदान्तविधौ नेति निषेधात् । पूर्वत्रासिद्धे नेति निषेधाच्च । तस्मान्नायं वृश्चतिरपि तु वेतिर्वा तिर्वा, वृक्षं वेतीति वृक्षवीः वृक्षं वातीति वृक्षवाः। वृक्षव्यं वृक्षवां वाचष्टे वृक्षव्, विच्, न तु क्विप् । ऊठ्प्रसङ्गात् । क्वौ विधिं प्रति स्थानिवत्वनिषेधात् । तथा च देवयतेर्दयुरिति सिद्धान्तितम् । न चैवमपि लोपोव्योरित्यस्य प्रसङ्गः । स्थानिवत्वात् । न चपदान्तविधित्वम् । पदान्तश्चेद्विधीयतइत्यर्थात् । लोपस्य चानवयवत्वात् । विभावितं चेदं भोभगो इति सूत्रे कैयटेनेति दिक्। यत्तु हलि सर्वेषामिति सूत्रे हरदत्तेनोक्तम् । वृक्षव् करोतीत्येवंरूपः प्रयोगो नास्त्येव । अनभिधानात् । लण्सूत्रे न पदान्ता हलोणः सन्तीति भाष्यकारोक्तेश्चानभिधानं निश्चीयतइति, तच्चिन्त्यम् । लण्सूत्रभाष्ये न पदान्ताः परेणः सन्तीति पाठात् । अप्रगृह्यस्येति पर्युदासाश्रयणेनाचामेव कार्यभाक्त्वादितरे कार्यभाजो न सन्तीत्येवंपरतया कैयटेन तद्विवरणाच्च । ननु चायमस्ति कर्तृ इत्युत्तरभाष्येणास्य दूषितत्वाच्च । त्वदुदाहृतपादे

उत्तरभाष्यस्योक्तिसम्भवालाभाच्च । अत एव भोभगो इति-सूत्रे भाष्यकारवृत्तिकारादिभिः सर्वैरपि वृक्षवित्युदाहृतम् । स्वयमपीह तथैवोदाहृतमिति पूर्वापरस्वग्रन्थविरोधो भाष्यवृत्तिकैयटादिसकलमहाग्रन्थविरोधो मूलयुक्त्यभावश्चेति तिष्ठतु तावत् । प्रकृतमनुसरामः । मकारोपि त्रिभ्यो ग्राह्यः । पुमः खय्यम्परे । हलो यमां यमि लोपः । ङमो ह्रस्वादचीति । चकारश्चतुर्भ्यः । इकोयणचि । इच एकाचोम् । एचोयवायावः । पूर्वौ तु ताभ्यामैजीति । यकारोपि चतुर्भ्यः । अनुस्वारस्य ययि । मय उञः । झयो होन्यतरस्याम् । पुमः खय्यीति । रः पञ्चभ्यः । यरोनुनासिके । झरो झरि सवर्णे । खरि च । अभ्यासे चर्च । वा शरि । शकारः षड्भ्यः । भोभगोअघोअपूर्वस्य योशि । हशि च । नेड्वशि कृति । झलां जश् झशि । एकाचो बशो भष् । लकारोपि षड्भ्यः । अलोन्त्यस्य । हलि सर्वेषाम् । इड्वलादेः । रलो व्युपधात् । झलां जश् । शल इगुपधादिति । अयं च चतुर्दशसूत्रीस्थैर्हल्भिरिद्भिः संपन्नानामष्टाध्याय्यां व्यवहृतानां प्रत्याहाराणां संग्रहः । तेन सुप्तिङादेरप्रत्याहारस्य अमन्ताड इत्युणादिषु व्यवहृतस्य अम्प्रत्याहारस्य यमिर्यमन्तेष्वनिडेक इष्यतइति व्याघ्रभूतिना व्यवहृतस्य च चयो द्वितीयाः शरि पौष्करसादेरिति वार्तिककृता व्यवहृतस्य चय्प्रत्याहारस्य चाधिक्येप्यदोषः । संख्यानियमश्चायमुत्तरत्र एकचत्वारिंशद्भिर्व्यवहारादध्यवसीयतइति बोध्यम् । अत्र श्लोकवार्तिकम् । प्रत्याहारे ऽनुबन्धानां कथमज्ग्रहणेषु न । आचारादप्रधानत्वाल्लोपश्च बलवत्तरः । प्रत्याहारोक्षरसमाम्नायः । तत्र येनुबन्धास्तेषा,मज्ग्रहणेष्वित्युपलक्षणम् । अजादिप्रत्याहारग्रहणेषु । कथं नेति ग्रहणमिति शेषः । आदिरन्त्येनेति सूत्रेण हि अ-

कारमारभ्याचकाराद्वर्णानां भवन्त्यक्संज्ञा मध्यस्थत्वाविशेषादि-कारादीनामिव णकारककारङकाराणामपि स्यात्। ततश्च दधि णकारः दधि ककारः दधि ङकार इत्यादौ यण् स्यात्। एवम-ड्ग्रहणे चकारस्यापि ग्रहणाद्रुचीनामित्यादावड्व्यवायइति णत्वं स्यात्। एवमिण्ग्रहणेन चकारग्रहणाद्रुचिध्वे इत्यादौ विभाषेट इति ढः स्यादिति पूर्वपक्षः पूर्वार्द्धस्यार्थः। उत्तरमाह। आचा-रादिति। आचारो ऽत्र सूत्रकृतो निर्देशः। उणादयो बहुलम्, तृषिमृषिकृशेः, ङसिङसोश्चेत्यादौ यणो ऽकृतत्वान्मध्यस्थाना-मप्यनुबन्धानां संज्ञित्वं नेति ज्ञाप्यतइत्यर्थः। समाधानान्तर-माह। अप्रधानत्वादिति। अणित्यादिसंज्ञाः प्रणेतुं तद्रूपप्रति-पादनायानुबन्धा उच्चार्यन्ते। ततश्च परार्थमुपादीयमानतया तेषा-मप्राधान्यम्। इतरेषां तु स्वार्थमुपादीयमानत्वात्प्राधान्यम्। तेन तेषामेव संज्ञा नत्वनुबन्धानाम्। प्रधानाप्रधानयोः प्रधाने कार्यसम्प्र-त्ययइति न्यायात्। नन्वेवमकारस्याच्संज्ञा न स्यात्। संज्ञाप्रतिपा-दने चकारस्येव तस्याप्यङ्गत्वाविशेषादिति चेन्न। स्वं रूपमित्यनुवृ-त्त्या ऽऽदेरपि संज्ञित्वात्। स्वं रूपं चादेरेव गृह्यते नान्त्यस्य। सर्व-नाम्नां प्रधानपरामर्शकताया औत्सर्गिकत्वात्। इतेति तृतीय-या इतो ऽप्राधान्यलाभात्। तदेवं संज्ञाप्रवृत्तिकालेनुबन्धानां सन्निधानमभ्युपेत्य द्वेधा समाहितम्। वस्तुतस्तु तदेव नास्तीत्या-ह। लोपश्चेति। बलवानेव बलवत्तरः स्वार्थे तरप्। अल्पाच्-तरमिति यथा। हलन्त्यमितीत्संज्ञायां हि कृतायां णकारादी-नामच्संज्ञा प्राप्नोति लोपश्च। तत्र परत्वान्नित्यत्वादन्तरङ्ग-त्वाच्च लोपे कृते संज्ञाप्रवृत्तिकाले णकारादीनामसत्वादेव तेषा-मजादिसंज्ञा नेति भावः। यस्मिंस्तु प्रत्याहारे योनुबन्धोपेक्षित-स्तस्य वचनसामर्थ्यात्तत्प्रवृत्तेः प्राग् लोपाभावः। लुप्तेपि वा

तस्मिन् भूतपूर्वेण तेन सहित आदिः संज्ञा भविष्यति। अन्तः-पातिनां तु लुप्तानां न संज्ञा। श्रूयमाणेष्विकारादिषु सावकाशत्वादिति। ननु हल्प्रत्याहारे ऽकारस्य प्रवेशो दुर्वारः। नहि तत्र लोपो लभ्यते। ततः प्रागच्संज्ञाविरहेणोपदेशेजितीत्संज्ञाया अप्रवृत्तेः। एवं चाद्यसमाधानमपि दुरुपपादम्। उदात्ततस्याचारस्य लोपश्च बलवत्तर इत्यनेनैव गतार्थत्वादिति चेन्न। सोस्यादिरितिनिर्देशेन प्रथमस्य गुणानां भेदकत्वेन चरमस्य च समाधानस्य सूपपादत्वादिति दिक्॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे
पादे द्वितीयमान्हिकम्॥ २॥

वृद्धिरादैच्॥ आकार ऐकार औकारश्च वृद्धिसंज्ञः स्यात्। संज्ञाप्रदेशा वृद्धिरैचीत्यादयः। तदुदाहरणमेवास्याप्युदाहरणं बोध्यम्। इहाच्च ऐचेतरेतरयोगद्वंद्वः सुपां सुलुगिति सुलुग्वा। अथवा समाहारे द्वंद्वः। नचैवं द्वंद्वाच्चुदषहान्तादिति टच् स्यादिति वाच्यम्। समासांतविधेरनित्यत्वात्। अत्र ज्ञापकं तु द्वित्रिभ्यां ष मूर्ध्न इति षविधानम्। तद्धि बहुव्रीहौ सक्थ्यक्ष्णोरिति षचि प्रकृतेपि क्रियते। षचश्चित्वसामर्थ्याज्जायमानमन्तोदात्तत्वं बहुव्रीहित्वप्रयुक्तं पूर्वपदप्रकृतिस्वरं यथा बाधते तथा द्वित्रिभ्यां पादन्मूर्धन्सु बहुव्रीहाविति विधीयमानमन्तोदात्तत्वविकल्पं मा बाधिष्टेत्येवमर्थम्। तच्च द्वित्रिभ्यामित्यस्य क्व चिल्लब्धावकाशत्वे सत्येव सङ्गच्छते न त्वन्यथा। अवकाशश्च समासान्तानामनित्यतायां सत्यामेव लभ्यते। त्रिमूर्द्धानं सप्तरश्मिं गृणीष इति यथा। तस्मात्षप्रत्ययविधानं ज्ञापकमिति स्थितम्। तथा द्वित्रिभ्यामिति सूत्रे बहुव्रीहिग्रहणमपीह ज्ञापकम्। अन्यथा पादन्मूर्द्धेष्वित्येव निर्दिशेत्। एवं हि

सति कृतसमासान्तपाद्दत्प्रक्रमोपि न विरोत्स्यते। बहुव्रीहिभिन्नं च समासान्तविरहादेव वारयिष्यते। ननु षष्ठीतत्पुरुषादि वारणाय बहुव्रीहिग्रहणमस्तु। तथाहि। द्वयोर्दन्ता इति विगृह्य द्विदतः पश्येति प्रयोगे पद्दन्निति दतादेशः, स एवेह निरनुबन्धकत्वाद्वा गृह्येत। न च पद्दन्निति सूत्रे तदन्तविधिर्दौर्लभ्यात्कथमेतदिति वाच्यम्। प्यङः सम्प्रसारणमितिसूत्रस्थपूर्वपक्षन्यायेन सिद्धं त्ववयवानन्यत्वादित्याष्टमिकभाष्यवार्त्तिकन्यायेन चावयवस्य कार्यलाभात्। अन्यथा हास्तिशीर्ष्याउपैषीत्यादावगतेरिति वक्ष्यते। तस्मात्कथं बहुव्रीहिग्रहणं ज्ञापकमिति चेत्। न। पूर्वोत्तरसाहचर्यबलेनापि बहुव्रीह्यप्रविष्टस्य वारणसम्भवात् दत् इति सानुबन्धस्यापि सुपठत्वाच्च। स्फिगपूतवीणां जोध्वकुक्षिसीरनामनामचेति सूत्रे ऽपाच्चेत्यनुवृत्या ऽपस्फिगमित्यादावुत्तरपदान्तोदात्तविधायके ऽध्वशब्दग्रहणमपीह लिङ्गम्। उपसर्गादध्वन इत्यच्प्रत्ययस्य नित्यत्वे हि चित्त्वादेव सिद्धं स्यात्। तथा प्रतेरंश्वादयस्तत्पुरुषइति सूत्रे ऽश्वादिगणे राजन्शब्दस्य पाठेपीह लिङ्गम्। अन्यथा राजाहः सखिभ्यष्टजिति टचैव सिद्धे किन्तेन। यत्तु ऋक्पूरब्धूः पथामित्यत्र टिलोपस्येव प्रकृतिवदनुकरणमित्यतिदेशेन प्रत्ययस्यापि प्राप्तौ तदकरणं ज्ञापकमिति। तन्न। अतिदेशो ऽयमनित्य इति ऋलृक्सूत्रे प्रपञ्चितत्वादिति दिक्। कृतमनयोः साधुत्वमित्यादिभाष्यग्रन्थाश्चास्मिन्पक्षेनुकुलाः।अनयोः पदयोरिति स्वरसात्। अथ वा ऽऽदित्यसमस्तमेव। पस्पशायां शब्दाप्रतिपत्तिरिति वार्त्तिके भाष्यकारैरेव वृद्धिः आदैजिति पदविभागप्रदर्शनात्। अस्मिंश्च पक्षे अनयोः सूत्रखण्डयोरिति नेयम्। पक्षान्तराभिप्रायकमेव वा तत्। वृद्धिशब्दस्तु तन्त्रेणावृत्त्या वा योजनीयः। द्विर्वचनेचीग्यणः

सम्प्रसारणमित्यादाविर्वोभयथाप्यदोषात् । आदिति तपरकरणमैजर्थं तेन त्रिमात्रचतुर्मात्राणामैचां संज्ञा न भवतीत्याद्येओङै-औच्मूत्रयोः प्रपञ्चितम् । नचैवं तकारस्योत्तरशेषतैव स्यादिति पदान्तताविरहाज्जश्त्वं न स्यादिति वाच्यम् । असन्देहार्थतया ऽऽकारशेषत्वस्यापि सम्भवात् । अस्तु वादैजिति पदम् । ऋत इद्धातोरित्यादौ दपरत्वमेवाश्रित्य तपरसूत्रे दकारोपि प्रश्लिष्यतइति तित्स्वरितमिति सूत्रे भाष्यकारैर्वक्ष्यमाणत्वात् । दात्परस्यापि तत्कालग्राहकत्वात् । वस्तुतस्तु दकारप्रश्लेषपक्षोभ्युच्चयमात्रम् । इह तु तपरकरणं स्पष्टार्थमेवेत्यादि प्रागेवोक्तं न विस्मर्त्तव्यम् । ननु चोः कुरिति कुत्वमैच्शब्दे प्राप्नोति चतुष्टयी शब्दानां प्रवृत्तिरिति पक्षे ऽस्य संज्ञाशब्दतया लौकिकत्वेनानुशासनविषयत्वात् । त्रयीपक्षेपि जातिशब्दत्वसम्भवात् । वैशेषिकपरिभाषया द्रव्यत्वगुणत्वादिजातिस्वीकारे वैयाकरणपरिभाषयापि तत्स्वीकारस्य दुर्वारत्वात् । वस्तुतस्तु सिद्धान्ते व्यक्तिविशेषोपहितसत्तायां एव जातित्वस्वीकारादिहापि सास्तु । व्यक्तिविशेषाश्च स्वरूपसत्ता अतद्भेदेनानुगतीकृतास्सत्तोपधायकाः । तदुक्तम् । तस्यां सर्वे शब्दा व्यवस्थिता इति । आद्यंतावयवद्वारा समुदायानुकरणं ऐच् वा शब्दः । अनुकरणशब्दाश्च जातिशब्दा एव । तत्रानुकार्यनिष्ठजातेः प्रवृत्तिनिमित्तत्वात् । न चाद्यपक्षे सूत्रवैयर्थ्यम् । मदीयशास्त्रे वृद्धिशब्देनादैच एव ग्राह्या इति नियमार्थं सूत्रारम्भात् । तदुक्तं कैयटेन, अनेकशक्तेः शब्दस्य शक्तयवच्छेदेन संज्ञिनि विनियोगान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वादिति । अनेकस्मिन्ननेका वा शक्तिरस्येति विग्रहः । अवच्छेदकभेदेपि लाघवाच्छक्तिरेकैव, औपाधिको भेद इति प्रवादस्तु उपाधि-

भिन्न इत्यत्र पर्यवसन्न इति मतेनाऽऽद्यः पक्षः। उपाधिस्थित्यधीनस्थितिको जीवब्रह्मभेदवदुपधेयेपि भेदोस्तीति मतेन द्वितीयः कल्पः। नकोपधाया इति पुंवद्भावनिषेधस्तु नास्ति। तद्धितवृत्तिग्रहणं कर्त्तव्यमिति वक्ष्यमाणत्वात्। अवच्छेदः संकोचः। स च यद्यपि शक्तेर्निरवयवतया न सम्भवति तथापि तद्धितरसिमस्तात्पर्यविरहएव शक्तिसङ्कोचोत्राभिमतः। सर्वे सर्वार्थवाचका इत्यभ्युपगमेपि तात्पर्य क्वचिदेवत्यस्य निर्विवादत्वात्। शक्तिः परं कारणतापरपर्याया सर्वत्र दुर्वारेत्युक्तम्। न चैवमन्यायश्चानेकार्थत्वमित्यस्य निर्विषयता। पौरुषयसङ्केतनिरपेक्षस्य प्रसिद्धतरसम्बन्धस्य विना प्रमाणं बहुषु न कल्पनामिति तदर्थात्। गौणमुख्यविभागोपि प्रसिद्ध्यप्रसिद्धिनिबन्धन एव। गाव्यादीनामसाधुतापि सङ्केतविरहे सत्येव। अत एव प्रसिद्धेपि पक्षे गोण्यादीनां गोण्यां साधुत्वमस्त्येवेत्यन्यत्र विस्तरः। उक्तं च। व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्। नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत्॥ वृद्ध्यादीनां च शास्त्रेस्मिन् शक्त्यवच्छेदलक्षणः। अकृत्रिमोभिसम्बन्धो विशेषणविशेष्यवदिति॥ वस्ततस्तु साध्वसाधुबहिर्भावपक्षेप्येषामनुशासनविषयतास्त्येवेति पस्पशायां साधुत्वनिर्वचनप्रसङ्गेनोपपादितम्। तस्मात्सर्वथापि कुत्वं प्राप्नोत्येवेति चेत्। सत्यम्। अयस्मयादीनि छन्दसीति भत्वप्रवृत्त्या कुत्वोपयोगिनी पदसंज्ञा प्रतिबध्यते। जश्त्वविध्येकवाक्यतापन्ना तु पदसंज्ञास्त्येव। ससुष्ठुभासऋकतागणेनेत्यत्र तु विपरीतम्। कुत्वं पदत्वमस्ति जस्त्वे तु नेति विषयभेदेन संज्ञाद्वयमस्तीत्यंशे परं दृष्टांतता बोद्धया। तेनोपदेशेजनुनासिक इदित्यादौ कुत्वाभावो जस्त्वं च सिद्ध्यति।

छन्दसि विहितस्य सूत्रे कथं प्रवृत्तिरित्याशङ्क्य छन्दोवत्सूत्राणि भवन्तीति भाष्यम् । इष्टिरियं भाष्यकृतः । यद्वा । छन्दःशब्दः स्वर्यते । स्वरितेनाधिकारः, अधिकं कार्यं गौणस्यापि ग्रहणमित्यर्थः । तेन छन्दोऽङ्गेष्वपि तत्तत्कार्यप्रवृत्तिर्बोध्या । संज्ञाद्वयसमावेशस्तूभयसंज्ञान्यपीति वक्तव्यमिति वार्त्तिकवचनात् । षष्ठीयुक्त इति सूत्रे छन्दसि वेति विभज्य एका संज्ञेति । नियमस्य छन्दसि विकल्पनाद्वा । यद्वा । अयस्मयादीनीत्यनेनोभयसंज्ञाप्रयुक्तकार्यभाजः समुदाया निपात्यन्ते । न तु प्रकृता भसंज्ञैव विधीयते । अत एव कार्यविशेषपुरस्कारसम्भव इति बोध्यम् । तस्मात्कुत्वं नेति स्थितम् । कुशब्दस्याणुदिदित्यनेन संज्ञात्वेन विनियोगात्तत्र च प्रागुक्तरीत्या मतभेदसत्त्वाज्जातिविशेषः प्रवृत्तिनिमित्तम् । व्यक्तिविशेषोपहिता सत्तैव वा । शब्दस्वरूपं वा । तस्यापि ग्राह्यत्वं ग्राहकत्वं चेति पस्पशोक्तरीत्या व्यक्तिविशेषणतया भानाभ्युपगमात् । तथाचोक्तत्रितयान्यतममिह त्वप्रत्ययार्थः । प्रकृतिजन्यबोधे प्रकारीभूतत्वं प्रयोगोपाधिमाश्रित्य तथाभूतधर्मस्य त्वतलर्थताया वक्ष्यमाणत्वात् । यद्वा । प्रकृतिः शब्दस्वरूपपरा तत्प्रवृत्तिनिमित्तत्वे तु त्वतलादीनां शक्तिरेवेति मतान्तरमपि वक्ष्यते । उभयथापीह त्वप्रत्ययेन स्वार्थाश्रयः ककारो लक्ष्यते । तेन कुत्वं नेत्यस्य ककारादेशो नेति पर्यवसितोर्थः । आह च । सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता । संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिरिति ॥ इत्थं पदविभागः पदसाधुत्वं चोक्तम् । वाक्यार्थस्तु संज्ञासंज्ञिभावः । तथाहि । समानविभक्तिकनामार्थयोरभेदान्वयस्य व्युत्पन्नतयाऽऽकारादयो वृद्धिं प्रत्यभेदेन संसर्गेण विशेष्याः । विरूपोपस्थितिस्तु विशेषणीभूतं शब्दस्वरूपमादाय बोध्या । एतेनेन्द्रो मरुत्वान्मघवेत्यादि व्या-

ख्यातम्।न तु तत्रापि मरुत्त्वदादिशब्दानां तत्तद्वाच्ये लक्षणेति ग्राह्यम्। उक्तरीत्या लक्षणां विनैवोपपत्तेः। अत एवोद्भिदधिकरणे विशिष्टविधिपक्षं मत्वर्थलक्षणाप्रसङ्गेन दूषयित्वा नामधेयत्वं सिद्धान्ततम्। अन्यथा नामधेयत्वेपि लक्षणायास्तुल्यतया ऽधिकरणस्यासम्भवदुक्तिकतापत्तेरिति दिक्। स्यादेतत्। किमादैज्मात्रस्य वृद्धिसंज्ञा आहोस्विद् वृद्धिशब्दमात्रस्य वृद्धिरिति ये आदैचस्ते वृद्धिसंज्ञा इति व्याख्यानाल्लुक्श्लुलुप्संज्ञावत्तद्भावितानामेवेति। नाद्यः। सर्वभासः सर्वकाक इत्यादावुत्तरपदवृद्धौ सर्वं चेति सूत्रेण पूर्वपदान्तोदात्तत्वप्रसङ्गात्। इष्यते तु समासस्येत्यन्तोदात्तः। न च सर्वस्य सुपीत्याद्युदात्तता शंक्या। सतिशिष्टेन समासस्वरेण बाधात्। सर्वस्तोम इत्यादौ तु बहुव्रीहौ प्रकृत्या पूर्वपदमित्यनेन समासान्तोदात्तत्वे बाधिते सर्वस्य सुपीति भवत्येव। इह तु कर्मधारयत्वात्समासान्तोदात्तत्वमेवेति बोध्यम्। किं च तावती भार्या यस्येति बहुव्रीहौ तावद्भार्यो न सिद्ध्येत्। वृद्धिनिमित्तस्य च तद्धितस्येति पुंवद्भावप्रतिषेधप्रसङ्गात्। न द्वितीयः। शालीयो मालीय इत्यादौ वृद्धलक्षणस्य च्छप्रत्ययस्यासिद्धिप्रसङ्गात्। किं चैवमामूमयं शालमयमित्यादौ नित्यं वृद्धशरादिभ्य इति नित्यो मयट् न स्यात्। किं चामूगुप्तायनिः शालगुप्तायनिः, उदीचां वृद्धादगोत्रादिति वृद्धलक्षणः फिञ्न स्यात्। ननु प्राचामवृद्धात्फिन् बहुलमिति फिनाप्येतात्सिद्धम्। नह्यत्र फिञ्फिनोः स्वरे रूपे वा विशेषोस्ति। ञ्नित्यादिर्नित्यमित्याद्युदात्तस्योभयत्राविशिष्टत्वात्। न चामूगुप्तायनीभार्य इत्यत्र वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारइति पुंवद्भावप्रतिषेधसिद्धये फिञेव कर्त्तव्य इति वाच्यम्। जातेश्चेत्यनेनापि प्रतिषेधसिद्धेः। न चामूगुप्तायनेश्छा-

त्रा इति वृद्धाच्छे विवक्षिते फक्फिञोरन्यतरस्यामिति लुग्विकल्पेनाम्गुप्तीया आम्रगुप्तायनीया इति द्वैरूप्यमिष्टं तच्च फिञं विना न सिध्यतीति वाच्यम् । फक्फिञोरित्यत्र यूनीत्यनुवृत्त्या त्वदुदाहृतरूपद्वयस्य सिद्धान्तेष्यसम्मतत्वात् । अत एव तत्र यून्येवोदाहृतम् । यस्कस्यापत्यम् । शिवादिभ्योण् । यास्कः तस्यापत्यं युवा अणो द्व्यच इति फिञ् यास्कायनिः तस्य छात्रा यास्कीया यास्कायनीया इति तस्मात्फिनापि सिद्धौ किमर्थं फिञेवेष्यतइति चेत् । उच्यते । उक्तरीत्या रूपसिद्धावपि प्राचामुदीचां वाचार्याणां स्वस्वमतप्रच्युतिरेव तावदोषः । सिद्धान्ते ह्युदीचामाम्गुप्तायनिरिष्टः प्राचां त्वनिष्टः । उक्तरीत्या तूदीचां न सिद्ध्येत् । प्राचां तु सिध्येदिति स्पष्ट एवोभयोरपि स्वमतप्रच्यवः । तथा च ऋतो भारद्वाजस्येति सूत्रे जहर्थेत्यादौ गुणे रपरत्वे च कृते ऽनजन्तत्वादचस्तास्वदित्यस्याप्राप्तौ नियमानुपपत्तेर्ऋतो भारद्वाजस्येतीदं विधायकं स्यात्ततश्च पेचिथेत्यादाविण्न स्यादिति दूषणे प्राप्ते अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य । उपदेशे त्वतः । भारद्वाजस्येत्येव । तत, ऋतः । भारद्वाजस्येति निवृत्तम् । एवं च सकललक्ष्यप्रसिद्धिरिति सूत्रभङ्गेन समाधाय भाष्यकारो वक्ष्यति । सिध्यत्येवम् । अयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवतीति । अत एवाचस्तास्वदित्यत्रोपदेशेत्वत इत्येतदुपदेशग्रहणमपकृष्य सिद्धान्तविष्यतीति दिक् । किं च फिनि सत्याम्रगुप्तायनेरपत्यं कुत्सितमित्यर्थे सौवीरगोत्रे ' फेरुछचे ' ति छठकौ न स्याताम् । तत्र फिञेव गृह्यते न तु फिन् वृद्धादित्यधिकारादिति स्थितम् । ततश्चाम्रगुप्तायनीय आम्रगुप्तायनिक इति न स्यात् । न च यमुन्दश्च सुषामाचार्य्यायणिः फिञः स्मृता इति वृत्तौ त्रयाणामेव परिगणनाद-

न्येभ्यश्छठकौ न भवतएवेति वाच्यम्। भाष्यकृता परिगणनस्यानाश्रयणात्। अन्यथा ऽत्रैव सूत्रे सौवीरेष्विति किं, तैकायतिरितिप्रत्युदाहरणयं न सङ्गच्छेत। तैकायनिशब्दस्य तत्रापाठात्। अत एव यूनि लुगित्यत्रोदाह्रियते। तिकस्यापत्यं तिकादिभ्यः फिञ् तैकायनिः तस्यापत्यं युवा 'फेश्छच' तैकायनीयस्तस्य छात्राः युवप्रत्ययस्य लुकि कृते वृद्धाच्छः तैकायनीया इति। न हि सति परिगणने तैकायनेश्छः सम्भवति न वा तल्लोपः। अत एव यूनि लुक्सूत्रे स्थित्वा परिगणनमर्वाचीनमिति हरदत्तादयोप्याहुः। अपि च फिञ सत्याम्रगुप्तायनेरपत्यं युवा प्राग्दीव्यतोण्। तस्य 'ण्यक्षत्रियार्षञितो यूनि लुगणिञो' रिति लुक्याम्रगुप्तायनिरित्येवं रूपं पितरि पुत्रे चेष्यते। फिनि तु सति तन्न स्यात्। ञितः परत्वाभावात्। न चाब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति तत्सिद्धिः। ब्राह्मणगोत्रे तदप्रवृत्तेः। किं च तद्धावितग्रहणपक्षे मालादीनां चेत्यनारम्भणीयं स्यात्। प्रस्थे वृद्धमकर्क्यादीनामित्यनेनैव पूर्वपदाद्युदात्तत्वसिद्धेः। अपि च वृद्धिशब्दे तन्त्रावृत्त्याद्याश्रयणाद्गौरवम्। मृजेर्वृद्धिरित्यादिविधिपदेशेष्वितरेतराश्रयणपरिहाराय सूत्रशाटकवद्भावितसंज्ञा विज्ञेया स्यादिति चापरं गौरवमिति। अत्रोच्यते। आदैज्मात्रस्य वृद्धिसंज्ञा। नचैवं सर्वभासादावुक्तदोषः स्यादिति वाच्यम्। उत्तरपदवृद्धौ सर्वं चेत्यत्र ह्युत्तरपदग्रहणं स्वर्यते। स्वरितेनाधिकारो विज्ञायते। तेनोत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता सैव गृह्यते। यथा सर्वपाञ्चालः सुसर्वार्द्धाज्जनपदस्येति वृद्धिः। इदं च तद्भावितग्रहणेप्यवश्यं वक्तव्यमेव। अन्यथा सर्वः कारकः सर्वकारक इत्यादावतिप्रसक्तेः। एवं तावद्भार्येप्यदोषः। तन्त्रावृत्त्या-

द्याश्रयणेन वृद्धिशब्देन विहिताया वृद्धेर्यन्निमित्तं तत्रैव पुंवद्भाव-प्रतिषेधात्। वृद्धिशब्देन च विधौ कृत्स्ना वृद्धिः प्रतीयतइत्या-शयेनैवोक्तं भाष्ये। यत्कृत्स्नाया वृद्धेर्निमित्तमिति। न च वै-याकरणभार्ये तथा सौवश्वभार्ये ऽतिप्रसङ्गः। फलोपहितस्यैव निमित्तत्वेन विवक्षितत्वात्। ऐचौ प्रति फलोपधानमप्यस्तीति चेन्न। तयोर्वृद्धिशब्देनाविधानात्। के चित्तु यावद्वृद्धिजनन-योग्यत्वे सति किञ्चित्फलोपहितस्तद्धितो निमित्तशब्देनोच्य-ते। वैयाकरणे तु ऐचं प्रति तद्धितो न निमित्तं निषेधसन्नियो-गशिष्टतामात्रेणातिप्रसङ्गभङ्गात्। तेन वैयाकरणभार्ये नातिप्रसङ्गः। परिषदोण्यः पारिषद्या भार्येत्यादौ त्वाकारमात्रोपहितत्वेपि स्व-रूपयोग्यता सकलवृद्धिं प्रत्यस्तीत्याहुः। तस्मात् आवृत्तौ गौरवाप-त्तेः शालीयादेरसिद्धितः।मालादीनां चेति लिङ्गाद्व्याप्तिन्यायात्तथै-व च॥ भाविसंज्ञात्वविज्ञाने गौरवाच्चेह निश्चितम्। आदैज्मात्र-स्याविशेषाद्वृद्धिसंज्ञा विधीयते॥ अनर्थकं साध्वनुशासनं प्रयो-गनियमार्थमादेशार्थमागमार्थं विशेषणविशेष्यभावार्थं चेदं सूत्र-मिति षट्पक्षी तु भाष्यएव निराकृतत्वादसम्भवदुक्तिकत्वाच्च नेह तन्यते। संज्ञासंज्ञिभावे सत्यपि का संज्ञा कः संज्ञीत्यत्र ता-त्पर्यग्राहकास्तु बहवो न्यायाः। तथाहि। यच्छब्दयोगः प्राथ-म्यमित्याद्युद्देश्यलक्षणम्। तच्छब्द एवकारश्च स्यादुपादेयलक्षण-मित्यभियुक्तोक्तेस्तथैवानुभवाच्च प्राथम्यन्तावत्संज्ञित्वे लिङ्गं त-च्चादेङ्गुण इत्यादौ स्पष्टमेव। वृद्धिसंज्ञासूत्रे तु मङ्गलार्थं वृद्धिश-ब्दस्यादौ प्रयोगेपि वक्ष्यमाणैर्न्यायान्तरैरादैचां संज्ञित्वे नि-र्णीते सत्यादैज्वृद्धिरित्याकारकपदानुपूर्वीज्ञानानन्तरमेव वा-क्यार्थबोधाभ्युपगमात्तज्जनकीभूतानुपूर्वीज्ञाने आदैचोमेव प्राथ-म्यान्न व्यभिचारः। पदानुपूर्वीज्ञानमेव चासत्तिज्ञानमित्युच्यते।

इदं च शाब्दबोधे हेतुरिति यैर्नेष्यते तेषामासन्नानासन्नकथोच्छेदः स्यात् । पदसमूहालम्बने सकलपदानां पदार्थस्मरणे च सकलपदार्थानां विषयत्वाविशेषात् । आवृत्तिश्च संज्ञात्वे लिङ्गम् । व्यवहारार्थमेव संज्ञाकरणात् । भेदाभेदाभ्यामपि संज्ञित्वसंज्ञात्वे क चिन्निर्णीयेते । बहूनां त्र्येका संज्ञोचिता । लाघवात् । न त्वेकस्य बह्व्यः संज्ञा गौरवात् । न्यूनाधिकव्यक्तिकास्तु बह्व्यः संज्ञाः इष्यन्तएव । तत्तत्प्रयुक्तकार्यवैलक्षण्यात् । कृत्कृत्यप्रत्ययसंज्ञावत् । ताद्धिततद्राजप्रत्ययसंज्ञावच्च । लघ्वक्षरत्वमपि टिघुभादौ संज्ञालिङ्गं यथायथं बोध्यम् । इह त्वावृत्त्या ऽभेदेन च वृद्धिशब्दः संज्ञेति स्थिते तद्बलेन श्रुतानुर्वीभङ्गादादैचां प्राथम्यमपि योजनीयम् । यद्वा । स्वेच्छया संज्ञाः क्रियन्ते इति पक्षं विहाय व्यवहाराय नियम इति पक्षे योज्यम् । आद्योपि कार्यकालपक्षाश्रयणेन वा समाधेयमिति दिक् । एतेनार्द्धधातुकं शेषः कृदतिङ् अपृक्तएकाल्प्रत्ययः स्वंरूपंशब्दस्य अणुदित् तपर आदिरन्त्येन येनविधिस्तदन्तस्येत्यादावपि व्यभिचार उद्धृतः तत्रापि विपरीतानुपूर्वीकल्पनात् । कल्पकत्वस्य च प्रोगवोक्तत्वात् । पक्षान्तरैरपि समाधानाच्च । अत एव स्थानिवत्सूत्रे वत्करणङ्किमर्थमित्याशङ्क्य स्थान्यादेशस्य संज्ञा मा विज्ञायीति भाष्यमप्युपपन्नम् । यत्त्वपृक्त एकालिति परिभाषा न तु संज्ञेत्युक्तम् । तद् वृद्ध्यादावपि सुवचम् । अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलो ग्रहणार्थमिति वार्त्तिकस्य तद्भाष्यस्य च प्रतिकूलम् । तस्मादुक्तैव गतिः समीचीनेति दिक् । ननु मृजेर्वृद्धिरित्यादावन्योन्याश्रयः संज्ञया हि विधिर्विहितानां च संज्ञेति । न च मालादौ संज्ञाप्रवृत्तिसंभवे सतीह भाविसंज्ञाविज्ञानं सम्भवति । तस्माद् वृद्धिशब्द एवादेशः स्यात् । अन्य-

त्र वृद्धिसंज्ञाप्रवृत्तावपि मालादिशब्दान्तर्गतस्याकारस्य तत उत्कृष्यैह विधातुमशक्यत्वादिति । अत्राहुः । माष्टीत्यादौ सिद्धस्यैवाकारस्य मृज्युपदेशादसाधुत्वे प्रसक्ते साधुत्वं मृजेर्वृद्धिरित्यादिना बोध्यते न त्वपूर्व आकारो भाव्यते । येनान्योन्याश्रयः स्यात् । उक्तं च वार्तिककृता । सतो वृद्ध्यादिषु निमित्तभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः । सिद्धं तु नित्यशब्दत्वादिति । अथ लक्षणैकचक्षुष्कः कश्चिद्व्याकरणबलेनैव माष्टीत्यादिप्रयोगेषु व्युत्पित्सेत तथापि न क्षतिः । शालामालादावाकारे श्रुते आत्वसामान्यलक्षणप्रत्यासत्या माष्टीत्यादिप्रयोगसमवायिनां सर्वेषामाकाराणां वृद्धिशब्दवाच्यताग्रहात् । सामान्यलक्षणानभ्युपगमपक्षे त्वात्वजानौ शक्तिग्रहात् शक्यनुभवपदार्थस्मरणवाक्यार्थबोधानां समानप्रकारकत्वेनैवातिप्रसङ्गभङ्गाभ्युपगमाद्वा । अन्यथा गेहे घटोस्तीति वाक्यादप्यपूर्वव्यक्तिर्न गृह्येतेति दिक्। अत एव नवेतिविभाषेति सूत्रे भाष्यकारो वक्ष्यति।साधुत्वस्य विधेयत्वे विभाषाश्वेरित्यादिना तस्यैव विकल्पापत्तिः।तस्मात्सम्प्रसारणाद्येव विकल्प्यतइति।एषैव लडादिविधौ गतिः।न चैवं साध्वनुशासनत्वभङ्गः । साधुत्वविशिष्टस्यैव सर्वत्र लक्षणया विधानमिति कृम्मेजन्तसूत्रे विवरणकारादिभिरुक्तत्वात् । केवलविधानेपि यदिह परिनिष्ठितं तत्साध्विति श्रुतार्थापत्तिं प्रकल्प्य वाक्यात्साधुत्वसिद्धेश्च । इह च प्रत्येकं वाक्यपरिसमाप्तिः । मालादीनां चेत्यादिलिङ्गात् । ब्राह्मणा भोज्यन्तामित्यादौ तथा दर्शनाच्च । यद्यपि गर्गाः शतं दंड्यन्तामित्यादौ समुदायेपि वाक्यपरिसमाप्तिर्दृश्यते । गुणकर्मभूतानामपादानस्थानापन्नानां गर्गाणामनुरोधेनेप्सिततमकर्मतया प्रधानभूतस्य शतस्यावृत्त्ययोगात् । तथापीह शास्त्रे यत्नं

विना समुदाये शास्त्रं न समाप्यते। अत एव उभे अभ्यस्तं सहेति सहग्रहणं वार्त्तिककृद्वक्ष्यति । भाष्यकारस्तूभेग्रहणमेवैतदर्थमिति वक्ष्यति । अन्यथैकाचो द्वे इत्यनुवृत्त्या सिद्धेः किमुभेग्रहणेन । संयोगसंज्ञायां समाससंज्ञायां च महासंज्ञाकरणमेवान्वर्थताविज्ञानार्थमिति यत्नः । अत एव सह सुपेति सहग्रहणं योगविभागेन तिङन्तादिसमासविधानार्थमिति स्थापयिष्यते । इह तपरकरणमैजर्थमीदूदेदिति वदुच्चारणार्थमसंदेहार्थं चेति प्रपञ्चितमेओङै औजितिसूत्रयोः । यत्त्विहोक्तं वार्त्तिककृता । आकारस्य तपरकरणं सवर्णार्थमिति, तत्तु भेदका गुणास्तपरसूत्रं चानणि विध्यर्थमित्यभिप्रेत्य भाष्ये त्वभेदका गुणा इति स्थितम् । गुणा उदात्तानुदात्तस्वरितानुनासिका नान्तरीयकतयोच्चार्यमाणा अपि यत्नं विना न विवक्ष्यन्तइत्यर्थः । अनडुदात्तो ऽडुदात्त इत्यादावुदात्तग्रहणं चेह ज्ञापकम् । अन्यथा ह्युदात्तमेवोच्चारयेल्लाघवात् । ननु यद्यभेदका गुणास्तर्हि यद्वक्ष्यति भाष्यकारः हंत्यादेशस्य वधेः स्थानिवद्भावादनुदात्तत्वादिट्प्रतिषेधे प्राप्ते तद्वारणाय वध्यादेशे उदात्तनिपातनं करिष्यते । तथा चैकाच उपदेशइति सूत्रे एकाज्ग्रहणं न कर्त्तव्यमिति । तदेतद्विरुध्येत । अविवक्षाप्रसङ्गात् । अथोच्येत । तत्रापि स्थानेन्तरतम इति वचनादादेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्ये उदात्तोच्चारणं यत्नेन विवक्षार्थं ज्ञायतइति । एवमपि यद्वक्ष्यति षष्ठे चतसर्यादुदात्तनिपातनं करिष्यते स निपातनस्वरश्चतुरः शसीत्यस्य बाधको भविष्यतीति तद्विरुध्येत । चतुश्शब्दो ह्यव्युत्पत्तिपक्षे नृः संख्याया इति फिट्सूत्रेणाद्युदात्तः चतेरुरानिति व्युत्पादनेपि नित्स्वरेणाद्युदात्त एव । तत्स्थानिकस्य चत्वारश्शब्दस्यापि स्थानिस्व-

रेणाद्युदात्तस्योच्चारणोपपत्तौ चतुरः शसीत्येतद्बाधकत्वायोगात् । अपि च अस्थ्यादीनामप्याद्युदात्तत्वादन्तादेशस्यानङोपि स्थान्यनुरूपेनुदात्तएवोच्चारणीय उदात्तोच्चारणं विवक्षार्थं भविष्यतीत्युदात्तग्रहणं निष्फलमेव, प्रत्युत क्रियमाणं तद्यत्नाधिक्येप्यविवक्षां ज्ञापयेत् । यद्प्येकश्रुत्या सूत्रपाठात्क्व चिदुदात्तोच्चारणं विवक्षार्थमिति, तदपि चिन्त्यम् । एवं सत्यनङोप्युदात्तोच्चारणेनैव सिद्धावुदात्तग्रहणवैयर्थ्यापत्तेः । उक्तज्ञापनासम्भवाच्च । तथाहि । किं ज्ञाप्यम् । स्वशब्देनानुपात्तो गुणो न विवक्ष्यतइति । आहोस्विदसति यत्नविशेषे न विवक्ष्यतइति । आद्ये निपातनस्वरो न विवक्ष्येत । अन्त्ये तूदात्तोच्चारणएव विवक्षाहेतौ यत्नविशेषे स्थिते कथं ज्ञापकोत्थानं मूलशैथिल्यात् । तस्माद् गुणानामभेदकत्वप्रतिपादकमत्रत्यं भाष्यमुत्तरग्रन्थविरुद्धमेवेति चेत् । उच्यते । विभाषा छन्दसीति वैकल्पिकमैकश्रुत्यमङ्गीकृत्य पक्षान्तरैरपि परिहारा भवन्तीति न्यायेन तत्र तत्राद्युदात्तनिपातनं करिष्यतइत्युक्तम् । इह तु त्रैस्वर्येण सूत्राणां पाठमाश्रित्य स्वरूपेणोपात्तस्य गुणस्य नान्तरीयकत्वेनाविवक्षितत्वसम्भवादुदात्तग्रहणं ज्ञापकमित्युक्तमतो न विरोधः । यद्वा । अणुदित्सवर्णस्येत्यत्राञ्ग्रहणेनैव सिद्धे गुणभिन्नानां यवलानां संग्रहाय क्रियमाणमण्ग्रहणं गुणानां भेदकतामपि ज्ञापयति । भेदकाभेदकत्वपक्षयोश्च जातिव्यक्तिपक्षयोरिव लक्ष्यानुरोधाद्व्यवस्थेत्युक्तं हल्सूत्रे । तेन भेदकत्वपक्षाश्रयणेनाद्युदात्तनिपातनं करिष्यतइत्यादि भाष्यं बोध्यम् । अत एव चेदमस्त्यदाद्यत्वे अष्टन आ विभक्ताविल्यादौ चानुनासिको न प्रवर्त्तते । नन्वण्ग्रहणं हलो यमामिति लोपे ऽन्यतरस्यांग्रहणानुवृत्तिज्ञापनार्थमित्यु-

क्तमिति चेत्। न। उभयज्ञापकत्वेप्यविरोधात्। नह्येकेनैकमेव ज्ञाप्यमिति नियमः। यावता विनानुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वात्। अत एवाऽऽत्वविकल्पः कृतात्वस्य षट्संज्ञा चेत्युभयमप्यष्टनो दीर्घादिति दीर्घग्रहणेन ज्ञापयिष्यते। अत एव च संहितायामित्यधिकारेण संहिताया अनित्यत्वं कालव्यवायेप्यानङादिप्रवृत्तिश्चेत्युभयं ज्ञाप्यतइति दिक्। एवं चाकारस्य तपरकरणं सवर्णार्थमितीहत्यं वार्तिकमपि भेदकत्वपक्षेण साध्वेव। भाष्ये तु पक्षान्तराभिप्रायेण ऐजर्थत्वमुक्तम्, तदपि यथोद्देशपक्षे बोध्यम्। आदैचां संज्ञाविधावनुवाद्यत्वेन सवर्णग्राहकत्वप्रसक्तेः। कार्यकालपक्षे तु विधिवाक्येनैव वृद्धिसंज्ञा विशिष्टानामादैचां भाव्यमानतया सवर्णग्रहणं न प्राप्नोत्येव। यथा च ज्योतिष्टोमराजसूयादिशब्दानां यागविधावेव सामानाधिकरण्यान्नामधेयत्वावगतिर्न तु वाक्यान्तरेण तथास्मिन्पक्षे वृद्ध्यादीनामपि, वृद्धिरादैजिति सूत्रं त्विकोगुणवृद्धीतिवत्पदोपस्थापकम्। उपस्थाप्यस्य संज्ञितया परं संज्ञासूत्रव्यवहारः। आद्यपक्षे तु यन्न दुःखेनेत्यादौ स्वर्गशब्दार्थावगमवदिहैव वृद्ध्यादिशब्दार्थावगम इति विशेषः। तदयं निर्गलितः सूत्रार्थः। कृतानामकृतानां चादैचां प्रत्येकं वृद्धिसंज्ञा स्यात्। आश्वलायनः। ऐतिकायनः। अश्वलेतिकशब्दाभ्यां नडादित्वात्फक्यादिवृद्धिः। उपगोरपत्यमौपगवः॥

अदेङ्गुणः॥ अदेङां गुणसंज्ञा स्यात्। तपरकरणमिह सर्वार्थम्। तेन तरतीत्यत्राकार एव न तु कदा चिदाकारः। न च प्रमाणत आन्तर्येण नियमसिद्धिः। रपरत्वे कृते एकस्याध्यर्द्धमात्रत्वादपरस्यार्द्धतृतीयमात्रत्वात्। पचन्ति चेता स्तोता॥

इको गुणवृद्धी॥ यत्र ब्रूयाद् गुणो भवति वृद्धिर्भवतीति तत्रे-

क इति षष्ठ्यन्तमुपस्थितं बोध्यम् । चेता स्तोता । अहार्षीदित्यादि। इक इत्युक्तेर्नेह । याता ग्लायति उम्भितेति । तथा च वार्त्तिकम् । इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थमिति । ननु नैतानि सन्ति प्रयोजनानि ज्ञापकेनानिकां व्यावृत्तिसिद्धेः । तथाहि । अकारस्य पचतीत्यादौ शपन्तिपञ्चाश्रित्य यथाक्रमं पुगन्तेति सार्वधातुकार्द्धधातुकयोरिति च सूत्रेण सत्यपि गुणे रूपे विशेषो नास्ति । अचिकीर्षीदित्यादौ त्वतोलोपेन वृद्धिर्बाध्यते ण्यल्लोपाविति पूर्वविप्रतिषेधस्य वक्ष्यमाणत्वात् । सूत्रारम्भपक्षेपि ह्येषैव चिकीर्षक इत्यादौ गतिः।अचोञ्णितीत्यत्र निर्दिष्टस्थानिकत्वेनेक्परिभाषाया अप्रवृत्तेः । अयासीदित्यादौ तु सिचि वृद्धौ सत्यामपि न क्षतिः। वस्तुतस्तु सा परत्वात् सगिड्भ्यां बाध्यते । येन नाप्राप्तिन्यायेनापवादत्वाद्बाध्यतइति तु निष्कर्षः । न च याता वातेत्यादावातो गुणप्रसङ्गः । गापोष्टागिति टकः कित्त्वेनाकारस्य गुणो न भवतीति ज्ञापितत्वात् । तद्धि कित्त्वं सामग इत्यादावाल्लोपार्थं क्रियते । यदि त्वाकारस्य गुणः स्यात्तर्हि द्वयोरकारयोः पररूपेण सामग इत्यादिरूपासिद्धौ किं कित्त्वेन । न चेह चिकीर्षक इत्यादाविव परत्वादांगत्वाच्चातो लोप एवोदाहर्त्तुमुचितो न तु पररूपमिति वाच्यम् । तावतापि ज्ञापकत्वे बाधकाभावात् । वस्तुतस्तु नेह लोपेन भवितव्यम् । तत्र ह्यनुदात्तोपदेशेत्यतोनुवृत्तेनोपदेशग्रहणेनार्द्धधातुकस्य विशेषणादार्द्धधातुकोपदेशे यदकारान्तं तस्यातो लोपो विधीयते । अन्यथा गतो गतवानित्यादावतिप्रसङ्गात् । न चासिद्धवत्सूत्रेण निर्वाहः । तस्य भाष्यकृता प्रत्याख्यास्यमानत्वात् । किं चाय पय गतौ, आभ्यां क्विप्यत् पदिति रूपं माधवादिभिरुदाहृतं तदपि यथाश्रुते न सिद्ध्येत् । तस्मादुपदेशानुवृत्तिरेव शरणम् ।

कथं तर्हि धिनुतः कृणुत इत्यादावतो लोप इति चेत्सन्नियोगशिष्टतया उमत्ययोपदेशवेलायामेवाकारस्यापि बुद्ध्यारोहादिति केचित्। अन्ये तु धिन्विकृण्व्योरचेति सौत्रकमानुरोधात्प्रथममकारादेशस्तदनन्तरं चशब्दाकृष्ट उमत्यय इति नोक्तदोष इत्याहुः। नन्वेवं सामगायेत्यादावेकादेशस्य पूर्वान्तत्वेन ग्रहणादातोधातोरित्यालोपः स्यादिति चेत्। अत्र कैयटः । अकारमाश्रित्य कृतो यशब्दः सन्निपातपरिभाषया लोपं न प्रवर्त्तयति । दीर्घत्वं तु कष्टायेति निपातनाद्भवतीत्येओङ्सूत्रे स्थित्वा समाहितवान्। तस्यायमाशयः । यादेशे हि ह्रस्वत्वविशिष्टमत्वं प्रयोजकम् । तद्विधावत इत्यनुवृत्तेः । तत्र यद्यपि दीर्घेण ह्रस्वत्वांशो निवर्त्तितस्तथाप्यत्वमात्रमादेशेप्यनुवर्त्तते । तदपि चेल्लोपेन निवर्त्येत तर्हि परिभाषाविरोधः । दीर्घांशे परं ज्ञापकात्परिभाषा बाध्यते । न चैवमंशान्तरेपि तद्बाधोस्त्विति वाच्यम् । तदबाधेप्युपपत्तेः । प्रकृतसूत्रे एओङ्सूत्रे च गापोष्टकः किच्चस्यानन्यार्थतां वदन् भाष्यकारश्चात्र प्रमाणम् । एतेन शुभंयाशब्दस्य नपुंसके ह्रस्वत्वे ङेर्यादेशे दीर्घे च सत्यातोधातोरित्यालोपे च शुभंय्य इत्यादि माधवोदाहृतं भाष्यविरोधाच्चिन्त्यम् । अत एव नपुंसके श्रीपं ज्ञानवदिति ग्रन्थं श्रीगायेतिरूपपरतया यथाश्रुतमेव समञ्जसं भङ्क्त्वा माधवानुरोधेन प्रायेण ज्ञानवदिति व्याचक्षाणा अपि प्रत्युक्ताः । तथा ग्लायतीत्यादौ सन्ध्यक्षराणामप्युपदेशसामर्थ्याद् गुणो न भविष्यति । इतरथा हि एकारमेवोपदिशेत् । मात्रालाघवविरहेपि प्रक्रियालाघवसत्त्वात् । न चैवमायादेशोपि न स्यादिति वाच्यम् । यं विधिं प्रत्युपदेशो ऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यतइति न्यायात् । गुणं प्रति ह्येकारोपदेशो ऽनर्थकः । ग्ले इत्यस्यापि सुपठत्वात्।

आयादेशस्य तु निमित्तमेव। न च ग्लायइत्येव पठ्यतामिति वाच्यम्। तथा सति हि त्वया ग्लायतइति रूपं न स्यात्। यकारद्वयश्रवणप्रसङ्गात्। जग्लावित्याद्यसिद्ध्यापत्तेश्च। यत्तु एकाजजन्तत्वाभावादिट्प्रसङ्गेन ग्लातेत्यादि न स्यादिति। तन्न। अनुदात्तोपदेशेष्वेषां सुपठत्वात्। न चैवमग्लासिष्टामित्याद्यसिद्धि, रनादन्तत्वेन सगिटोरसम्भवादिति वाच्यम्। लोपो व्योरिति यलोपे कृते सगिटोः सुलभत्वात्। सान्निपातपरिभाषा त्वनित्येति कृतितुग्ग्रहणेन ज्ञापयिष्यते। तेन वल्सन्निपातेन कृतो यलोपो वल्सन्निपातविघातकमपीटं प्रवर्त्तयिष्यत्येव। अनित्यताश्रयणेनैव हि दाक्षिः गोद इत्यादावदातोर्लोपः। अन्यथा इक्प्रत्ययौ प्रति तयोरुपजीव्यत्वाल्लोपो न स्यात्। अस्तु वा सन्निपातपरिभाषाश्रयणादग्लासिष्टामित्यादि न सिध्येदित्यपि यान्तोपदेशे दोषान्तरम्। सर्वथापि संध्यक्षराणामुपदेशसामर्थ्याद् गुणो न। आयादयस्तु भवन्त्येवेति सिद्धम्।स्यादेतत्।आदे च इत्यात्वमपि तर्हि बाध्यतां, नह्यैजुपदेश आत्वस्य निमित्तम्। ग्ले इत्युपदेशेपि तस्य सुकरत्वात्। शिति गुणेनाशित्यात्वेनैचोपहारे प्राप्ते ऐजुपदेशसामर्थ्येन गुणात्वयोर्मध्ये कतरद्बाध्यं कतरन्नेत्यत्र विनिगमनाविरहेणोभयबाधप्रौव्यात्। न चैवमात्वविधेः कोवकाश इति वाच्यम्। धेट् पाने शो तनूकरणे इत्यादेरवकाशस्य स्पष्टत्वात्। नन्वेवमादेङ् इत्येव ब्रूयात्। तथा चैज्ग्रहणं निरवकाशमेवेति चेत्। न। उत्तरार्थत्वात्। मीनातिमिनोतीत्यत्र ह्येच इत्यनुवृत्त्या आकारान्तानामेजन्ताः प्रकृतय एजन्तानामपीकारान्ता इति घुसंज्ञासूत्रे वार्तिककारः स्फुटीकरिष्यति। अत्राहुः। अन्यतरबाधेनैव संभवे उभयबाधकल्पनं तावदन्याय्यम्। तत्र यद्य-

णुरपि विशेषो नावधार्येत तर्हि विनिगमनाविरहात्स्यादेवोभयबाधः। अस्ति चेह विनिगमकम्। न ध्याख्येति सूत्रे ध्यायतेः कृतात्वस्य निर्देशेनात्वाबाधज्ञापनात्। किञ्च एज्ग्रहणसामर्थ्यादप्यात्वं भवति। यत्तूक्तमुत्तरार्थं तदिति। तन्न। मीनातीति सूत्रेण हि नैचः स्थाने आत्वं विधीयते किन्त्वेजनिमित्ते प्रत्यये विवक्षिते उपदेशावस्थायामेवान्त्यमात्रस्यात्वं विधीयते। अन्यथा दाय इत्यादौ भावे घञं बाधित्वा एरच् स्यात्। इषदवदानः स्ववदान इत्यादौ युच न स्यात्। अवदाय इति ल्यादयधीति णो न स्यात्। स्पष्टीकरिष्यते चेदं षष्ठएव भाष्यकृता। एवं चैजनिमित्ते प्रत्यये इत्युच्यमानेपि दापयति मापयतीत्यादि सिध्यत्येव णिचो गुणं प्रत्यपि स्वरूपयोग्यत्वात्। वृद्ध्या गुणबाधेपि योग्यतानपायात्। न चेह फलोपधानं विवक्षितम्। आत्वस्यैजित्वषये प्रागेव प्रवृत्तेरभ्युपगमात्। अन्यथा घञ्युच्णप्रत्यया न स्युरिति समनन्तरमेवोक्तम्। तस्मादात्वं भवत्येव। गुणस्त्वैकारोपदेशसामर्थ्याद् बाध्यतइति स्थितम्। व्यञ्जनानां गुणः स्यादिति परमवशिष्यते। ततश्च ईहितेत्यत्र इकारस्य कंठ्यत्वादकारः स्यात् उम्भितेत्यत्र भकारस्यौष्ठ्यत्वादोकारः ततश्च येता उनवितेति स्यात्। ईकारस्य यणि कृते ऽकारस्येटा सहादगुणः। न त्वल्लोपः। आर्द्धधातुकोपदेशे षदकारान्तं तस्य लोप इति व्याख्यातत्वात्। उम्भेश्चानुस्वारपरसवर्णयोर्गुणे कर्त्तव्ये ऽसिद्धत्वादिति, नैष दोषः। सप्तम्यां जनेर्ड इत्यत्र डप्रत्ययस्य डित्करणं ज्ञापकम् न व्यंजनस्य गुणो भवतीति। यदि हि स्यात्तर्हि नकारस्यार्द्धमात्रिकस्य मात्रिके अकारे गुणे कृते त्रयाणामकाराणामतो गुणइति पररूपे च सिद्धं रूपमुपसरजो मंदुरज इति तर्हि

टिलोपार्थेन डित्करणेन । स्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरणमुपसरः । प्रजने सर्त्तेरित्यप्प्रत्ययो घञोपवादः । प्रजनः स्यादुपसर इति संकीर्णवर्गे ऽमरः । प्रजायतेस्मिन्प्रजनः पशूनां गर्भग्रहणकाल इति क्षीरस्वामी । उपसरे जात उपसरजः, मंदुरायां जातो मन्दुरजः ङ्याप्पोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वः । वाजिशाला तु मन्दुरेत्यमरः । न च डकारः श्रवणार्थोस्त्विति वाच्यम् । प्रावृट्शरत्कालदिवां जइति कृतटिलोपनिर्देशाल्लिङ्गात् । ननु नेदं लिङ्गं जै क्षये इत्यस्य कप्रत्ययान्तस्य ज इति निर्देशोपपत्तेः । कथं तर्हि कर्मण्युपपदे विहित आतः कः प्रावृषिज इत्यादौ स्यादिति चेत् । द्विपः पादप इत्यादिसिद्धये सुपि स्थ इत्यत्र सुपीति योगविभागाभ्युपगमात् । सत्यम् । डकारस्य श्रवणार्थत्वे इत्संज्ञाशास्त्रं बाध्येत । न च प्रयोजनाभावः । टिलोपार्थत्वात् । न च गुणेनान्यथासिद्धिः । तदभावस्यापि ज्ञाप्यत्वात् । निषादस्थपत्यधिकरणन्यायेन फलमुखगौरवस्यादोषत्वात् । डकारस्य श्रवणार्थताभ्युपगमे सिद्धं तु नित्यशब्दत्वात्कित्करणमर्थं शास्त्रमिति चेन्निवर्त्तकत्वात्सिद्धमिति वृद्धिसूत्रस्थवार्तिकविरोधाच्च । नन्वसति डित्त्वे रूपं न सिध्यति । नकारस्थाने गुणस्यापि सानुनासिकस्य प्रसङ्गात् । न च निरनुनासिकेन प्रत्ययाकारेण सह पररूपाच्छुद्धो भविष्यतीति वाच्यम् । पररूपविधानेपि गुणानामभेदकतया पर्यायेण सानुनासिकप्रसक्तेर्दुर्वारत्वादिति । मैवम् । एङि पर इतीयता सिद्धे रूपग्रहणादाधिक्यत्नाद् गुणविवक्षोपपत्तेः । तस्य त्वेतदेव फलम् । यादृशं परस्य रूपं निरनुनासिकत्वाद्युपेतं तादृगेव यथा स्यादिति । तस्माज्जनेर्डवचनं ज्ञापकं न व्यञ्जनस्य गुणो भवतीति । एवं चेग्रहणमात्सन्ध्यक्षरव्यञ्जनानिवृत्त्यर्थमिति वा-

त्तिकमसङ्गतमिति प्राप्ते भगवान् भाष्यकार इत्थं सिद्धान्तमाह। उक्तरीत्या ज्ञापकेनैवात्सन्ध्यक्षराणां निरासेपि व्यञ्जननिवृत्त्यर्थं सूत्रं कर्त्तव्यमेव। यत्तूक्तं जनेर्डवचनं ज्ञापकमिति। तन्न। गमेरपि ह्ययं डो वक्तव्यः। गमेश्च गुणे क्रियमाणे आन्तर्यत ओकारः स्यात्। ततश्च नगः अगः अभ्युद्गः समुद्ग इत्यादि न सिध्येत्। ततश्च तत्र चरितार्थे डित्त्वं कथं व्यञ्जनस्य गुणाभावं ज्ञापयेदिति। ननु जनेर्ड इत्येव डप्रत्ययो गमेर्न विधीयते किंतु गमश्च अन्तात्यन्ताध्वदूरपारेति प्रकरणे पठितेनान्यत्रापि दृश्यतइति वार्तिकेन डप्रत्ययान्तरमेव। तथा च कथं भाष्यकृतोक्तं गमेरप्ययं ड इति। सत्यम्। सप्तम्यां जनेर्ड इति प्रकरणे तावदन्येष्वपि दृश्यतइति सूत्रेण डो विधीयतइति निर्विवादम्। तत्र चान्येष्वप्युपपदेषु जनेर्डो दृश्यतइत्यक्षरार्थः। तेनाजो द्विजोनुज इत्यादि सिद्धम्। एवमपि धात्वन्तराड्डविधायकाभावात्परितः खाता परिखेत्यादि न सिद्ध्येदित्याशङ्क्य तत्र वार्त्तिककृतोक्तमन्येभ्योपि दृश्यतइति। अयं च सौत्रदृश्यपिग्रहणसूचित एवार्थो वार्त्तिकेन विवृतो न त्वपूर्वः संगृहीतः। तथा च तत्र वृत्तिकार आह। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि भवति। परितः खाता परिखेति। दृशिग्रहणात्कारकान्तरे कालान्तरे चेत्यादि तत्रैव स्पष्टम्। एवं स्थिते सौत्रेणैवानेन परिखेत्यादेरिव नगोगइत्यादेरपि सिद्धावन्तात्यन्तेति प्रकरणे ऽन्यत्रापि दृश्यतइति वार्त्तिकं न कर्त्तव्यमेव। क्रियमाणं वा एतत्सूत्रसिद्धार्थविवरणपरतया नेयमित्याशयेन भगवतोक्तम्। गमेरपि ह्ययं डो वक्तव्य इति। नन्वेवमपि डित्त्वं व्यर्थमेव। गमेर्डित्त्वेन सिद्धे गमेर्डोरिति डो प्रत्ययविधानेन मकारस्य गुण ओका-

रो न भवतीति ज्ञापितत्वात् । तस्माड्डप्रत्ययस्य डित्त्वं पूर्वोक्तरीत्या ज्ञापकमेव । किं च । डोप्रत्ययविधानमेव व्यञ्जनस्य गुण इति ज्ञापयति । अन्यथा विचैव सिद्धौ किं तेनेति चेत् । न । विचि हि सति गुणः क्रियमाणः सानुनासिक ओकारः स्यादिति निरनुनासिकसिद्धये डोप्रत्ययविधानादिति दिक् । अत्र वदन्ति । तनोतेर्डउः सन्वच्चेति डित्करणान्न व्यंजनस्य गुणो भविष्यति । यत्तु शास्त्रातिदेशोयं कार्यातिदेशो वा, ऽऽद्ये ऊर्णुनविषतीत्यत्रेव द्विर्वचने ऽचीति स्थानिवद्भावेन तँतँ अउइति स्थिते सन्यत इतीकारः सानुनासिकः स्यात् । द्वितीयेत्वभ्यासकार्यं दुर्लभमिति । तन्न । आद्ये गुणानां भेदकत्वादिमौ इमे इतिवदुपपत्तेः। द्वितीयेपि बभ्रुर्जुहूरित्याद्यर्थं धात्वधिकारीयद्वित्वे ऽभ्याससंज्ञास्वीकारात्। अत एव लिटिधातोरिति सूत्रे धातुग्रहणं तिष्ठतु तावत्सान्यासिकमिति भाष्यम् । आदेच इति सूत्रे धातुग्रहणानुवृत्तेरापाततो भाष्ये प्रदर्शितत्वेपि ष्यङ्विधिभाष्ये ऽननुवृत्तेरेव सिद्धान्तिततया भाष्याशयस्येत्थमेव वर्णनीयत्वादिति दिक् । किञ्च । यथा स्थानेन्तरतमपरिभाषा संस्कृतावनुनासिकपरसवर्णविधी स्थानप्रयत्नाभ्यामन्तरतम एतन्मुरारिस्त्वं करोषीत्यादिकं विषयं लब्ध्वा चरितार्थौ चतुर्मुखः कुण्डं रथेनेत्यादौ न प्रवर्त्तेते इति हयवरट्सूत्रे सिद्धान्तितम् । तथेहापि सार्वधातुके ञ्नसि गुणः सिचि वृद्ध्यादयः नेता अविभयुः अनैषीदित्यादौ चरितार्थाः, उम्भिता अनेनिजुरभैत्सीदित्यादिषु न भविष्यन्ति । न चैवं नेता अनैषीदित्यादावेव स्थानगुणप्रमाणैस्त्रिभिरान्तर्यलाभाच्चेता अचैषीदित्यादौ प्रमाणान्तर्यविरहेण गुणवृद्धी न स्यातामिति वाच्यम् । सूयस्यदः क्मरजिति क्मरचः क्नोश्च कित्करणेन प्रमाणतआन्तर्यस्याविव क्षा-

था ज्ञापनात्। न चैवमपि ईहिता ईशितेत्यत्र कण्ठ्यतालव्ययोर्विवृतयोश्च हकारशकारयोस्तादृशावेवादेतौ स्यातामिति वाच्यम्। नाज्झलाविति सूत्रस्य प्रत्याख्यानावसरे ऊष्मणामीषद्विवृततायाः सिद्धान्तयिष्यमाणत्वात्। न चैवं विवृतकरणाः स्वरास्तेभ्य एओ विवृततरावित्यादि शिक्षानुरोधाच्चेता नेतेत्यादावपि गुणाप्रवृत्तिः स्याद्विवृतविवृततरत्वकृतवैलक्षण्यसत्त्वादिति वाच्यम्। तथासति विधेर्निर्विषयतापत्तेः, जयः करणमित्यादिनिर्देशैः क्नुसन्क्मरच्प्रभृतीनां कित्त्वेन चेकारादिषु गुणप्रवृत्त्यनुमानाच्च। आत्सन्ध्यक्षरव्यञ्जनेषु तु गुणाद्यप्रवृत्तिरेवोचिता। तथा च निर्देशाः यातिवातिद्रातिप्सातिः, ध्यायतेः सम्प्रसारणं च, वहतिचिनोतिदेग्धिषु चेत्यादि। अथ क्नोः कित्त्वेनापि गुणवृद्धिविधावन्तरतमपरिभाषानुपस्थितिरेव ज्ञाप्यतामिति चेन्न। सत्यामपीक्परिभाषायामीकारस्याकारादिनिवृत्तये ऽन्तरतमपरिभाषाया आवश्यकत्वादिति। तदेवं ङओर्ङित्त्वादनान्त्यान्निर्देशाच्च निराकृतं व्यञ्जनं भाष्यएवैच आकारश्च निराकृतः। तस्माद्व्यर्थं सूत्रमिदम्। अथ यद्युत्तरार्थता, विभज्य योगं किमिति परिभाषात्वमिष्यते। अत्रोच्यते। कृङिति चेति सूत्रे चकारस्य इतिशब्दपर्यायतामाश्रित्येक इति ये गुणवृद्धी तयोर्निषेध इति तावद्वक्ष्यते। अन्यथा लैगवायन इत्यत्र ओर्गुणोपि निषिध्येत। औपगवादिस्तु तस्यावकाशः। तथा पौरोहित्यमित्यत्रादिवृद्धिश्च न स्यात्। एवं स्थिते यदीयं परिभाषा प्रत्याख्यायते तदा कथञ्चित्तत्रतत्र गुणवृद्धिविधाविकामेव स्थानित्वपर्यवसानेपीक इति पदानुच्चारणेनेग्लक्षणत्वाविरहान्निषेधो न प्रवर्त्तेत। ततश्च कृतः कृतवान् कुरुतः छिन्नं छिन्नवानित्यादि न सिध्येत्। निषेधसूत्रं च निर्विषयं स्यात्। परिभाषाप-

रित्यागपक्षे इग्लक्षणयोर्गुणवृद्ध्योरप्रसिद्धत्वात् । तदेतत्स्पुटीकृतं भाष्यकृता । उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणमिति । तस्य त्वयमाशयः । यद्यपि सिचि वृद्धिरिति विधौ वक्ष्यमाणरीत्या परिशेषादिकामेव स्थानित्वं लभ्यते । तथापीग्लक्षणत्वं विना निषेधो न प्रवर्त्तेत । तस्मादुत्तरार्थं निषेधप्रवृत्त्यर्थं च वृद्धिग्रहणमिति । एवं च वदता न्यायसाम्याद् गुणग्रहणस्याप्येतदेव प्रयोजनं सूचितम् । कथं पुनर्गुणवृद्धिविधौ सर्वत्र परिभाषाव्यतिरेकेणेकः स्थानित्वपर्यवसानं येन निषेधार्थता वर्ण्यतइति चेत् । शृणु । सार्वधातुकार्द्धधातुकयोर्ज्जुसिचेतिगुणौ तावदलोन्त्यपरिभाषयाङ्गान्त्ये ऽलि प्राप्तौ प्रागुक्तज्ञापकादिभिरात्सन्ध्यक्षरव्यञ्जनेभ्यो व्यावर्त्तिताविक्ष्वेव विश्राम्यतः । मिदि पुगन्तलघूपधादिगुणेषु तु स्थानी निर्दिष्ट एव । तथाहि । मिदेर्गुणे इत्यत्र मिद इर्मिदिस्तस्य मिदेरित्यर्थः, पुक्यन्तः पुगन्तः लघ्वी उपधा लघूपधा पुगन्तश्च लघूपधाचेति समाहारद्वंद्वात् षष्ठी । न चैवं यापयतीत्यादावतिप्रसङ्गः । सन्निपातलक्षणपरिभाषयादन्तलक्षणस्य पुको गुणाप्रवर्त्तकत्वात् । ऋच्छत्यृतामित्यत्रापि द्वयोर्ऋतोर्दीर्घस्य चेति त्रयाणां प्रश्लिष्टनिर्देशः । तद्यथा । आ च ऋच्छ ऋतः, ऋच्छतेरा ऋच्छत्या स च ऋतश्च तेषामिति षष्ठीतत्पुरुषद्वंद्वोभयगर्भो द्वंद्वः । ऋच्छत्या च आ च ऋतश्चेति त्रिपदद्वंद्वो वा । तेन ऋच्छत्यृकारस्य स्थानित्वं लभ्यते । वस्तुतस्तु चतुर्णामिह प्रश्लेषो बोध्यः तेनारिवान् सर्वभरूणान्यारुषीत्यादावर्त्तेः कसौ गुणः सिद्धः पुनर्विधानसामर्थ्यात् । अन्यथा कसोः कित्करणसामर्थ्यात्तितीर्वानित्यत्रेव गुणो निषिध्येत । एतच्च कसुश्चेति सूत्रे स्फुटीकरिष्यामः । तथा ऋदृशोङीत्यत्राप्युरङि गुण इति योगो विभज्यते । ततो दृश, उरित्याद्यनुवर्त्त-

ते। स्थूलदूरेति सूत्रेपि योगविभागः कर्त्तव्यः स्थूलदूरयुवह्रस्वानां यणादिपरमित्येको योगः, क्षिप्रक्षुद्रयोः पूर्वस्य च गुणः इति योगान्तरम्। तत्र स्थवीयानित्यादावोर्गुणेन सिद्धम्। आभीयस्यासिद्धत्वस्य श्नसोरल्लोप इति तपरकरणेनानित्यताज्ञापनात् भाष्यकृता प्रत्याख्यानाच्च। यण आदिर्यणादिः ततः परमिति समासः। तथा च क्षिप्रक्षुद्रयोर्यण आदी पकारदकारौ ततः परस्य रशब्दस्य लोपस्ताभ्यामेव च पूर्वस्येकारस्योकारस्य च गुण इत्यर्थः। तदित्थं गुणाः सर्वे इकि विश्रान्ताः। मृजेर्वृद्धावप्यच इत्यपकृष्यते। मृजेर्वृद्धिरचः,ततो ञ्णिति, अच इत्येव। न चैवममार्ट् इत्यत्राटोपि वृद्धिः स्यादिति वाच्यम्। लादेशेषु कृतेष्वडिति पक्षे परत्वाद् वृद्धौ सत्यामट्। तत्र कृते पुनर्वृद्धिर्न भवति। सकृत्प्रवृत्त्या चरितार्थत्वात्। यदा त्वसिद्धवत्सूत्रप्रत्याख्यानाय ल्लुङ्लिटिद्विलकारकनिर्देशमाश्रित्योपदेशे आर्द्धधातुकइत्यनयोरन्यतरदनुवर्त्त्य वा लावस्थायामेवाट् क्रियते। एरनेकाच इति विभज्येणो यणित्यनुवर्त्त्यानेकाचश्चेत्तर्हीण एवेति नियममाश्रित्याद्ध्यैयातामित्यादौ यण् वार्यते। तदा लावस्थायां यद्यपि वृद्धिर्न भवति। लकाराणां ङित्त्वेन मृष्ट इत्यादाविव तन्निषेधात्। ततश्चान्तरङ्गत्वादडागम एव। तथाप्यन्त्याभावेन्त्यसदेशस्येति परिभाषामाश्रित्याटो वृद्धिर्निवर्तनीया। परिभाषाप्रत्याख्यानपक्षे त्वङ्गाक्षिप्तेन प्रत्ययेनाञ्जिवशेष्यते येन नाव्यवधानन्यायाच्च सिद्धममार्ट्इत्यादि रूपम्। सिचि वृद्धावपि विधेयायां नास्तीक्परिभाषाया उपयोगः व्यावर्त्याभावात्। न चाचिकीर्षीदित्यकारो व्यावर्त्यः। ण्यल्लोपाविय-ङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धमिति वचनादल्लोपेनैव सिद्धत्वात्। अन्यथा चिकीर्षक इति न स्याच्चिकीर्षायक इति

च प्रसज्येत। आकारस्य तु नास्ति विशेषः सगिड्भ्यां बाधश्चेत्युक्तम्। एजन्तमपि न सम्भवति, आत्वविधानात्। उदवोढामित्यादौ तु ढलोपस्यासिद्धता। रैनौग्लौशब्दानामाचारक्विबन्तानां सत्यामसत्यां वा वृद्धौ न कश्चिद्विशेषः। गोशब्दात्क्विप्यगवीदित्यत्रापि नातिप्रसङ्गः। ऋत इद्धातोरित्यतोनुवृत्तेन धातुग्रहणेन सिजाक्षिप्तस्य धातोर्विशेषणे सति धातुरेव यो धातुर्न तु कथं चित्प्रातिपदिकमिति व्याख्यानादिति कैयटादयः। नन्वेवं कवेः अकवार्यीत्, विधोः अविधावीत्, पितुः अपितारीत्। अन्तरङ्गमपि गुणं सिचि वृद्धिर्बाधतइति वदन्माधवो विरुध्येत। सत्यम्। यद्यविरोधः सम्पादनीय इत्याग्रहस्तर्हीत्थं वर्णनीयम्। धातोरितिवदोत इत्यप्यनुवर्त्तते। तच्च वाक्यभेदेन सम्बध्यमानं नियमार्थं सम्पद्यते। ओदन्तस्य धातोश्चेद्वृद्धिस्तर्हि धातोरेव धातोर्न तु नामधातोरिति। यद्वा। नेटीत्यत्र नेति योगं विभज्य मण्डूकप्लुत्या सम्बन्धानुवृत्त्या वा गोत इत्यनुवर्त्यौकारान्तस्य धातो वृद्धिर्निषिध्यते। अथवा बहुलं छन्दसीत्यतो बहुलमित्यनुवर्त्य सिचि वृद्धिर्नामधातावित्यन्तस्य भवति न त्वोदन्तस्येति कथं चित्समाधेयम्। व्यञ्जनेष्वन्तरतमपरिभाषाबलेनैवानुनासिकपरसवर्णयोरिवातिप्रसङ्ग उद्भृत एव। अभ्युपेत्य तु ब्रूमः। नाप्राप्तायां सिचि वृद्धावारभ्यमाणा हलन्तलक्षणा वृद्धिर्बाधिका भविष्यति। नेटीति निषेधस्तु हलन्तस्य यावती वृद्धिः प्राप्ता सिचि वृद्धिरिति वा हलन्तस्येति वा तस्याः सर्वस्याः, न तु सूत्रविशेषप्रापितत्वे आग्रहः। तेनाकोषीदमोषीदित्यादौ द्विविधापि वृद्धिर्निषिध्यतइति सुस्थम्। तस्मान्निषेधसिद्ध्यर्थमिग्लक्षणतां सम्पादयितुं सूत्रमिति स्थितम्। स्यादेतत्। कृतः कृतवान् छिन्नश्छि-

नवानित्यादौ निषेधसिद्धये गुणग्रहणमस्तु। वृद्धिग्रहणं तु व्यर्थम्। न च मृष्टो मृष्टवानित्यादौ निषेधसिद्धिस्तत्फलम्। योगविभागेन सिद्धत्वात्। तथाहि। मृजेर्वृद्धिरित्यस्यानन्तरमजादौ क्ङिति वेत्येवं रूपं वचनमवश्यं कर्त्तव्यम्। मृजन्ति मार्जन्तीत्यादिसिद्ध्यर्थम्। एवं स्थिते अजादौ क्ङितीति योगो विभज्यते। नियमार्थं चेदम्। क्ङिति चेद्धवत्यजादावेवेति तेन मृष्टो मृष्टवानित्यादि सिद्धम्। ततोजादावपि विकल्पेनेत्येतदर्थं वेति द्वितीयो योग इति। तस्माद्वृद्धिग्रहणस्य फलं दुरुपपादमिति। अत्राहुः। णू स्तुतौ धू विधूनने कुटादिषु पठ्येते। ताभ्यां लुङि अनुवीदधुवीदितीष्यते तत्र सिचि वृद्धेः क्ङितीति निषेधाप्राप्तलक्षणतां सम्पादयितुमिह वृद्धिग्रहणमिति। नन्विहान्तभूतसिज्मात्रोपक्षत्वादन्तरङ्गे उवङि कृते हलन्तत्वान्नेटीति निषेधः सिद्ध इति चेत्। न। सिच्यन्तरङ्गं नास्तीति सिद्धान्तादुवङः प्रागेव वृद्धिप्रसङ्गात्। स्यादेतत्। अन्तरङ्गं बलीय इति तावदचः परस्मिन्निति सूत्रे स्थापयिष्यते। तदविशेषात्सिच्यप्यस्तु। न चैवमचैषीदहैषीदित्यादौ गुणः स्यादिति वाच्यम्। तस्यैव वृद्धिसम्भवेनेष्टापत्तेः। नहीदानीं विधाविग्रहणमस्ति। येनैकारस्य वृद्धिर्न लभ्येत। न चैवमप्यस्तौषीदित्यादावन्तरङ्गत्वाद् गुणे कृते ओतो नेति व्याख्यानपक्षे वृद्ध्यसम्भवः, बहुलग्रहणादनिगन्तानां नेति पक्षे त्वचैषीदित्यादावपि दोष एवेति वाच्यम्। ओतो धातोरेव धातोर्न तु नामधातोरिति तृतीयपक्षाश्रयणेन सर्वसमाधानात्। अकार्षीदित्यादौ हलन्तलक्षणा वृद्धिरस्तु। अतारीदित्यादौ त्वन्तरङ्गत्वाद् गुणे हलन्तलक्षणायां वृद्धौ नेटीति प्रतिषिद्धायामतो हलादेरिति विकल्पं बाधित्वा ऽतोल्लान्तस्येति नित्या वृद्धिः। अलावीदित्यादाप्यन्तरङ्गत्वा-

द् गुणावादेशयोः कृतयोरतोल्लान्तस्येत्यत्र लोपोव्योरिति लोपेन वकारस्यापि व्याख्यानान्नित्या वृद्धिर्भविष्यति । मा भवानवीत् । अमवीदित्यत्रापि तर्हि नित्या वृद्धिः स्यादिति चेन्न । णिश्विग्रहणमपनीय तत्स्थाने अविमव्योः प्रक्षेपेण वृद्धिनिषेधात् । न त्वस्मिन्पक्षे णिश्विग्रहणमुपयुज्यते । औनयीदश्वयीदित्यत्रान्तरङ्गत्वाद् गुणायादेशयोः कृतयोर्यान्तानां नेत्येव निषेधसिद्धेः । नन्वेवमवेरिव मवेरपि नित्यं निषेध एव स्यात् । इष्यते तु विकल्पः । नैष दोषः । अतो ल्लान्तस्येत्यत्र वकारप्रश्लेषेण या नित्या वृद्धिः प्राप्ता सैवेहाविमव्योर्नेत्यनेन मवेर्निषिध्यते न त्वतोहलादेरित्येषापि । मध्येपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायात् । न चैवं जागर्त्तेरपि तथा प्रसङ्गः । तत्र बाध्यसामान्यचिन्तामाश्रित्य स्वविषये प्राप्तं सर्वं बाध्यतइति स्वीकारात् । यद्वा । अपवादे निषिद्धे उत्सर्गो न प्रवर्त्ततइति जागर्त्तावाश्रयणीयं मवतौ तु प्रवर्त्ततइति बाध्यसामान्यविशेषचिन्तयोर्बाधके निषिद्धे बाध्यस्य प्रवृत्यप्रवृत्योश्च लक्ष्यानुरोधेन व्यवस्थाया अनुपदमेव वक्ष्यमाणत्वात् । न चैवमगवीदित्यत्रापि नित्या वृद्धिःस्याद्वकारप्रश्लेषादिति वाच्यम् । सिचि वृद्धेरिवास्या अपि धातुग्रहणेन वारणात् । तस्मात्सिच्यन्तरङ्गाश्रयणेनैवानुवीदधुवीदित्यादेः सिद्धौ क्ङितीति प्रतिषेधस्यानपेक्षणाद्वृद्धिग्रहणं व्यर्थमेवेति । अत्रोच्यते । वकारप्रश्लेषे सति शवतिर्गतिकर्मा कम्बोजेषु विकारएवैनमार्या भाषन्तइति पस्पशायां भाष्यकारैरभ्युपगतस्य शव्धातोरपि नित्यवृद्धिप्रसङ्गः, तस्यापि प्रतिषेधे वा कथं णिश्विभ्यां निमानम् । गौरवप्रसङ्गात् । किञ्च । न वयं व्यसनितया सिच्यन्तरङ्गं नास्तीति ब्रूमः। किन्तु न्यायबलाज्ज्ञापकबलात्फलानुरोधाच्च।

तथाहि। येन नाप्राप्तिन्यायेनान्तरङ्गं वृद्ध्या बाध्यते। सत्यपि सम्भवे बाधनं भवतीत्यभ्युपगमात्। अन्यथा तक्रेण दधि न बाध्येत। श्नमकजादिभिश्च शप्प्रत्ययकप्रत्ययादयो न बाध्येरन्। देशभेदेनोभयसम्भवात्। न च मध्येपवादन्यायेनोवङ्वृद्ध्या बाध्येत न तु गुणोपीति वाच्यम्। बाध्यस्य भेदेन विवक्षायां ह्येतदेवं स्यात्। बाध्यस्य सामान्यचिन्तायां तु स्वविषये प्राप्तं स्वानपवादभूतं सर्वं बाध्यते, यथा ऽचिरइत्येतेन गुणदीर्घोत्वानि। अन्यथा तत्रापि मध्येपवादन्यायेन रेफो दीर्घोत्वे एव बाध्येत न तु गुणम्। तस्य परत्वात्। बाध्यस्य च क्व चिद्भेदेन चिन्ता क्व चित्सामान्यरूपेणेत्युभयमपि लक्ष्यानुरोधात्तत्रतत्राश्रीयते। णिश्विग्रहणं चात्र लिङ्गम्। अन्यथान्तरङ्गत्वाद् गुणायादेशयोः कृतयोर्यान्तानां नेति निषेधादेवौनयीदय्वयीदित्यादेः सिद्धौ किं णिश्विग्रहणेन। ज्ञापकान्तरमप्युक्तं भाष्ये। यच्च करोत्यकारग्रहणं लघोरिति कृतेपीति। अस्यायमाशयः। अतो हलादेरिति सूत्रे ऽद्ग्रहणस्य न तावत्सन्ध्यक्षरादिकं व्यावर्त्यम्। लघुग्रहणेनैव व्युदासात्। इदुदृतः परमवशिष्यन्ते अचेनीदकोषीदनर्तीदिति। तेप्यन्तरङ्गेण गुणेनापहृताश्चेत्तर्हि व्यर्थमद्ग्रहणं स्यात्। न चाकुटीदपुटीदित्यादावुकारव्युदासाय तदिति वाच्यम्। तत्राप्यन्तरङ्गेण गुणेन वृद्धिबाधे सति गुणे ङित्त्वान्निषिद्धेपि वृद्धेरप्रवृत्तेः। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य पुनरुन्मज्जनं भवतीति न्यायात्। अत एव नान्तः पादमिति पाठे पूर्वरूपनिषेधे सत्ययादयोपि न प्रवर्त्तन्ते। तेन सुजाते अश्वसूनृते इत्यादि च सिध्यतीति स्वीकृतं भाष्ये। नचैवमपवादाभावे पुनरुत्सर्गस्य स्थितिरिति निर्विषयं स्याद् वृक्षावित्यादौ नादिचीति पूर्वसवर्णे निषिद्धे वृद्धिश्च न प्रवर्तेतेति वाच्यम्। भिद्योद्ध्यौ

नदे, तौ सदित्यादि लिंगेनापवादे निषिद्धे उत्सर्गोपि न प्रवर्त्तेतइत्यस्यासार्वत्रिकत्वाभ्युपगमात् । तदेतत्तत्रतत्रोच्यते । नोत्सहते प्रतिषिद्धा सती बाधितुमिति । तथा च पक्षभेदाश्रयेणातो हलादेरित्यद्ग्रहणमपि ज्ञापकमिति स्थितम् ॥ फलमप्यस्ति । यदि हि सिच्यन्तरंगं स्यात्तर्हि चिनीप्रभृतिभ्यो यङ्लुगंतेभ्यःचिरिणोतिजिरिणोतिभ्यां च लुङि सिचि अचेचायीदनेनायीदचिरायीदाजिरायीदिति न स्यात् । गुणायादेशयोः कृतयोर्यान्तानां नेति प्रतिषेधप्रसंगात् । यदि तु बाध्यविशेषचिन्तायां मध्येपवादन्यायमाश्रित्य उवङेव बाध्यते न तु गुण इत्याश्रीयते तदाप्येतन्न सिद्ध्येदेव । तस्मात्सिचि सर्वमप्यंतरंगं नास्त्येवेति सिद्धान्तं साधयितुं बाध्यसामान्यचिंतैवाश्रयणीया । एतदर्थमेव हि भाष्ये ज्ञापकोपन्यासः कृतः । अन्यथा न्यायेनैव सिद्धेन्तरंगस्यापि बाधे किं ज्ञापकवर्णनेन । एवं स्थिते न्यनुवीत् न्यधुवीदित्यत्र क्ङितिचेति निषेध एवाश्रयणीयस्तथा चेग्लक्षणत्वसिद्धये वृद्धिग्रहणमपीह कर्त्तव्यमेवेति स्थितम् । एवं च सत्यसम्भवादपि वृद्ध्या सिच्यन्तरङ्गं सर्वं बाध्यते । यदि हि स्यात्तर्हि क्वापि सिचीगन्तमङ्गं न लभ्येतेत्यवधेयम् । तथा चेग्लक्षणत्वस्य निषेधप्रवृत्त्यर्थमावश्यकत्वे स्थिते तत्रतत्रात्सन्ध्यक्षरव्यञ्जनादिव्यावृत्तिरपीक्परिभाषयैव सिध्यतीति ज्ञापकवर्णनादिक्लेशोपि नाश्रयणीयः । न चैवं द्यौः पंथाः इमामित्यादावपीक्पदोपस्थितिवशादिकामेवौत्वमात्वमत्वं च स्यादिति वाच्यम् । गुणवृद्धिशब्दयोरनुवृत्तौ पुनर्गुणवृद्धिग्रहणसामर्थ्याद्धि शब्दव्यापारोप्याश्रीयते । गुणवृद्धी ये गुणवृद्धी न तु शब्दान्तरेण विहिते इत्यनुवृत्ताभ्यां विशेषणाद्वा । नन्वचश्चेति सूत्रे ह्रस्वादिग्रहणानुवृत्त्या संज्ञया विधाने पदोपस्थितिरिति स्थास्यति त-

त्सामर्थ्यादिव औत्पथिमध्यूभुक्षामात्यदादीनाम इत्यत्रेक्पदोपस्थानं न भविष्यति। यदि हि स्यात्तर्ह्यचश्चेत्यत्र संज्ञया विधानेतियत्नाश्रयणं व्यर्थं स्यादिति चेत्। न। दिवउदित्यादिष्वगुणवृद्धिसंज्ञकेष्वच्परिभाषानिवर्त्तनेन चरितार्थत्वात्। अष्टन आ विभक्तावित्यादाविको ऽसंभवेन तत्र चरितार्थत्वाच्च। तस्मात् द्यौः पन्था इममित्यादिसिद्धयइहापि संज्ञाविधाने नियमं संपादयितुं पुनर्गुणवृद्धिग्रहणमिति प्राञ्चः। ननु पन्था इत्यनुदाहरणम् इतोदिति सिद्धे आद्विधिसामर्थ्यादेवेक्पदस्यानुपस्थितेरिति चेन्न। ऋभुक्षिऋकारोकारयोरर्थे आद्विधिसम्भवात्। न चेकः सोश्चानन्तर्यविवक्षणाद्येन नाव्यवधानाश्रयणाच्च नैवमिति वाच्यम्। तथापि सम्बुद्ध्यर्थतया सामर्थ्योपक्षयात्। न चैवमित आदित्येव ब्रूयादिति वाच्यम्। ऋभुक्षणमिन्द्रमित्यस्यासिद्ध्यापत्तेः। आद्विधौ हि वा षपूर्वस्येति तत्सिद्धिरिति दिक्। यत्तु भाष्ये स इममित्युदाहृतं,तत्र स इमं मन्त्रमपश्यदिति ब्राह्मणवाक्यैकदेशानुकरणमात्रम्। उदाहरणं त्विममित्येव न तु स इत्यपि। तच्छब्दइकोसम्भवेनेक इति नियमस्याप्रवृत्तेरित्याहुः। वस्तुतस्तु स इत्यप्युदाहरणं साध्वेव। त्यदादीनाम इति विधिवाक्यम्। तत्र चेक इत्यस्योपस्थितौ द्वीदमोरेवात्वं स्यान्न त्वन्येषाम्। गणेन निर्देशस्तु संज्ञोपसर्जनव्यावृत्त्यर्थमुत्तरार्थं च स्यात्। तदोः सः साविति सत्वं हि त्यदादीनामेव तदोर्विधीयते। अत्रेदमवधेयम्। शब्दव्यापाराश्रयणानुरोधेनापि गुणवृद्धिग्रहणं मास्तु। इकस्तावित्येतावतैव सिद्धेः। वस्तुतस्तु तावित्यपि व्यर्थम्। इक इत्येव सूत्र्यताम्। सम्पूर्णं पूर्वसूत्रद्वयमनुवर्त्त्य वृद्धिरित्यादैचौ यत्र विधीयेते गुण इति चादेङौ तत्रेक इत्युपतिष्ठतइति व्याख्यानात्। व्याख्याने लिङ्गान्त्वितोदिती-

ङ्ग्रहणम् । अन्यथा तत्रापीक्पदोपस्थितावुक्तरीत्या येन नाव्यवधानन्यायाद्दकारोकारव्यावृत्तौ च सत्यां किं तेनेति । तदेतादिग्ग्रहणं किमर्थमिति भाष्येणेग्ग्रहणमात्सन्ध्यक्षरेत्यादिवार्तिकेन च सूच्यते । अन्यथा हि सूत्रं किमर्थमित्याद्येव ब्रूयात् । यत्तूत्तरार्थं गुणवृद्धिग्रहणं कर्त्तव्यमेवेत्याशयेनेग्ग्रहणमित्युक्तमिति भाष्याभिप्रायवर्णनम् । तन्न । पूर्वसूत्रानुवृत्त्यैव सिद्धावुत्तरार्थत्वस्यापि दुरुपपादत्वात् । समुदायापेक्षायां मण्डूकप्लुतेः सम्बन्धानुवृत्तेर्वा त्वयापि वाच्यत्वात् । इग्ग्रहणस्याप्युत्तरार्थतया तदंशेपि शङ्कानुत्थानाच्च । इक इति योगः किमर्थं विभज्यतइति प्रश्नबीजमिति चेत्तर्हि गुणवृद्ध्यंशेपि तस्याविशिष्टतया सूत्रं किमर्थमित्येव ब्रूयादिति दिक् । यत्तु प्रधानावयवद्वारा समुदायाक्षेपोयमिति,तदपि नातीव शब्दस्वरसानुगुणम् । तस्मादुक्त एवाशयः साधुः । न चैवङ्गुणवृद्ध्यधिकारे पुनर्गुणवृद्धिग्रहणसामर्थ्यादित्युत्तरग्रन्थासङ्गतिः । तस्य यथाश्रुताभिप्रायकत्वात् । ग्रहणपदस्यानुवृत्तिपरतया सम्पूर्णसूत्रद्वयानुवृत्तिपरतया सम्पूर्णसूत्रद्वयावृत्तिसामर्थ्यपरत्वाद्वेति दिक् । एवं चेक इति योगविभाग एव पूर्वपक्षसिद्धान्ताभ्यां समर्थ्यतइतीह पर्यवसितोर्थः । ततश्चानेनैकेन योगविभागेन सकलेष्टसिद्धौ मृजेर्वृद्धिरच, उरङि गुण, इत्यादि बहुतरयोगविभागाद्याश्रयणेनान्यथासिद्धिवर्णनं नादर्त्तव्यमिति स्थितम् । इयं च परिभाषालोन्त्यपरिभाषायाः शेषो वा शेषिभूता वा तया सह समुच्चिता वा वैकल्पिकी वा तदपवादो वा पूर्वविप्रतिषेधात्तद्बाधिका वा पदोपस्थापिका वेति सप्तपक्षाः सम्भाव्यन्ते यद्यपि, तथाप्याद्यानां षण्णां दुष्टत्वात्सप्तम एव सिद्धान्तितः । तथाहि । सार्वधातुकार्द्धधातुकयोरित्यत्र स्वस्वनिमित्त-

वशात्परिभाषाद्वयं सन्निहितम्। तत्राङ्गस्येति षष्ठी यदि पूर्वमेवान्त्यमलं नीता अङ्गान्त्यस्य गुण इति पश्चादिकाऽन्त्यो विशेष्यते तदेक्परिभाषा शेषभूता। यदि तु पूर्वमिकाङ्गस्य विशेषणात्तदन्तविधिरिगन्तस्याङ्गस्येति,ततः स च भवन्नलोन्त्यस्येति, तदा द्वितीयः पक्षः। तादिदं पक्षद्वयमपि षष्ठीतत्पुरुषं बहुव्रीहिं चाश्रित्य तच्छेषपक्षइति भाष्ये व्यवहृतम्। इह पक्षद्वयेपि मिदेर्गुण इत्यादौ दोषः। यो हि मिदेरन्त्यः नासाविक् यश्चेक् नासावन्त्यः तथा चावश्यम्परिभाषायां त्यक्तायां सत्यां विनिगमकाभावादुभयत्यागे सर्वादेशो गुणः स्यात्। तदुक्तं वार्त्तिककृता। वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधच्छिदशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसङ्गश्चानिगन्तस्येति। चकारो हेत्वर्थः। ततश्च सर्वादेशप्रसङ्गो हीति फलितम्। अथ मिद् इर्मिदिः तस्य मिदेरित्यादिपूर्वोक्तरीत्या कथं चिदिह सर्वत्रेक एव स्थानित्वं लभ्येत तथापि भिन्नमित्यादावनिग्लक्षणत्वाद् गुणनिषेधो न स्यात्। अथ क्नोः कित्त्वाज्ज्ञापकादनिग्लक्षणत्वेपि निषेधस्तर्हि लैगवायनः पौरोहित्यमित्यादावतिप्रसङ्गः। अथ लक्ष्यानुरोधाल्लघूपधगुणमात्रविषयकं ज्ञापकं तर्हि पदोपस्थितिपक्षएव लक्ष्यासिद्धये समाश्रीयताम्। एवं हि ज्ञापकाश्रयणक्लेशोपि न भवति। किन्त्वेनापि पदोस्थितिरेव ज्ञाप्यताम्। एवं हि ज्ञापकमूलकं वाक्यान्तरं न कल्प्यमिति लाघवम्। अस्तु तर्हि तृतीयः पक्षः मिदेरन्त्यस्येकश्च द्वयोरपि गुण इति। मैवम्। स्थानेयोगावयवसम्बन्धरूपस्यार्थद्वयस्य युगपदुच्चारितया षष्ठ्या दुर्लभत्वात्। स्थानेयोगं च विनालोन्त्यविध्यलाभात्। स्थानषष्ठी हि तदुपस्थितौ लिङ्गमिति वक्ष्यते। इक इत्यनेन सहावयवषष्ठीं विनान्वयायोगात्। आवृत्त्यादौ प्रमाणाभा-

वाच्च। एतेन मिदेरन्त्यस्य वेको वेति चतुर्थपक्षोपि प्रत्युक्तः। विकल्पस्याष्टदोषग्रस्तत्वाच्च। अस्तु तर्हि तदपवाद इति पञ्चमः पक्षः। तथाहि। गुणविधावङ्गस्येति न स्थानषष्ठी। किन्तु इगपेक्षयावयवषष्ठी। ततश्च लिङ्गाभावादलोन्त्यपरिभाषाया अनुपस्थितिः। अयमेव च बाधपदार्थः। यदीक्परिभाषा न भवेत्तर्हि स्थानषष्ठीत्वं तन्मूलकालोन्त्यपरिभाषोपस्थितिश्च स्यात्। सत्यान्त्विक्परिभाषायां तदुभयं नेत्येतावतैवापवादत्वव्यवहारः। न हि वस्तुतो वचनेन प्रापितस्य बाधः सम्भवति। शास्त्राप्रामाण्यप्रसङ्गात्। अत एव शास्त्रतात्पर्यसङ्कोचो बाध इत्याहुः। एतेन द्वंद्वापवाद एकशेष इत्यपि व्याख्यातम्। नत्यनुत्पन्नायां विभक्तौ द्वंद्वस्य प्रसङ्गः। किन्तु यद्येकशेषो न भवेत्तर्हि प्रत्येकं विभक्तिर्द्वंद्वश्च स्यात्सति त्वेकशेषे तन्नेत्येव तत्त्वम्। अस्मिंश्च पक्षे जुसि गुणो अजुहवुरित्यत्रेवानेनिजुः पर्यवेविषुरित्यादावपि स्यात्। सार्वधातुकार्द्धधातुकयोरिति गुणो भवतीत्यादाविवेहितेत्यत्रापि स्यात्। तथा च वार्त्तिकम्। इङ्मात्रस्येति चेज्जुसि सार्वधातुकार्धधातुकह्रस्वाद्यो गुणेष्वनन्त्यप्रतिषेध इति। अत्र ह्रस्वादीति ह्रस्वस्य गुणः जुसि च ऋतोङि सर्वनामस्थानयोर्घेर्ङितीति गुणचतुष्टयं गृह्यते। ततश्च हे अग्ने अग्नयः कर्त्तरि अग्नये। बाभ्रव्य इत्यत्र यथा ओर्गुणान्तं गुणपञ्चकं भवति। एवं हे अग्निचित् अग्निचितः सन्ति सुकृति अग्निचिते सौश्रुत इत्यत्रापि स्यादिति वार्त्तिकार्थः। यद्यपीह निर्दिष्टस्थानिकत्वात्परिभाषा दुर्लभा। अग्निचिच्छब्दस्य घिसंज्ञाभावाच्च घेर्ङितीत्येतन्न प्राप्नोति तथापि वार्त्तिकस्योक्तिसम्भवमित्थं वर्णयन्ति। ह्रस्वस्य गुणो जसिचेति सूत्रयोस्तावद्ह्रस्वेनेग्विशेष्यते। दीर्घव्याद्वृत्तिश्च फलम्। अ-

थानियमे नियमकारिणी परिभाषा कथमिहोपतिष्ठताम् । न हि ह्रस्वस्य स्थानित्वे ऽतिप्रसङ्गोस्ति । अकारस्य त्यकार एव गुणो भविष्यतीति ब्रूयात् । तत्रेदं वक्तव्यम् । ह्रस्वान्तस्याङ्गस्येको गुण इति सूत्रार्थः स्यात् । ततश्च हे इन्द्र हे उपगो इत्यादावनन्त्यस्यापि स्यात् । अग्निचिदित्यादिकं तु विशेषणव्यवच्छेद्यं स्यात् । तथा च ह्रस्वस्येक इत्यनयोर्न परस्परं विशेषणविशेष्यभावः । किन्त्वनयोरेकमङ्गस्य विशेषणमपरमङ्गस्य विशेष्यमिति । यद्वा । ह्रस्वस्येत्येतदङ्गस्य विशेषणं मा भूदित्यङ्गस्य स्थानषष्ठीत्वं बाधितुमनन्त्यस्यापि गुणं सम्पादयितुमिक्परिभाषोपतिष्ठेत । एवमृत ओरित्युभयत्राप्यनन्त्यस्य गुणविधानार्थं परिभाषा स्यादेव । घिसंज्ञा तु वर्णयोरेव न तु तदन्तस्येति पक्षं गृहीत्वा घेर्ङितीत्यस्य अग्निचित इत्यादावतिप्रसङ्गो योज्यः । नत्यस्मिन्पक्षे ऋत ओरित्याभ्यां घेः किञ्चिद्वैलक्षण्यमस्तीति दिक् । नन्वस्मिन्पक्षे पुगन्तेति सूत्रस्य नियमार्थत्वादीहितेत्यादौ न दोष इति चेन्न । यदि हि सार्वधातुकार्द्धधातुकयोर्लघूपधस्यैवेति नियमस्तार्हि ह्रस्वाद्यो र्गुणे दोषस्तदवस्थः । यदि तु लघूपधस्य सार्वधातुकार्द्धधातुकयोरेवेति नियमस्तथापीहितेत्यादौ दोष एव । अथावृत्त्या द्विविधोपि नियमस्तर्त्यनेनिजुरित्यत्र दोषः । न चैतन्नियमद्वयेनापि वारयितुं शक्यम् । लघूपधत्वात्सार्वधातुकपरत्वाच्च । हे बुद्धे बुद्धयः पिचवे हितः पिचव्य उगवादिभ्यो यत् । बुद्धये वृद्धयइत्यादावनुपधाभूतेष्वतिप्रसङ्गस्तु दुर्वार एवेति तावद्वार्त्तिकत्द्वयम् । वस्तुतस्त्वङ्गाक्षिप्तेन प्रत्ययेन श्रूयमाणेन च जुसादिना इको विशेषणात्सकलदोषनिरासे सति तदपवादपक्षोपि समर्थयितुं शक्यतएव । अङ्गमेव प्रत्ययेन विशेष्यतइति गृहीत्वा परं भा-

ष्यवार्त्तिकग्रन्थप्रवृत्तिरित्यवधेयम् । अस्तु तर्हि पूर्वविप्रतिषेध इति क्रोष्ट्रीयसम्मतः षष्ठः पक्ष इति चेन्न । इक्परिभाषाया निरवकाशत्वात् । नहि परस्परपरिहारेणावकाशलाभे ऽसति विप्रतिषेधः । तस्माद्यदि सत्यपि सम्भवे बाधनं भवतीत्याश्रीयते तर्हि येन नाप्राप्तिन्यायादपवादत्वमस्त्येव । यदि त्वसम्भवे बाध्यबाधकभावो, ऽस्ति चेह सम्भवो यदुभयं स्यादित्याश्रीयते तर्हि तच्छेषादिष्वन्यतमपर्यवसानं न तु क्रोष्ट्रीयमतस्यावकाश इति स्थितम् । तस्मात्पदोपस्थापनमिति सप्तमः पक्षः सिद्धान्तसम्मतः । तथाहि । इक इति षष्ठ्यन्तानुकरणम् । न तु संज्ञिपरम् । स्वरूपमिति वचनात् । न चाशब्दसंज्ञेति निषेधः, षष्ठ्यन्तस्यासंज्ञात्वात् । तदयमर्थः । यत्र ब्रूयाद् गुणो भवति वृद्धिर्भवतीति तत्रेक इति षष्ठ्यन्तमुपतिष्ठतइति । तस्य च पदैकवाक्यतयान्वयोन्तरङ्गोलोन्त्यपरिभाषा तु विधिवाक्येष्ववान्तरवाक्यार्थं बुध्वा तदेकवाक्यतया सम्बध्यतइति तदन्वयो बहिरङ्गः । ततश्च जुसिचेत्यादाविकोङ्गस्येति सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वादिकाङ्गे विशेषिते स्थानषष्ठी न विहितेति भवत्येवालोन्त्यपरिभाषोपस्थितिः । मिदेर्गुण इत्यादौ तु सामानाधिकरण्यान्वयस्यासम्भवान्मिदेरिक इति वैयधिकरण्येनान्वये सति स्थानषष्ठीविरहादलोन्त्यपरिभाषा नोपतिष्ठते । न च मिदेरङ्गस्येत्यनयोरवयवषष्ठीत्वेपीक इति स्थानषष्ठ्यस्त्येवेति वाच्यम् । न ह्येषा ऽलोन्त्यपरिभाषोपस्थितावुपयुज्यते । अल्समुदायात्मकस्थानिनः परभूताया एव षष्ठ्यास्तदुपस्थापकत्वात् । इकश्चाल्रूपत्वात् । तथा चालोन्त्यपरिभाषा इक्परिभाषानन्तरोपस्थितिका न तु तया सह युगपदुपतिष्ठते येनाविशेषादुभयोर्निवृत्तिः स्यादि-

ति सकलेष्टसिद्धिः । तच्छेषतदपवादपक्षयोरपि दूषणमुद्धर्त्तुं शक्यमित्युक्तमेव । तदिह सप्तपक्षीमध्ये पक्षत्रयं दुष्टमेव । पक्षचतुष्टयन्तु साध्विति स्थितम् । नन्वेतत्सूत्रमंगस्येत्यादिवदधिकारार्थमेव किं न स्यादिति चेन्न । एवं हि सतीको गुणवृद्धी नेति नञा संयुज्यैव पठेत् । सर्वस्य द्वे पूर्वत्रासिद्धमित्यादिवत् । न ह्युत्तरसूत्रोपस्थितिकत्वाविशेषे किं चित्संयुज्य किं चित्तु विभज्य पठितुमुचितम् । वैरूप्ये हेत्वभावात् । प्रत्ययः परश्चेत्यादौ तु पाराध्यर्याविशेषेप्यसंयुज्य निर्देशो विधेयभेदान्न विरुध्यते । नापीदं विधिसूत्रम् । पुनर्गुणवृद्धिग्रहणसामर्थ्यात् । तत्प्रत्याख्यानपक्षेपि विशिष्टानुवृत्तिसामर्थ्यादिति दिक् ॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमान्हिकम् ॥

न धातुलोप आर्द्धधातुके ॥ धात्वंशलोपनिमित्ते आर्द्धधातुके परे तन्निमित्तिके गुणवृद्धी इको न स्तः । लोलुवः पोपुवः मरीमृजः । लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि कृते यङोचि चेति यङ्लुकि लुङ्निमित्तभूतमचमेवाश्रित्य प्राप्ते गुणवृद्धी निषिध्येते । यद्यपि कृत्स्नस्य धातोरपि क्व चिल्लोपोस्ति । तद्यथा, दुरीणो लोपश्च । दुःशब्दे उपपदइणो धातो रक् प्रत्ययो भवति धातोश्च लोपः । दुःखेन ईयते प्राप्यते दूरामिति । तथाप्येवंविधे विषये गुणवृद्ध्योः प्राप्तिविरहान्निषेधवैयर्थ्यम् । अतोत्र धातुशब्देन तदेकदेशो लक्ष्यते । धातुलोप इति च यदि षष्ठीतत्पुरुषः स्यात्तदार्द्धधातुकग्रहणं लोपविशेषणं वा गुणवृद्ध्योर्विशेषणं वा तन्त्रावृत्त्यादिभिरुभयविशेषणं वेति त्रयः कल्पाः । तत्राद्ये पक्षे आर्द्धधातुकनिमित्तके धातुलोपे सति य-

तिंकचिन्निमित्तिके गुणवृद्धी न भवत इति सूत्रार्थः स्यात्। ततश्च प्पूर्वादिन्धेः क्तप्रत्यये तन्निमित्तके नलोपे च सति प्रेद्ध इत्यत्र प्राप्नुवन्नाद्गुणोपि निषिध्येत । यो हि द्वयोः षष्ठीनिर्दिष्टयोः स्थाने भवति लभते ऽसावन्यतरतो व्यपदेशमितीक्स्थानिकत्वस्यापि सत्त्वात्। न चैवमपीग्लक्षणत्वविरहान्न निषेधः लैगवायने ओर्गुणस्येवेति वाच्यम् । नह्यस्मिन्सूत्रे इक इत्यस्य स्वरूपपरतायां प्रमाणमस्त्युत्तरसूत्रे तु चकार इतिशब्दार्थकः प्रमाणमित्याहुः । अस्तु वार्थाधिकाराश्रयणबलेनेहापीक इति स्वरूपपरंतथापि भेद्यनइत्यादौ गुणो न स्यादिति तृतीयपक्षे वक्ष्यमाणो दोष आद्यपक्षद्वयेप्यस्त्येवेति बोध्यम्। ननु उपेद्धः प्रेद्ध इत्युदाहरणस्येहोक्तिसम्भव एव नास्ति। तथाहि। पूर्वं धातुः साधनेन युज्यतइति मते इद्धमित्यत्र नलोपोन्तरङ्गः प्रथमोपनतक्तप्रत्ययापेक्षत्वात्। पूर्वं धातुरुपसर्गेणेति दर्शने तु गुणोन्तरङ्ग उभयथापि गुणो भविष्यति । बहिरङ्गस्य गुणस्यासिद्धतया निषेधायोगात्। बहिरङ्गस्य निषेधस्यासिद्धौ गुणप्रवृत्तेर्निर्बाधत्वाच्च। सत्यम् । असिद्धं बहिरङ्गमन्तरङ्गइति परिभाषा नेह प्रवर्त्तते नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरिति निषेधात्।यत्रान्तरङ्गे बहिरङ्गे वाचोरानन्तर्यमाश्रीयते तत्रैषा परिभाषेति व्याख्यानादिति हरदत्तानुयायिनः । किं त्वस्मिन्पक्षएत ऐ इति सूत्रे पचावेदं पचामेदमित्यादौ एत ऐत्वं कुतो नेत्याशंक्य बहिरङ्गत्वेन गुणस्यासिद्धत्वादिति हरदत्तेन वक्ष्यमाणं विरुध्यते। तथा च बहिरङ्गस्यासिद्धताबलेन प्रेद्धमित्यादिसिद्धिरिति प्रतिपादनपरमिहत्यं भाष्यमपि विरुध्येत। तस्माद्यत्रोत्तरकालप्रवृत्तिके अच आनन्तर्ये तत्र बहिरङ्गपरिभाषा न स्यादिति कैयटसम्मत एव नाजानन्तर्ये इत्यस्यार्थः साधुः पचावेदमित्यादौ

यं क्रियया सह यत्र नञिति । अत एव पुरुषवचनयोरसंकरः ।
अन्यथा हि घटो नास्ति त्वं नासि अहं नास्मीति पुरुषव्यवस्था न स्यात् । घटाभावस्त्वदभावो मदभावश्चास्तीतिवत्सर्वत्र प्रथमपुरुषापत्तेः। न हि परमते त्वं नासि त्वदभावोस्तीत्यनयोरर्थे कश्चिद्विशेषः। नञर्थं प्रति प्रथमान्तपदोपस्थापितस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संसर्गेण प्रकारताभ्युपगमेपि युष्मत्सामानाधिकरण्यविरहस्याविशिष्टत्वात्। एवं वायौ रूपाणामभावो ऽस्तीतिवद्रूपाणि न संतीत्यत्राप्यस्तीत्येकवचनं स्यादित्यन्यत्र विस्तरः । एवं कारकविभक्तेरपि क्रियायोगे सत्येव साधुत्वं न त्वन्यथापीति कारकइति सूत्रे वक्ष्यमाणत्वाद्भूतले घटो नास्तीत्यादावधिकरणत्वं क्रियान्वय्येव न तु नञर्थान्वयि । तथा च सकलकारकविशिष्टक्रियायां नञर्थान्वयः । नञो द्योतकतेति निष्कृष्टपक्षे तु क्रियापदस्यैव तद्विरहपरतेति सिद्धान्तः। उभयथापीह गुणवृद्ध्योः प्रतिषेधो दुर्लभ एवेति । अत्राहुः । क्रिययैव सह विधेरिव निषेधस्यान्वयः शाब्द इति सत्यमेव किन्तु क्रियैव केति संशये त्वदुक्तरीत्या सन्निहितापीक्पदोपस्थितिरिह न सम्बध्यते । तथाहि सति दीधीवेवीटामिति सूत्रस्य व्यर्थतापत्तेः । न हि तत्रेक्परिभाषालोत्यपरिभाषयोः फले विशेषोस्ति । एवं स्थिते ऽस्तिर्भवन्तीपरो ऽप्रयुज्यमानोप्यस्तीति प्रातिपदिकार्थसूत्रे वक्ष्यमाणरीत्या भवत इत्यस्योपस्थितस्य गुणवृद्धी इत्यादिभिरन्वितस्य निषेधान्वये सति गुणवृद्ध्योरभावः फलितो भवतीत्येतावता गुणवृद्ध्योर्निषेध इत्युच्यते । यथा ऽऽघाराग्निहोत्राधिकरणे प्रतीतितः सर्वोपि विशिष्टाविधिरेव तात्पर्यतस्तु कश्चिद् गुणविधिरिति सिद्धान्तितं तद्वन्निषेधेपि बोध्यम् । न्यायसाम्यात् । अत

एव हि विधिनिषेधयोर्वाक्यार्थगोचरतेत्याभियुक्ताः। तस्माल्लोलुवः पोपुवो मरीमृज इत्युदाहरणं सिद्धम्। प्रत्युदाहरणं तूच्यते। धातुलोप इति किम्। आर्द्धधातुके विधिनिषेधाभ्यां षोडाशिग्रहणाग्रहणयोरिव गुणवृद्ध्योर्विकल्पो मा भूत्। आर्द्धधातुकइति किम्। तुर्वी थुर्वी दुर्वी धुर्वी हिंसायां मुर्छा मोहसमुच्छ्राययोः एभ्यो यङ्लुगन्तेभ्यस्तिबादौ सार्वधातुके पिति परे तोतोर्त्ति मोमोर्त्तीत्यादौ निषेधो मा भूत्। राल्लोप इति च्छ्वोर्लोपस्य गुणस्य चैकनिमित्तकत्वात्। इदं च राल्लोपे क्ङिद्ग्रहणाननुवृत्तिपक्षमाश्रित्योक्तम्। तदनुवृत्तिपक्षे तु तोतोर्मीत्याद्युत्तमपुरुषैकवचनउदाहरणं बोध्यम्। अनुनासिकादिप्रत्ययत्वेन तत्र राल्लोपप्रवृत्तेः। ननु तोतोर्तीत्यादि प्रागुक्तमप्युदाहरणमस्तु। राल्लोपस्याप्रवृत्तावपि लोपो व्योरिति लोपादिति चेन्न। तस्य वर्णमात्रनिमित्तकतया गुणेन सहैकनिमित्तकत्वाभावात्। न हि तत्र प्रत्ययग्रहणन्तदाक्षेपकं वा किञ्चिदस्ति। अत एव गौधेरादिषु प्रत्ययपरतां विनापि यलोप इति दिक्। इक इति किम्। अभाजि रागः, भञ्जेश्च चिणि घञि च भावकरणयोरित्युपधालोपे कृते वृद्धिर्यथा स्यात्। कथं तर्हि पापचक इत्यत्र वृद्धिप्रतिषेध इति चेत्। शृणु। पापच्यतेर्ण्वुलि यस्य हल इत्यत्राहर्यादिमव्यादित्यादिवारणाय यस्येति संघातग्रहणेष्यादेः परस्येति हल्मात्रलोपे कृते ऽतो लोप इति पृथगल्लोपे तस्य स्थानिवद्भावेन पापचकादौ न वृद्धिः। न त्विह नधातुलोप इति सूत्रस्य कश्चिदपि व्यापारः। यङ्लुगन्ताण्ण्वुलि पापाचक इति भवत्येव वृद्धिर्नोनावेतिवत्। एतेन न धातुलोप इत्यत्रेक इत्यनुवृत्तेः पापाचक इतिवन्नधातुसूत्रे बेभिदिता मरीमृजितेत्युदाहरंश्च कौमुदीकारः परास्तः। पृथगल्लोपस्य न्याय्यत्वे भाष्यादिसम्मतत्वे

च सति वृद्धेरसम्भवात्। अत एव वृत्तिकारादयोप्यत्र सूत्रे ऽच्-प्रत्ययान्तान्येव लोलुवादीन्युदाजह्रुः। भिदिमृज्योस्तु यदि यङ्लुक् तर्हि तस्यानैमित्तिकत्वाद् गुणवृद्धी स्त एव। बेभेदिता मरीमार्जितेति यथा। यदि तु यस्य हल इत्यवयवलोपस्तर्हि स्थानिवद्भावादेव गुणाद्यप्रसङ्ग इत्युभयथापि नैतत्सूत्रोदाहरणत्वमित्यवधेयम्। भाष्यकारस्तु यस्येति लोपइवाचिलुक्यपि पृथगल्लोपमाश्रित्यैतत्सूत्रं प्रत्याचख्यौ। न च येन नाप्राप्तिन्यायेनाचि यङो लुगतोलोपं बाधेतेति वाच्यम्। यस्य हल इत्यत्र यस्येति योगं विभज्यातो लोप इति चानुवर्त्त्य यशब्दस्यातो लोपविधानेन लुग्बाधनात्। अवशिष्टं व्यञ्जनमात्रं लुकोवकाशः। ततश्चाल्लोपस्य स्थानिवत्त्वादेव बेभिदिता मरीमृजिता पापचक इत्यादिवल्लोलुवादयोपि सिध्यन्तीति किं सूत्रेण। न चैवं नोनावेत्यादावपि पृथगल्लोपापत्तिः। चकारानुकृष्टबहुलग्रहणाज्जायमानस्यानैमित्तिकस्य लुकोन्तरङ्गतया लकारोत्पत्तेः प्रागेव समुदाये प्रवृत्तेः। नन्वेवं चेक्रियः लोलुवः तोष्टुव इत्यादावल्लोपस्य स्थानिवत्त्वाद्यथा गुणो न, एवमियङुवङावपि न स्याताामिति चेत्। सत्यम्। अचमाश्रित्य न भवत एव। उक्तयुक्तेः। किन्तु स्थानिवद्भावलब्धमकारमाश्रित्य भविष्यतः। स हि यकारे लुप्ते प्रत्ययसंज्ञकः। स्यादेतत्। लोलुवादिष्वकारे लुप्ते यलुगिति क्रमः। तत्र यकारावस्थानकाले अकारेण प्रत्ययत्वं न लब्धमेव। लुप्तेपि तस्मिन्नकारो नास्त्येव। ततः प्रागेव लोपात्। सोयमसत्कथं प्रत्ययतां लभेत। तल्लोपस्य स्थानिवद्भावेन प्रत्ययत्वमिति चेत्। स्थानिनि दृष्टं हि कार्यं तद्वदतिदेशेन लभ्यते। न तु तत्रादृष्टमपि। अत्राहुः। तत्र सम्भावितमात्रमतिदिश्यते। यदि हि लोपस्य स्थानिभूतो

ऽकार इह लुप्तेपि यकारे तिष्ठेत्तार्हि प्रत्ययतां लभेतोवङादिकं च प्रवर्त्तयेदिति कथं नातिदेशः। वरेनिषेधश्चेह लिङ्गम्। स हि यातेर्यङन्ताद्वरच्यल्लोपयलोपयोः कृतयोः स्थानिवद्भावेनातो लोप इटि चेत्यालोपो मा भूदित्येतदर्थं क्रियते। स्थानिनि दृष्टस्यैवातिदेशे तु किन्तेन। न हि या या य इत्यस्यामवस्थायामातो लोपस्य प्राप्तिः। अनजादित्वादिति दिक्। नन्वेवं चेक्षियस्तोष्टुव इत्यत्रान्तरङ्गानपीति न्यायेनाकृतएवाकृत्सार्वधातुकयोरिति दीर्घे यङो लुक्। ततोल्लोपस्य स्थानिवद्भावे सत्यपि चेक्षिअअ तोष्टुअअ इति स्थान्यकारेण सह लघूपधमङ्गमच्प्रत्ययपरं जातमिति लघूपधगुणः स्यादेव। सत्यम्। अन्तरङ्गावियङुवङौ भविष्यतः। यथाह वार्त्तिककारः। शचङन्तस्यान्तरङ्गलक्षणत्वादिति। तथा च रि पि गतौ धि धारणइत्येषान्तुदादित्वाच्छे कृते रियति पियति धियतीति भवति। अशिश्रियत् प्रादुद्रुवत्प्रासुस्रुवदिति च णिश्रीति चङीयङुवङौ भवतः। तस्मात्पृथगल्लोपेनैव सकलनिर्वाहान्न धातुलोप इति सूत्रन्नारम्भणीयम्। न चैवं मरीमृज इत्यत्र मृजेरजादौ संक्रम इति पाक्षिकवृद्धिप्रसङ्गः। हरदत्तादिमते मुख्याजादावेव तत्प्रवृत्तेः, निष्कर्षे तु यथोत्तरं मुनीनाम्प्रामाण्यादिष्टापत्तेः। व्यवस्थितविभाषा वास्तु। अत्र वदन्ति। गुणोपधालोपयुटां न लोपाल्लोपयोरपि प्रसङ्गात्पृथगल्लोपो लुकि वक्तुं न शक्यते॥ तथाहि। सर्वत्र दीर्घान्तेषु ह्रस्वान्तेषु चेयङुवङोः कृतयोर्लघूपधलक्षणो गुणः प्राप्नोति। न चेह स्थानिवद्भावः। आदिष्टादचः पूर्वत्वात्। किञ्च जङ्गम इत्यत्र गमहनेत्युपधालोपः स्यात्। अथात्रानङीति प्रतिषेधस्तर्हि दरीदृश इत्यत्र ऋदृशोङीति गुणः स्यात्। अपि च देव्य इत्यत्र दीङोयुडचीति युट् स्यात्। किञ्च स-

हि पूर्वं गुणप्रवृत्तिः। तत्र चाजानन्तर्याश्रयणेपि गुणोत्तरप्रवृत्तिके एत ऐ इत्यत्र तदनाश्रयणाद्युक्त एव बहिरङ्गतयोद्धारः। उपेद्धः प्रेद्ध इत्यादौ तु गुणं प्रापय्य निषेधः कार्य इत्युत्तरकालप्रवृत्तिको निषेधः। तत्राजानन्तर्याश्रयणाभावाद्बहिरङ्गपरिभाषया सिद्धमेवैतत्। अतोत्रत्यं भाष्यमपि सङ्गच्छते। ननु षत्वतुकोरसिद्ध इति सूत्रएषा परिभाषा ज्ञापयिष्यते। तत्र च कोसिचत्कोस्येत्यादौ प्रथमप्रवृत्तिके एङः पदान्तादित्यस्मिन्नजानन्तर्यं न तूत्तरकालप्रवृत्ते षत्वेपीति कथं कैयटमतं समर्थनीयम्। तस्माद्यत्रान्तरङ्गे बहिरंगे वा अचोरानंतर्यमिति हरदत्तोक्तरीतिरेव शरणीकर्त्तव्येति चेन्न। कैयटमते अचोरिति द्वित्वस्याविवक्षया सर्वसामञ्जस्यात्। अस्ति ह्युत्तरकालप्रवृत्तिके षत्वे अच आनन्तर्याश्रयणम्। इणः परस्य सस्येत्युक्तेः। एवं च प्रथमपक्षे प्रेद्ध इत्यादौ दोषाभावेपि भेद्यतइत्याद्यसिद्धिरेव दूषणमिति दिक्। द्वितीयपक्षे तु यत्किञ्चिन्निमित्तके धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात्। ततश्च क्नूयी शब्दे इत्यस्माण्णिचि पुकि यलोपे कृते पुगन्तलक्षणो गुणो निषिध्येत। तथा च क्नोपयतीति न सिध्येत्। यदि तु चेलेक्नोपेरिति निर्देशाद् गुणस्तर्हीहापि भेद्यतइत्यस्यासिद्धिरेव दोषः। तृतीयपक्षे त्वार्द्धधातुकनिमित्तके धातुलोपे सत्यार्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात्। तत्र तन्त्रावृत्त्याद्याश्रयणप्रयुक्तं गौरवं तावत्स्पष्टमेव। लोपेन सह गुणवृद्ध्योरेकनिमित्तकत्वं च न लभ्येत। ततश्च भेद्यतइत्यत्र भिदेर्ण्यन्तात्कर्मणि यकि भिद् इ य इति स्थिते नित्यत्वाण्णिलोपे कृते प्रत्ययलक्षणेन णिचमाश्रित्य क्रियमाणोपि गुणो निषिध्येत। न च णिलोपात्प्रागेवान्तरंगत्वाद् गुणोस्त्विति वाच्यम्। विभज्यान्वाख्यानपक्षे तदसम्भवात्।

उपसंजनिष्यमाणनिमित्तोप्यपवाद उपसंजातनिमित्तमप्युत्सर्ग बाधतइति न्यायाच्च । अन्यथा दधतीत्यादावन्तरंगत्वात् झोन्त इत्यन्तादेशः प्रवर्त्तेत । न च श्लौ द्वित्वे चैवंकृते अन्तादेशस्य स्थानिवद्भावेनादभ्यस्तादित्यस्य प्रवृत्तिरास्त्विति वाच्यम् । अल्विधौ स्थानिवद्भावासंभवात् । किञ्च । समर्थानां प्रथमाद्वेति सूत्रे ऽकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्त्तयन्तीति ज्ञापयितुं समर्थग्रहणमिति वक्ष्यते । द्वे एते परिभाषे समानफले इति च तत्रैव स्फुटीकरिष्यते।तथा चेहापि पूर्वं गुणो न क्रियेत कृतोपि वा निवर्त्तेत जग्मुष इत्यादाविडादिवत् । तस्माद्धातोर्लोपो यस्मिन्निति बहुव्रीहिरेव साधुः । एवं हि सति लोपस्य गुणवृद्ध्योश्चैकनिमित्तकत्वं लभ्यतइति न कश्चित्पूर्वोक्तदोषः । स्यादेतत् । आरभ्यमाणेष्वस्मिन्सूत्रे लोलुव इत्यादौ गुणो दुर्वारः।तथाहि।इह सूत्रे क्ङितिचेति सूत्रे च निषेध्यं किमित्याकांक्षायां पूर्वत्र निर्णीता इक्पदोपस्थितिरेव सम्बध्येत । धात्वंशलोपनिमित्ते आर्द्धधातुके इक्पदं नोपतिष्ठते । ततश्च बेभिदः मरीमृजो भिन्नो मृष्ट इत्यादौ व्यंजनस्य गुणवृद्धिप्राप्तिः परमेतस्य प्रघट्टकस्य फलं स्यात् । लोलुवादौ तु स्यादेव गुणः । न च परिभाषां प्रति शेषिभूततयार्थतः प्रधानयोर्गुणवृद्ध्योरेव निषेधोस्त्विति वाच्यम् । शाब्दबोधे शाब्दप्राधान्यस्यैवान्वयनियामकताया उचितत्वात् । नहि राजपुरुषमानयेत्यादावर्थतः प्रधानभूतोपि राजा आनयनेनान्वेति अपि तु पुरुषएव । प्रकृते च शाब्दं प्राधान्यं वाक्यार्थभूतायाः पदोपस्थितेरेव । कारकविशिष्टा क्रिया वाक्यार्थ इति सिद्धान्तात् । आह च । साकांक्षावयवं भेदे परानाकांक्षशब्दकम् । कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यतइति । किं च सिद्धान्ते प्रसज्यप्रतिषेधे सर्वत्र क्रिययैव सह नञोन्वयो नतु नामार्थेन । तदुक्तम् । प्रसज्यप्रतिषेधो-

नीस्रंसो दनीध्वंसः,अनिदितामित्युपधालोपः स्यात्। अपि च यायाः वावाः इत्यादिष्वाकारलोपः स्यात्। तस्मात्समुदायलुगेवैष्टव्यो लोलुवादिसिद्धये च सूत्रमारम्भणीयमिति। अत्रोच्यते। लोलुवादिषु गुणस्तावन्न भवति। स्थानिद्वारकस्यानादिष्टादचः पूर्वत्वस्य सत्वेन स्थानिवद्भावात्। अत एव हि न पदान्तेति सूत्रे सवर्णग्रहणं कृतम्। शिण्ढीत्यादावनुस्वारस्य स्थानिद्वारकमनादिष्टादचः पूर्वत्वमाश्रित्य तस्य सवर्णे कर्त्तव्ये श्नसोरल्लोपस्य स्थानिवद्भावो मा भूदिति। नन्वनादिष्टादचः पूर्वत्वस्य शास्त्रीयकार्यत्वाभावात्कथमतिदेश इति चेत्। अनादिष्टादचः पूर्वत्वापेक्षे ऽचः परस्मिन्नित्यतिदेशे कर्त्तव्ये स्थानिवदादेश इत्यस्य प्रवृत्तिसम्भवात्। सवर्णग्रहणव्याख्यावसरे सर्वैरित्थमेवोपपादितत्वाच्च। ननु योत्रादेश उवङ् सोनादिष्टादचः पूर्वतां स्थानिद्वारा कथञ्चिल्लभतां न तु तस्येह किञ्चित्कार्यं विधीयते येनाल्लोपः स्थानिवत्स्यात्। यस्य च कार्यं विधीयते उकारस्य नासावादेशः येन स्थानिद्वारापि पूर्वतां लभेत। सत्यम्। सर्वे सर्वपदादेशा इत्याश्रयणात्स्थान्यादेशिभावस्तावदर्थवति विश्रान्यति। अत एव एरुरित्यस्य तेस्तुरिति पर्यवसितार्थमाश्रित्य स्थानिवत्सूत्रेणैव सिद्धत्वादेकदेशविकृतस्योपसंख्यानं नारब्धव्यमिति वक्ष्यते। अत एव च स्थानिवदित्युक्तौ सम्बन्धिशब्दत्वादेवादेश इत्यस्य लाभे सिद्धे पुनरादेशग्रहणमानुमानिकस्याप्यादेशस्य परिग्रहार्थमिति वक्ष्यते। एवञ्चेहापि लोलू इत्यस्य लोलुव्इत्यादेशः, स चानादिष्टादचः पूर्वः स्थानिवद्भावात्। तस्य च लोलोव् इत्यादेशे कार्ये ऽल्लोपः स्थानिवदिति युक्तमेव। किञ्च। ज्ञाजनोर्जेति रीङ् ऋत इति च सूत्रे दीर्घोच्चारणेनाङ्गवृत्ते पुनर्वृत्तावविधिर्नीष्ठितस्येति परिभाषा ज्ञाप-

यिष्यते । तेनोवङि कृते गुणो न भविष्यति । दरीदृश इत्यत्र गुणो न भवति । प्रतिपदोक्तस्याङो ग्रहणात् । अदर्शादिति यथा। यङस्त्वकार उपदेशेवलायां न प्रत्ययः । किन्तु तदवयवः, यकारे लुप्ते तु नासौ ङकारविशिष्टो न वा श्रूयते । किन्तु तत्कैकगोचरत्वाल्लाक्षणिकवद्विलम्बितोपस्थितिकः । नन्वेवमनङीति पर्युदासेप्यस्याग्रहणाज्जङ्गम इत्यत्राल्लोपः स्यादिति चेन्न। अनङीति पर्युदासेनाङ्सदृशे औपदेशिकेअजादौ श्रूयमाणाजादौ वोपधालोपविधानात्। अर्थवानेवाङ्गुणविधौ गृत्व्यतइति तु न सम्यक्। विकरणानामनर्थकत्वात्। यत्तु देव्य इत्यत्र युट् स्यादिति । तन्न । अनुबन्धनिर्देशात् । तदुक्तम् । स्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकीति । दीङो युडचीति सूत्रे दीङ इत्यनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थ इति त्वयैवोक्तत्वाच्च । अत्र च ज्ञापकमेकाच उपदेशइति सूत्रे यङ्लुङ्निवृत्तिमुद्दिश्य क्रियमाणमेकाज्ग्रहणम्। न हि तस्मिन्कृतेप्युक्तपरिभाषां विना बेभेदितेत्यादि सिद्ध्यति। बिभेत्सतीत्यादिसिद्धये तन्त्रावृत्त्याद्याश्रयणेनोपदेशग्रहणस्योभयविशेषणतायाःसिद्धान्तयिष्यमाणत्वात्। न चैवमपि स्तिपाशपेत्याद्यंशान्तरे कथं ज्ञापकमिति वाच्यम् । एकदेशानुमतिद्वारा पूर्वाचार्यपठितपरिभाषाज्ञापनस्य गतिकारकोपपदानामित्यादौ बहुशो दृष्टत्वात् । न चैवमेकाच इति विधीयमाने द्वित्वमपि यङ्लुकि न स्यादिति वाच्यम् । गुणो यङ्लुकोरिति ज्ञापकेन तत्प्रवृत्तेः। यङ्लुकि बेभेदितेत्यादाविडागमे तूदाहृतपरिभाषैव शरणम्।द्विःप्रयोगो द्विवचनं षाष्ठमिति वक्ष्यमाणतया धात्वन्तरत्वस्य वक्तुमशक्यत्वात्,बेभेदितेति यङन्ते तु पृथगल्लोपाभ्युपगमात्तस्य च स्थानिवद्भावान्नेण्निषेधः । पूर्वस्मादपि विधौ स्थानिवद्भावस्य वक्ष्यमाणत्वात्। किञ्च । य-

स्येति लोपस्य त्वयाप्यवयवलोपत्वं स्वीकृतम् । तत्र यद्यपि देद्यक इत्यत्र युट् स्यादिति नापादनार्हम् । हलः परत्वाभावेनेह यलोपाप्रवृत्त्या देदीयक इति रूपाभ्युपगमात् । सनीस्रसक इत्यादौ नलोपोपि सर्वसम्मतत्वादेव नापाद्यः । यायायको वावायक इत्यादावाल्लोपोप्यनापाद्यः । यलोपविरहेणाजादिकङिदार्द्धधातुकपरत्वाभावात् । तथापि गमेर्यङन्ताण्ण्वुलि जङ्गमक इत्यत्राल्लोपस्य स्थानिवद्भावाद् वृद्ध्यभाव इवोपधालोपः स्यात् । अथात्रानङीति प्रतिषेधस्तर्हि दरीदृशक इत्यत्र ऋदृशोङीति गुणः स्यात् । अथ यदीहाङ्गवृत्तपरिभाषया संज्ञापूर्वको विधिरनित्य इति वा समाधीयते तर्हि यङ्लुक्यपि सनीस्रंस इत्यत्र नलोपो याया वावा इत्यल्लोपश्च न शंक्यः । समाधानस्य तुल्यत्वादिति दिक् ॥

कङिति च ॥ इक इतिशब्दमुच्चार्य विहिते गुणवृद्धी गितं कितं ङितञ्च निमित्ततयाश्रित्य ये प्राप्नुतस्ते न स्तः।गित्, जिष्णुः । ग्लाजिस्थश्चक्स्नुः । न चायं किदेवास्त्विति वाच्यम् । स्थास्नुरित्यत्र घुमास्थेतीत्वप्रसङ्गात् । न चैवं भूष्णुरित्यत्रेट्प्रसङ्गः । श्रुचकः कितीत्यत्रापि चर्त्वेन गकारप्रश्लेषमाश्रित्य तन्निषेधात् । न चैवं चर्त्वस्यासिद्धतया विसर्जनीयो न स्याद्रोरुत्वञ्च प्रवर्त्तेतेति वाच्यम् । न मुनइत्यत्र नेति योगविभागात्सौत्रत्वाद्वा । तथा च ग्लाजिस्थेति सूत्रे श्लोकवार्त्तिकम् । क्स्नोर्गित्वान्न स्थ ईकारः किन्ङितोरीत्वशासनात्।गुणाभावस्त्रिषु स्मार्यः श्रुचको ऽनिट्त्वं कगोरितोरिति । जयादित्योप्येवम् । वामनस्तु ग्लाजिस्थश्चेत्यत्र स्था आ इत्याकारं प्रश्लिष्य क्स्नुप्रत्ययान्तस्य तिष्ठतेराकार एव न त्वीत्वमिति व्याख्यानादेव स्थास्नोः सिद्धौ न क्वापि गकारप्रश्लेषः कार्य इत्याह । नन्वे-

तेन तन्मते दंशेच्छन्दस्युपसंख्यानमिति क्स्नौ दंक्ष्णवः पशव इत्यत्रानिदितामिति नलोपः स्यात् । सत्यम् । छान्दसत्वात्समाधेयः । कित् । चितं स्तुतं मृष्टम् । ङित् । चिनुतः सुनुतः मृष्टात् । निमित्तसप्तम्याश्रयणं किम् । व्यवहितेपि यथा स्यात् । छिन्नं भिन्नम् । इक इति किम् । कारयते । शब्दव्यापाराश्रयणं किम् । लैगवायनः । ओर्गुणो हीक एव प्रवर्त्तते न तत्रेक्पदोपस्थितिः । ओरितिनिर्दिष्टस्थानिकत्वात् । तदुक्तम् । तद्धितकाम्योरिक्प्रकरणादिति । ननु क्ङितीति सप्तमीनिर्देशात्तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठेत तत्र निःशब्दस्य नैरन्तर्यपरत्वादिशेश्चोच्चारणक्रियत्वादव्यवहितोच्चारितस्य निषेधः स्यान्न तु छिन्नं भिन्नमित्यादेरपीति चेत् । भवेदेवं यदि क्ङितीत्येतन्निषेध्यया क्रियया साक्षात्संबध्येत । इह तु गुणवृद्धिभ्यां सम्बध्यते । यस्य च भावेनेति सप्तमी क्रियान्तराश्रयणादौत्सर्गिकसत्ताक्षेपः ततश्च क्ङिति सति प्राप्ते ये गुणवृद्धी इति सम्बन्धे कृते सिद्धसाध्यसमभिव्याहारन्यायेनोपलक्षणीभूतसत्ताश्रयणस्य निमित्तत्वमुत्सर्गतः फलति नात्विह विशिष्यनिमित्ततायां सप्तमीविधानमस्ति । न चात्र निर्दिष्टपरिभाषा सम्भवति । विध्यङ्गभूतानां परिभाषाणां साक्षाद्विधेयनिषेध्यक्रियान्वयिन्येव प्रवृत्तेः । इदन्तु क्रियान्वयिनो विशेषणं न तु क्रियायाः । अतोत्र न परिभाषाप्रवृत्तिः । अन्यथा वृद्धिर्यस्याचामादिरित्यत्रेक्परिभाषोपस्थाने शालीयादिर्न सिध्येत् । न ह्यत्रेकः स्थाने वृद्धिः । अत एवोदीचामातः स्थानइति सूत्रे स्थानेग्रहणं कृतम् । आतः स्थाने यो ऽकार इत्यनूद्यमानस्य विशेषणे आत इत्यस्मिन्षष्ठीस्थानेयोगेति परिभाषाया अप्रवृत्तेः । गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायोप्यत्रानुसन्धेयः । ननु तर्ह्यनेनैव

न्यायेन क्ङितीत्येतत्प्रधानभूतक्रियया सम्बध्यतां न तु तच्छेषभूताभ्यां गुणवृद्धिभ्यां, प्रधानान्वयस्य सम्भवतस्त्यागायोगादिति चेन्न। यत्र हि गुणः कृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति तत्रात्मनोपि संस्कारमनुभूय प्रधानेन सम्बध्यते। यथा पानीयमेलादिसंस्कृतं पुरुषेण। उक्तञ्च। गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तथा भूयसि वर्त्तत इति॥ इह गुणवृद्ध्योः क्ङिद्ग्रहणेन विशेषितयोः प्रधानस्य महानुपकारो भवति। व्यवहितस्यापि प्रतिषेधेसिद्धेः क्रोः कित्करणञ्चात्र ज्ञापकम्। अन्यथा प्रधानेनैवान्वये निर्दिष्टपरिभाषायाश्चोपस्थितौ सत्यां व्यवहिते निषेधस्याप्रवृत्तौ व्यर्थमेव क्रोः कित्त्वं स्यात्तस्माद्यथाव्याख्यानमेव साधु। ननु न यदीयं परसप्तमी तार्हि शचङन्ते दोषः लघूपधलक्षणगुणप्राप्तेरिति चेन्न। अन्तरङ्गत्वादियङुवङ्प्रवृत्तेः। धि धारणे, रि पि गतौ, तुदादयः धियति रियति पियति। णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्। अशिश्रियत्, अदुद्रुवत्, असुस्रुवत्, इह तिपमाश्रित्य प्राप्तो गुणो बहिरङ्गः शचङाश्रयाावियङुवङावन्तरङ्गौ। तदुक्तम्। शचङन्तस्यान्तरङ्गलक्षणत्वादिति। मृजेरजादौ संक्रमे वृद्धिर्वेष्यतइति काशिकायाम्। इदञ्चेको गुणवृद्धीइति सूत्रप्रसङ्गाद्वैयाकरणान्तरमतत्वेनोक्तं भाष्ये। अस्यार्थः। संक्रामतो गुणवृद्धी अस्मादिति व्युत्पत्त्या गुणवृद्धिप्रतिषेधनिमित्तभूतः क्ङित्प्रत्ययोत्र संक्रमशब्देनोच्यते, योगरूढेस्तेन मरीमृज इत्यत्र धात्वंशलोपनिमित्ततया वृद्धिप्रतिषेधहेतावप्यच्प्रत्यये नासौ विकल्पः प्रवर्त्ततइत्यवधेयम्। अत एव क्ङित्यचि वेति वचनं तत्र भाष्ये कृतम्। मृजन्ति। मार्जन्ति। अत्र हरदत्तः। अचीत्युच्यमानेपि यस्मिन्विधिस्तदादावल्ग्रहणइति सिद्धे आदिग्रहणं मुख्याजादिग्रहणार्थम्।

व्यपदेशिवद्भावेनाजादौ यूयं ममृज, त्वया ममृजइत्यादौ न भवतीति । तच्चिन्त्यम् । मुख्याजादिपरिग्रहे प्रमाणाभावात् । न हि भाष्ये आदिग्रहणं कृतं येन त्वदुक्तार्थो लभ्येत, किन्तु कृङित्यचि वेति वचनं पठितम् । यत्तु ततः प्रागुक्तं भाष्ये "इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्त" इति । तत्तु तदादिपरिभाषाबललब्धकाक्यार्थानुवादमात्रं न तु परकीयविधिवाक्यशरीरमिदं येन त्वदुक्तमर्थं ज्ञापयेत् । अत एवात्रेयो मृजेति भिदादिपाठादङ् गणपाठादेव वृद्ध्यभाव इत्याह । अत एव रक्षितेनापि धातुप्रदीपे तुन्दपरिमृजस्तुन्दपरिमार्ज इत्युभयं दर्शितम् । दुर्घटवृत्तौ तु तुन्दपरिमृज इत्यत्र व्यवस्थितविभाषया वृद्धिर्नेत्युक्तम् । अत एव धातुवृत्तिषु यूयं ममृज ममार्जेति रूपद्वयमुदात्तदतम् । यत्तु मुख्याजादिग्रहणवादिनोपि मते ऽत्र वृद्धिविकल्पो दुर्वार एव । तथाहि । मध्यमपुरुषबहुवचनस्य थस्य परस्मैपदानामिति सूत्रेण विधीयमानो ऽकारादेशो ऽलोन्त्यस्य प्राप्नोति । न चैवं विधिवैयर्थ्यम् । णलादीनां यथासंख्यसम्पादनेन चरितार्थत्वादित्याशङ्क्य भाष्यएव द्वेधा समाधास्यति । अकारद्वयात्मकोयमनेकाल्त्वात्सर्वादेशः । यद्वा धातोरित्यधिकारादादेः परस्येति थकारमात्रस्याकार इति तत्र पक्षद्वयेप्यतो गुण इति पररूपस्याचःपरस्मिन्निति स्थानिवद्भावान्मुख्याजादित्वमप्यस्त्येवेति कौश्चिद्धरदत्तामिश्रमते दूषणमुक्तम् । तन्न । आद्यन्तवदित्यतिदेशइव स्थानिवद्भावेपि मुख्यत्वाभावस्य सुवचत्वादिति दिक् । स्यादेतत् । अचिनोदमार्ट् इत्यादौ स्थानिवद्भावेन तिपो ङित्त्वात् कृङितिचेति गुणवृद्धिनिषेधः स्यात् । न चाल्विधित्वात्स्थानिवद्भावासम्भवः । अनुबन्धकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः । अन्यथा ऽचिनवममार्जमि-

त्यादावपित्त्वेन सार्वधातुकमपिदिति ङित्त्वापत्तेः । इह च ज्ञापकं नल्यपीति सूत्रम् । अन्यथा ल्यपः किित्त्वाभावादेवेत्वाप्राप्तौ किन्तन्निषेधार्थेन सूत्रेण । यतु सेर्ह्यपिच्चेत्यपिद्वचनं ज्ञापकमिति । तन्न । शृणीहि विश्वतः प्रतीत्यादौ स्थानेन्तरतमपरिभाषया पित्त्वादनुदात्तस्य सिपः स्थाने ऽनुदात्तस्यैव हेः प्राप्तावुदात्तसम्पादनेन चरितार्थत्वात् । अपित्त्वसामर्थ्याद्धि तत्रान्तरतमपरिभाषा बाध्यते । प्रतिपत्तिलाघवार्थमुदात्त इति वक्तव्ये ऽपिद्वचनं ज्ञापकमिति वास्तु । न्यायसिद्धोप्ययमर्थः । अनुबन्धानामनेकान्तत्वेन स्थानिकोटावप्रविष्टतया स्थान्यलाश्रयविधिविषयकस्यानल्विधाविति निषेधस्याप्रवृत्तेः । अनुबन्धा एकान्ता इति मतेपि स्थानित्वप्रतीतेः प्रागेवान्तरङ्गेण लोपेन तेषामपहारात् । तस्माल्लडाद्यादेशानां तिबादीनां स्थानिवद्भावेन ङित्त्वं दुर्वारमिति । अत्राहुः । यासुट् परस्मैपदेष्विति सूत्रे ङिद्वचनं ज्ञापकं लादेशानां स्थानिवद्भावेन ङित्त्वन्न भवतीति । तथाच वार्त्तिकम् । लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धमिति । ननु स्तुयादित्यादावनिग्लक्षणवृद्धिप्रतिषेधार्थं चिनुयुरित्यादौ जुसिचेत्यस्य प्रतिषेधार्थञ्च यासुटो ङित्त्वमस्तु । उतो वृद्धिर्लुकि हलीत्यत्र त्युत इति निर्दिष्टस्थानिकतयेक्परिभाषा नोपतिष्ठते । जुसिचेति तु क्ङितिचेत्यस्यापवाद एव । तथा च स्थानिवद्भावलब्धं ङित्त्वं स्तुयाच्चिनुयुरित्यत्र वृद्धिगुणौ निषेद्धुं नालम् । पुनर्ङित्त्वसामर्थ्यात्तु तदुभयनिषेधो भविष्यति, तथा च वृद्धिगुणनिषेधे चरितार्थं यासुटो ङित्त्वङ्तर्थं लादेशेषु लाश्रयाङित्त्वस्य विरहं ज्ञापयेदिति चेत् । उच्यते । उत औदिति वक्तव्ये वृद्धिग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यादित्येवमर्थम् । तेन स्तुयादित्यत्र

न वृद्धिः। तथा चिनुयुरित्यत्र न गुणः क्सस्याचीत्यतोचीत्यनुवर्त्याजादौ ङसि गुणविधानात्। मिदेर्गुणो ङसि चेत्यकारं प्रश्लिष्याच्चासाबुम् चेति कर्मधारयाश्रयणेनाजादावुसि गुणविधानाश्रयणे तु चक्रुर्जन्हुरित्यादावतिप्रसङ्गः। गुणेति लुप्तविभक्तिकमु ङसीति च छेदः। उकारादौ ङसीति चार्थः। ङसि गुणे यासुट्प्रतिषेध इति वार्त्तिकमप्युक्तरीत्या सिद्धार्थकथनपरमिति तावद्वार्तिककारस्य तद्धृदयम्। भाष्यकारमते तु सार्वधातुकमपिदितिसूत्रे ऽपिदीति योगं विभज्य ङिदिति चानुवर्त्यावृत्तिञ्चाश्रित्य ङिच्च पिन्न भवतीति पिच्च ङिन्न भवतीति वाक्यार्थद्वयं वर्ण्यते। इदञ्च हलः श्न इति सूत्रे भाष्ये स्पष्टम्। तेन ब्रूतादित्यत्र ब्रुव ईण्न तातङ औपदेशिकङित्त्वेनान्तरङ्गेणातिदेशिकस्य बहिरङ्गस्य पित्वस्य बाधात्। अतिदिष्टादुपदिष्टं बलीय इति न्यायात्। अचिनोदित्यादौ त्वौपदेशिकेन तिबादीनां पित्त्वेन लाश्रयमातिदेशिकं ङित्त्वम्बाध्यते। तेन गुणादिसिद्धिः। अस्मिंश्च पक्षे यासुटो ङित्त्ववचनं न ज्ञापकं किन्तु मृज्यादित्यादावप्राप्तङित्त्वविधायकम्। तेन च पित्वस्य चिनोतीत्यादौ सावकाशस्य बाधो ऽतः स्तुयादित्यादौ पिति हलीति विधीयमाना वृद्धिर्न प्रवर्त्तते। चिनुयुरिति तु प्राग्वदेव समर्थनीयम्। पूर्वोदाहृतवार्त्तिकमते तु ब्रूतादित्यत्रेट् प्राप्नोति। आगमशासनमनित्यमिति तु कथं चित्समाधेयः। वस्तुतस्तु हलः श्नः शानज्झाविति शानचः शित्करणेन क्व चिदनुबन्धकार्येष्यनल्विधाविति निषेधः प्रवर्त्तत इति ज्ञाप्यते। तेन ब्रूतादित्यादौ न कश्चिद्दोष इति। अत एव भाष्यमते भविषीष्टेत्यत्र ङित्त्वन्न करिष्यमाणेत्यत्रोगिल्लक्षणटिल्लक्षणश्च ङीन्नेति दिक्॥

दीधीवेवीटाम् ॥ दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। आदीध्यनम् आधीध्यकः। आवेव्यनम् आवेव्यकः। अकणिषम् अरणिषम्। कणिता श्वो रणिता श्वः। इहामं प्रति सिजन्तमङ्गम्। तिपो डादेशं प्रति तु कणिद्रणिदिति तान्तमंगं तस्यामं डादेशं च सार्वधातुकं निमित्तीकृत्य लघूपधगुणःप्राप्नोनेन निषिध्यते। वृद्धिस्त्वटो न सम्भवत्येव। लुङन्ततां स्फोटयितुं ष्व इत्यस्य प्रयोगः। न हि तृजन्ते तृन्नन्ते वेटो गुणप्राप्तिः प्रत्ययावयवत्वात्तस्य। अथ दीङ् क्षये, धीङ् अनादरे, वेञ् तन्तुसन्ताने, वी गत्यादिष्वेतेषामिह ग्रहणं कुतो नेति चेत्। न। अवयवप्रसिद्ध्यपेक्षया समुदायप्रसिद्धेर्बलवत्त्वात्। किञ्च चतुर्णां ग्रहणेभिप्रेतेऽसन्देहार्थं दीवेधीवीटामित्येव ब्रूयात्। इट् चात्रागम एव गृह्यते न इट् गताविति धातुः। ननु धातुसाहचर्याद्धातुरेव गृह्यताम्। मैवम्। साहचर्यस्य सर्वत्रानियामकत्वात्। अन्यथा द्विस्त्रिश्चतुरिति कृत्वोर्थइति सूत्रे कृत्वोर्थग्रहणं न कुर्यात्। द्विस्त्रिरिति सुजन्ताभ्यां साहचर्येण चतुरित्यस्यापि सुजन्तस्य ग्रहणसम्भवात्। अतएवागमापेक्षया प्रकृतेरभ्यर्हितत्वादीधीङः पूर्वनिपातः सूत्रे कृतः इटोपि धातुत्वे तु प्रकृतित्वाविशेषेप्यल्पाच्तरत्वात्तस्यैव पूर्वनिपातः स्यात्। अत्रेदमवधेयम्। दीध्यको वेव्यक इति यदुदाहृतं तदीधीवेवीभ्यां शुद्धाभ्यामेव ण्वुलि रूपं न तु ण्यन्ताभ्यामपि। यत्तु यीवर्णयोरिति सूत्रे हरदत्तेनोक्तम्, वर्णशब्दो वर्णविस्तार इतिधातोः पचाद्यजन्तः श्रूयमाण एव। वर्णे यथा स्याल्लुप्ते मा भूदित्येवमर्थः तेन ण्यन्ताभ्यां ण्वुलि णिलोपस्य पूर्वविधौ स्थानिवत्वेपि श्रूयमाणत्वाभावाल्लोपाभावे यणि कृते दीध्यको वेव्यक इत्येव शुद्धेन समानाकारं रूपं भवतीति। तदेतन्नाग्लोपिशास्वृदितामित्येतस्मिन्सूत्रे भाष्यकारैरेव ण्यन्तस्य

दीधक इति रूपं शुद्धस्य तु दीध्यक इति व्युत्पादितत्वात्सिद्धान्तविरोधादुपेक्ष्यम् । तत्र हि वर्णग्रहणं लुप्तेपि वर्णे यथा स्यादित्येवमर्थमित्याशंक्य स्थानिवद्भावेन सिद्धेरन्तरंगत्वाण्णिलोपात्प्राग्यीवर्णयोरिति लोपसिद्धेश्च वर्णग्रहणं प्रत्याख्यातम् । ननु वर्णग्रहणं कुर्वतः सूत्रकारस्याशयं भाष्यकारोक्तादन्यमेवानुसृत्य ब्रूम इति चेत्, सत्यम् । तथापि यथोत्तरं मुनीनां प्रामाण्याद्रूपाशुद्धिस्तदवस्थैवेति दिक् । स्यादेतत् । दीधीवेव्योर्ङित्वात्क्ङिति चेति सूत्रेणैव निषेधोस्तु किमिह दीधीवेवीग्रहणेन । मैवम् । इग्लक्षणयोर्हि स निषेध इत्युक्तम् । न चाचो ञ्णितीति वृद्धिरिग्लक्षणा । किञ्च कार्यिणो निमित्तत्वे पूर्वेण सिद्धिः सम्भवेदपि । न च कार्यी निमित्ततयाश्रीयते । च्यवते प्लवते इत्यादावपि गुणनिषेधापत्तेः । अत्र च लिङ्गं कुटादिमध्ये कूङ् शब्द इत्यस्य पाठः स्थंडिलाछयितरीति निर्देशश्च । यत्तु प्रकृतसूत्रे दीधीवेव्योर्ग्रहणमेवैतत्परिभाषाज्ञापकमिति । तन्न । अनिग्लक्षणवृद्धिनिषेधेन चरितार्थत्वात् । भाष्यमतएतत्सूत्रस्य प्रत्याख्यास्यमानतयोक्तपरिभाषायां लिङ्गान्तरस्यैवानुसर्त्तव्यत्वाच्च । स्यादेतत् । यदि कार्यी निमित्तत्वेन नाश्रीयते कथं तर्हि ऊर्णुनाविषतीत्यत्र द्विर्वचनेचीति नुशब्दस्य द्वित्वं, इषइत्यस्य अजादित्वेपि द्वित्वं प्रति कार्यिमध्ये प्रविष्टतया निमित्तत्वासम्भवात् । सन्यङोरिति षष्ठीमाश्रित्य सन्नन्तस्य द्वित्वविधानात् । अन्यथा प्रतीषिषतीति सनो द्वित्वं न स्यात् । यत्तु सन्यङोरिति सन्नम्याश्रयणेपि सन्यङोरकारोच्चारणसामर्थ्याद् द्वित्वं भविष्यतीति । तन्न । दित्सधित्सादिभ्यो यङुत्पत्तिप्रतिबन्धेनाचो यदिति यत्प्रत्ययोत्पादनेन चाकारोच्चारणस्य चरितार्थत्वात् । अन्यथा अरिरिषतीत्याद्यसिद्धेश्च । यदि हि तत्रापि स्थानिव-

त्स्यादिसोद्विर्वचने कृते ऽरीषतीति स्यात्। अत्रोच्यते। कार्यमनुभवन्नेव कार्यी निमित्ततया नाश्रीयतइति परिभाषार्थः। अरिरिषतीत्यत्र ह्रजादेर्द्वितीयस्येति रिस्शब्दे द्वित्वप्रवृत्तिः। तदन्तर्गतश्चेस्शब्द इति नासौ द्वित्वं प्रति निमित्तं कार्यभाक्त्वात्। ऊर्णुनविषतीत्यत्र तु नव्शब्दस्य द्वित्वं प्राप्तन्तदनन्तर्गतश्चेस्शब्द इति भवत्येव निमित्तं तद्भावभावितामात्रेणेह निमित्ततेति सन्यङोरिति सूत्रे भाष्यकारैरेव स्फुटीकृतत्वात्। तथा च द्विर्वचनेचीति स्थानिवद्भावान्नुशब्दस्य द्वित्वमुचितमेव। यत्तु द्विर्वचनेचीति सूत्रे ऽचि किं जेघ्रीयतेदेध्मीयतइति प्राचां प्रत्युदाहरणन्तदापाततः। घ्रीय् ध्मीय् इत्यस्य द्वित्वभाक्तयेघ्राध्मोरितीत्वं प्रति निमित्तभूतस्य यङो द्वित्वम्प्रत्यनिमित्तत्वात्। तस्मात्तत्राचीत्यस्याधिजगइत्येतदेव व्यावर्त्त्यं बोध्यम्। गाङ्लिटीति द्विलकारकनिर्देशमाश्रित्य लावस्थायामेव गाङादेशविधानात्। अज्ग्रहणन्तु ज्ञापकं रूपस्थानिवद्भावस्येति तत्रत्यवार्त्तिकमप्यधिजगइत्येतस्मिन्नुदाहरणे कार्यातिदेशाश्रयणे ऽज्ग्रहणवैयर्थ्यं स्यादित्येव योज्यमिति दिक्। यत्त्वसिद्धवत्सूत्रे वक्ष्यतेऽत्रग्रहणं समानाश्रयप्रतिपत्त्यर्थमिति। तन्न। आश्रयत्वं स्थानितया निमित्ततया वा कथञ्चिदाश्रयणमात्रेण न तु निमित्ततयैवेत्याग्रहः। तेन शाहाविति शाभावो हेर्धित्वे कर्त्तव्ये ऽसिद्धो भवति। अन्यथा धित्वे हेः कार्यितया निमित्तत्वाभावादसिद्धत्वं न स्यात्। अत एव समानाश्रयमाभीयमाभीये ऽसिद्धमित्येवाहुर्न तु समाननिमित्तमिति। इदञ्च सूत्रं भाष्यवार्तिकयोः प्रत्याख्यातम्। तथाहि। दीधीवेव्यौ छान्दसौ धातू न तु लोके प्रयोगार्हौ। छन्दसि चानयोर्गुणो दृश्यते। होत्राय घृतः कृपयन्नदीधेत्। अदीधयुर्दाशराज्ञे घृतास इत्या-

दौ । न चायम्बाहुलकेन समाधेयः । तथा सति निषेधसूत्रानारम्भस्यैव लाघवेनोचितत्वात् । तथेटोपि ग्रहणं व्यर्थम् । आर्द्धधातुकस्येडित्यत्र हि नेड् वशि कृतीति सूत्रादिड्ग्रहणमनुवर्त्तते । तच्चेटो विकाराभावार्थम् । इट् इडेव न तु विकृत इति व्याख्यानात् । ततो लघूपधगुणाभावात्सिद्धं कणिता श्वो रणिता श्व इत्यादि । न चैवं पिपठीरित्यत्र दीर्घो न स्यादिति वाच्यम् । तस्य नियमं प्रत्यसिद्धत्वात् । अपाठीदित्यत्र सवर्णदीर्घस्तु न वार्यते । सिज्लोप एकादेशे सिद्धो वक्तव्य इति ज्ञापकात् । यद्वाङ्गाधिकारे क्रियमाणो नियम आङ्गमेव विकारं व्यावर्त्तयति । तेन वोरित्यकः सवर्णइति च दीर्घो भवत्येव । ग्रहीतेत्यत्र तु ग्रहो लिटीत्यारम्भसामर्थ्यादीर्घो भवत्येव । इदं न्त्ववशिष्यते । पिपठींषि ब्राह्मणकुलानीत्यत्र सान्तमहतः संयोगस्येति दीर्घत्वं न स्यात् । सिद्धत्वादाङ्त्वाच्चेजांसीत्यादौ चरितार्थत्वाच्च पिपठीरपाठीत् ग्रहीतेत्यादिपूर्वोदात्तेभ्योस्य वैलक्षण्यादिति । अत्राहुः । पिपठींषीति प्रयोगोऽसाधुरेव । न ह्यत्र नुमागमो लभ्यते । अल्लोपस्य स्थानिवद्भावेनाझलन्तत्वात् । न चैवमजन्तत्वप्रयुक्तो नुम् स्यादेवेति वाच्यम् । तस्य सकारादुत्तरत्र प्रसक्त्या दीर्घस्य तथाप्यप्रवृत्तेः । सान्तसंयोगाभावात् । वस्तुतस्त्वजन्तत्वप्रयुक्तो नुमत्र न भवत्येव । स्थानिवद्भावासंभवात् । अनादिष्टादचः पूर्वस्य विधौ हि सः । न चाजन्तमनादिष्टादचः पूर्वं येन तस्य नुमि कर्त्तव्ये ऽल्लोपः स्थानिवत्स्यात् । ननु झलन्तत्वप्रयुक्तो नुम् दुर्वारः । न च तस्मिन्कर्त्तव्ये स्थानिवद्भावः शंक्यः । क्वौ लुप्तं न स्थानिवदिति निषेधात् । अन्यथा सखीयतेः क्विपि सखीः सुतीयतेः सुतीरित्यादि न स्यात् । अल्लोपस्य स्थानिवद्भावेन यणादेशप्रसङ्गात् । अत्रो-

च्यते । क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमितितावद्वार्त्तिकशरीरम् । तत्र क्वीत्यंशो यद्यपि द्वेधा व्याख्यास्यते । क्वौ लुप्तं न स्थानिवदिति । क्वौ विधिम्प्रति न स्थानिवदिति च । देवयतेः क्विपि दयूरित्यादेरन्यतरव्याख्यानाश्रयणेन सिद्धावपि सखीयतेः सखीरित्यस्याद्यव्याख्यानं विना असिद्धेः लवमाचक्षाणो लौरित्यस्य द्वितीयव्याख्यानं विना ऽसिद्धेश्च । तथापि क्वौ विधिं प्रतीति द्वितीयव्याख्यानमेव सार्वत्रिकम् । क्वौ लुप्तमिति तु क्वाचित्कम् । ख्यत्यादित्यत्र मपर्यन्तस्येत्यत्र च भाष्यादावाश्रितं न तु सार्वत्रिकम्। अत्र चेड्ग्रहणप्रत्याख्यानपरमत्रत्यभाष्यमेव प्रमाणं कथमन्यथा पिपठींषीत्यादौ दीर्घस्येट्त्वे सूत्ररीत्या च तल्लाभे इड्ग्रहणं प्रत्याचक्षीत । तस्मात्पिपठिषि ब्राह्मणकुलानीत्येव रूपं भवतीति स्थितम् ॥

हलोनन्तराः संयोगः ॥ अञ्भिरव्यवहिता हलः संयोगसंज्ञा स्युः । संज्ञाप्रदेशाः संयोगान्तस्ये त्येवमादयः । इहान्तरशब्देन छिद्रवाचिना बहुव्रीहौ निश्छिद्राइत्यर्थलाभादवग्रहे संज्ञया न भाव्यम् । आधेयप्रधानेनान्तरेत्यव्ययेन सह बहुव्रीहौ त्त्वाधेयनिषेधप्रतीतेरवग्रहेपि भाव्यमेव संज्ञया । न हि तत्रान्तरा मध्ये किञ्चिदस्ति किं तु मध्यमात्रं वर्त्तते । मात्रा ह्रस्वस्तावदवग्रहान्तरमिति प्रातिशाख्यबलेन तत्र मात्राकालावसानाभ्युपगमात् । यत्तु प्रातिशाख्यान्तर "मद्धमात्रोवग्रह" इति, तत्तु सर्वत्र संहितायामर्द्धमात्राकालस्य सत्वात्ततोतिरिक्तोर्द्धमात्राकालोवग्रहेस्तीत्येवंपरमतः प्रातिशाख्ययोरविरोधः । तदिह कतरः पक्षो ग्राह्य इति चेत् । उभयथाप्यदोष इति भाष्यकाराः। नन्वाप्स्वित्यादौ सत्यां संयोगसंज्ञायां संयोगे गुर्वीति गुरुत्वाद् गुरोरनृत इति प्लुतेन भा-

ष्यं नत्वन्यथेति महान्फले विशेषः। तत्कथं पक्षद्वयाभ्युपगम इति चेत्। न। अप्स्वित्यस्याधिकरणवृत्तेर्दूराद्भूतसम्बन्धाभावात्। विचार्यमाणानामित्यादौ तु वाक्यस्य टेरित्यनुवर्त्तते न तु गुरोरनृत इति। नन्वप्सु भवोप्सव्यः,दिगादिषु पाठाद्यत्। अपो योनियन्मतुषु चेति सप्तम्या अलुक् ततः सम्बुद्धौ हे अप्सव्येत्यत्र स्यादेव फलभेद इति चेत्। अत्राहुः। नैवंविधे विषये ऽवग्रहं पदकाराः कुर्वन्तीति। अत्र च सम्प्रदाय एव शरणमिति बोध्यम्। उक्तञ्चैतत्। गोभ्यो गातुं गोभिर्मदाय चित्रइद्राजा राजका इदन्यके इत्यादौ गोभ्यो गोभिः राजका इत्यादीनां सत्यपि पदत्वे ऽवग्रहाकरणात्। ईयिवांसमतिस्रिध इत्यादावीयिवांसामिति विनापि पदसंज्ञां कसोः पूर्वमिडागमान्ते ऽवग्रहकरणाच्च। एतेन सिसासन् उक्थशसः रिरिष इत्यादौ पदकाले सत्त्वह्रस्वत्वादयोपि व्याख्याताः। यत्तु मानो महान्तमिति मन्त्रे वेदभाष्यकारैरुक्तम्। छान्दसः पदकालीनो ह्रस्व इति,तदपि सम्प्रदायमात्रपरतया कथं चिन्नेयम्। न लक्षणेन पदकारा इति भाष्ये पदविभागः पौरुषेय इति कैयटादिभिरुक्तत्वादिति दिक्। कथं तर्हि तत्रतत्रावग्रहे विशेष इत्युच्यतइति चेत्। अवान्तरपदत्वे सत्यवग्रहः क्रियतइत्युत्सर्गमभिप्रेत्योक्तं गृहाण। अप्सुयोनिर्वा अश्व इत्यादावपि सुशब्दात्पूर्वं नास्त्यवग्रहः। अवान्तरपदसंज्ञानेकत्वे उत्तरकालप्रवृत्तिकयावग्रह इति वैदिकसम्प्रदायात्। अत एव मयूररोमभिरित्यत्र भिसः पूर्वमवग्रहः। नमउक्तिभिरित्यत्राप्येवम्। इन्द्रप्राणः पुरएतेवेत्यत्र चेवशब्दात्प्रागिति दिक्। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थम्। संयुज्यन्ते ऽस्मिन्समुदाये वर्णा इति। तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत्प्रत्येकम्। तथा हि साति नि-

र्यायादित्यादौ यकारः संयोग इति वान्यस्यसंयोगादेरित्येत्वं स्यात्। सिद्धान्ते त्वचो रहाभ्यामिति द्वित्वे सत्यपि तस्यासिद्धतया निर्यायादित्यादावेत्वं न भवति। किञ्च प्रत्येकं संज्ञेति पक्षे संत्दर्षीष्टेत्यत्र ऋतश्च संयोगादेरितीद् स्यात्। संह्रियतइत्यत्र गुणोर्त्तिसंयोगाद्योरिति गुणः स्यात्। दृषत्करोतीत्यत्र ककारसन्निधौ दकारस्य संयोगत्वात्संयोगान्तलोपः स्यात्। शक्तावस्तेत्यत्र झलि तकारे परतः स्कोरिति लोपः स्यात्। निर्यात इत्यादौ संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं स्यात्। जातौ चेदं बहुवचनं हल इति। जात्याख्यायामेकस्मिन्निति वचनात्। तेन द्वयोरपि संयोगसंज्ञा भवति। अतः शिक्षेत्यादौ गुरोश्च हल इत्यप्रत्ययः सिध्यति। यत्र तु बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां वा विशेषेणसंज्ञा। न चैकाज्द्विर्वचनन्यायेन समुदायस्यैव स्यादिति वाच्यम्। वैषम्यात्। तथाहि। द्विर्वचनं समुदायावयवैकाचोर्युगपत्कर्त्तुमशक्यम्। संज्ञा तु शक्या। तथा समुदाये द्विरुक्ते ऽवयवा अपि द्विरुक्ता भवन्ति वृक्षः प्रचलन्सहावयवैः प्रचलतीति न्यायात्। इह तु समुदाये प्रवृत्तया संयोगसंज्ञया नावयवानां तत्कार्यसिद्धिः। अतो ऽविशेषेण द्वयोर्बहूनां च संज्ञेति स्थितम्। यदि तु बहूनामेव स्यात्तर्हि संस्वर्यतइत्यत्र गुणोर्त्तीति गुणो न स्यात्। गोमान्करोतीत्यत्र संयोगान्तलोपो न स्यात्। निर्ग्लान इत्यादौ निष्ठानत्वं न स्यादिति दिक्। ननु यदि द्वयोरपि संज्ञा तर्हीन्द्रीयतेः सनीन्दिद्रियिषतीति न स्यात्। इह हि संयोगौ द्वौ नदौ दरौ च। तत्र नकारस्येव दकारस्यापि नन्द्राइति द्वित्वनिषेधः प्राप्नोति। नैष दोषः। तत्र ह्रजादेरित्यनुवर्त्तते। सा च कर्म्मधारयात्पञ्चमी। तेनादेरचः परे नदराः संयोगादयो

न द्विरुच्यन्तइति सूत्रार्थः । एवं च पूर्वसूत्रे द्वितीयस्येति न कर्त्तव्यमेवेति वक्ष्यते। हलः किम् । तितउभ्याम् । अत्र तनोतेर्डउः सन्वच्चेति डउप्रत्ययः सन्वद्भावाद् द्वित्वं सन्यत इतीत्वं च। व्यस्तोच्चारणसामर्थ्याद् गुणाभावः । यदि ह्यचोरप्यनन्तरयोः संयोगसंज्ञा स्यात्तर्हीह संयोगान्तस्येत्युकारलोपः स्यात्। अनन्तराइति किम् । पनसम् । यदीह सकारमकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति सूत्रेण सकारलोपः स्यादिति दिक् ॥

मुखनासिकावचनोनुनासिकः ॥ मुखसहिता नासिका मुखनासिका तयोच्चार्य्यमाणोनुनासिकसंज्ञः स्यात् । संज्ञाप्रदेशा आङोनुनासिकश्छन्दसीत्यादयः । अभ्रआँ अपोद्दृणाना । गभीरआँ उग्रपुत्रे। इहोच्यत इति वचनः कृत्यल्युटो बहुलमिति बाहुलकात्कर्मणि ल्युट् । राजभोजनाः शालय इतिवदिति वृत्त्यनुसारिणः । भाष्यकैयटयोस्तु उच्यतेनेनेति वचनम् । करणे ल्युट् सामान्ये नपुंसकम् । शक्यं च क्षुदपहन्तुमितिवत् तेन तुल्यं क्रिया चेत् संस्कृतं भक्षा इतिवच्च । इदश्च विशेषणानाञ्चाजातेरित्यत्र वक्ष्यमाणेन पदसंस्कारपक्षे गुणवचनानामित्यादि वाचनिकमित्यनेन सह यथा न विरुध्यते, तथा तत्रैव वक्ष्यामः । ततो मुखनासिका वचनं यस्येति बहुव्रीहिः । मुखेति किम् । यमानुस्वाराणामेव मा भूदिति भाष्यम् । तत्र वर्गेष्वादितश्चतुर्णां पंचमे परे तन्मध्ये पूर्ववर्णसमानाकारं वर्णान्तरं प्रातिशाख्येष्वागमत्वेन विहितन्तद्यमसंज्ञम् । यम इव यमः,यमौ हि लोके प्रायेण समानाकारौ भवतः । यथा पलिक्क्रीः चख्खनतुः अग्ग्निः अघ्घन्नित्यत्र ककगघ इत्येभ्यः परभागे तत्तत्सदृशो यमागमः । यत्तूक्तं विवरणे । वर्गपञ्चमयुक्ताः प्रथमादयो यमा इति । तच्चिन्त्यम् । अयोगवाहत्वप्रतिपा-

दकेन हयवरट्सूत्रस्थभाष्येण सह विरोधात् । केवलनासिक्यत्वपरेण यमानुस्वराणामेवेति भाष्येण सह विरोधाच्च । यथेदं भाष्यन्न केवलनासिक्यत्वपरं किन्तु आँ इत्यादीनां भागमात्रं नासिक्यं यमानुस्वाराणां तु मुखनासिक्यत्वेपि प्रासादवासिन्यायेन नासिक्यत्वमप्यस्ति न तु तदीयं भागमात्रं तथेत्येवंपरं तथाप्यादितश्चतुर्णान्तदसम्भव एव । किञ्चैवं नैव दोषो नैव प्रयोजनमिति तदुत्तरभाष्यग्रन्थविरोधः । यद् घ्नन्तीत्यादौ यरोनुनासिक इत्यस्य प्रवृत्त्यापत्त्या त्वत्पक्षे दोषस्योद्भटत्वादत एव प्रातिशाख्ये स्पर्शा यमाननुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेष्वित्युपक्रम्य प्रदोधुवच्छ्मश्रुष्वित्यत्र यमं निषेद्धुमारब्धेन स्पर्शस्योष्मप्रकृतेः परस्ताद्यमापत्तिमिति सूत्रे परस्ताच्छब्दः प्रयुक्तोः यमः प्रकृत्यैव सदृक्श्रुतिर्वा यमेन मुख्यास्ति । समानकालेत्यादिसूत्रान्तरेष्वपि स्पष्टमेव यमस्य वर्णान्तरत्वम् । तथा नारदीयशिक्षायामपि—अनन्त्यश्च भवेत्पूर्वो ह्यन्तश्च परतो यदि । तत्र मध्ये यमास्तिष्ठेत्सवर्णः पूर्ववर्णयोरिति । सवर्णः सदृशः, अत्र पूर्ववर्णयोरिति द्वित्वमविवक्षितम् । यज्ञ इत्यादौ जकारद्वयसत्वेपि ज्मया अत्रवसवोरन्तेदवाइत्यादौ जकारद्वयाभावादिति तद्व्याख्यातारः । तथा ऋक्तन्त्रव्याकरणाख्यस्य छान्दोग्यलक्षणस्य प्रणेता औदव्रजिरप्यसूत्रयत् । अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वस्य गुण इति । पूर्वस्य गुण इत्यस्य पूर्वभक्त इत्यर्थः । एतेनागमत्वं स्फुटीकरोति, तथा संयोगशृङ्खलाख्यायां गौतमशिक्षायामपि । अथ चतुरक्षराणामुदाहरणं सयमायमाभ्यां, सयमास्तावद्यथा ऽग्निरिति द्वौ गकारौ यमनकारौ यज्ञ इति द्वौ जकारौ यमञ्जकारावित्यादि । तथात्रैव ग्रन्थारम्भे, अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डश्चेति त्रेधा

संयोग विभज्य यमसहितमयस्पिण्डमित्युक्त्वा, अन्तस्थयमसंयोगे विशेषो नोपलभ्यते। अशरीरं यमं प्राहुरन्तस्थः पिण्डनायक इत्युक्तम्। अन्तस्थोत्र वर्गपञ्चमः। अशरीरमिति स्वरभक्त्यादिवद्व्यञ्जकलिपिविशेषशून्यमित्यर्थः। लक्षणवशेनैव तदीयस्थलविशेषनिश्चयसंभवाल्लिपिसंप्रदायप्रवर्त्तकाचार्यैः स्वरभक्तेरिव यमस्यापि व्यंजकीभूता लिपिर्न कल्पितेत्यर्थः। रलयोरूष्मणि परे मध्ये स्वरभक्तिरिति हि प्रसिद्धं शिक्षादौ। यत्र तु नैवंविधेन लक्षणेन स्थलावधारणं कर्तुं शक्यते। तत्रागत्या लिप्यन्तरं प्रवर्त्तितम्। यथा विसर्गादौ। पाणिनीयशिक्षायामपि। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा। स्वरा विंशतिरेकश्च स्पर्शानां पंचविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च क×पौ चापि पराश्रयौ। दुःस्पृष्टश्चेति विज्ञेया लकारः प्लुत एव चेति। अत्र हि यमानां पृथग्गणनात्स्पष्टमेव वर्णांतरत्वम्। गणना त्वित्थम्। अइउऋ इति चतुर्णां ह्रस्वदीर्घप्लुतभेदात्त्रैविध्ये द्वादश लृकार एकः एचां दीर्घप्लुतभेदाद्दृष्टौ। इत्थं स्वरा एकविंशतिः। स्पर्शाः पञ्चविंशतिः। यरलवशषसहेत्यष्टौ। यमाश्चत्वारः प्रथमयमाद्वितीययमादिभेदेन विभजनात्। अत एव कुं खुं गुं घुं इति यमचतुष्टयं न्यासादावुदाहृतम्। कचटतपाः कुः खछठथफाः खुरित्यादि परिभाषामाश्रित्य तत्तदुत्तरस्याशरीरस्यापि कथञ्चित्प्रदर्शनतात्पर्यकं चेदमिति ध्येयम्। अनुस्वारविसर्ग×क×पाश्चत्वारः, दुःस्पृष्टश्च बह्वृचानां प्रसिद्धः, ईळेवोळ्हेति,इत्थं त्रिषष्टिः। लृकारस्य प्लुतसम्भवात्तेन सह चतुः षष्टिः, तदेतदुक्तं सम्भवत इति। हयवरट्सूत्रे क्षीरोदकारोप्याह। वर्गात्येनंत्यात्परे तयोर्मध्य-

वर्त्ती नासिकास्थानो यम इति। यत्तु कश्चिदाह। यमा आदेशाः, न च तेषामानुनासिक्यपक्षे तज्ज्ञस्तद्घ्नन्तीत्यादौ यरोनुनासिक इत्यनुनासिकादेशापत्त्या नैव दोषो नैव प्रयोजनमिति भाष्यं विरुध्येतेति वाच्यम्। व्यवस्थितविभाषाश्रयणादिति। तत्तुच्छम्। प्रागुक्तप्रातिशाख्यनारदीयशिक्षादिसकलग्रन्थविरोधेन आदेशपक्षस्य गर्भस्रावेणैव गतत्वात्। व्यवस्थितविभाषाकल्पनस्य निर्मूलत्वाच्च। एतेन एतदीयलेखनप्रामाण्यभ्रमेण अनुपसर्गात्ज्ञ इत्यादौ चवर्गाभावं दृढीकृत्य श्चुत्वाभावं साधयन्तस्तदनुगामिनोपि परास्ताः। नारदेन यज्ञ इत्यत्र जकारद्वयस्य स्फुटमभिधानात्। तस्यैतस्य त्रयस्यास्थनामज्ञां पर्वणामितीत्यारण्यकप्रयोग इव सजातीयसमभिव्याहारान्न स्पष्टो भेद इति तु प्रसिद्धं शास्त्रे। अत एव न व्यञ्जनपरस्यैकस्यानेकस्य वा विशेषोस्तीति भाष्यम्। व्यञ्जनात्परस्य व्यञ्जनं परं यस्येत्येवंभूतस्य च दुर्लक्षो भेदाभेदविभाग इत्येवंपरतया तत्रतत्र कैयटेन व्याख्यातम्। अत एव च बहुषु पुस्तकेषु तज्ज्ञापयत्याचार्य इति भाष्यग्रन्थः। अनुपसर्गादितिसूत्रेपि केषाञ्चित् श्चुत्वपाठः सम्मत एव। पाठान्तरं तु अल्पाच्तरं, आलुच् तदसहने इति वत्सौत्रत्वादसंहितया वा समाधेयमिति दिक्। तदेतत्सकलमभिधाय प्रक्रियाप्रकाशे गुरुचरणैरुक्तम्। तज्ज्ञानमित्यादौ तु श्चुत्वं भवत्येव। यमश्च मुखनासिक्यः केवलनासिकास्थानो वेति मतद्वयम्। नासिक्या नासिकास्थानाः मुखनासिक्या वेति तैत्तिरीयप्रातिशाख्यात्। अनुनासिकविषये तु दर्शनत्रयम्। कृत्स्नो वर्णो मुखेन नासिकया चोच्चार्यतइत्येकम्, पूर्वो भागो मुखेन परो नासिकयेति द्वितीयं, तद्वैपरीत्यात्तृतीयं, द्वितीयतृतीययोर्भागमात्रस्य नासिक्यत्वेपि तदुपरागाद्भागान्तर-

मपि तद्वदवभासते । तथा च नासिकान्वयस्य भागमात्रविषयतया नासिकावचनग्रहणेन मुखनासिक्योवर्णो न गृह्येत । किं तु मतविशेषे केवलनासिकास्थानतया यमादय एव गृह्येरन्। ततश्च विधिप्रदेशे आङ्गेनुनासिक इत्यादौ यमानुस्वारा एव विधीयेरन् । विड्वनोरनुनासिकस्यादित्यादौ त्वनुवादे अप्रतिपत्तिरेव स्यादित्युदात्तदभाष्याशयः । तस्मादर्शनद्वये मुखपदोपादानं सार्थकमिति स्थितम् । प्रथमदर्शने तु प्रासादवासिन्यायाश्रयणेनोभयवचनानामपि सिद्धा संज्ञा । आन्तरतम्याच्च विधिप्रदेशेषु यमानुस्वाराणामप्रवृत्तिः। तथा च मुखशब्दोपादानं न कर्त्तव्यमिति भाष्ये स्थितम् । मुखवचनइत्येवोक्ते तु कचटतपादीनामपि स्यात् ततश्च शक्त इत्यत्र कलोपः स्यात् । पक्व इत्यत्र चकारलोपः स्यात् । तप्तमित्यत्र पलोपः स्यात् । ओदनपगित्यादावनुनासिकस्य क्ङिझलोरिति दीर्घः स्यात् । अनु पश्चान्नासिका व्याप्रियते यस्मिन्नासिकायाः पश्चान्मुखं व्याप्रियते यस्मिन्निति वा ऽन्वर्थसंज्ञेयं तेन नासिकाव्यापारस्य भागविषयकत्वसूचनात्प्रासादवासिन्यायस्याविषयोयमिति ध्वनितम् । एतच्च सूत्रं प्रत्याख्यातुं शक्यम् । प्रदेशवाक्येष्वेव प्रागुक्तस्य नासिकामनुगत इत्यस्य वा योगस्याश्रयणेन सकलेष्टसिद्धिरिति दिक् ॥

तुल्यास्यप्रयत्नं सवर्णम् ॥ ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्युभयं यस्य वर्णस्य येन वर्णेन सह समानं स तस्य सवर्णो बोध्यः । संज्ञाप्रदेशाः, अकः सवर्णेदीर्घ इत्यादयः । यद्यपि तुलया सम्मितं तुल्यमित्यवयवार्थः नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्थतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेष्विति सूत्रेण तुलाशब्दात्सम्मिते यद्विधानात् । तथाप्ययं सदृशमात्रे रूढः

शब्दः । अस्यन्ति उच्चारयन्ति अनेन वर्णानित्यास्यं असुक्षेपणे, बाहुलकात्करणे ण्यत् । यद्वा । आस्यन्दते अन्नं प्राप्य द्रवीभवतीत्यास्यम् । अन्येष्वपीति डप्रत्ययः । अथ वा अन्नेन द्रवीक्रियतइत्यास्यं अन्तर्भावितण्यर्थात्कर्मणि डः परितः खाता परिखेतिवत् । तत्र भवमास्यम् । तालवादिस्थानम् । शरीरावयवाद्यत् । यस्येतिलोपे हलोयमामिति यलोपः । न चाल्लोपस्य स्थानिवद्भावः शङ्क्यः । यलोपे कर्त्तव्ये तन्निषेधात् । प्रकृष्टो यत्नः प्रयत्नः प्रकर्षश्चाभ्यन्तरत्वम् । प्रारम्भे यत्नो वा प्रयत्नः आभ्यन्तरप्रयत्ना हि वर्णप्रारम्भकालएव व्याप्रियन्ते । तथा च तुल्यौ स्थानप्रयत्नौ यस्येति द्वंद्वगर्भो बहुव्रीहिः । यद्वा । तुल्यः आस्ये प्रयत्नो येषामिति त्रिपदो बहुव्रीहिः आस्ये इति विशेषणाद्बाह्यप्रयत्नव्युदासः । आस्यइत्येकत्वं विवक्षितम् । तद्धितान्तास्यशब्दोपादानसामर्थ्यात् । तेन भिन्नस्थानानामर्थाद्व्युदासः । यद्वा । तुल्यः आस्ये तुल्यास्यः मयूरव्यंसकादित्वात्साधुः तुल्यास्यः प्रयत्नो यस्येति विग्रहः । यद्वा । आस्ये प्रयत्नः आस्यप्रयत्नः स तुल्यो यस्येति । एकत्वविवक्षादिकं प्राग्वत् । तदेवं समासचतुष्टयमपि भाष्ये स्थितम् । द्वंद्वगर्भो बहुव्रीहिः, त्रिपदो वा । पूर्वभागे तत्पुरुषगर्भः उत्तरभागे वेति । तुल्यशब्दस्य सम्बन्धिशब्दत्वाच्च येन सह तुल्यस्थानप्रयत्नं तेन सह सवर्णमिति लभ्यते । नहि माता पूज्येत्युक्ते स्वसृतमाता भार्या पूज्यते किं तु पूजकस्यैव मातेति दिक् । तुल्यस्थानमिति किम् । तुल्यप्रयत्नानामपि कचटतपानां मा भूत् । तेन तर्ल्लेत्यत्र ञरोञरीतिपकारलोपो न भवति । यत्नग्रहणं किं, चकारञकारयोर्मा भूत् । सति हि सावर्ण्ये वाक्श्चयोततीत्यत्र शकारलोपः स्यात् । आभ्यन्तरत्वविशेषणमप्येतदर्थमेव । अस्ति हि श्वासाघोषविवारा-

रूपबाह्यप्रयत्नसाम्यं चशयोरपि । ननु अल्पप्राणत्वमहाप्राणत्वकृतो भेदोस्तीति चेत् । किं ततः । नहि सर्वप्रयत्नसाम्यं विवक्षितुं शक्यम् । अङ्कित इत्याद्यसिद्धिप्रसङ्गात् । कङ्योरपि बाह्यप्रयत्नभेदात् । सर्वप्रयत्नसाम्यं हि स्वस्य स्वेनैवायाति न तु परेण । तथा च सवर्णसंज्ञाप्रणयनमपि व्यर्थं स्यात् । अणुदित्तुल्यास्यप्रयत्नस्येत्युक्तौ सर्वसामञ्जस्यात् । झरोझरीत्युक्ते हलोयमांयर्मीत्यत्रेव यथासंख्यप्रवृत्त्या माहात्म्यामित्यादौ मकारस्येव शिण्ढीत्यादौ डकारस्यापि लोपो न स्यादिति हि सिद्धान्ते सवर्णग्रहणं कृतम् । स चाव्याप्तिदोषो यावत्प्रयत्नसाम्यविवक्षायां तदवस्थ एव स्यात् । अथ यावद्बाह्यसाम्यं यावदाभ्यन्तरसाम्यं वा विवक्ष्येत एवमपि मधुलिट्स्थानमित्यत्र झरोझरीति सलोपः स्यात् । सकारथकारयोः श्वासाघोषविवारमहाप्राणत्वरूपबाह्यप्रयत्नचतुष्टयेनापि साम्यात् । अथ स्थानप्रयत्नविवेकः । अकुहविसर्जनीयाः कंठ्याः । इचुयशास्तालव्याः । ऋटुरषा मूर्द्धन्याः । लृतुलसा दन्त्याः । उपूपध्मानीया ओष्ठ्याः । एऐ कण्ठ्यतालव्यौ । ओऔ कण्ठ्योष्ठ्यौ । वकारो दन्त्योष्ठ्यः । जिव्हामूलीयो जिव्हामूलस्थानः । अनुस्वारो नासिक्यः । यत्नो द्विधा । आभ्यन्तरो बाह्यश्च । तत्राभ्यन्तरश्चतुर्द्धा । स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता चेति । तत्र स्पृष्टता स्पर्शानाम् । ईषत्स्पृष्टता अन्तस्थानाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतता । शास्त्रीये कार्ये तु विवृतता । प्रतिज्ञायतइति अइउण्सूत्रे प्रतिपादितम् । ख्वृतः संवृता इति तु प्रातिशाख्योक्तत्वान्न सर्वसाधारणम् । ऊष्मणां स्वराणाञ्च विवृतता । एषां चतुर्णामप्याभ्यन्तरत्वं वर्णोत्पत्तिप्राग्भावित्वात् । तथा हि । नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन्नुरःप्रभृतीनि स्थानान्या-

हन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वा उत्पत्तिः तत्रोत्पतेः प्राग्यदा जिव्हाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानन्तालवादि सम्यक् स्पृशन्ति तदा स्पृष्टता। ईषद्यदा स्पृशन्ति तदा ईषत्स्पृष्टता । समीपावस्थानमात्रे संवृतता । दूरत्वे विवृतता । अत एव इचुयशानां तालव्यत्वाविशेषेपि तालुस्थानेन सह जिव्हाग्रादीनां चवर्गोच्चारणे कर्त्तव्ये सम्यक् स्पर्शः यकारे ईषत् स्पर्शः शकारेकारयोस्तु दूरेवस्थितिरित्याद्यनुभवं शिक्षाकारोक्तिं चानुसृत्य विवेचनीयम् । भाष्यकारास्तु नाज्झलावित्यस्य प्रत्याख्यानावसरे ऊष्मणां स्वराणां च ईषद्विवृतत्वं विवृतत्वं चेति वैलक्षण्यं वक्ष्यन्ति । तदप्यनुभवानुसार्येवेति सहृदयैराकलनीयम् । बाह्याः प्रयत्नाः पुनरेकादश । विवारः संवारः श्वासो नादो घोषो ऽघोषो ऽल्पप्राणो महाप्राण उदात्तोनुदात्तः स्वरितश्चेति । एते च वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वायौ उत्पद्यन्ते । अत एव बाह्या इत्युच्यन्ते । गलबिलस्य सङ्कोचात्संवारः । तस्यैव विकासाद्विवारः । एतौ च संवृतविवृतत्वरूपाभ्यां आभ्यन्ताराभ्यां भिन्नावेव । तयोः समीपदूरावस्थानात्मकत्वादित्यवधेयम् । तत्र वर्गाणां प्रथमद्वितीयाः शषसाविसर्जनीयाजिव्हामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषा वर्गयमानां प्रथमे अल्पप्राणा इतरे सर्वे महाप्राणाः वर्गाणां तृतीयचतुर्था अंतस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठा नादानुप्रदाना घोषवंतो वर्गाणां तृतीया अंतस्थाश्चाल्पप्राणा यथा तृतीयास्तथा पञ्चमा आनुनासिक्यमेषामपरो गुण इति शिक्षासु स्थितम् । संग्रहश्च । खयां यमाः खय॑कः॑पौ विसर्गः शर एव च । एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥ कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।

अयुग्मा वर्गयमगा यणश्चाल्पासवःस्मृताः॥यद्यप्येते बाह्याःप्रयत्नाः सवर्णसंज्ञायामनुपयुक्तास्तथाप्यन्तरतमत्वपरीक्षायामुपयोक्ष्यन्तइतीह आभ्यन्तरत्वविशेषणव्यावर्त्यतया व्युत्पादिताः । नन्विह सूत्रे प्रयत्नग्रहणं व्यर्थम् । तद्धितान्तास्यशब्दबलादेव तालव्यादिस्थानस्य प्रयत्नस्य च लाभादिति चेन्न । प्रत्येकं व्यापारनिरासार्थमुभयोरुपादानात् । तेन स्थानप्रयत्नोभयसाम्ये सत्येव संज्ञा न त्वन्यतरसाम्येपि । एवंस्थिते यत्फलितं तत्स्पष्टत्वार्थमुपन्यस्यते । अष्टादश अवर्णाः परस्परं सवर्णाः, एवमिवर्णोवर्णौ । ऋकारा अष्टादश । ऌवर्णास्तु द्वादशेति त्रिंशन्मिथः सवर्णाः ऌवर्णस्य दीर्घा न संतीत्युक्तत्वात् । ऋऌवर्णयोर्मिथः सावर्ण्यस्योपसंख्यानाच्च । एचस्तु द्वादश मिथः सवर्णाः न तु एकारैकारौ ओकारौकारौ वा मिथःसवर्णौ । यथा चैतत्तथा अइउणित्यत्रैव प्रतिपादितम् । अकारेणाप्येचां न सावर्ण्यम् । प्रयत्नभेदादिति इहैव सूत्रे भाष्ये स्पष्टम् । अत एव एदैतोरपि शकारेण न सावर्ण्यमिति तेषां नाञ्झलाविति सूत्रे उदाहरणत्वं नास्ति । न चात्र स्थानभेदेन विर्वाहः एचामकारेण सह कण्ठस्थानसाम्यात् । एदैतोः शकारेण सह तालुस्थानसाम्यात् । नहि यावत्स्थानसाम्यं विवक्षितम् । अमङ्णनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः यवलानां सानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च । नहि निरनुनासिकानामपि नासिकास्थानम् । येन सर्वसाम्यं स्यात् । ननु तद्धितान्तास्यशब्दबलात्तालवादिसाम्यमात्रं लभ्यते । ओष्ठात्प्रभृति प्राक्काकलकाद्धि आस्यम् । काकलकं च ग्रीवाया उन्नतप्रदेशः यं कण्ठमणिरित्याचक्षते । तत्कथं नासिकास्थानभेदेनासवर्णत्वमापाद्यतइति चेत् । नासिका हि न बाह्या वर्णोत्पत्तौ निमित्तम् । तत्र जिव्हाग्रादिव्यापारविरहात्

किं तु अन्तरास्ये विततं चर्मास्ति पणवचर्मवत् । तत्संबद्धो रेखाविशेषो नासिका । सैव वर्णोत्पत्तौ निमित्तमिति सिद्धान्तात् । तस्याश्च ओष्ठादिभ्योऽविशेषात् वर्ग्यो वर्ग्येण सवर्णः तुल्यास्यप्रयत्नत्वात् । रेफस्य रेफ एव सवर्णः एवमूष्मणामपि ऊष्माण एव सवर्णा नत्वन्ये । तुल्यास्यप्रयत्नत्वाभावात् । शषसहानां यथाक्रमं इकारऋकारलृकाराकाराः सूत्रकारमते यद्यपि तुल्यास्यप्रयत्नास्तथापि न सवर्णा नाञ्झलाविति निषेधात् । भाष्यकारमते तु प्रयत्नभेद एवेति वक्ष्यते । इह स्थानभेदादप्राप्तां सवर्णसंज्ञां विधातुं वार्त्तिकमारभ्यते । ऋकारलृकारयोः सवर्णविधिरिति । होतृलृकारः होतृकारः । उभयान्तरतमलृकारान्तरतमश्च दीर्घो न सम्भवतीति परिशेषादृकारः । स्यादेतत् । अकः सवर्णे दीर्घ इत्यत्र ऋतिऋवावचनं लृतिलृवावचनमिति वक्ष्यति । तस्यायमर्थः । अकः सवर्णे ऋतिपरे पूर्वपरयोः स्थाने वा ऋ अयमादेशो भवति । द्विमात्रोयम् । मध्ये द्वौ रेफौ । तयोरेका मात्रा । अभितोऽभक्तेरपरा । ईषत्स्पृष्टश्चायम् । तत्र प्रयत्नभेदादृकारेणाग्रहणादनच्त्वादीर्घसंज्ञाया अभावादप्राप्तोयं विधीयते । लृतिलृवेति । अयमपि द्विमात्रः ईषत्स्पृष्टश्च । मध्ये द्वौ लकारौ तयोरेका मात्रा अभितोऽभक्तेरपरा । पूर्ववदप्राप्तो विधीयते । तत्र वावचनमिति वाशब्दो दीर्घसमुच्चयार्थो भविष्यति । वा स्याद्विकल्पोपमयोरेवार्थेपि समुच्चये इत्यभिधानात् । तेनाप्राप्तएव दीर्घो भविष्यति । तर्हि सवर्णसंज्ञया । ननु लृतिलृवेत्यत्र सवर्णइत्यनुवर्त्तते न वा । आद्ये होतृलृकार इत्यत्र ऋलृवर्णयोः सवर्णसंज्ञाविधानं विना नेष्टसिद्धिः । अन्त्ये दध्लृकारो मध्लृकार इत्यादावतिप्रसङ्ग इति चेत् । न । प्रथमवार्त्तिके ऋतीत्यपनीय ऋतइति पंचम्यन्तपाठेनैव सर्वसामञ्जस्यात् ।

सवर्णइति च पूर्ववार्तिकेनुवर्त्तते । तेन धान्त्रंश इत्यादौ नातिप्रसङ्गः । द्वितीयवार्त्तिके तु सवर्णइति निवृत्तम् । ऋत इत्यनुवर्त्तते । तस्मादकः सवर्ण इत्यत्रावश्यकर्त्तव्येन वचनद्वयेनैव सकलनिर्वाहादकारलृकारयोः सवर्णविधिरितीहत्यं वार्त्तिकं व्यर्थमिति । मैवम् । इहत्यमेकं वार्त्तिकमाश्रित्य षाष्ठवचनद्वयप्रत्याख्यानस्यैव न्याय्यत्वात् । तथाहि । तद्वचनद्वयं कुर्वतापि रेफद्वयलकारद्वयगर्भयोस्तद्विधेययोरच्त्वं तावदेष्टव्यम् । तन्निर्वाहार्थं वर्णसमाम्नाये तौ पठनीयौ । अन्यथा हि विधानमात्रमनयोः स्यान्न त्वच्कार्यं प्लुतः । तद्विधाने ह्यचश्चेति परिभाषयाच इत्युपतिष्ठते । ननु ईषत्स्पृष्टस्यानच्त्वान्मा भूत्प्लुतः विवृतस्य तु ऋकारस्याच्त्वेन प्लुतः सिद्ध एवेति चेत् । सत्यम् । विवृतः प्लुतः सिद्धः ईषत्स्पृष्टौ तु प्लुतौ रेफद्वयलकारद्वयगर्भौ न सिध्यतः । अत एवाच्संज्ञामात्रेणापि न निस्तारः । ग्रहणकशास्त्रप्रवृत्तेस्तावन्मात्रेणानिर्वाहात् किं त्वण्सु पाठ एव कर्त्तव्य इत्युक्तम् । सति त्वण्सु पाठे ताभ्यां त्रिमात्रयोरपि ग्रहणात्प्लुतसंज्ञायां सत्यां पक्षे ईषत्स्पृष्टौ प्लुतौ भवतः एवंस्थिते षाष्ठं वचनद्वयं मास्तु । तद्विधेययोरपि दीर्घतयाकः सवर्ण इत्यनेनैव सिद्धेः । ननु स्थानेन्तरतमपरिभाषया विवृतस्य स्थानिनो विवृतावेव दीर्घौ स्थातां न त्वीषत्स्पृष्टाविति चेत् । न । रेफद्वययुक्तस्य स्थानिनो रेफद्वययुक्त एवादेशःसुसदृश इत्यपि हि सम्भवति तथा च किं रेफद्वययुक्तत्वमादर्त्तव्यं, किं वा विवृतत्वमित्यत्र विनिगमकाभावेन पर्यायेणोभयप्रवृत्तौ सिषाधयिषितस्य रूपद्वयस्य निर्वाहात् । लृकारेपि कदा चिद्लृकारान्तरतमो विवृतदीर्घः कदाचिद्लृकारान्तरतमो लकारद्वयगर्भ ईषत्स्पृष्ट इति सकलेष्टसिद्धेः । तदेवं षाष्ठं वचनद्वयं न कर्त्तव्यमिति स्थितम् । ननु तदेवा-

स्तु संज्ञाविधानं तु मास्त्विति चेत् । न। वचनद्वयारम्भे गौरवस्य स्पष्टत्वात्। किञ्च संज्ञाभावे ऋत्यक उपसर्गादृति उरण्रपरइत्यादिषु ऋकारेण लृकारग्रहणं न स्यात् । न चैवं सिद्धान्तेपि तवल्कार इत्यादौ रपरत्वप्रसङ्गः । रप्रत्याहारपरत्वस्य वक्ष्यमाणतया लपरत्वसिद्धेः। ऋदितामॄदितां च धातूनामनुबन्धकार्येषु सङ्करस्तु न भवति। धातूपदेशे पृथगनुबन्धकरणसामर्थ्यात्। विधिवाक्येष्वपि पृथगनुवादसामर्थ्यात् । अन्यथा हि सर्वान् ऋदित एव लृदित एव वा पठित्वा विधावपि तेनैव रूपेणानुवदेत्। सम्भवत्यैकरूप्ये वैरूप्याश्रयणायोगात् ॥

नाज्झलौ ॥ अज्झलौ मिथः सवर्णौ न स्तः । अकारहकारयोरिकारशकारयो ऋकारषकारयोर्लृकारसकारयोश्चेति स्थलचतुष्टये पूर्वसूत्रेण प्राप्तं सावर्ण्यमनेन निषिध्यते। तेनानडुहं चर्म वैपाशो मत्स्य इत्यत्र यस्येति चेति हकारशकारयोर्लोपो न । अन्यथा हि यस्येत्यनेन दीर्घाणामिव हकारशकारयोरपि ग्रहणं स्यात्। तथा दण्डहस्तः दधिशीतं कर्तृषट्कमित्यादौ सवर्णदीर्घः स्यात्। दधिसान्द्रमित्यादौ यणादेशश्च स्यात्। इहाज्झलौ कस्यापि न सवर्णौ स्त इति वाक्यार्थो न ग्राह्यः । संज्ञारम्भवैयर्थ्यापत्तेः। विहितप्रतिषिद्धत्वेन विकल्पे तु लाघवात्तुल्यास्यप्रयत्नं वेत्येव सूत्रयेत्। नाप्यचामज्भिर्हलां हल्भिः सावर्ण्यं निषिध्यते । नाज्झलावित्यत्रैव सूत्रे सवर्णदीर्घस्य झयो ह इति पूर्वसवर्णादेशस्य च निर्देशात् । ननु झलेवात्र निर्दिष्टो न तु हल्। तावतैवेष्टसिद्धेरिति चेत्तर्हि दीर्घानिर्देश एव ज्ञापकोस्तु । तेन ह्यचामज्भिः सावर्ण्यमनिषिद्धमिति ज्ञापिते परिशेषादज्झलोर्मिथो निषेध एव पर्यवस्यति। झरो झरि सवर्णइति ज्ञापकाच्च। यत्तु नाण्शलावित्येव कुतो न सूत्रितमिति । तन्न। क-

र्तृषट्कं दधिसान्द्रमित्याद्यसिद्ध्यापत्तेः । ऋलृकारयोरनण्त्वात् । ग्रहणकसूत्रातिरिक्ते पूर्व एवाणित्युक्तत्वात् । अस्तु वा परेण्, तथाप्यजपेक्षया व्यक्तिगौरवमेव स्यादित्यज्ग्रहणमपनीयाण्ग्रहणं क्रियतामिति शङ्काया गर्भस्थावेतौव गतत्वात् । शलंशे तु व्यक्तिलाघवे सत्यपि वर्णोच्चारणे विशेषो नास्तीत्येवोत्तरम् । वस्तुतस्तु नाक्शलाविल्येव सूत्रयितुमुचितम् । स्यादेतत् । शरां शर्भिरापि सावर्ण्ये निषिद्ध्येत । ते हीकारादिभिर्गृहीतत्वादच्संज्ञकाः हल्षूपदेशाद्धलश्च । न चास्मादेव निषेधादिकारादयो न सवर्णा इति वाच्यम् । एतद्वाक्यार्थबोधात्प्राक् पदार्थोपस्थितेरावश्यकतया तस्यामवस्थायामिकारादिभिः शरामुपस्थापनस्य दुर्वारत्वात् । ततश्च परश्शताः रामष्षष्टः यशस्सारमित्यादौ झरोझरीत्यस्य प्रवृत्तिर्न स्यात् । ततश्चैकैकत्र शर्त्रयं श्रूयेत । इष्यते तु द्वयम् । तथा च पूर्वपक्षवार्त्तिकम् । अज्झलोः प्रतिषेधे शकारप्रतिषेधोज्झलत्वादिति । अत्र शकारग्रहणं शरामुपलक्षणम् । किञ्चावर्णस्याष्टादशधा भिन्नस्य परस्परं सावर्ण्यं न स्यात् । ततश्च दण्डाग्रमित्यादौ दीर्घो न स्यात् । तथाहि । हकारेण ग्रहणादकारो हल् अक्षु पाठाच्चाच् । न चास्मिन्नेव सूत्रे एतस्य प्रवृत्तिः । येन ग्रहणकशास्त्रमसावर्ण्यान्न प्रवर्त्तेतेति । अत्र सिद्धान्तं वार्त्तिककार एवाह । सिद्धमनच्त्वाद्वाक्यापरिसमाप्तेर्वेति । तत्र सूत्रमत्याख्यानेनोत्तरं प्रथमवार्त्तिकेभिप्रेतम् । तथाहि । शिक्षावाक्ये विवृतमूष्मणामिति योगो विभज्यते । तत्र चेषदित्यनुवर्त्तते । स्वराणाञ्चेति विवृतमित्यनुवर्त्तते । ईषदिति निवृत्तम् । तथा च प्रयत्नभेदादूष्मस्वरयोः सावर्ण्याप्राप्तौ किं सूत्रेण । तथा च शरामनच्त्वादेव सिद्धमित्यर्थः । उपलक्षणञ्चेदमकारस्याहल्त्वादित्यपि बोध्यम् । सूत्रा-

रम्भमभ्युपेत्येदम्। वस्तुतस्तूक्तरीत्या सूत्रमेव नारम्भणीयमित्यर्थः। ईषदित्यस्याननुवृत्तिं समानप्रयत्नताञ्च स्वीकृत्य सूत्रारम्भपक्षेप्याह। वाक्यापरिसमाप्तेर्वेति। अयमाशयः। इह पूर्वं वर्णानामुपदेशः तत इत्संज्ञा। तत आदिरन्त्येन सहेतेति प्रत्याहारसिद्धिः ततो नाञ्झलावित्येतद्वाक्यार्थबोधः। ततोपवादविषये परिहारेण सवर्णसंज्ञानिश्चये सति ग्रहणकशास्त्रप्रवृत्तिः। न त्वेतत्सूत्रनिष्पत्तिसमये। अन्यथा तत्सूत्रेणैवेकारशकारादीनां सावर्ण्यनिषेधादिकारेण शकाराग्रहणे सत्यञ्झल्त्वादिति हेतोरसिद्ध्या त्वदीयः पूर्वपक्षो ऽसम्भवदुक्तिक एव स्यात्। अथ पदार्थज्ञानस्य वाक्यार्थबोधहेतुतयैतद्वाक्यस्थपदार्थबोधकाले एतद्वाक्यार्थग्रहाभावादिह सूत्रे इकारेण शकारग्रहः स्यादेवेतः पूर्वं सावर्ण्यनिषेधाग्रहादिति ब्रूषे तर्हीतः पूर्वं ग्रहणकशास्त्रमेव न निष्पन्नमिति कथं न पर्यालोचयेः। नन्वेवं तुल्यास्यप्रयत्नं नाञ्झलावित्यादावकः सवर्णे दीर्घ इति दीर्घोपि न प्रवर्त्तेतेति चेन्न। सवर्णसंज्ञाद्युत्तरकाले प्रवर्त्तमानस्य दीर्घशास्त्रस्य दण्डाढकादाविवेहाप्यप्रतिबद्धप्रवृत्तिकत्वात्। उद्देश्यतावच्छेदकरूपाक्रान्तत्वाविशेषात्। न च सवर्णदीर्घविधानात्प्रागेतत्सूत्रार्थबोधानुपपत्तिरिति वाच्यम्। पदार्थोपस्थितिप्रभृतिसामग्रीसम्पत्तौ सत्यां साधुत्वबोधकवाक्यार्थज्ञानविलम्बेन शाब्दबोधे विलम्बादर्शनात्। अन्यथा व्याकरणशास्त्रपरिशीलनविकलानां क्वापि शाब्दबोधो न स्यात्। तथा वैयाकरणानामपि व्याकरणसूत्रघटकशब्देषु व्याकरणादेव साधुत्वबोधे तदुत्तरकाले च वाक्यार्थावगताबात्माश्रयान्योन्याश्रयचक्रकाणां दुर्वारत्वादिति दिक्। साधुत्वज्ञानं तु न शाब्दबोध हेतुः। अस्तु वाभियुक्तवाक्यत्वेन साधुत्वानुमितिः, ततः शाब्दबोधे जाते लक्ष्या-

न्तरेष्वेव लक्षणवाक्यान्तर्गतेष्वपि लक्षणप्रवृत्तिरिति दिक्। वस्तुतस्तु शरां परस्परं सावर्ण्यनिषेधे सत्यापे न क्षतिः। परः शतादिषु हि रूपद्वयं सिद्धान्तेपीष्यते। शतात्पराणीति विग्रहे कर्तृकरणे कृता बहुलमिति बहुलवचनाद्वा सुप्सुपेति वा समासे कृते पारस्करादित्वात्सुटि सकारस्य श्चुत्वम्। ततो ऽनचि चेति द्विर्वचनम्। ननु शरोचीत्यनचीति वा द्वित्वनिषेधोस्त्विति चेन्न। तत्र नाज्झलाविति निषेधादिकारेण शकाराग्रहणात्। ततो झरोझरीति लोपविकल्पाद् द्विशकारं त्रिशकारं वा रूपमिति सावर्ण्यनिषेधेपि सिद्धत्येवेदं रूपद्वयम्। अनचि चेति द्वित्वस्यापि वैकल्पिकत्वात्। तत्र द्वित्वस्य वैकल्पिकत्वं यरोनुनासिके ऽनुनासिको वेत्यतो वेत्यनुवर्तनात्सर्वत्र शाकल्यस्येति पाक्षिकनिषेधाद्वा। लोपस्य वैकल्पिकत्वं तु झयो होन्यतरस्यामित्यतोन्यतरस्यांग्रहणानुवृत्तेरित्यवधेयम्। तस्मात्सावर्ण्ये सत्यसति वा परश्शता इति द्विशकारकत्रिशकारकरूपयोरविशेषः। परश्शताद्यास्ते येषां परा संख्या शतादिकादित्यमरः।एवं रामष्षष्ठोयशस्सारमित्यादावपि। अत एव भाष्ये, अपर आहेत्युपक्रम्य वार्त्तिकद्वयमप्येकहेतुतया व्याख्याय,अस्तु वा ग्रहणमिकारादिभिः शकारादीनामिति वाक्यशेषाध्याहारेण प्रतिज्ञाविकल्पार्थो वाशब्द इति व्याख्यातम्। तत्र अपर आहेत्यपरितोषोद्भावनम्। तद्बीजन्तूक्तरीत्या शर्षु सावर्ण्यनिषेधानिषेधयोः फलाविशेषेपि प्रागुक्तरीत्या दंड्राग्रमित्यादि न सिद्धयेत्। तदर्थं च सूत्रप्रत्याख्यानस्य वाक्यापरिसमाप्तिन्यायस्य वाश्रयणे आवश्यके शरां शर्भिः सावर्ण्याभावाभ्युपगमो निर्मूल एवेति। स्यादेतत्। अगृहीतसवर्णानामेव नाज्झलाविति निषेध इति तावत्स्थितम्। तथा चेकारादीनां शकारादिभिः सावर्ण्या-

निषेधात्कुमारी शेतइत्यादौ सवर्णदीर्घः स्यादित्याशंक्याचीस्यनुवृत्त्या समाहितम्। एवं स्थिते मालास्वित्यादौ षत्वं स्यात्। हकारेणाकारग्रहणे सति गौरीष्वित्यादिवदिणः परत्वानपायात्। किञ्च। विश्वपाभिरित्यत्र होढइति ढत्वं स्यात्। वागाशीरित्यत्र झयो होन्यतरस्यामित्याकारस्य धकारः स्यात्। गासीध्वमित्यत्र इणः षीध्वमिति मूर्द्धन्यादेशः स्यात्। दासीष्टेत्यादौ दादेर्धातोर्ध इति धत्वं स्यात्। राम आयातीत्यादौ हशि चेत्युत्वं स्यात्। देवा आयान्तीत्यादौ हलि सर्वेषामिति नित्यो यलोपः स्यात्। चाखायितेत्यादौ यस्य हल इति यलोपः स्यात् श्येनायितेत्यादौ क्यस्य विभाषेति लोपः स्यात्। निचाय्येत्यादौ हलो यमामिति यलोपश्च स्यादिति बहूपप्लुवप्रसङ्गः। अत्रोच्यते। आकारो न हकारस्य सवर्णः। ततोप्याकार इति। अइउण्सूत्रोदात्तशिक्षारीत्या भिन्नप्रयत्नत्वात्। सवर्णेणग्रहणमपरिभाष्यमाकृतिग्रहणादिति वार्त्तिकमते तु हकाराकारयोरेकजात्यनाक्रान्तत्वादेव नातिप्रसङ्गः। यद्वा ऽऽकारसहितोच् आच् स च हल् च आज्झलाविति सूत्रे आकारप्रश्लेषो व्याख्येयः। तेनाकारस्याचां च हल्भिः सह सावर्ण्यं निषिध्यते। आकारप्रश्लेषे लिङन्तु कालसमयवेलासु तुमुनित्यादिनिर्देशाः। अत्र पक्षे आश्च आश्चेति द्वंद्वेन सवर्णदीर्घेण च नाज्झलाविति सूत्रे दीर्घात्परः प्लुतोपि निर्दिष्ट इति व्याख्येयम्। तेन यियासो इत्यादौ गुरोरनृतइति प्लुतादाकारात्परस्य सनः सस्य षत्वं नेत्यवधेयम्। भाष्यमतेतूष्मणामीषद्विवृततास्युपगमेन सावर्ण्यप्रसक्तिरेव नास्तीति सूत्रप्रत्याख्यानात्सकलमनाविलम्॥

इति शब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादेचतुर्थमान्हिकम् ४

ईदूदेद्द्विवचनं प्रगृह्यम्॥ ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ विष्णू इमौ गङ्गे अमू। तपरकरणमसन्देहार्थमिति वृत्तिकाराः। अन्यथा हि यणादेशे कृते ह्रस्वस्यायं निर्देश इत्यपि सम्भाव्येत। ततश्चाकुर्वद्यत्रेत्यादावतिप्रसङ्गः स्यादिति भावः। भाष्ये तु व्यक्तिः पदार्थो भेदकाश्च गुणा इति पक्षमाश्रित्य गुणान्तरयुक्तानां दीर्घाणां संग्रहार्थं तपरकरणमित्युक्तम्। इदञ्चेदिति प्रथमतकारस्यैव फलमित्यवधेयम्। तावतैव ऊकारेपि सिद्धेः। तात्पर इति पञ्चमीसमासपक्षस्यापि स्थितत्वात्। एकारस्य त्वणत्वादेवाणुदित्सूत्रेण सवर्णग्राहकतासिद्धेः। ईदूतोः परमनणत्वाद् गुणान्तरयुक्तसंग्रहाय युक्तो यत्नः। तस्माद्भाष्यमतेपि ऊदेतोस्तपरकरणमसन्देहार्थमेव गुणानामभेदकत्वे त्वीदित्यपि तथेत्यभिप्रेत्यैकरूप्यं वृत्तिकृद्भिरुक्तम्। इह तपर इति सूत्रे पञ्चमीसमासो मास्त्वित्यभिप्रेत्य ऊदिति तथा ऽतपर एवैकारो निर्दिष्ट इत्यपि सुवचम्। स्यादेतत्। असन्देहायापि क्रियमाणन्तपरत्वं प्लुतं व्यावर्त्तयेदेव। घटायोन्मीलितं चक्षुः पटं न हि नपश्यतीति न्यायात्। अथायं दकारः ऋदोरबितिवदिति चेत्। एवमप्येकारो गृह्यातु प्लुतम्। अणत्वात्। न त्वीदूतौ। वाक्यापरिसमाप्तिन्यायेनानणत्वात्। जातिपरो निर्देश इति चेत्। तर्हि ह्रस्वेप्यतिप्रसक्तिः। दीर्घव्यक्तिरपि विशेषणीभूता विवक्षितेति चेत् कथं तर्हि प्लुतसंग्रहः। न च प्लुतव्यावृत्तिरिष्टैवेति वाच्यम्। अग्नी ३ इतीत्यत्राप्लुतवदुपस्थितइति सूत्रेण प्लुतत्वप्रयुक्ते प्रकृतिभावे निषिद्धेपि प्रगृह्यत्वप्रयुक्तस्य तस्येष्यमाणत्वात्। अप्लुतवदित्यस्य तु देवदत्तेतीत्यादौ चरितार्थत्वाद्वैयर्थ्यं न शंक्यम्। तथा च षाष्ठे वार्त्तिकम्। वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गोन्येन विहितत्वादिति। अ-

त्राह भाष्यकारः। यथोद्देशं संज्ञापरिभाषमित्याश्रयणात् प्रगृह्यसंज्ञां प्रति प्लुतोसिद्धः। तथा च द्विमात्रत्वबुद्धेरप्रतिघातात् सिद्धा संज्ञा कार्यकालपक्षे परं प्रगृह्यसंज्ञाया अप्यणो प्रगृह्यस्येत्येतदेशतया तां प्रति प्लुतस्य सिद्धत्वेनानुनासिकः प्रवर्त्तेतैवेति स्यादेव दोषः। एतेनाग्नी ३ इतीत्यादौ प्रकृतिभावोपि व्याख्यातः। प्लुतप्रगृह्या अचीति ज्ञापकात्स्वरसन्धिषु प्लुतस्य सिद्धत्वेपि संज्ञां प्रत्यसिद्धत्वानपायात्। यथोद्देशपक्ष एवेहाश्रीयतइत्युक्तत्वात्। वस्तुतस्त्वनुनासिकप्रवृत्तिभयेनैवेह यथोद्देशपक्षाश्रयणम्। प्रकृतिभावस्तु कार्य्यकालपक्षेपि सूपपादः। न च प्रगृह्यः प्रकृत्येत्यनेनैकवाक्यतापन्नां संज्ञां प्रति प्लुतस्य सिद्धतया त्रिमात्रस्य संज्ञा दुरुपपादेति वाच्यम्। प्लुतस्य सिद्धतायां बीजाभावात्। यत्तूक्तं प्लुतः प्रकृत्येत्येतदेव ज्ञापकमिति। तन्न। प्लुतशब्देन तत्स्थानिनो लक्षणया सर्वसामञ्जस्यात्। न चैवं लक्षणैव दोष इति वाच्यम्। श्रुतार्थापत्तिमूलकवाक्यान्तरकल्पनापेक्षया लक्षणाया एवाभ्यर्हितत्वात्। अस्तु वा विशेषापेक्षं ज्ञापकम्। सिद्धः प्लुतः प्लुतत्वप्रयुक्ते प्रकृतिभावइति न तु प्रगृह्यत्वप्रयुक्तेपि। तस्मात्कार्य्यकालपक्षमाश्रित्य प्रकृतिभावस्य समर्थयितुं शक्यत्वेप्यनुनासिकप्रवृत्तिवारणायैवेह यथोद्देशपक्षाश्रयणमिति स्थितम्। अत्र हरदत्तः। यद्यपि संज्ञायामसिद्धः प्लुतस्तथाप्यनुनासिकपर्युदासे सिद्ध एव, ततश्च यस्यानेन संज्ञा कृता द्विमात्रस्य न सोनुनासिकविधौ स्थानी किन्तु त्रिमात्रः। न च स्थानिवद्भावात्तस्यापि प्रगृह्यत्वम्। अल्विधित्वात्। किञ्चावश्यं सिद्धः प्लुतः स्वरसन्धिष्वित्याश्रयणीयम्। दण्ड आढकमिति प्लुतस्य दीर्घेण निवृत्तिर्यथा स्यात्। अत एव सुश्लोका ३ इति सुश्लोकेतीत्यत्र गुणो भवन् प्लुतमेव निवर्त्तय-

ति न तु स्थानिनम्। अन्यथा त्यादेशरूपे प्लुतः श्रूयेत तदिह यथोद्देशेपि संज्ञापरिभाषे कथमिवेष्टसिद्धिः, कथं वा ग्रन्थेषु न पूर्वापरविरोध इति विपश्चितः प्रष्टव्या इति। अत्राहुः। यद्यपि द्विमात्रस्त्रिमात्रेणापत्तदतस्तथापि पूर्वत्रासिद्धमिति शास्त्रासिद्धत्वबोधनात्त्रिमात्रेपि द्विमात्र एवायमिति बुद्ध्या प्रगृह्यसंज्ञा क्रियते। अत एवामुनेत्यत्र मुत्वे कृते तदुपजीवनेन नाभावे च कृते सुपि चेति दीर्घो मुशब्दएव दशब्दोयमिति बुद्ध्या प्राप्नोति तत्परिहाराय तन्त्रावृत्त्याद्याश्रयणेन नाभावे कर्त्तव्ये कृते च सति मुभावो नासिद्ध इत्यष्टमे व्याख्यातम्। कृन्मेजन्तसूत्रे च सन्निपातपरिभाषया समाहितम्। न त्विह द्विमात्रे कृतां संज्ञां स्थानिवद्भावेन त्रिमात्रे आनयामः, येनानल्विधाविति निषेधः शङ्क्येत। न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति युक्तम्। एतावानेव परे विशेषः रजतभ्रमो ऽनाहार्य्यः प्रवर्त्तकः इह तु शास्त्रप्रामाण्यादाहार्यारोपोपि तत्तच्छास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति। तदेतत्कैय्यटेनैव स्फुटीकृतम्। यदाह शास्त्रासिद्धत्वाश्रयणाच्च प्लुतबुद्धावसत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रत्वबुद्धिः प्रवर्त्तते। तथा च वक्ष्यति, असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चेति। षत्वतुकोरसिद्ध इत्येतत्सूत्रस्थं वार्त्तिकमिदम्। उत्सृज्यते निवर्त्यते आदेशेनेत्युत्सर्गः स्थानी स लक्षणं निमित्तं यस्य कार्यस्य तुगादेस्तस्य प्रवृत्त्यर्थमित्यर्थः। तथा चैकरूप्यार्थं सर्वत्र शास्त्रासिद्धत्वमेवेति भावः। एतेन यस्यानेन संज्ञा कृता न सोनुनासिकविधौ स्थानीति प्रथमदूषणमुद्धृतम्। यदपि दण्डाढकं सुश्लोकेतीत्यादावादेशः प्लुतः श्रूयेतेति। तदपि न। उक्तरीत्या तत्राप्यादेशेन प्लुतस्यैव निवृत्तेः। प्लुतो मया पठ्येयतइति

बुद्धिः परं तस्य नास्तीत्यन्यदेतत्। यत्तु षष्ठे भाष्यकारो वक्ष्यति, सिद्धः प्लुतः स्वरसन्धिष्विति तत्त्विहानुनासिकपर्य्युदासानुरोधाद्यथोद्देशपक्ष एवाश्रयणीय इति स्थिते स्वरसन्धिसामान्यापेक्षज्ञापकाश्रयणेपि न दोष इत्याशयेन, न तु सामान्यापेक्षतायामेव किञ्चिदाग्रहे बीजमस्तीति दिक्। ननूदाहरणेष्वीदादिकमेव द्विवचनं न तु तदन्तमिति चेन्न। व्यपदेशिवद्भावेन तदन्तत्वात्। नन्वीदूदन्तं द्विवचनान्तमित्येव कथं न व्याख्यातम्। एवं हि सति व्यपदेशिवद्भावो नाश्रयणीय इति चेन्न। कुमार्योरगारं कुमार्यगारं वध्वोरगारं वध्वगारमित्यत्र प्रत्ययलक्षणेन द्विवचनान्तोतिव्याप्तेः। संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति सुप्तिङन्तं पदमित्यत्रान्तग्रहणेन ज्ञापितत्वाच्च। एतेनेदाद्यन्तं यद् द्विवचनं तदन्तम्प्रगृह्यं,कुमार्य्यगारादौ तु सकारान्तं द्विवचनं नत्वीदाद्यन्तमिति परास्तम्। संज्ञाविधौ प्रत्ययग्रहणे तदन्ताग्रहणात्। यत्त्वस्मिन्पक्षे दूषणान्तरमुक्तम्। अशुक्ले शुक्ले समपद्येतां शुक्ल्यास्तां वस्त्रेइत्यत्र शब्दान्तरप्राप्त्या ऽनित्यं लुकं बाधित्वा परत्वाच्छीभावे कृते तस्य लुकि प्रत्ययलक्षणेन शुक्लीत्यस्य प्रगृह्यता स्यादिति। तन्न। अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधतइति परिभाषयौकारस्यैव लोपात्। तस्य चेदाद्यन्तत्वविरहात्। अस्तु तर्हि ईदादिविशेष्यं, तथा च द्विवचनसंज्ञं ईदादि प्रगृह्यमित्यर्थ इति चेन्न। गङ्गे इत्यादेः सिद्धावपि दृश्येते इत्याद्यसिद्धेः। द्विवचनावयवो ह्ययमेकारो न तु द्विवचनम्। किञ्च प्रगृह्यमित्यस्य सन्निहितत्वाद् द्विवचनमेव संज्ञि न त्वीदादिः, विप्रकृष्टत्वात्। तस्माद्यथाव्याख्यानमेव मनोरमम्। अत्र वृत्तिकाराः। मणीवादीनां प्रतिषेधो वक्तव्य इति पठित्वा मणीव रोदसीव दम्पतीव जम्पतीवेत्युदाजह्रुः। सुनित्र-

यानुक्तत्वादप्रमाणमिदमिति कैयटादयः। एवं वदद्भिः समानन्यायतयाऽन्येषां मुनित्रयानुक्तानां वृत्तिकृन्मात्रोक्तानां तुरीयस्येष्टिः शंसिदुहिगुहिभ्यो वा क्रमेके छन्दसि, भाषायां च अङ्गात्रकण्ठेभ्यस्त्विष्यतइत्यादीनामनादर्त्तव्यतोक्ता। मणीवोष्ट्रस्य लम्बेते इति तु इवार्थकेन वाशब्देन निर्वाह्यमित्याहुः। न्यासकारस्तु सम्बुद्धौ शाकल्यस्येताविति शाकल्यग्रहणस्य सिंहावलोकितन्यायेनेह सम्बन्धाद्व्यवस्थितविभाषाश्रयणाच्चेदं लभ्यतइत्याह। के चित्त्विवार्थेयं वशब्दः प्रयुक्तो भीमो भीमसेन इतिवत्। कादंम्बखण्डितदलानिव पङ्कजानीत्यादिवच्चेत्याहुः। वस्तुतस्तुवद्वा यथा तथैवं साम्यइत्यमरग्रन्थे ववेति पाठमाश्रित्य शात्रवं व वपुर्यश इति कालिदासप्रयोगस्य तद्व्याख्यातृभिरुदाहरणात्सर्वं सुस्थम्। युक्तश्चायमेव पाठः। प्रातिपदिकप्रक्रमे तद्धितस्य वतेरननुगुणत्वात्। एतेन स्फुटोत्पलाभ्यामलिदम्पतीव विलोचनाभ्यां कुचकुड्मलाशया। निपत्य विन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुरिति श्रीहर्षप्रयोगोपि गतार्थः॥

अदसोमात्॥ अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। न चामू इत्युदाहरणं पूर्वसूत्रेण गतार्थमिति वाच्यम्। तस्मिन् कर्त्तव्ये मुत्वस्यासिद्धत्वात्। अदसोमादिति सूत्रं प्रति तु नासिद्धत्वम्। आरम्भसामर्थ्यात्। तथा च वार्त्तिकम्। आश्रयात्सिद्धत्वं च यथा रोरुत्वे इति। पुंवद्वचनमेवोदाहरणं स्त्रीनपुंसकयोर्द्विवचने तु मुत्वस्यासिद्धत्वेप्येकारान्तत्वात्पूर्वेणैव सिद्धा संज्ञा। ततश्च प्रकृतिभावोनुनासिकपर्य्युदासश्च सिद्ध एवेत्यवधेयम्। यत्तु हरदत्तेनोक्तमोप्रगृह्यस्येत्यत्रोपस्थितेन पूर्वसूत्रेण संज्ञायां क्रियमाणायां मुत्वस्य सिद्धत्वाल्लिङ्गत्रयेपि द्विवचनेनुनासिकपर्युदासः पूर्वेणैव सिद्धः।

एतत्सूत्रारम्भस्त्वद्विवचनार्थः पुंसि द्विवचने प्रकृतिभावार्थश्चेति। तच्चिन्त्यम्। प्लुतसंग्रहानुरोधेन पूर्वसूत्रे यथोद्देशपक्षस्यैव स्थापितत्वात्। तस्मात् पुंसि द्विवचनेनुनासिकपर्युदासोप्येतत्सूत्रस्य फलं न तु प्रकृतिभावमात्रामित्यवधेयम्। अथापि कथञ्चिद्धरदत्तोक्तिस्समर्थयितव्येत्याग्रहस्तर्हि इत्थं समर्थनीया। पूर्वसूत्रे कार्यकालपक्ष एवास्तु। न चैवं प्लुतस्यानुनासिकपर्युदासो न स्यादिति वाच्यम्। ईई ३ त् ऊऊ ३ दिति दीर्घात्परभागे प्लुतस्यापि प्रश्लिष्टनिर्देशात्। एकारस्त्वण्त्वादेव प्लुतं ग्रहीष्यति। न च तादपि परस्तपर इति तत्कालग्रहणापत्तिः। ऋदोरबितिवदकार एवायमित्याशयात्। युक्तञ्चैतत्। यथोद्देशपक्षे प्लुतात् प्रागेव संज्ञाप्रवृत्तौ सत्यां ततः प्लुते कृते तमेव द्विमात्रत्वेन पश्यन्त्या अपि संज्ञायाः पुनः प्रवृत्तौ बीजाभावात्। नाभावस्तु मुभावात्प्रागप्राप्तस्ततो मुत्वनिमित्तकं नाभावमाश्रित्य मुभावे दशब्दोयमिति बुद्ध्या प्राप्नुवन् दीर्घः प्रतिविधीयतइत्युचितम्। नत्वसौ प्लुतात् प्राक् प्रगृह्यसंज्ञावन्मुभावात् प्रागेव प्रवृत्तो येन पुनर्न प्रवर्त्तेत। एतेन पूर्वसूत्रस्थहरदत्तग्रन्थोप्युज्जीवित इति यावद्धार्यं साधु। भाष्यकैयटयोस्त्वयं भावः। प्लुतात् प्राक् प्राप्तापि प्रगृह्यसंज्ञा फलाभावान्न क्रियते। न च प्लुतेनुनासिकप्रवृत्तिरेव फलमस्त्विति वाच्यम्। संज्ञाया अप्रवृत्तावपि तल्लाभात्। प्रगृह्यत्वप्रयुक्तपर्युदासस्यैव विधिस्पृष्टस्य तत्फलत्वौचित्याच्चेति। सुश्लोकेतीत्यादावप्यमन्तरङ्गत्वाप्लुतः अन्तरङ्गम्बलीय इति न्यायात्। प्रकृतमनुसरामः। नन्वारभ्यमाणेप्यस्मिन् सूत्रे पूर्वसूत्रेणैकरूप्यार्थं यथोद्देशपक्ष एवाश्रयणीयः। तथा च रुत्वस्योत्वं प्रतीव प्रगृह्यसंज्ञां प्रत्येव मुत्वमीत्वयोः सिद्धत्वं स्यात्। नत्वयादीन् प्र-

त्यपि। ततश्चामी आसतइत्यत्रायादेशप्रसङ्गः। अमू आसातइत्यत्र पुंस्यावादेशः। अमी अत्रेत्येङः पदान्तादतीत्येकादेशप्रसङ्गश्च। न च संज्ञां प्रत्येव सिद्धत्वे वचनानर्थक्यं स्यादिति वाच्यम्। अनुनासिकपर्युदासेन चरितार्थत्वात्। अत्रोच्यते। यद्यनुनासिकपर्य्युदासमात्रं प्रयोजनं स्यात्तर्हि संज्ञासूत्रं न प्रणयेत्। अणोप्रगृह्यस्यानुनासिकः, अदसो नेत्येव ब्रूयात्। असौ अमुके अमुकाभ्यामित्यादौ तु सिद्धान्तेपि न भवत्यनुनासिकः। अनण्त्वादनवसानत्वाच्च। अतस्तत्र माद्भ्रहणमीदूद्भ्रहणं वा न कर्त्तव्यम्। न चैवं हे अमुक इत्यत्रापि निषेधापत्तिः। त्यदादीनां सम्बोधनविभक्तिविरहस्यौत्सर्गिकत्वात्। अतः संज्ञारम्भसामर्थ्यात्प्रकृतिभावार्थत्वमप्यस्य विज्ञायते। तद्बलाच्चायादिविरहोपि सिद्ध्यति। प्रकृतिभावस्यापवादरूपतयोपसञ्जातनिमित्तोप्युत्सर्ग उपजनिष्यमाणनिमित्तेनाप्यपवादेन बाध्यतइति परिभाषावताराच्च। यत्तु संज्ञारम्भसामर्थ्यादयादीन्संज्ञां च प्रति मुत्वमीत्वयोः सिद्धत्वज्ञापनादयादीन् बाधित्वा परत्वान्मुत्वमीत्वेइति तन्न। अयाद्यभावस्य ज्ञापने लाघवात्। अर्थापत्तिर्हि साक्षादुपपादकविषयतौत्सर्गिकी। किञ्च मुत्वमीत्वयोरेकपदाश्रयत्वेन बलीयस्त्वम्। अन्तरङ्गम्बलीय इति न्यायात्। तत्कथं विप्रतिषेधोपन्यासः। नाजानन्तर्य्यइति निषेधस्त्वसिद्धं बहिरङ्गमित्यस्यैव न तूदात्तपरिभाषायाः। यद्यप्यसिद्धं बहिरङ्गमन्तरङ्गइत्यनयैव गतार्थत्वादन्तरङ्गम्बलवदिति पृथक् परिभाषा न कर्त्तव्येति विप्रतिषेधे परमितिसूत्रे भाष्यकृद्वक्ष्यति। तथाप्यभ्युच्चयमात्रं तत्, सापवादनिरपवादत्वाभ्यां फले विशेषात्। वृक्ष इहेत्यत्र हि सप्तम्येकवचनेन सह गुणोन्तरङ्गः। सवर्णदीर्घत्वं तु बहिरङ्गम्। न चेहासिद्धपरिभाष-

या गुणो लभ्यते। नाजानन्तर्य्यइति निषेधात्। अत एवाचः परस्मिन्निति सूत्रे भाष्यकृद्वक्ष्यति। आरभ्यमाणे नित्योसौ परश्चासौ व्यवस्थया। युगपत्सम्भवो नास्ति बहिरङ्गेण सिद्धयतीति॥ एतच्च तत्रैव स्फुटीकरिष्यते। अत एवोक्तं वार्त्तिककृता, शचङन्तस्यान्तरङ्गलक्षणत्वादिति। धियति अदुद्रुवदित्यादि च तत्रोदात्तम्। ज्ञापकं चात्र ओमाङोश्चेत्याङ्ग्रहणम्। तद्धि खट्वा आ ऊढेत्यत्र परमपि सवर्णदीर्घं बाधित्वा धातूपसर्गयोः कार्यमन्तरङ्गमित्यन्तरङ्गत्वाद् गुणे कृते वृद्धिप्राप्तौ सत्यां पररूपं यथा स्यादिति क्रियते। एतच्च सम्प्रसारणाच्चेति सूत्रे भाष्ये स्पष्टम्। कथं तर्हि वार्तिककृतोक्तं विप्रतिषेधाद्वेति। सत्यम्। अत एवापरितोषाद्भाष्यकारेणाथवेति पक्षान्तरमाश्रितमिति दिक्। मात्किम्। अमुकेत्र। नन्विह सूत्रे ईदूतावेवानुवर्त्तितौ नत्वेकारः। सत्यम्। सति माद्ग्रहणे एकारो नानुवर्त्तते। अदसो मात् परस्य तस्यासम्भवात्। अन्यथा त्वनुवर्त्तेत। एकदेशानुवृत्तिस्तु दुर्ज्ञाना। तस्मादेकारानुवृत्तितात्पर्यग्राहकफलकं माद्ग्रहणमिति स्थितम्। अत्रेदं चिन्त्यम्। ईदूतौ सप्तम्यर्थे प्रगृह्यौ, अदसः, एच्च द्विवचनमित्येव कुतो न सूत्रितम्। एवं हि पूर्वसूत्रस्थमीद्ग्रहणं प्रकृतसूत्रे माद्ग्रहणं च न कर्त्तव्यमिति महल्लाघवम्। एकदेशानुवृत्तिश्च नाश्रयणीया भवतीति॥

शे॥ अयं प्रगृह्यः स्यात्। अस्मे इन्द्राबृहस्पती। चतुर्थीबहुवचनस्य स्थाने सुपां सुलुगिति सूत्रेण शेआदेशः। शित्वात्सर्वादेशः शेषे लोपः। न युष्मे वाजबन्धवः। युष्मास्वित्यर्थः। अत्र पदपाठकाले युष्मे इत्युदाहरणं बोध्यम्। संहितायान्त्वच्परत्वाभावेन सत्यसति वा प्रगृह्यत्वे विशेषालाभात्। एवं त्वे

रायः सुदुघास्त्वे ह्यश्वा इत्यादीनामपि पदपाठकाले उदाहरणत्वं बोध्यम्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्। तेनेह न। काशे कुशे वंशे हरिशे बभ्रुशे। हरिबभ्रुआभ्यां लोमादित्वाच्छप्रत्ययः। ततः सप्तम्येकवचनम्॥

निपातएकाजनाङ्॥ एकोऽनिपात आङ्भिन्नः प्रगृह्यः स्यात् अनिषेधाधिक्षेपयोः। अ अवद्यं, इ विस्मये, इ इन्द्रः, उ जुगुप्सासंतापान्वर्थाप्यर्थेषु। उ उमेशः। एकाजिति कर्मधारयः वर्तिपदार्थप्राधान्येनान्तरंगत्वात्। व्याहरति मृग इत्यादिनिर्देशाच्च। तेनेह न। प्रेदं ब्रह्मबृत्रतूर्येष्वाविथ। प्रेद्ध इत्यादि। स्यादेतत्। यद्ययं कर्मधारयस्तर्हि एकग्रहणं व्यर्थम्। निपातो योच् इत्येतावतैवाभिमतसिद्धेः। न च विपरीतविशेषणविशेष्यभावेनाजंतो यो निपात इत्यर्थः स्याद्विशेषणेन तदन्तविधेरिति वाच्यम्। तथासति व्यावर्त्यालाभेन विशेषणवैयर्थ्यापत्तेः। न च हलन्तं व्यावर्त्यम्। तस्य संज्ञायां सत्यामपि बाधकाभावात्। न च पुरोस्तीत्यादौ हलन्तस्य संज्ञायां सत्यां प्रकृतिभावाद्रोरुत्वं न स्यादिति वाच्यम्। प्रगृह्यसंज्ञां प्रति रुत्वस्यासिद्धतया दोषाभावात्। न च सान्तस्य कृता प्रगृह्यसंज्ञा एकदेशविकृतस्यानन्यतया रेफान्तस्यापि स्यादेवेति प्रकृतिभावप्रसङ्गस्तदवस्थ एवेति वाच्यम्। प्रगृह्यसंज्ञां प्रतीव प्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वात्। सकारान्तस्य तु न किंचिदपि सिद्धकांडस्थं प्राप्नोति तत्प्रकृतिभावेन व्यावर्त्येत। तस्मादचो निपातस्य विशेषणेऽजग्रहणं व्यर्थमेव स्यादिति सुष्ठूक्तम्। नन्वजन्तस्यैव यथा स्यादजमात्रस्य मा भूदित्येवमर्थं विशेषणं किन्न स्यादिति चेन्न। व्यपदेशिवद्भावेन स्याप्यजन्तत्वानपायात्। विशेषणसामर्थ्याद्व्यपदेशिवद्भावो न वर्त्ततइति चेन्न। तदन्तविधिपरित्यागे-

नापि तत्सार्थक्यस्य सुवचत्वात्। तथाप्यन्यतरपरित्यागे आवश्यके विनिगमकं किमिति चेदाङ्ग्रहणमेवेत्यवेहि। तद्धि व्यपदेशिवद्भावमात्रबाधे व्यर्थं स्यात्। तस्मादचो विशेषणत्वेनाङ्ग्रहणाज्ज्ञापकात्तदन्तविधिर्न। अचो विशेष्यत्वे तु सुतरान्तदन्तविधिरिति। उभयथाप्येकग्रहणं व्यर्थमेवेति स्थितम्। नन्वच्समुदायनिवृत्त्यर्थमेकग्रहणमस्तु। अइउअपेहीतिसमुदायस्यैव संज्ञा स्यान्नावयवानामेकाज्द्विर्वचनन्यायादिति चरमस्यैव प्रकृतिभावः स्यान्न तु पूर्वयोरिति। मैवम्। अजित्येकत्वस्य विवक्षयैव समुदायनिराससम्भवात्। अत्राह भाष्यकारः। अच्समुदायग्रहणशङ्कानिरासार्थमेकग्रहणं कुर्वन् ज्ञापयति वर्णग्रहणेषु व्यक्तिसंख्या न विवक्ष्यते किन्तु जातिरेव निर्दिश्यतइति। तेन दम्भेर्हल्ग्रहणस्य जातिवाचकत्वासिद्धमिति वार्तिककृता वक्ष्यमाणं सूत्रेणैव ज्ञापितं भवति दम्भेः सिद्धमित्यन्वयः। अत्र हेतुर्हल्ग्रहणस्य जातिवाचकत्वादिति। तेन दम्भेः सनि कृते सनीवन्तेति विकल्पादिडभावे दम्भइच्चेतीदीतोः कृतयोरत्र लोपोभ्यासस्येत्यभ्यासलोपे हलन्ताच्चेति सनः कित्वान्नलोपे भष्भावे च कृते धिप्सति धीप्सतीति रूपद्वयं सिद्ध्यति। हल्ग्रहणस्य व्यक्तिपरत्वे तु योत्रेकः समीपो हल्नकारो न ततः परः सन् यस्माच्च परः सन् भकारान्नासाविकः समीप इति कित्वं न स्यात्। तथा तृंहू हिंसायां तुदादिः ऊदित्वादिड्वा तितृंहिषति तितृक्षतीति स्यादिति दिक्। स्यादेतत्। अइउअपेहीत्यत्र एकाज्द्विर्वचनन्यायोपन्यासो न युक्तः समुदायसंज्ञयावयवानामननुग्रहात्। अत एव हि निर्ग्लीयान्निर्ग्लेयादित्यादौ बहूनां सन्निपाते द्वयोः संज्ञा स्वीकृता। नापि निपातग्रहणेन ग्रहणमेकैकस्मिन्निपाते संज्ञाविधानसम्भवात्। सत्यम्। एकाज्समुदायग्रह-

पञ्चंकामात्रं तु स्यादेव। तन्निरासायैव क्रियमाणमेकग्रहणं प्रागुक्तमर्थं ज्ञापयति। वस्तुतस्त्वपृक्तसंज्ञायामेकग्रहणमुक्तार्थे ज्ञापकमित्याश्रित्य प्रकृतसूत्रे एकग्रहणस्य परित्याग एव ज्यायान्। निपात इति किम्। चकारात्र। तथा अततेर्डः अः हे अ आगच्छेत्यपि प्रत्युदाहरणम्। आङ्नाङ्गेर्व्यवस्थामाह भाष्यकारः। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङितिति॥ इह एतच्छब्देन पूर्वमनिर्दिष्टत्वादेतमित्यस्यैनादेशो न कृत इति कश्चित्। तन्न। अन्वादेशश्च कथितानुकथनमात्रं न त्विदमेव कथितस्येदमा ऽनुकथनमिति भाष्यकृता वक्ष्यमाणत्वात्। तस्माद्यत्किञ्चिद्विधाय वाक्यान्तरेणान्यदुपदिश्यते सोन्वादेशः। इह तु ईषदर्थादौ यो वर्त्ततइति वृत्तिर्न विधेया किन्तु परिचायकतामात्रेणोपात्ताः अतो नैनादेशः। एतेन नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापयेत्यपि व्याख्यातम्। भीरुत्वस्य विधेयत्वाविवक्षणात् सिद्धस्यैव हेतुत्वेनानुवादादिति दिक्। ईषदर्थे आ उष्णं ओष्णम्। आङीषदर्थे इति कुगतीति सूत्रे वार्त्तिककृता ङिद्व्यवहृतः। क्रियायोगे आ इतः एतः प्रादिषु ङित्पठितः। मर्यादाभिविधौ चेति समाहारद्वंद्वे आगमशासनस्यानित्यत्वान्नुमभावः। मर्यादया सहिते अभिविधाविति मध्यमपदलोपी वा समासः। मर्यादायां, आ उदकान्तात् ओदकान्तात्। अभिविधौ आ अहिच्छत्रात्। आहिच्छत्रात्। विना तेनेति मर्यादासहितेनेत्यभिविधिः आङ् मर्यादाभिविध्योरिति च ङित्निर्दिष्टः। पूर्वप्रक्रान्तस्य वाक्यार्थस्यान्यथात्वद्योतनाय आकारः प्रयुज्यते। आ एवं नु मन्यसे नैवं पूर्वममंस्थाः संमत्येवं मन्यसइत्यर्थः। वाक्यारंभसूचनाय आकार इत्यपरे।

तथा स्मृतेः सूचक आकारः प्रयुज्यते । ततः स्मृतोर्थो निर्दिश्यते। आ एवङ्किलतादिति । अत्र च वाक्यस्मरणयोरङिदित्यत्रैव तात्पर्यम् । अतो वाक्यस्मरणाभ्यामन्यत्रेषदर्थाद्यभावेपि ङित्वं बोध्यम् । तेनामेन्यस्य रजसो यदभ्रआँ अपो वृणानेत्यत्र सप्तम्यर्थवृत्तेरप्याकारस्य ङित्त्वेनाङोनुनासिकश्छन्दसीति प्रवर्त्ततइति षष्ठे हरदत्तादयः । युक्तञ्चैतत् । ङिदङिदोरन्यतरलक्षणमात्रेणार्थाद्उभयविवेकलाभे तत्रापि लाघवादङिल्लक्षणे तात्पर्य्यमाश्रित्य भागान्तरस्यावयुत्यानुवादरूपत्वात् ॥

ओत्॥ ओदन्तो निपातः प्रगृह्यसंज्ञः स्यात्। आहो इति उताहो इति ।निपात इति किम् । देवोसि, वषट्तेविष्णवासआ। वायवायाहि । विष्णोव । यत्तु गवित्ययमाहेत्येतदेव निपातग्रहणस्य व्यावर्त्यमिति । तन्न । प्रगृह्यसंज्ञायां सत्यामपि क्षत्यभावात् । न चैवं प्रकृतिभावापत्तिः । प्रकृतिभावविधौ पदान्ताधिकारात् । न चायं पदान्तो भवत्येवेति भ्रमितव्यम् । अनुकार्यानुकरणयोरभेदविवक्षयार्थवत्वाभावेनाप्रातिपदिकत्वाद्विभक्तेरनुत्पत्तावेवैतद्रूपाभ्युपगमात् । अन्यथा विभक्तिश्रवणापत्तेः । न चैवमपदस्य प्रयोगासङ्गतिरिति वाच्यम्। अपदन्न प्रयुञ्जीतेत्युद्घोषस्य अपरिनिष्ठितं न प्रयुञ्जीतेत्येवंपरत्वात् । तस्य च सुप्तिङादिविषयकतत्तद्विधिशास्त्रमूलकत्वात् । इह तूक्तरीत्या सुब्विभक्तेरप्यप्राप्तया गोइति स्वरूपस्यैव परिनिष्ठितत्वात्। अत एवेह लोपः शाकल्यस्येत्यपि न प्रवर्त्तते । कथं तर्हि पूर्वसूत्रे शेर्थवद्ग्रहणादिति वार्त्तिके एङः पदान्तादिति पूर्वरूपं कृतमिति चेत् । तत्रानुकार्यानुकरणयोर्भेदं विवक्षित्वा विभक्तिं च कृत्वा शेष्वर्थवान् शेर्थवानिति समासेन सुपो लुकं कृत्वा व्याख्यानात् । एतेनोत्तरसूत्रे सम्बुद्धाविति किं गवि-

त्ययमाहेत्युदाहरन्तो वृत्तिकारा अपि प्रत्युक्ताः। तस्मादिह देवोसीत्यादिकमेव प्रत्युदाहरणं बोध्यम्। न चैङः पदान्तादित्यारम्भसामर्थ्यादेव तत्सिद्धिः। हरेव गच्छेत्यादौ चरितार्थत्वात्। न चैङ्ग्रहणसामर्थ्यम्। ङसिङसोश्चेत्युत्तरार्थत्वात्। उत्तरसूत्रे तु सम्बुद्धिग्रहणाभावे आहो इतीत्यादावपि परत्वाद्विकल्पापत्तिः। पूर्वसूत्रस्याहो ईशा इत्यादावुत्तरस्य तु विष्णो इतीत्यादौ लब्धावकाशतया विप्रतिषेधसम्भवात्। न चेह ओदन्तस्य कार्यितयोत्तरत्र तु विशेष्यासन्निधानेन तदन्तविधिविरहादोकारमात्रस्य कार्यितया भिन्नविषयकत्वे कथं विप्रतिषेध इति वाच्यम्। त्रपूणामित्यादौ प्रकृतिप्रत्ययावयवयोर्नुमनुटोरिवेहापि फलविरोधेन विषयभेदेपि विप्रतिषेधसम्भवात्। अर्थाधिकारपक्षे उत्तरसूत्रेप्योकारान्तस्य संज्ञित्वाच्च। शब्दाधिकारपक्षेपीकोञ्झलित्यत्र सनाक्षिप्तस्य धातोरिकाविशेषणवादिहापि संम्बुध्याक्षिप्तायाः प्रकृतेरोकारेण विशेषणे तदन्तविधिसम्भवाच्च। तस्मात्सूत्रद्वयेपि गवित्ययमाहेति प्रत्युदाहरणं नेति स्थितम्। प्रकृतिभावे पदान्तग्रहणं न सम्बध्यतइत्याशयेन तु वृत्तिग्रन्थो योज्यः। अस्मिंश्च पक्षे मण्डूकप्लुतिन्यायेनेको सवर्णइत्यत्र पदान्तग्रहणं सम्बन्धनीयमेव। अन्यथा गौर्यौ गौर्य्य इत्यादावतिप्रसक्तेरिति दिक्। स्यादेतत्। निपातसमुदाया एते। आह उ आहो उत आह उताहो इत्यादि। ततश्चादिवद्भावान्निपातएकाजित्यनेनैव सिद्धा संज्ञा। न चैवमाहो इतीत्यादिषु ऊँ इत्यस्य प्रसङ्गः। निरनुबन्धकोयमुकारः न तूञ् इति समाधानात्। अत एवोञ इति सूत्रे ञकारोच्चारणमपि सार्थकम्। अत एव चोञ ऊँ इत्यत्र भाष्यकृतोक्तम्। द्वावुकाराविमौ। एकोननुबन्धकः। अपरः सानुबन्धक इति। न चैवमपि आउओ

इत्यत्राङ्नाङोरेकादेशस्यानाङिति प्रतिषेधे प्राप्ते प्रतिप्रसवायेदमिति वाच्यम् । अनाङित्यस्य पर्य्युदासाश्रयणेनाङ्नाङोरेकादेशस्यादिवद्भावादनाङ्ग्रहणेन ग्रहणात् । प्रसज्यप्रतिषेधे ह्यसमर्थसमासो वाक्यभेदश्च स्यात् । भाष्येपि प्रतिषिद्धार्थमेतदित्युक्तिरभ्युच्चयमात्रम् । कथमन्यथानुपदमेवादोभवादित्यत्रातिप्रसङ्गमाशङ्क्य प्रतिपदोक्तस्यैवौकारस्य ग्रहणमिति समादधीत । तस्मादिदं सूत्रं विनापि सर्वं लक्ष्यं निर्व्यूढमेवेति चेत् । अत्रोच्यते । आहो उताहोइत्यादयो न निपातसमुदायाः । किन्त्वखण्डा एव । एतच्च एतत्सूत्रबलात्प्रतिपदोक्तस्यौकारस्य ग्रहणमिति भाष्यबलाच्चाध्यवसीयते । तेन आम् आहो देवदत्तेत्यत्रामएकान्तरमामन्त्रितमिति निघातप्रतिषेधः सिद्धः । अत एव पदकारैरपि ओषुवर्त्तमरुत इत्यादौओइत्याद्यैकपद्येनैव पठ्यते।तदेवं सूत्रकारभाष्यकारपदकाराणां संवाद एवेति स्थिते निपातसमुदाय एवायमित्याश्रित्यैतत्सूत्रं प्रत्याचक्षाणाः परास्ताः । स्यादेतत् । अनदोदः समभवदित्यत्रातिप्रसङ्गः । च्व्यन्तस्य निपातत्वात् । ऊर्यादिच्विडाचश्चेति गतिसंज्ञाविधानेपि प्राग्रीश्वरान्निपाता इत्यस्याधिकारात् । न च लक्षणप्रतिपदोक्तपरिभाषया लाक्षणिक ओकारो व्यावर्त्स्यतइति वाच्यम् । वर्णग्रहणेषूक्तपरिभाषाया अप्रवृत्तेः । अन्यथैचोयवायाव इत्यपि हरये इत्यादौ न प्रवर्त्तेत । चक्रे चक्रिरइत्यादौ प्रतिपदोक्ते चारितार्थ्यात् । वर्णस्य प्राधान्ये मास्तु परिभाषा विशेषणत्वे तु स्यादेवेति चेन्न । अविशेषेणाप्यप्रवृत्तेः सूपपादत्वात् । तथा च षष्ठे वक्ष्यामः । अभ्युपेत्यापि ब्रूमः । अगौर्गौः समभवद्गोभवदित्यादौ गमेर्डोइत्योकारस्य प्रतिपदोक्ततयातिप्रसङ्गः स्यादेव । नन्विह गौणमुख्यन्यायेन समाधानमस्तु । तथाहि । संघीभवन्ति ब्राह्मणाः, त्वद्भवति देव-

दत्तः, मद्भवसि त्वं, त्वद्भवाम्यहमित्यादौ वचनपुरुषव्यवस्थानुरोधेन च्विप्रत्ययस्थले सर्वत्र प्रकृतेरेव कर्तृत्वमिति सिद्धान्तस्थितिः। तथा च प्रकृतावारोपेण वर्त्तमानाद्विकृतिवाचकाच्छब्दाच्च्वेरुत्पत्तौ च्विप्रत्ययं प्रति प्रकृतिभूतस्य वाहीकादिवृत्तेर्गोशब्दस्य गौणार्थता स्पष्टैव। अत एवामहान् महान् भूतो महद्भूतश्चन्द्रमा इत्यादावान्महत इत्यात्वं न प्रवर्त्ततइति चेन्न। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। तथाहि। विशिष्टरूपोपादाने गौणमुख्यन्यायः। तस्यार्थवद्ग्रहणे नानर्थकस्येत्येतत्परिभाषामूलकत्वात्। अर्थोपस्थितेश्च रूपविशेषग्रहसापेक्षत्वात्। तथा चान्महत इति विशिष्टरूपग्रहणेन विधीयमानमात्वं गौणे न भवतीति युक्तम्। इह त्चोदितिवर्णपुरस्कारेण विधीयमाना प्रगृह्यसंज्ञा कथं गौणार्थवृत्तेर्न भवेत्। निपातसंज्ञा तु तस्यापि मुख्यैव। अत एव संज्ञाश्वशुरस्यापत्यं श्वाशुरिरित्यत्र राजश्वशुराद्यन्न प्रवर्त्तते। अत इञ् तु प्रवर्त्ततएव। अन्यथा इञो यतश्च तुल्ययोगक्षेमतैव स्यात्। अत एव गौर्वाहीको ब्रूते गां वाहीकं पाठयेत्यादौ वृद्ध्यात्वे स्त एव। तयोरपि वर्णाश्रयत्वात्। गोत इति तपरत्वमोकारान्तोपलक्षणार्थमिति वक्ष्यमाणत्वात्। तथा चौतोमिति सूत्रे भाष्यकृद्वक्ष्यति। गामित्यत्र परापि वृद्धिर्निरवकाशेनात्वेन बाध्यतइति। तत्रैव कैयटोपि वक्ष्यति, ओत इति सूत्रं पाठ्यम्। ओकारान्तोपलक्षणतया वा गोतइत्येतद्व्याख्येयमिति। वृत्त्यादिग्रन्थेष्वप्येवमेव स्थितम्। यत्तु वदन्ति। मुख्यएव स्वार्थे सास्नादिमति गोशब्दो वृद्ध्यात्वे लभते ततो वाहीकादिशब्दान्तरसन्निधानाद्गौणताप्रतीतिः। गोभवदित्यत्र तु गौणार्थतां विना च्विरेव दुर्लभ इति वैषम्यम्। तस्मात् पदकार्येष्वयं न्यायो न प्रातिपदिककार्येष्विति स्थितमिति। तच्चि-

न्त्यम्। वाक्यसंस्कारपक्षे वृद्ध्यात्वप्रवृत्तितः प्रागेव गौणार्थावगतेः। यत्तु कारकाणां क्रियायैव श्रौतःसम्बन्धस्तत एकक्रियावशीकृतानामरुणैकहायनीन्यायेन पार्ष्ठिकः परस्परावच्छेदः। तथा च गामानयेत्यन्वयवेलायां न गौणार्थता किन्तु वाहीकेन सह पार्ष्ठिकावच्छेदवेलायां, न चान्तरङ्गत्वेन प्रवृत्तः पदसंस्कारो बहिरङ्गगौणत्वप्रतीतावपि निवर्त्तत इति, तदपि न। तावतापि ब्रूते पाठयेति क्रियान्वयायैव गौणताया आश्रयणीयत्वात्। कटोपि कर्म भीष्मादयोपीति पक्षे कथञ्चिदुक्तिसम्भवेपि सामानाधिकरण्याद्भीष्मादेर्द्वितीयेत्येवं रूपे भाष्योक्तपक्षान्तरे त्वदुक्तन्यायानवताराच्च। श्वाशुरिरित्यत्रेवोप्यभावापत्तेश्च, शब्दप्रयोक्रा वाहीकनिष्ठस्यैव कर्मत्वादेर्विवक्षितत्वाच्च। तस्माद्वर्णाश्रयत्वाद्वृद्ध्यात्वे इत्येव तत्त्वं न तु प्रातिपदिककार्य्यत्वादिति। अत एव चैकाच्च प्राचामित्यादौ प्रातिपदिककार्यत्वेपि न स्यादायः। विशिष्टरूपपुरस्कारेणैव सर्वनामसंज्ञाविधानात्। अभिव्यक्तपदार्थायइत्यपि गौणमुख्यन्यायसिद्धार्थकथनपरं प्रसिद्धाप्रसिद्धत्वे एव हि मुख्यत्वगौणत्वे इत्यन्यत्र विस्तरः। अत एव सर्वादिसूत्रे संज्ञोपसर्जनप्रतिषेध इति वार्त्तिकं प्रत्याचक्षाणो हरदत्त आह। संज्ञाप्रतिषेधस्तावन्न वक्तव्यः। अभिव्यक्तपदार्थायइत्येव सिद्धत्वादिति। यत्तु तत्र कैयटो वक्ष्यति। प्रसिद्ध्यप्रसिद्धिवशात्संभवन्नपि गौणमुख्यन्यायो नेहोक्तः। पदकार्येष्वयं न तु प्रातिपदिककार्येष्वित्योत्सूत्रे उक्तत्वादिति। तदभ्युच्चयमात्रम्। युष्मदस्मादोः स्वरूपमात्राश्रयाणां कार्याणामुपसर्जनतायामिव संज्ञायां प्रवृत्त्यापत्तेः। युष्मद्युपपदे अस्मद्युत्तम इत्यादावपि तदापत्तेश्चेति दिक्। तदेवमदो भवद्भोभवदित्यादौ ओदिति प्रगृह्यसंज्ञा ऽव्ययत्वादिवद्दुर्वारेति पूर्वपक्षः पर्य्यवसन्नः। अत्रोच्यते।

पूर्वसूत्रे ऽनाङिति पर्युदासादाङ्सदृशाः प्रतिपदपाठिता एव निपाता गृह्यन्ते । इहाप्यर्थाधिकारेणाङ्ग्रहणानुवृत्त्या वा तथैवेति सर्वं सुस्थम् । तथा च सर्वादिसूत्रे अकारात्कारौ अनुपसर्जनत्वे सत्येव भवत इति प्रपञ्चके तदोः सः साविति सत्वं तद्वाविशेषितत्वाद्गौणतायामपि स्यादित्याशंक्य त्यदादीनाम इत्यत्रानुपसर्जनादिति परिभाषयानुपसर्जनानामेव ग्रहणे सिद्धे तथाभूतानामेव सत्वविधावनुवर्त्तनान्न कश्चिद्दोष इति समाधत्त कैयटः ॥

सम्बुद्धौ शाकल्यस्येतावनार्षे ॥ ऋषिर्वेदः । तदुक्तमृषिणेत्यादौ तथा दर्शनात् । संम्बुद्धिनिमित्तक ओकारो ऽवैदिके इतौ परे प्रगृह्यो वा स्यात् । विष्णो इति विष्णविति । संम्बुद्धाविति किं गवित्ययमाहेति वृत्तिकारः । एतन्निष्कर्षश्च पूर्वसूत्रे उक्त एव । अनार्षे किम् । ब्रह्मबंधवित्यब्रवीत् । इताविति किम् । पटोत्र ॥

उञः ॥ उञ इतौ प्रगृह्यसंज्ञा वा स्यात् । उ इति, विति ॥

ऊँ ॥ उञ इत्यनुवर्त्तते शाकल्यस्येति प्रगृह्यामिति च । प्रगृह्यस्य उञ इतौ परे ऊँ आदेशो वा स्यात् दीर्घोनुनासिकश्च ऊँ इति । इह यद्येको योगः स्यात् उञ ऊँ इति, तदादेशे विकल्पिते रूपद्वयमेव स्यात् । ऊँ इति, उ इति । अतो योगं विभज्य प्रगृह्यसंज्ञापि विकल्पिता । एवमपि ऊँ इति द्वितीयसूत्रे यदि प्रगृह्यग्रहणं शाकल्यग्रहणं चेत्युभयमपि नानुवर्त्तेत तदा उञ्मात्रस्य नित्यमूँभावविधानात्प्रगृह्यस्येवाप्रगृह्यस्याप्यादेशः स्यात् । तत्र प्रगृह्यस्यादेशे कृते स्थानिवद्भावेन प्रगृह्यत्वात् ऊँइतीति रूपं सिद्धम् । न चानल्विधाविति प्रतिषेधः । उञ इति समुदायरूपेणाश्रयणात् । तथा चेटईटीति सूत्रे इट इति समुदायरूपाश्रयणादग्रहीदित्यत्र च ग्रहोलिटीति दीर्घस्य स्थानिवद्भावमाश्रित्य सिज्लोपः सिद्ध्यतीति स्थानिवत्सूत्रे वक्ष्यते । अप्रगृह्यस्य त्वादे-

शे ऽनुनासिको यण् स्यात्। तथा चेष्टरूपत्रितयमध्ये ऊँ इतीत्येकमेव सिद्धं न त्वपरं द्वयमित्यव्याप्तिः। अतिव्याप्तिश्च सानुनासिकवकारयुक्तस्यानिष्टस्यापि प्रसङ्गात्। अथ प्रगृह्यग्रहणमात्रमनुवर्त्तेत तदा प्रगृह्यस्योञो नित्यमादेशः स्यात्ततश्च विति ऊँ इतीति द्वे एव रूपे स्यातां न तु उइतीति तृतीयम्। अथ शाकल्यग्रहणमात्रमनुवर्त्तेत तत उञ्मात्रस्यादेशविकल्पनादूँ इति उइतीति द्वयं प्रगृह्यस्य। विँति वितीति द्वयमप्रगृह्यस्येति संकलनया रूपचतुष्टयं स्यात्। तत्र त्रितयस्येष्टत्वेपि सानुनासिकवकारयुक्तमनिष्टमापतति। तस्माच्छाकल्यग्रहणं प्रगृह्यग्रहणं चेत्युभयमनुवर्त्तत इत्युक्तम्। इह विभक्तिविपरिणामेन प्रगृह्यस्योञ इति व्याख्यातम्। आदेशसामानाधिकरण्येन प्रगृह्यं ऊँ इत्येतदादेशो भवतीति व्याख्यानेपि न कश्चिद्विशेष इत्यवधेयम्। ननु परिनिष्ठितमेव प्रयोगार्हं, परिनिष्ठितत्वं च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम्। निहते तिङंतादावव्याप्तिवारणायाप्रवृत्तेति, वैकल्पिकेडागमोद्देश्यतावच्छेदकाक्रान्ते सेद्धेत्यादावव्याप्तिवारणायोक्तं, नित्येति। अत एव पच् लट् इत्यादीनामलौकिकतेति सिद्धान्तः। तथा च उ इतीत्येतद्रूपं न स्यादेव। अत्र हि शाकल्यमते ऊँआदेशेन भाव्यमेव। इतरेषां मते तु प्रगृह्यत्वमेव नास्तीति चेत्। भवेदेवं यदि शाकल्यग्रहणं यथाश्रुतं स्यात्। तत्तु विकल्पमात्रतात्पर्यकम्। तथा च भाष्यम्। शाकल्यस्य विभाषा यथा स्यादिति ऊं वा शाकल्यस्येति च। तथाच तत्र कैय्यटः। शाकल्यश्रुतेरेव फलं वाग्रहणेन प्रतिपादयतीति स्मृत्यन्तरानुसन्धानद्वारेण विभाषा सम्पद्यतइति च। यद्वा। अस्तु शाकल्यग्रहणं यथाश्रुतम्। तथापि निपातएकाजित्यनेनैव सिद्धे उञ इति तावन्नियमार्थम्।

तथा च शाकल्याभिन्नमते न प्रगृह्यतेति प्रथमसूत्रार्थः । उत्तरसूत्रे च प्रगृह्यस्योञ इत्येतावतैव शाकल्ये लब्धे पुनः शाकल्यानुवृत्त्येतरेषामपि मते पाक्षिकः प्रगृह्योस्तीत्यनुमीयते । तेन उ इति रूपं सिद्धम् । अथ वोत्तरसूत्रे पुनः शाकल्यानुवृत्तिसामर्थ्याच्छब्दाधिकाराश्रयणेन शकलस्यैव ऋषेरपत्यान्तरं गृह्यते । अस्मिंश्च पक्षे प्रगृह्यस्योञ इत्यनुवादसामर्थ्यादेव प्रगृह्यतापि लभ्यते यथा ढकि लोप इत्यनुवादसामर्थ्याद्ढागिति दिक् । आदेशश्चायमनुनासिक इति निर्देशादेव व्यक्तम् । तथा च बव्हृचप्रातिशाख्यमुकारश्चेति करणेन युक्तो रक्तो पृक्तो द्राघितः शाकलेनेति । रक्तसंज्ञोनुनासिक इति च । अत एव यदेतनूँ इति पदकाराः पठन्तीत्यनुकरणे यरोनुनासिकेनुनासिको वेत्येष विधिः प्रवर्त्तते ॥

ईदूतौ च सप्तम्यर्थे ॥ शाकल्यस्येताविति निवृत्तम् । ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्त्तमानं प्रगृह्यं स्यात् । अध्यस्यां मामकीतनू, मामक्यां तन्वामिति प्राप्ते सुपांसुलुगिति लुप्तसप्तमीकावेतौ । मामकी इति तनू इतीति पदकाले कार्योदाहरणे बोध्ये । सोमो गौरी अधिश्रित इति संहितायामप्युदाहरणम् । ईदूताविति किम् । प्रियःसूर्य्ये प्रियो अग्ना भवति । अग्निशब्दात्परस्याः सप्तम्या डाआदेशः पदकारैः प्रगृह्येष्वितिशब्दप्रयोगस्य नियमितत्वेनेहापि पदकाले इतिशब्दप्रयोगप्रसंग इति प्रत्युदाहरणमिदम् । सप्तमीग्रहणं किम् । धीती मती सुष्टुती । धीत्या मत्या सुष्टुत्येति प्राप्ते तृतीयैकवचनस्य पूर्वसवर्ण ईकारः ततो ऽकःसवर्णे दीर्घ इत्येकादेशः । न त्विह सुपो लुक् ह्रस्वश्रवणापत्तेः । अर्थग्रहणं किम् । वाप्यामश्वो वाप्यश्वः । नद्यामातिर्नद्यातिः, संज्ञायामिति सप्तमीसमासः । ननु सप्तम्यर्थोपीहा-

स्त्येव तत्कथमर्थग्रहणे कृतेपीष्टसिद्धिरिति चेत्। इत्थञ्जहत्स्वार्थावृत्तिरिति पक्षे पदे वर्णवद्वृत्तौ वर्त्तिपदानामानर्थक्यादीदन्तमिहानर्थकं न तु सप्तम्यर्थवृत्तीति स्पष्टमेव। अजहत्स्वार्थावृत्तिरिति पक्षेपि उपसर्जनपदं न स्वार्थमात्रे पर्यवस्यति किन्तु तत्संसृष्टे प्रधानार्थे। अर्थग्रहणसामर्थ्याच्च यावानर्थः सप्तम्याभिधीयते आधेयासंसृष्टो निष्कृष्टाधिकरणरूपस्तावन्मात्रस्येह ग्रहणमिति वृत्तिप्रविष्टेन भविष्यति। यद्यपि वाक्यवत्समासेपि लुप्तसप्तमीबलेनाधिकरणमात्रबोधः पश्चाद्वाक्यार्थतया संसृष्टबोध इति वक्तुं शक्यते। तथापि सिद्धान्ते तावत्समर्थः पदविधिरिति परिभाषानुरोधात् समासस्थले एकार्थीभावएव सामर्थ्यं न तु व्यपेक्षा। अत एवोपसर्जने विशेषणान्वयो न भवति शक्यैकदेशत्वादिति द्वितीये वक्ष्यते। मीमांसकादीनामपि निषादस्थपतिन्यायेन पूर्वपदार्थसम्बन्धिनि लक्षणाभ्युपगमाद्युक्तैवार्थग्रहणेन वाप्यश्वनघातिप्रभृतेर्व्यावृत्तिः। आतिर्बलाका। शरारिरातिराटिश्च बलाका बिसकण्टिकेत्यमरः। आद्यास्त्रयोपि स्त्रीलिङ्गाः बलाकासाहचर्यादिति के चित्। वस्तुतस्तु शरार्यादयस्त्रयः पक्षिविशेषवाचका न तु बलाकापर्यायाः। अतो बलाकासाहचर्यमकिञ्चित्करं स्त्रीत्वम्परमस्त्येव। रत्नकोशे स्त्रीलिङ्गकाण्डे, आटिः शरारिर्वरटीत्युक्तेः। आतेरपि तत्साहचर्यात्तत्परकरणमसन्देहार्थमिति वृत्तिः। अत्र वार्त्तिकम्। ईदूतौ सप्तमीत्येव लुप्तेर्थग्रहणाद्भवेत्। पूर्वस्य चेत्सवर्णो सावाडाम्भावः प्रसज्यते॥ वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि। ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत्॥ अस्यार्थः। ईदूतौ सप्तमीत्येवास्तु नार्थोर्थग्रहणेन। अत्रोत्तरमाह। लुप्तइति। संज्ञाविधौ प्रत्ययग्रहणेतदन्तविधेरभावात्। सप्तम्या एव संज्ञा स्यात् लुप्तेपि

सुपि प्रकृतिभागस्य संज्ञासिद्धये तु कर्त्तव्यमेवार्थग्रहणमित्यर्थः। ननु सोमो गौरीत्यादौ विभक्तिर्न लुप्यते किन्तु धीती मतीत्यादाविव पूर्वसवर्णे कृते ऽकः सवर्णइति दीर्घएकादेशे तस्यादिवद्भावात्सप्तमीग्रहणादस्त्येव सप्तमीत्याशंक्याह। पूर्वस्येति। आडाम्भावइति। एकादेशं बाधित्वा परत्वादाङ्गत्वाच्चाऽऽडामौ स्यातामित्यर्थः। तस्माल्लुगेवेति स्थितेर्थग्रहणं कर्त्तव्यमेवेति भावः। नन्वर्थग्रहणं मास्तु वचनसामर्थ्याच्च संज्ञाविधावपि तदन्तविधिर्भविष्यतीत्याशंक्याह। वचनादिति। यत्र दीर्घत्वं तत्रैव वचनात्स्यात् हृतिं न शुष्कं सरसी शयानामिति यथा। अत्र हि सरश्शब्दात्परस्य सप्तम्येकवचनस्येयाडियाजीकाराणामुपसंख्यानमितीकारादेशे सप्तमी श्रूयते। तथा च सोमो गौरीत्यादौ न स्यादेवेत्यर्थः। एतद्दूषयति। तत्रापीति। तत्रापि सप्तम्या लुगेव न त्वीकारः। यदि सरसीशब्दोऽपि वर्त्तते। असन्दिग्धे सन्दिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा। अस्ति हि सरसीशब्दो दाक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यन्ते इति भगवदुक्तेः कासारः सरसी सर इत्यमरकोशाच्च। तथा च सरसीः परिशीलितुं मयेत्यादि प्रयोगोपि दृश्यते। एवञ्च सरसीशब्दोपि लुप्तविभक्तिक एवेति वचनात्तदन्तविधिरिति स्थितम्। ननूक्तरीत्यास्तु सरसीशब्दः, सरशब्दोपि सान्तो निर्विवाद एव। तथा च सान्तादेवेकारादेशोयमस्तु। एवं हि सति संज्ञाविधौ ज्ञापकात्त्यक्तस्य तदन्तग्रहणस्य पुनराश्रयणं न कर्त्तव्यं भवतीति चेन्न। तथा सतीकारस्य सुप्त्वेनानुदात्ततया सरःशब्दस्य च सृधातोरसुनि व्युत्पादितस्य नित्स्वरेण सरसीति पदमाद्युदात्तं प्रसज्येत। गौरादिषु पिप्पल्यादयश्चेति पाठात्पिप्पल्याद्यन्तःपातिनः सरःशब्दान्ङीषा त्वन्तोदात्तमिष्यते। तथैव वेदे

पाठात्। एवन्तर्हि प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनायेदमर्थग्रहणमस्तु । एवञ्चेदूदेद्द्विवचनमिति सूत्रे ईदूदेदन्तं द्विवचनान्तमिति पक्षईदूदेदन्तं यद्द्विवचनं तदन्तमिति पक्षश्च समर्थितो भवति । तत्र हि कुमार्य्योरगारं कुमार्य्यगारम् । अशुक्ले शुक्ले सम्पद्येतां शुक्ल्यास्तां वस्त्रेइत्यत्रातिव्याप्तिरिति दोषः। स च प्रत्ययलक्षणविरहादेवोद्भृत इत्याह । ज्ञापकमिति । प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणाभावस्येति शेषः । क्वेदं ज्ञापनमुपयुज्यते, तदाह । तदन्तत्वइति । तदन्तगर्भे पक्षद्वयेपीत्यर्थः । ननु संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावादेव तदन्तपक्षस्तत्र न स्थित इत्यपरितोषादाह । मावेति । वाप्यश्व इत्यादौ मा भूदित्यर्थः । अत्रेदमवधेयम् । अवितृस्तृतन्त्रिभ्य ईरिति सूत्रादीरित्यनुवर्त्तमाने यापोः किद्वे च वातप्रमीरिति सूत्राभ्यां शब्दत्रयं व्युत्पादितम् । यान्त्यनेनेति ययीर्मुक्तिमार्गः । पिबति रसान्पाति वा लोकामिति पपीः सूर्य्यः । वातं प्रमिमीते सम्मुखधावनादिति वातप्रमीः निःशृङ्गो मृगाकृतिर्वातमृगनामा पशुविशेषः । एभ्यस्त्रिभ्योपि ङौ सवर्णदीर्घात् पपी ययी वातप्रमीति रूपं निर्विवादम् । तथा चेह श्रूयमाणस्येकारस्य सप्तमीत्वात्तत्रापि सरसी यदीत्यसङ्गतम् । ईकारस्य श्रूयमाणस्यासम्भवात् । सामर्थ्यात्तदन्तविधिर्भविष्यतीत्यस्यार्थः । तस्मादूकारांशे सामर्थ्यात्तदन्तविधौ लब्धे सोमो गौरीत्यादावपि भविष्यतीत्याशयः । ययी आसक्त इत्यादौ तु भाव्यमेव प्रकृतिभावेन । न चायं योगश्छान्दसस्तथाविधानामेवोदाहरणानां दत्तत्वादिति वाच्यम् । मुनित्रयोक्तिं विनास्मदिच्छया छान्दसत्वकल्पनेऽतिप्रसङ्गात् । लोके प्रगृह्यत्वं न भवतीत्यस्मिन्नर्थे प्रमाणानुपलम्भाच्च । अप्रतिषिद्धमनुमतं भवतीतिन्यायेन लोके ययी पपी वा[illegible]मीत्ये-

तेषां प्रगृह्यत्वस्यैव न्याय्यत्वाच्च। अत एव दृग्दृशवतुष्विति सूत्रे वृक्षे चेति वार्त्तिकमुपादाय क्सप्रत्ययः सादेशश्च छन्दस्येव भाष्ये सदृक्षास इत्युदाहृतत्वादिति के चिदिति व्याचक्षाणा हरदत्तादयच्छान्दसत्वं वदतां मते स्वस्यापरितोषमाविश्चक्रुरिति दिक् ॥

दाधाघ्वदाप्॥ दारूपा धारूपाश्च धातवो घुसंज्ञाःस्युर्दाप्दैप्औ वर्जयित्वा। तत्र दारूपाश्चत्वारः डुदाञ्, प्रणिददाति। दाण्, प्रणियच्छति दो, प्रणिद्यति देङ्, प्रणिदयते। धारूपौ द्वौ। डुधाञ्, प्रणिदधाति। धेट्, प्रणिधयति वत्सो मातरम्। अदाबिति किम्। दाप् लवने, दातं बर्हिः। लूनमित्यर्थः। घुत्वाभावाद्दोदद्घोरिति न प्रवर्त्तते। दैप् शोधने अवदातं मुखम्। इह घुत्वाभावादच उपसर्गात्त इत्येतन्न। घुप्रदेशा नेर्गदनदेत्यादयः। इह दोदेङ्धेटामनुकरणानि व्यवस्थाप्य तत्र प्रकृतिवदनुकरणमित्यतिदेशादादेच उपदेशे शितीत्यात्वं क्रियते। अनैमित्तिकमात्वं शिति तु प्रतिषेध इति सिद्धान्तात्। न चैवं विभक्तेरुत्पत्तिर्न स्यादधातुरिति प्रातिपदिकसंज्ञानिषेधादिति वाच्यम्। अधातुरिति पर्य्युदासोयं न तु प्रसज्यप्रतिषेधः। अस्ति चेह स्वाश्रयमधातुत्वम्। यद्वा। यत्तदेतेभ्य इत्यादाविवेहापि कार्यविशेषपुरस्कारेणैवातिदेशप्रवृत्त्यप्रवृत्ती भविष्यतः। ततश्चतुर्णां दारूपाणां द्वयोश्च धारूपयोरेकशेषं कृत्वा द्वंद्वः कर्त्तव्यः। प्रणिदातेत्यादौ कृतात्वानां दोदेङ्धेटां तु स्थानिवद्भावात्सिद्धं घुत्वं लक्षणप्रतिपदोक्तपरिभाषाया निरनुबन्धकग्रहणे न सानुबंधकस्येत्यस्याश्च नेह प्रवृत्तिः, सर्वेषां स्वरूपेणैवानुकृतत्वात्। अत एव दारयतिधारयत्योर्नातिप्रसङ्गः। तयोरनुकरणे आत्वासंभवेनेह दृध्रुइत्यनयोरनुपात्तत्वात्। ननु कृतात्वस्य सूत्रे निर्देशात्प्रणिद्यति प्रणिधयतीत्यादौ चात्वविरहात्कथं घुत्वमिति चे-

त्। भ्रान्तोसि। न हि वयं कृतात्वमनुकुर्मो येनोक्तदोषः स्यात्। अपि तु देदोधेइत्येङंतेष्वेवानुक्रियमाणेषु लक्षणवशनिष्पन्नमात्वमित्युक्तम्। न च लक्षणेन स्वरूपान्यत्वेप्यनुकरणता हीयते। सख्युरसंबुद्धावित्यत्रापि सखिरूपप्रतीतेः, गवित्यय माहेत्यत्र गोशब्दप्रतीतेश्च। दीङस्तु नेह ग्रहणं, तदनुकरणे आत्वासम्भवात्। वार्तिकमते एजंतानां दीङादीनामात्वविधानात्। भाष्यमते त्वेज्निमित्ते परतस्तद्विधानात्। तेन दीङस्तृजादावात्वे कृतेपि घुसंज्ञाविरहात्प्रनिदातेत्यत्र नेर्गदेति नित्यं णत्वं न भवति शेषे विभाषेति वैकल्पिकं तु स्यादेव। तथोपादास्तास्यस्वरः शिक्षकस्येत्यत्र स्थाघ्वोरिच्चेतीत्वं न भवतीति सूत्रकारस्य मतम्। नन्वस्मिन्पक्षे दाप्दैपावनुकृतौ न वा,आद्ये ऽनुकरणपर्युदासोभयसामर्थ्यात्तयोर्घुसंज्ञाविकल्पः स्यात्। अन्त्ये अदाबिति व्यर्थं स्यात्। अननुकृतत्वादेव दाप्दैपोर्घुसंज्ञाप्राप्तिविरहादिति चेन्न। अदाबित्यस्मिन्नसति तयोरप्यनुकरणं संभाव्येत न हि लक्षणैकचक्षुषा दोदेङादीनां दाप्दैपोश्च वैलक्षण्यं किं चिदनुभूयते यद्बलाद् ग्रहणाग्रहणे व्यवस्थाप्येयाताम्। व्याख्यानतो विशेषप्रतिपत्तिरिति परमवशिष्यते। किं त्वगतिकगतिरेषा ऽनभिधानवत्। न च तद्बलेन सिद्धस्य प्रत्याख्यानं शोभते। वार्त्तिककारमते तु प्रयोगस्थानामेव दाधारूपाणामिदमनुकरणम्। न चैव प्रणिद्यति प्रणिदयतइत्यादौ शिति न स्यात्। आत्वाभावात्। तथा देङ् रक्षणे, अदित। धेट्, व्यत्यधित। प्रणिदाता प्रणिधातेत्यादावपि न स्यादात्वस्य लाक्षणिकत्वात्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणमिति न्यायादिति वाच्यम्। वचनबलेनैव तत्समाधानात्। तथा च कात्यायनवार्तिकम्। घुसंज्ञायां

प्रकृतिग्रहणं शिदर्थमिति । भारद्वाजीयास्तु पठन्ति । शिद्विकृतार्थमिति । तथा च दाधाप्रकृतयो घु इति पठित्वा दाश्च धाश्च प्रकृतयश्चेति द्वंद्वं कृत्वा सन्निधानाद्दाधामेव प्रकृतय इति व्याख्येयम् । भाष्यकारास्तु वार्त्तिकं प्रत्याचख्युः । तथाहि । नेर्गदेतिसूत्रे तावदवश्यं प्रकृतिग्रहणं कर्त्तव्यं प्रणिमयते प्रण्यमयतेत्यत्रापि णत्वं यथा स्यात् । तदेव पुरस्तादपकृष्य घुप्रकृतिमा इति पठिष्यामः । घुश्च प्रकृतिश्च माश्चेति द्वंद्वः । सन्निधानाच्च पूर्वोत्तरयोः प्रकृतिर्ग्रहीष्यते । न चैवं मीनातिमिनोत्योरपि माप्रकृतित्वाद्ग्रहणापत्तिः । माङो ङकारानुबन्धस्यैव तत्रावश्यं पठनीयत्वात् । अन्यथा मामानइत्यत्रातिप्रसङ्गात् । तस्माद् घुप्रकृतिमाङिति पाठेन प्रणिद्यति प्रणिदयतइत्यादेः सिद्धत्वाच्छिदर्थं तावद् घुसंज्ञायां प्रकृतिग्रहणं न कर्त्तव्यमिति स्थितम् । भारद्वाजीयोक्तरीत्या विकृतार्थं कर्त्तव्यमिति पुनरवशिष्यते । तदपि न । गामादाग्रहणेष्वविशेष इति परिभाषयैव लाक्षणिकस्यापि दारूपस्य घुसंज्ञासिद्धेः । अस्यां च परिभाषायां दैपः पित्वं लिङ्गम् । तद्धयदाविति सामान्यग्रहणार्थं क्रियते लाक्षणिकत्वादेव घुसंज्ञायां दैप्ग्रहणाभावे तु किं निषेधे सामान्यग्रहणार्थेन पित्वेन । न चैवमपि धेटो घुसंज्ञा न स्यादेवेति वाच्यम् । दो दद्घोरित्यत्र धेटो निवृत्त्यर्थं क्रियमाणेन द इत्यनेन धेटोपि घुसंज्ञाज्ञापनात् । न च दधातिनिवृत्त्यर्थन्द इत्युक्तमिति वाच्यम् । तत्र दधातेर्हिरिति ह्यादेशविधानादेव दद्भावाप्रसङ्गात् । नन्वेवमपि गामादाग्रहणेष्वविशेष इत्येतेन लक्षणप्रतिपदोक्तपरिभाषया निरनुबन्धकग्रहणइतिपरिभाषायाश्च यथा बाधस्तथार्थवद्ग्रहणपरिभाषया अपि बाधः स्यात् । तथा च प्रनिदारयति प्रनि-

धारयतीत्यत्राप्यतिप्रसङ्ग इति चेन्न । गदादीनां य उपसर्गस्तत्स्थान्निमित्तादुत्तरस्य तानेव गदादीन् प्रत्युपसर्गस्य नेरिति व्याख्यानात् । दारयतिधारयत्यवयवयोस्तु दाधारूपयोरनर्थकत्वान्न तं प्रत्युपसर्गत्वम् । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति वक्ष्यमाणत्वात् । न चैवं प्रणिदापयति प्रणिधापयतीत्यत्रापि णत्वं न स्यादिति वाच्यम् । तत्र पुगागमात्पूर्वं दा धा इत्यवस्थायां घुसंज्ञाप्रवृत्तौ पुगवयवस्यापि घुग्रहणेन ग्रहणात् । अनागमकानां सागमका आदेशा इति पक्षे तु स्थानिवद्भावेन घुसंज्ञाप्रवृत्तेः । नन्वनान्तर्यमेवैतयोरान्तर्यं सम्प्रयोगो वा । नष्टाश्वदग्धरथवदिति स्थानेन्तरतमसूत्रस्थभाष्यरीत्या दारयत्यादेरपि दापयत्यादिसाम्यमेव । निष्पन्नस्याणो रपरत्वाभ्युपगमेन रेफपुकोरविशेषादिति चेत् । सत्यम् । सिद्धन्तु प्रसङ्गे रपरत्वादित्युरण्रपरसूत्रस्थवार्त्तिकरीत्या समाधानं कृतम् । उक्तभाष्यरीत्या तु प्रसक्तो दोषः प्रागुक्तसूत्रकारमतमाश्रित्योद्धर्त्तव्यः । न हि दधृइत्यनयोरनुकरणे आत्वं लभ्यतइति दिक् । इदं त्ववधेयम् । प्रणिदापयतीत्यत्राप्युपसर्गयोः प्रकृत्यर्थविशेषणत्वे सत्येव नेर्गदेति नित्यं णत्वं ण्यर्थविशेषकत्वे तु घुसंज्ञकं प्रत्यनुपसर्गत्वाच्छेषे विभाषेति विकल्प एव न तु नित्यं णत्वमिति । स्यादेतत् । उपदिदीषतइत्यत्र सनिमीमेतीस्भावः स्यात् । वार्तिककृता घुसंज्ञायां प्रकृतिग्रहणात् । सूत्रकारभाष्यकारयोस्तु नासौ दोषः । सूत्रकृता दीङोननुकृतत्वात् । भाष्यमते णत्वे प्रकृतिग्रहणेपि घुसंज्ञायान्ताद्विरहादिति चेत् । सत्यम् । वार्त्तिकमतेपि नेयं दाप्रकृतिः । एजन्तानामात्वविधानाभ्युपगमात् । न चैवमादन्तत्वनिबन्धनयुच्प्रत्ययासिद्धिः । तत्राकारान्तलक्षणप्रत्ययविधि-

रिति वचनेनैव तत्सिद्धेः। भाष्ये त्वेतद्वचनप्रत्याख्यानायैज्-विषये आत्वं सिद्धान्ततमित्यन्यदेतत्। इदं त्ववशिष्यते। भाष्यवार्त्तिकोभयमतेपि उपादास्तास्यस्वरः शिक्षकस्येत्यत्र स्थाघ्वोरितीत्वं प्राप्तं, तच्च भाष्ये सन्निपातपरिभाषया परित्यक्तम्। उप दी स् त इति स्थिते एज्विषये प्रवर्त्तमानमात्वं सिचोकित्त्वमुपजीवति। यदि चात्र घुसंज्ञा स्यात्तर्हि स्थाघ्वोरिच्चेति सिचः कित्वं स्यादतोकित्वमुपजीव्य प्रवृत्त आकारः कित्वप्रवार्त्तिकां घुसंज्ञां न प्रवर्त्तयत्येवेति। वार्त्तिककृता तु दीङः प्रतिषेधः स्थाघ्वोरित्वे इति वचनमेव कृतम्। उभयमतेपि दीङस्तृजादावात्वे कृते प्रणिदातेत्यादौ नेर्गदेति णत्वं भवति। अत एव वार्त्तिककृता दीङः प्रतिषेध इत्येवं नोक्तं किन्तु स्थाघ्वोरित्वे इति विषयविशेषो निर्दिष्टः। सूत्रमते तु न भाव्यं णत्वेनेति स्पष्टमेव। किञ्च भाष्यवार्त्तिकयोर्न केवलं सूत्रकृता सह विरोधः किन्तु परस्परेणापि। तथाहि। भाष्यमते प्रणिदीयते प्रणिदीन इत्यादावपि नित्यं णत्वं णत्वविधौ प्रकृतिग्रहणात्। वार्त्तिकमते तु वैकल्पिकम्। एजन्तानामेव प्रकृतित्वाभ्युपगमेनेदन्तस्याप्रकृतित्वात्। अन्यथोपदिदीषतइत्यत्रेस्भावापत्तेः। तदेवं प्रणिदातेत्यादौ सूत्रकृता सह द्वयोर्विरोधः। प्रणिदीन इत्यादौ तु भाष्यकृता सहेतरयोर्विरोधो दुष्परिहर इति। अत्रेदं वक्तव्यम्। यथोत्तरं मुनीनां प्रामाण्यमिति सिद्धान्ताद्भाष्योक्तरीत्या सर्वत्र दीङि परे नेर्नित्यं णत्वमितिस्थिते सूत्रवार्त्तिकमतेपि शेषे विभाषेति व्यवस्थितविभाषामाश्रित्य भाष्याविरोधः सम्पादनीयः। एकवाक्यतयैव सर्वनिर्वाहसम्भवे मतभेदकल्पनस्यानाश्रयणीयत्वादिति। नन्वदाबिति प्रतिषेधे दाप्लवनइत्यस्यैव ग्रहणं युक्तम्, न तु दैपः। पकारे श्रूयमाणे

आत्वायोगादिति चेन्न। अनुबन्धा अनेकान्ता इति पक्षे श्रूयमाणस्यापि पकारस्य काकादिवदनवयवत्वेन धातोरेजन्तत्वानपाये आत्वप्रवृत्तेः। एकान्ता अनुबन्धा इति पक्षेपि भवत्येवात्वम्। नानुबन्धकृतमनेजन्तत्वमिति सिद्धान्तात्। अत्र चोदीचां माङो व्यतीहारइति कृतात्वस्य मेङो निर्देशो ज्ञापकः। न च माङ्मानइत्यस्यैवायं निर्देशो व्यतिमिमीतइत्यादौ तस्यापि कदा चिद्व्यतीहारे वृत्तिसम्भवादिति वाच्यम्। अपूर्वकालार्थस्य क्त्वाप्रत्ययस्य माङ्मानइत्यस्मादनभिधानात्। अत्र च भाष्योक्तेरेव प्रमाणत्वादित्याहुः। एवं च मेङ इत्येव पठनीये माङो व्यतीहारइति गुरुकरणं नानुबन्धकृतमनेजन्तत्वमिति ज्ञापनार्थमेव। भाष्यकारास्तु नायं दैप् किन्तु दिवादिपु दाप्शोधनइत्येव पठिष्यतइत्याहुः। न च स्वरे भेदः। दायतीत्यादेरुभयथाप्याद्युदात्तत्वात्। ननु ताच्छीलिके चानशि दायमान इत्यत्र स्वरे भेदः। श्यनि धातोराद्युदात्तत्वं शपि तु चानशोन्तोदात्तत्वमिति चेन्न। उभयथाप्यन्तोदात्तत्वानपायात्। न च श्यन्स्वरस्य सतिशिष्टत्वेन प्राबल्यमिति वाच्यम्। अन्यत्र विकरणेभ्य इति पर्युदासात्। आत्ममानेखश्चेत्यत्रत्यभाष्यकैयटबलेन खशीव चानश्यप्यन्तोदात्ततया निर्णयात्। स्थानिवत्सूत्रीयः कैयटग्रन्थस्तु खशमूत्रस्थभाष्यस्वोक्तिभ्यां विरोधात्प्रामादिक इति वक्ष्यते। ध्यायत्यादयस्तु दिवादिष्वेवादन्तत्वेन न पठिताः गणकार्यमनित्यमिति ज्ञापयितुम्। तेन न विश्वसेदविश्वस्तं पथिकवनिताः प्रत्यवादाश्वसन्त्य इत्यादि सिद्धम्। यत्तु भाष्ये एकान्तत्वपक्षेपि न दोष इत्युपक्रम्य पकारलोपे कृते भविष्यति, दाप्त्वं तु भूतपूर्वमनुबन्धमाश्रित्य व्युत्पादनीयमिति सिद्धान्तितम्। तत्रेत्थं प्रत्यवतिष्ठन्ते। सत्यप्येजन्तत्वे उपदेशे एजन्तत्वं

कथमिति । अत्रोच्यते । पित्करणसामर्थ्यादुपदेशे एजन्तत्वाभावेऽप्यात्वप्रवृत्तिः । वस्तुतस्तूपदेशग्रहणं भाष्यकारो न मन्यते । तथा च तत्र वक्ष्यति । उपदेशग्रहणं न करिष्यते । यद्युपदेशग्रहणं न क्रियते चेता स्तोतेत्यत्रापि प्राप्नोति । अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न परनिमित्तस्यैव आत्वं भवतीति । यदयं क्रीङ्जीनां णावेव आत्वं शास्ति । नैतदस्ति ज्ञापकं नियमार्थमेतत्स्यात् क्रीङ्जीनां णावेवेति । यत्तार्हि मीनातिमिनोतिदीङां ल्यपि चेत्यत्रैङ्ग्रहणमनुवर्त्तयतीति । ननु प्रणिदापयतीत्यत्राप्यदाबिति प्रतिषेधः स्यादिति चेन्न । यथोद्देशपक्षेन्तरङ्गत्वाद्दाबवस्थायामेव घुसंज्ञाया निर्वृत्तत्वात् । कार्यकालपक्षे तु घुसंज्ञाया णत्वसमानदेशतया पुकं प्रति णत्वघुसंज्ञयोरसिद्धत्वेन प्रागेव पुक् ततो घुसंज्ञा न स्यादिति दोषः प्रसज्यत्येव । अत एव भाष्ये द्वेधा समाहितम् । दाधाघ्वपिदिति वक्ष्यामि । यद्वा बान्तावेतौ धातू सूत्रमपि बान्तम् । चर्त्वेन सर्वत्र पकारो निर्दिष्टः । अतो दापयतीत्यत्र नासौ निषेधः । तस्यापित्त्वादबान्तत्वाच्चेति ॥

आद्यन्तवदेकस्मिन् ॥ असहाये आदाविवान्तइव कार्याणि स्युः । औपगवः । यथा तव्यादीनां प्रत्ययाद्युदात्तत्वं प्रवर्त्तते । एवमिहाणोपि । आभ्याम् । यथा वृक्षाभ्यामित्यादौ सुपि चेति दीर्घत्वं भवति एवमिहापि । इङ् गतौ दिवादिः । एयम् । अचोयदिति अजन्ताद्धातोर्विधीयमानो यत्प्रत्ययो यथा चेयञ्जेयमित्यादौ भवति तथेहापि । इणस्तु एतिस्तिवति क्वयपीत्यमित्येव रूपं न तु एयमिति । एकस्मिन्निति किम् । सभासन्नयने भवः साभासन्नयनः । अत्र ह्याकारस्यादित्त्वे सति तमेवाश्रित्य सभासन्नयनशब्दस्य वृद्धत्वं स्यात् । ततश्चाणं बाधित्वा वृद्धाच्छ इति

छः प्रसज्येत । ननु वृद्धिर्यस्याचामादिरिति सूत्रे आदिग्रहणस्यापीदमेव व्यावर्त्यम् । तत्सामर्थ्यादेव समासन्नयनशब्दे वृद्धसंज्ञा न भविष्यतीति चेन्न । यदि हि वृद्धसंज्ञासूत्रे आदिग्रहणसामर्थ्यादनातिदेशिकस्य मुख्यस्यैवादेर्ग्रहणं तर्हि जानातीति ज्ञा ब्राह्मणीत्यादिरसहायोपि वृद्धो न स्यात् । ततश्च ज्ञाया अयं ज्ञीय इत्यादि न सिद्ध्येत् । असति हि प्रकृतसूत्रस्थैकग्रहणे यत्रादिव्यपदेशो मुख्यो नास्ति असहाये मध्ये अन्ते च स सर्वोप्यविशेषादतिदेशस्य विषयः स्यात् । यदि त्वतिदेशसामर्थ्याज्ज्ञाशब्दे वृद्धत्वं तर्ह्यविशेषात्सभासन्नयनेपि स्यात् । वृद्धसंज्ञायामादिग्रहणं तर्हि व्यर्थमेवेति चेत् । हन्तैवमतिदेशस्यादिग्रहणस्य च सामर्थ्यात्सर्वत्र विकल्पापत्तिः । इहैकग्रहणे कृते त्वन्त्यमध्ययोर्व्यावृत्त्या वृद्धसंज्ञायामादिग्रहणं सार्थकमिति दिक् । यत्तु न्यासकृतोक्तम् । अतिदेशसूत्रे एकग्रहणाभावे वृद्धसंज्ञासूत्रस्थमादिग्रहणमनातिदेशिकप्रतिपत्त्यर्थं सदसहायानां ज्ञादीनामेव वृद्धसंज्ञां वारयेन्न तु सभासन्नयनस्य, सन्नयनेत्येतदन्तर्गतांश्चतुरो ऽचो ऽपेक्ष्यानातिदेशिकस्यादित्वस्य तत्र सत्त्वादिति । तच्चिन्त्यम् । परस्मिन्साति यस्मात्पूर्वो नास्ति स आदिरिति सिद्धान्तरीत्या मध्यस्थेष्यादित्वविरहात् । इयानेव हि विशेषः । असहाये सत्यन्तविशेषणविरहाद्विशिष्टाभावः, मध्यस्थे तु विशेष्याभावाद्विशिष्टाभाव इति । वार्तिककारस्तु लाघवादपूर्वत्वमात्रमादिशब्दस्य प्रवृत्तिनिमित्तमनुत्तरत्वमात्रं चान्तशब्दस्य न तु सत्यन्यस्मिन्नित्यपि विशेषणं, गौरवात् । तथा चासहायेपि मुख्ययोरेवाद्यन्तयोः सम्भव इति मन्वानः सूत्रमेतत्प्रत्याचख्यौ । आह च । अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्निति । भाष्यकारस्तु नैतन्मेने । सत्यन्यस्मिन्निति विशेषणम-

क्षेपप्रयुक्तस्य गौरवस्य प्रामाणिकत्वात्। लोके ह्ययमादिरंतोवेत्युक्तेऽवशिष्टमपि किंचिदस्तीति नियमेन प्रतीयन्ति। पदान्नियतोपस्थितिश्च शक्तिसाध्या। अनुभवमपलप्यैकदेशमात्रे शक्तिकल्पने तु श्वशुरादिपदानामपि लाघवाद्भार्यात्वमात्रं पितृत्वमात्रं तद्घटकपुंस्त्वमात्रं वा शक्यतावच्छेदकं स्यादिति विशिष्टविषयकशक्त्युच्छेदेन सकलशिष्टव्यवहारव्याकोपः स्यादिति। नन्वेवमपि व्यपदेशिवद्वचनं कर्त्तव्यमेव, इयाय आरेत्यादौ धात्ववयवत्वं प्राथम्यमेकाच्त्वं चाश्रित्य द्वित्वं यथा स्यात्। एकाच इति हि बहुव्रीहिरिति वक्ष्यते। न चेणो वृद्ध्यायादेशयोरर्त्तेश्च वृद्धौ रपरत्वे च कृते आय् आर् इत्यनयोरेकाच्त्वं पचादेरिव मुख्यमेवास्तीति वाच्यम्। द्विर्वचनेचीति रूपातिदेशेन इ ऋ अनयोरेव द्विरुक्तेः। किञ्च यजेः पञ्चमलकारे स देवान् यक्षदिषितो यजीयानीत्यादौ सिब्बहुलं लेटीति सिप्। तस्य षत्वं व्यपदेशिवद्भावेनैव साध्यं, प्रत्ययस्य यः सकारस्तस्य षत्वमिति सिद्धान्तात्। तस्माद्व्यपदेशिवदेकस्मिन्नित्येव सूत्र्यतां किं प्रकृतसूत्रेण। व्यपदेशो नाम विशिष्टो मुख्यो ऽपदेशो व्यवहार एकाच् इत्यादिः सोस्यास्तीति व्यपदेशी पचिप्रभृतिस्तस्मिन्निवासहायेपि कार्य्यं स्यादित्यर्थः। अत्राह भाष्यकारः। अवचनाल्लोकविज्ञानात्सिद्धमिति। वचननिरपेक्षाल्लोकव्यवहारादेव व्यपदेशिवद्भावसिद्धेराद्यन्तवदिति व्यपदेशिवदिति चोभयमपि न सूत्रयितव्यमित्यर्थः। अस्ति हि लोके निरूढोयं व्यवहारो ऽयमेव मे ज्येष्ठः पुत्रोयमेव मध्यमोऽयमेव कनिष्ठ इति। तथा असूतायामसोष्यमाणायां च प्रथमगर्भेण हतेति व्यवहरन्ति। तथा पूर्वमनागतोऽग्रेऽनाजिगमिषुश्चाह इदं मे प्रथममागमनमिति। ननु सर्वे इमे गौणा व्यवहारास्तत्कथं मुख्ये चरितार्थं शास्त्रं गौणे प्रवर्त्तेतेति चेन्न। निरूढतरतया गौणस्याप्य-

स्य मुख्यसमकक्षत्वात् । ज्ञापकाच्च । यदयमिट ईटीति सिचो लोपं शास्ति तज्ज्ञापयति । व्यवदेशिवदेकस्मिन्निति । न ह्यन्यथेट् लभ्यते । वल्रूपत्वेपि वलादित्वाविरहात् । तथा दीर्घ इणः किताीत्यादीन्यपि ज्ञापकानि । न हि व्यपदेशिवद्भावं विना इणोभ्यासो लभ्यतइति दिक् । यत्तूक्तं कैयटेन । अर्थवता व्यपदेशिवद्भावात्कुरुतइत्यादौ तशब्दाकारस्यानर्थकत्वेन तत्र टिसंज्ञा सिद्धयआदिवद्भावो वचनेनैव साधनीय इति । अत्रेदं वक्तव्यम् । अर्थवता व्यपदेशिवद्भाव इति तावन्नेयं परिभाषा तस्या विध्यंगत्वात् । व्यपदेशिवद्भावस्तु लौकिक इत्युक्ततया तं प्रत्यंगत्वायोगात् । किन्तु शास्त्रे व्यपदेशिवद्भावयोजनाय शब्दार्थसमुदायमाश्रित्य तस्यैकदेशः शब्द इति व्युत्पादयितुमर्थवत्तापेक्षितेति परं तस्याशयः । अत एव षष्ठे निजौ चत्वार एकाच इत्येतेषु व्युत्पादनावसरे भाष्यकैयटयोरनर्थकेनापि व्यपदेशिवद्भावः स्वीकृतो लोक इव शास्त्रेऽप्यनर्थकस्य व्यपदेशिवद्भावसम्भवात् । तस्मादर्थवतेति प्रायोवादमात्रं सूत्रप्रत्याख्यानं तु सम्यगेवेति दिक् ॥

तरप्तमपौ घः ॥ एतौ घसंज्ञौ स्तः । कुमारितरा । कुमारितमा । घरूपेति ह्रस्वः । नद्यास्तरो नदीतर इत्यत्र तु न भवति । तमपा साहचर्येण प्रत्ययस्यैव तरपो ग्रहणात् । यद्वा तरविति रूपं संज्ञाप्रवृत्तावाश्रितं तच्च परिनिष्ठिते प्रयोगे क्वापि नास्तीत्यौपदेशिकं गृह्यते । तच्च तरप्प्रत्ययस्यैवास्ति । अपि च प्रतिपदोक्तत्वमपीह सुलभम् । तेनावयवशो व्युत्पादिते नदीतरे नातिप्रसङ्गः । किञ्च समानाधिकरणे स्त्रीलिङ्गे परे ह्रस्वत्वं विधीयते । अन्यथा महिषीव रूपं महिषीरूपमित्यत्रापि स्यात् । सुप् सुपेति समासः । रूपमाकृतिः, महिषीवेयमाकृतिरि-

त्यर्थः । सामानाधिकरण्यस्त्रीत्वे च स्वार्थिकत्वादातिशायनिकस्य स्तो न तु नदीतरे, अतो नोक्तदोषः । नन्वातिशायनिकप्रकरणएव तादौ घ इति पितौ घ इति वा क्रियतां लाघवादिति चेन्न । प्रकरणोत्कर्षेणेह संज्ञाप्रकरणस्यान्योपि तरबस्तीति ज्ञापनार्थत्वात् । स चानिर्दिष्टार्थत्वात्स्वार्थे भवति । तेनालाच्तरं लोपश्च बलवत्तर इत्यादि सिद्धम् । के चित्तु सामान्यापेक्षं ज्ञापकमाश्रित्य ईयसुनोपि स्वार्थिकतामाहुः । तेनाहोमहीयस्तव साहसिक्यमित्यादि प्रयोगाः समर्थिता भवंति ॥

बहुगणवतुडति संख्या ॥ एते संख्यासंज्ञाः स्युः । बहुकृत्वः, संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । बहुधा, संख्याया विधार्थे धा । बहुभिः क्रीतो बहुकः, संख्याया अतिशदन्तायाः कन् । बहुशः । बव्हल्पार्थाच्छस्कारकादित्यनुवर्त्तमाने संख्यैकवचनाच्च वीप्सायामिति शस् । गणकृत्वः गणधा गणकः गणशः । तावत्कृत्वः तावद्धा तावत्कः तावच्छः । यत्तदेतेभ्यः परिमाणे वतुप् । आ सर्वनाम्नः,शेषं प्राग्वत्।कतिकृत्वः कतिकःकतिधा कतिशः। किमः संख्यापरिमाणे डति च । शेषं प्राग्वत् । स्यादेतत् । वैपुल्येपि बहुशब्दो वर्त्तते । बहुर्हिमवानिति, सङ्घे च गणशब्दः,भिक्षुकाणां गण इति । समवायश्च यो गण इत्यमरः । तथा च सङ्घवैपुल्यवाचिनोरप्यनयोः संख्या संज्ञा स्यादिति चेन्न । संख्यायते ऽनयेत्यन्वर्थसंज्ञाविज्ञानात् । तस्मात्संख्यावाचिनोरेव बहुगणशब्दयोरिह ग्रहणं तच्च नियमार्थम् । अनियतबहुत्ववाचिनां मध्ये ऽनयोरेव संख्या संज्ञा न तु भूर्यादीनामिति । तेन बहुविषययोर्द्वयेकयोर्नियतबहुत्ववाचिनां व्यादीनां च न व्यावृत्तिः । ननु नियमार्थत्वे सिद्धे सजातीयापेक्षत्वान्नि-

यमस्य त्वदुक्तव्यवस्था सिद्धेयत्। नियमार्थत्वमेव तु दुरुपपादम्। विध्यर्थताया एवौचित्यात्। तथाहि। अस्ति तावत्कृत्रिमाकृत्रिमयोः कृत्रिमे काय्यसम्प्रत्यय इति परिभाषा। सा च न्यायमूला। संज्ञासूत्रेण संज्ञिविशेषे नियम्यमानो हि संज्ञाशब्दः कथं तादितरं बोधयेत्। एवं स्थिते बहुगणयोरिह ग्रहणाभावे संख्याप्रदेशेषु ग्रहणमेव न स्यात्। अकृत्रिमत्वात्। तस्मात्स्वसङ्ग्रहार्थमेव बहुगणग्रहणं न तु भूर्यादिनिवृत्त्यर्थमिति। अत्राहुः। संज्ञिविशेषे क्रियमाणः संज्ञानियमो यदि सामान्यापेक्षस्तदा युक्ताऽकृत्रिमस्य व्यावृत्तिः। विशेषपरत्वे तु सजातीयं कृत्रिमान्तरमेव नियमेन व्यावर्त्येत न त्वकृत्रिममपि। तदेतदुच्यते। उभयगतिरिह शास्त्रे भवतीति। कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणमित्यर्थः। अस्ति च संख्याप्रदेशेषूभयग्रहणे लिङ्गं संख्याया अतिशदन्तायाः कन्निति सूत्रे शदन्तपर्युदासः। न हि कृत्रिमा संख्या शदन्तास्तीति दिक्। तेन पञ्चधा पञ्चकृत्व इत्यादि सिद्धं भवति। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापि वतुडत्योः केवलयोः संज्ञायाः प्रयोजनाभावात्सामर्थ्यात्तदन्तग्रहणम्। तद्धितविधौ हि ङ्याप्प्रातिपदिकादित्यधिकृतं न च केवलस्य प्रत्ययस्य प्रातिपदिकत्वमस्तीति बोध्यम्। एतच्च सूत्रं भाष्ये प्रत्याख्यातम्। बहुपूगगणसङ्घस्य तिथुक्। वतोरिथुक्। षट्कतिकतिपयचतुरां थुगिति सूत्रैर्डटि परे आगमा विधीयमाना बहुप्रभृतीनां डटो निर्वाहकं संख्यात्वं ज्ञापयन्तीति किमनेन सूत्रेण। ननु बहुपूगगणसङ्घेत्यादौ विशेषाश्रयणात्संघवैपुल्यवाचिनोरपि बहुगणशब्दयोः संख्याकार्यं स्यादिति चेन्न। अनियतसंख्यावाचिनोरप्येतयोः संख्याकार्यं भवतीत्येतावन्मात्रज्ञापनेन चारितार्थ-

त्वे सति सर्वथा संख्यामप्रतिपादयतोरपि संख्याकार्यकल्पनस्य गौरवपरास्तत्वात् । भूर्यादीनां त्वनियतसंख्यावाचिनां ग्रहणं न भवति नियतसंख्यावाचिनां पञ्चादीनामेव लोके संख्याशब्दत्वेन प्रसिद्धतरत्वात् । प्रसिद्धाप्रसिद्धयोः प्रसिद्धग्रहणस्य न्याय्यत्वात् । नन्वेवमपि बहुगणयोरिव पूगसंघादीनामपि धा शस् कृत्वसुजादिसंख्याकार्यप्रसङ्गः । न च बहुगणयोः सामान्यापेक्षं ज्ञापकं पूगादीनां तु ङद्विषयकमेवेति वाच्यम् । अनुपपत्तेः । समानत्वेन एकसूत्रोपात्तत्वेन च वैषम्ये बीजाभावादिति चेत् । मैवम् । लक्ष्यानुरोधेन क्वचित्सामान्यापेक्षं क्वचिद्विशेषापेक्षं ज्ञापकमित्याश्रयणात्तदनुरोधेन वैरूप्यस्य सोढव्यत्वादिति दिक् । इमां कुसृष्टिमसहमानेनैव सूत्रकृता सूत्रमिदं प्रणीतमिति तु परमार्थः । अत्र वार्तिकानि । अध्यर्द्धग्रहणं च समासकन्विध्यर्थम् । अर्द्धेनाधिकमध्यर्धम् । एकदेशवाचकोयमर्द्धशब्दः । तस्याधिशब्देन समासे कृते यौगिकार्थः प्रतीयते न संख्येति वार्त्तिकारंभोऽध्यर्द्धेन शूर्पेण क्रीतमद्ध्यर्द्धशूर्प्पं दिक्संख्यइत्यनुवर्त्तमाने तद्धितार्थेति समासः ततः शूर्पादन्यतरस्यामित्यत्रष्ठञो वा अध्यर्द्धपूर्वेति लुक् । अध्यर्द्धेन क्रीतमध्यर्द्धकम् । संख्याया अतिशदन्तायाः कनिति कन् । इह समासविध्यर्थमिति संबंधसामान्ये षष्ठी । समासे विधीयमाने समासनिमित्ते वान्यस्मिन्कार्ये विधीयमान इत्यर्थः । तेन द्विगुनिमितो लुगपि लभ्यते । तथाचाध्यर्द्धपूर्वेति सूत्रेऽध्यर्द्धग्रहणं न कर्त्तव्यं भवति । तदुक्तं,लुकि चाग्रहणमिति । अध्यर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः । संख्येत्यनुवर्त्तते ।पूरणप्रत्ययान्त इत्यस्य पूरणप्रत्ययान्तोत्तरपद इत्यर्थः । समासकन्विध्यर्थमित्येव । अर्द्धं पञ्चमं येषामिति बहुव्रीहिः । अर्द्ध-

पञ्चमैरर्द्धाधिकैश्चतुर्भिः शूर्पैः क्रीतमर्द्धपञ्चमशूर्प्पं, पूर्ववदञष्ठञौ वा लुक्। अर्द्धपञ्चमेन क्रीतमर्द्धपञ्चमकम्। अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थम्। धिकया षष्ठ्या क्रीतोधिकषाष्ठिकः। अधिकसाप्ततिकः। तद्धितार्थेति समासः। प्राग्वतेष्ठञ्। अलुकीति वचनात् लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति द्विगुत्वमपि न तेनाध्यर्द्धपूर्वाद्विगोरिति लुङ् न। ततः संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः। नन्वलुकीति व्यर्थम्। उत्तरपदवृद्ध्यर्थमिति वचनादेव लुगभावस्याक्षेप्तुं शक्यत्वादिति चेन्न। अर्हत्यर्थात्परेष्वर्थेषु ये प्रत्ययास्तेषां लुगप्राप्त्या तत्रैवोत्तरपदवृद्धेः सावकाशत्वात्॥

ष्णान्ता षट्॥ षान्ता नान्ता च संख्या षट्संज्ञा स्यात्। षट् तिष्ठंति षट् पश्य, पञ्च सप्तेत्यादि। संख्येति किम्। विष्णुषः पामानः। ननु शतानि सहस्राणीत्यत्र नुमि कृते तस्य पूर्वभक्ततया नान्ता संख्येति षट्संज्ञा स्यादिति चेत्। अस्तु। न चैवं षड्भ्यो लुगिति लुक् स्यादिति वाच्यम्। सर्वनामस्थानसन्निपातेन कृतस्य नुमः तदविघातकत्वात्। नन्वेवमप्यष्टानामिति न सिद्ध्यति। तथाहि। अष्टन् आमिति स्थिते परत्वान्नित्यत्वाच्चाष्टन आ विभक्ताविति आत्वे कृते ऽनान्तत्वात्संज्ञायामसत्यां षट्चतुर्भ्यश्चेति नुण्न प्राप्नोतीति चेन्न। यथोद्देशपक्षे आत्वात्प्रागेव षट्संज्ञा अन्तरङ्गत्वात्। ततः कृतेप्यात्वे एकदेशविकृतस्यानन्यतया षट्संज्ञकत्वेन नुटः सिद्धत्वात्। कार्यकालपक्षे तर्ह्युक्तदोषस्तदवस्थ एव। किञ्च यथोद्देशेप्यल्विधित्वादातिदेशो दुर्लभः। अत एव ववूश्चेत्यचः परस्मिन्नित्यस्य फलमिति कैयट इति चेन्न। अष्टनो दीर्घादिति दीर्घग्रहणेन कृतात्वस्यापि षट्संज्ञाज्ञापनात्। तथाहि। नृः संख्याया इत्याद्युदात्त-

त्वं बाधित्वा घृतादिपाठादन्तोदात्तोऽष्टन्शब्दःसाधितः।तस्माद्भिस्यष्टभिरष्टाभिरिति रूपद्वयं तत्रात्वाभावे मध्योदात्तमात्वपक्षे त्वन्तोदात्तमिति सिद्धान्तः। तत्र षट्त्रिचतुर्भ्यो हलादिरिति सूत्रेण षण्णां षड्भिरित्यादाविव विभक्तेरुदात्तत्वं प्राप्तं तद्बाधित्वा झल्युपोत्तमामिति प्राप्तं षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवतीति हि तस्यार्थः। तद्बाधनायाष्टनो दीर्घादित्यारभ्यते। दीर्घान्तादष्टनः परा ऽसर्वनामस्थानविभक्तिरुदात्ता भवतीति सूत्रार्थः। तत्र यद्यात्वपक्षे षट्संज्ञा न स्यात्तर्हि सावकाशोष्टनः स्वरः परत्वादात्वाभावपक्षे झल्युपोत्तममिति षट्स्वरेण बाधिष्यतइति किं दीर्घग्रहणेन। कृतात्वस्यापि षट् संज्ञायां सत्यां तु षट्स्वरस्याष्टनः स्वरोपवादः संपद्यते। न चाष्टनः स्वरः शसि सावकाश इति वाच्यम्। तत्रैकादेश उदात्तेनोदात्तइति सूत्रेणैव गतार्थत्वात्। अष्टनशब्दोन्तोदात्त इति समनन्तरमेवोक्तत्वात्। तेन दीर्घपक्षइव तदभावपक्षेपि विभक्तेरुदात्तता स्यादिति तद्व्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं सार्थकमेव। तस्माद्दीर्घग्रहणेनात्वपक्षेपि षट्संज्ञा ज्ञाप्यतइति स्थितम्। न चैवं दीर्घग्रहणस्यात्वविकल्पज्ञापकत्वं न स्यादिति वाच्यम्। उभयज्ञापकत्वसम्भवात्। न ह्येकेनैकमेव ज्ञाप्यतइति नियमः। यावता विनानुपपत्तिस्तावतो ज्ञाप्यत्वात्। तच्चैकमनेकं वेत्यन्यदेतत्। प्रकृते चोभयं विना दीर्घग्रहणवैयर्थ्यानुद्धारादिति दिक्। यदि तु ष्णाः षकारनकाराकारा अन्ते यस्याः सा ष्णान्तेति प्रकृतसूत्रएवाकारोपि प्रश्लिष्येत तदा द्वाभ्यामित्यत्र षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं स्यात्। आद्वाभ्यां हरिभ्यामिन्द्रयाहीत्यादावाद्युदात्तमेव तु द्वाभ्यामितिपदं पठ्यते तस्मादिहाकारप्रश्लेषो न वर्णनीयः किन्तूक्तप्रकार एवादर्त्तव्य इ-

ति स्थितम्। तथा सप्तमे योगविभागं कृत्वा तद्बलेनापि द्वेधा भाष्ये समाहितम्। तथाहि। षड्भ्यो लुगित्यत्र षड्भ्य इति विभज्यते अष्टाभ्य औशिति सूत्रादष्टाभ्य इत्यनुवर्त्तते। तेन षड्भ्यो यदुक्तं कृताकारादष्टनोपि तत्स्यादिति सूत्रार्थः। न चैवं जश्शसोर्लुगप्यतिदिश्येतेति वाच्यम्। औश्त्वविधिवैयर्थ्यापत्तेः। अथ वाष्टन आ विभक्ताविति यस्मादनन्तरं राय इति योगं विभज्य हलीत्युभयोर्योगयोः शेषो व्याख्येयः। तेनाष्टानामित्यत्र नुटः पश्चादेवात्वं न तु ततः प्राक्। न चैवं जश्शसोरात्वं न स्यादिति वाच्यम्। लाघवार्थमष्टभ्य इति निर्देष्टव्ये ऽष्टाभ्य औशिति कृतात्वनिर्देशेन जश्शसोर्विषये आत्वानुपपानात्। यत्रात्वं तत्रैवौश्त्वं यथा स्यादित्येतदर्थं हि तत्र दीर्घोच्चारणं कृतमिति। स्यादेतत्। हलीति यद्युभयोः शेषस्तर्हि प्रियाष्टन्शब्दे औजसमौट्शस्टाङेङसिङसोसामङ्योस्सु वैकल्पिकतयेष्यमाणमात्वं न सिद्ध्येत्। न च तत्रात्वं नेष्यतएवेति वाच्यम्। इतःप्राचीनपक्षाणामतिव्याप्तिप्रसङ्गात्। तेषु ह्यात्वं प्राप्यतएव विभक्तिमात्रे तद्विधानात्। न च षड्भ्यो लुक् षट्चतुर्भ्यश्चेति सूत्राभ्यां विधीयमानौ लुग्नुटौ यथा गौणतायां न स्तस्तथात्वमपि न स्यादेवेति वाच्यम्। वैषम्यात्। लुग्नुटोर्विधौ हि षड्भ्य इति षट्चतुर्भ्य इति बहुवचननिर्देशात् षडर्थप्राधान्यएव तौ प्रवर्त्तेते। आत्वविधौ त्वष्टन इत्येकवचननिर्देशाद्गौणेपि प्रियाष्टाभ्यामित्यात्वं प्रवर्त्ततएव। पदाङ्गाधिकारे तस्य तदुत्तरपदस्य चेति वक्ष्यमाणत्वात्। न च जश्शसोरष्टाभ्य औशिति कृतात्वनिर्देशेनानुमीयमानमात्वं केवले प्राधान्ये चाष्टौ परमाष्टाविति यत्र यथा भवत्येवं गौणत्वेपि भविष्यतीति तदंशे नानुपपत्तिरिति वाच्यम्। औश्त्वं हि लुग्नुटाविव गौणत्वे न भव-

ति। अष्टाभ्य इति बहुवचननिर्देशात्। अन्यथा हि कृतात्वानुकरणेप्येकवचनेनैव निर्दिशेत्। अष्टा औशिति अष्ट इति वा। स्पष्टं चैतदिहैव सूत्रे भाष्यकैयटयोः। तथा चौश्त्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वमपि प्राधान्यएव स्यान्न तु गौणतायामिति तदंशेप्यनुपपत्तिसाम्यात्। तस्माद् हलीत्युभयशेषश्चेन्न स्यादात्वं प्रियाष्टनः। टाङेङसिङसोसाम्सु तथैवौजसमौट्छसि। प्रागुक्तेषु तु पक्षेषु भवेदात्वममीष्वपि। फलभेदे महत्येवं कथं पक्षविकल्पनम्। अत्रोच्यते। प्रियाष्टन्शब्दस्याजादावात्वमनिष्टमेव। हलीत्युभयोः शेषस्य भाष्यएव सिद्धान्तितत्वात्। तथा सत्यौजसोः क्रमेण प्रियाष्टानौ प्रियाष्टान इत्येव रूपं स्यान्न तु प्रियाष्टौ प्रियाष्टा इत्यपीत्याशंक्य यथालक्षणमप्रयुक्ते इत्यभिहितत्वाच्च। अत एव यथालक्षणमिति प्रतीकमुपादाय न भवत्येवात्रात्वमित्यर्थ इति कैयटोऽव्याख्यत्। एवं स्थिते प्राचीनाः पक्षा अपरितोषग्रस्ता एव व्यवस्थितविभाषया गौणतायामजादिष्वात्वं न भवतीत्याशयेन वा योज्याः। उदात्तदभाष्यकैयटप्रामाण्यात्। तस्मात्प्रियाष्टनः सर्वेषु वचनेषु राजन्शब्दसाधारणं रूपं हलादौ तु हाहाशब्दसाधारणमपरं रूपम्। औश्नुटोस्तु प्राप्तिरेव नास्तीति प्रामाणिकः पन्थाः। अत एव सर्वादीनि सर्वनामानीति सूत्रे हरदत्तेन गौणत्वऔश्न भवतीति स्पष्टमेवाभिहितम्। अत एवाष्टाभ्य औशिति सूत्रे तदंतग्रहणमत्रेष्यते। परमाष्टाविति युक्त्वा प्रियाष्टान इत्यत्रात्वस्याभावादौश्न भवतीति काशिका संगच्छते। अत एव चाष्टन आ विभक्ताविति सूत्रे तदन्तविधिश्चात्रेष्यते। प्रिया अष्टौ यस्य प्रियाष्टाविति यथा स्यादिति काशिकाग्रंथोपि सङ्गच्छते। हलादावात्वस्य निर्बाधत्वात्। हरदत्तस्त्वष्टा-

भ्य औशिति सूत्रे प्रियाष्टान इत्यत्रेति वृत्तिग्रन्थमुपादाय यथा पुनर्गौणतायामात्वं न भवति तथा तद्विधावेव वक्ष्यतइति प्रतिज्ञायाष्टन आ विभक्ताविति सूत्रे एकवचननिर्देशात्स्वरूपस्य ग्रहणं नार्थस्य तेनोपसर्जनेप्यष्टानि भवति तत्रापि विकल्पितत्वात् । प्रियाष्टा प्रियाष्टानौ प्रियाष्टानइत्यपि भवति । तत्राप्यात्वपक्षे भसंज्ञाविषये आतो लोपमिच्छंति प्रियाष्टः पश्येत्याद्यात्वाभावपक्षेप्यल्लोपे ष्टुत्वं प्रियाष्ट इति भवतीत्यंतेन ग्रन्थेन पूर्वप्रतिज्ञातार्थविपरीतं भाष्यवृत्त्यादिविरुद्धं च कथमभिहितवानिति तस्याशयं स एव प्रष्टव्यः । अल्लोपे ष्टुत्वमित्यपि तदुक्तिश्चिन्त्यैव । पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावेन ष्टुत्वायोगात् । न च पूर्वत्रासिद्धीये न स्थानवदिति निषेधः । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति सापवादत्वात् । ननु रषाभ्यां नो ण इति प्रतिपदोक्तं णत्वं तत्र गृह्यते न तु ष्टुत्वविधिलभ्यमपि विलंबितप्रतीतिकत्वादिति चेन्न । अपदान्तस्य मूर्द्धन्य इति सूत्रं संपूर्णं रषाभ्यामिति सूत्रे ऽनुवर्त्य तत्तत्स्यस्य णग्रहणस्य पदांतस्येतिनिषेधसूत्रस्य च भाष्ये प्रत्याख्यातत्वात् । यथोत्तरं मुनीनां प्रामाण्यात् । न च मूर्द्धन्यशब्देन ष्टुशब्देन वा निर्वर्त्यमाने णकारे वैषम्यमस्ति सूत्रकाररीत्या कथंचित्संभवन्नपि न्यायोत्र भाष्यानुरोधात्त्याज्य एव । तथा च शर्पूर्वाः खय इति सूत्रे खर्पूर्वग्रहणं कर्त्तव्यमिति वार्त्तिकं प्रत्याचक्षाणो भगवानाह । अभ्यासजश्त्वचर्त्वे सिद्धमित्येव एत्वतुग्ग्रहणं न कर्त्तव्यमिति । तथा च हलादिः शेषे कर्त्तव्ये तुकश्चुत्वेन निष्पन्नस्य चकारस्यापि चर्त्वेन सिद्धतयोच्चिच्छिषतीति रूपं सिद्धमिति तदाशयः कैयटेन वर्णितः । तदेकं प्रियाष्ट्न इत्याद्येव रूपमुचितम् । न चैवं पूष्ण-

इत्यादावपि नकार एव पठ्येतेति वाच्यम्। तत्राट्कुप्वाङिति सूत्रेण णत्वप्रवृत्तेरिति दिक् ॥

डति च ॥ डत्यन्ता संख्या षट्संज्ञा स्यात्। कति सन्ति, कत्यद्राक्षीः। षट्त्वाज्जश्शसोर्लुक्। संख्येतिकिम् ! पातेर्डतिः पतयः। न चास्य संख्यासंज्ञापि स्यादिति वाच्यम्। वतुसाहचर्येण तत्र तद्धितस्यैव ग्रहणात्। इदं सूत्रं प्रत्याख्यातं भाष्ये। बहुगणवतुसंख्या। डति। संख्येत्यनुवर्त्तते। ततः ष्णान्ता षट् संख्या डतीत्युभयमप्यनुवर्त्तते। पूर्वसूत्रेप्यन्वर्थसंज्ञाविज्ञानात्। संख्याप्रश्नविषयस्यैव डतेर्ग्रहणं न त्वौणादिकस्येति ॥

क्तक्तवतू निष्ठा ॥ एतौ निष्ठासंज्ञौ स्तः। कृतः। कृतवान्। ननु विहितयोः प्रत्ययोरनेन संज्ञा। संज्ञया च विधानम्। वक्ष्यति हि तृतीये, निष्ठेति। तथा चान्योन्याश्रय इति चेन्न। सूत्रशाटकवद्भाविसंज्ञाविज्ञानात्। तौ भूते काले भवतो ययोर्विहितयोर्निष्ठेत्येषा संज्ञा भविष्यतीति। स्यादेतत्। अनुबन्धाः कार्यार्थमुपादीयन्ते न तु श्रवणार्थं,तेषां लोपविधानात्। तथा च लुप्तानुबन्धस्य परिनिष्ठितस्य यत्र सारूप्यं तत्रक्वानुबन्धकार्य्यं भवतु क्व वा नेति तु निश्चेतुमशक्यम्। न च काकादिवदुपलक्षणस्यापि व्यावर्त्तकता भविष्यतीति वाच्यम्। काकादिनापि हि वेदिकापुण्डरीकादिकं स्थिरं किञ्चित्परिचाय्यते तद्बलाच्चोड्डीनेपि काके व्यवहारो न सङ्कीर्य्यते। न चेह परिचेयान्तरमुपलभ्यते क्तप्रत्ययतन्प्रत्ययययोः काकादिकल्पौ हि ककारनकारौ तदपगमे संवृत्ते तइत्यत्र परिचेयस्य परस्परव्यावृत्तस्य दुर्वचत्वादिति। अत्राहुः। कालकारकविशेषादयो अर्था एवात्र वेदिकापुण्डरीकादिस्थानापन्नास्तदर्शनाच्चानुबन्धस्मृतौ सत्यां तत्तत्प्रयुक्तं कार्य्यं साधुतया ज्ञायते। तथा लूनः शालिरिति केन चित्प्रयुक्ते

लक्षणज्ञेन कर्मभूतकालबलात्क्तप्रत्ययो ऽयमिति निर्णीयते । लोतमालभेतेति प्रयुक्ते तु मेषवाची लोतशब्दस्तनप्रत्ययान्तः प्रयुक्त इति निर्णीयते । हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तान्नित्युणादिसूत्रात् । लोतः स्यादश्वमेषयोरिति तु पञ्चपादीवृत्तौ स्थितम् । तथा प्राभित्तघटं देवदत्त इति प्रयोगे कर्त्रैकत्वाद्यवगमाल्लुङन्तस्यायं प्रयोगो न तु निष्ठान्तस्येति निर्णीयते । स्यादेतत् । अञ्जिघृसिभ्यः क्त इति क्तप्रत्यये अक्तं घृतं सितामिति व्युत्पादितम् । तत्रापि निष्ठा संज्ञा स्यात् । ततश्च निष्ठा च द्व्यजनादिति स्वरः स्यात् । निष्ठान्तं द्व्यच्कं संज्ञायामाद्युदात्तं स्यात्स चेदादिराकारो नेति सूत्रार्थः । न चेष्टापत्तिः । घृतं मिमिक्षइत्यादावन्तोदात्तस्यैव पठ्यमानत्वादिति । अत्राहुः । अतः कृकमीतिसूत्रे कमिग्रहणेनैव सिद्धे कंसग्रहणेन ज्ञापितमुणादयः क्व चिद्धुत्पत्तिकार्यं न लभन्तइति । अतो नात्र निष्ठा संज्ञेति । यद्वा घृतादीनां चेति फिट्सूत्रेण सिद्धम् ॥

इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य
प्रथमे पादे पञ्चमाह्निकम् ॥

सर्वादीनि सर्वनामानि ॥ एतानि सर्वनामसंज्ञानि स्युः । तद्गुणसंविज्ञानोयं बहुव्रीहिः । तस्यान्यदर्थस्य गुणानां वर्त्तिपदार्थरूपाणां विशेषणानां कार्यान्वयितया संविज्ञानं यत्र स तद्गुणसंविज्ञानः । तत्र सर्व आदिर्येषां तानीति विग्रहः । तच्छब्दप्रयोगेणान्यपदार्थप्राधान्यं लभ्यते । एवं चित्रा गावो यस्य स इत्यादावपि । अन्यथा हि यस्य गावश्चित्रा इति गोशब्दार्थप्राधान्यं स्यात् । न चैवंविधेर्थे बहुव्रीहिरिष्यते । यत्तु वृत्तिवाक्ययोर्विशेष्यैक्यसम्पत्तये चित्राणां गवामयमित्यादि विग्रहवर्णनं मीमांसावार्त्तिके कृतम् । तत्तु न मुनिवचसामनुकूलम् ।

अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति वार्त्तिककृता वक्ष्यमाणत्वात् । भाष्यकृता च शेषो बहुव्रीहिरिति सूत्रे त्रिकतः शेषमाश्रित्य सूत्राक्षरैरेवोक्तस्यार्थस्य साधितत्त्वात् । द्वितीया श्रितातीतादिभिस्तृतीया तत्कृतार्थेनेत्यादि क्रमेण हि षण्णां त्रिकाणां समास उक्तस्तदपेक्षया शेषः प्रथमारूपः त्रिकस्तस्यैव बहुव्रीहिसंज्ञेति वृष्टे देवे गत इत्यादेरिव चित्राणां गवामित्यस्यापि दूरापास्तं-बहुव्रीहित्वम् । किञ्च मत्वर्थे बहुव्रीहिरिति कात्यायनवचनात्कथं चित्राणां गवामित्यत्र तत्प्रसक्तिः । ननु दण्डीत्यादावपि दण्डस्यायमिति विग्रहाभ्युपगमादस्मद्रीत्यायमेव मत्वर्थ इति चेत्तर्हि सुतरां मुनिवचनविरोधः । तदस्यास्त्यस्मिन्निति सूत्रेण प्रथमान्तादस्त्युपाधिकात्सबन्धिनि मतुब्विधानात् । समर्थानां प्रथमाद्वेति सूत्रेण प्रथमनिर्दिष्टस्यैव प्रकृतित्वावधारणाच्च । नन्वेतान्यपि सूत्रवार्त्तिकभाष्यवचांसि कथं चिच्छंक्त्वा नेष्याम इति चेत् । समर्थः पदविधिरित्यादीनि व्रीहिभिर्यजेतेत्यादिषु पदविधिभिन्नेष्वपि योजयित्वा सामर्थ्यं च भाष्यादिसम्मताद्विपरीतमेव वर्णयन् भवादृशो निरंकुशः किंकिं न कुर्यात् । किन्तु व्याकरणाधिकरणे सिद्धान्तितं व्याकरणप्रामाण्यं कथं स्वेच्छया व्याकुलयसीति परम्पर्य्यनुयोगे समाधानं विभावय । तस्माच्चित्रा गावो यस्येत्येव विग्रहः सकलशिष्टसम्प्रदायसिद्धो मुनित्रयवचसामनुकूलश्चेति दिक् । आदिशब्दस्यावयववाचित्वादुद्भूतावयवभेदः समुदायः समासार्थस्तस्य च समुदायस्य युगपल्लक्ष्ये प्रयोगाभावादानर्थक्यात्तदङ्गेष्विति न्यायेन तदवयवेषु प्रवर्त्तमाना संज्ञा ऽविशेषात्सर्वशब्देपि प्रवर्त्तेतइति युक्तं तद्गुणसंविज्ञानत्वम् । हलि सर्वेषामित्यादि निर्देशाश्चेह लिङ्गम् । जक्षित्यादयः षडिति सूत्रे तु जक्षिति योगं विभज्य जक्षेः संज्ञाविधानसा-

मर्य्यादेव इत्यादय इत्यतद्गुणसंविज्ञानो बहुव्रीहिः । एतेन कतन्तेभ्यः कण्वादिभ्य इत्युभयत्रापि शकलशब्दसंग्रहार्थं यथा तत्पुरुषबहुव्रीह्योरेकशेष इति चतुर्थे वक्ष्यते । तथेहापि नपुंसकमनपुंसकेनेति वा स्वराभिन्नानां यस्योत्तरः स्वरविधिः स शिष्यतइति वा तत्पुरुषबहुव्रीह्योः सह विवक्षायां बहुव्रीहेः शेष इति परास्तम् । तद्गुणसंविज्ञानबहुव्रीहिणैव सर्वशब्दस्यापि संग्रहे सिद्धे एकशेषाश्रयणस्य गौरवपराहतत्वात् । महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं सर्वेषां नामानीति । तत्सामर्थ्याच्च सर्वार्थाभिधानसामर्थ्यविशिष्टानामेव संज्ञित्वमनुमीयते । तथा च तथाभूतानां गणे पाठस्यावश्यकतया प्रकरांतरज्ञां च पाठे प्रमाणाभावादेव विशेषे ऽवस्थितानां संज्ञानामुपसर्जनानां च सर्वादित्वमेव नास्ति तेन तेषां गणकार्यं संज्ञाप्रयुक्तकार्य्यं चेत्युभयमपि न भवति । गणकार्यं यथा त्यदादीनामः । तद् नाम कश्चित् । अतिक्रान्तस्तमतितत् । तथा ऽङतरादिभ्यः । अन्यमतिक्रांतमत्यन्यम् । अतिकतरम् । संज्ञाप्रयुक्तं यथा, सर्वनाम्नः स्मै । अतिसर्वाय । तदेतदभिप्रेत्योक्तं वार्तिककृता, संज्ञोपसर्जनप्रतिषेधः पाठात्पर्युदासः पठितानां संज्ञाकरणमिति। तस्मात्प्रसिद्धेन प्रवृत्तिनिमित्तेन प्रयुक्त इतरं प्रत्यनुपसर्जनीभूत एवेह संज्ञीति स्थितम् । यत्तु स्वरूपमात्राश्रयं कार्य्यं न तु गणपाठं संज्ञां वापेक्षते । यथा युष्मदस्मद्भ्यां ङसोश्यादि, तदुपसर्जनत्वेपि भवत्येवेत्यवधेयम् । न चैवं युष्मद्युपपदइत्यादावपि त्वमादिप्रसङ्गः । लोकप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः । अभिव्यक्तपदार्था यइति न्यायात् । तदन्तग्रहणमत्र बोद्धव्यम् । द्वंद्वेचेति ज्ञापकात् । तच्च तत्रैव वक्ष्यते । प्रयोजनं सर्वनाम्न्ययसंज्ञायामिति वार्तिकवचनाच्च । तेन परमसर्वतः परमसर्वत्र परमसर्वके इत्यत्र समस्तात्त-

सिल् त्रल् अकच्च सिद्ध्यति । न च तसिलादिविधौ प्रातिपदिकादित्यनुवृत्तेः सर्वनाम्ना च तद्विशेषणे तदन्तविधिर्भविष्यतीति वाच्यम् । समासप्रत्ययविधौ न तदन्तविधिरिति निषेधात् । न चैवमतिसर्वायेत्यादावतिप्रसङ्गः । उपसर्जनपर्युदासस्योक्तत्वात् । अत एव परमसर्वस्मा इत्यादौ स्मायादयो भवंत्येव । स्यादेतत् । असः अतस्मिन् अनेष इत्यादावप्यत्वसत्वस्मिन्नादीनि न स्युः । अतिसर्वइत्यत्रेवोपसर्जनत्वात् । तथा चाब्राह्मणइत्यादेर्ब्राह्मणभिन्न इत्यादिक्रमेण पूर्वपदार्थप्राधान्येन विवरणं कुर्वन्ति । सत्यम् । वैयाकरणमते नञ्समासस्योत्तरपदार्थप्राधान्यमेव । नञ्सूत्रे भाष्यकारेण तथैव सिद्धांतितत्वात् । तथाहि । आरोपितत्वं नञर्थः।तथा च मायामनुष्यमायामृगव्याजनिशाकरकपटब्राह्मणादिशब्देभ्य इव आरोपितो मिथ्याभूतोयं ब्राह्मण इत्येवं शाब्दबोधपर्यवसाने ब्राह्मणभिन्न इत्यादिकमार्थिकार्थविवरणं न तु शाब्दोयमर्थः । अत एव एतत्तदोरिति सूत्रेऽनञ्समास इति सार्थकम् । अत एव चौत्सर्गिकी तत्पुरुषस्योत्तरपदार्थप्रधानतापि निर्वहतीति दिक् । ननु यदीह तदन्तविधिरिष्टस्तर्हि भाष्यविरोधः । तत्र हि संज्ञोपसर्जनप्रतिषेध इति वार्तिकस्य प्रत्याख्यानमुपक्रम्यार्थद्वारकं विभक्तिविशेषणमाश्रित्यातिप्रसंग उद्भृतः । सर्वनामार्थसमवेतसंख्याकारकाद्याभिधायिनो ङेः स्मै स्यादित्यादिनोक्तरीत्या तदंतविधौ सति त्वतिसर्वायेत्यादौ समुदायस्य सर्वनामतयार्थद्वारकविभक्तियोगाश्रयणेपि स्मायादिप्रसंगस्तदवस्थ एव स्यादिति चेत् । सत्यम् । अत एवापरितोषाद्भाष्ये अथवा महतीयं संज्ञा क्रियतइति पक्षान्तरमुपन्यस्तामिति गृहाण । ननु यदीयमन्वर्थसंज्ञा तर्हि पूर्वपदात्संज्ञायामग इति णत्वं स्यादिति चेत् । सत्यम् । अत एव निपातनाण्णत्वाभा-

वः। सणत्वं तु रूपमसाध्वेव। निपातनेन णत्वशास्त्रस्य बाधितत्वात्। अत एव शाश्वत्क इत्याद्यप्यसाध्वेव। येषां च विरोधः शाश्वतिक इति निपातनेनेसुसुक्तान्तादित्यस्य बाधितत्वात्। नन्वेवमपरस्पराः क्रियासातत्यइति निपातनेन सन्ततशब्दो बाध्येतेति चेन्न। तत्र सातत्यइत्यनेनैकदेशानुमतिद्वारा लुम्पेदवश्यमः कृत्य इति पूर्वाचार्य्यपठितस्य श्लोकस्यैव ज्ञापनात्। नन्वेवमपि पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्नोति। सत्यम्। पृषोदरादिषु पुरातनशब्दस्य पाठो बोद्धव्यः। आगमशास्त्रस्याव्ययटिलोपस्य चानित्यतामात्रं पुराणेति निर्देशेन ज्ञाप्यतइति तु तत्त्वम्। तदेवं बाधकान्येव निपातनानीति भाष्ये स्थितम्। यद्वा। नेदं संज्ञासूत्रम्, किन्तु गणशुद्धिमात्रफलकम्। यानि सर्वनामानि तान्येव सर्वादीनि न त्वितराण्यपीति व्याख्यानात्। यथा तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोरिते सूत्रे कुत्सनाभीक्ष्ण्ययोरिति योगं विभज्य गोत्रादीनीत्यनुवर्त्यैतयोरर्थयोर्यानि वर्त्तन्ते तान्येव गोत्रादीनि इति गणशुद्धिपरतया व्याख्यास्यते तेन चनाचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः कुत्सने च सुप्यगोत्रादाविति सूत्रयोरपि विशिष्टार्थानामेव गोत्रादीनां ग्रहणं तथेहापि। ननूक्तरीत्या त्यदादिनाम इत्याद्यन्तर्गणकार्यं सिद्धचतु सर्वनाम्नः स्मै इत्यादिकं तु कृत्स्नसकलादिशब्देष्वतिव्याप्तं स्यादिति चेन्न। गणपाठसामर्थ्यात्तत्र पठितानामेव ग्रहणात्। एतावानेव हि भेदः। यत्पूर्वोक्ते पक्षे संज्ञा विधेया गणशुद्धिस्त्वार्थिकी आस्मिंस्तु पक्षे गणशुद्धिःशाब्दी कृत्स्नादिव्याद्वृत्तिस्त्वर्थादिति। अथवोभयमनेन क्रियते पाठशुद्धिः संज्ञा च। तन्त्राद्वृत्त्येकशेषाणामन्यतमाश्रयणात्। तत्र सहविवक्षां विनापि वाचनिक एकशेषः। आकृतिप-

क्षे हि प्रत्याख्यातं सरूपसूत्रमिको गुणवृद्धीत्यादिवच्छास्त्रप्रक्रियार्थं सत्सहविवक्षां विनाप्येकशेषं विधत्ते। तदित्थं पञ्चापि पक्षाः स्थिताः। संज्ञाभूतानां व्यावृत्तिस्तु गौणमुख्यन्यायेनापि सिद्ध्यति। न चासौ पदकार्येष्वेवेति वाच्यम्। विशिष्टरूपोपादाने सर्वत्र तत्प्रवृत्तेरित्युपपादितमोत्सूत्रे। वार्त्तिकरीत्या त्वेकसंज्ञाधिकारे सर्वनामसंज्ञानन्तरमेकद्रव्यनिवेशिनी संज्ञेति संज्ञासंज्ञया सर्वनामसंज्ञा बाध्यतइत्यपि समाधानान्तरं बोद्धव्यम्। यद्वा। पूर्वपरावरेति गणसूत्रेऽसंज्ञायामिति योगं विभज्य पूर्वोत्तरयोः शेषो व्याख्येयः। उक्ताः सर्वादयो वक्ष्यमाणाः स्वादयश्चासंज्ञायामिति। तस्मादुपसर्जनव्यावृत्तिरेवान्वर्थसंज्ञाश्रयणस्य मुख्यं फलम्। नन्वनुपसर्जनादिति योगं प्रकारान्तरेण व्याख्याय तद्बलेनैवान्तर्गणकार्यं वारितं भाष्ये। तद्यथा। अनुपसर्जनेति लुप्तषष्ठीकं पदम्। अः आदिति च च्छेदः। अश्च अच्च तयोः समाहारः आत्। अकारात्परौ अ अत् इत्यादेशौ यत्र क्रियेते तत्रानुपसर्जनस्य ग्रहणमिति परिभाषार्थः। तेन त्यदाद्यत्वमडुतरादिभ्य इत्यदड्भावश्च गौणतायां न भवति। अकारात्परत्वेन विशेषणत्वं किम्। पञ्चम्या अत् युष्मानतिक्रान्तेभ्योतियुष्मत्। एकवचनस्य च युष्मानतिक्रान्तादतियुष्मत्। न ह्ययमकारात्परो विधीयतइति। तथा चोपसर्जनव्यावृत्तेरप्यन्यथासिद्धौ किं महासंज्ञयेति चेन्न। अतिसर्वायेत्यादिवारणस्य तदेकसाध्यत्वात्। न हीदमनुपसर्जनादित्यनेन साधयितुं शक्यते। एतदपरितोषादेव हि भाष्ये पक्षान्तराश्रयणमिति दिक्। एवं चानुपसर्जनादिति सूत्रं परिभाषात्वेनापि नोपयुज्यतइत्यर्थात्प्रत्याख्यानमेव भवतीत्यवधेयम्। स्यादेतत्। कौम्भकारेयसिद्धये सूत्रमारम्भणीयम्।

तत्र हि कुम्भकारीशब्दादेव ढगुत्पादयितव्यः। अन्यथा कुम्भेत्युकारस्य वृद्धिर्न स्यात्। तथा च विशिष्टस्य स्त्रीप्रत्ययान्तताप्येषृष्या सा च तदैव निर्वहति। यदि टिड्ढाणञ्त्रिति सूत्रे प्रत्ययग्रहणपरिभाषया ऽणित्यनेनाणन्तग्रहणे तेन च प्रातिपदिकविशेषणादण्णन्तान्तं प्रकृतिः स्यात्। तच्च समासप्रत्ययविधौ प्रतिषेध इति ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति च प्रतिषेधाद्दुर्लभम्। अनुपसर्जनादित्युपसर्जननिषेधसामर्थ्यात्तु प्रधानेन तदन्तविधौ ज्ञापिते कौम्भकारेयः सिद्ध्यतीति स्पष्टमेव। न च कृद्ग्रहणे गतिकारकपूर्वस्यापीति परिभाषया कुम्भकारशब्दादेव स्त्रीप्रत्ययोस्त्विति वाच्यम्। अणिति हि तद्धितोपि गृह्यते। औपगवीति यथा। कृद्ग्रहणइति परिभाषा तु कृन्मात्रग्रहणे प्रवर्त्तते न तु कृदकृद्ग्रहणे, प्येवमर्थमेवेदं सूत्रमिति भाष्यकृतैव चतुर्थे स्थापयिष्यते। तत्कथमिहोक्तमनुपसर्जनादित्ययं योगः प्रत्याख्यायतइति। अत्रोच्यते। चतुर्थसूत्रकाराभिप्रायवर्णनमात्रं करिष्यते। निष्कर्षे तु क्रियमाणे सूत्रवैयर्थ्यमेवायातीत्याशयेनेह भगवतोक्तं प्रत्याख्यायतइति। तथाहि। कारशब्दान्ङीबुत्पत्तावपि कौम्भकारेयः सिध्यत्येव ष्यङः सम्प्रसारणमित्यत्र भाष्यकृता पठिष्यमाणया वाचनिक्या स्त्रीप्रत्यये चानुपसर्जननेनेति परिभाषयानुपसर्जने स्त्रीप्रत्यये तदादिनियमनिषेधेन कुम्भकारीशब्दाद्ढगुत्पत्तेः। अत एव हि परमकारीषगन्धीपुत्र इत्यत्र ष्यङन्तस्योच्यमानं सम्प्रसारणं परमकारीषगन्ध्याशब्दस्यापि भवत्येव। न चैवमतिकारीषगन्ध्यापुत्र इत्यादावतिप्रसङ्गः। अनुपसर्जनइत्युक्तत्वेनोपसर्जने तदादिनियमस्यत्वात्। न चैवमर्धपिप्पलीत्यादौ हल्ङ्यादिलोपो न स्यादिति वाच्यम्। हल्ङ्यादिसूत्रे दीर्घग्रहण-

सामर्थ्येन तत्रोपसर्जनेनापि तदादिनियमो नास्तीति ज्ञापितत्वात्। वस्तुतस्तु निष्कौशाम्ब्यादौ समुदायस्याङ्याबन्तत्वेप्यवयवस्य ङ्याबन्ततया ततः परस्य सोर्लोपप्राप्तेर्नैतज्ज्ञापकम्। अर्द्धपिप्पल्यादावप्यवयवस्य ङ्यन्ततयैव निर्वाहः। न च विहितविशेषणता वक्तुं शक्या। या सेत्यादावव्याप्तेः। न च तत्र हलन्ताद्विहितत्वेन निर्वाहः। कर्त्ता हर्त्तेत्यादावलोपापत्तेः। यः स इत्यादौ लोपापत्तेश्च। यद्वा। सुतिसीतिप्रत्ययैः प्रकृतिराक्षिप्यते हलंत्यसूत्रे कैयटग्रन्थनिर्वाहाय विवरणे तथैव वर्णानात्। एवं च ज्ञापकं सुस्थमेकदेशस्याप्रकृतित्वात्। अत एव पंचमसमाप्तौ गोस्त्रियोरुपसर्जनस्येति सूत्रे च कैयटेन ज्ञापकत्वपक्ष एवोक्तः। ननूभयथापि माला दृष्टेत्यादौ समुदायादावन्तत्वप्रयुक्तः सुः स्यात्ततश्चैकपद्यैकस्वर्ययोरापत्तिः। एकवाक्यतया विधिरिति पक्षेपि पचतिकल्पमित्यादिसिद्धयएकवचनमुत्सर्ग इत्यस्यावश्याश्रयणीयत्वादिति चेन्नाङ्याब्ग्रहणस्यान्यार्थतया यथा कथंचित्प्रातिपदिकग्रहणे लिङ्गविशिष्टग्रहणेन ङ्याबन्तत्वात्सुबुत्पत्तेश्च वक्ष्यमाणत्वात्। इह च समुदायस्याप्रातिपदिकत्वात्। अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति हि स्थास्यति। न चैवमपि कदा चित्कारीशब्दाद्ढक् स्यादेवेति वाच्यम्। एकाज्द्विर्वचनन्यायेन समुदायादेवोत्पत्तेः। कुम्भेनैकार्थीभूतस्य निष्कुष्यापत्येन योग इति वक्तुमशक्यत्वाच्च। किञ्च सूत्रमारभमाणस्याप्येषैव गतिः। औपगवीत्यादाविव केवलात्कारशब्दादपि कदाचिन्ङीप्प्रसंगेन कौंभकारेये पाक्षिकदोषस्य त्वत्पक्षेपि तुल्यत्वात्। स्यादेतत्। अक्रियमाणेस्मिन्सूत्रे कुम्भकारीत्यत्र ङीवेव न स्यात्। कुम्भेनैकार्थीभूतस्याणंतस्य स्त्रीत्वेनायोगात्। यस्य च स्त्रीत्वेन योगो विशिष्टस्य, न तद-

णन्तम्। तस्मादमहत्पूर्वादिति निषेधेन ज्ञाप्यमानस्तदन्तविधिरुत्तरत्राप्यभ्युपगन्तव्यः। स च यथा पूर्वत्रोपसर्जनेनापि भवति न षट्स्वस्रादिभ्यः, प्रियपंचा द्रौपदी, वनोरच, अतिधीवरीति तथा टिदादावपि स्यात्। ततश्च बहुकुरुचरेत्यादावतिप्रसङ्गः। अतो निषेधसूत्रमिदं सार्थकम्। ननु पूर्वत्रोपात्तं तदन्तं च स्त्रियामित्यनेन विशेष्यते टिड्ढाणञित्यादौ तूपात्तं टिदादिकमेव तेन बहुकुरुचरेत्यादौ टिदादेरस्त्रीत्वान्न ङीप्। कुम्भकारीत्यादौ त्वणन्तस्य स्त्रियां वृत्तेस्तदन्तादपि ङीप् भविष्यतीति चेन्न। एतद्विषयविभागस्य दुरूहतया तज्ज्ञानार्थमेव सूत्रारम्भस्योचितत्वात्। नैतदेवम्। आरब्धेप्यस्मिन्सूत्रे व्याख्यानस्यैव शरणीयत्वात्। अन्यथा पंचाजीत्यत्राजानामस्त्रीत्वेपि तदन्तस्य स्त्रियां वृत्त्या टाप्प्रसङ्गात्। अतो विशेषणविशेष्यभावं प्रति कामचारादजाद्यतष्टाबित्यत्र टिड्ढाणञित्यादौ चोपात्तं स्त्रीत्वेन विशेष्यते वनोरचेत्यादौ तूपात्तं तदन्तं चेति सकलेष्टसिद्धेः सूत्रं व्यर्थमेव। स्यादेतत्। तदन्तविधिज्ञापनार्थमेवेदं सूत्रमारम्भणीयम्। न चामहत्पूर्वेत्यनेनैव तत्सिद्धिरिति वाच्यम्। तस्य ज्ञापकत्वायोगात्। पंचाजीत्यादिसिद्ध्यर्थमजादिभिः स्त्रीत्वं विशेष्यतइति हि वक्ष्यते। तथा च महाशूद्रीत्यत्र समुदायस्य स्त्रियां वृत्तावप्यवयवस्यातथात्वेन सत्यपि तदन्तविधौ टाप् न प्राप्नोतीति कथं तदन्तविधिं ज्ञापयित्वा निषेधः पर्यवस्येत्। मैवम्। इतरैरजादिभिः स्त्रीत्वविशेषणेपि शूद्रशब्देनाविशेषणात्। एवं च स्पष्टमेव ज्ञापकपर्यवसानम्। न चैवं पंचशूद्रीत्यत्रापि प्रसङ्गः। जातिरित्यनेन शूद्रस्य विशेषणात्। स्यादेतत्। पूर्वसूत्रनिर्देशो वापिशलमधीतइतीति कात्यायनोक्तरीत्या सूत्रं सार्थकम्। तथाहि। अप्रधानमुपसर्जनम्। तथैव पूर्वाचार्यसूत्रेषु लोके च व्यव-

हारात् । ततश्चापिशलिना प्रोक्त,मिञश्चेत्यण् । ततोध्येत्र्यां तदधीतइत्यण् तस्य प्रोक्ताल्लुगिति लुक् आपिशलां ब्राह्मणी अत्र प्रोक्तार्थस्याणो ऽप्रधानत्वात्तदन्तान्न ङीप्। अण् यः अः अनुपसर्जनम प्रधानमिति विशेषणात्। न चैवमप्यध्येत्र्यामुत्पन्नस्याणोनुपसर्जनतया तदाश्रयो ङीप् स्यादेवेति वाच्यम् । तस्य लुप्तत्वात् । न च प्रत्ययलक्षणं शंक्यम्। वर्णाश्रये तन्निषेधात्। टिड्ढाणञित्यत्र ह्रत इत्यनुवर्तते । अणा च अकारो विशेष्यते । अण्यो ऽकार इति न तु विपरीतो विशेषणविशेष्यभावः । वर्णस्याप्राधान्ये प्रत्ययलक्षणापत्तेः अतृणेडित्यत्र तृणह इम्वत् । ननु स्त्रियामित्यनेनाणो विशेषणान्नोक्तदोष इति चेन्न । काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी । अत्र द्वितीयेणि प्रोक्ताल्लुगिति लुप्ते प्रथमोप्यण् स्त्रियामेवोत्पन्न इति तदन्ताद्ब्राह्मण्यां वर्त्तमानान् ङीप् स्यात् । तस्मात्प्रधानाद्यथा स्यादप्रधानान्मा भूदित्येतदर्थमारंभणीयं सूत्रमिति । अत्रोच्यते । अध्येत्र्यामभिधेयायामण ईकारेण भवितव्यम् । यश्चेहाध्येत्र्यामणुत्पन्नः स लुप्त एव । यश्च श्रूयते । तस्मादीकार उत्पन्नो लुप्तश्चेति पुनर्न भवति सकृत्प्रवृत्या लक्षणस्य चरितार्थत्वात् । तस्मादनुपसर्जनादित्ययं योगः प्रत्याख्यातइति भगवदुक्तिर्निर्बाधैवेति दिक् । सर्वादयश्च पंचत्रिंशत् । सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम, पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरंबहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति । तत्र सर्वविश्वशब्दौ कृत्स्नपर्यायौ सर्वशब्दस्य स्वांगाशिटामित्याद्युदात्तत्वे प्राप्तेतोदात्ततत्वं गणे निपात्यते तेन सर्वेषां वि-

कौर इत्यत्रानुदात्तादेरञ् सिद्धः स ह्यनुदात्तादिप्रकृतिकाद्विधीयतइति ङ्याप्सूत्रे भाष्ये स्थितं, प्रयोगे तु सर्वस्य सुपीत्याद्युदात्त एव। उभशब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनान्तः। यद्येवं तर्हि किमर्थमसौ सर्वादिषु पठ्यते। न ह्यत्र स्मायादयः सम्भवन्ति। काकचोस्तु नास्ति रूपे स्वरे वा विशेषः। अवग्रहस्तु कप्रत्ययेपि पदकारैर्न क्रियते, चित्र इद्राजा राजका इदन्यके इत्यादौ तथैव निर्णीतत्वात्। न चोभाभ्यां हेतुभ्यामुभयोर्हित्वोरित्यत्र सर्वनाम्नस्तृतीयाचेति पाक्षिकतृतीयासिद्ध्यर्थं इह पाठ इति वाच्यम्। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्तिकेन गतार्थत्वात्। न च वृत्तिकृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्त्तिकमपि सर्वनामसंज्ञासापेक्षमेवेति वाच्यम्। भाष्ये हेताविति सूत्रे तस्य पठितत्वात्। अत एवान्नेन कारणेन वसत्यन्नस्य कारणस्येत्युदाहृतं हरदत्तेन। अत्रोच्यते। उभशब्दस्तावद् द्विवचनमात्रविषयः। वृत्तौ तु द्विवचनलोपान्नासौ प्रज्युयते। उभाभ्यां पक्षाभ्यां विनीतनिद्रा इति विग्रहे उभयपक्षेत्यादिप्रयोगदर्शनात्। कथं तर्हि उभस्थाने उभयशब्दसिद्धिरिति चेत्। इत्थम्। उभादुदात्तो नित्यमित्यत्रोभादिति योगो विभज्यते। अवयववृत्तेः संख्यावाचिन उभशब्दादवयविन्यर्थे अयच् स्यात् उभयोमणिः। ततो नित्यम्। उभशब्दाद् वृत्तिविषये नित्यमयच् स्यात्। अनिर्दिष्टार्थत्वात्स्वार्थे। तदेतदुक्तं वार्त्तिककृता उभयोन्यत्रेति। एवं स्थिते उभयत उभयत्रेत्यादाविव कप्रत्ययेप्युभय एव प्राप्तः। अकचि तूभकावित्यादि सिद्ध्यति। न चेहाप्युभयइति स्यादेवेति वाच्यम्। अकजर्थं सर्वादिषु पाठेनायचो बाधात्, अन्यथा पाठवैयर्थ्यापत्तेरिति दिक्। स्वाङ्गशिटामदन्तानामित्याद्युदात्तार्थं पाठ इति तु न

युक्तम् । गणएवान्तोदात्तस्य निपात्यमानत्वात् । अन्यथोभे भद्रे जोषयेते,उभाउ नूनम् । उभाभ्यां देव सवितः,सपत्यतउभयोर्नृम्णमयो,रित्यादावाद्युदात्तप्रसङ्गात् । उभयशब्दस्त्ववयवद्वयारब्धे ऽवयविनि वर्त्तते उभयो मणिरिति यथा, श्यामलोहिताभ्यामवयवाभ्यामारब्ध इत्यर्थः । तिरोहितावयवभेदत्वादेकवचनम् । उभयमेव वदन्ति मनीषिण इत्यादौ तु समुदायद्वयघटितः समुदायोर्थः । तिरोहितावयवभेदत्वं तु तुल्यमेव । यदा तु वर्गद्वयारब्धे महासमुदाये वर्त्तते तदा वर्ग्यभिन्नेन वर्गद्वयेन महाभेदविवक्षयोद्भूतावयवभेदत्वाद्बहुवचनान्त एव,उभये देवमनुष्याः । तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपा इति यथा । यदा तु प्रागुक्तरीत्योभयो मणिरिति व्युत्पाद्य तादृशमेव मणिद्वयं सह विवक्ष्यते । तदैकशेषेण द्विवचनं प्राप्नोति । अनभिधानात्तु न भवति । तथा च तद्धितश्चासर्वविभक्तिरिति सूत्रे कृत्तद्धितानां ग्रहणं च पाठइति भाष्यमवतारयन्कैयट आह । उभयशब्दस्य द्विवचनानुत्पादादसर्वविभक्तित्वमिति । हरदत्तस्तु तस्मिन्नेव सूत्रे उभयशब्दाद् द्विवचनमंगीकृत्य पाठाश्रयणं तु पचतिकल्पं पचतिरूपमित्यादावतिप्रसंगं वारयितुमित्याह । इहायजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरमेति सूत्रेण जसि विभाषा प्राप्नोति व्यवस्थितविभाषया पूर्वविप्रतिषेधेन वा नित्यमेव जसि सर्वनामतेति के चित् । विभक्तिनिरपेक्षत्वेनान्तरङ्गया नित्यसंज्ञया बहिरङ्गा वैकल्पिकी बाध्यतइति तु सिद्धान्तः । न वेति विभाषेति सूत्रे भाष्यकारस्त्वाह । अयच् प्रत्ययान्तरमेव न त्वसौ तयस्यादेश उभादुदात्त इति सूत्रे तयपो ऽननुवृत्तेः । न चैवमुभयीत्यत्र टिड्ढाणञ्इति सूत्रेण तयबन्तत्वप्रयुक्तो ङीप् न स्यादिति वाच्य-

म्। तत्र मात्रजिति मात्रशब्दात्प्रभृत्ययचश्चकारेण प्रत्याहारग्रहणात्। एवं च तयङ्ग्रहणमपि न तत्र कार्यम्। यद्वा द्वयसजिति प्रत्याहारः। तथा च दघ्नञ्मात्रचोरपि ग्रहणं न कर्त्तव्यमिति महदेव लाघवम्। वस्तुतस्तु प्रमाणे मात्रच्द्वयसच्दघ्नच इति पाठ्यमिति भाष्याशयः। तथा च ततोपि लाघवम्। न चैवं कति स्त्रिय इत्यत्रातिप्रसङ्गः। अत इत्यनुवृत्तेः, न षट्स्वस्त्रादिभ्य इति निषेधाद्वा। न चैवं तैलमात्रेत्यादावतिप्रसङ्गः। सदृशस्याप्यस्य प्रत्याहारे ऽसन्निविष्टत्वादिति। अत्र कश्चित्। उभयेत्यर्थपरो निर्देशः। तेन व्यर्था द्वयेषामपि मेदिनीभृतामिति माघप्रयोगः समर्थितो भवतीत्याह। तन्न। अर्थपरतायां वृत्तिकाराद्यभियुक्तवचनानुपलम्भात्। महाकविप्रयोगबलादेव कल्प्यतइति चेत्। न। महाकविभिरेव तद्विपरीतस्य बहुशः प्रयोगात्। तथा च माघः। गुरुद्वयाय गुरुणोरिति। कालिदासोपि। अस्मिन् द्वये रूपविधानयत्न इति। श्रीहर्षश्च। अये ममोदासितमेव जिह्वया द्वयेपि तस्मिन्न नतिप्रयोजन इति। तस्माद् द्वयं द्वैधमिष्यन्ति गच्छन्तीति द्वयेषस्तेषां द्वयेषामितीषेः किबन्तस्य रूपं बोध्यम्। यत्तु कश्चिदाह। चाक्रवर्मणव्याकरणे द्वयशब्दस्यापि सर्वनामताभ्युपगमात्तद्रीत्यायं प्रयोग इति। तदपि न। मुनित्रयमतेनेदानीं साध्वसाधुविभागस्तस्यैवेदानींतनशिष्टैर्वेदाङ्गतया परिगृहीतत्वात्। दृश्यन्ते हि नियतकालाः स्मृतयः। यथा कलौ पाराशरस्मृतिरित्यादीति शताच्च ठन्यतावशतइति सूत्रे सर्वैकवाक्यतया सिद्धान्तितत्वात्। डतरडतमौ प्रत्ययौ। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापीह प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वाचनिकस्तदन्तविधिः,केवलयोः संज्ञायाः

प्रयोजनाभावाद्वा । अन्यो भिन्नः । अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्त्तेते इति पस्पशायां कैयटः । । तत्रान्यतमशब्दस्य गणे पाठाभावान्न सर्वनामकार्यम् । नाप्यङतरादिभ्य इत्याद्यन्तर्गणकार्य्यम् । तथा च प्रयुज्यते न तावत्सामान्यादिष्वन्यतमं तम इति । शाकटायनस्त्वन्यतरान्यतमौ डतरडतमान्तौ व्युत्पादितवान् । तन्मतेप्यन्यतरशब्दपाठस्य नियमार्थत्वादन्यतमशब्दोन्तर्गणकार्यं सर्वनामसंज्ञाकार्यं च न लभ्यतइति तद्व्याख्यातारः । इतरस्त्वन्यनीचयोरित्यमरः । त्व त्व इति द्वावप्यदन्तावन्यपर्यायौ, तत्रैक उदात्तः परो ऽनुदात्तः । एतं त्वं मन्ये दश पुत्रमुत्सइत्युदात्तस्य प्रयोगः । उत त्वः पश्यन्नित्यादिरनुदात्तस्येति विवेकः । के चित्तु त्वदिति तान्तमेकं पठन्ति । तथा च जयदेवः प्रायुंक्त । त्वदधरमधुरमधूनि पिबन्तामिति । त्वत्तोन्यस्या अधर इति षष्ठीतत्पुरुषो न तु तवाधरस्त्वदधर इति । पश्यति दिशिदिशि रहसि भवन्तमिति पूर्ववाक्येन सहानन्वयापत्तेः।अनुदात्तश्चायम्।त्वत्वसमसिमेत्यनुच्चानीति फिट्सूत्रात्। तथा च प्रयुज्यते स्तरीरुत्वद्भवति सूत उत्वादिति । त्वदिति सर्वनामसु पठितोनुदात्तोयमन्यपर्याय इति तद्व्याख्यायां वेदभाष्यकाराः । इह प्रागुक्तरीत्योदात्तानुदात्तयोरकारान्तयोरनुदात्तस्य तकारान्तस्य च प्रामाणिकत्वं निर्विवादमेव । गणपाठे परं विप्रतिपत्तिः । तत्राप्यनुदात्तस्याकारान्तस्य गणपाठे न संशयः । अतो त्वस्मै तन्वमित्यादिप्रयोगात् । अवशिष्टयोर्मध्ये कतरस्य गणे पाठ इति तु संशयोदात्तप्रयोगाणां तत्रौदासीन्यात् । तस्मात्तान्तस्याकजादिकमुदात्तस्य वा स्मायादिकं क्वचिच्छाखायां प्रयुज्यते नवेति विभा-

ष्य तत्त्वं निर्णेयं बहुश्रुतैरिति दिक्। वस्तुतस्त्वाद्यस्य तान्तच्छेद एव युक्तः। अन्यथा ऐक्ष्वाकशब्द इव स्वरसर्वनाम्ना एकश्रुत्योभयसङ्ग्रहसम्भवात्त्वशब्दमेकमेवापठिष्यदिति ध्येयम्। त्वे वसूनि त्वे राय इत्यादयस्तु शेप्रत्ययान्तस्य युष्मदः प्रयोगो न तु त्वशब्दस्य। पदकारैः प्रगृह्यत्वप्रयुक्तस्येति शब्दस्य प्रयोगादिति स्थितं वेदभाष्ये। नेम इत्यर्द्धेप्रयोगश्च, अनेमस्मिन्दद्दशे सोम इति। समः सर्वपर्यायः। नभन्तामन्यके समे। मानोवृकायवृक्येसमस्मै। उरुष्याणो अयायतः समस्मात्। उतोसमस्मिन्। तुल्यपर्यायस्य तु समशब्दस्य न सर्वनामता। यथासंख्यमनुदेशः समानामिति ज्ञापकात्। कृन्मेजन्त इति सूत्रे एते दोषाः समा भूयांसो वेति भाष्यकारप्रयोगाच्च। एतेन समे यजेतेति प्रयोगो व्याख्यातः। सिमः कृत्स्ने च शक्ते च स्यान्मर्यादावबद्धयोरिति निघण्टुः। आद्रात्रीवाससस्तनुते सिमस्मै। उच्छुक्रमत्कमजते सिमस्मात्। यद्यपीह त्वस्वसमसिमेत्यनुज्ञानीति प्राप्तं तथापि सिमस्यार्थवैणेन्त उदात्त इत्युदात्तता। अथर्ववेदप्रविष्टे मन्त्रे ऋग्वेदादिगतेपीत्यभियुक्तैर्व्याख्यातत्वादित्यवधेयम्। पूर्वपरावरोत्तरापराः पंच दिक्कालयोस्तदवच्छिन्ने च। पूर्वस्यां दिशि पूर्वस्मिन्काले पूर्वस्यां वाप्याम् पूर्वस्मिन्गुरावित्यादि। दक्षिणाधरशब्दौ दिशि तदवच्छिन्ने च। अर्थानियमश्चायं व्यवस्थायामित्युक्तेर्गम्यते। स्वाभिधेयेनापेक्ष्यमाणस्यावधेर्नियमो हि व्यवस्था। पूर्वादिशब्दानामुक्तोर्थो हि नियमेन कं चिदवधिमपेक्षते। स्थागापापचो भावइति क्तिनि प्राप्ते ऽत एव निपातनादङ्। व्यवस्थायां किम्। दक्षिणा गाथकाः। प्रवीणा इत्यर्थः। अधरे ताम्बूलरागः उत्तरे प्रत्युत्तरे वा शक्तः। कथं तर्हि तथा परेषां युधि चेति कालिदासः।

अपरे प्रत्यवतिष्ठन्ते इत्यादि च । अत्राहुः । देशवाचितया व्यवस्थाविषययोरेव परापरशब्दयोरुपचाराच्छत्रौ प्रतिषादिनि च प्रयोगः । न चैवमुपसर्जनता । न हि लक्षणिकत्वमुपसर्जनत्वं किन्तु स्वार्थविशिष्टार्थान्तरसंक्रमः । स तु न वृत्तिमविष्टस्यापि प्रधानस्य न वा लाक्षणिकस्यापि वृत्तिमप्रविष्टस्य । अत एव तस्माद्वह्निमानित्यादौ ज्ञानलक्षणापक्षेपि सर्वनामकार्यं,नद्योहंसोसौ योसौसोहमित्यत्र भागत्यागलक्षणायामपि सर्वनामकार्यप्रवृत्तिरिति । भूवादिसूत्रएतान्यपीत्येतत्प्रतिपाद्यानि वस्तूनीत्यर्थ इति कैयटश्च । वस्तुतस्त्वत्र शत्रुत्वादिप्रकारको बोधोऽनश्वादिशब्देभ्यो भिन्नत्वादेरिवार्थिकः।शब्दात्तु देशान्तरनिष्ठत्वादिप्रकारक एवेति तत्त्वम् । असंज्ञायाङ्किम् । उत्तराः कुरवः । सुमेरुमवधिमपेक्ष्य कुरुषूत्तरशब्दो वर्त्ततइत्यस्तीह व्यवस्था । प्रसिद्धत्वात्तु नावधेः प्रयोगः, मेघो वर्षतीत्यत्र जलस्य यथा । एवन्दिशः सपत्नी भव दक्षिणस्या इत्यादावपि वस्तुतो व्यवस्थास्तीति सर्वनामकार्यं सम्भवत्येव । न च संज्ञात्वान्निषेधः । आधुनिकसङ्केतो हि संज्ञा, न च दिक्षु सास्तीति पञ्चमेऽस्तातिप्रकरणे कैयटहरदत्तादयः । अत्र दिक्षु चिरन्तनः कुरुषु त्वाधुनिकः सङ्केत इत्यत्र व्याख्यातृवचनमेव प्रमाणम् । स्वशब्दस्य चत्वारोर्थाः । आत्मा आत्मीयो ज्ञातिर्धनं चेति । स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धनइत्यमरः । यद्यपि स्वामिन्नैश्वर्यइति सूत्रे ईश्वरत्ववाच्यपि स्वशब्दः स्वीकृतस्तथाप्यसौ मत्वर्थीयामिनिच्प्रत्ययमात्रविषयो न तु केवलः प्रयोगार्हः । तत्र ज्ञातिधनयोर्निषेधादात्मात्मीययोरेव संज्ञा । आख्याग्रहणं किम् । आत्मीयत्वं पुरस्कृत्य ज्ञातिधनयोरपि प्रवृत्तौ सर्वनामता यथा स्यात् । आ-

त्मात्मीययोरित्येव तु वक्तुमिहोचितम् । स्वस्मै इत्यादि । जसि विभाषाविधायके ऽष्टाध्यायीस्थे सूत्रेप्येवम् । यत्तु तत्र स्वमात्मीयइत्येव वक्तुमुचितमात्मवाचिनो नपुंसकतया जसि विभाषायामुपयोगाभावादिति के चित् । तच्चिन्त्यम् । सूत्रसामर्थ्यादेवात्मन्यपि पुंस्त्वलाभात् । अत एवामरकोशेप्यात्मनीति पूर्वान्वयि स्वमिति तूत्तरान्वयि । तथा च हेमचन्द्रः । द्यौः स्वर्गनभसोः स्वो ज्ञात्यात्मनोः स्वं निजे धने इति । मेदिनीकारोपि । स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्त्रियां धनइति । वस्तुतस्तु पूर्वपरेत्यादित्रिसूत्र्यामर्थनिर्देशः पाठविशेषणम् । तेनेतरेषां पाठादेव पर्य्युदासः । तथा च विभाषा जसीति प्रकरणे पूर्वादीनि नवेत्येव लाघवात्कर्त्तव्यम् । त्रिसूत्री तु न पठनीयैवेति निष्कर्षः । अथवा गणपाठ एव पूर्वादिनवकपाठानन्तरं विभाषाजसीति कर्त्तव्यं पूर्वादीनि चार्थविशिष्टान्यनुवर्त्तनीयानि । न च सर्वादीनामप्यनुवृत्तिः शङ्क्या । नेमस्य जसि विभाषारम्भात् । यद्वा । जस्ङसिङीनां शिस्मात्स्मिनः,पूर्वादिभ्यो नवभ्यो वा, औङ आपः शी, नपुंसकाच्चेति, सप्तमे न्यासः कर्त्तव्यः । परमार्थस्तु सप्तमे यथान्यासमेवास्तु । पूर्वादिभ्यो नवभ्यो वेत्येतच्च जसः शीत्यत्रानुवर्त्य वाक्यभेदेन सम्भन्त्स्यते वाछंदसीत्येतदपिपूर्व इत्यत्र यथा, तथा चेयं त्रिसूत्री अष्टाध्याय्यां न पाठ्येति स्थितम् । असंज्ञायामिति तु न कार्यमन्वर्थसंज्ञयाभिव्यक्तपदार्था यइति न्यायेन वा संज्ञाया व्युदस्तत्वात् । अन्तरशब्दस्तु नानार्थः । तथा चामरः । अन्तरमवकाशावधिपरिधानान्तार्द्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि चेति । तत्र बहिर्योगोपसंव्यानयोरेवार्थयोः संज्ञा । बहिरित्यनावृत्तो देशो बाह्यं चोच्यते । तत्राद्ये अन्त-

रे अन्तरा वा गृहाः । नगरबाह्याश्चाण्डालादिगृहा इत्यर्थः । द्वितीये नगराभ्यन्तरगृहा इत्यर्थः । उपसंव्यानशब्दोपि करणव्युत्पत्त्योत्तरीयपरः । कर्मव्युत्पत्त्या त्वन्तरीयपरः । उभयथापि बहिर्योगेण गतार्थत्वात् । उपसंव्यानग्रहणं न कर्त्तव्यमिति भाष्ये स्थितम् । के चित्तु शाटकानां त्रये शरीरसंयुक्तस्य तृतीयस्य, चतुष्टये तु चतुर्थस्य तत्संयुक्तस्य वा, तृतीयस्य बहिर्योगाभावादुपसंव्यानग्रहणं कर्त्तव्यं शाटकयुगाद्यर्थमिति वदतो वार्त्तिककारस्याप्ययमेवाशय आदिशब्दबलादवगम्यते । भाष्यमते तु बहिर्योगग्रहणं स्वर्यते तेन शीतोष्णाभ्यां कारिणीत्यादाविव गौणग्रहणात्परंपरया बाह्यसंबद्धस्यापि भविष्यतीत्याहुः । सत्यपि बहिर्योगे पुरीविषयतायां न सर्वनामता, अपुरीति च वक्तव्यमिति वार्त्तिकात् । तद्धि गणसूत्रस्य शेषो न तु जसि विभाषाविधायकस्य अत इत्यधिकृत्य जसः शीविधानादाबन्तात्प्राप्त्यभावात् । अन्तरायां पुरि, प्राकाराद्बाह्यायां तदन्तर्वर्त्तिन्यां वेत्यर्थः । लिङ्गविशिष्टपरिभाषयैकादेशस्य पूर्वान्तग्रहणेन ग्रहणाद्वा प्राप्तिर्बोध्या । त्यद् तद् एतौ पूर्वोक्तपरामर्शकौ, तत्राद्यश्छान्दसः । एषस्यभानुरिति गणरत्नकारस्तन्न । तथा सति स्यश्छन्दसि बहुलमिति सूत्रे छन्दोग्रहणवैयर्थ्यापत्तेः । यदुद्देश्यसमर्पकः । एतदिदमौ प्रत्यक्षोपस्थिते । अदस् व्यवहिते । एको ऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समाने च संख्यायां च प्रयुज्यते ॥ द्विशब्दो द्वित्वविशिष्टे ऽलिङ्गः । संबोधनैकविषयश्च युष्मदर्थः । अस्मच्छब्दस्तूच्चारयित्रर्थः । सलिङ्गः संबोधनव्यभिचारी च भवत्वर्थः । भातेर्डवतुरितिव्युत्पादितोयम् । यद्यप्यस्मात्स्मायादयो न सम्भवन्ति सर्वनाम्नस्तृतीयाचेति, निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्यनेनैव गतार्थं, त-

थापि, फिञादिमयटः पूर्वनिपातष्ठक्छसौ तथा। आत्वैकशेषष्य-ञ्विरहा अकच्च भवतः फलम्। फिञ्। भावतायनिः,त्यदादि-त्वेन वृद्धत्वादुदीचां वृद्धादिति फिञ्। भवन्तमञ्चतीतिभवङ्ग्र-ङ्, विष्वग्देवयोश्चेति चकारेण सर्वनाम्नोनुकर्षणादङ्भादेशः। भवन्मयः, नित्यं वृद्धशरादिभ्य इति मयट्। भवन्मित्रः, सर्व-नामसंख्ययोरिति प्राङ्निपातः। भावत्कः, भवदीयः, भवतष्ठ-क्छसावित्यत्र हि शत्रन्तनिवृत्तये वृद्धादित्यनुवर्त्यते। आत्व-म्। भवादृक्। आ सर्वनाम्न इत्यात्वम्। देवदत्तश्च भवांश्च भवन्तौ त्यदादीनि सर्वैरित्येकशेषः। भवतो भावो भवत्तेत्यत्र सर्वनामसं-ज्ञया गुणवचनसंज्ञाबाधात् ष्यञ्विरहोपि फलम्। अन्यथा हि भावत्यमिति स्यात्। अकच्च, भवकान्। सर्वनाम्नो वृत्तिमात्रइति पुंवद्भावोपि फलम्। भवत्याः पुत्रो भवत्पुत्रः। किंशब्दः प्रश्ने आक्षेपे चेति दिक्। वृत्,सर्वादिगणो वृत्तः समाप्त इत्यर्थः। यदिंद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुतस्थे इत्य-त्र त्ववममध्यमपरमशब्देषु छन्दसि सकलविधिव्यत्ययात् स्या-डागमः। न त्वेतदनुरोधेन सर्वादेराकृतिगणत्वमिति मंतव्यम्। अत एव छन्दस्यपि सर्वनामकार्यमेषां न नियतम्। ये मध्यमाः पितरः, विष्णोः पदे परमे इत्यादौ तदभावात्। व्यूहावुभौ तावितरे-तरस्मात्, अन्योन्येषां पुष्करैरामृशान्त इत्यादि तु द्विः प्रयो-गो द्विर्वचनमिति पक्षे तदन्तविधिना सिद्धम्। स्थाने द्विर्वचन-पक्षे तु स्थानिवद्भावेनेत्यवधेयम्। ननु वस्नसादाविव प्रकृतिप्रत्य-यविभागस्य संमोहात्स्थानिवद्भावेनापि पदत्वमात्रं स्यात्। न तु सर्वनामता सुब्विशिष्टे स्थानिनि तद्विरहादिति चेन्न। सन्नि-योगशिष्टत्वेनान्तरङ्गमपि द्वित्वं बाधित्वा समासवच्च बहुलमिति समासवद्भावप्रयुक्तस्य लुकः प्रथमं प्रवृत्तेः। अंतरंगानपि विधी-

न् बहिरंगो लुग् बाधतइति वक्ष्यमाणत्वात् । ततः प्रत्ययलक्षणेन पदत्वमाश्रित्य द्वित्वप्रवृत्तेः । एतेन तत्तत्तामसभूतभीतय इत्यादि व्याख्यातम् । नन्वस्तूत्करीत्येतरेतरस्मादित्यस्य सिद्धिः । अन्योन्येषामिति तु कथम् । न ह्यत्र समासवद्भावोस्तीति चेत् । तत्र प्रथमैकवचनान्तत्वं पूर्वपदस्य द्वितीयादयस्तु परपदइति वचनबलेनैव प्रकृतिप्रत्ययविभागस्य सिद्धेरिति दिक् । वन्येतरा जानपदोपदाभिरिति तु वन्या इतरे येभ्य इति बहुव्रीहिणा समाधेयम् । तपर इति ज्ञापकात्सर्वनाम्नः पूर्वनिपातो ऽनित्यः । पुत्रादेकात्पराजय इति तु प्राधान्यादिना आख्यातादित्यर्थे आख्यातणिजन्ताद् घञर्थे कप्रत्यये लाक्षणिकस्य सर्वनामताविरहात्समाधेयम् ॥

विभाषा दिक्समासे बहुव्रीहौ ॥ अत्र सर्वनामसंज्ञा वा स्यात् । उत्तरपूर्वस्यै । उत्तरपूर्वायै । दिङ्नामान्यन्तरालइति प्रतिपदोक्तो दिक्समासो गृह्यते । तेनेह न । या पूर्वा सैवोत्तरा यस्य भ्रान्तस्य तस्मै पूर्वोत्तराय । एवं च बहुव्रीहिग्रहणं न कर्त्तव्यम् । दक्षिणोत्तरपूर्वाणामिति द्वंद्वस्य लक्षणप्रतिपदोक्तपरिभाषयैव वारणात् । ननूत्तरार्थं तत् । तथाहि । एकं बहुव्रीहिवत्, आबाधेचेति द्विर्भावे एकैकस्मै देहि । दक्षिणदक्षिणस्यै इत्यादीष्यते । तत्रोत्तरसूत्रेण निषेधो मा भूत् । बहुव्रीहिरेव यो बहुव्रीहिर्न त्वतिदिष्टबहुव्रीहिस्तत्रैव यथा स्यादिति । मैवम् । समासग्रहणानुवृत्त्याप्युक्तार्थलाभात् । उत्तरसूत्रस्य प्रत्याख्यानाच्च ॥

न बहुव्रीहौ ॥ बहुव्रीहौ कर्त्तव्ये सति सर्वनामसंज्ञान स्यात् । त्वकं पिता यस्य त्वत्कपितृकः । अहकं पिता यस्य मत्कपितृकः । द्वकौ पुत्रौ यस्य द्विकपुत्रः । इह हि समासप्रवृत्तेः

प्रागन्तरङ्गतया ऽकच् प्रवर्त्तेत स च समासे सत्यपि श्रूयेत। अतिक्रान्तो भवकन्तमतिभवकानितिवत्। न हि वृत्तेः प्राग्प्युपसर्जनतास्ति। ननु यदि प्रागेव प्राप्नुवन्नकच् निवर्त्तितस्तर्हि त्वकम्पितेत्यादि कथं विगृह्यते त्वत्कः पितेत्यादि कप्रत्ययदर्शनौचित्यादिति चेत्। भ्रान्तोसि। न हि यस्मिन्प्रक्रियावाक्ये उत्प्रेक्षामात्रगोचरे बहुव्रीहिसंज्ञा प्रवृत्ता सर्वनामसंज्ञा च निषिद्धा तत्प्रयुज्यते। अपरिनिष्ठितत्वात्। किं तु तत्सदृशं बहुव्रीहिसंज्ञा शून्यं वाक्यान्तरमेव। यदाह कैयटः। अप्रयोगसमवायि यत्प्रक्रियावाक्यं तत्रायं निषेधो न तु लौकिके। तस्य पृथगेव प्रयोगात्तादर्थ्याभावादिति। अत एव दृष्टाः सर्वे येनेत्येव विग्रहो न तु सर्वा इति। राज्ञः पुरुष इत्यादिविग्रहेपि ह्येषैव गतिः। अलौकिके वाक्ये ऽल्लोपोन इत्यादेरप्रवृत्तेः। अन्तरङ्गानपि विधीनिति सिद्धान्तात्। अत एव गोमत्प्रिय इत्यादौ सोर्लुगेव न तु हल्ङ्यादिलोपः। तेन ह्रस्वदीर्घादयो न प्रवर्त्तन्ते। भाष्ये त्वकत्पितृक इत्याद्येव रूपं स्वीकृत्येदं सूत्रं प्रत्याख्यातम्। यदाह, अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयाविति। अङ्गम्प्रतीति प्रत्यङ्गम्। अनकारान्तेषु त्वकत्पितृको द्वकिपुत्र इत्यादिष्वकच्। विश्वप्रिय इत्यादिष्वदन्तेषु तु स्वाङ्गशिटामदन्तानामित्याद्युदात्ततेति विषयविवेको बोध्य इत्यर्थः। यथोत्तरं मुनीनां प्रामाण्यात्। भाष्योक्तयैव व्यवस्थेत्यवधेयम्॥

तृतीयासमासे॥ अत्र सर्वनामता न स्यात्। मासपूर्वाय। लक्षणप्रतिपदोक्तपरिभाषया पूर्वसदृशेति समासो गृह्यते न तु कर्तृकरणे कृतेत्यादिरपि तेन त्वयका कृतं त्वकृत्कृतमित्यादौ निषेधो न। समासइत्यनुवर्त्तमाने पुनः समासग्रहणं गौणार्थ-

स्यापि संग्रहार्थम् । तेन समासार्थवाक्येपि निषेधः । मासेन पूर्वाय । अयं च लौकिके वाक्ये निषेधो न तु नबहुव्रीहाविति-वदलौकिके । अकारान्ते काकचोरविशेषणानकारान्तानां प्रतिपदोक्ततृतीयासमासविरहेण चालौकिके निषेधस्य वैयर्थ्यापत्तेः ॥

द्वन्द्वे च ॥ इहोक्तसंज्ञा न स्यात् । पूर्वापराधराणाम् । समुदायस्यायं निषेधो न त्ववयवानाम् । तथाहि । त्यदादीनां तावद् द्वंद्व एव नास्ति । त्यदादीनि सर्वैर्नित्यमित्येकशेषेण बाधितत्त्वात् । न च द्वंद्वे कृते एकशेष इति भ्रमितव्यम् । एकवद्भावस्वरसमासान्तप्रसङ्गेन द्वंद्वापवादत्वपक्षस्यैव स्थापयिष्यमाणत्वात् । अन्यथा तेषामित्यादावपि द्वंद्वे चेति निषेधापत्तेश्च । त्यदादिभ्यः प्राचीनास्त्वदन्ताः । तत्र काकचोरविशेषः । सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावस्त्विष्यतएव । दक्षिणोत्तरपूर्वाणामिति । किञ्च सर्वनामसंज्ञानिषेधेनाप्यसौ दुर्वारः । तत्र हि मात्रग्रहणं क्वचित्सर्वनामत्वेन दृष्टानां सम्प्रत्यसर्वनामत्वेपि पुंवद्भावार्थम् । अत एव दक्षिणपूर्वायै इत्यत्र संज्ञाभावेपि पुंवद्भावः । नन्ववयवे संज्ञा चेन्न निषिद्धा तर्ह्यङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वचनादक्षिणोत्तरपूर्वाणामित्यादौ सुडागमादिप्रसङ्गः । न च निषेधवैयर्थ्यम् । अनाङ्गस्य त्रलादेर्व्यावृत्त्या चरितार्थत्वादिति चेन्न । अङ्गकार्येषु सर्वनाम्नो विहितस्यामो ङेर्ङसिङ्योरित्यादिक्रमेण व्याख्यानात् । विहितविशेषणत्वस्याश्रयणे प्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव । तस्मात्समुदायस्यैवायं प्रतिषेधो नावयवानामिति स्थितम् । अत एव सर्वनामसंज्ञायां तदन्तविधिसद्भावे द्वंद्वे चेति ज्ञापकमित्युक्तम् ॥

विभाषा जसि ॥ जसीति कार्यापेक्षयाधिकरणसप्तमी ।

जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्त्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे। वर्णाश्रमेतराः।शीभावं प्रत्येवेयं विभाषेति व्याख्यातम्। तेनाकच् न भवति। तस्मिन्कर्त्तव्ये द्वंद्वे चेति नित्यं निषेधात्। अतस्तत्र कप्रत्यय एव भवति। वर्णाश्रमेतरकाः। केन व्यवधानान्नेह शीभावः। अकचि कृते तु तन्मध्यपतितन्यायेन शीभावः स्यादेव॥

प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च॥ एते जसः कार्यं प्रति सर्वनामसंज्ञा वा स्युः। प्रथमे प्रथमा इत्यादि। शेषं रामवत्। नेमे नेमाः। शेषं सर्ववत्। इहापि प्राग्वच्छीभावं प्रत्येव संज्ञाविकल्पः। तेन प्रथमका इत्यादावकज् न। अन्यथा प्रथमके इति स्यात्। उभयशब्दस्य तु नेयं विभाषा किन्तु नित्या संज्ञेति गणव्याख्याप्रसङ्गेनोपपादितम्॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्॥

स्वमज्ञातिधनाख्यायाम्॥

अन्तरम्बहिर्योगोपसंव्यानयोः॥ एषा त्रिसूत्री गणमध्येमि पठ्यते। सा च व्याख्याता।तया यस्मिन्नेवोपाधौ नित्या संज्ञा प्राप्ता तत्रैव जसि विभाषानया विधीयते। पूर्वे पूर्वा इत्यादि। स्वे स्वा, आत्मीया इत्यर्थः। आत्मान इति वा। इह त्रिसूत्र्यां यद्वक्तव्यं तत्सर्वं गणव्याख्यावसरएवोक्तम्। विभाषाप्रकरणे तीयस्य ङित्त्वोपसंख्यानम्। द्वितीयस्मै द्वितीयायेत्यादि। एकादेशस्य पूर्वान्तग्रहणेन ग्रहणालिङ्गविशिष्टपरिभाषया वा द्वितीयस्यै द्वितीयायै इत्याद्यपि सिद्धम्। एवं च विभाषा द्वितीयातृतीयाभ्यामिति सूत्रं न कर्त्तव्यं भवति। अर्थवत्वात्, प्रतिपदोक्तत्वाच्च। द्वेस्तीयस्रेः सम्प्रसारणं चेत्ययमेव गृह्यते। तेनेह न। प्रकारवचने जातीयर्, पटुजातीयाय।

जात्यन्ताच्छ बन्धुनि, ब्राह्मणजातीयाय । मुखपार्श्वशब्दाभ्यां तसन्ताभ्यां गहादिभ्यश्चेति छः, मुखतीयाय । पार्श्वतीयाय । तथा द्वितीयाय भागायेत्यत्रापि न भवति । पूरणाद्भागे तीयादिन्नित्यनि कृते यस्येति चेत्यकारलोपे च सति तीयस्य लाक्षणिकत्वादिति दिक् ॥ इति सर्वनामसंज्ञाप्रकरणम् ॥

स्वरादिनिपातमव्ययम् ॥ स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । प्राग्रीश्वरान्निपाता इत्यारभ्याधिरीश्वरइत्येतत्पर्यन्तं, ये वक्ष्यन्ते ते निपाताः । नन्वेवं चादिष्वेव स्वरादयोपि पठ्यंतां प्रकृतसूत्रं च त्यज्यताम् । अव्ययप्रदेशेषु निपातशब्देनैव व्यवह्रियतामिति चेन्न । चादीनां ह्यसत्ववाचिनामेव निपातसंज्ञा । यथा लोधं नयन्ति पशु मन्यमाना इत्यत्र सम्यगर्थस्य पशुशब्दस्य न तु सत्ववाचिनाम् । यथा पशूंस्तांश्चक्रे वायव्यानित्यादौ, स्वरादीनां तु सत्ववचनानामव्ययसंज्ञेष्यते । स्वस्ति वाचयति । स्वः पश्येति यथा । अथ प्राग्रीश्वरान्निपाताः, स्वरादीनि, चादयो ऽसत्वे,इति कुतो न सूत्रितमिति चेन्न । एवं हि सति निपात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादीनामप्येकाचां प्रसज्येत । स्तोहि स्वरादिषु किमोत् दक्षिणादाजित्येकाचौ तद्धितौ । केनप्रभृतयस्तु कृत एकाचः । यदि तु चादिरेकाजनाङिति क्रियेत, तदा चादीनामसत्ववचनत्वं विशेषणं न लभ्येत । ततश्चास्यापत्यमिर्मदनस्तस्य संबोधनमे अवेत्यत्र प्रगृह्यत्वं स्यात् । ननु चादयो ऽसत्वे इत्यत्रासत्वइति पाठविशेषणम् । तथा हि । चादय इति योगो विभज्यते । चादयो निपातसंज्ञाः स्युः । ततो ऽसत्वे । इह शास्त्रे चादन्यो ऽसत्वे ज्ञेयाः । ततश्च चादीनां सत्ववाचिनां पाठात्पर्युदासस्तेन ए अवेत्यादौ न दोषः । एवं चोभे संज्ञे कर्तव्ये

अव्ययं निपाता इति। किन्तु प्राग्रीश्वराद्निपाता इति वा अव्ययानीति वा सूत्र्यताम्। ततः स्वरादीनि। तद्धितश्चासर्वविभक्तिरित्याद्यव्ययीभावश्चेत्यंतं सूत्र्यताम्। ततश्चादयो ऽसत्वइत्यारभ्य यावदधिरीश्वरे विभाषा कृञीति। तत्र यस्मिन्प्रदेशे निपातग्रहणं तत्र चादिग्रहणमस्तु। अव्ययप्रदेशे ऽव्ययग्रहणं वेति। उच्यते। अव्ययसंज्ञाविरहे ऽन्वर्थसंज्ञाबललभ्यं वक्ष्यमाणं प्रयोजनं न सिद्ध्येत्। निपातसंज्ञाविरहे तु शान्तनवाचार्यप्रणीतस्य निपाता आद्युदात्ता इति फिट्सूत्रस्य विषयविभागो न लभ्येत। अथ फिट्शिट्नवादिशब्दानामिव निपातशब्दस्याप्यन्यत एवार्थाध्यवसायः तर्ह्यव्ययसंज्ञामात्रेण निर्वाहः सुकर एवेत्यवधेयम्। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं न व्येति विविधं विकारं न गच्छति। सत्वधर्मान् लिंगसंख्याकारकादीन्न गृह्णातीति यावत्। तेनोपसर्जनप्रतिषेधः सिद्धः। अत्युच्चैसौ। अत्युच्चैस इति। अतिक्रान्तप्रधानत्वेन सत्वधर्मपरिग्रहान्नेहाव्ययसंज्ञा। ननु स्वरादिषूच्चैःशब्दः पठ्यते तत्र कथं तदन्तस्य संज्ञेति चेन्न। अन्वर्थसंज्ञयैव तदन्तविधेरपि ज्ञापनात्। अन्यथोपसर्जने प्रसङ्गाभावेन तन्निवृत्त्यर्थायास्तस्या वैयर्थ्यापत्तेः। तेन परमस्वः, परमोच्चैरित्यादौ स्वरादिप्राधान्ये ऽव्ययत्वं सिद्धम्। अव्ययसंज्ञाया अन्वर्थत्वमाथर्वणे प्रणवविद्यायां श्रुतिरपि दर्शयति। सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति॥ एतेषु यन्न व्येति किन्तु सदृशमेकप्रकारं तदव्ययमिति योजना। यद्वा यस्मान्न व्येति तस्मादव्ययमिति। त्रिषु लिंगेषु सदृशं लिङ्गविशेषप्रतिपादने सामर्थ्याभावादिति भावः। विभक्तिषु कारकेषु वचनेषु चैकत्वादिसंख्यास्वव्ययीभावस्य यद्यपि लिंगकार-

कसंख्यायोगोस्ति तथापि वचनादव्ययत्वम् ॥ अथ स्वरादयः ॥ स्वरिति स्वर्गपरलोकयोः । स्वर्गे, छायैव या स्वर्जलधेर्जलेषु । परलोके, स्वर्यातस्य ह्यपुत्रस्येति । अन्तरिति मध्ये, अन्तर्बाष्पश्चिरमनुचरः । प्रातरिति प्रत्यूषे, प्रातः संध्यामुपासीत । एते त्रयोंतोदात्ता इति काशिका । तच्चिन्त्यं, स्वःशब्दस्य स्वरितत्वात् । तथा च फिट्सूत्रम् । न्यङ्स्वरौ स्वरिताविति । प्रयोगश्च, अन्तरिक्षमथोस्वः । यत्तु प्रातःशब्द आद्युदात्त इति कश्चित् । तन्न । प्रातरग्निं प्रातरिन्द्रं हवामहे इत्यादावन्तोदात्तस्यैव प्रसिद्धतरत्वात् । पुनरित्याद्युदात्तो ऽप्रथमे विशेषे च । अप्रथमे पुनरुक्तम् । विशेषे, किं पुनर्ब्राह्मणाःपुण्याः । सनुतरित्यन्तर्द्धाने । सनुतश्चोरो गच्छति । उच्चैरिति महति । नीचैरित्यल्पे । शनैरिति क्रियामान्द्ये । ऋधगिति सत्ये । वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये । ऋते इति वर्जने । युगपदित्येककाले । आराद् दूरसमीपयोः । पृथगिति भिन्ने । एते सनुतप्रभृतयो नवान्तोदात्ता इति काशिका । शनैश्चिद्यन्तो अद्रिवः ऋधगित्था समर्त्य, इत्यत्र तु शनैर्ऋधक्शब्दावाद्युदात्तौ प्रयुज्येते । त्र्यसिति अतीतेह्नि । श्वोनागतेह्नि । दिवेति दिवसे । रात्राविति निशि । सायमिति निशामुखे । चिरमिति बहुकाले । मनागिति ईषदर्थे । ईषदित्यल्पे । जोषमिति सुखमौनयोः । तूष्णीमिति मौने । बहिस् अवस् इत्येतौ बाह्ये । समयेति समीपे मध्ये च, ग्रामं समया । निकषेत्यन्तिके । विलङ्घ्य लङ्कां निकषा हनिष्यति । स्वयमित्यात्मनेत्यर्थे । स्वयं कृतम् । वृथेति व्यर्थे । नक्तमिति रात्रौ । नञिति निषेधे । हेताविति निमित्तार्थे । इद्धेति प्राकाश्ये । अद्धेति स्फुटावधारणयोः । तत्त्वातिशययोरित्येके । सामीत्यर्द्धजुगुप्सितयोः । एते त्र्यस्प्रभृतयः साम्यन्ता द्वाविंशतिर-

न्तोदात्ता इति काशिका। दिवा चित्तमः कृण्वन्ति, वृथा सृजत्यर्थिभिः। नक्तं ददृश्रे कुह चिदेवेष्वित्यादौ तु आद्युदात्ताः प्रयुज्यन्ते। वत् ॥ वत्प्रत्ययांतमव्ययसंज्ञं स्यात्। ब्राह्मणवत्। तेन तुल्यमित्यादिभिर्विहितो वतिरिह गृह्यते न तूपसर्गाद्धात्वर्थइति विहितः सत्वार्थकत्वात्। यदुद्वतो निवतो यासि वप्सत्। सनेति नित्ये। सना तात इन्द्रः, सनातनः। सनत्। इदमपि नित्ये। सनत्कुमारः। तिरसित्यन्तर्द्धौ तिर्यगर्थे च। तिरोहितः। तिरःकाष्ठं कुरु। परिभूते तु लक्षणा। तिरस्कृतोरिरिति यथा। सनेत्यादयस्तिरोन्ता आद्युदात्ता इति काशिका। सनाच्च होता नव्यश्चसत्सि, तिरः पुरूचिदश्विनेत्यादौ त्वन्तोदात्तं प्रयुज्यते। अन्तरेत्यन्तोदात्तो मध्ये विनार्थे च। त्वां मां चांतरा कमण्डलुः। त्वामंतरा तामरसायताक्षि। अन्तरेणेति वर्जने। अन्तरेण हरिं न सुखम्। ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रार्थे सम्प्रत्यर्थे च। कमिति वारिमूर्द्धनिंदासुखेषु। वारिणि, कञ्जं पद्मम्। मूर्द्धनि, कञ्जाः कचाः। निंदायां, कंदर्पः। सुखे कंयुः। शमिति सुखे, शंकरः। सहसेत्याकस्मिकाविमर्शयोः। दिवः प्रसूनं सहसा पपात, सहसा विदधीत न क्रियाम्। स्वधेति पितृदाने। अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु। भूषणे अलङ्कारः। पर्याप्तौ अलमस्य धनं, वह्निरित्यर्थः। शक्तौ, अलं मल्लो मल्लाय, शक्त इत्यर्थः। वारणे अलमतिप्रसङ्गेन, निषेधे आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत्। न वक्तव्यमित्यर्थः। वषडिति हविर्दाने। विनेति वर्जने। नानेत्यनेकविनार्थयोः ॥ नाना भूतं देहभृतां समाजम्। नाना रीतिर्निष्फला लोकयात्रा। स्वस्तीति मंगले। अन्यदित्यन्यार्थे। देवदत्त आख्यातेऽन्यच्च यज्ञदत्त इति। अस्तीति सत्तायाम्। अस्ति-

परलोक इति मतिरस्यास्तिकः । उपांश्विति अप्रकाशोच्चारणरहस्ययोः।क्षमेति क्षान्तौ । क्षमा करोतु भवान् । विहायसेति वियदर्थे । विहायसा रम्यमितो विभाति । दोषेति रात्रौ । मृषामिथ्येत्येतौ वितथे । मुधेति व्यर्थे । क्त्वातोसुन्कसुनः, कृन्मकारसंध्यक्षरांताः, अव्ययीभावश्च । इदं गणसूत्रत्रयम् । अष्टाध्यायीस्थत्रिसूत्र्या समानार्थम् । वैयर्थ्यं तूद्धरिष्यते । पुरेति अविरते चिरातीते भविष्यदासन्ने च । पुराधीते, अविरतमपाठीदित्यर्थः । पुरिलुङ्चेति लट् । चिरातीते । पुरापि नवं पुराणम् । पुरेदमूर्ध्वं भवतीति वेधसा । समनंतरं भविष्यतीत्यर्थः । स्यात्प्रबन्धे चिरातीते निकटागामिके पुरेत्यमरः । मिथो इति रहःसहार्थयोः । मन्त्रयन्ते मिथो । मिथसित्यपि पूर्ववत् । प्रायसिति बाहुल्ये । मुहुसिति पुनरर्थे । प्रवाहुकमिति समकाले उर्ध्वार्थे च । के चित्तु प्रवाहिकेति पठन्ति । आर्यहलमिति बलात्कारे । शाकटायनस्त्वाह । आर्येति प्रतिबन्धे, हलमिति प्रतिषेधविवादयोरिति । अभीक्ष्णमिति पौनःपुन्ये । साकं सार्द्धमित्येतौ सहार्थे । नमसिति नतौ । हिरुगिति वर्जने । धिगिति निन्दाभर्त्सनयोः । तसिलादिस्तद्धित एधाच्पर्यन्तः । शस्तसी, कृत्वसुच्,सुच्,आस्थालौ,च्व्यर्थाश्चेति । तसिलादिरित्यादेरयमर्थः । पंचम्यास्तसिलित्यारभ्यैधाच्चेत्येतदेतैः सूत्रैरुक्तो यस्तद्धितस्तदन्ताः स्वरादिषु बोद्धव्याः । तथा च बव्हल्पार्थाच्छस् । प्रतियोगे पंचम्यास्तसिः। क्रियाभ्यावृत्तिगणने कृत्वसुच् । द्वित्रिचतुर्भ्यः सुच् । इण आसिरित्युणादिसूत्रेण आसिप्रत्ययो विहितः । अया इत्युदाहरणम् । प्रत्नपूर्वविश्वेमात्थाल् छन्दसि । संपद्यकर्त्तरि च्विः। विभाषा सातिकात्स्न्यें । देये त्रा च । एतदन्ता अपि ग्राह्याः । अम् इति, अमु च छन्दसीति

विहितः।आमित्यंगीकारे। आम् कुर्मः, किमेत्तिङव्ययघादाम्। कास्प्रत्ययादाममंत्रे लिटीत्यपीति केचित्। प्रतामिति ग्लानौ। प्रशानिति समानार्थे। प्रशान् देवदत्तो यज्ञदत्तेन। प्रतानिति विस्तारे। मा इति निषेधे। मा भवतु मा भविष्यति। माङिति निषेधाशंकयोः। मा कार्षीत्। अस्य पापं मा भूदिति। आकृतिगणश्चायम्। तेनान्येपि ग्राह्याः। तद्यथा। अमिति शैघ्र्ये अल्पे च। काममिति स्वाछंद्ये। प्रकाममित्यतिशये। भूय इति पुनरर्थे। सांप्रतमिति न्याय्ये। परमिति।कैंत्वर्थे, गुणवानसि परमहं कारी। साक्षादिति प्रत्यक्षे। साचीति तिर्यगर्थे। सत्यमित्यर्द्धांगीकारे। मङ्क्षिति शैघ्र्ये। आश्विति च। संवादिति वर्षे। अवश्यमिति निश्चये। सपदि शैघ्र्ये। बलवदित्यतिशये। बलवदपि शिक्षितानाम्। प्रादुस् आविस् इति प्रकाशे। अनिशं नित्ये। नित्यदा,सदा, अजस्रं, सन्तत,मेते सातत्ये। उषेति रात्रौ। उषातनो वायुः। रोदसी द्यावापृथिव्यर्थे। ओमिति ब्रह्मवाची। भूर्भुवरिति पृथिव्यंतरिक्षलोकयोः। भूर्लोकः। भुवर्लोकः। झटिति झगिति तरसा शैघ्र्ये। द्राक् द्रुतं शैघ्र्ये, क्षिप्रामिति च। अतीवेत्यतिशये। सुष्टु इति प्रशंसायाम्। कु इति कुत्सितेषदर्थयोः। कापथः कवोष्णम्। अंजसेति तत्वशीघ्रार्थयोः। अ इति बाहिरर्थे। मिथु इति द्वावित्यर्थे। मिथुमन्त्रयेते। विश्वगिति समंतात्भावे।भाजगिति शैघ्र्ये। भाजक्पचति। अन्वगित्यानुकूल्ये। चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः। आद्यशब्दाच्चिरं चिरेण चिरादिति गृह्यन्ते। अस्तमिति विनाशे। आनुषगित्यानुपूर्व्ये। आनुषक् प्रविशतीह बन्धुता। अनुमाने ऽनुषगितिशाकटायनः। आनुषादीति दान्तं के चित्। अम्नस् इति शीघ्रसाम्प्रतिकयोः। अम्न एव गच्छति। अम्नरेवेति रेफो वा। स्थाने

इति युक्तार्थे। वरमिति हि ईषदुत्कर्षे। दुष्ठु निष्कृष्टार्थे। बलादिति हठार्थे। शुइति पूजायाम्। शुनाशीरः। क्षमेति क्षान्तौ। अर्वागिति प्राचीने। शुदि शुक्लपक्षे। वदि कृष्णपक्षे। इति स्वरादिः॥

तद्धितश्चासर्वविभक्तिः॥ तद्धितान्तः शब्दोव्ययं स्यात्। यस्मात्सर्वा वचनत्रयात्मिका विभक्तिर्नोत्पद्यते किं त्वेकवचनम्। ततः तत्र। तद्धित इति किम्। एकः द्वौ बहवः। असर्वविभक्तिरिति किम्। औपगवः। ननु गोदौ वरणा इत्यादावतिव्याप्तिः। न च लुब्योगाप्रख्यानात्, योगप्रमाणे च तदभावे दर्शनं स्यादिति पठतः सूत्रकृतो मते नैते तद्धितान्ता इति वाच्यम्। एवमपि पञ्चैव पञ्चकाः शकुनयः, उभयो मणिः, पचतिकल्पं,पचतिरूप,मित्यादावतिव्याप्तेर्दुर्वारत्वादिति चेत्। अत्राह वार्त्तिककारः, सिद्धन्तु पाठात्। तसिलादयः प्राक्पाशपः। शस्प्रभृतयः प्राक् समासान्तेभ्यः। मान्तः कृत्वोर्थः। तसिवती, नानाञाविति। न च इवेप्रतिकृतावित्यधिकारे प्रत्नपूर्वविश्वेमात्थाल्छन्दसि इति विधानात्तदन्तस्यासङ्ग्रह इति वाच्यम्। प्रकारवचने थालिति प्रकरणएव प्रत्नादिभ्य इवेथाल्छन्दसि। प्रकारवचने इदमस्थमुरिति पठितुं शक्यत्वात् स्वरादिगणे आस्थालाविति पाठेन सिद्धत्वाच्च। मान्तइति। आम् अमूचेत्यर्थः। तसि, प्रतियोगे पञ्चम्यास्तसिः। तेनैकदिक्, तसिश्चेति द्वावपि गृह्येते। स्यादेतत्। सूत्रमते कथमुक्तिसम्भवः यावता कर्मणि द्वितीया द्वेयकयोर्द्विवचनैकवचने इत्यादीनां स्वादिवाक्येनैकवाक्यतापक्षे ऽव्ययेभ्यः स्वादीनां प्राप्तिरेव नास्ति। अव्ययादाप्सुप इति ज्ञापकेन तु सर्वा विभक्तयः। उच्यन्ते। अव्ययेभ्यः सप्तानामपि विभक्तीनां त्रीण्यपि वचनानि। तथा सप्तानामप्येकवचनान्येव। अथवा प्रथमाया एव

वचनत्रयम्। यद्वा प्रथमाया एकवचनमेवेति पक्षचतुष्टयं यद्यपि ग्रन्थेषूपलभ्यते। तथापि प्रथमैकवचनमात्रमेवेति चतुर्थपक्ष एव क्षोदक्षमः। तमेव गृहीत्वा सूत्रस्याप्युक्तिसम्भवः स्पष्टः। इतरत्तु पक्षत्रिकमभ्युच्चयवादमात्रेणोपन्यस्यते न तु तात्त्विकम्। तथाहि। यदि कर्मणि द्वितीयैव अभिहिते प्रथमैव। एकत्वे एकवचनमेवेत्यादिरर्थनियमः। यदि वा द्वितीया कर्मण्येवेत्यादिः प्रकृतार्थापेक्षो विभक्तिनियमः। यदि वा एकवाक्यत्वे सामान्यापेक्षवचनविभक्तिनियमेपि वा अव्ययादाप्सुप इति सामान्यापेक्षज्ञापकाद्विभक्तिसिद्धिस्तदा अविशेषात् सप्तानामपि विभक्तीनां त्रीण्यपि वचनानीति पक्षो लभ्यते। यदा तु द्वित्वे द्विवचनमिति सूत्रयित्वा एकवचनमित्येव पृथक् सूत्र्यते। तदन्यथानुपपत्त्या च कर्मण्येव द्वितीया न करणादौ द्वित्वबहुत्वयोरेव द्विवचनबहुवचने न त्वेकत्वइत्यादिक्रमेण सजातीयापेक्षो नियमः। ततश्चाव्ययेभ्यः सकलविभक्तिप्राप्तावेकवचनमित्यनेन नियमः क्रियते। यत्रैकवचनं चान्यच्च प्राप्नोति तत्रैकवचनमेवेति। यदि वा सामान्यापेक्षनियमाश्रयणादव्ययादप्राप्तावेकवचनमिति सूत्रं क्रियते तस्य च ङ्याप्प्रातिपदिकादित्यनेनैकवाक्यता। तथा च ङ्याबादिभ्यः कर्मादिष्वेकवचनं सिद्धमेवेति। एतत्सूत्रबलादव्ययेभ्य एव भवति तिङन्तात्तु न भवति। एकवचनमित्यस्याप्राप्तप्रापणार्थत्वेपि ङ्याप्प्रातिपदिकादित्यनेनैकवाक्यत्वात् प्रदेशान्तरे पाठसामर्थ्याच्च। स्वातन्त्र्येयणापि ङ्याप्सूत्रं विधायकमिति द्वित्वे द्विवचनमित्यादेर्नियामकत्वं सङ्गच्छते। तदाव्ययेभ्यः सर्वाण्येकवचनानीति द्वितीयः पक्षो लभ्यते। यदा तु द्वितीया कर्मण्येवेत्यादिः सामान्यापेक्षः प्रत्ययनियमो ऽव्ययेभ्यस्तु प्रथमैव। प्रथमा प्रातिपदिकार्थएवेति

नियमेन हि कर्माद्याधिक्यस्थलएव सा निवार्य्यते। द्व्येकयोरिति तु यथान्यासमेव तत्र चैकत्वएवैकवचनं न संख्यान्तरे इति सजातीयापेक्षप्रत्ययनियमपक्षस्तदा निः संख्येभ्योः व्ययेभ्यः प्रथमाया वचनत्रयमपि भवतीति तृतीयः पक्षो लभ्यते। त्रिष्वप्यमीषु पक्षेषु पचतिकर्तृ पचतिरूपमित्यादौ दोषः। तत्र हि प्रथमैकवचनमात्रमिष्यते उक्तपक्षत्रये ऽप्यधिकं प्राप्नोति। तस्माद् द्वितीयपक्षरीत्या सकलैकवचनानि प्रापय्यैकवचनमित्येकत्वस्य विवक्षितत्वात् प्रथमातिक्रमे कारणाभावात्प्रथमैकवचनमेव कर्त्तव्यमिति सिद्धान्तः। एवं च सत्यपि सूत्रस्योक्तिसम्भवे पचतिरूपमित्यादावतिव्याप्तिभयात्परिगणनमेव कर्त्तव्यं सूत्रं तु न कर्त्तव्यमिति स्थितम्॥

कृन्मेजन्तः॥ कृद्यो मांत एजंतश्च तदन्तमव्ययसंज्ञं स्यात्। स्वादुङ्कारं भुंक्ते। वक्षेरायः। तुमर्थेसे इति वचेः सेप्रत्ययं रूपम्। नन्वेवं कारयांचकारेत्यामंतस्य न प्राप्नोति। अत्रातिङ्भावितया लिटः कृत्वेपि मान्तत्वाभावात्। सत्यम्। स्वरादिष्वामिति पाठात्सिद्धम्। यदि तु तत्र तद्धितस्यैक ग्रहणं तर्हीह कृदंतत्वादुत्पन्नानामपि सुपामाम इति लुग् भविष्यति। तत्रहि लेरिति नानुवर्त्तते। न चैवं तरबादेरपि लुगापत्तिः। अपरिसमाप्तार्थतया तरबाद्युत्पत्तेरेवाभावात्। अपरिसमाप्तार्थत्वं च संख्याकर्त्रादिविषयकोत्थिताकांक्षत्वम्। अत एवानुप्रयोगः प्रार्थ्यते। आमन्तार्थगतप्रकर्षादिप्रतीतिस्तु अनुप्रयोगादुत्पन्नेन तरवादिना भविष्यति। अत एव सूत्रितं कृञ्चानुप्रयुज्यतइति, अनुशब्दो हि व्यवहितस्य विपरीतस्य च प्रयोगनिवृत्तयइति वक्ष्यते। यद्वा पूर्वसूत्रोक्तनिष्कर्षरीत्या आमन्तात् सोरेवोत्पत्तौ हल्ङ्यादिलोपो भविष्यति। अस्तु वा कुन्दतं यन्मेजन्त मिति वाक्यार्थः।

आमंतं हि प्रत्ययलक्षणेन कृदंतं, श्रूयते च मान्तम्। न चैवं प्रतामौ प्रतामो, लवमाचक्षणो लौरित्यादावतिप्रसंग इति वाच्यम्। स्वरादिषु प्रशान्शब्दस्य पाठेन धातोः प्रत्ययलक्षणेन कृदन्तत्वमुपजीव्याव्ययसंज्ञा न भवतीति ज्ञापितत्वात्। न च मोनोधातोरिति नत्वे कृते नैतन्मान्तमिति कथं ज्ञापकतेति वाच्यम्। नत्वस्यासिद्धत्वात्। न च शानतेजन इत्यस्यार्थान्तरवृत्तित्वे शानयतीत्यादिप्रयोगसिद्ध्यर्थं चुरादित्वस्वीकारेण नित्यसन्नन्तत्वाभावात्तस्यैवायं स्वरादिषु पाठ इति वाच्यम्। अनभिधानात्। तस्मात्किपोनुत्पत्तेः। अत्र च ज्ञापकत्ववर्णनपरं भाष्यमेव प्रमाणम्। अव्ययमित्यन्वर्थसंज्ञाबलादसत्वार्थस्य साम्यवाचिन एव प्रशान्शब्दस्य तत्र ग्रहणं न तु शान्तिमद्वाचकस्य। तेन प्रशामौ प्रशाम इत्युदाहरणं न विरुध्यते। स्वस्त्यादीनां तु सत्ववाचिनामपि पाठसामर्थ्यादव्ययत्वमिति विशेषः। अन्तग्रहणसामर्थ्यान्नित्ययोगे बहुव्रीहिराश्रीयते। तेनौपदेशिक एज् गृह्यते। नेह, आधये चिकीर्षवे कुम्भकारेभ्यः। वस्तुतस्त्वंतग्रहणं व्यर्थम्। लक्षणप्रतिपदोक्तपरिभाषयैवातिप्रसंगभंगात्। ननु वर्णग्रहणे इयं परिभाषा न प्रवर्त्तते। अन्यथैचोयवायाव इत्यादावतिप्रसंगादिति चेन्न। एवमपि बहिरङ्गपरिभाषया सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषया वेष्टसिद्धेः। अयमत्रार्थः। सन्निपातः संश्लेषः तन्निमित्तो यो विधिः स तद्विघातस्यानिमित्तम्। तं सन्निपातं यो विहंति स तद्विघातस्तस्येत्यर्थः। एवं च सुप्सन्निपातलक्षणस्य घेर्ङितीति गुणस्य बहुवचने झल्येदित्येत्वस्य चाव्ययसंज्ञां प्रति निमित्तत्वं नेत्यवधेयम्। तथा परिभाषायाः प्रयोजनान्तराण्यपि सन्ति दिङ्मात्रं तूच्यते। श्रीपं कुलं तस्मै श्रीपाये-

त्यत्रातोलोपो न भवति । तथा अगव्यीत् । अनाव्यीत् । यस्य हल इति लोपो न । तथातिजरं कुलम् । अतिजरेण अतिजरैः अतिजरादित्यत्र अम् इन ऐस् आत् इत्येतेषु अकारमुपजीव्यकृतेषु सत्सु जरसादेशो न भवतीत्यादि । अनित्या चेयं परिभाषा कष्टाय क्रमणे न यासयोरित्यादिज्ञापकात् । तेनाग्निमानित्यत्र ह्रस्वनुड्भ्यां मतुबित्यन्तोदात्ताद्ध्रस्वान्तात् परस्य मतुप उदात्तत्वे कृते शेषनिघातेन प्रकृतेस्तुदात्तत्वं भवत्येवेति दिक् । गौर्ल्लौर्नौरित्यत्र नेदं सूत्रं प्रवर्त्तते । उणादीनामव्युत्पन्नत्वात् । व्युत्पत्तिपक्षेपि च्विरव्ययमित्युणादिसूत्रेण डौडो प्रत्ययान्ताश्च्व्यन्ता एवाव्ययमिति नियमस्य कृतत्वात् ॥

स्कातोसुन्कसुनः ॥ एतदन्तमव्ययं स्यात् । कृत्वा पुरासूर्य्यस्योदेतोः । पुरावत्सानामपाकर्त्तोः । भावलक्षणेस्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् । पुरा क्रुरस्य विसृपो विरप्शिन् । पुरा जत्रुभ्य आतृदः । सृपितृदोः कसुन्निति कसुन् ॥

अव्ययीभावश्च ॥ अयमव्ययसंज्ञः स्यात् । विषयपरिगणनं कर्त्तव्यम् । लुकि मुखस्वरोपचारयोर्निवृत्तौ चेति । उपाग्नि प्रत्यग्नि, अव्ययादाप्सुप इति सुपो लुक् । उपाग्नि मुखः प्रत्यग्नि मुखः । मुखं स्वाङ्गमित्युत्तरपदान्तोदात्तत्वे प्राप्ते नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य इति प्रतिषेधः । तथा च बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वर एव भवति । पूर्वपदं च समासस्वरेणान्तोदात्तम् । विसर्गस्थानिकस्य सकारस्योपचार इति प्राचां संज्ञा । तन्निवृत्तौ यथा । उपपयः कारःउपपयः कामः । इहातः कृकमीति प्राप्तं सत्वमनव्ययस्येति पर्युदस्यते । इह मुखस्वरनिवृत्तिरे-

व मुख्यं प्रयोजनम्। लुक् तु नाव्ययीभावादत इति विशेषप्रतिषेधात् सिद्धः। उपचारनिवृत्तिरपि न प्रयोजनम्। अतः कृकमीत्यत्रानुत्तरपदस्थस्येत्यनुवृत्त्यैव तत्सिद्धेः। परिगणनं किम्। उपाग्न्यधीयान। पराङ्गवद्भावेन षाष्ठमामंत्रितस्य चेत्युदात्तत्वं यथा स्यात्। तत्र ह्यव्ययानां प्रतिषेध उपसंख्यात उच्चैरधीयानेत्यादौ मा भूदिति। तथोपाग्निकमित्यादौ अव्ययसर्वनाम्नामित्यकच् न। उपकुंभमन्यः, खित्यनव्ययस्येत्यनुवर्तमाने ऽरुर्द्विषेति मुम्प्रतिषेधो न। उपकुंभीभूतः। अस्य च्वाविति स्यौपसंख्यानिकः प्रतिषेधो न भवति। वस्तुतस्त्विदं सूत्रं न कर्त्तव्यम्। लुक उपचारनिवृत्तेश्चान्यथोपपत्तेरुक्तत्वात्। मुखस्वरनिवृत्तिः परमवशिष्यते, तत्र के चिदाहुः। मुखस्वरोत्रेष्यतएव। यद्येतावत् प्रयोजनं स्यात् तत्रैवायं ब्रूयान्नाव्ययीभावाच्चेतीति भाष्यस्वरसादिति। अन्ये तु अनव्ययमव्ययं भवतीत्यन्वर्थसंज्ञाविज्ञानादेव मुखस्वरनिवृत्तिर्भविष्यतीति। स्यादेतत्। स्वरादित्वेनैव सिद्धत्वात्तद्धितश्चेत्यादिचतुःसूत्री व्यर्था। तत्र हि तसिलादिस्तद्धित एधाच्पर्यन्त इत्यादिना च्व्यर्थाश्चेत्यन्तेन आसिमौणादिकं वर्जयित्वा तद्धितश्चासर्वविभक्तिरित्यस्यार्थः संगृह्यते। कृन्मकारसन्ध्यक्षरान्त इत्यनेन कृन्मेजन्त इत्यस्यार्थः संगृह्यते। क्त्वातोसुन्कसुनोव्ययीभावश्चेति सूत्रद्वयं तु स्वरूपेणैव पठ्यतइति। अत्राहुः। पुनर्वचनमनित्यत्वज्ञापनार्थम्। तेन प्रागुक्तं लुङ्मुखस्वरोपचारा इति परिगणनं लभ्यते। न लोकाव्ययेत्यत्राव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति वक्ष्यमाणं च लभ्यतइति। वस्तुतस्तु मास्तु चतुःसूत्री, अव्ययीभावश्चेति तु गणेपि मास्तु उक्तरीत्यान्वर्थसंज्ञयैव सिद्धेः। तोसुन्कसुनोरप्रतिषेध इत्येव लाघवात् पठ्यतामिति युक्तः पन्थाः॥

शि सर्वनामस्थानम् ॥ शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात्। वारीणि, सर्वनामस्थाने चासम्बुद्धाविति दीर्घः। यदि तु प्रदेशेष्वेव शौ चेत्याद्युच्येत तर्हि सुटि न स्यात्। अथ शिसुटोरित्युच्येत तर्हि नपुंसकसुटोपि ग्रहणं स्यात्। शिग्रहणं तु शसर्थं स्यात्। तस्मात्संज्ञा तावत्प्रणेया महासंज्ञाकरणं तु पूर्वाचार्यानुरोधात् ॥

सुडनपुंसकस्य ॥ सुडिति प्रत्याहारः। नपुंसकभिन्नस्य स्वादिपञ्चवचनानि उक्तसंज्ञानि स्युः। राजा राजानौ राजान इत्यादि। प्राग्वदीर्घः। अनपुंसकस्येति किम्। सामनी। विभाषा ङिश्योरित्यल्लोपाभावे दीर्घो न भवति। अनपुंसकस्येति पर्युदासस्तेनास्य सूत्रस्य स्त्रीपुंसयोरेव प्रवृत्तिरिति नपुंसके न विधिर्नापि प्रतिषेधः। तेन वनानि सन्तीत्यत्र पूर्वसूत्रेण प्राप्ता संज्ञा भवत्येव, प्रसज्यप्रतिषेधे तु सापि निषिध्येत। यद्यप्यनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति समाधातुं शक्यते तथापि असमर्थसमासो वाक्यभेदश्चेति गौरवं स्यादेव। यद्वा सुद्स्त्रीपुंसयोरिति वक्तव्ये ऽनपुंसकस्येति सूत्रयतः प्रसज्यप्रतिषेध एव संमतः। गौरवं च प्रामाणिकम्। एतेन हि के चिन्नञ्समासा असामर्थ्येपि साधव इति ज्ञाप्यते। तेनाश्राद्धभोजी ब्राह्मण इत्यादि सिद्धं भवति ॥

नवेति विभाषा ॥ इतिशब्दः काकाक्षिन्यायेनोभाभ्यां संबध्यते। स च पदार्थविपर्यासकृत्। तेनार्थ एवेह संज्ञी संज्ञा च। निषेधविकल्पयोर्विकल्पसंज्ञा स्यात्। न च तयोरपदार्थतया ऽनन्वयप्रसङ्गः। एतत्सूत्रारंभसामर्थ्यादेव विधिवाक्येषु विकल्पवाचिपदस्य लाक्षणिकत्वात्। उभयत्रविभाषार्थं चेदं सूत्रम्। प्राप्तविभाषायामप्राप्तविभाषायां च नास्योपयोगः। तथाहि। विभाषो-

पपदेनप्रतीयमाने इति प्राप्तविभाषा। तत्र स्वरितञित इत्यादिना नित्यमात्मनेपदे प्राप्ते विभाषाश्रुत्या पक्षे तन्निवृत्तिमात्रं क्रियते, पक्षे भवतीति त्वनुवादः। तथा विभाषोर्णोरित्यप्राप्तविभाषा। और्णुवीदित्यत्र परत्वात् सार्वधातुकमपिदिति नित्यङित्त्वाभ्युपगमात्। तत्र ऊर्णवितेत्यादावभावांशस्य स्थितत्वाद्भावांशमात्रपरता, विभाषाश्वेरित्युभयत्रविभाषायां तु यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्स्वेव विकल्पः स्यात्। कित्सु तु यजादित्वान्नित्यमेव स्यात्। अथ प्रतिषेधमुखेन प्रवृत्तिस्तर्हि कित्स्वेव विकल्पः स्यान्न तु पित्सु। न च पित्सु विधिमुखेन, कित्सु निषेधमुखेनेत्युभयथापि प्रवृत्तिरस्त्विति वाच्यम्। वैरूप्यलक्षणवाक्यभेदापत्तेः।संज्ञाकरणे तु सति श्रुतक्रमानुरोधेन नेतिनिषेधः प्रथमं कित्सु प्रवर्त्तते ततः किदकिद्रूपे सर्वस्मिन् लिटि ऐकरूप्यं प्रापिते सति पक्षे भवतीत्यैकरूप्येण विधिमुखेनैव विकल्पः प्रवर्तते। आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्त्तते इति दर्शने इदं सूत्रमारभ्यते। यदा तु प्रतिलक्ष्यं विभाषाश्वेरित्येतद्विद्यते। तदा क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन प्रवृत्तेः संभवान्नेदं सूत्रमारंभणीयम्। तथा च वार्तिकम्।अशिष्यो वा विदितत्वादिति। वस्तुतस्त्वाकृतिपक्षेपि प्रदेशेष्वेव नवाश्वेरित्यादि पठित्वेदं सूत्रं प्रत्याख्यातुं शक्यम्। युक्तं चैतत्। अन्यथान्यार्थमप्यारब्धा संज्ञा विभाषोर्णोरित्यत्र प्रवर्त्तेत। प्रतिषेधाश्च बलीयांसो भवन्तीति और्णुवीदित्यत्रापि सार्वधातुकमपिदित्यस्य निषेधस्ततो विकल्पश्च स्यात्। नन्वारभ्यमाणे सूत्रे नवेत्यखण्डनिपातस्यार्थो निषेध एव संज्ञीति किं न स्यादिति चेन्न। तथा सति नबहुव्रीहावित्यनेनैव सिद्धौ विभाषादिक्समासइत्यस्य वैयर्थ्यापत्तेः। इतीति किम्। घुसंज्ञावत् स्वरूपामिति वचनाच्छब्दस्य संज्ञा मा भू-

त्। तथाहि सति विभाषाश्वेरित्यस्य नवाशब्दः श्वयतेरादेश इत्यर्थः स्यात् इतिशब्दे तु सत्यर्थः संज्ञीति लभ्यते। तथाहि। लोके ह्यर्थप्रधानः शब्दः गौरित्ययमाहेत्यादौ तु शब्दस्वरूपपरः संपद्यते। व्याकरणे तु स्वंरूपमितिपरिभाषणात् स्वरूपपरत्वम त्सार्गिकम्, इतिशब्दसमभिव्याहारेत्वर्थपरतेति विशेषः। अर्थस्यैव संज्ञात्वमपि, न तु विभाषाशब्दस्येत्युक्तम्। तेन हृक्रोरन्यतरस्यामित्यादावपि वैरूप्योद्धारो बोध्यः। एतत्प्रसंगेन त्रिविधा अपि विभाषाः प्रायेण भाष्ये विवेचिताः। तत्राप्राप्तविभाषामध्ये ग्रोयङि, अचि विभाषेति पठितम्। अत्र वदन्ति। अप्राप्तविभाषेयमिति सत्यं, किं तु त्रिसंशया इत्युपक्रम्य प्राप्ते ऽप्राप्ते उभयत्र वेत्येवंरूपकोटित्रयप्रकारकसंशयविषयीभूतानामेव व्युत्पाद्यमानत्वादत्रापि कोटित्रयस्योक्तिसंभवो वक्तव्यः। स च दुर्वचः। तथाहि। निजेगिल्यतइत्यत्र ग्रोयङीति नित्यं लत्वं विभाषायास्तु तत्र प्राप्तिरेव नास्ति। गिलति गिरतीत्यादौ तु विभाषा, ग्रोयङीत्यस्य तु प्राप्तिरेव नास्ति, तत् कुतः प्राप्तविभाषापक्षः। अथोच्येत, अचिविभाषेत्यत्र यङीत्यनुवर्त्य यङ्निमित्तस्य रेफस्याचि अनन्तरे वा लत्वमिति व्याख्यानादस्त्येवोक्तिसंभव इति। तन्न। निजेगिर्य अच् इतिस्थिते हि ग्रोयङीति प्राप्नोति। न चास्यामवस्थायां विभाषायाः प्राप्तिः। अच्परत्वाभावात्। अथ ब्रूयाः विभाषारंभसामर्थ्याद्यङ्लुकः पूर्वं ग्रोयङीति न भवतीति, एवमप्युभयत्रविभाषात्वं दुर्लभमेव। गिरति गिलतीत्यादौ विभाषायाश्चरितार्थत्वेन यङ्लुकः प्रागेव ग्रोयङीत्यस्य प्रवृत्तेरुभयोरसमानकालिकत्वात्। न च लत्वस्यासिद्धतया ततः प्रागेव लुगिति वाच्यम्। अन्तर्भूतयङपेक्षत्वे-

नान्तरङ्गं लत्वं प्रति बहिर्भूताच्प्रत्ययापेक्षत्वेन बहिरङ्गस्य लुकोसिद्धत्वात् पूर्वाभावेन पूर्वत्रासिद्धमित्यस्याप्रवृत्तेरिति । अत्रोच्यते । प्राप्तविभाषात्वे तावत् समनन्तरोक्तरीत्यैवोक्तिसंभवः । उभयत्रविभाषात्वे त्वित्थम् । अन्तरङ्गानपीति न्यायेन लत्वात् पूर्वं लुक् । न च लुङ्निमित्तमजेव दुर्लभः । तस्यार्थापेक्षत्वेन बहिरङ्गतयासिद्धत्वात् पूर्वाभावेन पूर्वत्रासिद्धमित्यस्याप्रवृत्तेः । तथा चाचः पूर्वमेव लत्वं स्यादिति वाच्यम् । कृतितुग्विधिग्रहणेन हि बहिरङ्गपरिभाषाया अनित्यत्वज्ञापनात् । धर्मिग्राहकप्रमाणेन लुक इव तदुपजीव्यानां समासादीनामपि प्राबल्यसिद्धेश्च । ननु कृते ऽचि तन्निमित्ते लुकि च सति निजेगिर् अच् इति स्थिते ग्रोयङीति न प्राप्नोति यङ्परत्वाभावात् प्रत्ययलक्षणं तु नलुमतेति निषिद्धम् । तत्र ङ्ङ्स्येत्यनेनाङ्गाधिकारो न निर्दिश्यतइति वक्ष्यते । न च स्थानिवद्भावः । लुका लुप्तं न स्थानिवदिति निषेधात् । अज्झलादेशत्वाच्च । तथा च कथमुभयत्र विभाषेति चेन्न । नभातुलोपसूत्रप्रत्याख्यानपक्षे पृथगलोपाश्रयणेन स्थानिवद्भावसम्भवात् । न च पूर्वत्रासिद्धे न स्थानिवदिति निषेधः । तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति सापवादत्वात् । यद्यप्यचिविभाषेत्यस्य पूर्वत्रासिद्धमिति ग्रोयङीति प्रत्यासिद्धत्वाद्विप्रतिषेधासम्भवः । ततश्च सत्यामपि यङीत्यस्य निवृत्तावुभयत्रविभाषात्वं न सम्भवति । तथाप्यधुनेत्यादिवल्लाघवार्थमनुनेत्येव वक्तव्ये नमुनइत्युक्तेर्योगविभागार्थतया न योगे योगो ऽसिद्धः किं तु प्रकरणे प्रकरणमिति चासिद्धत्वं न भविष्यतीत्याशयेनोभयत्रविभाषात्वे उक्तिसम्भवो बोद्धव्यः । सिद्धान्ते तु विभाषाया असिद्धत्वादेव

नित्यं लत्वं समुदायलोपवादिनां तु मते अजपेक्षयान्तरङ्गत्वान्नित्यं लत्वमिति व्यवस्थितविभाषेति वा समर्थयितव्यम् ।

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमान्हिकम् ॥

इग्यणः सम्प्रसारणम् ॥ यणः स्थाने इक् भवतीत्येवंरूपो वाक्यार्थः यण्स्थानिक इगित्येवंरूपो वर्णश्चेत्युभयमपि सम्प्रसारणसंज्ञं स्यात् । तत्र व्यङः सम्प्रसारणमित्यादिषु विधिप्रदेशेषु वाक्यार्थस्य ग्रहणं सम्प्रसारणाच्चेत्याद्यनुवादप्रदेशेषु वर्णस्येति विवेकः । पूर्वसूत्रादितिशब्दानुवृत्तेर्वाक्यार्थस्य संज्ञित्वमिति लभ्यते । तत्प्रत्याख्यानपक्षे तु वाक्यमेव संज्ञि । न चैवं तदेव विधेयं स्यादिति वाच्यम् । वाह ऊठ् सम्प्रसारणमितिसामानाधिकरण्यबलेन तदुपस्थापितार्थस्यैव विधेयत्वनिर्णयात् । न चैवमपि व्यङः सम्प्रसारणमित्यादौ दोषतादवस्थ्यम् । सामान्यापेक्षज्ञापकाश्रयणात् । ननु तथापि वाक्यतदर्थयोरन्यतरस्य संज्ञित्वमस्तु वर्णस्य तु कथ मिति चेत् । तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणेनार्थद्वयाभ्युपगमादित्यवेहि । अत्र च विधेयानुवाद्यसमर्पकविभक्त्या सूत्रे निर्देश एव लिङ्गम् । आह च । विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्येति । उभयोः संज्ञेति षष्ठीतत्पुरुषः । भर्तृहरिश्चाह । सम्प्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः । प्रविभागस्तथा सूत्रएकास्मिन्नेवजायते । तथा द्विर्वचनेचीति तन्त्रोपायादिलक्षणः । एकशेषेण निर्देशो भाष्यएव समर्थित इति ॥ तन्त्रं च शब्दतन्त्रमर्थतन्त्रं वेति मतभेदेन व्यवस्था बोद्धव्या । अर्थभेदाच्छब्दभेदे आद्यः पक्षः । शब्दैक्ये द्वितीयः । आद्येपि व्यञ्जकध्वनिमात्रभेदे व्यङ्ग्यैक्ये आवृत्तिरेवेत्यादि बोध्यम् । एवं च तन्त्रत्वमेकरू-

प्येण भवेत्तुल्योपकारतः । उपकारान्यथात्वे तु भवेदावृत्ति-लक्षणमिति मीमांसकमर्यादानुरोधो वैयाकरणेन कर्तव्यः । तस्य भाष्यादिसकलवैयाकरणग्रन्थाविरुद्धत्वात् । मूलयुक्ति-शून्यतया दुरुपपादत्वाच्चेति दिक् । यद्वा। वाक्यार्थ एव संज्ञी अनुवादे तु तन्निष्टत्तो वर्णो लक्ष्यते । सम्प्रसारणाज्जातं स-म्प्रसारणमिति । अथ वा वर्ण एव संज्ञी । विधिप्रदेशेषु तु सूत्र-शाटकवद्भाविसंज्ञाश्रयणीयेति । सर्वेप्येते पक्षा भाष्ये स्थिताः । स्यादेतत् । अदुहितरामित्यत्र लकारस्य यणः स्थाने उत्तमपु-रुषैकवचनमिट् । तस्य च सम्प्रसारणसंज्ञायां सत्यां हल इति दीर्घः स्यात् । तरपं प्रति लङन्तस्याङ्त्वादिति । अत्राहुः । संख्यातानुदेशाद्यकारस्थानिकस्यैव इकारस्य संज्ञा न तु लकारस्थानिकस्येति । अत्रेदमवधेयम् । वाक्यार्थः संज्ञीति पक्षे तस्योद्देश्यविधेयसंसर्गरूपतया तत्र यथासंख्यपरिभाषो-पस्थितौ यणः स्थाने इक्स्याद्यथासंख्यमित्यवान्तरवाक्यार्थः सोयं सम्प्रसारणसंज्ञः स्यादिति महावाक्यार्थः । न चा-वान्तरवाक्यार्थं गृहीत्वा यातिवातिद्रातीत्यादावतिप्रसङ्गः । तस्य संज्ञासम्बन्धमात्रफलकत्वात् । अन्यथा ष्यङः सम्प्रसार-णमित्यादेर्वैयर्थ्यापत्तेरतो नोक्तदोषः । अदुहीत्यादेस्तज्ज-त्वाभावाच्च । उभयसंज्ञात्वपक्षेपि उपस्थितत्वाद्यथासंख्यप्रवृत्त एव वर्णः संज्ञीति । अतो ऽदुहितरामित्यत्र नातिप्रसङ्गः । इदं च कर्मकर्त्तरि रूपमिति हरदत्तः । उपलक्षणं चैतत् । केवले कर्तर्यपि सम्भवात् । वर्ण एव संज्ञीति पक्षे तु यथासं-ख्यं दुर्लभम् । अनुवादे परिभाषाणामनुपस्थानस्योपपादितत्वा-त् । न चैवं स्थानेयोगोप्यस्मिन्पक्षे न लभ्येतेति वाच्यम् । षष्ठी स्थानेयोगेत्यत्रानुवर्त्य एतत्सूत्रस्य व्याख्येयत्वात् । उक्तं हि इ-

कोर्गुणवृद्धीइतिसूत्रे । सिद्धं तु षष्ठ्यधिकारे वचनादिति । इहैव वा सिंहावलोकनन्यायेन स्थानग्रहणापकर्षोस्तु । यथासंख्यं तु दुर्लभमित्युक्तम् । कथं तर्हि अदुहितरामित्यत्र नातिप्रसंग इति चेत् । तन्त्रावृत्त्याद्याश्रयणेन संप्रसारणस्येत्यत्र तच्छावितग्रहणात् । यद्वा । कार्यकालपक्षे यणः स्थाने संप्रसारणमिग्भवतीति वाक्यार्थादनुवादतैव नास्ति तत्र परिभाषोपस्थितौ सत्यां यथासंख्यप्रवृत्त एव संज्ञी । स एव संप्रसारणस्येत्यादौ उपतिष्ठते । अथ वा स्थानक्रमेण संबन्धो लौकिकन्यायसिद्धत्वादनुवादेपि सुलभः । यथासंख्यसूत्रं परं न प्रवर्त्तताामिति दिक् । द्युभ्यामित्यत्र हल इति दीर्घो न । दिवउदिति तपरकरणात् । अत एव द्युलोक इत्यत्र संप्रसारणस्येति दीर्घो न । नन्वेवं भाव्यमानोप्युकारः सवर्णान्गृह्णातीत्यर्थे ज्ञापकतया कथमस्योपन्यास इति चेन्न । तस्य वाक्यार्थः संज्ञीति पक्षेणोक्तत्वात् । संप्रसारणस्येत्यत्र तच्छावितग्रहणाद्वा । पक्षान्तरे तु ऋतउदिति ज्ञापकं बोद्धव्यम् । नन्वेवमक्षद्युवौ अक्षद्युवः इत्यादौ ऊठः संप्रसारणसंज्ञायां संप्रसारणाच्चेति पूर्वरूपं स्यादिति चेन्न । संप्रसारणपूर्वत्वे समानांगग्रहणस्य वार्तिककृता कृतत्वात् । तत्प्रत्याख्यानपक्षे तु वार्णादांगं बलीय इत्युवङ् भविष्यति । वाक्यार्थः संज्ञीत्यादिपक्षान्तरे तु पूर्वरूपप्राप्तिरेव नास्ति । हूतो जीन इत्यादौ तु हल इति सूत्रसामर्थ्यात्सम्प्रसारणनिर्वृत्तस्यादेशेपि दीर्घप्रवृत्तिः । वर्णसंज्ञापक्षेपि अल्विधौ स्थानिवद्भावासंभवेन हल इतिसूत्रारम्भसामर्थ्यात्सम्प्रसारणस्यादेशे कार्यप्रवृत्तेर्वाच्यत्वादिति दिक् ॥

आद्यन्तौ टकितौ ॥ टित्कितौ यस्योक्तौ तस्य क्रमादा-

घ्नन्तावयवौ स्तः। भविता। यापयति। पुरस्तादपवादा इतिन्यायेन स्थानेयोगत्वस्यायमपवादः। प्रत्ययः परश्चेत्यनेन तु परत्वाद्बाध्यते। तेन चरेष्टः,गापोष्टक्,व्रीहिशाल्योर्ढक्,इत्यादयः परा एव भवन्ति। परेण परिभाषाप्रकरणेन साहचर्यात्परिभाषेयम्। भाष्ये तु संज्ञापक्षोपि स्थापितः। तथाहि। टकितावितिं कर्मधारयः। इत्संज्ञकौ टकारककारौ आद्यन्तयोः संज्ञे स्तः। तथा च इट् इति बहुव्रीहिः इः ट् आदिर्यस्येति विग्रहः। तथा च स्थानेन्तरतमपरिभाषया तव्यस्य इतव्यादेशे सिद्धमिष्टम्। एवं यापयतीत्यत्र यातेर्याप् आदेशः पुः क् यस्येति व्याख्यानात्। न चैवमाद्यन्तौ टकौ इत्येवास्त्विति वाच्यम्। आलजाटचौ ठस्येक इत्यादावपि टकयोराद्यन्तसंज्ञात्वप्रसङ्गात्। इत्संज्ञकत्वेन तु देशविशेषो लक्ष्यते। तेन इत्संज्ञकस्य यो देशस्तत्रावस्थितौ टकौ संज्ञे। न चाटचष्टकार इकादेशस्य ककारश्च तथेति नोक्तदोषः। नन्वास्मिन्पक्षे लुङ्लङ्लिङ्क्ष्वित्यादिना भू इत्यस्याभू इत्यादेशः स्यात्स चोदात्त इत्यन्तोदात्तः प्रसज्येत। नैष दोषः। अः ट् उदात्तश्च यस्येति त्रिपदबहुव्रीह्याश्रयणात्। विशेषणस्यापि उदात्तस्य सौत्रः परनिपातः। तेनोदात्ताकारादिरादेश इति सिद्धम्। न चैवमप्याडजादीनामित्यत्र दोषतादवस्थ्यम्। अनुवृत्तेनोदात्तशब्देन सह श्रूयमाणस्य बहुव्रीह्यसम्भवादिति वाच्यम्। आडजादीनामिति सूत्रस्य प्रत्याख्यास्यमानत्वात्। वक्ष्यति हि,अजादीनामटा सिद्धमित्यादि॥

मिदचोन्त्यात्परः॥ सन्निविष्टानामचां मध्ये अन्त्यो योच् तस्मात्परो मित्स्यात् स च पूर्वान्तः। स्थानेयोगस्य परश्चेति परत्वस्य चापवादः। वनानि। यशांसि। रुणद्धि। ननु पूर्वयोगवदयमपि पुरस्तादपवादन्यायेन स्थानेयोगमात्रस्याप-

वादोस्तु न तु प्रत्ययः परश्चेत्यस्यापीति चेन्न । बाध्यसामान्यचिन्तामाश्रित्य स्वविषये प्राप्तं सर्वं बाध्यतइतीहाभ्युपगमात् । अन्यथा श्नमो मित्करणं व्यर्थं स्यात् । न च श्रवणार्थ एव श्नमो मकार इति वाच्यम् । तृणह इति निर्देशात् । अच इति जात्यभिप्रायेणैकवचनम् । निर्द्धारणे षष्ठी । न चान्त्यादित्यनेन सामानाधिकरण्यादच इति पञ्चम्येवास्तामिति वाच्यम् । शे मुचादीनामित्यादावन्त्यस्याचो ऽसम्भवेनैतत्परिभाषाया अप्रवृत्तावलोन्त्यपरिभाषाप्रसङ्गात् । तथा च तत्र मित्करणवैयर्थ्यापत्तेः । पूर्वसूत्रे आद्यन्तावितिसमासनिर्देशेपीहान्तग्रहणमात्रमनुवर्त्तते एकदेशएव स्वरितत्वप्रतिज्ञानात् । तेन मित्पूर्वान्तः । यदि त्वभक्तः स्यात्तदा ताता पिण्डानामित्यादौ शेश्छन्दसि बहुलमिति शेर्लोपे कृते नलोपो न स्यात् । प्रातिपदिकान्तत्वाभावात् । तथा वहंलिह इत्यत्र वहाभ्रे लिह इति खशि अरुर्द्विषदजन्तस्येति मुमि मोनुस्वार इत्यनुस्वारो न स्यात् । अपदान्तत्वात् । यदि त्वादिग्रहणमनुवर्त्त्य परादिः क्रियेत तदा वारिणे इत्यादौ घेर्ङितीति गुणः स्यात् । वहंलिह इत्यत्रानुस्वारो न स्यात् । अतिशयितः सखा येषां तान्यतिसखीनि ब्राह्मणकुलानीत्यत्र सख्युरसम्बुद्धाविति णित्वमयुक्ता वृद्धिः प्राप्नोति । सा हि गौणत्वेपीष्यते अस्थ्याद्यनङ्वत् । एतच्चेह सूत्रे भाष्यकैयटयोः स्फुटम् । तस्मात्पूर्वान्तपक्ष एवात्र स्थितः । अत्र वार्त्तिकम् । अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थम् । मग्नः । मग्नवान् । ओदितश्चेति निष्ठानत्वम् । तस्यासिद्धत्वात्कुत्वम् । मस्जिनशोर्झलीति नुम् । स च यद्यन्तादचः परः स्यात्तदानिदितामित्यनुषङ्गलोपो न स्यात् । उपधाभूतस्य नकारस्यानुषङ्ग इति प्राचां संज्ञा । अथ स्कोरिति सलोपे

कृते नकार उपधात्वाल्लुप्यतामिति चेत् । न । नलोपं प्रति स्कोरितिलोपस्यासिद्धत्वात् । बहूनां समवाये समुदायस्यैव संयोगसंज्ञेति पक्षे सलोपस्याप्राप्तेश्च । तथा च मङ्क्ता मङ्क्तव्यमित्याद्यपि प्रयोजनं बोध्यम् । भर्जिमर्च्योश्च । अन्त्यात्पूर्वो मित् इत्यनुवर्त्तते । भृजी भर्जने । अस्मादौणादिके अचि कृते ऊमागमः । भरूजा । मर्च शब्दार्थे । चुरादिकः । अस्मादच इरित्यौणादिक इप्रत्यय ईमागमः । निपातनात्सिद्धम् । भरूजाशब्दो ह्यङ्गुल्यादिषु पठ्यते मरीचिशब्दो बाह्वादिषु । उणादिषु तु मृकणिभ्यामीचिरिति ईचिप्रत्ययं कृत्वा मरीचिशब्दो व्युत्पादितः । तदुपायान्तरं बोध्यम् ॥

एच इग्घ्रस्वादेशे ॥ आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात् । हेशब्दमतिक्रान्तं कुलमतिहि कुलम् । चित्रगुः । अतिरिः । अतिलु । यदत्र वक्तव्यं तदेओङ्सूत्रएवोक्तम् ॥

षष्ठी स्थानेयोगा ॥ अनेकसम्बन्धपरतया सम्भाव्यमाना षष्ठी स्थानप्रयुक्तसम्बन्धपरेति बोध्यम् । अस्तेर्भूः । अस्तेः समीपो ऽनन्तरो वेति संशये तत्स्थाने उच्चारणीय इत्यर्थः । स्थानं च प्रसङ्गः।दर्भाणां स्थाने शरैः प्रस्तरितव्यामितिवत् । तथा चेगुच्चारणे प्रसक्ते यणुच्चारणीय इत्याद्यर्थपर्यवसाने सामीप्यादयः सम्बन्धा अर्थाद्द्योत्तताः । योगः सम्बन्धः । स बहुविधोस्त्यस्या इति योगा । अर्शआदित्वान्मत्वर्थीयोच् । स च भूम्नि । अन्यथा विशेषणवैयर्थ्यापत्तेः । तेनानेकसम्बन्धपरतया सम्भाव्यमानेत्यर्थो लभ्यते । अयोगेति वा छेदः । अनिश्चितयोगविशेषेत्यर्थः । योगेत्ययोगेति वा किम् । ऊदुपधाया गोहः । शास इदङ्हलोरित्यादौ शास इत्यत्र मा भूत् । सति हि तत्रापि स्थानेयोगत्वे गोहिशासोः स्थाने धातुमा-

त्रस्योपधायाश्च ऊदितौ स्यातामिति दिक्। यद्वा। स्थाने योगो यस्या इति बहुव्रीहिः। अत एव निपातनात्सप्तम्या अलुक्। यद्वा। स्थानेन योगोस्या इति विग्रहः। निपातनादेत्वम्। न चानयोः पक्षयोर्गोहः शास इत्यादावतिप्रसङ्गः। परिभाषाणामनियमे नियन्तुं प्रवृत्तेः। युक्तं चैतत्। आकांक्षापूर्वकत्वात्सम्बन्धस्य, इह चोपधासन्निधानेनावयवषष्ठीत्वे निर्णीतआकांक्षाविच्छेदात्। लोकेपि हि पंथानं पृच्छन्तं प्रत्यमुष्मिन्नवकाशे दक्षिणो ग्रहीतव्यो ऽमुष्मिन्नुत्तर इत्यादावुपदिष्टे सति यत्र मार्गद्वैधात्संशयस्तत्रैव तदुपतिष्ठते न त्वसंदिग्धे तिर्यक्पथेपीति दिक्। भाष्यकारास्त्वाहुः। अस्तेर्भूरित्यादावनेकसंबंधप्रसंगेपि लक्ष्यानुरोधादन्तरंगत्वात्स्थानिवदादेश इति ज्ञापकाच्च स्थानेयोगतैव व्याख्यास्यते। तस्मान्नायमेतस्य सूत्रस्य सूत्रार्थः। किं तु षष्ठ्यंतमुच्चार्यमाणमेव स्थानेन युज्यते न तु प्रतीयमानमिति सूत्रार्थः। तदेतदुच्यते निर्दिश्यमानस्यादेशा भवंतीति। तेन पादः पदित्यस्यायमर्थः पाच्छब्दान्तं यदंगं तदवयवस्य पाच्छब्दस्य सर्वस्य पदादेश इति। अलोंत्यस्यादेः परस्येति तु योगौ आरंभसामर्थ्यादस्य बाधकौ। अनेकाल्शित्सर्वस्येत्यनेन तु सहाविरोधादस्य समुच्चयेन प्रवृत्तिरिति। एवं स्थिते तंत्राद्याश्रयणेन प्रागुक्तोपि सूत्रार्थः सुवचः। फलं तु स्फुटप्रतिपत्तिरिति दिक्॥

स्थानेन्तरतमः॥ प्राप्यमाणानां मध्ये सदृशतम आदेशः स्यात्। सादृश्यं च चतुर्धा। स्थानतोर्थतो गुणतः प्रमाणतश्चेति। स्थानतो यथा। सुध्युपास्यः। मध्वरिः। धात्रंशः। लाकृतिः। यत्तु यथासंख्यसूत्रेणैवेहान्यथासिद्धिरित्युक्तं भाष्याद्यौ। तदभ्युच्चयमात्रम्। अर्थतः साम्यविवक्षायां यथासं-

रूपालाभात्। इको हि षट्षष्टिः यणस्तु सप्तेति वैषम्यात्। अथेक्शब्दाद्यण्शब्दाच्च प्रथमं चतुर्णां चतुर्णामुपस्थितेरस्त्येव साम्यमिति चेत्तर्हि सुध्युपास्येति दीर्घस्य कथं यणादेशः। इकारेण ग्रहणादिति चेत्तर्हि तृतीयेन ऋकारेण चतुर्थेन ऌकारेण च परस्परस्य ग्रहणाल्लाकृतौ रेफप्रसङ्गः धात्वंशे च लकारप्रसङ्गः, यवौ च सानुनासिकनिरनुनासिकौ न व्यवतिष्ठेयातामिति दिक्। दैत्यारिः श्रीश इत्याद्यपीहोदाहरणम्। अर्थतो यथा। वातंड्ययुवतिः। वतंडशब्दाद्वतंडाच्चेत्यपत्ये यञ्। तस्य लुक्स्त्रियामिति लुक्। शार्ङ्गरवादित्वान् ङीन्। वतंडी चासौ युवतिश्चेति विग्रहे पोटायुवतीत्यादिना समासः। पुंवत्कर्मधारयेत्यतिदिश्यमानः पुंशब्दो वतंडापत्यवाचिनो वतंडीशब्दस्य तदपत्यवाची वातंड्यशब्दो भवति। गुणतो यथा। पाकः। त्यागः। चजोः कुघिण्ण्यतोरिति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारः। जकारस्य तु घोषस्याल्पप्राणस्य नादवतः स्थाने तादृगेव गकारः। प्रमाणतो यथा। अमुम्। अमू। अमून्। अदसोसेरित्यनेन ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उकारः। इह स्थाने इत्यनुवर्तमाने पुनः स्थानेग्रहणादन्योपि वाक्यार्थः सम्मतः। तालवादिरूपे स्थाने योन्तरतमस्तत्प्रयुक्तान्तर्यवानिति यावत्। स प्राप्यमाणानां मध्ये स्यादिति। तदुक्तम्। यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय इति। तेन चेता स्तोतेत्यादौ प्रमाणत आन्तर्यवानप्यकारो न भवति। वाक्यभेदे च तमबग्रहणमेव लिङ्गम्। एकस्मिन्नेव वाक्यार्थे संमते हि स्थानेनेतरइत्येव ब्रूयात्। सिद्धान्ते तु वाग्घरिरित्यादौ सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ताः। नादवतो नादवन्त इति तृतीयाः प्रसक्ताः। तमबग्रहणास्तु चतुर्था भवन्ति। ते हि सोष्मा-

णो नादवन्तश्च। ऊष्मा ऊष्मत्वं वर्णधर्मस्तत्सहिताः सोष्माणः। तथा च बव्हृचानां प्रातिशाख्यम् । वर्गे वर्गे च प्रथमावघोषौ युग्मौ सोष्माणावनुनासिकोन्त्य इति । शादय ऊष्माणः सस्थानेन द्वितीया हकारेण चतुर्था इति शिक्षा । इह त्रीणि वाक्यानि,ऊष्मशब्दश्च धर्मिवचनः । शषसहा ऊष्माण इति प्रथमवाक्यार्थः । सस्थानेनेति । इत्थंभूतलक्षणे तृतीया। हशषसाः क्रमेण ख छ ठ थानां द्वितीयानां सस्थानाः। यथा हादय उष्माण स्तथैव खादयोपीत्यर्थः। फकारस्य तु यद्यपि सस्थान ऊष्मा नास्ति तथापि तस्य विशिष्यैव ऊष्मत्वं बोध्यम् । हकारेण चतुर्था इति। यथा हकार ऊष्मा एवं तेपीत्यर्थः । नन्वेवमिष्ट उश्न इत्यादावान्तर्यादर्धमात्रस्य यणः स्थाने अर्द्धमात्र इक् स्यात् । दध्यत्र, मध्युपास्य, इत्यादौ तु मात्रिकद्विमात्रिकयोरिकोस्तथाविध एव यण् स्यादिति चेन्न । अर्द्धमात्रस्येको मात्रिकद्विमात्रिकव्यंजनस्य च लोकवेदयोरप्रसिद्धत्वात् । योस्ति स एव भविष्यति । इह भाष्ये अन्तरतम इति सप्तम्यंतपाठोप्युपन्यस्य दूषितः । तथाहि । अन्तरतमउरण् रपर इति संहितया तावत्सूत्रकृदपाठीत् । पदकारास्तु व्याख्यातारः । तत्र सप्तम्यंतमपि शक्यं छेत्तुम् । षष्ठीति चानुवर्त्तते । अन्तरतमे स्थानिनि षष्ठी उपसंहर्त्तव्येति सूत्रार्थः। एवं चाकः सवर्णे दीर्घ इत्यत्र विधेयस्य दीर्घस्यान्तरतमे स्थानिन्यक इति षष्ठ्या उपसंहारात्सिद्धमिष्टम् । तथा वान्तो यि प्रत्ययइत्यत्र एच इत्यनुवृत्तायाः षष्ठ्या वांतादेशस्यांतरतमयोरोदौतोरुपसंहारात्सिद्धम्। अन्यथा एजमात्रस्य वान्तादेशः स्यात्। अत्रेदं दूषणम्। इको यणचीति यण् ह्रस्वानामेव स्यान्न तु दीर्घाणाम् ।

अर्द्धमात्रस्य हि मात्रिकः सन्निकृष्ट इति तत्रैवेक इति षष्ठ्या उपसंहारात्। तथेको गुणवृद्धी अचोञ्णिति इति षष्ठ्योर्गुणवृद्धयोः रन्तरतमेष्वेव इक्ष्वक्ष चोपसंहारात्। नेता लविता नायको लावक इत्यादावेव स्यात्। चेता स्तोता चायकः स्तावक इत्यादौ तु न स्यादिति दिक्। तदेवं सप्तम्यंतपक्षस्य दुष्टत्वात्प्रथमांतपक्ष एव युक्त इति स्थितम्। स्यादेतत्। एवं सति एज्मात्रस्य वांतादेशः स्यादिति चेत्। अत्राहुः। पूर्वसूत्रे तावद्यथासंख्यं प्रवृत्तम्। अन्तरतमपरिभाषा वा। अर्थाधिकारश्चेहाश्रीयते। यादृशो वान्तादेशः पूर्वं दृष्टओकारस्थानिको ऽव् औकारस्थानिकश्चाव् तादृशो यि प्रत्यये भवतीति सूत्रार्थः। यद्वा। वांत इति न करिष्यते। न चैवं चेयं नेयमित्यादावतिप्रसङ्गः। क्षय्यजय्याविति योगो विभज्य कण्ठतालव्यस्य चेञ्नवति क्षिञ्योरेवेति नियमपरतया व्याख्यानात्। क्षिञ्योः शक्यार्थएवेति द्वितीयसूत्रार्थः। तेनार्हार्थे तयोरपि नेति बोध्यम्। नन्वेवमपि शार्ङ्गरवादिगणपाठितेन नृनरयोर्वृद्धिश्चेति सूत्रेण नरशब्दस्य नारीति रूपं न सिद्धयेत्। तथा हि। नरशब्दस्य ङीन्संनियोगेन विधीयमाना वृद्धिरलोंत्यस्येत्यंत्यस्य स्यात्। तथा च यस्येति चेति लोपेन तस्यानिवृत्तौ वृद्धिवचनं व्यर्थं स्यात्। न च नृशब्दार्थं तादिति वाच्यम्। एवं हि सति नुर्वृद्धिश्चेत्येव ब्रूयात्। न च नरशब्देपि परत्वाद्यस्येति लोपे कृते वृद्धिर्भवन्ती नानर्थिकेति वाच्यम्। प्रत्ययसन्नियोगशिष्टत्वेन वृद्धेरन्तरङ्गत्वात्। ननु वचनसामर्थ्याद् वृद्ध्या लोपो बाध्यताम्, आहो स्विदन्तरङ्गपरिभाषां बाधित्वा परत्वाद्यस्येति लोपे कृते वृद्धिर्भवत्विति संशये परिभाषाबाध एव न्याय्यः। तदुक्तम्। अङ्गगुणविरोधे च तादर्थ्यादिति। किञ्च वाह ऊठित्यत्र ङा-

पितत्वेनानुमेयायाः परिभाषाया एव बाधेनोपपत्तौ साक्षाच्छुतस्य यस्येतिलोपस्य बाधो ऽनुचितः। तथा च लोपे कृते वृद्धिरिति सिद्धं नारीति रूपमिति चेत्। सत्यं सिद्धं, किन्तु सप्तम्यंतच्छेदपक्षएव। तत्र हि प्रकृतितोंतरतमनिर्वृत्तिरिति वृद्ध्यन्तरतमे स्थानिनि षष्ठ्या उपसंहारात् अकारस्य वृद्धिर्भवति। प्रथमांतछेदपक्षे त्वादेशतोंतरतमनिर्वृत्तिरित्यलोंत्यस्येति वचनाद्रेफस्य स्यात्॥ तस्मात्सिद्धांते नारीति रूपं नरशब्दस्य दुःसाधमिति पूर्वः पक्षः॥अत्राहुः। नरशब्दपाठस्य प्रत्याख्यानमेव भाष्यकृतोभिप्रेतं सप्तम्यंतपक्षनिराकरणभाष्येण तथैवानुमानात्। न चैवं नरशब्दाज्ज्ञातिलक्षणङीषि सति नरीति रूपं स्यादिति वाच्यम्। इष्टापत्तेः। तथा च प्रयुज्यते किंनरीणां नरीणामिति। यद्वा। नरशब्दस्य नियतपुल्लिंगत्वमेवास्तु। तथाच क्वातिप्रसङ्गः। उक्तप्रयोगस्तु पुंयोगलक्षणे ङीषि भविष्यति। यथान्यासेपि तस्य दुर्वारत्वात्। अथ वा नृनरयोरित्यत्रात इति वर्त्तते। अजाद्यतष्टाबिति सूत्रात्। तच्चानुवृत्तिसामर्थ्यात्षष्ठ्या विपरिणतं नरशब्देन सह वैयधिकरण्येन संबध्यते। न तु नृशब्देन। असंभवात्। तस्मात्सिद्धं नारीति। अत्रेदं वक्तव्यम्। प्रत्याख्यायतां नाम नरशब्दः। नृनरयोरिति पठतः सूत्रकृतो मते तु कथमुक्तिसंभवः। न च नरीत्येवेष्टमिति वाच्यम्। वृद्धिविधायकसूत्रमध्ये नरशब्दपाठस्य वैफल्यापत्तेः। अत इत्यनुवृत्त्या समर्थनमपि क्लिष्टम्। एकदेशानुवृत्तिविभक्तिविपरिणामाद्याश्रयणात्। किञ्च नृनरयोरिति गणपाठे पठ्यते न त्वष्टाध्याय्याम्। गणे चात इति न प्रकृतम्। तथा शार्ङ्गरवाद्यञ इत्यादिशब्देन गणसूत्रमपि हृदयमागमय्य तत्रात इत्यस्यान्वयो वाच्यः। स च क्लिष्टतर इति स्पष्टमेव। तस्मादित्थं समाधेयम्। नर इति रान्तं लुप्ताकारा-

नुकरणं तस्य अः वरः । नुश्च नरस्येत्येतेति द्वन्द्वः । चाद्गणे पाठाच्च ङीन् । यद्वा। स्थानेन्तरतम इत्यत्र तन्त्रेण द्वेधा छेदः सूत्रकृतः सम्मतः भाष्योक्तरीत्या लौकिकन्यायाश्रयणेन सूत्रप्रत्याख्यानपक्षेपि हि प्रकृतित आदेशतश्चेत्युभयथाप्यन्तरतमनिवृत्तिरस्त्येव । सूत्रकृतो मते वाचनिकी सा । भाष्यकृतस्तु न्यायसिद्धेत्यन्यदेतत् । तथा च वान्तो यि नृनरयोरित्यादि सर्वं सुस्थमेव । अत एव चतुर्थे स्थानितोन्तरतमनिर्वृत्तिमाश्रित्य नारीति रूपं साधयन्हरदत्तोपि न विरुध्यते । इको यणचीत्यादावतिप्रसङ्गः परमवशिष्यते । स च ल्वादिभ्यः प्वादीनां ह्रस्व इत्यादिज्ञापकेन वाचनिक्या न्यायमूलिकाया वा स्थानितोन्तरतमनिवृत्तेरनित्यतामाश्रित्य परिहर्त्तव्य इति दिक्। सूत्रप्रत्याख्यानप्रकारस्तूच्यते। सभायामास्यतामित्युक्ते हि पण्डिताः पण्डितैः सह समासते, शूराः शूरैः, कवयः कविभिः,न तु सङ्करेण । किं बहुना गवां सङ्घं प्रति गौर्धावति, अश्वो ऽश्वानामित्यादिष्वयवस्था तिर्यक्ष्वपि दृश्यते । तस्मात्प्रथमवाक्यार्थस्य लोकत एव लाभान्न तदर्थं सूत्रमारम्भणीयम् । एवं स्थानत आन्तर्यं बलीय इत्यपि लोकत एव सिद्धम् । तथाहि । भूयः सहचरितयोरश्वयोर्गवोर्वा सजातीयान्तरसंबलने सत्यपि कृशत्वपाण्डुत्वादिगुणसदृशानपि हित्वा स्थानसाम्यपुरस्कारेणैव परस्परापेक्षा दृश्यते । तदेवं लोकतः सिद्धे किं वचनेनेति ॥

उरण् रपरः ॥ ऋवर्णस्य स्थाने यो ऽण् स प्रसङ्गावस्थायामेव रप्रत्याहारपरस्स्यात् । ऋकारेण सावर्ण्यान्त्रिंशत उपस्थाने सति स्थानेंतरतमपरिभाषया रश्रुतिमतः स्थाने रपरो लश्रुतेस्तु लपर इति विवेक्तव्यम् । कृष्णर्द्धिः, तवल्कारः, ऋलृस्थाने

यो ऽण् इति ग्रन्थस्तु यथासंख्यभ्रमापादकोसंगतश्च । शब्दतः साम्येनाभिमतानिर्वाहात् । न हि सूत्रे शब्दद्वयमस्ति । अर्थतस्तु नतरां साम्यम् । अथात्र न यथासंख्यमभिमतं तर्हि किं वृत्तिमध्ये द्वयोरेव विशिष्योल्लेखनेन । आ च आ च रलौ ऋलोः स्थानमिति विग्रहे उश्च उल् च ऋलोरिति विग्रहे वा द्वन्द्वस्य दुर्लभत्वाच्च । स हि विरूपाणामपि समानार्थानामित्येकशेषेण बाध्यते । चित्रगुशब्दस्य चित्रगवीपरतायामिव साधुत्वनिर्वाहार्थं लक्षणामाश्रित्य लक्षितलक्षणया शक्यार्थे पर्यवसानमिति कथं चिन्निर्वाहस्तु ग्रन्थे श्रद्धालुभिरास्थेय इति दिक् । अत्र पक्षचतुष्टयं सम्भाव्यते । उः स्थाने रपरो ऽण् स्यादिति रपरत्वविशिष्टो ऽण् विधीयतइति प्रथमः पक्षः । उः स्थाने अणामनणां च प्रसङ्गे अणेवेति नियमः । स च रपर इति वाक्यभेदेन रपरत्वं विधीयतइति द्वितीयः पक्षः । उः स्थाने योणित्यनूद्य तस्य रपरत्वं विधीयतइति तृतीयः । प्रसंगावस्थायामेव रपरत्वं विधीयतइति चतुर्थः । तत्राद्ये पक्षे नाप्राप्तेषूदात्तादिषु विधीयमानोण् तेषां बाधकः स्यात् । तैरनवरुद्धस्य विषयस्यालाभात् । एवं तदा वचनव्यक्तिः । षष्ठीनिर्दिष्टमात्रस्य भवन्नादेशोन्तरतमः स्यात् । ऋवर्णस्य त्वण् रपर इति । ततश्चोदात्तानुदात्तस्वरितानुनासिकेषु दोषः । तथाहि । कृतिरित्यत्र ञ्नित्यादिर्नित्यमिति प्राप्तम् ऋकारं बाधित्वा ऽण् रपरः स्यात् । तथा प्रकृतं प्रहृतमित्यत्र गतिरनन्तर इति पूर्वपदप्रकृतिस्वरे कृते शेषनिघातमुदात्तादनुदात्तस्येति स्वरितं च बाधेत । तथा नृःपाहीत्यत्र नृन्पइति ज्ञापकात्पूर्वसवर्णदीर्घसंभवेप्यनुनासिकं बाधित्वा ऽण् रपरः स्यात् । किञ्च कर्त्ता कारक इत्यत्र गुणवृद्धी बाधित्वाण् भवन्नकार एवेति नियमाभावात् कदा चिदिकार उ-

कारश्च स्यात्। अपि च ये ऽमी प्रतिपदोक्ता इत्वोत्वादय ऋत इद्धातोरुदोष्ठ्यपूर्वस्येति तेषु रपरत्वं न स्यात्। द्वितीये तु गुणवृद्ध्योर्न दोषः। अणनणोः प्रसक्तावणेवेति नियमेन कर्त्ता कारक इत्यादिसिद्धेः। ननु ह्रस्वे स्थानिनि सर्वा वृद्धिरनन्तरतमा तारक इत्यादौ दीर्घे तु सर्वापि प्रमाणतोंतरतमेत्यविशेषादुभयत्रापि सकलवृद्धिप्रसंगे नियमोस्तु, गुणस्तु कर्त्ता इत्यादौ मात्रिक एव प्राप्तः। तरितेत्यादौ द्विमात्रस्य तु द्विमात्र एङेव प्राप्तः। तथा च अणनणोः प्रसंगाभावेन नियमाप्रवृत्तौ दीर्घेष्वेङेव स्यात्। ह्रस्वेषु त्वकारो भवन्नपि रपरो न स्यात्। यो हि प्रथमवाक्येनाणेवेति नियम्यते। तस्यैव द्वितीयेन रपरत्वं विधीयते। तथा च गुणे दोषोस्त्येवेति चेत्। चजोः कुघिण्ण्यतोरित्यादौ सावकाशायाः स्थानेन्तरतमपरिभाषाया वृद्धिविधौ चरितार्थयाप्युरण्रपर इत्यनया गुणप्रसङ्गे रपरत्वेन बाध्यत्वात्। तस्माद् द्वितीयपक्षे गुणवृद्ध्योर्न कश्चिद्दोष इति स्थितम्। उदात्तादिषु दोषस्तु स्यादेव। तथा प्रतिपदोक्तेष्वित्त्वादिष्वपि। तृतीये तूदात्तादिषु न दोषः। *तत्तद्विधिभिरन्तरतमपरिभाषासंस्कृतैर्ऋवर्णस्यैव विधानात्*। किरतीत्यादावपि न दोषः। गुणवृद्ध्योस्तु दोष एव। तथाहि। आन्तर्यतो मात्रिकस्य मात्रिके गुणे रपरत्वे च कर्त्तेत्यादि यद्यपि सिद्ध्यति तथापि तरितेत्यादावेङेव स्यात्तथा अविशेषाद् वृद्धित्रयेपि प्रवृत्ते अकारस्याण्त्वाद्रपरत्वे कृते कारकस्तारक इत्यादि यद्यपि सिद्ध्यति तथापि कायकस्तावक इत्याद्यनिष्टमप्यापद्यते। यत्तु पूर्वसूत्रे भाष्यकारैरिमं पक्षमाश्रित्य समाहितमनान्तर्यमेवैतयोरान्तर्यमिति। यच्च तत्रैव वार्त्तिककारैरुक्तं संप्रयोगो वा नष्टाश्वदग्धरथवदिति। तदुभयमपि पाक्षिकं बोध्यम्। तथाहि। यदा ऋत्वजात्यवच्छि-

स्य कोन्तरतम इति परीक्ष्यते अत्वजात्यवच्छिन्नश्च कस्येति। तदाऽनुरूपप्रतिसंबन्धिराहित्येनैव धर्मेणैतयोरान्तर्यम्। न ह्यान्तर्यं चतुर्द्धेति मुनित्रयोक्तिरस्ति प्रत्युत सोष्मणः सोष्माण इति भाष्याद् वृत्तेश्चानियम एव लभ्यते। एवं च नष्टाश्वदग्धरथन्यायोपि जात्यवच्छेदेन परीक्षायामेव। व्यक्तिपुरस्कारेण परीक्षायां तूक्तरीत्या दुष्टोयं पक्षः। तथा चात्र सूत्रे वार्त्तिकम्। य उस्थाने ऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णाप्रतिपत्तिरिति। किञ्चास्मिन्पक्षे क रेफपरत्वं क वा लकारपरत्वमिति व्यवस्थापि दुरुपपादा स्यात्। स्वतन्त्रः कर्त्तेति निर्देशान्न विनिमयो ग्रोयङ्यावीविभाषेत्यारम्भाच्च न विकल्प इति समर्थनेपि प्रतिपत्तिगौरवं स्यादेव। रेफस्य पूर्वान्ततां साधयितुमाद्यन्ताविति सूत्रात्समासैकदेशभूतमन्तग्रहणमनुवर्त्य तस्य रपर इत्यन्यपदार्थविशेषणीभूतेन रेफान्वयश्च वाच्य इति महान्क्लेशः। चतुर्थपक्षे तु नैतदुपयुज्यतइति वक्ष्यामः। तस्मान्निर्दोषत्वाच्चतुर्थपक्ष एवाश्रितः। स चेत्थमुपपादनीयः। स्थानेशब्दद्वयमिहानुवर्त्तते तत्रैकमुः स्थाने यो ऽणित्यनुवादेपि स्थानसम्बन्धलाभाय। द्वितीयं तु प्रसङ्गावस्थायामेव रपरो भवतीति कालविधानार्थम्। स्थानेन्तरतमसूत्रे स्थानशब्दस्य तालवादिपरत्वेपि शब्दाधिकाराश्रयणादिह प्रसङ्गपरत्वं बोध्यम्। एवं च गुणवृद्ध्योः प्राप्तयवस्थायामेवाणो रपराः सम्पन्ना इति प्रमाणतोन्तरतमावैङावैचौ बाधित्वा स्थानतोन्तरतमोणेव भवतीति न कश्चिद्दोषः। एव मुदात्तादिविधिष्वप्यन्तरतमत्वाद्हकारो भवति न तु अर् इर् इत्यवधेयम्। न चैवं कर्त्तेत्यादावनेकाल्त्वात्सर्वादेशप्रसङ्गः। आनुपूर्व्येण सिद्धत्वात्। तथाहि। ऋस्थानित्वमुपजीव्य प्रवृत्तं रपरत्वं सर्वादेशतां नापादयति।

उपजीव्यविरोधात् । तथा च पूर्वसूत्रे वार्त्तिकम् । सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात् । न वानेकाल्त्वस्य तदाश्रयत्वाद्वर्णादेशस्याविघात इति । अण्ग्रहणं किम् । रीङ्रिङादीनां रपरत्वं मा भूत्। मात्रीयाते। क्रियते। तथा ढकि लोपोपि रपरः स्यात्। एवे च सूत्रवैयर्थ्यापत्तौ सामर्थ्यादनेनालोन्त्यविधिं बाधित्वा सर्वादेशः स्यात् । तथा होतापोतारावित्यत्रानङोपि रपरत्वे संयोगान्तलोपे च कृते तस्यासिद्धत्वान्नलोपो न स्यादिति दिक्। अथ यो रिङादिष्वण् स रपरः कुतो नेति चेत् । अनादेशत्वात् । आदेशत्वं हि समुदाये विश्रान्तम् । न चैवं कृष्णार्द्धिरित्यादौ रपरत्वं न स्यात्पूर्वपरसमुदायस्य स्थानित्वादिति वाच्यम् । पूर्वपरयोरिति द्विवचननिर्देशेन सहितयोरवयवयोरेव स्थानित्वावगमात् । अत एव द्वयोः स्थानिनोर्भिन्नादिषु नत्ववद् द्वावादेशौ मा भूतामिति तत्रैकग्रहणं कृतम् । तस्मादकारस्यापि स्थानित्वमस्त्येव । तदुक्तम् । यो ह्युभयोः स्थाने भवति लभते ऽसावन्यतरतो व्यपदेशमिति । तस्मादेकादेशेपि रपरत्वं भवतीति स्थितम् । स्यादेतत् । उक्तरीत्या ऋत उदित्युकारादेशस्यापि रपरत्वं स्यात् । तथा च विभक्तिसकारस्य रुत्वे कृते पूर्वस्य रोरीति लोपे दूलोपइति दीर्घेण मातूः पितूरिति प्राप्नोतीति चेत् । मैवम् । रुत्वस्यासिद्धत्वेन रात्सस्येति सकारलोपे रेफस्य विसर्गेण रूपसिद्धेः । नन्वेवं मातुःकार्यमित्यत्र षत्वं स्यात् । इदुदुपधस्य चाप्रत्ययस्येति सूत्रात् । न चायं प्रत्ययविसर्जनीय एवेति वाच्यम् । अकारस्य प्रत्ययावयवत्वेप्यप्रत्ययतया तदादेशस्य सुतरामतथात्वादिति चेत् । उच्यते । ऋत उदित्येकादेशस्य परादिग्रहणेन ग्रहणादस्ति तावत्सान्तस्य प्रत्ययसंज्ञा सकारे लुप्ते त्ववशिष्टस्यैव प्रत्ययसंज्ञा । एकदेशवि-

कृतस्योपसंख्यानात्। स्थानिवदादेश इत्यत्रादेशग्रहणाद्वा। अत एव यङो यकारे लुप्ते अकारस्य प्रत्ययसंज्ञेत्युक्तम्। तथा चाप्रत्ययस्येति षत्वनिषेधः सिद्धः। न चैवं प्रत्ययावयवस्थानिकत्वेपि प्रत्ययस्थानिकत्वाभावात् षत्वं स्यादेवेति वाच्यम्। अप्रत्ययस्येत्यनुवादे परिभाषानुपस्थानेन स्थानेयोगस्य दुर्लभत्वात्। अवयवावयविभावस्य षष्ठ्यर्थत्वसम्भवात्। नन्वप्रत्ययस्येति पर्युदासः तथा च पूर्वान्तत्वेनैकादेशग्रहणात्षत्वं स्यादेव। किञ्च प्रसज्यप्रतिषेधपक्षेपि सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्। अप्रत्ययो यो विसर्गस्तस्य षत्वं स्यादिति वाक्यार्थः। तथा चाग्निः करोतीत्यादौ स्थानिवद्भावेन विसर्गस्य प्रत्ययत्वान्मा भूत् षत्वम्। मातुःकार्यमित्यादौ तु स्यादेवेति चेत्। इहेदं तत्त्वम्। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठो ज्ञापकएकादेशशास्त्रेण निर्वृत्तात्परस्य षत्वं न स्यादिति। यद्वा प्रसज्यप्रतिषेधवैयधिकरण्यान्वयावेव ज्ञाप्येते। यत्तु भाष्यं लुप्यते प्रत्ययो रात्सस्येति। यच्च कैयटकृतं तद्व्याख्यानम्। उत्वे कृते ऽवशिष्टः सकार एव प्रत्ययसंज्ञः स च लुप्त इति। तदुभयमपि चिन्त्यम्। इह सिद्धं तु प्रसंगे रपरत्वादिति पक्षे यद्यप्यरारादिरूपेण विधानादभक्तत्वादिशङ्कैव नास्ति तथापि संप्रयोगो वेति पूर्वसूत्रोक्तरीत्या तृतीयपक्षमाश्रित्य भाष्ये पक्षत्रयं चिन्तितम्। तत्राभक्तत्वपक्षे परादित्वपक्षे च वत्रे इत्यादावुरदत्वे रपरत्वे च कृते हलादिशेषेण रेफो न निवर्त्तेत। अभ्यासावयवस्यानादेर्हल एव तेन निवर्त्तनात्। तस्मादन्तग्रहणमनुवर्त्य पूर्वान्तपक्ष एवेह स्थापित इति संक्षेपः॥

अलोन्त्यस्य॥ स्थानषष्ठीनिर्दिष्टस्य यदुच्यते तत्तदन्त्यस्यालः स्थाने बोध्यम्। त्यदादीनामः। सः। यः। स्थानष-

ष्ठीति किम्। आर्द्धधातुकस्येट्, तृच ऋकारात्पूर्वो मा भूत्। इदं च षष्ठीस्थानेयोगेति सूत्रस्यानुवृत्तेर्लभ्यते। अल इति किम्। पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानड्डुद्भ्यामित्यादावन्त्यस्य पदस्य मा भूत्। एतेनाल इति जसन्तमाश्रित्यालात्मका आदेशा अन्त्यस्य स्युरिति व्याचक्षाणाः परास्ताः। अन्त्यस्य पदस्यापि प्रसङ्गात्। किं चैवं लाघवार्थमलन्त्यस्येत्येव सूत्रयेत्। अपि चारुर्मनश्चक्षुश्चेतोरहोरजसां लोपः पादशतस्य संख्यादेरिति लोपो ढकि लोपश्च सर्वादेशः स्यात्। ततश्च विरजीकरोतीत्यादि न सिध्येत्। यत्तु अल इति जसन्तमिति पक्षे अनेकाल्शित्सर्वस्येति सूत्रे अनेकाल्ग्रहणं न कर्त्तव्यमिति लाघवोपवर्णनं, तदपि न। षष्ठीति पक्षेपि ङिच्चेत्यत्र ङिदेवानेकाल् अन्त्यस्य स्यात्। न तु अङिदपीति नियमाश्रयणेनानेकाल्ग्रहणप्रत्याख्यानसम्भवात्। वस्तुतस्तु पक्षद्वयेप्यनेकाल्ग्रहणं कर्त्तव्यमेव। अन्यथा ऽतो भिस ऐसित्यादिपञ्चमीनिर्देशेष्वनेकालप्यादेशः परस्यादेः स्यात्सत्यनेकाल्ग्रहणे परत्वात्सर्वादेशः। अत एव तस्मादित्युत्तरस्यादेरिति न सूत्रितम्। तथाहि। अलोंत्यस्येत्यस्य द्वावपवादौ। आदेः परस्य, अनेकाल्शित्सर्वस्येति। तत्र प्रथमस्यावकाशः। ईदासः, बहोर्लोप इति। आसीनः, भूयान्। द्वितीयस्यावकाशः। अस्तेर्भूरित्यादि। अतो भिस इत्यादेः परत्वात्सर्वादेशत्वे सिद्धं रामैरित्यादि। न चादेः परस्येत्यत्राल इति जसन्तमनुवर्त्य रामैरित्यादि साधनीयमिति वाच्यम्। तथा सति भूयान् भूमेत्याद्यसिद्ध्यापत्तेः। तदेवं कार्यस्यान्त्येल्यनुसंहारो व्याख्यातः। ङिच्चेत्याद्यग्रिमसन्दर्भानुगुणत्वात्। यद्वा। षष्ठ्या एवायमनुसंहारः। या स्थानेयोगा षष्ठी सान्त्यस्यालो बोध्ये-

ति । अत्र पक्षे ङिच्चेत्यस्यायमर्थः यत्र ङिदादेशो विधीयते तत्र या षष्ठी सा अन्त्यस्याल इति । एवमग्रेपि ॥

ङिच्च ॥ ङिदनेकाल्प्यन्त्यस्य स्यात् । दध्ना । दध्ने । अनन्यार्थङित्वेष्वनङादिषु चरितार्थमिदं तातङि परेणानेकाल्शित्सर्वस्येत्यनेन बाध्यते । ननूत्सर्गापवादयोरयुक्तो विप्रतिषेध इति चेत् । सत्यम् । सर्वादेशेपि तातङि गुणवृद्धिप्रतिषेधरूपं प्रयोजनं सम्भाव्यते । तावता च किञ्चिद्विलम्बेन प्रवृत्तोयमपवादोप्यस्मिन्विषये उत्सर्गेण समकक्षतामापन्न इति युक्तो विप्रतिषेधः । यद्वा । एरुरित्यस्यानन्तरन्तिह्योस्तादिति वक्तव्ये ङित्करणं गुणवृद्धिप्रतिषेधार्थमेवेति विप्रतिषेधोपपत्तिः । अस्तु वा विनापि विप्रतिषेधं सर्वादेशः । प्रदर्शितस्य गुणवृद्धिप्रतिषेधार्थत्वस्य सर्वादेशतामन्तरेणानुपपत्तेः ॥

आदेः परस्य ॥ परस्य यद्विधीयते तदादेरलो बोध्यम् । ईदासः । अत्र तस्मादित्युत्तरस्येत्युपतिष्ठते । तेनादेरीकारः । आसीनः ॥

अनेकाल् शित्सर्वस्य ॥ अनेकाल् आदेशः शिच्च सर्वस्य स्यात् । अस्तेर्भूः । भविता । इदम इश् । इतः । ङिच्चेति नियमात्सिद्धे ऽनेकाल्ग्रहणमपवादविप्रतिषेधार्थमित्युक्तम् । यत्तु वृत्तिकारैर्जश्शसोः शिरिति शित उदाहरणं दत्तम् । तच्चिन्त्यम् । सर्वादेशतां विना तत्र शित्त्वस्यैवालाभात् । सर्वादेशतायाश्चानुपूर्व्यादनेकाल्त्वेनैव णल्डादेशादिष्विव सिद्धत्वात् । तथाहि । णल्डाशिप्रभृतयो यदा सर्वादेशास्तदा प्रत्ययसंज्ञाः । ततः प्रत्ययादित्वप्रयुक्ता इत्संज्ञा । ततो लोपः । तत एकाल्त्वे सत्यपि न सर्वादेशत्वक्षतिः । उपजीव्यविरोधापत्तेः । अत एव हि कर्तेत्यादौ न सर्वादेशतेत्युक्तम् । शकारेणानुबन्धेन इश्प्र-

भृतीनामनेकाल्त्वादेव सिद्धे शिद्ग्रहणं नानुबन्धकृतमनेकाल्त्वमिति ज्ञापनार्थम्। तेन दिवउत् अर्वणस्त्रसावित्यादेर्न सर्वादेशतेति बोध्यम्। ननु कथं ज्ञापकता घ्वसोरेद्धावभ्यासलोपश्चेत्येतदर्थतया शिद्ग्रहणस्य चरितार्थत्वात्। तत्र हि लोपश् इति छिद्यते संज्ञायां च कृतं शित्त्वं तत्रानुपयुक्तं सत्संज्ञिनि फलति, ङमुटष्टित्त्ववदिति सिद्धान्त इति चेत्। सत्यम्। अनेकान्ता अनुबन्धा इति पक्षे नानुबन्धकृतमनेकाल्त्वमित्यस्य प्रयोजनाभावात्तदभिप्रायको लोपशितिच्छेद इति सिद्धान्तः। एकान्ता इति पक्षे तूक्तरीत्या ज्ञापकमावश्यकम्। घ्वसोरित्यत्र तु लोप इत्येव छेदः। लोपोयीति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशः। वार्त्तिकमते तु नानर्थकेलोन्त्यविधिरित्येव सिद्धम्। न चानभ्यासविकारेष्विति पर्युदासस्यायं विषयः। लोपस्य विकारत्वाभावात्। रूपान्तरापत्तिर्हि विकारः। यथा भृञ्जामित् आर्त्तिपत्योश्चेत्यादिः। अत एव पस्पशायां लोपो विकारात्पृथगुपात्तः लोपागमवर्णविकारज्ञो हि वेदं परिपालयिष्यतीति। उक्तं च पृषोदरादीनीति सूत्रे कैयटेन। द्वौ चापरौ वर्णविकारनाशाविति। वस्तुतस्तूपदेशावस्थायामेवान्तरङ्गनयेत्संज्ञा। अत एवोच्चरितप्रध्वंसिनोनुबन्धाः स्मर्यमाणाः सन्त एव कार्यं निर्वाहयन्तीति सिद्धान्तः। इदं चोत्तरसूत्रे एव कैयटे स्फुटम्। तथा च दिव उत् अर्वणस्त्रित्यादेरेकाल्त्वादेकान्तपक्षेपि न सर्वादेशता प्रसज्यते। एवं च नानुबन्धकृतमनेकाल्त्वमिति ज्ञापनं व्यर्थम्। शिद्ग्रहणं च सुतराम्। इदम इश् इदं किमोरीश्कीतीशीशोस्तु शकारोच्चारणसामर्थ्यात्सर्वादेशतायाः प्राङ् नलोपः। यत्तु कृतेपि सर्वादेशे प्रयोजनाभावाच्छकारस्येत्संज्ञा न स्यादिति हरदत्तेनोक्तम्। तन्न। लोपस्यैव प्रयोजनत्त्वात्।

न चैवमुच्चारणवैयर्थ्यं, सर्वादेशत्वसम्पादनेन कृतार्थत्वादिति दिक्। तस्मादिह सूत्रभाष्यकृतोरभिप्रायश्चिन्त्यः। इह नानेकाल्शिदिति पठित्वा अन्त्यस्यादेरिति चानुवर्त्यानुसंहारद्वयनिषेधे सर्वस्येति शक्यमकर्तुम् ॥

इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे सप्तममान्हिकम् ॥

स्थानिवदादेशोनल्विधौ ॥ आदेशः स्थानिवत्कार्यं लभते प्रवर्त्तयति च। तृतीयान्ताद्भवतिना स्थानिना तुल्यं वर्त्ततइति वाक्यार्थलाभात्। यद्रूपवैकल्यादुपदेशाप्रवृत्तौ सत्यामतिदेशो मृग्यते तच्चेद्रूपं स्थान्यलो ऽसाधारणं न भवेत्। आवधिषीष्ट। अत्र हन्तेर्विधीयमानमात्मनेपदमतिदेशाद्धेरपि भवति। आङोयमहन इत्यत्र हि अल्ग्रहणं श्रीयते। रामायेत्यादौ सुपिचेति दीर्घे कर्त्तव्ये यद्यपि यत्रादौ इत्यलाश्रीयते तथापि न तत्र तद्विरहप्रत्युक्ता सुपिचेत्यस्याप्रवृत्तिः। यादेशस्य यञादित्वात्। सुप्त्ववैकल्यात्तूपदेशस्याप्रवृत्तिः। सुप्त्वञ्चेह यद्यपि ए इत्यस्मिन्नलि वर्त्तते तथापि न तदलो ऽसाधारणम्। भ्यामादौ समुदाये विश्रान्तेः। इदं च कार्यकालपक्षाश्रयेणोक्तम्। यथोद्देशपक्षे तु सुप्संज्ञाया अपि शास्त्रीयत्वात्सैवातिदिश्यते। तत उपदेशेनैव दीर्घ इति न किञ्चित्कष्टम्। एतेनारुदितामरुदितमित्यादाविडागमोपि व्याख्यातः। तत्रापि सार्वधातुकसंज्ञातिदेशसम्भवादिति दिक्। अत्र धात्वङ्गकृत्तद्धिताव्ययसुप्तिङन्तपदादेशाः प्रयोजनमिति वृत्तिकृतः। उदाहरणादिक् चेयम्, न तु परिगणनमिति भ्रमितव्यम्। च्लेः सिजित्यादीनामसङ्ग्रहापत्तेः। क्रमेणोदाहरणानि। अस्तेर्भूः। आर्द्धधातुके विवक्षिते। अत एवाङ्गात्पृथक् धातूपादानम्। धातुत्वाद्धातुप्रत्ययाः। भव्यम्। केन काभ्यां कैः। अङ्गत्वादिनादेशदीर्घैस्भावाः। कृत्। प्रकृत्य। कृत्वा।

ह्रस्वस्य पिति कृतीति तुक्। अद्यतनम्। तद्धितत्वात्तदन्तत्व-प्रयुक्ता प्रातिपदिकसंज्ञा। कदश्वः। स्थानिवद्भावेनाव्ययत्वा-दव्ययपूर्वपदप्रकृतिस्वर इत्याहुः। तच्चिन्त्यम्। स्थानेन्तरतमप-रिभाषया गतार्थत्वाम्। अधोध इति तूदाहरणमाष्टमिक-द्वित्वस्य स्थाने द्विर्वचनरूपत्वात्संभाव्यते किन्तु तत्रापि फलं दुर्व-चम्। तस्मादधोधः काम इत्युदाहार्यम्। अतः कृकमीति प्राप्तस्य स-त्वस्याव्ययत्वात्पर्युदासः। यत्तु वृत्तौ प्रस्तुत्येत्यव्ययादेशोदाहरण-म्। तच्चिन्त्यम्। क्त्वामात्रस्यानव्ययत्वात्। तदन्तविधेः सर्वैकवा-क्यतया सिद्धान्तितत्वात्। न च जहत्स्वार्थायां वृत्तौ क्त्व आ-नर्थक्यात्सर्वे सर्वपदादेशा इत्यभिप्रायेणेदमिति वाच्यम्। ह्र-स्वस्य पिति कृतीति तुगभावापत्तेरिति दिक्। सुप्। रामा-य। तिङ्। अपचताम्। तिङन्तत्वात्पदत्वम्। वः,नः। पदत्वा-द्रुत्वादि। नन्वेवमधोध इत्यस्यापि पदादेशत्वादेव गतार्थते-ति चेत्सत्यम्। गोबलीवर्दन्यायेनाव्ययग्रहणादिति दिक्। इ-हकाभ्यामित्यादावादेशः कार्यं लभते केन कैरित्यादौ तु परस्य प्रवर्तयतीति विवेकः। ननु वत्करणं मास्तु, स्थान्यादेश इत्ये-तावताप्यसंयोगाल्लिट्किदित्यादाविव वत्यर्थलाभात्। यदाहुः। परत्र परशब्दः प्रयुज्यमानो विनापि वार्तं वत्यर्थं गमयतीति। न च स्थानी आदेशं प्रतिपद्यतइत्येव वाक्यार्थः किं न स्या-दिति वाच्यम्। तत्तदादेशविधायकैरेव गतार्थत्वात्। न चादे-शः स्थानिरूपमापद्यते। वचनद्वयप्रामाण्याच्च विकल्प इति वा-च्यम्। वा लिटीत्यारम्भात्। न च चक्षिङः ख्याञ् आदेशः स्थानीति वचनद्वयप्रामाण्यात्सर्वत्र विकल्पापत्तौ लिट्येवेति नि-यमार्थं तत्स्यादिति वाच्यम्। एवमपि विभाषा लुङ्लृङोरित्या-द्यप्राप्तविभाषासु वाग्रहणवैफल्यापत्तेः। अस्तिभूभ्यां रूपद्वयसि-

द्धावस्तेर्भूरित्यस्य वैयर्थ्यापत्तेश्च । अत्राहुः । वत्करणाभावे स्थानी आदेशस्य संज्ञा स्यात् । प्रायेण ह्यस्मिन्पादे संज्ञासूत्राण्येवारभ्यन्ते । ततश्चाङोयमहन इत्यात्मनेपदं वधेरेव स्यान्न तु हन्तेः । न च स्वंरूपमिति हन्तेरपि ग्रहणम् । अशब्दसंज्ञेति निषेधात् । न च स्थानिनः संज्ञात्वे सिद्धं धर्मिणमित्यादिन्यायबाधः । अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोग इति पक्षे संज्ञाया एवोद्देश्यकोटिनिवेशात्।न चैवमाङो वधियम इत्येव ब्रूयादितिवाच्यम् । वध हिंसायामिति भौवादिकस्यापि ग्रहणापत्तेः । न चैवमाङो वधयम इति पठ्यताम् । अकारस्य विवक्षितत्वाच्च न भौवादिकेतिप्रसंग इति वाच्यम् । सकलहन्त्यादेशसंग्रहार्थमाङो यमहन इत्यस्यैव वाच्यत्वात् । तथा चावधिष्टवदाजघ्ने इत्यत्रापि आत्मनेपदं सिद्धम् । तथाहि । हन्तेर्लिटि लसामान्यापेक्षत्वादन्तरङ्गत्वात्तिबादिषु कृतेषु परत्वान्नित्यत्वाभ्यां शेषात्कर्त्तरीति बाधित्वा लिटि धातोरिति द्विःप्रयोगे ऽभ्यासस्य चुत्वे ऽभ्यासात्परस्य घत्वे एकदेशविकारासम्भवेन समुदायस्य समुदायादेशत्वाद्धन्त्यादेशत्वं ततो वधिना सह तुल्ययोगक्षेमतैवेति दिक् । अस्तु वा स्थानिन आदेशः संज्ञा । तथाप्यनिष्टं तुल्यमेव । तथाहि । अस्यतिवक्तीत्यत्र ख्यातिपदेन चक्षिङेव गृह्येत । कृत्रिमत्वात् । तथा च समचक्षिष्टेत्यत्राङ् स्यात् आख्यतेत्यत्र च न स्यात् । न चैवं चक्षिङ इत्येव ब्रूयात् । अनुबंधानिर्देशेनापि यङ्लुग्वारणसम्भवादिति वाच्यम् । एवमपि गाङ्कुटादिसूत्रे गाङा इङ्गाङोर्ग्रहणापत्तेः । इङित्यवचनसामर्थ्याद् ह्युभयगतिः स्यात् । गमेरिट् परस्मैपदेष्वित्यत्र त्विणिङ्किमेव ग्रहणं स्यात् । तस्मात्कर्त्तव्यमेव वत्करणम् । नन्वेवं वत्करणाभावाधीनलाघवानुरोधात्संज्ञाप्रकरणादन्यत्रैव स्थानिवद्भावप्रकरणं

क्रियतामिति चेन्न। तथा सत्यादेशग्रहणं विना वाक्यार्थानिर्वाहे बहुगौरवापत्तेः। सिद्धान्ते त्वादेशग्रहणमातिरिच्यमानमानुमानिकसंग्रहार्थं भवतीति तद्बलेनैकदेशविकृतस्योपसंख्यानमिति वार्त्तिकं प्रत्याख्यास्यते। अपि च काममतिदिश्यतां वेति वक्ष्यमाणमपि वत्करणायत्तमिति दिक्। स्यादेतत्। यदि संज्ञाप्रकरणे वत्करणं विना अतिदेशालाभस्तर्हि कित् ङित् इत्यादौ का गतिरिति चेत्। उच्यते। किदिति न संज्ञा। न क्त्वा सेडिति ज्ञापकात्। नहि क्त्वः कित्संज्ञा प्राप्ता या निषिध्येत। ननु मृडमृदेति प्राप्ता सा निषिध्यताम्। वचनद्वयसार्थक्याय च विकल्पोऽस्त्विति चेन्न। मृडमृदेत्यत्रैव वाग्रहणस्य सम्भवात्। किञ्चैवं निष्ठाशीङित्यादि व्यर्थं स्यात्। न हि शीङादिभ्यो निष्ठायाः केन चित्संज्ञा प्राप्ता। एवं ङिदित्यतिदेशः, कित्साहचर्यात्। किं च ङिदित्यस्य संज्ञात्वे ग्रहिज्यादिसूत्रे ऽस्यैव ग्रहणं स्यात् कृत्रिमत्वात्। तथा च नवश इति सूत्रं व्यर्थं स्यात्। बावश्यतइत्यत्र संप्रसारणाप्राप्तेः। किं च ङ्किति चेत्यत्रास्याग्रहणं स्यात् संज्ञास्वरूपानुच्चारणात्। तथा च गाङ्कुटादीत्यत्र कुटादिग्रहणं व्यर्थं स्यात्। बहुगणेत्यत्र तु संख्येत्यतिदेशः। अन्यथा टिघुभादिवदेकाक्षराया एव संज्ञायाः कर्त्तव्यतापत्तेः। किकिनौ लिट्चेत्यादि तु न संज्ञाप्रकरणं तेन लिड्वदित्यतिदेशो निर्बाध इति दिक्। अथादेशग्रहणं किमर्थम्। स्थानिवादित्येतावतैव संबन्धिशब्दमहिम्ना तल्लाभात्। यथा पितृवदधीते इत्युक्ते पुत्र इति गम्यते इति चेत्। सत्यम्। द्विविध आदेशः। अस्तेर्भूरित्यादिः प्रत्यक्षः। तेस्तुरित्यादिस्त्वानुमानिकः। तत्र हीकारेणेकारान्तः स्थान्यनुमीयते। उकारेण चोकारान्त आदेशः। तथा च तेस्तुरिति फलितार्थः। तत्रासत्यादेशग्रहणे

प्रत्यक्षस्यैव ग्रहणं स्यान्नानुमानिकस्य। आदेशग्रहणसामर्थ्यात्तूभयपरिग्रहः। तेन पचात्वित्यादेस्तिङन्तत्वात्पदसंज्ञा सिद्ध्यति। नन्वेरुरित्यादि यथाश्रुतमस्तु। एकदेशविकृतस्यानन्यत्वाच्च पदत्वं भविष्यतीति चेन्न। अर्थवत्येव स्थान्यादेशभावविश्रान्तेर्वाच्यत्वात्तस्यैव प्रसङ्गसम्भवात्। तथाहि। षष्ठीस्थानेयोगेत्युक्तम्। स्थानं च प्रसङ्गः। स चार्थवतः। अर्थप्रत्यायनार्थं शब्दप्रयोगात्। यद्यपि च्लेः सिजादावसम्भवीदम्। तथापि सति सम्भवे ऽर्थप्रयुक्तप्रसङ्ग एव ग्राह्य इत्यादेशग्रहणेनैव ज्ञाप्यते। उक्तञ्च। सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते॥ पदमिहार्थवत्। पद्यते ऽनेनेति व्युत्पत्तेः। यद्यपि सर्वविकारे सुतरां नित्यत्वानुपपत्तिः। तथापीह विकार एव नास्तीति तात्पर्यम्। तथा च वार्त्तिकम्। कार्यविपरिणामाद्वेति। कार्यमिह ज्ञानं योग्यताबलात्। तथा च ज्ञाननिष्ठमुत्पादविनाशादिकं विषये आरोप्यते इति भावः। नन्वेवं बुद्धिविपरिणाममात्रस्य स्थान्यादेशभावत्वे ऽपवादेष्युत्सर्गकृतं स्यात्। तथाहि। कप्रत्ययान्तादप्यण्णन्तत्वप्रयुक्तो ङीप् स्यात्। अत्राह वार्त्तिककारः। सिद्धन्तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनादिति। षष्ठीस्थानेयोगेत्यनुवृत्तेरिति भावः। न चापवादः षष्ठीनिर्दिष्टस्य स्थाने विधीयते। नाभिनभश्चेत्यादौ तु षष्ठ्याः स्थाने प्रथमा बोध्या। विश्रवणरवणेत्यादीनि तु शब्दान्तराणि प्रत्ययविषयाणि बोध्यानि॥ विश्रवःशब्दात्तु प्रत्ययो न भवति। अनभिधानादिति भावः। तथा च विदूराञ्य इति सूत्रे भाष्यम्। बालवायो विदूरं च प्रकृत्यन्तरमेव वा। न वै तत्रेति च ब्रूयाज्जित्वरीवदुपाचरेदिति। अस्मिन्पक्षे षष्ठीनिर्दिष्टस्य स्थाने आदेशा विधीयन्तइति वृद्धिसूत्रस्थं भाष्यं

यथाश्रुतमेवेति निर्बाधम् । यत्तु स्थान्यर्थाभिधानसमर्थस्यैवादेशते-त्येवंपरतया कैयटेन भङ्क्त्वा व्याख्यातम् । तदत्रत्यपक्षान्तराभि-प्रायेणेत्यवधेयम् । अथ वा श्यनः शित्करणं ज्ञापकम् । अपवादे उत्सर्गकृतं नेति । न च पित्त्वनिवृत्त्यर्थं तदिति वाच्यम् । नित्त्वादेव तत्सिद्धेः । नित्त्वं ह्याद्युदात्तार्थम् । श्यनः पित्त्वे तु पित्त्वादनुदात्तत्वे लसार्वधातुकानुदात्तत्वे च धातुस्वरेणैव सिद्धौ किं नित्त्वेन । न चानेकाक्षु विशेषः । दिवादौ तदभावात् । वावृत्तुवर्त्तनइत्यस्तीति चेन्न । वाशब्दस्य विकल्पार्थत्वात् । न च भ्वादिपाठेन सिद्धेस्तद्वैयर्थ्यम् । भ्वादिपाठस्य वृद्ध्यः स्यसनोरित्याद्यन्तर्गणकार्ये उपक्षीणत्वात् । नन्वेवं ततो वा-वृत्यमाना सा रामशाला न्यवीक्षतेति भट्टिप्रयोगानुपपत्तिरिति चेन्न । तत्र वाशब्दस्येवार्थतया कामयमानेव न तु तथा । किं तु छलनार्थमागतेत्यर्थात् । अत्र कैयटः । ताच्छील्या-दिविषये चानशि श्यनो नित्त्वं प्रकृतेराद्युदात्तार्थं स्यादिति । त-त्र हि लसार्वधातुकाभावादनुदात्तप्राप्त्या चित इत्यन्तोदात्तत्व-मेव प्राप्तमिष्टं च । तत्रानिष्टार्थमेव नित्त्वं किन्न स्यादिति तस्याश-यः । न त्वेतद्युक्तम् । अन्यत्र विकरणेभ्य इति पर्युदासाच्छ्य-न्स्वरस्य दुर्बलत्वात् । न च नित्त्वसामर्थ्यात्तद्बाधः । लसार्वधा-तुके चरितार्थत्वात् । तत्र स्थानिवद्भावलब्धेन पित्त्वेन गतार्थते-ति चेन्न । इह नित्त्वेनातिदेशपर्युदासयोरन्यतरस्मिन्नवश्यबाध्ये ऽतिदेशबाधस्यैव न्याय्यत्वात् । पूर्वान्बाधन्ते नोत्तरानिति न्या-याच्च । यत्तु कैश्चिच्चानश्नन्तस्याद्युदात्तत्वमिष्टमित्येवंपरतया कै-यटग्रन्थं व्याख्याय विकरणेभ्योन्यत्रेति पर्युदासस्तु यत्र विकरणः स्वरभाक् तद्विषयः। इह तु विकरणान्तमेव स्वरभाक्सौवर्यःसप्तम्य-स्तदन्तसप्तम्य इति सिद्धान्तादित्युक्तम् । तदेतन्निर्मूलम् । घुसंज्ञासू-

त्रशेषस्येन खश्सूत्रस्थेन च भाष्येण विरुद्धं चेत्युपेक्ष्यम्। किञ्चातोनुपसर्गे क इति कापवादस्य गापोष्टगिति टकः कित्करणं ज्ञापकम् । नापवादे उत्सर्गकृतं भवतीति । अनल्विधाविति किम् । तेन तस्मात्तस्य तस्मिंश्च विधौ मा भूत् । तत्राला विधौ यथा । व्यूढोरस्केन । अत्र सोपदादाविति विसर्जनीयस्य स्थाने विहितस्य सकारस्य स्थानिवत्वाद्विसर्जनीयस्य अट्सूपदेशादड्व्यवायइति णत्वं प्राप्तम् । अलः परस्य विधौ यथा । द्यौः । पन्थाः । सः । अत्र हल्ङ्यादिलोपो न भवति । अलो विधौ यथा । दिव उत् । द्युकामः । लोपो व्योर्वलीति लोपो न भवति । उत्त्वविधानन्त्वहार्वैमलघु इत्यादौ चरितार्थम् । आलि विधौ यथा । यजेक्तः, इष्टः। क इष्टइत्यत्र सम्प्रसारणस्य स्थानिवत्वात्कोयष्टृत्यादाविव हशिचेत्युत्त्वं न भवति । स इष्ट इत्यत्र एतत्तदोः सुलोपो न भवति । अनल इत्युक्तेपि सम्बन्धसामान्ये षष्ठ्या प्रागुक्तानेकविभक्त्यर्थसङ्ग्रहो यद्यपि सम्भवति तथापि विधिशब्दोपादानमप्राधान्येनाप्यल आश्रयणे निषेधार्थम् । तेन प्रपठ्येत्यादि सिद्धम् । अत्र हि वलादेरित्यप्राधान्येनालाश्रितः न तु प्राधान्येन। स्यादेतत् । स्थान्यनुबन्धकार्याण्यपि तर्हि निषिध्येरन् । तथा च प्रदीव्येत्यत्र स्थानिवद्भावेन कित्वं न लभ्येतेति चेत् । न । अनेकान्ता अनुबन्धा इति पक्षे अनुबन्धानां स्थान्यलत्वाभावात् । एकान्तपक्षेप्यन्तरङ्गेण लोपेनादेशसम्बन्धात्प्रागेवानुबन्धानामपहारात् । न ल्यपीति लिङ्गाच्च । यत्तु सेर्ह्यपिच्चेति ज्ञापकमुच्यते । तत्पाक्षिकम् । अपिद्वचनसामर्थ्यात्स्थानेन्तरतमपरिभाषया प्राप्तमनुदात्तत्वं न भवतीत्यस्यापि सुवचत्त्वात् । यद्यपि सामान्यातिदेशे विशेषानतिदेश इति सिद्धान्तः । उपस्थितसामान्यप्रयुक्तधर्मैस्तदाक्षिप्तव्यापकसामान्य-

धर्मैश्च विध्याकांक्षापूरणे सत्त्यनुपस्थितस्य विशेषस्य ग्रहणे प्रमाणाभावात्। अत एव ब्राह्मणवदस्मिन् क्षत्रिये वार्त्तितव्यमित्युक्ते माठरादिविशेषकार्यं नातिदिश्यते। अत एव चाशंसायां भूतवच्चेत्यत्र भूतसामान्ये विहितयोर्लुङ्निष्ठयोरेवातिदेशो न तु भूताविशेषे विहितयोर्लङ्लिटोरपीति सिद्धान्तः। तथापीह सूत्रे नल्यपीति लिङ्गाद्विशेषोप्यतिदिश्यते। किति परतो विहितमित्त्वं निषेद्धुं हि नल्यपीत्यारभ्यते। कित्त्वञ्च त्क्वाविशेषधर्मः। सेट्के तदभावात्। तेन मदीव्येत्यादि सिद्धम्। तस्मान्नल्यपीत्येव सूत्रं विशेषातिदेशेऽनुबन्धकार्यातिदेशे चेत्युभयत्रापि ज्ञापकमिति स्थितम्। यत्तु प्राञ्चः। अनल्विधाविति निषेधो विशेषातिदेशज्ञापक इति। तच्चिन्त्यम्। व्यूढोरस्केन क इष्ट इत्यादौ विसर्गत्वस्य यण्त्वस्य च व्यापकीभूतयोरद्त्वहश्त्वयोर्निषेधेन चरितार्थत्वात्। यदापि त्क्वादेशे क्त्वप्रत्ययत्वाद्यतिदेशमभ्युपेत्य कइष्ट इत्यादौ हश्त्वादिविशेषातिदेशो न प्राप्नोतीति मिश्रैरुक्तम्। तत्र विसर्गत्वयण्त्वयोरद्त्वहश्त्वे कथं विशेषधर्मावितिं विपश्चित एव विदाङ्कुर्वन्तु। यद्यपि तत्स्थानापन्नस्तद्धर्मं लभतइति न्यायसिद्धम्। अत एव व्रीहिस्थानापन्नेषु नीवारेषु वचनं विनैव व्रीहिधर्मा अवघातादयः क्रियन्ते। तथापि तेषां प्रकृतापूर्वसाधनत्वप्रयुक्ततया युक्तं नीवारादावनुष्ठानम्। आङो यमहन इति हन्तेरात्मनेपदं तु न हिंसाद्यर्थाभिधानप्रयुक्तं येन वधौ भवेत्। किन्तु स्वंरूपमितिवचनात्स्वरूपविशेषप्रयुक्तम्। अत एवाऽतृणेडित्यादौ न भवति। तस्माद्युक्त एवातिदेशारम्भः। स्यादेतत्। मा भून्न्यायेन गतार्थता। ज्ञापकात्तु भविष्यति। तथाहि। युष्मदस्मदोरनादेशइति सूत्रे ऽनादेशग्रहणं ज्ञापयति, आदेशः स्थानिवत्स्या-

दिति। अदोजग्धिरिति सूत्रे तिकितीत्येव सिद्धे ल्यब्ग्रहणमन-ल्विधाविति मंशं ज्ञापयति। अप्राधान्येनाप्यलाश्रयणे निषेध इत्यंशं च, तथा च किं सूत्रेणेति। उच्यते। उत्तरार्थं तावत्स्थानिवदादेश इति कर्त्तव्यमेव। तस्यैव योगविभागमात्रेणोपपत्तौ सत्यामर्थापत्तिकं वचनं न कल्प्यम्। एवं स्थिते ऽनल्विधाविति यमप्यंशः स्पष्टप्रतिपत्त्यर्थं क्रियते। उत्तरसूत्रे द्वितीयविधिग्रहणस्यानुवृत्त्यर्थं च। तत्प्रयोजनं तु तत्रैव वक्ष्यते। एतदेव च सकलमभिसन्धायोक्तं भगवता। आरभ्यमाणेष्वस्मिन्सूत्रइति। स्यादेतत्। अस्तु सूत्रारम्भः। तथापि कार्यातिदेश एवायमिति कुतः, प्रकारान्तराणामपि सम्भवात्। तथाहि। अतिदेशः षोढा। निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपातिदेशभेदात्। तत्र निमित्तमशक्यमतिदेष्टुम्। ब्राह्मण्यवत्। न हि ब्राह्मणस्याग्रभोजनादौ निमित्तभूतं ब्राह्मण्यं वचनशतेनापि क्षत्रिये ऽतिदेष्टुं शक्यते। पूर्ववत्सन इत्यत्रापि प्रकृतिगतं निमित्तं ङित्त्वादि न सन्नन्ते ऽतिदिश्यते। किं तु प्रकृतिगतमेव तत्सना व्यवधाने सत्यप्यात्मनेपदं प्रवर्त्तयतीत्येतावन्मात्रमतिदिश्यते। एतावतैव च निमित्तातिदेशोयमिति व्यवहारः। न चायं कार्यातिदेश एवास्तामिति वाच्यम्। चिक्रंसते प्रचिक्रंसतइत्यादाविट्प्रसङ्गात्। निमित्तातिदेशपक्षे त्वनुपसर्गः प्रपूर्वश्च क्रमिरेवेह सना व्यवहितोप्यात्मनेपदं प्रवर्त्तितवानिति स्नुक्रमोरनात्मनेपदनिमित्तइति नियमादिण् न भवति। निमित्तं हि तत्र फलोपहितमेव गृह्यते न तु स्वरूपयोग्यतामात्रमिति वक्ष्यामः। सिद्धं त्वात्मनेपदेन समानपदस्थस्येट्प्रतिषेधादिति वार्त्तिकरीत्या त्विहापि कार्यातिदेशता सुवचा न्याय्याचेति तत्रैव वक्ष्यते। व्यपदेशातिदेशस्त्वाद्यन्तवदेकस्मिन्नित्येक-

स्मिन्नप्यादिरन्त इति च व्यपदेशेतिदिष्टे तत्तत्सूत्रैरेव कार्याणीति भावः। तथा च प्राञ्चः। आद्यन्तवद्व्यपदेशो निमित्तं पूर्ववत्सन इति। एतच्च निर्मूलमिति तस्मिन्नेव सूत्रे हरदत्तः। तस्यायं भावः। कार्यातिदेश एव तत्र युक्तः। सर्वातिदेशानां कार्यार्थतया कार्यस्यैव प्राधान्यात्। अत एव कार्यातिदेशाभ्युपगमे यत्र बाधकावतारस्तत्रैव प्रकारान्तरानुसरणम्। न चाद्यन्तवत्सूत्रे तदस्ति। प्रत्युत व्यपदेशातिदेशपक्षे एव बाधकम्। तथाहि। कुरुते कुर्वे इत्यादावन्त्यव्यपदेश आदिव्यपदेशश्चास्तु। तथाप्यन्त्योजादिर्यस्येत्येवंरूपस्य बहुव्रीह्यर्थस्याभावाट्टिसंज्ञाया अभावे टेरेत्वं न स्यात्। कुर्वातइत्यादौ दृष्टस्य टेरेत्वाख्यस्य कार्यस्यातिदेशे तु न कश्चिद्दोष इति। तादात्म्यातिदेशस्तु भिन्नयोरभेदातिदेशः। सुबामन्त्रिते पराङ्गवत्स्वरइति यथा। तेन यत्तो दिवो दुहितर्मर्त्त भोजनमित्यादावामन्त्रितस्य चेत्याद्युदात्तमिकसूत्रेण पदात्परस्यामन्त्रितस्य क्रियमाणो निघातो दिवो दुहितरिति समुदाये प्रवर्त्तते। शास्त्रातिदेशस्तु कर्मवत्कर्मणेत्यत्र पाक्षिको वक्ष्यते। कार्यातिदेशो गोतोणिदित्यादिः। रूपातिदेशस्तु द्विर्वचनेचि तृज्वत्क्रोष्टुरित्यादिः। तदिह कार्यातिदेश एवेत्यत्र किं विनिगमकमिति चेत्। उच्यते। कार्यस्य प्राधान्यात्तदतिदेश एवायम्। अतिदेशान्तरे बाधकसत्वाच्च। तथाहि। निमित्तव्यपदेशातिदेशौ तावत्पाक्षिकावित्युक्तम्। शास्त्रातिदेशोप्येवम्। तादात्म्यातिदेशस्तु द्वयोः सहावस्थितयोः स्यात्। सुबामंत्रितयोरिव। इह तु स्थानी आदेशेन अपहृत इति तदसम्भवः। रूपातिदेशे त्वादेशविधानं व्यर्थं स्यात्। न च वचनद्वयप्रामाण्याद्विकल्पः। विभाषालुङ्लृङोरिति विकल्पारम्भात्। तस्मात्कार्यातिदेश एवायमिति स्थितम्। यत्तु न्यासकारेणोक्तम्।

व्यपदेशातिदेशस्संज्ञापक्षे पर्यवसन्नः। स च वत्करणसामर्थ्यादेव न भविष्यतीति। तत्रेदं वक्तव्यम्। अस्तीह संज्ञापक्षाद्वैषम्यम्। तथाहि। आङोयमहन इत्यादौ वधेरेव ग्रहणं स्यान्न तु हन्तेः। तथा केन कस्मादित्यादावङ्गकार्यादीनि न स्युरिति संज्ञापक्षे दोषद्वयम्। न चेदं व्यपदेशातिदेशेस्ति। स्वंरूपमिति वचनाद्धि हन्तेर्हन्तिरेव संज्ञा। तद्व्यपदेशस्य वधावप्यतिदेशे ह्युभाभ्यामात्मनेपदं लभ्यते। न तु हन्तेरेव। एवं स्थानिनिष्ठानां धात्वङ्गादिव्यपदेशानामादेशेतिदेशाद्धात्वङ्गादिकार्याण्यपि सुलभान्येव। तस्मात्प्राधान्यात्कार्यातिदेशोयमित्येव तत्त्वम्। अत्र वार्तिककाराः। तस्य दोष इत्युपक्रम्य तयादेशे उभयप्रतिषेधः, ङ्याब्ग्रहणे ऽदीर्घः, आहिभुवोरीट्प्रतिषेध इत्यादि पेठुः। तत्रोभयशब्दे यथा नातिप्रसङ्गस्तथा सर्वादिगणव्याख्यावसरे एवोपपादितम्। ङ्याब्ग्रहणेपि ङी ई आ आविति दीर्घप्रश्लेषादतिखट्वेनातिखट्वे इत्यादौ नातिप्रसङ्गः। न चैवमप्यतिखट्वायेत्यत्र दोषतादवस्थ्यम्। उपसर्जनस्त्रीप्रत्यये तदादिनियमसत्वात्। न चैवं प्रश्लेषवर्णनवैयर्थ्यम्। अतिखट्व इत्यादावंगाधिकारविरहेणावयवाट्टाबन्तात्परत्वमाश्रित्य हल्ङ्यादिलोपापत्तेः। न हि तत्र विहितविशेषणाश्रयणं युक्तम्। यः स इत्यादावतिव्याप्तेर्यासेत्यादावव्याप्तेश्चेत्युक्तम्। अत एव सूत्रकारोपि तत्र दीर्घग्रहणं कृतवान्। दीर्घप्रश्लेषस्तु तत्प्रत्याख्यानाय वर्ण्यतइत्यन्यदेतत्। युक्तं चैतत्। वार्तिकमते ऽतिखट्वायेत्यादावंगाधिकारबलेन कथं चिन्निर्वाहेपि जरसे नसे पृते इत्यादावतिप्रसंगस्य दुर्वारत्वात्। सुतामिच्छन्सुतीरित्यादौ सुलोपापत्तेश्चेति दिक्। अस्तु वा आकारान्तरमपि प्रश्लिष्य तत्सामर्थ्यान्मध्ये ह्रस्वतामापन्नस्य परिहार इति दिक्। आहि-

भुवोरिति वार्त्तिकन्त्वित्थं भाष्यकाराः प्रत्याचख्युः। आत्थेत्यत्र आहेः स्थानिवद्भावेन प्राप्तोपि ब्रुव ईप्न भवति। आहस्थ इति ज्ञापकात्। तेन हि झलादौ परे थत्वं विधीयते। न च कृतेपीटि भूतपूर्वगत्या झलादित्वात्थकारोस्त्विति वाच्यम्। एवं हि सत्याथमेव विदध्याल्लाघवात्। तिबादीनां पञ्चानामपि झलादितया णलादीनामपि भूतपूर्वगत्या झलादित्वात्। तस्मादाहस्थ इति ज्ञापकादाहेरिड्विधौ स्थानिवद्भावो नेति स्थितम्। अस्तेर्भूरिति विहितस्य भुवोपि स्थानिवत्वनिषेधो न वक्तव्यः। अस्तिसिचोपृक्तइति द्विसकारकनिर्देशेन सकारान्तादेवास्तेः परस्येड्विधानादिति। स्यादेतत्। अस् स् इति सकारद्वयनिर्देशे धातुत्वाभावात् श्तिबेवानुपपन्नः। पदमध्यप्रविष्टेन सकारेण सिचो विशेषणासम्भवे सिजाश्रयस्य ईटः प्रसङ्गश्च। न चास्तेः सान्तत्वेन विशेषणसामर्थ्यात्सिच्प्रयुक्तोपीण् नेति वाच्यम्। तथापि स्वतन्त्रस्य भवतेरतिप्रसङ्गस्य दुर्वारत्वात्। तथा चार्थभेदाभावेपि स्वतंत्रास्वतंत्राभ्यां भूभ्यां अभूवीत् अभूदीति रूपद्वयापत्तिः। यस्त्वेतद्दोषोपन्यासपूर्वकं माधवाचार्यैरुक्तम्। सिचोल्पाच्कत्त्वाद्धातुविषयत्वेनाभ्यर्हितत्वाच्च पूर्वनिपाते कर्त्तव्ये ऽस्तिसिच इति वचनात्तन्त्रादिना विद्यमानात्सिच इत्यर्थो लभ्यते। अत एव श्तिप्प्रयोगोपि सार्थकः। अन्यथा सिजभ्यामित्येव ब्रूयात्। न चैवमसतावस्यतौ चातिप्रसङ्गः। विकरणव्यवधानेन ताभ्यां परस्यापृक्तसार्वधातुकस्यासम्भवादिति। तच्चिन्त्यम्। एवमपि श्तिप्प्रत्ययासमाधानेन द्विसकारको निर्देश इति भाष्यस्यानिर्वाहात्। एतेन सिच्च अस्च सिच स्। समाहारद्वन्द्वे लुप्तपञ्चमीकं पदम्। अयस्मयादित्वेन भत्वान्न कुत्वजश्त्वे। अस्ति च तत्सिजस् चेति कर्मधारयः। तेन लुप्तात्सिचो भूभावेनापदृतादः

स्तेश्च परस्य नेति कल्पनापि प्रत्युक्ता। उक्तरीत्या रूपसिद्धावपि भाष्यानिर्वाहात्। तस्मादिह भगवतो ऽभिप्रायान्तरमेव वक्तव्यमिति। अत्रोच्यते। अस्तिसिचस् स् इतिच्छेदः। सान्तादस्तेर्न तु कृतभूभावात्। सान्तात्सिचः श्रूयमाणादिति यावत्। तथा च सिच इत्यस्यानन्तरं सकारः प्रश्लिष्यते न तु शितपः प्राक्। येन माधवोक्तः शितप्प्रत्ययानुपपत्तिरूपो दोषः स्यात्। अत एव सिचो ऽपृक्त इति द्विसकारको निर्देश इत्युक्तं भाष्ये। अन्यथा ह्यस्तीति निर्देश इत्येव ब्रूयात्। नन्वेवमस्तिसिचोपृक्तइति संहिता कथं निर्वहतीति चेत्। इत्थम्। संयोगान्तस्य लोप इति द्वितीयः सकारो लुप्यते। ननु लुप्तविभक्तिकं स् इति पदम्। न चैतत्संयोगान्तम्। तथा च संयोगान्तं यत्पदं तस्य विधीयमानो लोपः कथमिह स्यादिति चेन्न। संयोगान्तस्य पदान्तस्य लोपः स्यादिति व्याख्यानात्। संयोगेति हि लुप्तषष्ठीकं पृथक् पदम्। संयोगस्य पदस्येत्युभयं चान्तस्य विशेषणम्। एष एव च सूत्रकृतोप्याशयः। यदि ह्ययं बहुव्रीहिः पदं चान्यपदार्थ इति वृत्तिकारकृतं व्याख्यानं संमतं स्यात्तर्ह्यंतग्रहणं न कुर्यात्। संयोगेन पदविशेषणादेव तदन्तलाभात्। अपि च सरूपसूत्रे पृथक् सर्वेभ्यो विभक्तावेकशेष इति पक्षे वृक्षस्स् इति प्रसज्येतेत्याशंक्य संयोगान्तलोपात्सिद्धमिति भाष्यग्रन्थः प्रकृतव्याख्यानएवानुकूलः। यत्तु तत्र कैयटो वक्ष्यति। वस्तुतस्संयोगान्तस्य लोपाद्धलङ्ग्यादिलोपादिति। तन्तु मूलस्वरसविरुद्धम्। अत्र व्याचक्षतइत्युपक्रमादपरितोषग्रस्तञ्च। अत एव हलन्त्यसूत्रे अन्योन्याश्रयोद्धारार्थमन्त्यलकारस्येत्संज्ञायां णलो लित्वं स्वरार्थं क्रियमाणं ज्ञापकमिति प्रक्रम्य, ननु लकारः श्रवणार्थ एवेत्याशंक्यापृक्तं हलिति हलग्रहणं णलव्यावृत्तये क्रियमाणं णलोपृक्तता

ज्ञापयतीति वक्ष्यति। तस्य ह्ययमाशयः। भेत्तेत्यादौ डादेशो हल्ग्रहणस्य व्यावर्त्यो न संभवति। सुतिसीतिप्रत्ययैः प्रकृतेराक्षेपेण हलन्तायाः प्रकृतेः परेषां स्वादीनां लोपः। न च डादेशं प्रति तासन्ता प्रकृतिरिति। एवं चेहापि वृक्षस् इत्यस्य प्रकृतित्वाभात्कथं हल्ङ्यादिलोपः। आस्तिसिचोपृक्तइति द्विसकारको निर्देश इति प्रकृतग्रन्थोप्युक्तव्याख्यायामनुकूल एव। नन्वस्तूक्तरीत्या संयोगान्तलोपस्तथापि तस्यासिद्धत्वाद्रोरुत्वं दुर्लभमिति चेन्न। संयोगान्तलोपो रोरुत्वे इति वार्त्तिकेनासिद्धत्वनिषेधात्। हरिवो मेदिनं त्वा इत्यादिवत्। सिचोपृक्तइति प्रकृतनिर्देश एव च वार्त्तिकोक्तार्थे ज्ञापको बोध्यः। अथ वा अस्तु वृत्तिकारोक्त एव संयोगान्तस्य लोप इति सूत्रस्यार्थः। अन्तग्रहणन्तु प्रत्येकं संयोगसंज्ञेति पक्षे संयोगावन्तौ यस्येति द्वित्वागतयेस्तु। संयोगसंज्ञासूत्रे भाष्यकैयटयोस्तथैवाभिधानात्। प्रकृते तु मास्तु संयोगान्तलोपः। किन्तु द्वयोः सकारयोः रुत्वे कृते अतो रोरित्यनेन एक एवोकारो भविष्यति विधेयविशेषणस्यैकत्वस्य पक्षेकत्ववद्विवक्षितत्वात्। रोरिति जातिपरानिर्देशेनातः परत्वस्य पूर्वत्वस्य च सम्भवात्। जातिपरत्वे प्रकृतिनिर्देश एव प्रमाणमस्तु। न च परत्वाद्धशि चेति प्रथमस्यैव रोरुः स्यादिति वाच्यम्। रुत्वस्यासिद्धतया हश्परत्वाभावात्। न चाश्रयात्सिद्धत्वमिति वाच्यम्। स्थान्यंशे तथात्वेपि निमित्तीभूतहशंशे तदसम्भवात्। एष एव च द्विसकारकनिर्देशं वदतो भाष्यकारस्याशयः। न तु संयोगान्तलोप इति। अत एव नुदाविदेति सूत्रे शुषः क इत्यादि बहुयोगविच्छिन्नस्य नकारस्य कथमनुवृत्तिरित्याशङ्क्यान्यतरस्यान्नध्याख्येति संहितापाठेन नकारान्तरप्रश्लेष इत्युक्तं भाष्ये। हलोयमामिति लोप इति हि तस्याशयः।

पूर्वोक्तरीत्या तु संयोगान्तलोपेनैव सिद्धौ संहितापाठपर्यन्तं नोपन्यस्येत्। संहितायामपि हि हलोयमामिति लोपस्य बहिरङ्गत्वात्त्रिपादीस्थत्वाभ्यामसिद्धत्वात्संयोगान्तलोपेनैव भाव्यम्। संयोगान्तलोपे यणः प्रतिषेधः, न वा झलो लोपाद्बहिरङ्गलक्षणत्वाद्वेति वार्त्तिकोक्तपक्षत्रये प्रथमचरमयोस्तस्य दुर्वारत्वात्। तस्मात्समुदाये प्रत्येकं वा संयोगसंज्ञेति पक्षद्वयानुरोधेनेह समाधानद्वयं व्यवस्थितमिति भाष्यार्थः। पूर्वोक्तरीत्या सिचस् इति समाहारमाश्रित्य तदुपरि स् इतिच्छेद इति पक्षे त्वस्तिग्रहणप्रत्याख्यानपरतयापीदं भाष्यं योजयितुं शक्यमिति दिक्। एतेन संयोगान्तस्य लोप इति सूत्रे ऽन्तग्रहणं शक्यमकर्त्तुमिति पदमञ्जरी प्रत्युक्ता। पक्षद्वयेपि प्रयोजनस्योक्तत्वात्। विद्यमानं यत्सिचस् इति पक्षे वा योज्या। वस्तुतस्तु झल इति वत्सस्येत्यपकृष्यते तत्सामर्थ्यात्संयोगान्तस्य पदत्वाभावेपि लोप इत्यलम्। यत्तु सिचः परत्वादीटि प्राप्ते आहिभुवोरीट्प्रतिषेध इति वार्त्तिकबलान्निषेध इति कैश्चिदुक्तम्। तन्न। तस्य दोष इत्युपक्रमात्स्थानिवद्भावप्रतिषेधपरेणोक्तवार्त्तिकेनास्तेः परत्वमुपजीव्य प्रवृत्तस्येटो निवृत्तावपि सिच्प्रयुक्तस्यानिवार्यत्वात्। अस्थादगादित्यादावुक्तदोषतादवस्थ्याच्च। तस्मात्प्रागुक्तेष्वेवान्यतमः पन्थाः शरणमित्यलं बहुना। वध्यादेशे वृद्धितत्वप्रतिषेध इड्विधिश्चेति वार्त्तिकान्तरम्। अस्यार्थः। हन्तेर्ण्वुलि कृते बहुलन्तण्यन्नवधकगात्रविचक्षणाजिराद्यर्थमिति वार्तिकेन संज्ञाछन्दसोर्वधादेशः। स च हलन्त इति मत्वा वृद्धिरापाद्यते। हनस्तोचिण्णलोरिति तकारश्च। तयोः कर्त्तव्ययोः स्थानिवद्भावः प्रतिषेधः। तथा आवधिषीष्टेत्यादौ स्थानिवद्भावेनाङ्गतयैकाच इतीण्निषेधः प्राप्तः। तस्मिन्नपि कर्त्तव्ये स्थानि-

वद्भावेनाङ्गता नेति वाच्यम्। तदेतदिड्विधिश्चेत्यनेनार्थादुक्तम्। एतदपि भाष्ये प्रत्याख्यातम्। तथाहि। वधादेशस्तावददन्तः। अन्यथा ऽवधीदित्यत्रातो हलादेरिति वृद्धिप्रसङ्गात्। एतच्चोत्तरसूत्रे भाष्ये एव स्पष्टम्। वधक इति तु नायं ण्वुल् किं तु हनो वधश्चेत्यौणादिकसूत्रेण क्वुन्प्रत्ययः। तथा चेह वृद्धितत्वयोः प्रसङ्ग एव नास्ति। आवधिषीष्टेत्यादाविण्निषेधोपि न भवति। वध्यादेशे आद्युदात्तनिपातनसामर्थ्यात्। न चैवं सतिशिष्टेन तेन यदावधिषीष्टेत्यादौ प्रत्ययस्वरो बाध्येतेति वाच्यम्। आर्द्धधातुकीयानामादेशानां प्रत्ययविवक्षामात्रेण प्रवृत्त्या प्रत्ययस्वरस्यैव सतिशिष्टत्वादिति। स्यादेतत्। इड्विधिश्चेत्यंशे पूर्वपक्ष एव शिथिलः। तथाहि। उपदेशेनुदात्तादिण्निषिध्यते। न च वधिस्तथा। स्थानिवद्भावेनायं तथेति चेन्न। अल्विधौ स्थानिवद्भावविरहात्। सत्यम्। नेह स्थानिवद्भावं ब्रूमः। किन्तु हन्त्युपदेश एव वधेरुपदेशः। कृञुपदेश इव कर्त्ता कर्त्तुमित्यादौ करित्यादीनाम्। स्थानिवद्भावस्त्वङ्गसंज्ञार्थं मृग्यतइत्युक्तमेव। नन्वेवमपि परिहारग्रन्थो ऽसङ्गत एव। यदि हि प्रागेव प्रत्ययोत्पत्तेर्वधादेशाभ्युपगमस्तर्हि वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति स्यसिच्सूत्रीयं वार्त्तिकं विरुध्येत। अन्तरङ्गबहिरङ्गयोर्विप्रतिषेधायोगात्। तथा च कर्मणि सीयुटि वधिषीष्टेत्येकमेव रूपं स्यात्। इष्यते तु घानिषीष्टेति द्वितीयमपि। अत्रोच्यते। वार्तिकमते आर्द्धधातुकइत्यस्य विषयसप्तमीत्वेपि लिङ्लुङीत्यादीनां परसप्तमीत्वाभ्युपगमेन विप्रतिषेधः सम्भवत्येव। अत एवेहाद्युदात्तनिपातनासंभवादिड्विधिश्चेत्युपसंख्यातम्। भाष्यकाराणां त्वयमाशयः। आर्द्धधातुकइतिवल्लिङीत्यादिरपि विषयसप्तम्येव। तथा चाद्युदात्तनिपातनेनैवोपपत्तौ इड्वि-

धिश्चेति न कर्त्तव्यमेव। घानिषीष्टेति कथं सिध्येदिति परमवशिष्यते। तत्रेदमुत्तरम्। प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भाव इति। एतच्च स्यसिच्सूत्रे कैयटेन स्पष्टमुक्तम्। तस्माद्वार्त्तिकमते विप्रतिषेधाच्चिण्वद्भावः। भाष्यमते तु प्रतिपदोक्तत्वादिति विवेक। एतेनैकाच उपदेशइति सूत्रेप्यार्द्धधातुकीयाः सामान्येन भवन्तीत्यादिभाष्यग्रन्था व्याख्याताः। यत्तु तत्र कैयटौनोक्तं विप्रतिषेधे उपपत्तिश्चिन्त्येति। तत्तु प्रागुक्तोपपत्तिरेव स्मर्त्तव्येत्येवंपरम्। स्यादेतत्। प्रतिपदविधित्वं किमिह विवक्षितम् अनवकाशत्वं वा साक्षादुपादानमात्रं वा। नाद्यः। स्यसिच्सूत्रे हनग्रहणस्य प्रघानिष्यतइत्यादौ लब्धावकाशत्वात्। तत्रत्यस्य सीयुट्ग्रहणस्य तु कारिषीष्टेत्यादौ कृतार्थत्वात्। न चाजन्तादीनां चतुर्णां स्यादिचतुष्कसम्बन्धे अस्वरितत्वाच्च यथासंख्याभावे हन्तेः सीयुटीति योंशस्तस्यानर्थक्यमेव। अन्तरङ्गत्वाद्धि वधभावे कृते तस्य स्थानिवत्वेन हन्तिग्रहणेन ग्रहणात्सीयुटि चिण्वदिटि कृते ण्यल्लोपावियङिति पूर्वविप्रतिषेधेनाल्लोपे सति वधिषीष्टेत्येव रूपं स्यादिति वाच्यम्। अन्तरङ्गेण वधिनापहारे न्याय्ये सत्यसंभवादेव हन्तेः सीयुटा समं संबंधायोगात्। संभवे व्यभिचारे च स्यादिशेषणमर्थवदिति न्यायात्। अत एव भस्त्रादिसूत्रे आतः स्थाने इत्येतत्स्वशब्दस्यैव विशेषणं न तु भस्त्रादीनामिति वक्ष्यते। तथा नित्यं क्रीडाजीविकयोरित्यत्र क्रीडायां तृचो ऽसम्भवादकेनैव तदन्वय इति वक्ष्यते। नान्त्यः। वधादेशेपि हनो वधलिङीति साक्षादुपादानस्याविशिष्टत्वात्। अन्तरङ्गत्वस्याधिकत्वाच्चेति चेत्। अत्रोच्यते। चिण्वदिट्चेति चकारस्यानुक्तसमुच्चयार्थत्वेन व्याख्यानाद्धन्तेरपि परस्य सीयुटश्चिण्वद्भावो विधीयते। तस्य चानर्थकत्वमेव प्रतिपदविधित्व-

म्। अनुक्तसमुच्चयार्थत्वं चास्य भाष्यकार एव वक्ष्यति। चं भगवान्कृतवांस्तु तदर्थमिति। अत एव ह्याभात्सूत्रमत्याख्यानपक्षे कृतेपीटि णिलोपः सिद्ध्यति। सूत्रारम्भेपरमिट् चासिद्धस्तेन मेलुप्यते णिरिति वक्ष्यमाणं बोध्यम्। यद्वा लिङीति सामान्यमार्धधातुके सीयुटीति विशेषः। हन्तेरित्युभयत्राविशिष्टम्। तथा चापवादत्वमेव चिण्वदिडिति नास्त्यसम्भवः। येन हन्तिः सियुटा नान्वियात्। तथा च कैयटोक्तं प्रतिपदविधित्वमपि सम्यगेव। युक्तञ्चैतत्। यदि ह्यसम्भवस्तार्हि चेनाप्यसंभविनो विधानायोगेन प्रागुक्तपक्षस्य दुर्बलत्वात्। अथ वा वक्ष्यमाणनिष्कर्षरीत्यान्तरङ्गं बलीय इत्यस्यासिद्धं बहिरंङ्गमित्यनेन प्रत्याख्यानात्तस्य च कृति तुग्ग्रहणेनानित्यत्वाल्लक्ष्यानुरोधेनेह त्यागाद्युक्तो विप्रतिषेधः। अथ वा लिङीति परसप्तम्येवास्तु। परत्वाच्च चिण्वदिट्। आद्युदात्तनिपातनं तु मास्तु। न चैवं वधिषीष्टेत्यत्रेण् निषेधापत्तिः कर्त्तेत्यादाविवेति वाच्यम्। वधेर्हि द्वावुपदेशौ। हंत्युपदेशो वध्युपदेशश्चेत्येकाच इति सूत्रे भाष्ये एव स्पष्टम्। तथा च वध्युपदेशे ऽनेकाच्त्वादिण्निषेधो न भविष्यति। एकेति विशेषणसामर्थ्याद्धन्यनेकाच्कोपदेशो व्यावर्त्यते। नन्वच इत्युक्ते ऽजन्तस्यैव स्यात्। मैवम्। पचादीनामनुदात्तत्वस्य वैयर्थ्यापत्तेः। अत एवैकत्वविवक्षया अच इत्यस्यैको योच् तद्वत इत्यर्थे लब्धे एकग्रहणसामर्थ्यादुक्तार्थलाभः। न च यत्रैकाज्ग्रहणमिति परिभाषाप्रवृत्तये एकग्रहणमिति युक्तम्। शब्दविशेषमनादृत्य एकाच इत्यर्थमेवाश्रित्य परिभाषाप्रवृत्तेः सुवचत्वात्। न चैवमिहैव विशेषणसार्थक्ये श्तिपा शपेत्यादिपरिभाषाज्ञापकत्वं न स्यादिति वाच्यम्। शीङः सार्वधातुके गुणः दीङो युचीत्यादिसानुबन्धनिर्देशानामेव त-

ज्ञापकत्वसम्भवात्। तदेवं सर्वथापि वधेः परस्येडस्त्येवेति स्थितम्। अत एवानिदंकारिकासु व्याघ्रभूतिनादन्तपर्युदासः कृतः अदन्तमूदन्तमृताञ्च वृङ्वृञाविति। यत्तु कौमुद्यां भावकर्मलकारव्युत्पादनावसरे घानिषीष्टेत्युदाहृत्य पक्षे वधादेश इत्युक्तं तच्चूक्तरीत्या भाष्यमते वार्त्तिकमते वा उभयथापि निर्बाधमेव। एवं स्थिते पक्षे वधादेश इति प्रतीकमुपादायेदन्तु सिद्धान्तविरुद्धंभाष्यादौ वधादेशानभ्युपगमादिति वदन् प्रसादकारः प्रत्युत स्वस्यैव कलंकमाविरकरोत्। यदपि तेन स्वकीयभ्रमबीजभूतं वार्त्तिकमुदात्तं हनिणिङादेशप्रतिषेधश्चेति। नैताल्लिङि प्राप्तस्य निषेधपरं किं तु स्यादिष्वपि चिण्वादित्यतिदेशेन प्राप्तस्य। अत एवाङ्गाधिकारादाङ्गस्यैवातिदेशो न तु हनिणिङादेशानाम् अनाङ्गत्वादित्यङ्गाधिकारबलेनैव भाष्ये तद्वार्त्तिकं प्रत्याख्यातम्। यद्यप्येतत्सिद्धान्तग्रन्थेष्वविवादमेव तथाप्यन्धस्येवान्धलग्नस्येति न्यायेन प्रसादग्रन्थं दृष्ट्वा बाला मा भ्राम्येयुरित्येतदर्थमस्माभिः स्फुटीकृतम्। प्रकृतमनुसरामः। आकारान्तान्नुक्षुक्प्रतिषेधः। लोडादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः। त्र्यादेशे स्नन्तप्रतिषेधः। आम्विधौ च। स्वरे च वस्वादेशे। एतान्यपि पञ्च वार्त्तिकानि प्रत्याख्यातानि। तथाहि। विलापयति भापयतीत्यत्र नुक्षुकौ न भविष्यतः। ली ई भी ई इतीकारप्रश्लेषात्। ह्रस्वप्रश्लेषाद्वा। तथा। शिष्टात् हतात् भिन्तात् कुरुतात् स्तादित्यत्र परत्वात्तातङि कृते शाहौ, हन्तेर्जः, हुझल्भ्योर्हेर्द्धिः, उतश्चप्रत्ययादसंयोगपूर्वात्, घ्वसोरेद्धावित्येते विधयो यद्यपि प्राप्नुवन्ति तातङः स्थानिवद्भावेन हिग्रहणेन ग्रहणात्। तथापि सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायान्न भवन्ति। एवं पुष्णीता-

दित्यत्र हलः श्नः शानज्झाविति न भवति। उभयोर्नित्ययोः पर-त्वात्तातङः प्रवृत्तेः। तथा तिसृणामित्यत्र परत्वात्तिसृभावेन बा-धितस्त्रेस्त्रय इति त्रयादेशोपि बाधित एव। एवञ्चतस्रस्तिष्ठ-न्तीत्यत्र परेण चतसृभावेन चतुरनडुहोरित्याम् बाध्यते। तथा। अशासन्त्वाविदुषी सस्मिन्नहन्नित्यत्र विदेः शतुर्वसुरिति वस्वा-देशस्य शतृग्रहणेन ग्रहणाच्छतुरनुमोनद्यजादी इति सूत्रेणान्तोदा-त्ताच्छत्रन्तात्परत्वमुपजीव्य प्राप्तं नद्या उदात्तत्वम्, यस्यैवं विदुषो-ग्निहोत्रं जुह्वतीत्यत्र विदुष इत्यत्र षष्ठ्या उदात्तत्वं च न भ-वति। अनुम इति निषेधात्। तथाहि। अविद्यमान उम् य-स्येति बहुव्रीहिः। उमिति च सनाशंसेत्युकारात्प्रभृत्यानुमो म-कारात्प्रत्याहारः। तनादिकृञ्भ्य इत्युकारात्प्रभृति वा। तत्र च वसोः सम्प्रसारणं चान्तर्भूतम्। नन्वेवं द्वितीयपक्षे लुनता अच्छारवं प्रथमा जानतीगादित्यादावपि निषेधापत्तिः। तनादि-कृञ्भ्य इत्युपक्रमे श्नाप्रत्ययस्यापि तत्रान्तर्भावादिति चेत्। न। शतरि परे श्नाप्रवृत्तावपि शतुरनुम्कत्वानपायात्। नुमा-गमग्रहणपक्षेपि हि शतुरेव तद्ग्राहित्यं विशेषणं न तु शत्रन्तस्य। मुञ्चता मुञ्चते इत्यादावपि निषेधापत्तेः। इदन्तु वार्त्तिकं सि-द्धान्तेपि स्थितम्। गोः पूर्वणित्वात्वस्वरेषु प्रतिषेध इति। चि-त्रग्वग्रमित्यत्र हि सर्वत्र विभाषागोरिति पूर्वरूपं प्राप्तम्। ना-न्तः पादमिति पाठस्येको गुणवृद्धीति सूत्रे षाष्ठभाष्ये च स्थित-त्वेन तद्रीत्या सर्वत्रेति सूत्रस्यापि पूर्वरूपविधायकत्वौचित्यात्। कैयटस्तु शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यतइति भा-ष्यदर्शनात्प्रकृत्यान्तः पादमिति पाठमनुसृत्य वार्त्तिकस्थं पूर्वपदं तत्प्राप्तिपूर्वकप्रकृतिभावोपलक्षणमिति सूचितवान्। न च सर्व-त्र विभाषेत्येतैङ इत्यनुवर्त्त्यालिधित्वान्निषेधः सुवचः। हे चि-

त्रगो अग्रमित्यत्रैवमप्यतिप्रसङ्गात् । नह्यत्र स्थान्यल आश्रयणम् । स्वत एव एङन्तत्वात् । चित्रगुरित्यत्र गोतोणिदिति णित्त्वं प्राप्तम् । चित्रगुं चित्रगूनित्यत्र त्वा गोतोम्शसोरिति षाष्ठवार्त्तिकरीत्या आत्वं प्राप्तम् । अत्र णित्त्वाग्रहणं तु शक्यमकर्त्तुम् । गोत इति तपरकरणसामर्थ्यादवे णित्वास्वाप्रवृत्तेः । औतोम्शिति पाठस्यैव स्थापयिष्यमाणत्वाच्च । अचिनवमित्यादावतिप्रसङ्गस्य शसा साहचर्येणापि वारणसम्भवात् । स्वर । बहुगुमान् । इह ह्रस्वनुड्भ्यां मतुबित्युदात्ततायानगोश्वन्निति निषेधः प्राप्तः । तस्माद्वोः पूर्वस्वरयोरिति पठनीयामिति स्थितम् । एवं च नगोश्वन्निति सूत्रे वृत्तौ यत्पठ्यते बहुगुना बहुगुभ्यामित्यादावन्तोदात्तादुत्तरपदादन्यतरस्यामिति प्राप्तः प्रतिषिध्यतइति । तच्चिन्त्यम् । भाष्यवार्त्तिकविरुद्धत्वात् ॥

अचः परस्मिन्पूर्वविधौ ॥ परनिमितो ऽच आदेशः स्थानिवत्स्यात्स्थानिभूतादचः पूर्वत्वेन यो दृष्टस्तस्य तस्माद्वा निमित्तभूताद्विधौ कर्त्तव्ये । वव्रश्च । इहोरदित्यत्वस्य स्थानिवद्भावेन नसंप्रसारणइति निषेधाद्वकारस्य न संप्रसारणम् । न च पूर्वसूत्रेण गतार्थता । अल्विधित्वात् । न च परनिमित्तत्वमसिद्धमिति वाच्यम् । अङ्गाक्षिप्तप्रत्ययनिमित्तकत्वात् । न च प्रागभ्यासविकारेभ्योङ्गाधिकार इति वाच्यम् । आसप्तमाध्यायसमाप्तेरिति पक्षस्य सिद्धान्तयिष्यमाणत्वात् । पूर्वस्माद्विधौ यथा । तन्वन्ति । तन्वते । इह यणादेशस्य स्थानिवद्भावान्नेट् । तत्र हि तन् इत्यङ्गं निमित्तम् । तच्चोकारात्पूर्वमिति । अच इति किम् । विश्नः । प्रश्नः । द्यूत्वा । स्यूत्वा । अभिगत्य । तथाहि । विश्नः प्रश्न इत्यत्र छकारस्य शकारः परनिमित्तकः तस्य स्थानिवद्भावाच्छेचेति तुक् प्राप्तः । अच इ-

ति वचनान्न भवति। स्यादेतत्। इहान्तरङ्गत्वात्पूर्वमेव तुका भाव्यम्। न च वार्णादाङ्गं बलीय इति शकारः स्यादिति वाच्यम्। यत्र ह्येकमेव निमित्तीकृत्य युगपदाङ्गवार्णयोः प्राप्तिस्तत्र वार्णादाङ्गं बलीयः। यथा करोतेर्लिटि णलि कु अ इति स्थिते गौरित्यत्र सावकाशामचोञ्णितीति वृद्धिं बाधित्वान्तरङ्गत्वात्प्राप्तं यणं वृद्धिरेव बाधते। प्रश्न इत्यत्र तु शस्य नङ् निमित्तम्। तुकस्तु छः। भिन्नकाला चानयोः प्राप्तिः। ननु यत्रैकस्मिन्विषये युगपच्च प्राप्तिस्तत्रैवेयं परिभाषेत्यत्र किं प्रमाणमिति चेत्। धर्मिग्राहकमानमेवेति गृहाण। तथाहि। अभ्यासस्यासवर्णेऽइति सूत्रे ऽसवर्णग्रहणमस्याः परिभाषाया ज्ञापकम्। एतच्च षष्ठे प्रथमान्हिकान्ते भाष्ये स्थितम्। तद्धीषतुः ऊषतुरित्यादिवारणाय नोपयुज्यते। अन्तरङ्गेण सवर्णदीर्घेण तत्रेयङुवङोर्बाधात्। तौ हि ह्यङ्गसंज्ञामभ्याससंज्ञां चापेक्षमाणौ बहिरंगौ। न चैवमप्यपवादत्वात्तावेव स्यातामिति वाच्यम्। येन नाप्राप्तिन्यायेन तयोर्यणं प्रत्येवापवादत्वात्। नन्विये्षेत्यादौ प्रवृत्तस्यापि गुणस्य इयायेत्यत्र प्रवृत्ताया वृद्धेश्च द्विर्वचनेचीति रूपातिदेशेनापहारे द्वित्वे च कृते सवर्णदीर्घस्यापि प्राप्त्या सोपि येननाप्राप्तिन्यायेनेयङुवङ्भ्यां बाध्येतेति चेत्। तर्हि कृतेप्यसवर्णग्रहणे निर्विषयतापत्तिः। असवर्णग्रहणसामर्थ्यात्पुनर्गुणवृद्धी सवर्णदीर्घं बाधित्वा स्यातामिति चेत्। न। इयर्त्तीत्यादौ चरितार्थत्वात्। नन्वेवं सत्यसवर्णग्रहणं विनापि येननाप्राप्तिन्यायेनेयर्त्तीति यणो बाधने सिद्धे तन्न कुर्यादिति चेत्। तर्हि सामर्थ्यादियेषेत्यादौ गुणादिप्रवृत्तिरिति फलितोर्थः। तथा च पुनरप्यसवर्णग्रहणं व्यर्थमेव। अर्त्तेश्चेति सूत्रयित्वा ट्वोरिति चानुवर्त्यर्त्तेरिकारस्य लाघवादियङि विधेये ऽभ्यासस्ये-

त्युक्तिसामर्थ्येनापीयेषेत्यादेः सुसाधत्वात्। नन्वर्त्तेरिति श्नितपा निर्देशे अरियर्तीति यङ्लुकि इयङ् न स्यादिति चेत्। तर्हुरित्येवोच्यताम्। इणो यणिति साहचर्याच्च धातुग्रहणं भविष्यति। अंगेन उर्विशेषणाद्वा। तेन अर्तारमतिक्रांतैरत्यर्त्तृभिरित्यादौ नातिप्रसङ्गः। नन्वेवमपीयेषेत्यत्रेव ईषतुरित्यत्रापीयङ् स्यादिति चेत्। न। अन्तरंगेण दीर्घेण बाध इत्युक्तत्वात्। न चैवमियेषेत्यत्रापि तुल्यमिति वाच्यम्। तत्र गुणसम्भावनायां विनाशोन्मुखेन निमित्तेन दीर्घाप्रवर्त्तनात्। वक्ष्यते हि समर्थानां प्रथमादिति सूत्रे समर्थग्रहणमकृतव्यूहाः पाणिनीया इति परिभाषां ज्ञापयतीति। अत एव सौत्थितैर्वैक्षमाणिरित्यत्र भाविन्या आदिवृद्ध्या अन्तरङ्गस्यापि सवर्णदीर्घस्य निमित्तविघातादप्रवृत्तिर्मा भूदिति सावुत्थितिर्वायीक्षमाणिरित्यनिष्टरूपं वारयितुं समर्थग्रहणम्। परिनिष्ठितत्वं च तत्र समर्थशब्दस्यार्थः। कृतमपि निवर्त्तयन्तीति वा ज्ञाप्यताम्। फलं तु तुल्यमेव। गौरवं परमधिकमितिदिक्। ततश्चेयेषेत्यादौ गुणे कृते सवर्णदीर्घाप्तौ यणि प्राप्ते तस्यैवेयङपवादः। ईषतुरित्यादावन्तरङ्गत्वात्सवर्णदीर्घेण बाध्यतइत्यसवर्णग्रहणमनर्थकं सत्ज्ञापकमेवोक्तपरिभाषायाः। ननु गुणेन कथं निमित्तविघातोऽचः परस्मिन्निति स्थानिवत्त्वेन सवर्णदीर्घप्राप्तेस्तदवस्थत्वादिति चेन्न। दीर्घस्य पूर्वपरविधित्वेन तस्मिन्कर्त्तव्ये स्थानिवत्त्वाभावात्। पूर्वस्यैव विधौ हिसः न तु पूर्वपरयोरिति विधिग्रहणव्यावर्त्यनिरूपणावसरे उपपादयिष्यमाणत्वात्। सवर्णे यो विधिः सोपि सवर्णस्यविधिरिति तत्र कर्त्तव्ये नपदान्तेति निषेधाच्च। एतेनासवर्णग्रहणे कृते स्थानिवद्भावेनेयेषेत्यत्रेयङ् न स्यात्। न चासवर्णग्रहणसामर्थ्याच्छ्रौतासवर्णमाश्रित्येयङ् प्रवर्त्ततां घनन्तीति घत्ववदिति

वाच्यम्। तथा सति परिभाषाज्ञापनासम्भवात्। इयर्तीत्येकमयोजनाय ह्रुश्चेति वक्तव्ये ऽभ्यासस्येति वचनसामर्थ्याद्भवन्तावियङुवङौ णलीवातुसि दीर्घमप्यविशेषाद्धाधेयातामिति तद्व्याहृत्यैवासवर्णग्रहणस्य चरितार्थत्वादिति प्रत्युक्तम्। सवर्णे परे न भवतीति प्रसज्यप्रतिषेधाश्रयणात्। तत्र चोक्तरीत्या स्थानिवद्भावे प्रतिषिद्धे इयेषेत्यादौ यण एव प्राप्त्या तदपवादत्वेन निर्णीतयोरियङुवङोरन्तरङ्गेण दीर्घेण ईषतुरित्यादौ बाधसम्भवात्। सा च ज्ञाप्यमाना समानाश्रये युगपत्प्राप्तौ चेत्येवंरूपविशेषविषयैव लक्ष्यानुरोधेनेति प्राचां भावः। अत एव स्योन इति सिवेरौणादिके नप्रत्यये वलोपापवादे ऊठि च कृते सि ऊ न इति स्थितेन्तरङ्गत्वाद्यण्, न त्वङ्गोप्युपधागुणः। व्याश्रयत्वात्। न चोठं बाधित्वा परत्वाद्गुणः शङ्क्यः। लघुभूतामिग्लक्षणामुपधामङ्गं चापेक्षमाणस्य गुणस्य बल्पेक्षत्वेन बहिरङ्गत्वात्। एतच्च येनविधिरिति सूत्रे कैयटे स्पष्टम्। वृत्तिकारोप्येवम्। प्रकृतमनुसरामः। उक्तरीत्या तुकि कृते शादेशः। तथा च विश्नप्रश्नयोस्तुक् श्रूयेतैवेति तन्निवृत्तौ यत्नान्तरमास्थेयम्, अच इत्यस्य प्रत्युदाहरणान्तरञ्चेति चेत्। सत्यम्। अस्त्येव यत्नान्तरम्। च्छ्वोरिति सतुकनिर्देशस्य षाष्ठभाष्यादौ स्थितत्वात्। स्यादेतत्। अकृतव्यूहाः पाणिनीयाः कृतं वा निवर्तयन्तीति परिभाषाभ्यां विश्नप्रश्नयोः सिद्धौ किं सतुकनिर्देशेन। न चोक्तपरिभाषयोरनित्यत्वज्ञापनं तत्फलम्। तेन चाक्लायिनेति सिद्धम्। अन्यथा यस्य हल इति भाविनं लोपमालोक्य प्रागेवात्वं न क्रियेत, कृतं वा निवर्त्येत, त्वकृत्पितृको ऽतिभवकानित्यादौ चाकच् न श्रूयेतेति वाच्यम्। अदोजग्धिरिति सूत्रे ल्यब्ग्रहणस्य प्रत्ययोत्तरपदयोरिति सूत्रे उत्तरपदग्रहणस्य

च क्रमेण ल्यबुलुकोरन्तरङ्गबाधकताज्ञापनार्थतया सिद्धान्तग्रन्थेषु प्रसिद्धस्यैवोक्तपरिभाषाद्वयानित्यत्वज्ञापकत्वसम्भवात्। अथ निर्युक्तिकः सिद्धान्तप्रवादो न श्रद्धेयः ल्यबुत्तरपदग्रहणयोरप्राप्तविद्ध्यर्थत्वादकृतव्यूहपरिभाषावशादप्राप्तेः स्पष्टत्वादिति चेत्तर्हि मा भूतां ल्यबुत्तरपदग्रहावपि। अकृतव्यूहपरिभाषया अनित्यत्वे प्रकृतिप्रत्यापत्तिवचनस्यैव ज्ञापकत्वसम्भवात्। मास्तु वा तदपि। केणः सोचिलोप इत्यादिनिर्देशानामेव ज्ञापकत्वात्। तथाहि। क इ स उ इतीदुतोः पदान्तरप्रयुक्ते यणादेशे कृते आद्गुणस्य निमित्तविघातादकृतव्यूहा इति न्यायेन गुणो न स्यात्। न चासिद्धम्बहिरङ्गमन्तरङ्गं बलीय इति परिभाषाभ्यां निस्तारः। वृक्ष इ इदमित्यादौ कृतेपि दीर्घे निमित्तविघातेन तत्र पचावेदमित्यादौ च सावकाशयोर्द्वयोरापि परिभाषयोर्येन नाप्राप्तिन्यायेनाकृतव्यूहपरिभाषाबाध्यत्वात्। अन्यथोपेयुषो जग्मुष इत्याद्यपि न सिध्येत्। एवं विश्न इत्यत्र गुणं निषेद्धुं क्रियमाणं नङो ङित्त्वेमवाकृतव्यूहपरिभाषां ज्ञापयेत्। समर्थानामिति च मास्तु। अत एव समर्थः पदविधिरिति सूत्रे ऽकर्त्तव्यं च क्रियते समर्थानां प्रथमादिति भाष्यं सङ्गच्छते। तस्मात्, प्रत्यापत्तिसमर्थत्वल्यबुत्तरपदग्रहाः। सतुक्त्वं च पञ्चापि न कार्याणीत्यवस्थितम्॥ अत्रोच्यते। वार्णादाङ्म्बलीय इति परिभाषाया अनित्यत्वं ज्ञापयितुं सतुक्ग्रहः।तथाहि। समानाश्रयइति प्राचां ग्रन्थाननुसृत्य प्रागुक्तं,न तु क्षोदक्षमम्। व्याश्रयेष्वपि बहुधा तत्स्वीकारात्। तथा चकैयटेनासिद्धवत्सूत्रे शुन इत्यत्र वार्णादाङ्गस्य बलीयस्त्वात्पूर्वैकादेशं बाधित्वाऽल्लोप उक्तः। न च तत्रोभयोरकारांशे समानाश्रयत्वमस्त्येवेति वाच्यम्। विश्नः स्योन इत्यत्रापि छकारेकारांशसाम्येन व्याश्रयत्वोपन्यासविरोधात्। किञ्चाङ्गस्य,

आछीनद्योः, शीङोरुट्, अचः परस्मिन्, येनविधिः, उपेयिवाननाश्वान्, आडजादीनाम्, अजादेर्द्वितीयस्य, अदसऔसुलोपश्च, सार्वधातुकमपित्, उपसर्गाद्ऋहस्वऊहतेः, स्नुक्रमोरनात्मनेपदइत्यादिसूत्रेषु कैयटहरदत्तादिसकलग्रन्थाः समानाश्रयतां क्वचिदादृत्य क्वचिदनादृत्य प्रवृत्ताविति स्पष्टमेव सिद्धान्तपरिशालिनाम्। षाष्ठभाष्ये प्रथमाह्निकान्ते वार्णादाङ्गमिति परिभाषायाः प्रयोजनान्यपि व्याश्रयसाधारणान्येव। नमाङ्योग इतिसूत्रस्थकैयटग्रन्थेप्यवमेव। आतोनुपसर्गेक इति सूत्रे भाष्येप्येवमेव। तस्माद्बहिरङ्गपरिभाषाऽकृतव्यूहपरिभाषयोरिव वार्णादाङ्गमित्यस्या अप्यनित्यत्वमेव शरणम्। तच्च सतुक्कग्रहणेन ज्ञाप्यते। न च परस्मिन्पूर्वविधावपि स्थानिवद्भावेन तुकं वारयितुं सः। अन्यार्थतया ऽवश्यकर्त्तव्येनाच इत्यनेन गतार्थत्वात्। एवञ्चान्यार्थं क्रियमाणं सतुक्कग्रहणमकृतव्यूह इत्यस्याप्यनित्यतां कामं ज्ञापयतु। प्रकृतसूत्रे विश्न इति प्रत्युदाहरणन्तु यथाश्रुतरीत्या। एवं स्थिते नङो ङित्वस्य गुणनिषेधे चरितार्थत्वादकृतव्यूहपरिभाषायां ज्ञापकान्तरमास्थेयम्। तच्च प्रत्ययवचनमुत्तरपदग्रहणं समर्थग्रहणं वा। तेभ्यो लघुत्वात् ल्यब्ग्रहणमेवेति तु निष्कर्षः। आचारक्विबन्तार्थं प्रत्ययग्रहणं तवममादिबाधनार्थमप्राप्तविध्यर्थश्चोत्तरपदग्रहणमिति हि स्थास्यति। मपर्यन्तानुवृत्तिरेव ज्ञापिकेति हरदत्तोत्प्रेक्षा त्वन्तरङ्गस्यापवादबाध्यत्वादयुक्तेति सप्तमे वक्ष्यते। एवञ्च पामाद्यन्तर्गणसूत्रे विष्वगित्युत्तरपदलोपश्चाकृतसन्धेरित्यत्राकृतसन्धिग्रहणमप्यनावश्यकम्। वीक्षमाणादिभ्यः कृतसन्धिभ्य एव तद्धिता इति स्पष्टीकरणार्थं वास्तु। एवं स्त्रियाः पुंवदिति सूत्रे नत्येषा परिभाषा सर्वत्राश्रीयतइति कैयटः समीचीन एव। आभात्सूत्रस्थकैयटस्तु निमित्तापायइति परिभा-

षा भाष्यासम्मतेत्येवंरूप आपाततः। छ्वोः शूटसूत्रे न हीदं वचनं नापि न्याय इत्येवंरूपो हरदत्तग्रन्थोप्यापातत एव। समर्थानामिति सूत्रे परिभाषापरिष्कारस्य स्वयमेव कृतत्वात्। अथ वोक्तपरिभाषयोर्मध्ये ऽकृतव्यूहपरिभाषैव लाघवादादर्त्तव्या च तु कृतमपीति गौरवादित्येवम्परतया कथञ्चिद्ग्रन्थो नेयः। फलन्तु निर्विवादम्। ज्ञापकान्तराणामपि सुलभत्वात्। तद्यथा। चाविति सूत्रं दीर्घं विदधदिह ज्ञापकम्। अन्तरङ्गे हि यणि कृते प्रतीच इत्यादौ कथं दीर्घस्य विषयलाभः। लौकिकन्यायोपीह सुवचः। लोके हि निमित्तमुभयविधमपि दृष्टम्। कार्यस्य स्थितौ नियामकं तदनियामकं च। आद्यं यथा, न्यायनये ऽपेक्षाबुद्धिः तन्नाशेन द्वित्वनाशाभ्युपगमात्। तथा वेदान्तनये प्रारब्धस्य विक्षेपस्थितिनियामकत्वमुपाधेः स्फटिकलौहित्यादिस्थितिनियामकत्वं च प्रसिद्धमेव। द्वितीयं तु दण्डादि। तन्नाशेपि घटनाशादर्शनात्। एवं स्थिते लक्ष्यानुरोधेनेहापि द्वैविध्यं कथं न भवेत्। तथा च यस्य च लक्षणान्तरेण निमित्तं विहन्यते नासावनित्य इत्यस्य क्वचिदाश्रयणंक्वचिन्नेत्येवंरूपे सिद्धान्ते लौकिकद्विविधव्यवहार उपष्टम्भकत्वेनोदाहृतः कैयटादिभिः। वालिसुग्रीवयोर्युध्यमानयोर्भगवता वालिनि हतेपि न सुग्रीवस्य वालितः प्राबल्यं व्यवहरन्ति। भगवत्सहायैः पाण्डवैर्जये लब्धेपि पाण्डवानां प्राबल्यं व्यवहरन्ति चेति दिक्। स्यादेतत्। यदि छ्वोरिति सतुक्कनिर्देशस्तर्हि राल्लोपे तस्यैवानुवृत्तिः स्यात्। तथा च हूः हुरौ हुर इत्यत्र लोपो न स्यात्। वितुक्कत्वात्। न चानुवृत्तिसामर्थ्यात्तुक् विनैव तत्र गृह्यताम्। राधो हिंसायामित्यत्रात इत्यनुवृत्तेप्यवर्ण इवेति वाच्यम्। वकारमात्रान्वयस्यापि सुवचत्वात्। यत्तु सतुक्कवितुक्कौ द्वावपीह नि-

र्दिश्येते इति, तन्न। समाहारद्वंद्वे एकवचनापत्तेः। इतरेतरयोगे बहुवचनापत्तेः। छकारयोःसमाहारे समासं कृत्वा वकारेणेतरेतरयोगद्वंद्वं करिष्याम इति चेत्। न। समाहारे टच्प्रसङ्गात्। वयासंख्यासम्भवापत्तेश्च। अत्रोच्यते। छकारवकारयोः समाहारद्वन्द्वे कृते छकारान्तरस्य द्वन्द्वान्तरमस्तु। आदेशेपि शब्दप्रश्लेषः। तथा चान्तरतम्याद्यथासंख्यन्यायाच्चेष्टं सिद्धम्। अस्तु वा सवर्णतुकस्यैव निर्देशः। राल्लोपे तु सामर्थ्यात्केवलस्यान्वयः। नध्याख्येति नत्वनिषेधाल्लिङ्गाच्च। मूर्त्त इत्यत्र हि छलोपं विना नत्वप्राप्तिरेव न सम्भवति। एवं मूर्त्तौघनः द्रवमूर्त्तिस्पर्शयोः श्य इत्यादिनिर्देशा अपि सङ्गच्छन्तइति दिक्। अस्मिन्पक्षे अत्र इस्यस्य प्रत्युदाहरणन्तु ध्रुत्वा स्थूत्वेति। अत्र ध्रुवः स्थानिवत्त्वाद्यण् न स्यात्। ननु स्वाश्रयमच्त्वं भविष्यति। अतिदेशानां स्वाश्रयकार्यानिवर्त्तकत्वादिति चेत्। न। विधिग्रहणप्रयोजनकथनावसरे इह सूत्रे स्वाश्रयनिवृत्तेः सिद्धान्तयिष्यमाणत्वात्। नन्वेवमपि योत्र यण्विधावाश्रीयते अच् नासावादेशः। यश्चादेश ऊडिति समुदायः नासौ यण्विधौ निमित्तमिति चेत्। न। अनुबन्धानामनेकान्ततया एकान्तत्वेप्युच्चरितप्रध्वंसितयोकारस्यैवादेशत्वात्। षतिनिर्देशादभावोप्यतिदिश्यतइति वक्ष्यमाणत्वाच्च। एवमभिगत्येत्यपि प्रत्युदाहरणम्। अत्र ह्नुनासिकलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्धस्वस्यापीतिकृतीति तुक् न प्राप्नोति। अथ परस्मिन्निति किमर्थम्। युवजानिः। अत्र जायाया निङः स्थानिवद्भावाद्यलोपो न प्राप्नोति। स्वाश्रयनिवृत्तिरभावातिदेशश्च वक्ष्यतइति ध्रुक्तमेव। किञ्च व्याघ्रस्येव पादावस्य व्याघ्रपाद् पादस्यलोपो ऽहस्त्यादिभ्य इत्यपरनिमित्तको लोपस्ततो गर्गादित्वाद्यञ्। वैयाघ्रपद्यः। लोपस्य स्थानिवद्भावा-

त्पादः पदिति पद्भावो न स्यात्। वचनसामर्थ्यादुभविष्यतीति चे, त्पादेनेत्यादावतिप्रसङ्गः। किञ्च पादशतस्येति लोपवचनसामर्थ्यात्स्थानिवद्भावाभावे सत्यां द्विपदिकेत्यादौ पद्भाववचनं चरितार्थमिति क तस्य सामर्थ्यम्। परस्मिन्निति कृते तु वैयाघ्रपद्य इत्यादौ पद्भावस्य चरितार्थतया पादेनेत्यादावेकादेशस्य स्थानिवद्भावात्पद्भावो नेति स्थितम्। नन्वेकादेशो नाचः किंत्वचोः। तत्कथं स्थानिवत्त्वमिति चेन्न। वर्णनिर्देशे जातिग्रहणात्। अत एव श्रायसौ, मौमतौ, चातुरौ, आनडुहावित्यादि सिध्यति। श्रेयसो ऽपत्यमित्यण्। देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामित्याकारादेशः। ततश्चतुर्भ्योऽप्यणन्तेभ्य औप्रत्यये एकादेशस्यादिवत्त्वात्प्राप्तौ नुमामौ न भवतः। तथा उदवाहे। उदकं वहतीति कर्मण्यण्। संज्ञायामुदभावः। ततो ङावेकादेशस्यादिवत्त्वाद्धत्वे सति प्राप्तो वाह ऊण् न भवति। पूर्वविधाविति किम्। नैधेयः। निपूर्वाद्धाञ उपसर्गे घोः किः। आतोलोपः। द्व्यचः। इतश्चानिञ इति ढक्। आकारलोपस्य स्थानिवत्त्वे तु सति त्र्यच्कत्वव्यपदेशेन द्व्यच्कत्वं विरुद्धत्वाद्बाध्येत। नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते। नन्वेवमपि विधिग्रहणं मास्तु। पूर्वस्येति षष्ठ्या कार्ये कर्त्तव्ये इत्यर्थस्याक्षेप्तुं शक्यत्वादिति चेत्। न। पूर्वस्य विधिः पूर्वस्माद्विधिरिति समासद्वयलाभार्थं विधिग्रहणम्। पंचमीसमासे उदाहरणं तु तन्वन्तीत्युक्तमेव। स्यादेतत्। यदि पंचमीसमासोपीष्टस्तर्हि विगणय्येत्यादि न सिध्यति। ल्यपिलघुपूर्वादित्ययादेशे कर्त्तव्ये ऽल्लोपस्य स्थानिवद्भावात्। न चारम्भसामर्थ्यम्। अनुगमय्येत्यादौ मित्सु चरितार्थत्वात्। अत्रोच्यते। पूर्वस्माद्विधौ स्थानिवत्त्वमनित्यम्। निष्ठायांसेटीति ज्ञापकात्। तथाहि। तत्र सेटीति पदं न

तावदनिड्व्यावृत्त्यर्थम्। णिजन्तात्तदसम्भवात्। ननु सेऽसिचि-तः पशुरित्यत्र यस्यविभाषेतीण्निषेधः सम्भवत्येव। सनीवन्तेति विकल्पितेट्कत्वादिति चेत्। न। यस्यविभाषेत्यत्रैकाच इत्यनुवृत्तेः। अन्यथा दरिद्रित इतीण्न स्यात्। तस्मात्कालावधारणार्थं सेड्ग्रहणम्। इटि कृते णिलोपो न तु ततः प्रागिति। अन्यथा कारितमित्यादौ णिलोपे कृते एकाच उपदेशइतीण्निषेधः स्यादिति सेटीति वदतो भावः। पूर्वस्माद्विधौ स्थानिवत्त्वे तु न प्राप्त एव निषेधः। णिचा व्यवधानात्। तस्मात्सेट्ग्रहणमनित्यतां ज्ञापयतीति स्थितम्। तथा चाष्टमे अन्त इति सूत्रे हरदत्तः। अनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः। निष्ठायांसेटीति सेड्ग्रहणात्। एतच्च स्थानिवद्भावप्रकरणे एव व्याख्यातमिति। यद्यपीह प्रकरणे स्वयं न व्याख्यातं तथापि न्यासकारादिभिर्व्याख्यातमिति तद्ग्रन्थस्यार्थः। लेखकप्रमादाद्ग्रन्थभ्रंशो वा कल्प्यः। एतेन ओः पुयणिति सूत्रे यदत्र वक्तव्यं तद् द्विर्वचनेचीत्यत्रैवोक्तमित्यपि हरदत्तग्रन्थो व्याख्यातः। तथा च वस्वेकाच्सूत्रे कैयटः। पूर्वस्मादपिविधावित्येतदनित्यमिति। माधवाचार्यास्तु। परिव्रढय्य गत इत्यत्रासिद्धतामुद्भाव्य व्याश्रयत्वात्तां परिहृत्य पूर्वस्मादपीति स्थानिवत्त्वमाशंक्य प्रवेभिदय्य प्रस्तनय्येत्यादिभाष्योदाहरणबलेन समादधुः। यद्वा। ल्यपिलघुपूर्वादित्यनेन सामर्थ्यादन्यपदार्थस्य वर्णस्यापेक्षायां वर्णग्रहणे जातिग्रहणाद्व्यवधानेपि न दोष इति। केचित्तु पंचमीसमास इह मास्तु। प्रयोजनाभावात्। तथाहि। वेभिदिता, माथितिकः, अपीपचन्निति प्रयोजनत्रयं भाष्ये उक्तम्। तत्र वेभिदितेति तावदन्यथासिद्धम्। एकाचउपदेशइत्यत्र विहितविशेषणाश्रयणात्। माथितिकेति माथितं पण्यमस्येति विग्रहे त-

दस्यगण्यामिति ठक्कि तस्येकादेशे यस्येति चेत्यल्लोपे कृते इ-सुसुक्तान्तादिति कादेशो न भविष्यति । अनल्विधाविति निषेधेन स्थानिवद्भावासम्भवात् । ठस्येक इत्यत्र स्थान्यादेशयोरकारस्य उच्चारणार्थतया वर्णमात्रस्य स्थानित्वात् । अस्तु वा स्थान्यादेशयोरकारस्य विवक्षा । न चैवमनल्विधित्वात्कादेशप्रसङ्गः । सन्निपातपरिभाषया समाधानात् । न चापीपचन्नित्युदाहरणम् । इह हि अन्तेरकारस्य चङ्कारस्य चातोगुण इति पररूपत्वे तस्य परं प्रत्यादिवद्भावाज्झिग्रहणेन ग्रहणे सति सिजभ्यस्तेति जुस् प्राप्तः । णिलोपस्यैकादेशस्य वा स्थानिवद्भावान्न भवतीति वाच्यम् । वेत्तेर्हि लङ्येवानन्तरो झिः सम्भवतीति तत्साहचर्यादभ्यस्तादपि लङ एव झेर्जुस्विधानात् । न च सिचा साहचर्याल्लुङोपि ग्रहणमस्त्विति वाच्यम् । विप्रतिषेधेपरमिति परसाहचर्यस्य बलीयस्त्वादिति । अत एव भवतेर्यङ्लुङन्ताल्लुङि अबोभूवन्निति माधवः । पंचमीसमासप्रयोजनतया अपीपचन्नित्युदाहरतो भगवतस्तु नेह साहचर्यं नियामकतया सम्मतम् । कृत्वोर्थग्रहणाद्धि ज्ञापकात्साहचर्यं न सर्वत्राश्रीयतइत्युक्तं दीधीवेवीटामिति सूत्रे । तस्माद्यङ्लुकि भुवो लुङि जुसेवोचितः । आत इति नियमस्य सिचः परत्वमाश्रित्य यो जुस्याप्तस्तन्मात्रपरतया माधवेनैवोक्तत्वात् । अभ्यस्ताश्रयस्य जुसो दर्बारत्वात् । यदि तु लाघवकादात इति नियमः सामान्यापेक्षस्तदा जुसभावे ऽदभ्यस्तादित्यत्, तथा चाबोभूबुरबोभूवादिति पक्षभेदेन रूपद्वयं लभ्यते । नित्यत्वेन वुको गुणबाधकत्वात् । माधवोदाहृतमबोभूवन्निति तु चिन्त्यमेव । अन्त्यादेशस्य दुर्लभत्वात् । अपीपचन्नित्येतत्सिद्धये च पञ्चमीसमास आश्रयणीयः । विगणय्येत्यादावतिप्रसङ्गस्य तु पूर्वोक्ता एवोद्धाराः स्मर्तव्या इति

युक्तः पन्थाः। ननु पञ्चमीसमासो मास्त्विति वदतो मते तन्वन्तीत्यत्रेट् स्यादिति कुतो नोद्भावितमिति चेन्न। बहिरङ्गस्य यणोसिद्धत्वात्। न च नाजानन्तर्यइति निषेधः। अनन्तरे कार्यविधौ यत्राच आनन्तर्यमिति कैयटेनाभ्युपगमात्। कथं तर्हि तन्वन्तीति पञ्चमीसमासोदाहरणं प्राग्दत्तमिति चेत्। हरदत्तमतेनेत्यवेहि। स हि यत्रान्तरङ्गे बहिरङ्गे वा अचोरानन्तर्यमिति व्याख्यत्। नन्वेवं नपदान्तसूत्रे दध्यत्रेति वृत्तिमुपादाय स्थानिवद्भावप्रतिषेधसामर्थ्याद्बहिरङ्गपरिभाषा न प्रवर्त्ततइति मिश्रोक्तिर्विरुध्येत। बहिरङ्गे यणि अचोराश्रयणेन नाजानन्तर्यइति निषेधादेव परिभाषाया अप्रवृत्तेः। किञ्च संयोगान्तस्यलोप इति सूत्रे असिद्धं बहिरङ्गमिति परिभाषामाश्रित्य क्रियमाणं यणः प्रतिषेध इति वार्त्तिकस्य प्रत्याख्यानमपि विरुध्येत। अपि च। लणिति सूत्रे उरण्परः इति परेण चेत्कर्त्रर्थमित्यत्र रेफद्वयं श्रूयेतेत्युक्तं तदपि विरुध्येत। रोरीति लोपसम्भवात्। असिद्धपरिभाषायाश्चोक्तरीत्या निषेधात्। किञ्च नधातुलोपइतिसूत्रे प्रेद्धमित्यत्रत्यभाष्येण संयोगान्तस्येत्यत्र यण इत्यस्य प्रत्याख्यानभाष्येणापि विरोधः। किञ्च एत ऐ इत्यत्र पचावेदमित्यादौ अतिप्रसङ्गमाशंक्य बहिरङ्गतया स्वीकृतं समाधानमपि भज्येतेति दिक्। तस्माद्धरदत्तकृता व्याख्या पूर्वापरस्वग्रन्थेन भाष्येण च विरुद्धेति चेत्। सत्यम्। अत एवेमां व्याख्यां नधातुलोपसूत्रएवानुपादेयामवोचाम। केण इत्यादिज्ञापकान्नाजानन्तर्यइत्यस्यानित्यतामाश्रित्य वा कथंचित्समर्थनीयम्। स्यादेतत्। कैयटमतेप्यचोरिति द्वित्वं विवक्षितं न वा। आद्ये मूलभूतज्ञापकविरोधः। नहि कोसिचत्कोस्येत्यादावनन्तरे षत्वविधावचोराश्रयणम्। द्वितीये तु मूलभूतं ज्ञापकं सम्भवेत्

यदीण्ग्रहणं पूर्वेण स्यात्, तत्तु परेणैवेति स्थितम्। अथ परेणेण्ग्रहणे हलोपि के चिदन्तर्भवन्तु नाम। अजानन्तर्यन्तु न गतमित्याशयः। तर्ह्यस्तु कथं चिज्ज्ञापकनिर्वाहः। अयजइन्द्रं वृक्षइन्द्रमित्यादौ परत्वात्सवर्णदीर्घस्तु दुर्वारएव। न ह्यत्रासिद्धं बहिरङ्गमिति प्राप्नोति। नाजान्तर्यइति निषेधात्। नन्वन्तरङ्गं बलवदिति परिभाषान्तरेणेदं सिद्ध्यति। तथा च विप्रतिषेधसूत्रे अन्तरङ्गं चेत्युपक्रम्य इण्डिशीनामाद्गुणः सवर्णदीर्घत्वादिति प्रयोजनं पठितमिति चेत्। सत्यं पठितम्। किन्तु बहुतमप्रयोजनानि पठित्वा असिद्धपरिभाषयैव गतार्थत्वान्नेयं कर्त्तव्येत्युपसंहृतम्। एतेन प्रकृतसूत्रे पट्व्या मृद्वेत्युदाहरणदूषणप्रस्तावे ऽसिद्धपरिभाषां भाष्यकारैरुदाहृतामन्तरङ्गम्बलीय इत्येतदुपलक्षणतया व्याचक्षाणोपि कैयटः प्रत्युक्तः। विप्रतिषेधसूत्रस्थभाष्यविरोधात्। तस्मादिह सिद्धान्ततत्त्व मन्यदेव वक्तव्यमिति। उच्यते। अन्तरङ्गपरिभाषाया निरपवादत्वादसिद्धपरिभाषायास्तु नाजानन्तर्यइति सापवादत्वादुभयोरावश्यकता। विप्रतिषेधसूत्रस्थं भाष्यन्त्वभ्युच्चयपरमेवेति भागवृत्तिकाराः। कैयटलघुविवरणादयोप्येवम्। बृहद्विवरणकारास्तु। नाजानन्तर्यइति परिभाषा मास्तु। तज्ज्ञापकतया यत्सम्मतं तेनासिद्धपरिभाषाया अनित्यत्वमेव ज्ञाप्यतइत्याहुः। अस्मिंश्च पक्षे विप्रतिषेधसूत्रस्थं नाजान्तर्य इति भाष्यमप्यनित्यत्वपरतया भङ्क्त्वा नेयम्। अन्यथा हि तत्रैवान्तरङ्गं बलीय इत्यस्य प्रत्याख्यानं विरुध्येत। अत एव वृत्तौ नलोपः सुप्स्वरेत्यत्र वृत्रहभ्यामित्यत्र नलोपस्यासिद्धत्वात् ह्रस्वस्येति तुक् नेत्युपक्रम्य संनिपातबहिरङ्गपरिभाषाभ्यां गतार्थतामाशङ्क्य परिभाषाद्वयस्याप्यनित्यतां ज्ञापयितुं तुग्ग्रहणमित्युक्तम्। अत एव तत्र मिश्रैरप्युक्तम्। बहिरङ्गपरि-

भाषाया अनित्यत्वात् या सेत्यत्र बहिरङ्गमपि त्यदाद्यत्वमन्तरङ्गे टापि नासिद्धमिति। तथा प्रतिदीव्न इत्यादिसिद्धयेप्यसिद्धपरिभाषाया अनित्यत्वं स्वीकृतम्। अत एव चाक्षद्यूरित्यत्र यलोपे कार्ये ऊठ् नासिद्ध इति दिक्। एतदपवादश्चाकृतव्यूहा इत्यादिः। उत्सर्गापवादयोर्द्वयोरप्यनित्यत्वे स्थिते लक्ष्यानुरोध एव व्यवस्थाहेतुरिति सर्वं सुस्थम्। स्यादेतत्। पूर्वस्येति सम्बन्धसामान्ये षष्ठी। सम्बन्धश्च द्विविधः। कार्यित्वेन निमित्तत्वेन वा। एवं च विधिग्रहणं विनैव समासद्वयस्य फलं लब्धं विधिग्रहणे सत्यपि हि पूर्वस्मान्निमित्तत्वेनाश्रितादिति व्याख्येयमेव, अन्यथा हे गौरित्यत्र गकारात्परस्य विधौ वृद्धेः स्थानिवद्भावादेङ्ह्रस्वादिति सम्बुद्धिलोपः स्यात्। सत्यम्। विधिग्रहणं योगविभागार्थम्। तेन पूर्वस्य विधौ स्थानिवदेवेति नियमात्स्वाश्रयं व्यावर्त्यते। यद्वा। मास्तु योगविभागः। विधिग्रहणसामर्थ्याद्विधिमात्रे स्थानिवद्भावो भविष्यति। शास्त्रीये ऽशास्त्रीये च। तेन पटयतीत्यादौ वृद्ध्यभावो ऽशास्त्रीयोपि सिध्यति। नन्वेवमपि पूर्वसूत्रादेव विधिग्रहणमनुवर्तिष्यते। सत्यम्। पुनर्विधिग्रहणात् द्वितीयो नियमः क्रियते। पूर्वस्यैव विधौ स्थानिवन्न तु पूर्वपरयोर्विधाविति। तेन ईयतुरिति सिद्ध्यति। अन्यथा हि इणोतुसि द्विर्वचनेचीति यणादेशस्य स्थानिरूपातिदेशाद्द्विर्वचने कृते द्वित्वकाले यणोपहारात् पुनः प्रवृत्तिवेलायां व्याश्रयत्वेन वार्णादाङ्गं बलीय इत्यस्मिन्नप्रवृत्ते वर्णमात्राश्रयत्वेनान्तरङ्गत्वात्सवर्णदीर्घः स्यात्। न चाकृतव्यूहा इति यणिति वाच्यम्। निमित्तविघाताभावात्। कृतेपि यणि स्थानिवत्त्वेन सवर्णदीर्घप्राप्तेः। ततश्च सवर्णदीर्घे कृतेन्तादिवच्चेत्यनेनाभ्यासग्रहणेन ग्रहादभ्यासह्रस्वत्वे दीर्घ

इणः किंतीति दीर्घत्वे कृते दीर्घविधानसामर्थ्यादिणो यणभावे ई अतुरिति स्यात्। सिद्धान्ते तु पूर्वपरयोर्विधौ स्थानिवत्त्वाभावान्निमित्तविघातेनाकृतव्यूहपरिभाषयेणो यणि सिद्धं रूपम्। यद्वा। स्थानिवदिति वतिबलेनाभावोप्यतिदिश्यते। उत्तरसूत्रे द्विर्वचनादिग्रहणाल्लिङ्गात्। विधिग्रहणं तु पूर्वस्यैव न तु पूर्वपरयोरित्येतदर्थमिति दिक्। इह स्थान्यादेशनिमित्तानां त्रयाणां सन्निधानाविशेषेपि स्थान्यपेक्षमेव पूर्वत्वं गृह्यते न तु आदेशापेक्षं निमित्तापेक्षं वा। वैयाकरण इत्यत्र आयादेशापत्तेः। तदुक्तम्। अचः पूर्वत्वविज्ञानादैचोः सिद्धमिति। नन्वेवं समाधेत्यत्र जग्ध्यादेशप्रसङ्गः, ण्यल्लोपाविति पूर्वविप्रतिषेधेन णिलोपे कृते ततः प्रत्ययलक्षणेन वृद्धौ सत्यामेकदेशविकृतस्यानन्यतया ऽदिग्रहणेन ग्रहणात्। एवं घात्यादित्यत्र वधादेशप्रसङ्ग इति चे न। आदिघात्योरपि स्थानिद्वारा ऽनादिष्टादचः पूर्वत्वात्। ननु स्थानिनः पूर्वत्वेपि आदेशस्य किमायातम्। नह्यनादिष्टादचः पूर्वत्वं नाम शास्त्रीयं कार्यं यत्स्थानिवदादेश इति पूर्वसूत्रेणातिदिश्येतेति चेन्न। अनादिष्टादचः पूर्वत्वमुपजीव्याचः परस्मिन्निति शास्त्रे प्रवर्तयितव्ये स्थानिवदादेश इत्यस्य प्रवृत्तिसम्भवात्। तथा चाचः परस्मिन्नित्यतिदेश एव शास्त्रीयं कार्यं तच्च पूर्वसूत्रेणातिदिश्यतइति फलितोर्थः। अत एव नपदान्तसूत्रे सवर्णग्रहणं कृतम्। अन्यथा श्नसोरल्लोपे कृते पश्चाद्भवन्ननुस्वारो नानादिष्टादचः पूर्व इति तस्य विधौ स्थानिवद्भावविरहात्सवर्णग्रहणं व्यर्थमेव स्यात्। नन्वेवं क्षत्रियकण्डूतिरिति न सिद्ध्यति। तथाहि। कण्डूयतेः क्तिचि अलोपयलोपयोः कृतयोरल्लोपस्य स्थानिवत्त्वेनोवङि कृते ऊकारस्यानादिष्टादचः पूर्वस्य स्थाने जातस्योवङः स्थानिवदादेश इति स्थानि-

वद्भावेनानादिष्टादचः पूर्वत्वादचः परस्मिन्निति स्थानिवत्त्वेनाकारेण व्यवायादूठो ऽभावेन स्थानिवत्त्वादेव लोपोव्योर्वलीतिवलोपाभावेन हलिचेति दीर्घे कृते कण्डूव् तिरिति प्राप्नोति । यत्तु यः स्थानिद्वारा पूर्व उवङ् न तस्योट् कस्य तर्हि वकारस्य यस्य चोट् वकारस्य न स स्थानिद्वारा पूर्व इति । तन्न । तेस्तुरितिवत्कण्डू इत्यस्य कण्डुव् इति आदेशात्। तस्य च कण्डुऊ इत्यादेशे कर्त्तव्ये स्थानिवद्भावावश्यम्भावात् । उक्तं हि । सर्वे सर्वपदादेशा इति। अन्यथा निराद्य घात्यादित्यादावपि स्थानिवद्भावानापत्त्या मूलशैथिल्यापत्तेरिति । अत्रोच्यते । अनादिष्टादचः पूर्वतायाः स्थानिद्वारकत्वमानित्यम् । नपदान्तसूत्रे कण्डूतिरिति भाष्योदाहरणाज्ज्ञापकात् । आतोनुपसर्गेक इति सूत्रे कविधौ सर्वत्र प्रसारणिभ्यो ड इति वार्त्तिकस्य तत्प्रघट्टकभाष्यस्य च पर्यालोचनयाप्येवमेव लभ्यते । तथा च तत्र भाष्यम्। योनादिष्टादचः पूर्वस्तत्कार्ये स्थानिवत्त्वं हीति । स्थानिद्वारके तु पूर्वत्वे गृह्यमाणे सम्पूर्णः प्रघट्टक एवासङ्गतः स्यादिति तत्रैव स्फुटीकरिष्यते । तत्रत्यः कैयटस्त्वापाततः । एतेन तितउमाचष्टे तितापयतीति हरदत्तग्रन्थोपि व्याख्यातः । तत्र हि णौ टिलोपे कृते तस्य स्थानिवत्त्वादचोञ्णितीति वृद्ध्यभावेपि अत उपधाया इति वृद्धौ आकारे कृते तस्य स्थानिद्वारा उकारात्पूर्वत्वेन पुग्विधावुकारलोपस्य स्थानिवत्त्वात्पुङ् न प्राप्नोति । न च यस्य पुङ् आकारान्तस्य, नासौ पूर्वः,यश्च पूर्व आकारो, न तस्य पुगिति वाच्यम् । एकदेशविकृतस्यानन्यतया सर्वेसर्वपदादेशा इत्युक्तरीत्या चाकारान्तस्यापि पूर्वत्वानपायात् । तस्मात् स्थानिद्वारकं पूर्वत्वमनित्यमित्येव हरदत्तस्य शरणम् । अत्र के चित् । तितापयतीत्यसाध्वेव । तथाहि । तितउ णिच् इति स्थिते टि-

लोपश्च प्राप्नोत्यत उपधाया इति वृद्धिश्च । उभयोर्नित्ययोः परत्वाद्वृद्धिः । ततष्टिलोपे कृते स्वत एवानादिष्टादचः पूर्वमादन्तं न तु स्थानिद्वारेति पुङ् न प्राप्नोति । तस्माच्छपि णिचो गुणे कृते एचि वृद्धावायादेशे तितायतीति भवति। न च तिता णिच् इति स्थिते अन्तरङ्गत्वादाद्गुणे शप्ययादेशे तितयतीति स्यादिति वाच्यम् । शपि हि गुणे सति वृद्धिरेचीति बाधेनाद्गुणस्य निमित्तविघातस्योत्पत्स्यमानतया ऽकृतव्यूहपरिभाषया पूर्वमन्तरङ्गस्याप्याद्गुणस्याप्रवृत्तेः । अकृतव्यूहपरिभाषा ह्यन्तरङ्गपरिभाषाया अपवाद इत्युक्तम् । न च शपि गुणस्याचः परस्मिन्निति स्थानिवत्त्वादाद्गुणस्य न निमित्तविघात इति वाच्यम् । पूर्वस्यैव विधौ स्थानिवद्भावो न तु पूर्वपरयोर्विधाविति युक्तत्वात् । तस्मात्तितायतीत्येव साधु । न तु तितयति तितापयतीति वा । चङि तु तिता णिच् चङ् तिप् इति स्थिते तनोतेर्ऽउः सन्वच्चेति व्युत्पत्तिपक्षे ऽनभ्यासस्येति द्वित्वनिषेधे टिलोपस्य चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधाद् ह्रस्वाभावे णिलोपे तस्य स्थानिवत्त्वादसिद्धत्वाद्वा ऽऽतोलोपाभावे दीर्घविधिं प्रति स्थानिवत्त्वनिषेधात्सवर्णदीर्घे ऽतितादिति भवति न त्वतितापादिति । अत्रेदं वक्तव्यम् । परत्वाद्वृद्धिरित्यसङ्गतं नित्यत्वेन टिलोपात् । न च वृद्धिर्नित्या । अचः परस्मिन्नितिकार्यातिदेशेन वृद्धिप्राप्तावपि लक्षणान्तरेण प्राप्नुवन्ननित्य इति न्यायेनानित्यत्वात् । एवं च हरदत्तोक्तिः सुष्ठ्वेव । किं तु अनित्यत्वेपि स्थानिद्वारकं पूर्वत्वमिह नेष्यते इत्यस्मिन्नर्थे प्रमाणं चिन्त्यम् । तदेवं स्थानिद्वारकं वा स्वनो वा उभयथाप्यचः पूर्वत्वमिह गृह्यते इति स्थितम् । विधीयते इति विधिरिति कर्मणि किप्रत्ययः । पूर्वस्येति शेषे षष्ठी । अनुवादे परिभाषानुपस्थानात् । पुगाद्यागमेपि विधेये

स्थानिवद्भावः। अच इत्यत्र तु आदेश इति समभिव्याहारात् योग्यताबलात् स्थानिसम्बन्धलाभः, षष्ठीस्थानेयोगेत्यतः पूर्वसूत्रे ऽनुवर्त्तितस्य स्थानेग्रहणस्येहाप्यनुवृत्तेर्वेति प्रसिद्धः पन्थाः। न्यासकारस्तु निमित्तापेक्षमादेशापेक्षं वा पूर्वत्वमित्यपि पक्षौ भाष्ये उपन्यस्तत्वात्स्वीचकार। वैयाकरणादौ तु बहिरङ्गयोरैचोरसिद्धत्वान्न दोष इत्याह। इदं च नाजानन्तर्यपरिभाषाया बहिरङ्गपरिभाषाया एव वा अनित्यतेति प्रागुक्तमुपष्टभ्य समर्थनीयम्। अस्मिन्पक्षे विधिरिति भावे किः षष्ठी तु अनभिहितत्वात्कर्मणीत्यपि सुस्थमेव। किं तु निमित्तापेक्षया पूर्वत्वे त्यदाद्यत्वस्य स्थानिवत्त्वात् द्वाभ्यामित्यादौ दीर्घो न स्यात्। ईद्यतीतीत्वस्य स्थानिवत्त्वादिगन्तलक्षणो गुणो न स्यात्, देयमिति। तथा गुणवृद्ध्योः स्थानिवत्त्वाल्लवनं लावक इत्यवावौ न स्याताम्। द्वयोरेकस्य, देयमृणे, किरतौ लवनइत्यादिनिर्देशोपष्टम्भेनानित्यताश्रयणं तु क्लिष्टामिति दिक्। पूर्वत्वं च नाव्यवधानगर्भं किं तु व्यवहितसाधारणम्। तस्मिन्निति निर्दिष्टइति सूत्रे निर्दिष्टग्रहणाल्लिङ्गात्। चङ्परानेद्भासे निषेधारम्भाच्च। तेन पटयति अवधीदित्यादौ स्थानिवद्भावः सिद्ध्यति। वधादेशो ह्यदन्तः। स्यादेतत्। पटयतीत्यत्रान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदत्वाज्जश्त्वं प्राप्नोति। न च स्थानिवद्भावः। जश्त्वविधौ तत्प्रतिषेधात्। सत्यम्। कर्मसमर्पकात् प्रातिपदिकादेव णिजुत्पत्तिर्न तु सुबन्तादिति वक्ष्यमाणत्वात्। सुबन्ताण्णिजिति पक्षेपि इष्टवदित्यतिदिष्टया भसंज्ञया पदसंज्ञाया बाधात्। पटुमित्यस्यैव हि भसंज्ञा प्रवृत्तेति कथं तत्र पदसंज्ञा प्रवर्त्तेत। तत्र चाप्रवृत्ता कथन्तरामेकदेशविकृते लभ्येत। स्रग्विणमाचष्टे स्रजयतीत्यादौ हि प्रातिपदिकाण्णिजुत्पत्तिरिति पक्षेप्येषैव गतिरिति वक्ष्यामः।

अवधीदित्युदारणं तु भाष्यमते। आर्द्धधातुकीयाः सामान्येन भवन्तीति पूर्वसूत्रे एवोपपादितत्वेनार्द्धधातुकोपदेशे यदकारान्तं तस्य लोप इति लोपसम्भवात्। वार्त्तिकमते तु लिङीति परसप्तमीत्युक्तम्। तथा च अत् पदित्यादाविवातो लोपो न प्राप्नोति। अत एव हलन्त एकयमादेश इति तन्मतम्। वृद्धिस्तु न भवति। वध्यादेशे वृद्धितत्वप्रतिषेध इति पूर्वसूत्रस्थवार्त्तिकात्। एवमखद्वको बहुखद्वक इत्यादौ केण आपोन्यतरस्यामिति ह्रस्वस्य स्थानिवद्भावात् ह्रस्वान्तेन्त्यात्पूर्वमिति खकाराकारस्योदात्तो न भवति किन्तु कपिपूर्वमित्युत्तरपदान्तोदात्तत्वमेव भवति। अचितीक बहुचितीक इत्यादौ तु चितेः कपीति दीर्घस्य स्थानिवद्भावाच्चिशब्देकारस्य उदात्तता भवति। न चोभयत्रापि स्वरविधौ न स्थानिवदिति निषेधः शङ्क्यः। लोपाजादेशमात्रविषयः स इति वक्ष्यमाणत्वात्। एवं पद्व्यामृद्वयेति बहुभिर्वृत्तिकारैरुदाहृतत्वात् मूर्द्धाभिषिक्तमिति भाष्ये व्यवहृतमप्युदाहरणं साध्वेव। अकृतव्यूहन्यायेन प्रथमं पूर्वयणादेशायोगात्। न चैवं कर्त्र्या हर्त्र्येत्यादावुदात्तयण इति विभक्तेरुदात्तत्वं न स्यादिति वाच्यम्। स्वरविधौ व्यञ्जनस्याविद्यमानवद्भावेन पूर्वयणमेवाश्रित्य तत्समाधानात्। न च पूर्वस्मादपि विधौ स्थानिवद्भावाद्व्यञ्जनमेव नेति वाच्यम्। रेफस्यादिष्टादचः पूर्वत्वात् स्थानिद्वारकस्य पूर्वत्वस्यानित्यत्वात्। निष्ठायां सेटीति सेड्ग्रहणेन पूर्वस्माद्विधौ स्थानिवद्भावस्यानित्यत्वाच्च। तस्मान्मूर्द्धाभिषिक्तमुदाहरणमितिपक्षो नातीव दुःष्यति। अत एव ह्याश्रीयमाणायामेव प्रकृतौ स्थानिवत्त्वमिति पक्षे अकुर्व्याशामलुन्याशां व्यत्यजन्याशां राय्याशामित्यत्र क्रमेण येचेत्युलोप ईहल्यघोरितीत्वं येविभाषारायोहलीत्यात्वं च प्रा-

प्नोतीति भाष्यवार्तिकयोरुक्तम् । यत्त्वन्तरङ्गं बलवदिति वा ऽसिद्धपरिभाषां वाश्रित्य पद्व्या मुद्व्येत्युदाहरणनिराकरणपरं भाष्यं तत्तु अकृतव्यूहवचसो ऽनित्यताभिप्रायेण कथं चिन्नेयमिति दिक् ॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ पदान्तादिकर्मकेषु विधिषु पूर्वेण प्राप्तः स्थानिवद्भावो न स्यात् । पदान्ते । कानि सन्ति । कौ स्तः । इह यणावादेशयोः कर्त्तव्ययोः श्नसोरल्लोपो न स्थानिवत् । न चानादिष्टादचः पूर्वत्वविरहादेव न स्थानिवदिति वाच्यम् । वाक्यादपोद्धृत्य पदानि संस्क्रियन्तइति पक्षे ऽनादिष्टादचः पूर्वत्वस्य सत्त्वात् । न हि पदान्तरनिरपेक्षमेव पदमिहशास्त्रे संस्कार्यमिति नियमः । युष्मद्युपपदइत्याद्यनुशासनस्यासंगतिप्रसङ्गात् । एतच्चाङ्गसंज्ञासूत्रे कैयटेन ध्वनितम् । केवलपदसंस्कारपक्षे अदड्ढीच इत्यादौ अच इत्यल्लोपो न स्थानिवदित्युदाहार्यम् । विधिशब्दश्चेह न कर्मसाधनः । तथात्वे हि कर्मधारयो वा स्यात् । शेषषष्ठ्यन्तेन सह तत्पुरुषो वा । नाद्यः । विधिशब्दस्य क्रियाशब्दतया पूर्वनिपातप्रसङ्गात् । नान्त्यः । पदान्तस्य कस्मिंश्चित्कर्त्तव्ये न स्थानिवदिति पर्यवसानेन वृक्षवद्इत्यत्र वलोपापत्तेः । द्वन्द्वनिर्दिष्टेषु द्विर्वचनादिषु अनन्वयापत्तेश्च । तस्माद्भावसाधन एवाऽन्तरङ्गत्वाच्च । अत एव कर्मषष्ठ्यन्तेन समासः । शुक्री तटीत्यादौ पदसंज्ञायां कर्त्तव्यायां यस्येति लोपः स्थानिवदेव । न हि स्वादिष्विति सूत्रेण पदस्यान्तो विधीयते येन निषेधः स्यात् । किं तु संज्ञामात्रम् । तत्रापि यथोद्देशपक्षः । जश्त्वादिकार्यकालत्वे पूर्वत्रासिद्धे नेति निषेधापत्तेः । एकदेशविकृतस्यानन्यत्वाद्वेतस्वानित्यत्र रुः प्राप्तः । बहिरङ्गस्यासिद्धत्वान्नेति वक्ष्यते । भा-

ष्ये तु पदसंज्ञायाः पदान्ततां स्वीकृत्य पदे अन्त्र इति भसंज्ञापि पदकार्यमिति च द्वेधा समाहितम्। तत्रान्त्ये षडिके वचनसामर्थ्यादिति बोध्यम्। वाचिकषडिकौ तु पञ्चमे वक्ष्येते। द्विर्वचने। सुध्युपास्यः। स्थानिवद्भावनिषेधसामर्थ्यादेव बहिरङ्गपरिभाषापीह न प्रवर्त्तते। नाजानन्तर्यइति निषेधाद्वा। वरे इति निपातनादलुक् द्वन्द्वश्च। वरे योजादेशः स न स्थानिवत्। यायावरः। यातेर्नित्यं कौटिल्ये इति यङ् यश्चयङ इति वरच्। तन्निमित्तको ऽतो लोपः। स च आतो लोप इटि चेत्यालोपे कर्त्तव्ये न स्थानिवत्। नन्विह परनिमित्तकत्वमेव नास्ति। आर्द्धधातुकइति विषयसप्तम्यभ्युपगमात्। अत एव हि अचोयदिति सूत्रे ऽज्ग्रहणं कृतम्। अन्यथा हलन्ताण्यतो विशेषविहिततया परिशेषादच एव यद्भविष्यति किं तेन। विषयसप्तम्यां तु दित्स्यं धित्स्यमित्यादावजन्तभूतपूर्वादपि यात्सिद्धये अज्ग्रहणमिति यतोनाव इत्याद्युदात्तस्सिध्यति। सत्यम्। वरेग्रहणेन परसप्तमीपक्षो ज्ञाप्यते। तथा चानुदात्तेतश्च हलादेरिति सूत्रे आदिग्रहणं कृतम्। हलन्तादिति मा विज्ञायीति। अस्ति च हलन्तविशेषणस्य व्यावर्त्यं जुगुप्सनो मीमांसन इति। विषयसप्तमीत्वेत्विहापि अतोलोपे हलन्तत्वाद्युचा भाव्यमेवेति हलन्तविशेषणवैयर्थ्यात्सामर्थ्यादेवादिपरिग्रहसिद्धौ हल इत्येव ब्रूयात्। एवं च यातेर्यङन्तात्क्विचि अतो लोपे यलोपविधिं प्रति स्थानिवत्त्वनिषेधाद्यलोपे च यायातीति स्थिते यङकारलोपस्य स्थानिवत्त्वादतो लोप इटि चेत्याकारलोपे पुनर्यलोपे यातिरिति भवति। न च पुनराकारयकारयोर्लोपे सति क्विच्प्रत्ययमात्रं श्रूयेतेति वाच्यम्। आल्लोपस्य स्थानिवत्त्वात्। चिणोलुङ्न्यायेनासिद्धत्वाद्वा। यलोपे उदाहरणान्तरमपि। तद्यथा। कण्डूयतेः

क्तिच्। कण्डूतिः। क्तिन्निति तु काशिकायां प्रमादः। अप्रत्ययादित्यनेन बाधात्। न च ज्ञप्तिरित्यादाविवेह आबादित्वकल्पनं बहुलग्रहणं वा शरणीकरणार्हम्। भाष्यकारेणैव कण्डूयेत्येव भवितव्यमिति वदता एतस्यापशब्दतोक्तेः। तस्मादयं क्तिजेव ततोल्लोपयलोपौ अल्लोपस्य स्थानिवत्वादुवङ् ततश्छ्वोः शूडित्यूठ्। न चोठ्यपि स्थानिवत्वम्। आदिष्टादचः पूर्वत्वात्। अत एव ऊठः पुनरुवङ् न भवति। सर्वे सर्वपदादेशा इत्याश्रित्य स्थानिद्वारकं पूर्वत्वं यद्यपीह वक्तुं शक्यते भाष्यमते लोलुवः पोपुव इत्यादौ यथा। तथापि स्थानिद्वारकं पूर्वत्वं काचित्कमेवेति पूर्वसूत्रे एवोक्तम्। तथा तिष्ठतेर्यङन्तात् क्तिच् अल्लोपयलोपयोस्तेष्ठीतीति स्थिते अल्लोपस्य स्थानिवत्त्वादियङ् यलोपः। तेष्ठितिः। तथा पेपीयतेः क्तिचि अल्लोपयलोपयोरेरनेकाच इति यणि यलोपे कृते पेप्तिरिति भवति। शो तनूकरणे। यङन्तात्क्तिचि अल्लोपयलोपाल्लोपेषु पूर्वत्रासिद्धे नेति स्थानिवत्त्वनिषेधाच्छशां ष इति षत्वे कृते शाष्टिरिति भवति। एवं चेचीयतेश्चेक्तिरिति दिक्। तदेवं वरेयलोपेति नैकं निमित्तं किं तु द्वे इति स्थितम्। के चित्तु वरई इति ईकारं प्रश्लिष्य ईकारे परतो विधौ न स्थानिवदिति व्याचख्युः। तेनामलक्याः फलमामलकम्। नित्यं वृद्धशरादिभ्य इति मयट्। फले लुक्। ततो लुक् तद्धितलुकीति ङीषो लुक्। स च यस्येतिलोपे न स्थानिवत्। पूर्वोक्तव्याख्याने तु लुका लुप्तं न स्थानिवदिति वचनं करिष्यते। तत्र च लुप्तमिति नपुंसके भावे क्तः। लुङ् न स्थानिवदिति फलितोर्थः। स्वरे। चिकीर्षकः। सनो ऽतो लोपो लितीति ककारेकारस्योदात्तत्वे कर्त्तव्ये न स्थानिवत्। न च लितीत्यस्यारम्भसामर्थ्यम्। कारक इत्यादौ सावकाश-

त्वात् । भाष्ये तु आकर्षिक इत्युदाहृतं, तदापाततः । प्लुतो लित्त्वसामर्थ्यात् स्थानिवद्भावकृतव्यवधाने सत्यपि लित्स्वरस्य सुवत्त्वात् । घ्नन्तीत्यादौ कुत्त्ववत् । सवर्णानुस्वारयोश्शिण्ढि । पिण्ढिाश्नसोरल्लोपोत्रन स्थानिवत् । अनुस्वारस्यानादिष्टादचः पूर्वत्वं तु स्थानिद्वारेत्युक्तम् । यद्यपि सवर्णग्रहणमात्रेणानुस्वारोप्याक्षेप्तुं शक्यते तथापि विशेषापेक्षं ज्ञापकामित्यापि सम्भाव्येत । तथा च यत्र न परसवर्णप्रसङ्गः शिंषन्तीत्यादौ तत्र स्थानिवद्भाव निषेदधुमनुस्वारग्रहणम् । अचः परस्मिन्निति सूत्रे उक्तरीत्या अभ्यासस्यासवर्णइत्यादिषु सवर्णइति निषेधस्य लब्धावकाशतया शिण्ढीत्यादेरपि असिद्धत्वापत्तेश्चेति दिक् । दीर्घे । प्रतिदीव्ना । इह हलि चेति दीर्घे ऽल्लोपो न स्थानिवत् । यत्तु काशिकायामुक्तम् उपधायां चेति दीर्घ इति, तत्प्रामादिकम् । तथा च उपधायां चेत्यत्रोक्तम् । प्रतिदीन्वेत्यत्र हलिचेति दीर्घ इति । यद्वा । आचारकिबन्तात्किप् चेति किपि समाधेयम् । नन्वेवमनुनासिकस्य किझलोरिति दीर्घः स्यात् । सत्यम् । अकृतव्यूहपरिभाषया भाविनमल्लोपमालोच्यान्तरङ्गोपि दीर्घो न करिष्यते, जग्मुष इत्यत्रेडागमनकारादेशाविवेति बोध्यम् । ननु स्थानिवत्त्वाभावेप्यसिद्धं बहिरङ्गमित्यल्लोपस्यासिद्धत्वादीर्घो न स्यादिति चेत् । न । कृतितुग्विधिग्रहणेन बहिरङ्गपरिभाषाया अनित्यत्वस्य ज्ञापितत्वात् । यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति दीर्घस्यासिद्धतयान्तरङ्गाभावेन परिभाषाया अप्रवृत्तेश्च । जशि । सग्धिश्च मे । बब्धान्ते हरी । तथाहि । अदनं ग्धिः । अदेः क्तिनि बहुलं छन्दसीति घस्लादेशः । घसिभसोर्हलिचेत्युपधालोपः । झलोझलीति सकारलोपः । धिसकारे सिचो लोप इत्यस्य भाष्यकृता-

नाश्रयणात्। वार्त्तिकमते छान्दसो वर्णलोपः। झषस्तथोरिति धत्वम्। न च तस्मिन्कर्त्तव्ये पूर्वस्मादपीति स्थानिवद्भावः। पञ्चमीसमासस्यानित्यतायाः पूर्वसूत्रएवोपपादितत्वात्। घस्य झलाञ्झशिति जश्त्वे कर्त्तव्ये उपधालोपो न स्थानिवत्। समानाग्निधिः सग्निधिः। सहस्यसःसज्ञायामिति सूत्रात्स इत्यनुवर्त्तमाने समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्कोष्विति सूत्रेण समानस्य सभावः। बन्धामिति भसेर्लोद्। तसस्ताम्। शपः श्लुः। अन्तरङ्गत्वाद् द्वित्वमभ्यासकार्यम्। ततो घसिभसोरित्युपधालोपादि प्राग्वत्। चरि। जक्षतुः। जक्षुः। घसेर्लिट् अतुस् उस् च। गमहनेत्युपधालोपः। खरि चेति चर्त्वं प्रति न स्थानिवत्। तत्र वार्त्तिकम्। स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति। तेनान्यः स्थानिवदेव। पञ्चभिररत्निभिः क्रीताः पञ्चारत्नयः। वेदे तु पञ्चारत्न्यः। जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधाया इति गुणाभावे यण्। तस्य स्थानिवद्भावादिगन्तकालेत्यादिना पूर्वपदप्रकृतिस्वर इत्याहुः। यद्यपि असिद्धं बहिरङ्गमित्यनेनापीदं सिध्यति तथापि अकृतव्यूहपरिभाषामाश्रित्य योज्यम्। अचितीको खट्वक इत्यत्र हूस्वान्तेत्यात्पूर्वमित्यस्य क्रमेण प्रवृत्त्यप्रवृत्ती फलमिति तु पूर्वसूत्रे एवोक्तम्। न च तत्र बहिरङ्गपरिभाषायाः प्रसङ्गोस्ति। किर्योर्गिर्योः। व्युत्पत्तिपक्षे हलि चेति दीर्घः प्राप्तः। यणः स्थानिवद्भावान्न भवति। अच इरित्यधिकारे भुजेः किच्च, कृगृशृपॄकुटिभिदिछिदिभ्यश्चेति इः स च कित्। यत्तु हरदत्तेन न्यासकृता च कृग्रोरिच्चेत्युपन्यस्तं तत् क्व चिदुणादिवृत्तौ अन्वेषणीयम्। वाय्वोः। इह यलोपो न। अस्मिंश्च वार्त्तिके स्वरग्रहणमात्रमावश्यकम्। किर्योर्गिर्योरिति तु उपधायां चेति सूत्रे वृत्तिकारोक्तरीत्या उ-

णादीनामव्युत्पत्तिपक्षालम्बेनापि सिद्धम् । वाय्वोरिति तु बहिरङ्गस्यासिद्धतया सिद्धम् । किलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् । पूर्वत्रासिद्धे च । तस्य दोषः संयोगादिलोपलत्वणत्वेषु । अस्यार्थः । क्वौ विधिं प्रति न स्थानिवत् । लवमाचक्षाणो लौः । अत्र णिचि यष्टिलोपो यश्च क्वौ णिलोपस्तदुभयं ह्वोः शूडिति वकारस्य क्विन्निमित्ते ऊठि कर्त्तव्ये न स्थानिवत् । एत्येधत्यूठ्सु इति वृद्धिः । तथा पिपठिषि ब्राह्मणकुलानीति दीधीवेवीटामितिसूत्रे यदुदात्तं तदपि क्वौ विधिं प्रतीति व्याख्याने एव सङ्गच्छते । क्वौ लुप्तं प्रति न स्थानिवदिति व्याख्याने तु लौः पिपठिषीत्युभयमपि न सिद्ध्येत् । णिचि टिलोपस्य स्थानिवद्भावे ऊठो ऽसम्भवात् । पिपठिषतेरप्रत्यये अतो लोपे नपुंसकबहुवचने शौ झल्लक्षणे नुमि कर्त्तव्ये अतो लोपस्य स्थानिवत्वनिषेधेन नुम्प्रसङ्गाच्च । एतच्च दीधीवेवीटामिति सूत्रे कंड्वादिसूत्रे च मिश्रग्रन्थे स्फुटम् । कैयटोपि दीधीवेवीटामित्यत्र क्वौ विधिं प्रतीत्यर्थो व्यवस्थितो न तु क्वौ लुप्तं न स्थानिवदितीत्याह । अत्र व्यवस्थितइति वदता क्वौ लुप्तं न स्थानिवदिति पक्षोपि क्व चिदाश्रीयतएव, नियमः परं नास्तीति सूचितम् । लुप्तामिति नपुंसके भावे क्तः । एवं च सख्युर्गोमान् पदः त्वम् अहमिति सिद्धम् । तथाहि । ख्यत्यात्परस्येतिसूत्रे भाष्यम् । सखीयतेः सख्युः लूनीयतेर्लून्युरिति । तत्र सखीयतेः क्विपि अल्लोपे यलोपे अल्लोपस्य स्थानिवद्भावात् परत्वात्क्विलोपं बाधित्वा इकोयणचीति यण् स्यात् । ततो यलोपे सखो लून इति स्यात् । अत एव क्वौ लुप्तं न स्थानिवदिति तत्र यणं परिजहार कैयटः । तथा उगिदचामिति सूत्रे अधातुभूतपूर्वस्यापि नुमर्थमधातुग्रहणमित्युक्त्वा गोमत्यतेरप्र-

त्ययेगोमानित्युदात्तं भाष्ये । तत्राप्यल्लोपस्य स्थानिवत्त्वात्सर्वनामस्थानपरत्वं नास्तीति नुम् न स्यात् । न चाधातुग्रहणसामर्थ्यात्स्थानिवद्भावकृतव्यवाये सत्यपि नुम् स्यादिति वाच्यम् । आचारक्विबन्तात्क्विप्चेति क्विपि चरितार्थत्वात् । तस्मात्क्वौ लुप्तं नेत्येव शरणम् । ननु गोमन्त्यतेर्गोमततेर्वा उभयथापि गोमानिति न सिध्यति । अत्वसन्तस्येति दीर्घविधौ अधातोरिति विशेषणात् । सत्यम् । तत्राधातुग्रहणमसन्तस्यैव विशेषणं न त्वत्वन्तस्यापीति वक्ष्यमाणत्वान्न दोषः । तथा येनविधिस्तदन्तस्येति सूत्रे केवलोपि पाच्छब्दोस्ति । पादयतेः पात् । पद इति भाष्यम् । अत्रापि स्थानिवद्भावाद्व्यवधानेन पद्भावो न स्यात् । क्वौ लुप्तं नेति सिध्यति । अत एव पादस्य पादहस्त्यादिभ्य इति न सूत्रितम् । प्रतिपदोक्तस्यास्यैव पदादेशो मा भूत् । किं तु क्विबन्तस्यापि यथा स्यादिति । एवं च पादस्य लोप इति गुरुनिर्देशं कुर्वता सूत्रकृतैव क्वौ लुप्तं न स्थानिवदिति ज्ञापितम् । तच्च क्वाचित्कमिति तु प्रकृतसूत्रस्थेनैवं विज्ञायते क्वौ लुप्तं नेति भाष्यस्यार्थः । विशब्दमाहात्म्यात् रूयत्यात्सूत्रादिभाष्याच्चेति व्यवस्थितशब्दं प्रयुञ्जानेन कैयटेन ध्वनितम् । युष्मानाचष्टे युष्मयति । ततः क्विपि णिलोपे सौ त्वाहौसौ इति कर्त्तव्ये णिलोपो न स्थानिवत् । तदुक्तम् । स्थानिवत्त्वं च णेरत्र क्वौ लुप्तत्वान्न विद्यते इति । स्थानिवत्त्वमिति । लोपस्येति शेषः । णेः क्वौ लुप्तत्वादित्यन्वयः । अस्तु तर्हि क्वौलुप्तमित्यपि नित्यमेव । तावतापि लवमाचक्षाणो लौरित्यस्य सिद्धेरिति चेन्न । पिपठिषीत्यस्यासिद्धिप्रसङ्गात् । देवयतेर्दयूरिति तु इह कैयटेन यदुदात्तं क्वौ लुप्तं नेति सिध्यतीति । तस्यायमाशयः । यद्यपीह क्वौ विधिं

प्रत्यूद् सिद्धः । तथापि तस्य स्थानिद्वारा अनादिष्टादचः पूर्वत्वेन णिलोपस्य स्थानिवद्भावादचोञ्णितीति वृद्धिप्रसङ्गः । तस्मात्क्वौ लुप्तं नेत्येव शरणम् । यत्तु लोपो व्योरिति सूत्रे कण्ड्यतेः क्यजन्तादप्रत्यये कण्ड्वः कण्डुवाविति व्युत्पादयन् कैयट आह । अल्लोपस्य स्थानिवद्भावाद्यण् । तस्य ऊठ् । न च ऊठि कर्त्तव्ये स्थानिवत्त्वेन प्रतिबन्धः स्यादिति वाच्यम् । वकारस्यादिष्टादचः पूर्वत्वादिति, तत्तु स्थानिद्वारकं पूर्वत्वमनित्यमित्याश्रित्य तद्रीत्या तु दयूरित्यपि सुसाधमेव । ननूभयथापि दयूरित्यत्र प्रत्ययलक्षणेन वृद्धिः स्यादेवेति चेत् । न । बहिरङ्गस्य ऊठो वृद्धिं प्रत्यसिद्धत्वात् । एवं च स्थानिवद्भावे सत्यपि न का चित्क्षतिः। बहिरङ्गत्वेनैव सर्वसमाधानात् । तस्माद्दयूरिति पक्षद्वयेपि सिद्ध्यतीत्येव तत्त्वम् ।नन्वेकदेशविकृतस्यानन्यत्वादिव औत्स्यादिति चेन्न । निरनुबन्धपरिभाषया अधातुग्रहणानुवृत्तेर्वा अक्षद्यूरित्यत्र न औदिति दिव औत्सूत्रे भाष्ये एव स्पष्टत्वात् । यद्यप्युगिदचामिति सूत्रे अधातुभूतपूर्वोदित्यर्थस्तथापीह शब्दाधिकार इति भावः । एतेन हलिचेति दीर्घः दीव्यतीति नामधातुप्रकरणे कौमुदीप्रासादौ प्रत्युक्तौ । दिवोर्दिविरिति न्यासोद्धितसूत्रेण डिविरिति वदन्माधवोपि दिव्यतीति ह्रस्वमेवोपजगाम । प्रकृतमनुसरामः । द्विर्वचनादौ तु ओः सुपीति यण् । दय्वौ दय्व इत्यादि खलपूवत् । कण्ड्वः कण्डुवौ कण्डुव इत्यादि तूवङेव । संयोगपूर्वकतया यणो ऽप्राप्तेरिति दिक् । अत्रायं संग्रहः । सख्युर्गोपाद् पदस्त्वं च क्वौ लुप्तस्य निदर्शनम् । अनित्यत्वे पिपठिषि क्वौ विधौ ल्यौद्वेयोर्दयूः । लुक् न स्थानिवत् । आमलक्याः फलम् आमलकम् । फले लुकः प्रत्याख्यानपक्षे तु पञ्चभिः पद्वीभिः क्रीतः पंचपदुरित्युदाहार्यम् । तथा पंच इन्द्राण्यो ऽग्नाय्यश्च देवतास्य पञ्चेन्द्रः पञ्चाग्निः ङीषा स-

न्नियुक्त आनुक् ऐकारश्च श्रूयेत । न चं सन्नियोगशिष्टन्यायेन निवृत्तिः । परतद्धितलुङ्निमित्ताया ङीष्निवृत्तेः पूर्वयोरानुगैकारयोर्निवृत्तौ कर्त्तव्यायामचः परस्मिन्निति स्थानिवत्त्वात् । ये तु पूर्वोक्तरीत्या वर ई इतीकारप्रश्लेषं कुर्वन्ति तेषामिह लुग्ग्रहणं न कार्यम् । उपधात्वे कर्त्तव्ये न स्थानिवत् । तेन परिखाशब्दाच्चातुरर्थिके अणि कृते वृद्धादकेकान्तखोपधादिति पारिखशब्दात्खोपधलक्षणे छप्रत्यये पारिखीयः सिध्यति। अन्यथा उपधासंज्ञायाः पूर्वविधित्वेन तत्र कर्त्तव्यायामाल्लोपः स्थानिवत्स्यात् । नन्वेवं पटयतीत्यादौ वृद्धिः स्यादिति चेन्न । यत्रोपधासंज्ञामुपजीव्य प्रत्ययो विधित्सितस्तत्रैवायं निषेध इति भाष्ये स्थितत्वात् । अत्र चङ्परनिर्ह्रासग्रहणमेव ज्ञापकम् । कथं तर्हि भाष्ये यलोपे सौरी बलाकेत्युदाहरणं दत्वा उपधाविधौ नेत्येव सिद्धमित्युक्तमिति चेत् । अनास्थावादमात्रं तदित्यवेहि । तत्र हि तेनैकादिगित्यणन्तान्ङीप्यल्लोपद्वयस्यापि यलोपे कर्त्तव्ये स्थानिवद्भावे निषिद्धे समानाश्रयस्याणो लोपस्याभीयत्वेनासिद्धतायां यलोपः सिद्ध्यतीति यलोपे न स्थानिवदित्यस्यैव सौरीत्युदाहरणम् । उपधात्वं तत्र लोपे उपयोगि न तु प्रत्ययविधाविति स्थितम् । चङ्परे णौ यो ह्रस्वः स चङ्परनिर्ह्रासस्तत्र न स्थानिवत् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । प्रथमणिचो लोपस्य स्थानिवत्त्वादनुपधाकार इति णौचङीत्युपधाह्रस्वो न प्राप्नोति । णिसामान्यग्रहणादप्येतत्सिद्धम् । इदं तूदाहरणम् । वारि आरूयत् , अवीवरत् । न च नाग्लोपीति निषेधः शङ्क्यः । परत्वाद् वृद्धौ सत्यां टिलोप इत्यभ्युपगमेनाग्लोपित्वाभावात् । अत एव हलकलेत्यदन्तनिपातनं सार्थकम् । कुत्वे न स्थानिवत् । अर्चयतेरौणादिकः कम-

त्ययः । अर्कः । पाचयतेः क्तिच् । पाक्तिः । चोः कुरिति कुत्वे णिलोपो न स्थानिवत् । इह सूत्रे जश्चर्ष्वत्येव सिद्धे विधिग्रहणं द्वन्द्वाश्रयेण विध्यन्तरोपसंग्रहार्थम् । तदव्युत्पादनार्थं च क्विब्लुगित्यादि वार्त्तिकमिति निष्कर्षः । तत्रापि क्विचङ्परनिर्ह्रासोपधानां ग्रहणमावश्यकम् । लुक ईकारप्रश्लेषेण गतार्थत्वात्कुत्वस्य पूर्वत्रासिद्धीयत्वाच्चेत्यवधेयम् । चजोरिति कुत्वे वोदाहरणमन्वेषणीयम् । पूर्वत्रासिद्धे च न स्थानिवत् । पापच्यतेः क्तिच् । पापक्तिः । यायज्यतेर्यायष्टिः । पाचयतेः पाक्तिः । यायजयतेर्यायष्टिः । इहाल्लोपणिलोपौ कुत्वषत्वयोर्न स्थानिवत् । एवं लेहयतेर्लेढिः । दोहयतेर्दोग्धिः । वेशयतेर्वेष्टिः । दाशयतेर्दाष्टिरित्याद्यूह्यम् । न्यायसिद्धं चेदम् । अचः परस्मिन्नित्यतिदेशं प्रति त्रिपादीस्थस्यासिद्धतया तस्मिन् कर्त्तव्ये ऽतिदेशाप्राप्तेः । न चैवं स्थानिवत्सूत्रस्याप्यप्रवृत्तौ राम इति विसर्गो न स्यादिति वाच्यम् । प्रत्ययः परश्चेत्यादिनिर्देशैर्भोभगोअघो इति सूत्रे ऽश्ग्रहणेन च तत्प्रवृत्तेर्ज्ञापितत्वादित्यवधेयम् । एवं स्थिते द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः सूत्रे न पाठ्याः । किं तु नपदान्तवरेयलोपस्वरेष्वित्येव पाठ्यमिति भाष्यवार्तिकयोः स्थितम् । स्यादेतत् । यदि दीर्घग्रहणं त्यज्यते तर्हि साप्तमिके दीर्घविधौ स्थानिवद्भावः प्रसज्येत । तथा च चिण्णमुलोरिति सूत्रे यङन्ताण्णिजन्ताद्वा णिचि तताईचाणि अशंशामि अशामीति यदुदाह्रियन्ते तन्न सिद्ध्येत् । न च दीर्घग्रहणसामर्थ्यात्स्थानिवद्भावबाधः कर्मेणिङ्सूत्रे हरदत्ताद्युक्तरीत्या चिण्णमुलोर्दीर्घ इत्यत्र कैयटाद्युक्तरीत्या चाहिडि अहीडीत्येतत्सिद्ध्या अहेडीत्यस्य निवृत्त्या तस्य चरितार्थत्वात् । उच्यते । णित्वजात्यैक्यं गृहीत्वा अशामीति सिद्धम् । अशंशामीति तु यङ्लुगन्ताण्णिचि भवि-

ष्यति। न हि यङ्यङ्लुकोः स्वरे ऽर्थे वा कश्चिद्विशेषोस्ति। येन यङ्येव साधयितुं क्लिश्येत। एवञ्च ग्राहितमित्याद्यपि सिद्धम्। पूर्वस्मादपि विधौ स्थानिवद्भावेन णिचा व्यवधाने सति ग्रहोलिटीति दीर्घस्याप्रवृत्तेः। सूत्रमते तु विहितविशेषणाश्रयणाद् ग्राहितमित्यादौ न दीर्घः। अत एव यङन्तात्तृचि जरीगृहीतेत्यत्र न दीर्घः स्थानिवद्भावात्। सूत्रमते विहितविशेषणाच्चेति स्थितम्। यङ्लुगन्तात्तु तृजादाविटो दीर्घो भवत्येवेति माधवः। द्विः प्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तात्। ग्रहेर्विहितत्वानपायात्। यङ्लुको ऽनैमित्तिकतया ऽज्झलादेशतया लुका लुप्तत्वाच्च स्थानिवद्भावोपि नास्तीति माधवस्याशयः। वस्तुतस्तु यङ्लुक्यपि इटो दीर्घो ऽनिष्ट एव। एकाचोद्वेप्रथमस्येति सूत्रे भाष्यकैयटादिपर्यालोचनया तथैव निर्णयात्। तथा च तत्र ग्रहेरङ्गादिति भाष्यमुपादाय कैयट आह। तृचो हि जरिगृहीत्यङ्गं न तु ग्रहिः। विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणमिति। यद्यपि तत्र यङन्तं प्रक्रम्येदमुक्तं तथापि युक्तिसाम्याद्यङ्लुङन्तेपि न दीर्घ इति लक्ष्यते। अत एवैकाचोद्वे इति सूत्रे हरदत्तोपि यङन्ते दीर्घमाशङ्क्याह। एकाचउपदेशइत्यतो दीर्घविधावेकाज्ग्रहणमनुवर्त्ततइति। न ह्यत्र पक्षे यङ्लुकि दीर्घस्योक्तिसम्भवोप्यस्ति। नन्वेवं ग्रहोलिटीति सूत्रे यङ्लोपे चोक्तमिति वार्तिकव्याख्यावसरे स्थानिवद्भावाद्विहितविशेषणाश्रयणाद्वा यङन्ते दीर्घं परिहरन् कैयटो विरुध्येत। यङ्लुगर्थं यथाश्रुतरूपाश्रयणस्यैकाज्ग्रहणानुवर्तनस्य वा आवश्यकतया तेनैव गतार्थत्वादिति चेन्न। ग्रहोलिटीत्यत्रत्यकैयटग्रन्थस्योपायस्योपायान्तरादूषकत्वादिति न्यायेन यङन्ते उपायान्तराभिधानपरत्वात्। अत एव तत्र कैयट आह। अन्यत्रास्य दोष-

स्य सम्यगुद्धृतत्वादिति। एवं हि वदन् तत्रत्यपरिहारस्याव्यापकतामेकाच्सूत्रोक्तस्यैवावश्यादर्तव्यतां चाभिप्रैति। न च यथाश्रुतरूपपक्षे गृहीतमित्याद्यसिद्धिः। अङ्गसंज्ञाप्रवृत्तिवेलायां यथाश्रुतरूपस्यैव तत्र सत्त्वात्। ग्राहितादौ तु नैवम्। एकाच इति समाधानं तु णिज्भिन्नविषयकमेव। तस्मात्, यङ्लुङन्ताण्णिजन्ताच्च यङन्ताच्च ग्रहेरिटः। द्विधा त्रिधा चतुर्द्धा च दीर्घो नेति व्यवस्थितम्॥ माधवग्रन्थस्तु विहितविशेषणपक्षस्य मुख्यतां पक्षान्तराणामभ्युच्चयतां च परिकल्प्य कथं चिन्नेय इति प्रतिभातीति दिक्। तस्य दोष इत्यादेरयमर्थः। तस्य पूर्वत्रासिद्धेचेत्यस्य स्थलत्रये दोषः। अतिप्रसक्तिः। तस्मात्तत्र स्थानिवद्भावस्य प्रतिप्रसवः कर्त्तव्य इत्यर्थः। तेन वाक्यर्थं वास्यर्थमित्यत्र स्कोरिति लोपो न। निगार्यते। निगाल्यते। अचिविभाषेति लत्वं सिद्ध्यति। तथा माषवपनीत्यत्र णत्वं न भवति। अल्लोपस्य स्थानिवत्त्वेन नकारस्य समासान्तत्त्वाभावात्। न चासत्यपि स्थानिवद्भावे ङीबेव समासान्तो न तु नकार इति वाच्यम्। ङीबुत्पत्तेः प्रागेव समास इति द्वितीये वक्ष्यमाणत्वात्। एवं स्थिते तक्षयतेः क्विवपि तक्, रक्षयते स्तु रक्, इत्यादि बोध्यम्। अत्र हि संयोगादिलोपे कर्त्तव्ये णिलोपस्य स्थानिवद्भावान्न तत्प्रवृत्तिः। संयोगान्तलोपे तु स्थानिवद्भावनिषेधाद्भवत्येवासौ। गोरट् इति तु शुद्धात्क्विवपि बोध्यम्। यत्त्वचः परस्मिन्निति सूत्रे दध्यत्रेति भाष्यमुपादाय कैयटेनोक्तम्, पूर्वत्रासिद्धे चेत्येतदत्र नास्ति, तस्य दोष इत्यत्र संयोगादिलोपस्य संयोगोपलक्षितलोपोपलक्षणत्वादिति। तन्न वास्तवम्। किन्तु तत्रत्यपूर्वपक्षिणोभिप्रायवर्णनमात्रम्। अत एव नपदान्तेति सूत्रशेषे तेनैवोक्तम्। स्कन्दयतेः स्कन्। तक्षयतेस्तागिति। यत्तु

सिद्धकाण्डे श्चुत्वं धुट्त्वइति वार्त्तिकव्याख्यावसरे कैयटेनोक्तम्। मधुगितीष्यते मधुडिति प्राप्नोतीति। तत्तु सकारोपदेशसामर्थ्यादिति बोध्यम्। सन्श्रोतर्तीत्यत्र शितुगित्यस्याप्रवृत्त्या सकारश्चरितार्थ इति चेत्तर्हि क्वौ लुप्तमिति समाधेयम्। कुस्मनाम्नोवेत्यत्र कूरिति माधवोदात्तं सम्यगेव। तत्र सामर्थ्यविरहेण संयोगादिलोपाप्रवृत्तेरिति दिक्। स्यादेतत्। इह संयोगादिग्रहणं मास्तु। न चैवं वाक्यर्थमित्यादौ स्कोरिति लोपापत्तिः। स्कोः संयोगेत्यत्र झलोझलीत्यतो झल इत्यनुवर्तते। तच्चोपसर्जनस्यापि संयोगेत्यस्य विशेषणम्, न तु प्रधानयोरपि स्कोः। अव्यभिचारात्। ततश्च झलन्तो यः संयोगस्तदाद्योः स्कोर्लोपः स्यादितिसूत्रार्थात्, बहिरङ्गतया यणोसिद्धत्वाद्वा। अत एव हि दध्यत्रेत्यादौ संयोगान्तलोपो न प्रवर्तते। तथा चाष्टमे वार्तिकम्। न वा झलो लोपाद्बहिरङ्गलक्षणत्वाद्वेति। न चैवमपि काष्ठतक् राष्ट्रक् इत्यादि न सिध्येदेवेति वाच्यम्। अनभिधानात्तत्र क्विप एव दुर्लभत्वात्। अनभिधानं च काष्ठशगेव नास्तीत्याष्टमिकभाष्यबलेन न्यायसाम्यान्निर्णीयतइति। अत्रोच्यते। कुस्मयतेः कूरित्यादिसिद्धये संयोगादीति वाच्यमेव। किञ्च तक्रक् इत्याद्यर्थमपि वक्तव्यम्। न चानभिधानम्। प्रमाणाभावात्। कैयटादिभिरुदात्ततत्वाच्च। न च काष्ठशगेव नास्तीति भाष्यं तत्र प्रमाणम्। न्यायवैषम्यात्। तथाहि। काष्ठशक् स्थातेत्यत्र झल्परो यः संयोगस्तदादेः ककारस्य लोपमाशङ्क्य तदुक्तम्। तेन यत्र कलोपप्रसक्तिस्तदभिप्रायकमनभिधानम्। अत एव कान्तेभ्यः क्विप् नेत्येवम्परतया तद्व्याख्यातम्। न च णिजन्तेभ्यः क्विपि कलोपप्रसक्तिरस्ति। णिलोपस्य स्थानिवद्भावात्। न च पूर्वत्रासिद्धेचेति तन्निषेधः। संयो-

मादिलोपे प्रतिप्रसवस्य जागरूकत्वात्। तस्मात्संयोगादिलोपग्रहणं कर्त्तव्यमेवेति स्थितम्। इदं त्ववधेयम्। संयोगान्तस्यलोप इत्यत्र न वा झलो लोपाद्धलिरङ्गलक्षणत्वाद्वेति द्विधा सिद्धान्तव्यवस्थापनात्। कूरिति संयोगान्तलोपोपि दुर्लभः। तेन कुस्म् इत्येव भवति प्रथमपक्षे। द्वितीयपक्षाभिप्रायेण तु माधवः। नन्वेवमपि लत्वग्रहणं व्यर्थम्। निगाल्यतइत्यत्र सत्यपि णिलोपे प्रत्ययलक्षणेन लत्वसिद्धेः। न च वर्णाश्रयत्वम्। धातोः स्वरूपे तत्प्रत्यये कार्यविज्ञानात्। इदं च दाण्डिनायनादिसूत्रे भ्रौणहत्येति तत्वनिपातनेन ज्ञापयिष्यते। किञ्चान्तरङ्गत्वादपि लत्वं सुवचमिति। अत्रोच्यते। तृणहइमित्यत्राचि नेत्यनुवर्तते। हलीति निवृत्तम्। तथा चातृणेडित्यादिसिद्धये प्रत्ययलक्षणं नारम्भणीयम्। किं तु नियमार्थं तदारम्भ इति भाष्ये स्थितम्। इतरव्यावृत्तिमात्रफलकं प्रत्ययलक्षणसूत्रम्। तत्तत्कार्याणि तु स्थानिवत्सूत्रेण निर्वाह्याणि। तत्र च प्रदीव्येतीण्निवृत्तये अप्राधान्येनाप्यलाश्रयणे निषेधः स्थितः। तथा चाचि प्रत्यये विधीयमानं लत्वं स्थानिवद्भावं विना दुर्लभमेव। यदप्यन्तरङ्गत्वाल्लत्वमित्युक्तं, तदपिन। अकृतव्यूहपरिभाषया लत्वाप्रवृत्तेः। किञ्चोपसर्गस्यायतावितिसूत्रे पक्षद्वयं वक्ष्यते। अयीतपरत्वं उपसर्गस्य विशेषणं रेफस्य वेति। तत्राद्ये पक्षे पल्ययतइति सिध्यति प्लायतइति तु न सिध्येत्। एकादेशे कृते व्यपवर्गाभावात्। उभयत आश्रये अन्तादिवद्भावायोगाच्च। तस्मात्तत्र स्थानिवद्भावेनैव व्यपवर्गो वक्तव्यः। स च पूर्वत्रासिद्धे चेति निषिद्ध इति लत्वे प्रतिप्रसवः सार्थक एव। द्वितीयपक्षे तु पल्ययतइति न स्यात्। यकारेण व्यवधानात्। प्लायत इत्यत्रैव परं लत्वं स्यात्। पूर्वत्रासिद्धेचेति स्थानिवत्त्वनिषेधेन तत्र रेफ-

स्यायतिपरत्वाविघातात्। कृते त्विह लत्वग्रहणे येन नाव्यवधानन्यायेन पल्ययत इत्यत्रापि लत्वं सिध्यति। स्फुटं चेदमष्टमे भाष्यएव। तस्मादिह लत्वग्रहणं कर्त्तव्यमेवेति स्थितम्। णत्वग्रहणं तु व्यर्थम्। तथाहि। माषवपनीति तावद्बहिरङ्गपरिभाषयापि सिद्धम्। न च प्रहिणोति प्रमीणीतइत्यादिसिद्धये तादिति वाच्यम्। अचः परस्मिन्निति सूत्रस्य प्रवृत्तिं विनाप्येकदेशविकृतस्यानन्यतया हिनुमीनेत्यस्य प्रवृत्तिसम्भवात्। न च ष्णान्ताषाडिति सूत्रे वर्णितरीत्या प्रियाष्ट्न इत्यादिसिद्धये णत्वग्रहणमिति वाच्यम्। कार्यकालपक्षे बहिरङ्गपरिभाषयैव तस्यापि सिद्धेः। यथोद्देशपक्षस्तु न ग्रहीष्यते। प्रत्याख्येयेन णत्वेन सह फलसाम्यार्थम्। एतेन प्रियाष्ट्ण इति णत्वाभ्युपगमपरः पदमञ्जरीग्रन्थोप्यपास्तः। बहिरङ्गपरिभाषायाअनित्यत्वेपीह तदप्रवृत्तौ प्रमाणाभावात्। तस्मादिह णत्वग्रहणं वृथेति स्थितम्। प्रत्युत णत्वे स्थानिवत्त्वाभ्युपगमे बाधकमप्यस्ति। तथाहि। अनितेरन्त इति सूत्रेऽन्त इति योगं विभज्य हे प्राण् इति रूपसिद्धये पदान्तस्येति प्रतिषेधं बाधितुमन्तइति सूत्रेण पदान्तस्यानितेर्णत्वं विधीयतइत्येका व्याख्या। अन्तशब्दं समीपपर्यायमाश्रित्य निमित्तसमीपस्थो योनितेर्नकारस्तस्य णत्वं निमित्तसमीपस्थस्यानितेर्यो नकारस्तस्य णत्वमिति च योगविभागं विनापि व्याख्यानद्वयं भाष्ये स्थितम्। तत्र प्रथमपक्षे प्राणितीत्यादावेकेनाकारेण व्यवधानेपि वचनसामर्थ्यान्णत्वं प्रवर्त्तते। द्वितीयपक्षे त्वेकादेशस्यादिवद्भावाद्रेफादव्यवहितस्यानितेः सम्भवात्प्रवर्त्तते। पर्यनितीत्यत्र तु वर्णद्वयेनैकेन च व्यवायात्पक्षद्वयेपि णत्वं न प्रवर्त्ततइति स्पष्टमष्टमे। यदि चेह णत्वग्रहणं क्रियते तर्हि पर्यनितीतिवत्प्राणि-

तीत्यत्रापि द्वयेनेकेन वा वर्णेन यथासम्भवं व्यवधानाण्णत्वं न स्यात् । न च वचनसामर्थ्यात्स्थानिवद्भावकृतं व्यवधानमाश्रयिष्यते वृत्रघ्न इति कुत्वइवेति वाच्यम् । निरणिति दुरणितीत्यत्र चरितार्थत्वात् । न चैवं निर्दुरोरनितेरित्येव ब्रूयात् । न त्वनितेरन्त इति सामान्यलक्षणं प्रणयेदिति वाच्यम् । आवृत्तिमाश्रित्य हे प्राणित्यत्र णत्वस्य प्रतिप्रसवार्थं निर्दुरोरित्यपेक्षया ऽन्त इत्युक्तावक्षरलाघवानुरोधाच्च सामान्यलक्षणप्रणयनसम्भवात् । तस्मादाष्टमिकभाष्यपर्यालोचनेनेह णत्वग्रहणं न कर्त्तव्यमिति निर्णीयते । अत एव व्यूढोरस्केनेत्यत्र णत्वं न । अन्यथा विसर्गस्यादृत्वेन तदादेशस्य सस्य स्थानिवद्भावाण्णत्वं स्यात् । इह णत्वग्रहणस्य प्रयोजनाभावस्तूक्त एव । ततश्च तस्य दोषः संयोगादिलोपलत्वयोरित्येव वाच्यम् । वस्तुतस्तु तदपि न वाच्यम् । पूर्वत्रासिद्धे चेति ह्यसिद्धत्वादेव न्यायसिद्धमित्युक्तम् । तच्चासिद्धत्वमनित्यम् । अधुनेतिवदमुनेति वाच्ये नमुनइत्युक्तेर्नेति योगविभागात् । नुटीति वाच्ये नामीतिलिङ्गाच्च । अनश्च इत्यादेरङ्गस्येत्यनेन व्यावृत्तौ सत्यामपि अक्षण्वन्त इत्यादौ हि दीर्घं वारयितुं हि नामीत्युक्तम् । रुधादिभ्यः श्नम् श्नान्नलोप इति सूत्रद्वये भाष्यकैयटाद्यालोचनेनारम्भसामर्थ्यात्सन्निपातपरिभाषाया इवासिद्धत्वस्याप्यविशेषाद्धाधे प्राप्ते नासीत्युक्तिरिति चेन्न । कृति तुग्ग्रहणादिना सन्निपातपरिभाषाया अनित्यत्वज्ञापनात्सामर्थ्याद्धाध इति पक्षेऽप्यक्षण्वन्त इत्यादावुभयबाधे गौरवाच्च । तस्मादनित्यताज्ञापनार्थमेव तत् । तेन सिद्धकाण्डमपि संगृहीतं भवति । एतेन रायो रामेभ्य इत्यादौ रुत्वस्यासिद्धत्वाद्रोरुकारस्येत्संज्ञालोपौ कथं स्यातामित्येतदपि समाहितम् । प्रत्ययः परश्चेत्यादिलिङ्गा-

च्च । यत्त्वनुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौ प्रत्यसिद्धत्वं नेति । तन्न । तरुमूलमित्यादौ हशिचेत्यस्य व्यावृत्तये अतोरोरित्यत्र सानुनासिकस्यैव निर्देशाभ्युपगमेन चारितार्थ्यात् । राम इत्यादावपि सानुनासिकश्रवणस्यापाद्यमानतया चारितार्थ्यस्य स्पष्टत्वादिति दिक् । तेन संयोगादिलोपलत्वयोरसिद्धताविरहात्स्थानिवत्त्वं भविष्यतीति सकलेष्टसिद्धिः ॥

द्विर्वचनेचि ॥ रूपातिदेशोयम् । द्वित्वनिमित्ते ऽचि योजादेशः सः स्थानिवद्रूपं लभते द्वित्वे कर्त्तव्ये । चक्रतुः । चक्रुः । द्वित्वनिमित्तत्वेनाज्विशेषणादिह न । दुद्रूषति । सुस्रूषति । न ह्यूद् द्वित्वनिमित्तम् । नन्वेवं चक्रतुरिति यणोपि स्थानिवद्भावो न स्यात् । अतुसो द्वित्वनिमित्तत्वेप्यकारस्यातथात्वात् । सूत्रन्तु चक्रे इत्यादौ सावकाशमिति । सत्यम् । इह निमित्तशब्देन साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकत्वमाश्रीयते न तु साक्षादेवेत्याग्रहः । लक्ष्यानुरोधात् । किञ्च सूत्रे निमित्तशब्दो नास्त्येव । किन्तु लक्षणया वा द्विरुच्यतेस्मिन्निति द्विर्वचनमिति व्युत्पत्त्या वा द्विर्वचनमस्त्यस्मिन्निति अर्शआद्यचा वा द्विर्वचननिमित्तं लब्धव्यम् । तच्च प्रकारत्रयं साक्षात्परम्परासाधारणे प्रयोजकेपि सुवचम् । एतच्च ठस्येक इति सूत्रे कैयटे स्पष्टम् । अत एव ऊर्णोतेः सनि सनीवन्तेतीट्पक्षे विभाषोर्णोरिति ङित्त्वविरहे ऊर्णुनविषतीति सिद्धम् । सन्नन्तस्य द्वित्वविधानेपि सनो द्वित्वप्रयोजकत्वेन तस्मिन् गुणावादेशयोर्द्वित्वे कर्त्तव्ये स्थानिवद्भावात् । तदुक्तम् । तद्भावभावितामात्रेणेह निमित्तत्वमिति । वस्तुतस्तु द्विर्वचनाक्षिप्तः प्रत्ययो ऽचीत्यनेन विशेष्यते । परस्मिन्नित्यनुवर्त्तते । अमीषां मध्ये देवदत्तात्परमानयेत्युक्ते यथा सजातीयेन मनुष्यान्तरेणाव्यवहितः पर आनीयते । तथे-

हापि प्रत्ययान्तरेणाव्यवहितः परो गृह्यते । तेन द्वित्वनिमित्ते अजादौ प्रत्यये प्रत्ययान्तरेणाव्यवहिते परे सति योजादेशः स स्थानिवत्स्यादिति सूत्रार्थः । एवं च चक्रतुरित्यादौ न काप्यनुपपत्तिः । वक्ष्यमाणज्ञापकबलेन णिचा व्यवहिते प्रवृत्तावपि दिदवनीयिषतीत्यादावनेकप्रत्ययव्यवधानादप्रवृत्तिः । अपीप्यदित्यत्र वर्णव्यवधानेपि प्रत्ययान्ताभावात्प्रवृत्तिः । अनुवादे परिभाषानुपस्थानेपि निर्दिष्टपरिभाषाकर्त्तव्यस्य निर्वाहश्चेति बोध्यम् । अत एवेह परस्मिन्नित्यनुवर्ततइति न्यासकारः । तथा द्विर्वचनेनेह प्रत्ययाक्षेपं वदन् णिज्भिन्नेन व्यवहिते ज्ञापकस्याप्रवृत्तिं ब्रुवन्कैयटोप्येतदभिप्रैति । उर्णनविषतीत्यादिसिद्धये तु तद्भावभावितामात्रेण निमित्ततेति स्वीक्रियतएवेत्यवधेयम् । नन्वेवमरिरिषतीति न सिद्ध्येत् । ऋधातोः सनि स्मिपूङ्रंज्वशांसनि इतीटि कृते इस्शब्दनिमित्तकस्य गुणस्य स्थानिवद्भावे अजादेर्द्वितीयस्येतीसो द्वित्वप्रसङ्गात् । इष्यते तु रिस्शब्दस्य द्वित्वम् । अत्रोच्यते । न हि कार्यी निमित्ततयाश्रीयतइति दीधीवेवीटामित्यत्रोपपादितत्वान्नेह इस् शब्दो निमित्तम् । अतो न स्थानिवद्भावः । न चैवं सन्नन्तस्य कार्यित्वादूर्णुनविषतीत्यपि न स्यादिति वाच्यम् । मत्वर्थीयेननिना कार्यमनुभवत एव कार्यित्वलाभात् । तत्र तु द्वितीय एकाच् द्वित्वरूपं कार्यमनुभवति न तु सन् । अरिरिषतीत्यत्र तु रिस्शब्दस्यैव कार्यभाक्त्वमिति वैषम्यात् । नन्वेवमचीत्यस्य जेग्रीयते देध्मीयतइति व्यावर्त्यं न सङ्गच्छते । ग्रीय् ध्मीय् इति द्वितीयाजवधिकस्यैकाचः कार्यितया यङोपि द्वित्वनिमित्तत्वाभावादिति चेत् । सत्यम् । अधिजगे इत्येवाज्ग्रहणव्यावर्त्यमस्तु । तत्र हि गाङ्लिटीति द्विलकारकनिर्देशमाश्रित्य लावस्थायामेव गाङा-

देश इति भाष्यएव स्पष्टम् । इदञ्च वार्त्तिकमतमनुसृत्योक्तम् । तत्र लिटि लिङीत्यादीनां परसप्तमीत्वाभ्युपगमात् । भाष्यमते त्वार्द्धधातुकीयाः सामान्येन भवन्तीत्यभ्युपगमाल्लिटीत्यादयोपि विषयसप्तम्येवेत्युक्तं स्थानिवत्सूत्रे । तन्मते त्वचीत्यस्य जग्ले इत्यादि व्यावर्त्त्यम्बोध्यम् । तथाहि । आदेच इति सूत्रे ऽशीति परसप्तमीति पक्षे शिदिति कर्मधारयाश्रयणाद्यस्मिन्विधिस्तदादावल्ग्रहणइत्यस्य प्रवृत्त्या आदिशितोन्यस्मिन्परे विधीयमानमात्वं लावस्थायां क्रियते । अतो न स्थानिवत् । न चान्तरङ्गत्वात्त्विवादिष्वेशि च कृते आत्वं स्यात्तथा च स्थानिवत्त्वं दुर्वारमिति वाच्यम् । नसम्प्रसारणेसम्प्रसारणं लिटिवयोय इति द्विलकारकनिर्देशमाश्रित्य तं च तत्रानुपयुक्तत्वादिहानुवर्त्त्य लिटि तु लावस्थायामेवेत्यात्वविधौ व्याख्यानात् । कथं तर्हि जेग्रीयते देध्मीयत इति भाष्यवृत्त्यादिषु प्रत्युदात्ततामिति चेत् । प्रातिशाख्यरीत्येत्यवेहि । तथाहि । अनुस्वारो व्यञ्जनं चाक्षराङ्गमित्युक्त्वा स्वरान्तरे व्यञ्जनान्युत्तरस्येति तत्र सूत्रितम् । एवं च नेनिजत्यनेनिजुरित्यादावेकाच्कस्य धातोः सम्पूर्णस्य द्विर्वचनादभ्यस्ताश्रयमद्भावजुसादि सिध्यतु । द्व्यच्के तु मध्यवर्तिनां हलामुत्तराङ्गत्वात्प्रथमाजन्तमेव द्विरुच्यताम् । यथा दरिद्रातौ द इति । जागर्तौ जा इति । न चैतावता क चिद्रूपेनिष्टमापद्यते येन प्रातिशाख्यपरिभाषामुपेक्ष्य नटभार्यावद्व्यञ्जनानीति चाश्रित्य दर् जाग् इत्यादि द्विरुच्यते । अत एव चतुरश्छयतावाद्यक्षरलोपश्चेति सङ्गच्छतइति दिक् । यदा तु षाष्ठभाष्यवार्त्तिकरीत्या द्वितीयाजयधिक एकाच् गृह्यते, गाङ्लिटीति च विषयसप्तम्याश्रीयते, अनैमित्तिकमात्वं शितीति तु प्रतिषेध इति वा अशितीति विषयसप्तमी वा आश्रीयते, तदा

जेघ्रीयते अधिजगे जग्ले इति त्रिविधस्यापि व्यावर्त्यस्यासम्भवादचीत्यस्य फलं किमिति विभावनीयं सूरिभिः । स्यादेतत् । भसेः क्सौ घसिभसोर्हलीत्युपधालोपे कृते द्वित्वं मा भूदित्येतदर्थमज्ग्रहणं भविष्यतीति चेत् । सत्यसति वा द्वित्वे श्वानिति श्रुतौ विशेषाभावात्। ननु दुर्लक्ष्योपि विशेषः सूक्ष्मदृशं प्रति दुर्वार इति चेन्न । दाति प्रियाणि, वीरवद्धातु, इत्यादाविव द्वित्वाभावसम्भवात्। वक्ष्यति हि षष्ठे लिटिधातोरिति सूत्रे, अनभ्यासग्रहणानर्थक्यं च छन्दसि वावचनादिति । न चैवमपि पाक्षिकं द्वित्वं स्यादेवेति वाच्यम् । दृष्टानुविधानस्यैव छन्दसि कर्त्तव्यत्वात् । अत एव हि उर्ऋदित्येव सिद्धे नित्यं छन्दसीति सूत्रं निष्फलमित्यभियुक्ताः । लोके तु भाष्यमते क्सुर्दुर्लभः। उपधालोपश्च छान्दस एव। तदेवं जेघ्रीयते अधिजगे जग्ले इत्येतत्सिद्धये क्रियमाणमज्ग्रहणमेवेह रूपातिदेशत्वे प्रमाणम् । कार्यातिदेशपक्षे हि घ्रीगाग्लाइत्येषामेव भाव्यं द्वित्वेनेति किं तेन। तथा च वार्त्तिकम् । अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्येति। देध्मीयते शाशय्यते इत्यपि जेघ्रीयते इत्यनेन समानयोगक्षेममुदाहरणम् । ईघ्राध्मोरिति ईकारः। अयङ्यिक्ङितीति शीङोयङादेशः । अचीत्यस्य प्रत्याख्यानपक्षे तु लक्ष्यानुरोधादेव शब्दाधिकारमाश्रित्येह रूपातिदेशो व्याख्येयः । पूर्वसूत्रादच इति षष्ठ्यन्तस्यानुवृत्तिरिह किमर्थेति चेत् । शुशुवतुरित्यादिसिद्धये इति गृहाण । तथाहि । विभाषाश्वेरिति सूत्रं यद्यपि शुशावेत्यादौ पित्सु सावकाशं तथापि शून इत्यादौ चरितार्थस्य वचिस्वपीत्यस्य बाधकमेव परत्वात् । लिट्यभ्यासस्योभयेषामित्यस्य तु न बाधकम् श्वयत्यभ्यासविषयकस्य विधेर्निरवकाशत्वात् । अत एव विभाषाश्वेरिति सूत्रे श्वेर्लिट्यभ्यास-

लक्षणप्रतिषेध इति वार्त्तिकमारब्धम्। लिट्यभ्यासस्येति सूत्रे अश्वयतीनामिति पूरणीयमिति तदाशयः। अन्यथा हि विहितप्रतिषिद्धतया विकल्पात् शुश्वाय शुश्वियतुरित्यनिष्टमपि पक्षे प्रसज्येत। एवं स्थिते द्विर्वचनेचीत्यत्राच इत्यस्याननुवृत्तौ शुशावेत्यत्र वृद्ध्यावादेशयोरिव सम्प्रसारणस्यापि स्थानिवद्भावः स्यात्। तथा च शिशाव शिशुवतुरित्याद्यनिष्टमापद्येत। न च सम्प्रसारणं तदाश्रयं च बलवादिति तिबाद्यवस्थायामेव सम्प्रसारणप्रवृत्तेरचीति नास्तीति वाच्यम्। एवमपि व्यतिशुशुवाते इत्यादौ दोषप्रौव्यात्। न च विभाषाश्वेरिति लावस्थायामेव प्रवर्त्ततइति वाच्यम्। एवमपि ईजाते ईजाथे इत्यादौ दोषतादवस्थ्यात्। लावस्थायां कित्त्वाभावेन तत्र सम्प्रसारणाप्रवृत्तेः। न च कित्त्वमपि प्रवर्त्ततामिति वाच्यम्। अन्तरङ्गैस्तिबादिभिर्बाधितत्वात्। किं च स्वापेश्चङीति सम्प्रसारणे असूषुपदितीष्यते। स्थानिवद्भावे तु सति नसंप्रसारणइति निषेधादभ्यासे उवर्णो न श्रूयेतेति दिक्। तन्त्रावृत्त्यैकशेषाणामन्यतमाश्रयणादिह कालावधारणमपि क्रियते। तथा च व्याख्यातम्। द्वित्वे कर्त्तव्ये इति। तेन चक्रतुरित्यादावुत्तरदले पुनर्यथायथं यणादयो भवन्त्येव। अन्यथा प्रकृतिभाव एव स्यात्। निन्यतुरित्यत्र तु प्रथमप्रवृत्तस्यापीयङो द्वित्वकाले ऽपहारात्पुनः प्राप्तो ऽप्ययमेरनेकाच इति यणा बाध्यते। यद्वा। पूर्वमपीयङ् न प्रवर्तते। प्रकल्प्य चापवादविषयं तत उत्सर्गोभिनिविशतइति न्यायात्। यद्वा। आभीयत्वेनेयङो ऽसिद्धत्वाद् यण् भविष्यति। स्यादेतत्। स्थानिवद्ग्रहणं निवर्त्य नञं चानुवर्त्य द्वित्वनिमित्ते ऽचि अच आदेशो न स्याद् द्वित्वे कार्ये इत्येव व्याख्यायताम्। एवं हि सति स्थानिवादिति शब्दाधिकारक्लेशोपि न भव-

तीति। सत्यम्। अस्मिन्नपि पक्षे नञः स्वरितत्वं प्रतिज्ञातव्यम्। स्थानिवच्छब्दस्य तु क्लप्तमेव तदिति लाघवम्। अस्तु वा व्याख्यानद्वयमपि फले विशेषाभावादिति दिक्। नन्वेवमपि णौ स्थानिवद्वचनं कर्त्तव्यम्। नुनावयिषति चुक्षावयिषति तुष्टावयिषतीत्याद्यर्थम्। अत्राहुः। ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्येति। अस्यार्थः। यौतेः पूङश्च सनीवन्तेति स्मिपूङ्रञ्ज्वशामिति सूत्राभ्यामिटि कृते यियविषति पिपविषते इत्यत्र द्विर्वचनेचीति स्थानिवद्भावाद्यकारपकारयोरवर्णपरयोः परतो यद्यप्यभ्यासउकारो लभ्यते। तस्य चेकारादेशविधानेन ओः पुयण्सूत्रे पकारयकारग्रहणं चरितार्थम्। तथा पि वर्गग्रहणं प्रत्याहारग्रहणं जग्रहणं च ज्ञापकं द्वित्वनिमित्तस्याचो णिचा व्यवधानेपि स्थानिवद्भावः प्रवर्त्तते इति। तं विना अवर्णपरेषु पुयण्जिषु परेषु उवर्णान्तस्याभ्यासस्य दुर्लभत्वात्। येन नाव्यवधानाच्च णिचैवैकेन द्वित्वनिमित्तस्याचो व्यवधानमाश्रीयते। तेन निनवनीयिषतीत्यादौ न स्थानिवत्। ल्युट्क्यङ्भ्यां व्यवधानात्। एवं णिजन्ताल्ल्युट्क्यच्सन्स्वपि न स्थानिवत्। निनावनीयिषतीत्यादि। न हि णौ कृतं स्थानिवदिति वचनमस्ति किन्तु ज्ञाप्यमानः स्थानिवद्भावो लाघवादेकेनैव व्यवधानइत्युक्तम्। इह त्वनेकेन व्यवधानं स्पष्टमेव। यद्यप्यनूद्यमानादेशविशेषणत्वान्निर्दिष्टपरिभाषा नोपतिष्ठते। तथाप्यचीत्यौपश्लेषिकसप्तमीबलादेव तदर्थःपर्यवस्यति। ईषद्विप्रकृष्टलाभे च नात्यन्तविप्रकृष्टस्य ग्रहणमिति बोध्यम्। वस्तुतस्तु परस्मिन्नित्यनुवर्ततइति सूत्रोपक्रमएवोक्तम्। एवं चावीभवत् अमीप्रवत् अरीरवत् अलीलवदित्यादिषु बिभावयिषतीत्यादिषु च ओः पुयणितीत्वं प्रवर्त्तते। ज्ञापनफलन्तु यत्र ओः पुयणित्यस्याप्राप्तिस्तत्र

बोध्यम्। तद्यथा। चुक्षावयिषति। उदुरिवाचरति उडवति। उडवतेर्णौ सन्। उदुडावयिषति। चङि। औदूडवत्। तुतावयिषति। अतूनवत्। सौत्रोयं तुरुस्तुशमीत्यत्र निर्दिष्टः। ऊर्णुनावयिषति। और्णूनवत्। चिस्फुरोर्णावित्यात्वस्य स्थानिवद्भावात्पुस्फारयिषति अपुस्फरादित्यादि बोध्यम्। तुल्यजातीयापेक्षं च ज्ञापकम्। तेनावर्णपरे हल्येव स्थानिवत्त्वम्। तेनाचिकीर्त्तदित्यादौ नातिप्रसङ्ग इति भाष्ये स्थितम्। यत्तु काशिकायां पूर्वत्रासिद्धमिति सूत्रे वहेर्निष्ठान्ताण्णिचि चङि औजढदित्युदाहृत्य क्तिन्नन्तस्य तु औजिढदित्युक्तम्। तत्रैव न्यासेपि णौ कृतस्य टिलोपस्य स्थानिवद्भाव इति व्याख्यातं तदुभयं भाष्यविरुद्धत्वादुपेक्ष्यम्। अचिकीर्त्तदित्यस्य सिद्धये ऽवर्णपरधात्वक्षरविषयकमेव ज्ञापकमिति स्पष्टं भाष्ये। प्रकृतसूत्रप्रत्याख्यानपरे वार्त्तिके अव्याप्तिरूपदोषोद्भावनपरेण ओदौदादेशस्य चुटुतुशरादेरित्यादिभाष्येणाप्ययमर्थो लभ्यतइत्यनुपदमेव स्फुटीकारिष्यते। अत एव, शुष्किका शुष्कजङ्घाचक्षामिमानौजिढत्तथेति वैयाघ्रपद्यवार्त्तिके जिशब्द एव पठ्यते। जशब्दपाठस्तु क्वाचित्कः प्रामादिक एवेति बोपदेवो दुर्गसिंहादिसम्मतिप्रदर्शनपूर्वकं कामधेनौ स्थापितवान्। वैयाघ्रपद्यवार्त्तिकं तु पूर्वत्रासिद्धमिति सूत्रस्य प्रयोजनसङ्ग्रहपरं, तच्च तस्मिन्नेव सूत्रे व्याख्यास्यामः। एवं चाङ्गपदे लक्षणे चेत्यस्य चङि सणिच्कस्य द्वित्वेनाश्विकदित्येव रूपं न त्वाश्वकदिति। न चैवमदन्तपाठवैयर्थ्यं स्यादिति वाच्यम्। तत्सामर्थ्यादल्लोपस्याप्रवृत्तौ सत्यां वृद्धिपुकोश्च सतोरङ्गापयतीति रूपाभ्युपगमात्। न चैवं सत्यङ्गयतीति रूपं न स्यादिति वाच्यम्। सूचिसूत्रीत्यादिवार्त्तिके सोमूच्यते सोमूत्यतइत्यादिभाष्योदाहरणेन पक्षे ऽल्लोपस्याभ्युपगमात्। सूचिसू-

त्यादयो ह्रदन्ताः । अत एवानेकाच्त्वेन षोपदेशत्वाभावान्न षत्वम् । षोपदेशलक्षणे ह्येकाच्त्वं विवक्षितमिति माधवीये स्पष्टम् । एतच्च सेगादिपर्युदासात् ष्वष्कस्विदादिसाहचर्यात् सोसूच्यतइत्यादिभाष्योदाहरणाच्च निर्णीयतइति वक्ष्यते । एवं वाक्यशेषं समर्थयिष्यामहे । प्रार्थनाध्यवसायैः सम्मश्नप्रार्थनेषुलिङित्यादिप्रयोगाश्चेह मानम् । तदेतत्सकलमभिसन्धायादन्तत्वसार्थक्याय वा ऽल्लोप इत्याहुः । उक्तञ्च कामधेनौ । अग्लोपित्त्वं स्थानिवत्त्वं चादन्तत्वप्रयोजनम् । यत्र त्वेते न विद्यते तत्राल्लोपविकल्पनमिति । कथयत्याद्यभिप्रायेण पूर्वार्द्धम्, 'अङ्कयत्याद्यभिप्रायं तूत्तरार्द्धमिति विवेकः । नन्वाञ्चकादित्यत्र दीर्घोलघोरिति प्राप्ते ऽनग्लोपइति निषेधेनाकारश्चरितार्थ इति चेन्न । चङ्परे णौ यदङ्गं तस्य योभ्यास इति सूत्रार्थव्यवस्थापनात् । इह त्वङ्गावयवस्याभ्यासो न त्वङ्गस्य । एतच्चोर्णुधातौ माधवग्रन्थे स्पष्टम् । अत एव आटिटदित्यादौ न दीर्घः । यत्तु दीर्घविधौ हलादिरिति विशेषणं कौमुद्यां दत्तं तन्मूलम् । और्णुनवदित्यादेः सिद्धावपि सन्वल्लघुनीत्यत्र चङ्परे इत्यङ्गस्य विशेषणं लघोर्वेति मतभेदेनेष्यमाणे अचिचकासदचचकासदिति रूपद्वयेप्यतिप्रसक्तं च दीर्घविधौ चङ्परइत्यस्य लघुविशेषणतामाश्रित्यार्थसिद्धकथनं तदिति वा समाधेयम् । सिद्धान्ते तु माधवोक्तरीत्या ऊर्णावयतेरिव चकासयतेरपि दीर्घाभावः स्पष्ट एवेति दिक् । एतच्च सूत्रं वार्त्तिककारः प्रत्याचख्यौ । तथाहि । षष्ठ द्वित्वप्रकरणान्ते विप्रतिषेधः पठ्यते । द्विर्वचनं यणयवायावादेशाल्लोषोपधालोपणिलोपकिकिनोरुत्वेभ्य इति । तथा च दध्यत्रेत्यादौ सावकाशो यण् । चयनं चायको लवनं लावक इत्यादौ चायवायावः । गोदः कम्बलद इत्यादावाल्लोपः ।

श्लेष्मघ्न इत्यादावुपधालोपः कारणा हारणेत्यादौ णिलोपः निपूर्त्ता इत्यादावुत्त्वं चेत्येतानि नव विभिदतुरित्यादौ सावकाशेन द्वित्वेन पूर्वविप्रतिषेधाद्बाध्यन्ते,तेन चक्रतुः चिचाय लुलाव चिचायिथ लुलविथ पपतुः तस्थतुः जग्मतुः जघ्नतुः आटिटत् ततुरिः जगुरिरित्यादि सिद्धम् । नन्वेवं निन्यतुरिति न स्यात्, इयङ इहापरिगणितत्वादिति चेन्न । एरनेकाच इति यणेह भाव्यमिति प्रागपीयङोप्रवृत्तेः । प्रकल्प्य चेति न्यायात् । तस्माद् द्विर्वचनेचीति सूत्रं विनापि सर्वं सिद्धमिति । भाष्यकारास्तु सूत्रं समर्थयन्ते । तथाहि । विप्रतिषेधस्तावदयुक्तः । आल्लोपादीनां नित्यत्वात् । द्वित्वस्यानित्यत्वेनातुल्यबलत्वात् । किं च पूर्वविप्रतिषेधे सर्वत्र वचनस्यारम्भणीयत्वादिह तु सुतरां तथेति क लाघवम् । अपि च । क्रियमाणमपि वचनं यद्यन्तरङ्गाणामपि बाधकं तर्हि निनवनीयिषति दिदवनीयिषतीत्यादावभ्यासे उकारः श्रूयेत । अथात्रान्तरङ्गत्वादवादेशः,वचनं तु नान्तरङ्गाणां बाधकं किन्तु नित्यानामेवेति ब्रूयाः । एवमपि चुक्षावयिषतीत्यादौ वृद्ध्यावादेशयोः प्रवर्तनादभ्यासे इत्वं स्यात् । तथा च तद्बाधनाय उत्त्वं विधेयम् । तथा च त्वया इत्थं न्यासः कर्त्तव्यः । उत्परस्यातः, तिच, ओदौदादेशस्य चुटुतुशरादेरिति । अभ्यासस्येति वर्त्तते । ओदौतोरादेशो यस्मिन्नङ्गे तस्य योभ्यासश्चुटुतुशरादिस्तस्य योकारस्तस्य उत्स्यादित्यर्थः । यथा चुक्षावयिषति उडुडावयिषति तुतावयिषति ऊर्णुनावयिषति शुशावयिषति पुस्फारयिषतीति । अत्र चिस्फुरोर्णावित्यात्त्वम् । यद्यपीह क्रयः शेषे कृते शरादित्वं नास्ति तथाप्यभ्याससंज्ञाप्रवृत्तिकालेस्त्येवेत्यवधेयम् । ओदौदादेशस्येति किम् । चायृ पूजायां, चिचायिषति, खदस्थैर्ये, चिखदिष-

ति । चुटुतुशरादेः किम् । बिभावयिषति । अत इति किम् । ऋजुम् अणुम् ऋतुम् अंशुं चाख्यत्, आर्जिजत्, आणिणत्, आर्त्तितत्, आंशिशदित्यत्र परत्वाद् वृद्धौ सत्यां टिलोपे सणिच्कस्य द्वित्वे कृते मा भूत् । अभ्यासस्येति किम् । चुटुत्वित्यादि तर्ह्यङ्स्यातो वा विशेषणं स्यात् । उभयथापि दोषः शीतं लुनाति शीतलूः सूर्यः, तमाख्यातुमिच्छति शिशीतलयिषतीत्यत्र तकारादुत्तरस्यात उत्प्रसङ्गात् । नन्वेवमप्यौजढदाञ्चकदित्यादावभ्यासे ऽकारश्रवणार्थं यत्नान्तरमास्थेयमेवेति गौरवान्तरं वार्त्तिककारं प्रति कुतो नापादितमिति चेन्न । तत्रेकार एवेष्ट इत्युक्तत्वात् । सजातीयापेक्षं हि सिद्धान्तेपि ज्ञापकम् । अन्यथा अचिकीर्त्तदित्यत्राभ्यासे ऽकारश्रवणापत्तेः । तस्माद्वार्तिककृता वचनद्वयमपि कर्त्तव्यं स्यादिति स्थितम् । तथा जग्लावित्यादिसिद्धये विप्रतिषेधवार्त्तिके वृद्धिरापि पाठ्या तथा ओः पुयण्ज्यपीति तृतीयमपि कर्त्तव्यमेव । पिपविषते यियविषति जिजावयिषतीत्यत्र इत्वं यथा स्यात् । तथाहि । पु यु इत्यनयोः सनि इटि परत्वाद् गुणे कृते पूर्वविप्रतिषेधेनावादेशात्पूर्वं द्वित्वमितीत्वं वक्तव्यमेव । तथा जुचङ्क्रम्येत्यत्र निर्दिष्टात्सौत्राज्जुधातोर्ण्यन्तात्सनि जिजावयिषतीत्यत्र चुटुतुशरादेरित्युत्वे प्राप्ते तद्बाधनायेत्वं वक्तव्यम् । न च तत्र वकारमेव पठिष्यामि न तु चुशब्दमिति वाच्यम् । गुङ् घुङ् ध्वनौ । आभ्यां णिजन्ताभ्यां चङि सनि च अजूगवत् अजूघवत्, जुगावयिषति जुघावयिषतीत्याद्यसिद्धिप्रसङ्गात् । किञ्च । दिदवनीयिषति निनवनीयिषतीत्यत्र चुटुतुशरादेरित्युत्वं स्यादिति तद्वारणाय वचनान्तरमास्थेयम् । अथ वा सन्यत इति सूत्राद् गुणोयङ्लुकोरित्याद्यष्टसूत्र्या विच्छिन्नमपि सनग्रहणं मण्डूकप्लुत्यानुवर्त्त्य सूत्रमतोक्तरीत्या येन नाव्यवधानन्यायेन

णिजभिन्नैर्व्यवधाने उत्वं नेति समाधेयम्। एवमपि तनुशब्दादाचारक्विबन्ताद्धेतुमण्णौ सत्यसति वा यदा सन् तत्र तितनविषति तितनावयिषतीत्यत्राप्युत्वं स्यात्, तद्वारणाय ओदौदादेशस्येति वार्तिकमन्यथैव व्याख्येयम्। तद्यथा। अभ्यासस्येत्यवयवषष्ठी। ओदौदित्यादिस्तु सम्बन्धसामान्ये षष्ठी। उभयमप्यतो विशेषणम्। तदयमर्थः। अभ्यासस्यावयवभूतस्तथा ओदौदादेशस्य यथायथमवयव आदेशो वा यो ऽत्तस्योद्भवति। चुक्षावयियतीत्यवयवः। पुस्फारयिषतीत्यादेशः। तथा चादग्रहणमपि सार्थकम्। अन्यथा आटिटदित्यादिसिद्धये चङ्परे णौ यदङ्गं तदवयवे लघौ सन्वदतिदेशादार्जिजदित्यादौ वार्तिप्रसङ्गविरहादत इति व्यर्थं स्यादिति दिक्। तथा च सूत्रमतापेक्षया वार्तिकमते महदेव गौरवमिति। स्यादेतत्। मास्तु प्रकृतसूत्रं मा च वार्त्तिकम्। ओः पुयणित्येतदेव ज्ञापयिष्यति अन्तरङ्गं नित्यं च बाधित्वा द्विर्वचनं स्यादिति। ततो द्वित्वे कृते यथाप्राप्तं यणादि करिष्यते। मैवम्। निनवनीयिषति दिदवनीयिषतीत्याद्यसिद्धेः। किञ्च सामान्यापेक्षं ज्ञापकं विशेषापेक्षं वा। आद्ये, अचिकीर्त्तादिति न सिध्येत्। अन्त्ये, चक्रतुरित्यादि न सिध्येत्। तस्मात्सूत्रं कर्त्तव्यमेव। चुक्षावयिषतीत्यादिसिद्धये तु ओः पुयणिति ज्ञापकमाश्रयणीयम्। तच्च तुल्यजातीयापेक्षमिति स्थितम्। अत एव वामनोदाहृतमौजढदित्येतद्भाष्यविरुद्धमिति बोपदेवोपष्टम्भेन प्रपञ्चितं प्राक्। वस्तुतस्तु वामनोक्तं सम्यगेव। यतः। बोपदेवो महाग्राहग्रस्तो वामनदिग्गजः। कीर्त्तेरेव प्रसङ्गेन माधवेन विमोचितः। तथाहि। किं वामनोक्तौ वार्त्तिकदूषणपरभाष्यविरोधः। किं वा सजातीयविषयज्ञापकतावर्णनभाष्यविरोधः। नाद्यः। नित्यानित्ययोर्विप्रतिषेधानुपप-

त्तिरिति दिक्ष्वनीयिषतीत्याद्यसिद्धिरिति च दूषणयोर्भाष्येनुक्ततया भाष्यं दूषणान्तराणामप्युपलक्षणमिति स्थिते औजढदित्यभ्यासे ऽकारादेशोपि विधेयः स्यादिति वार्त्तिके दूषणान्तरस्यापि देयत्वात्। तदेवं वार्त्तिकं रचनीयम्। ओदौदादेशस्य चुटुतुशरादेरभ्यासस्योत्सानि। ततोल्लोपवतो णिचोत्। अल्लोपवतोङ्गस्याभ्यासस्य णिचोत्स्यात्। औजढत्, आञ्चकादिति। न द्वितीयः। यत्र द्विरुक्तावभ्यासस्योत्तरखण्डस्याद्योजवर्णस्तत्र स्थानिवदिति हि भाष्यस्य फलितोर्थः। अस्ति च हतशब्दस्य द्विरुक्तौ प्रक्रियादशायामुत्तरत्रावर्णः। ननु पुनः प्रवृत्तेन टिलोपेनापहारान्नासौ प्रयोगे समवैतीति चेत्। किं ततः। नहि प्रयोगसमवायित्वं विशेषणं भाष्ये दत्तम्। एवञ्च नुनावयिषतीत्यादौ द्वित्वप्रवृत्तिवेलायामवर्णाभावेपि पश्चाद्भाविनं तमाश्रित्य यथा स्थानिवद्भावस्तथा हतशब्दस्य पश्चात्तद्विरहेपि, अध्यजीगपदित्यत्र तु स्थानिवद्भावे सत्यजादितया णिच एव द्वित्वं स्यात्तथा च न द्वित्वप्रवृत्तिवेलायां नापि पश्चादवर्णपरतेत्यचिकीर्त्तदित्यादाविव न स्थानिवद्भावः। एवं चोवर्णस्थानिकस्यैव स्थानिवद्भाव इति दुराग्रहो निर्मूल एव। अत एव लोपः पिबतेरीति सूत्रे ऽपीप्यदित्यत्र पिबतेर्णौ युकि चङि उपधालोपे च तस्य स्थानिवत्त्वात्पाय्शब्दस्य द्विरुक्तिरिति वृत्तिग्रन्थोपि सङ्गच्छते। एवं चाञ्चकदित्येव साधु, न त्वाञ्चिचकदिति। अङ्काययति आञ्चीकपादित्यादि तु दुरापास्तम्। अल्लोपस्य दुर्वारत्वात्। अकारोच्चारणं त्वभ्यासे ऽकारश्रुत्यादिना चरितार्थम्। यदप्यग्लोपित्वं स्थानिवत्त्वं चेत्याद्युक्तम्। तदपि न। चिन्तेरिदित्करणेन घुषिरविशब्दने इत्येतत्सूत्रस्थभाष्येण च णिज्विकल्पस्य सुस्थतया अल्लोपविक-

ल्पस्य निर्मूलत्वात्। णिजभावपक्षे ह्यनेकाच इत्यामप्रवृत्त्या धातोरन्तोदात्तप्रवृत्त्या चाकारः कृतार्थः। अङ्क्यादित्यादौ *नलोपप्रतिबन्धोपि फलमिति दिक्*। *न चैवमप्यौजढादित्यभ्यासे* डकारः श्रूयेत पूर्वत्रासिद्धीयमद्विर्वचनइत्युक्तेरिति वाच्यम्। उभौसाभ्यासस्येति तदनित्यताज्ञापनात्। यत्तु पदद्विर्वचनविषयं तदिति बोपदेवस्तन्न। सुविनिर्दुर्भ्य इति सूत्रे सुपिभूतो द्विरुच्यतइति वार्त्तिकेन तद्भाष्येण च सह विरोधात्। अत एवाभ्यासे डकारं दुर्गगुप्तादय आहुः। एवं च वैयाघ्रपद्यवार्त्तिके औजढादिति पाठस्य प्रामादिकत्वकल्पनमेव प्रामादिकम्। जिशब्दपाठस्तु क्तिना निर्वाह्यः। यत्त्वदन्तेषूनधातौ मा भवानूनिनदित्यभ्यासे इकारश्रवणं तदपि लिपिप्रमादप्रयुक्तम्। अन्यथा कृतसंशब्दनइत्यत्र सुध्धातौ च स्वोक्तेन समं विरोधापत्तेः। तस्मादूननादित्येव धातुवृत्तौ साम्प्रदायिकः पाठः। नोनयतिध्वनयतीतिसूत्रे काशिकापदमञ्जर्योरप्येवमेवेत्यवधेयम्। एवञ्चेह भाष्यकाशिकयोरविरोध एवेति स्थिते सरस्वतीकण्ठाभरणादिग्रन्था अपि निर्बाधा एवेत्यवधेयम्। यत्तु स्तौतिण्योरिति सूत्रे सिषेचयिषतीत्यत्र सिचेर्हेतुमण्णौ गुणे सनि इटि गुणायादेशयोः कृतयोर्गुणस्य स्थानिवद्भावात्सिच्शब्दस्य द्वित्वमिति न्यासकारेणोक्तं तत्तूत्तरखण्डे ऽकाराभावाद्भाष्यविरुद्धं, स्थानिवद्भावं विनाप्यभिमतरूपसिद्धेर्निष्फलं चेत्युपेक्ष्यम्। एतेनौजढदपीप्यादित्यादिसिद्धये सामान्यापेक्षतां वदन् अचिकीर्त्तदित्यादिसिद्धये चानित्यतां शरणीकुर्वन् सीरदेवोप्यपास्तः॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे
पादे अष्टमाह्निकं समाप्तम्॥

अदर्शनं लोपः॥ स्थाने इत्यनुवर्त्तते। तदर्थश्च प्रसङ्गे इति।

प्रसक्तस्यानुच्चारणं लोपसंज्ञं स्यात्। संज्ञाप्रदेशा लोपोऽर्ध्वलीत्यादयः। अर्थस्यैषा संज्ञा न तु शब्दस्य। महासंज्ञाकरणसामर्थ्यात्। नन्वेवं प्रदेशेष्वेक लोप इति लौकिकोर्थो ग्रहीष्यते। पशुरपत्यं देवतेतिवत्। तर्हि संज्ञयेति चेत्। न। प्रसक्तस्येत्येवंरूपविशेषलाभाय सूत्रारम्भात्। अन्यथा दाधिमध्वित्यादौ तुगागमप्रसङ्गात्। अस्ति हि तत्र क्विपोदर्शनम्। तच्च लोप इति प्रत्ययलक्षणापत्तेः। नन्वस्त्वेवं वार्तिकमते, भाष्यमते तुप्रत्ययलक्षणसूत्रं नियमार्थम्। तत्कथं दध्यादौ तुक्प्रसङ्गः। स्थानिवत्सूत्रं तु न तुकं प्रति प्रवर्तयति। षष्ठीग्रहणस्य तत्रानुर्वित्तत्वात्। अत एव ग्रामणीरित्यादावण्कार्यं न भवति। तथा च भाष्यरीत्या संहितावसानयोर्लोकसिद्धत्वादिति वक्ष्यमाणन्यायेनेदं सूत्रं मास्त्विति चेत्। न। घटङ्करोति ग्रामे तिष्ठतीत्यादौ ल्यब्लोपइति पञ्चम्यापत्तेः। अग्निमीळइत्यादौ चादिलोप इति निघातप्रतिषेधापत्तेश्च। आरब्धे तु सूत्रे तत्र शास्त्रतो लोकतो वा ल्यपश्चादीनां चाप्रसक्तत्वान्नोक्तदोषः। ननु वार्त्तिकमते प्रसक्तस्येत्युक्तेपि ग्रामणीरित्यत्र वृद्धिः स्यात्। कर्मण्यणः प्रसङ्गसत्त्वादिति चेत्। न। वासरूपन्यायेन पक्षे ऽणः सम्भवेपि क्विप्पक्षे तेनाण्प्रसङ्गस्य बाधितत्वात्। वैकल्पिकयोरेकानुष्ठाने तस्मिन्प्रयोगे इतरानुष्ठापकशास्त्राप्रामाण्यस्य शास्त्रसिद्धत्वात्॥

प्रत्ययस्य लुक्श्लुलुपः॥ अनेकसंज्ञाकरणसामर्थ्यात्तन्त्रावृत्त्याद्याश्रित्य तद्धावितसंज्ञा इह विज्ञायन्ते। लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमादेतत्संज्ञं स्यात्। संज्ञाप्रदेशा लुक्तद्धितलुकि, जुहोत्यादिभ्यः श्लुः, जनपदेलुबिति। विधिप्रदेशेषु भाविसंज्ञाविज्ञानान्नान्योन्याश्रयः। विशेषविहिता अप्ये-

ताः संज्ञा लोपसंज्ञां न बाधन्ते । एकसंज्ञाधिकारादन्यत्र संज्ञानां बाध्यबाधकभावो नास्तीति कडारसूत्रे वक्ष्यमाणत्वात्। प्रत्ययस्येति शक्यमकर्त्तुम्। न चैवं लुक्तद्धितलुकीति विधीयमानमदर्शनं गोस्त्रियोरित्यनुवृत्तेर्गोशब्दस्यापि स्यादिति वाच्यम् । गोरुपसर्ज्जनस्येति योगं विभज्य स्त्रियाः लुक्ताद्धितलुकीति सूत्रे स्त्रीग्रहणस्यैवानुवर्तनसंभवात् । अन्यथा प्रत्ययग्रहणे कृतेपि गमेर्डोर्लुक् स्यात् । कंसीयपरशव्ययोर्यञञौ लुक् चेति लुगपि प्रकृतेर्न भविष्यति। ङ्याप्प्रातिपदिकादित्यधिकारात्प्रातिपदिकात्परस्य लुग्विधानात् । कृतेपि हि प्रत्ययग्रहणे कमेः सः कंसः परान् शृणाति परशुरिति उकारसकारयोर्लुक् प्राप्त एवमेव परिहार्यः । न चैवं यञञोरेव लुगस्तु विधानसामर्थ्याच्च यञञ्लुकां विकल्पः । वेत्यनुक्तिस्तु यञञ्भ्यां मुक्तऔत्सर्गिकस्य श्रवणं मा भूदित्येवमर्थमिति वाच्यम् । यञञ्लुकामेककालप्रतीतानामुद्देश्यविधेयभावासम्भवात् । ट्युट्युलौ तु ट्वेत्यत्र तु घकालतनेष्वित्यनद्यतने लङिति च ज्ञापकाद्वाक्यभेदमाश्रित्य ट्युट्युलोस्तुड् विधीयते । तस्मादप्रत्ययनिवृत्तये तावत् प्रत्ययग्रहणं न कर्त्तव्यम् । स्थानिविशेषसमर्पणार्थमपि न । तथाहि । अत्रिभृगुकुत्सेत्यत्र तावत् यस्कादिभ्योगोत्रइत्यतो गोत्रइत्यनुवर्त्तते । तेनाञ्यादिभ्यो यो विहितस्तस्य लुक् सिद्धः । जनपदेलुबित्यत्र तु ङ्याप्प्रातिपदिकात् प्रत्यय इत्यनुवृत्तेः । जनपदे विहितस्य चातुरर्थिकप्रत्ययस्य लुप् । लवणाल्लुगित्यत्र प्रकृतत्वाट्ठक एव । सर्वत्रापि इह प्रत्यय इत्यस्य षष्ठी कल्पयिष्यते तस्मादित्युत्तरस्येति । स्यादेतत् । सर्वादेशार्थं प्रत्ययग्रहणम् । तेन यञञोश्च सुपोधातुप्रातिपदिकयोरित्यादिषु यत्रानेकाल् प्रत्ययस्तत्रालोन्त्यस्येति न भ-

वति। तथा लवणाल्लुगित्यादावादेः परस्येति न भवतीति। मैवम्। ज्ञापकादेव सर्वादेशत्वसिद्धेः। घोर्लोपोलेटि वेति हि लोपे कृते लुग्वादुहेतिलुग्ग्रहणं ज्ञापयति, लुगादयः सर्वादेशा इति। अलोन्त्यस्य ह्यदर्शनं प्रकृतेन लोपेनापि सिद्धम्। न च वैपरीत्यापत्तिः। असञ्जातविरोधित्वेन लोपे ऽलोन्त्यपरिभाषायाः प्रवृत्तेः। सामान्येन लुमद्विषयं ज्ञापकं न तु लुङ्मात्रविषयमिति सर्वं सिद्धम्। स्यादेतत्। आगस्त्यकौण्डिन्ययोरित्यत्र लुगणिञोरित्यतो लुग्ग्रहणमनुवर्त्तते न वा। आद्ये स्थानिनौ द्वौ आदेशास्तु लुका सह त्रयः इति वैषम्यान्न यथासंख्याभावे एकैकस्य त्रय आदेशाः पर्यायेण स्युः। ततश्चागस्तयोपि कुण्डिनाः स्युः। कुण्डिनाश्चागस्तयस्स्युः। लुक्च क्रियमाणो ज्ञापकात्सर्वादेश इति उभयत्रापि विभक्तिमात्रं श्रूयेत। अथ निवृत्तं, ततो ऽगस्तयः कुण्डिना इत्यत्र न काश्चिद्दोषः। किं तु अगस्तीनां छात्रा आगस्तीया इत्यत्र प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षितेप्यगस्त्यादेशस्य निषेधाभावादनिवृत्तावद्वृद्धत्वाच्छो न स्यात्। प्रत्ययग्रहणे सति तु लुग्ग्रहणानुवृत्त्या आगस्त्यकौण्डिन्ययोः प्रत्ययांशस्य लुग्भवति। अवशिष्टभागयोर्यथासंख्यमगस्तिकुण्डिनचौ। तेनागस्तयः। कुण्डिना इति सिद्धम्। प्राग्दीव्यतीये विवक्षिते तु गोत्रे लुगचीति लुकि प्रतिषिद्धे तत्सन्नियोगशिष्टत्वादगस्त्यादेशेपि निवृत्ते आगस्त्यशब्दाद्वृद्धाच्छे कृते सूर्यतिष्येति यलोपे चागस्तीया इति सिद्ध्यति। कौण्डिन्ये तु नास्ति विशेषः। निवृत्तेपि कुण्डिनजादेशे कौण्डिन्यशब्दादपि कण्वादिभ्यो गोत्रइत्यणि कृते आपत्यस्येति यलोपे कौण्डिना इत्येव भवितव्यम्। तस्मादागस्त्यकौण्डिन्ययोरित्यत्रावश्यमनुवर्त्त्यं लुग्ग्रहणम्। ततश्चेह प्रत्ययग्रहणमपि कर्त्त-

व्यमेवेति । मैवम् । आगस्त्यकौण्डिन्ययोरित्यत्र यस्कादिभ्यो गोत्रइति गोत्रग्रहणमनुवर्त्त्यं गोत्रे यो विहितस्तस्य लुगिति व्याख्यानेनापीष्टसिद्धेः । तस्मादत्र प्रत्ययग्रहणं मास्त्विति स्थितम् । स्यादेतत् । एवंसति लोपसंज्ञया सह लुगादिसंज्ञानां तुल्यव्यक्तिकत्वं स्यात् । तद्भावितस्य संज्ञेति चेत् । अविशेषाल्लोपेपि तथा स्यात् । उच्यते । असञ्जातविरोधित्वाल्लोपसंज्ञा तावददर्शनमात्रस्य भवति । लुगादिसंज्ञासु परमनेकसंज्ञाप्रणयनसामर्थ्यात्तद्भावितग्रहः । तेन संज्ञासङ्करो नेत्युक्तम् । सति तु सङ्करे हन्तीति शब्लुकि श्लाविति द्वित्वं स्यात् । जुहोतीत्यत्र श्लौ सति उतो वृद्धिर्लुकि हलीति वृद्धिः स्यात् । न च तत्राभ्यस्तस्य नेत्यनुवृत्तेर्योयोति नोनोतीत्यादाविव वृद्धिर्न भविष्यतीति वाच्यम् । संज्ञासंकरपक्षे तदनुवृत्त्यसम्भवात् । अन्यथा सूत्रस्य निर्विषयतापत्तेः । न च यौतिरौतीत्यादिरवकाशः । संज्ञासङ्करे तत्रापि द्वित्वस्य दुर्वारत्वात् । लोपसंज्ञा तु लुगादिसंज्ञानां व्यापिकेत्युक्तम् । तेन पञ्चेत्यादौ प्रत्ययलक्षणं सिध्यतीति दिक् । भाष्यमते तु यद्यपि स्थानिवत्सूत्रेण पञ्चेत्यादि सिद्धम् । तथापि सुदृषद् ब्राह्मण इत्यत्र वक्ष्यमाणरीत्योत्तरपदाद्युदात्तत्वस्योपधादीर्घस्य च वारणाय लोपे सति प्रत्ययलक्षणमेवेति नियमोवश्यं प्रवर्त्तनीयः । तथा च तत्र लुकः प्रत्ययसंज्ञाप्यादर्त्तव्येत्यवधेयम् ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ प्रत्यये लुप्तेपि तदाश्रयं कार्यं स्यात् । अल्विध्यर्थमिदमिति वार्त्तिकमतम् । तथाहि । अतृणेडित्यत्र तिपो हल्ङ्यादिलोपे कृते तृणह इमिति सूत्रेण विधीयमानो हलादिपित्सार्वधातुकनिमित्त इमागमोस्माद्वचनाद्भवति, स्थानिवत्सूत्रेण तु न सिध्यति, अल्विधित्वात् । नन्वेवं

प्रत्ययलक्षणमपि न स्यात्। वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधादिति चेन्न। नह्येवंरूपं वचनमस्ति। किं तु प्रकृतसूत्रे प्रत्ययलोपे तल्लक्षणमित्येवास्तु, यद्वा तल्लक्षणमित्यपि मास्तु, स्थानिवदित्यनुवृत्त्यैवेष्टसिद्धेः। एवं सति प्रत्ययलक्षणमित्युक्तेः फलं तत्पठ्यते। पुनः प्रत्ययग्रहणसामर्थ्याद्धि यत्कार्यं प्रति प्रत्ययस्यासाधारणं रूपं निमित्ततया ऽऽश्रीयते सुप्त्वातिङ्त्वादि तदेव भवतीति लभ्यते। तेन भवे हितं गोहितमित्यवादेशो न भवति। तद्विधावच्त्वमात्राश्रयणात्। तस्य च प्रत्ययाप्रत्ययसाधारण्यात्। अथात्र नलुमतेति निषेधः। तर्हि सुयशा इत्यत्र विसर्जनीयस्य सः स्यात्, सुवृडित्यादौ खरि चेति चर्त्वं स्यादिति दिक्। इमागमे तु हलादौ सार्वधातुकइति प्रत्यय एव प्राधान्येनाश्रीयतइति वैषम्यम्। तस्माद्वर्णप्राधान्ये प्रत्ययलक्षणं नास्ति प्रत्ययप्राधान्ये त्वस्तीति विवेकः। अनेनैव न्यायेन न धातुलोप इत्यत्र धातुलोप इति बहुव्रीहिणैव सिद्धे आर्द्धधातुकग्रहणसामर्थ्यात्तत्त्वेन निमित्तता लभ्यते। तेन धिन्विकृण्व्योर्विचि लोपोव्योरिति वलोपस्य वलिनिमित्तत्वात्तत्रार्द्धधातुकतया विचो निमित्तत्वाभावाद् गुणो भवत्येव। तेन सुधे सुधेनौ। सुधेनः। सुकः सुकर्णौ सुकर्ण इत्यादि भवति। पठन्ति च। सुधे सुधेवारिवधात्सुराणां सुकारणे लाघवतश्च रामः। विशेषणे द्वे य इहादिकर्त्तुर्वेदेदधीती स हि कैयटीयइति। न च तोतोर्त्तीत्यादिव्यावृत्त्या आर्द्धधातुकग्रहणस्य सार्थक्यात्कथं सामर्थ्यमिति वाच्यम्। यङ्लुकश्छान्दसत्वात्। भाषाविषयत्वपक्षे त्वार्द्धधातुकग्रहणमावर्त्य सामर्थ्यमुपपादनीयम्। नन्वेतत् ङितिचेत्येतत्सूत्रस्थभाष्येण सह विरुद्धम्। पूर्वस्मिन्योगे यदार्द्धधातुकग्रहणं तदनवकाशमिति तत्रोक्तत्वादिति चेन्न। अना-

स्थया तथोक्तत्वादित्याहुः । तदुपघ्नम्भेमात्र विजेवानभिमत इत्येव किं न स्यादिति चिन्त्यम् । किपि तु ऊठ् । तेन धिनूः धिन्वौ धिन्वः कृणूः कृण्वौ कृण्व इति भवति । सुधी सुधिनौ सुधिनः सुकीः सुकृणौ सुकृण इत्यादि तु न भवत्येवेत्याहुः । यङ्लुकोः भाषाविषयत्वे आर्द्धधातुकग्रहणस्य तोतोर्तीत्यत्र चारितार्थ्यादावृत्तौ च मानाभावाद् गुणनिषेधप्रवृत्त्या सुधी सुधिनावित्येवास्तु । कृणोतेस्तु दीर्घे सुकीः सुकीर्णौ सुकीर्ण इत्यादि भवत्वित्यपि चिन्त्यम् । नन्वेवं परिवीरित्यत्र तुग्दीर्घौ पर्यायेण स्याताम् । अनेनैवोभयविधाने पौर्वापर्याभावेन विप्रतिषेधेपरमित्यस्याप्रवृत्तेः । सत्यम् । शास्त्रातिदेशस्य व्यपदेशातिदेशस्य वाश्रयणाददोषः । यद्वा । सति प्रत्यये यत्कार्यं भवितुमर्हति तदेवातिदिश्यतइति परिवीयेत्यादाविव परिवीरित्यत्रापि दीर्घ एव भवति न तु तुगिति कार्यातिदेशेप्यदोषः । भाष्यकारास्त्वाहुः । तृणहइमर्थं तावन्नेदं सूत्रम् । स्थानिवत्सूत्रेणैव गतार्थत्वात् । न चाल्विधिरयम् । हलीत्यस्य निवर्त्तनात् । न चैवं तृणहानीत्यत्रापीम् स्यादिति वाच्यम् । नाभ्यस्तस्याचीत्यतोऽचि नेत्यनुवर्त्तनात् । नाप्याशीरित्यत्र शासइदङ्हलोरितीत्वार्थमिदम् । आशासः कावुपसंख्यानेनैव सिद्धेः । तद्धि त्वयापि वाच्यम् । शासइदङ्हलोरित्यत्र शासिमात्रग्रहणमिति पक्षे नियमार्थ, माशासः कावेव यथा स्यात् । आशास्ते इत्यादौ मा भूदिति । यस्माच्छासेरङ् विहितस्तस्यैवाङ्साहचर्यादित्वविधौ ग्रहणमिति पक्षे यथा आशास्ते इत्यादौ न भवति तथा किप्यपि न स्यादिति विध्यर्थम् । तस्मात्प्रत्ययलोपे सति प्रत्ययलक्षणमेवेति नियमार्थमिदं सूत्रम् । प्रत्ययाप्रत्ययसाधारणं रूपमाश्रित्य यत्कार्यं विधीयते तन्निवृत्तिःफलम् । तेन शोभना दृषदोस्य प्रासादस्य सुदृ-

षत्। अत्र सोर्मनसीअलोमोषसीति सूत्रेण सुशब्दात्परस्य मन्नन्तस्यासन्तस्य चोत्तरपदस्य बहुव्रीहौ विधीयमानमाद्युदात्तत्वं न भवति। अत्र हि लुप्तेपि जसि स्थानिवद्भावेनासन्तमुत्तरपदमस्त्येव। किन्त्वस् इति रूपं प्रत्ययाप्रत्ययसाधारणम्। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति वक्ष्यमाणत्वात्। अतो नियमेनाद्युदात्तव्याद्वृत्तिः सिद्धा। तथा च नञ्सुभ्यामित्यन्तोदात्तं पदं भवति। इदन्त्ववधेयम्। न केवलं स्वरार्थमेवेदं सूत्रम्। किन्तूक्तोदाहरणएव प्राप्नुवन्नत्वसन्तस्येत्युपधादीर्घोपि उक्तनियमेनैव व्यावर्त्यः। वार्त्तिकमते तु उक्तस्वरस्य दीर्घव्याद्वृत्तेश्च सिद्धये उपायान्तरमन्वेषणीयमिति। ननु यदि नियमार्थं सूत्रं तर्हि पञ्चेत्यत्र प्रत्ययलक्षणेन पदत्वमिति वृत्तिः कथं योज्या। एवं समासत्वात्प्रातिपदिकत्वम्, स्नुक्रमोरितीट्, उभयप्राप्तौकर्मणीतीकर्मणि षष्ठीत्यादयोपि तत्रतत्राभियुक्तग्रन्थाः कथं योज्या इति। अत्रोच्यते। योस्माकं नियमविधिः स मीमांसकरीत्या परिसंख्याविधिरिति तावत्स्पष्टं विवरणादौ। तत्र दोषत्रयं,स्वार्थहानिः परार्थपरिकल्पना, प्राप्तबाधश्चेति। तच्च यद्यगत्या सह्यतइति पक्षस्तदा नियमविधेर्निषेध एवार्थः। प्रत्ययलक्षणशब्देन तद्भिन्नं लक्ष्यते। भवतीत्यनेन तु न भवतीति। तथा च स्थानेन्तरतमसूत्रे भाष्यम्, नानेनान्तरतमा निर्वर्त्यन्ते अपि तु अनन्तरतमा निवर्त्यन्ते इति। अत एव वार्त्तिककारोपि वक्ष्यति। उभयप्राप्तौ कर्मणीति प्रतिषेधे ऽकादिप्रयोगे ऽप्रतिषेध इति। अस्मिन्पक्षे उभयप्राप्ताविति परिशेषिता षष्ठीत्यादिक्रमेण व्याख्येयं न तु विहितेति। यदि तु दोषत्रयगौरवपरिहारार्थं प्रत्ययलक्षणसूत्रं यथाश्रुतं व्याख्याय, अतएव ज्ञापकात् स्थानिवत्सूत्रस्य प्रत्ययलोपेतरविषयकता क-

ल्प्यते सामान्यपुरस्कारप्रवृत्तस्य शास्त्रस्य विशेषतात्पर्यं हि त्वयापि कल्प्यमेव। अन्यथा विकल्पापत्तेः। भाट्टमतेनतौ पशौ करोतीत्यत्र यथा। पदे जुहोतीत्यादिभिराहवनीयविधेरिव विशेषविधिना सामान्यविधेः संकोचसम्भवाच्च। न चैवं सामान्यस्य विशेषउपसंहारापत्तिः। सामान्यशास्त्रप्रणयनवैय्यर्थ्यापत्तेः। वेदे तु न कश्चित्प्रणेता येनैवं पर्यनुयुज्येतेति चतुर्द्धाकरणस्याग्नेये उपसंहारो मीमांसायामभ्युपेतः। कल्पसूत्रकारास्तु तत्रापि व्युत्था एव। तथा च भगवता कात्यायनेन सूत्रितम्, अविशेषादुभौ वेति। एवं च सामान्यशास्त्रस्य विशेषलक्षणाया उभयवाच्यत्वात्तयैवोपपत्तौ दोषत्रयं न सोढव्यमिति पक्षस्तदोदाहृतग्रन्थाः सम्यगेव। नैयायिकमते तु तात्पर्यसंकोचस्थले लक्षणा नास्त्येवेति निर्विवादम्। विशेषधर्मप्रकारकबोधस्योद्देश्यतायामेव तदभ्युपगमात्। सामान्यप्रकारकस्य विशेषविशेष्यकस्यापि लक्षणां विना निर्वाहादिति सुधीभिराकलनीयम्॥

न लुमताङ्गस्य॥ लुमता शब्देन प्रत्ययलोपे सति प्रत्ययलक्षणमङ्गस्य कार्यं न स्यात्। वार्त्तिकमते पूर्वसूत्रप्राप्तस्यायं निषेधः। भाष्यमते तु स्थानिवत्सूत्रप्राप्तस्य। नियमविधीनान्तात्पर्यसङ्कोचकत्वमात्रं न तु निषेधकतेति प्रागुक्तरीत्या तु भाष्यमतेपि पूर्वसूत्रेण प्राप्तस्यायं निषेध इत्यवधेयम्। एवमग्रेपि। गर्गाः। मृष्टः। जुहुतः। इह यञ्शपोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः। लुमतेति किम्। कार्यते। हार्यते। णेरणिटीति णिलोपे कृते णिजपेक्षा वृद्धिर्भवत्येव। अमार्ट्। हल्ङ्यादिलोपे नित्यत्वात्कृतेपि वृद्धिः। अङ्गस्येति किम्। पञ्च। सप्त। अत्राङ्गस्येति स्वर्यते। तेनाङ्गाधिकारो गृह्यते। स्वरितेनाधिकार इति वचनादिति वा-

त्रिककाराः । भाष्ये तु इदं दूषितम् । तथाहि । एवं सति उत्क्रामेत्यत्रातोहेरिति हेर्लुकि कृते क्रमः परस्मैपदेष्विति दीर्घो न स्यात् । तथा जिगमिषेत्यत्र गमेरिट्परस्मैपदेष्वितीत्त्र स्यात् । तथा विवृत्सेत्यत्र नवृद्भ्यश्चतुर्भ्य इतीण्निषेधो न स्यात् । तस्मान्नलुमतेत्यत्र नाङ्गाधिकारः प्रतिनिर्दिश्यते । किन्तु लुमतालुप्ते प्रत्यये यदङ्गन्तस्याङ्गमनाङ्ग च सर्वं प्रतिषिध्यतइति । न चैवमुक्तदोषतादवस्थ्यमिति वाच्यम् । उत्क्रामेत्यत्र लुप्तं परस्मैपदम् । तदपेक्षया यदङ्गं शबन्तं न तस्य दीर्घो विधीयते, किन्तु क्रमेः । स तु शपं प्रत्यङ्गं न तु लुप्तं प्रतीति निषेधाप्रवृत्तौ प्रत्ययलक्षणेन दीर्घप्रवृत्तेः । एवं जिगमिष विवृत्सेत्यत्रापि इटो विधिप्रतिषेधौ भवत एव । तौ हि लुमता लुप्ते परस्मैपदे यदङ्गं सन्नन्तं तस्य न क्रियते किन्तु सकारादेः प्रत्ययस्य । सचांगं नेति स्पष्टमेव । स्यादेतत् । पक्षद्वयेपि ञ्नित्यादिर्नित्यं, कितः, पथिमतोः सर्वनामस्थानइति त्रिसूत्र्या विधीयमानाः स्वरा लुकि कृतेपि प्राप्नुवन्ति । तथाहि । गर्गाः बिदाः । यञञोर्लुक् । उष्ट्रग्रीवाः । इत्वेप्रतिकृताविति कनो देवपथादिभ्यश्चेति लुप् । ततो ञ्नित्यादिरित्याद्युदात्तता प्राप्नोति । तथा अत्रेरपत्यानि अत्रयः । इतश्चानित्र इति ढकोऽत्रिभृगुकुत्सेत्यादिना लुक् । ततः कितस्तद्धितस्यान्त उदात्तो भवतीत्यन्तोदात्तता प्राप्नोति । सा हि प्रत्ययग्रहणे तदन्तग्रहणात्तद्धितान्तस्य विधीयते । न च सिद्धान्तेपि फिट्स्वरेणान्तोदात्ततया भाव्यमेवेति वाच्यम् । राशदिभ्यां त्रिप्, अदेस्त्रिनिश्चेत्युणादिसूत्रेण ह्यदेश्चकारानुकृष्टे त्रिप्प्रत्यये तस्य पित्त्वेनानुदात्तत्वादाद्युदात्तो त्रिशब्दः । तथा च प्रयुज्यते । अत्रेरिव शृणुतं पूर्वस्तुतिम्, यथा शृणोरत्रेः कर्माणि कृण्वत इति तथा ढको लुक्यप्याद्युदात्त एव प्रयुज्यते । अत्रीणां सोममद्रिव इति ।

अत्रीणां शृणुतं हवमिति च। त्रिनप्रत्ययान्तस्त्वन्तोदात्तो नकारान्तश्चेत्यन्यदेतत्। सोपि प्रयुज्यते। दूरे वा ये अन्ति वा के चिदत्रिण इति। तथा, पन्थाः प्रियो यस्य पथिप्रियः मथिप्रियः। सुपोधात्विति सोर्लुकि पथिमथोः सर्वनामस्थानइत्याद्युदात्तता प्राप्नोति। न ह्येषा त्रिसूत्री अङ्गाधिकारस्था येन नलुमतेति निषेधः प्रवर्तेत। नाप्येतद्वस्तुतोङ्गस्य कार्यम्। सुप्तिङन्तमिति पदसंज्ञावदुक्तस्वराणां प्रत्ययान्तकार्यत्वात्। नन्वस्तु कित इति तथा इतरत्तु द्वयं ञ्निति सर्वनामस्थान इति सप्तमीनिर्देशाद्वस्तुतोङ्गस्य कार्यम्भवत्येवेति चेन्न। ञ्निदन्तस्यादेरित्यादिक्रमेण प्रत्ययान्तस्यैव तद्विधानात्। सौवर्य्यः सप्तम्यस्तदन्तसप्तम्य इति सिद्धान्तात्। एतच्च भीह्रीभृहूमदजन धनदरिद्राजागरां प्रत्ययात्पूर्व पितीति पूर्वग्रहणेन ज्ञाप्यतइति तत्रैव भाष्ये स्पष्टम्। अत एवोपोत्तमं रितीत्याद्युदात्वमाहवनीयइत्यादौ रिदन्तस्योपोत्तमे नीशब्दस्येकारे प्रवर्त्तते चङन्यतरस्यामिति च चङन्तस्य। न चैवं चतुरश्शसीत्युदात्तत्वं शसन्तस्य स्यात्तथा च षट्त्रिंशांश्च चतुरः कल्पयन्त इत्यादौ चतुर इति पदं मध्योदात्तमिष्यमाणं न सिद्ध्येदिति वाच्यम्। तत्र शस्ग्रहणसामर्थ्यात्तदन्तसप्तमीत्वबाधात्। इतरथा ह्यूडिदम्पदाद्यप्पुम्रैद्युचतुर्भ्य इत्येव ब्रूयात्। तत्र ह्यसर्वनामस्थानग्रहणानुवृत्तेः शस एव भविष्यति। षट्त्रिचतुर्भ्योहलादीरिति हलादेः सिद्धान्तेप्युदात्तविधानात्। न चैवं स्वरविधिषु षष्ठ्येव निर्दिश्यतामिति वाच्यम्। रितश्चङ इत्याद्यपेक्षया रिति चङीत्युक्तावर्द्धमात्रालाघवसम्भवेन सप्तमीप्रयोगादिति। अत्रोच्यते। अङ्गाधिकारनिर्देशपक्षे तावदुक्तदोषपरिहाराय वार्त्तिकमारभ्यते। लुमतिप्रतिषेधे एकपदस्वरस्योपसंख्यानम्। सर्वामन्त्रितासिञ्लुक् स्वर-

वर्जम्। प्रयोजनं त्विनिकिल्लुक्स्वराः। पथिमथोः सर्वनामस्थाने लुकीति। अस्यार्थः। लुमति लुमत्संज्ञया प्रतिपादिते ऽदर्शने यः प्रतिषेधः तस्मिन्नेकपदाश्रयो यः स्वरस्तस्योपसंख्यानम्। प्रत्ययलक्षणेन प्राप्तोप्येकपदस्वरो न भवतीत्यर्थः। पदद्वयाश्रयस्तु स्यादेव। यथा दधि तिष्ठतीत्यत्र पदस्य पदादित्यधिकृत्य विहितस्तिङ्ङतिङ इति निघातः। अत्र हि दधीत्यस्य पदसंज्ञार्थं प्रत्ययलक्षणमपेक्ष्यते। तथा इह तिष्ठेत्यादौ तिङन्तत्वलाभायापि। नन्वेवंसर्वस्तोमोतिरात्र इत्यत्र सर्वस्य सुपीत्याद्युदात्तत्वं न स्यात्। तथा सर्पिरागच्छ सप्तागच्छतेत्यत्रामन्त्रितस्य चेति षाष्ठमाद्युदात्तत्वं न स्यात्। तथा मा हि दातां मा हि धातामित्यत्रादिः सिचोन्यतरस्यामित्याद्युदात्तत्वं न स्यादित्यत आह। सर्वेत्यादि। इदं स्वरत्रयं विहाय स्वरान्तरे प्रतिषेध इत्यर्थः। न च सर्वस्तोम इत्यत्र बहुव्रीहौ प्रकृत्यापूर्वपदमिति पदद्वयस्वरोयमिति वाच्यम्। सर्वस्यसुपीति यदाद्युदात्तत्वं तस्यैव ह्यनेन प्रकृतिभावमात्रं कर्त्तव्यम्। तथा च तत्प्राप्तिरवश्योपपादयितव्येति भावात्। न च सर्पिश्शब्दस्यामन्त्रितस्वरं विनाप्याद्युदात्तता लब्धुं शक्या। अर्चिशुचिहुसृपिछादिछर्दिभ्य इत्यौणादिके इसि प्रत्यये कृतेन्तोदात्तत्वात्। अव्युत्पत्तिपक्षेपि फिट्स्वरेण तथात्वात्। न च नञ्विषयस्येत्याद्युदात्तः। अनिसन्तस्येति पर्युदासात्। कैयटेन तु सर्पिःशब्दस्य घृतादित्वं किमर्थं कल्पितमिति चिन्त्यम्। ननु सप्तशब्दः सप्यशूभ्यांतुट्चेति कनिनन्तो व्युत्पादितः। तथा च नित्वादाद्युदात्तः। अव्युत्पत्तिपक्षेपि तथैव। नृःसंख्याया इति वचनादिति चेत्। न। उभयथापि घृतादित्वेनान्तोदात्तत्वात्। तथा च प्रयुज्यते। सप्त युञ्जन्ति रथमेकचक्रमिति। इह सिज्लुग्ग्रहणं मास्तु। गातिस्थेत्यत्र सिज्ग्रहणसामर्थ्याल्लुकि स्वरः सिद्धः। अन्यथा हि

लाघवार्थं च्लेरेव लुकं विदध्यात् । एवं ह्यभूदपादित्यादिसिद्धये ऽस्तिसिचोपृक्तइत्यत्र सकारान्तरप्रश्लेषकेशोपि नाश्रयणीय इति । न चैवं च्लेर्लुकि आत इति सूत्रं विध्यर्थमेव स्यान्न तु नियमार्थं तथा च तत्र लङ्निवृत्तये च्लिलुकीति वक्तव्यं स्यादिति विपरीतगौरवापत्तिरिति वाच्यम् । ङित इत्यनुवृत्त्यैव लटो व्युदस्तत्वात् । तस्मात्सर्वामन्त्रितस्वरवर्जमित्येवावश्यकम् । वार्त्तिकारम्भस्य प्रयोजनमाह । प्रयोजनमिति । त्रिनिशब्दयोरिकार उच्चारणार्थः सुद्तिथोरिति वत् । एते स्वरा निवर्त्यमानतया प्रयोजनमित्यर्थः । प्रयोजनान्तरमाह । पथिमथोरिति । तदेवं वचनबलेन त्रिसूत्र्या ऽतिव्याप्तिरुद्धर्त्तव्येतीह सूत्रे स्थितम् । वस्तुतस्तु नैतदर्थं वचनं क्रियते ज्ञापकबलेनैव विदा गर्गा इत्यादेः सिद्धत्वात् । तथा च संज्ञायामुपमानमिति सूत्रे वार्त्तिकम् । उपमानस्याद्युदात्तत्वचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्येति । अस्मिंश्च पक्षे पथिमथोः सर्वनामस्थाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वचनमेव कर्त्तव्यम् । न ह्ययमनुबन्धलक्षणः स्वरः, येनोक्तज्ञापकबलेन वार्येत । न च स्वरमात्रविषयकं ज्ञापकमिति वाच्यम् । आमन्त्रितस्वरासिज्लुक्स्वरयोरसिद्धिप्रसङ्गात् । न चैवमपि सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञाप्यतामिति वाच्यम् । सर्वस्तोम इत्यत्राद्युदात्तासिद्धिप्रसङ्गात् । यद्वा । अस्तु सप्तमीनिर्दिष्टस्वरविषयकमेव ज्ञापकम् । सर्वस्य सुपीति सप्तमीमपनीय सुप इति षष्ठी पाठ्या । तथा च पथिस्वरार्थं वचनं नारम्भणीयम् । ञ्नित्कित्स्वरार्थं तूभयथापि नारम्भणीयमिति सर्वं सुस्थम् । पक्षद्वयमपीदं संज्ञायामुपमानमिति सूत्रे भाष्यकारैः स्पष्टमुक्तम् । तदयं निर्गलितोर्थः । त्रिसूत्र्यां शङ्कितस्यातिव्याप्तिदोषस्य

वचनेनोद्धारमापातत उक्त्वा ज्ञापकेनैवैष्टसिद्धिरिति निष्कर्षोग्रे कृत इति '। एतच्च समाधानमङ्गाधिकारो निर्दिश्यतइति पक्ष इव वस्तुतोऽङ्गस्य यत्कार्यामिति निष्कृष्टपक्षेपि तुल्यम् । अत एव संज्ञायामुपमानमिति सूत्रे भाष्यकारैः पक्षद्वयसाधारण्येनैवोक्त-ज्ञापनवार्तिकं योजितम् । प्रकृतसूत्रस्थभाष्यकैयटयोस्तु निष्कृष्टपक्षे उक्तदोषप्रसङ्ग एव नास्तीति लभ्यते । तत्रेत्थमाशयमभियुक्ता वर्णयन्ति । ज्ञापकं द्विविधम् । सामान्यापेक्षं विशेषापेक्षं च । तत्र यदा भीह्रीत्यत्र पूर्वग्रहणेन यत्र सप्तम्यर्थपक्षे तदन्तग्रहणपक्षे च फलभेदः तत्रैव सौवर्यः सप्तम्यस्तदन्तसप्तम्य इति ज्ञाप्यते । यथा भीह्रीत्यत्रैव पूर्वग्रहणाभावे तदन्तस्य कार्यित्वे प्रत्ययान्तानां म्यादीनामुदात्त इत्यलोन्त्यपरिभाषया प्रत्ययाव्यव एवोदात्तः स्यात् । सप्तम्यर्थाश्रयणे तु पितमपहाय भ्यादीनामेवोदात्तः स्यादिति स्पष्टः फलभेदः । तथोपोत्तमं रिति, चङ्यन्यतरस्यामित्यत्रापि । ञ्नित्यादिर्नित्यं पथिमथोः सर्वनामस्थानइत्यादौ तु नास्ति फलभेदः । तदन्तस्य हि कार्यित्वे प्रकृत्यादेरेवोदात्तत्वं ञ्नित्यादिपूर्वस्यापि कार्यित्वे तथैवेति । तथा च तत्र सौवर्य इत्यस्याप्रवृत्त्या तदन्ताकार्यित्वादुक्तदोषस्याप्रसङ्ग एवेति । संज्ञायामुपमानमित्यत्र भाष्यकैयटादिग्रन्थास्तु सामान्यापेक्षं ज्ञापकमाश्रित्य योजयितव्या इति । अत्रय इत्यत्र तु स्वरो न भवति । लुकि कृते कार्यिणो ऽभावात् । प्रत्ययलक्षणं हि यदन्यस्य कार्यं तत्प्रत्ययलोपेपि भवति, न तु प्रत्ययस्यैव यत्कार्यं तदपि । न च प्रत्ययग्रहणपरिभाषया तदन्तग्रहणं स्यादिति वाच्यम् । येन विधिरिति सूत्रेणैव तल्लाभस्य वक्ष्यमाणत्वात् । विशेषणविशेष्यभावे च कामचारात् । नन्वेवमपि स्थानिवत्सूत्रेण स्यादेवोदात्ततेति चेन्न ।

लोपस्याभावरूपतया तदीयान्तस्य तदुदात्ततायाश्च बाधात्। अत एव हि अभूदित्यादौ लुप्तस्य सिचो नेट्। न ह्यभावस्य भावोवयवः सम्भवति। भाष्यमते ऽनल्विधाविति निषेधाच्च। क्विब्विजादीनां तु नेड्वशीतीण्निषेधो ऽप्यस्ति। न चैवं नखनिर्भिन्नेत्यप्रसङ्गः। तस्यापि लुकापहारादिति दिक्। वस्तुतो यदङ्गामिति व्याख्यानाद्राजपुरुष इत्याद्यपि निर्बाधम्। भसंज्ञाया निषेधेनाल्लोपाभावात्। सुबन्तत्वप्रयुक्तपदसंज्ञाया नलोपाच्च। तथा अहर्ददातीत्यत्र रेफोपि सिद्धः। असुपीति निषेधो हि वस्तुतोङ्गस्य कार्यमिति नेह प्रवर्त्तते। अङ्गाधिकारनिर्देशे तु प्रवर्त्तेतासौ। अत एवाह्नो रविधाविति वचनमारभ्यते। न चासुपीति वचनसामर्थ्यात्प्रत्ययलक्षणेनासुपीति निषेधो नेति वाच्यम्। दीर्घाह्नो निदाघ इत्यादौ हल्ङ्यादिलोपेपि रेफापत्तेः। एतेनासुपीति पर्युदासमाश्रित्याहर्ददातीत्यत्र दाधातोः सुब्भिन्नस्य सत्वाद्रेफ इत्यपि कल्पनमपास्तम्। दीर्घाह्नो निदाघ इत्यत्रातिप्रसङ्गात्। यद्यपि रुत्वरत्वयोरसिद्धतया पूर्वं नलोपे कृते ऽकारस्यैव रुत्वरत्वे प्राप्नुतस्तथापि रुत्वरत्वयोर्विषये नलोपो नेष्यते। रुत्वरत्वोभयारम्भसामर्थ्यात्। नह्यकारस्य रौ रे वा विशेषोस्ति। न च सम्बुद्धौ नलोपनिषेधाद्धे अहर्गच्छ हे दीर्घाह्नो निदाघेत्यत्र चरितार्थता। एवमपि रूपरात्रीतिरुत्वस्य वैयर्थ्यापत्तेः। नन्वेतदपि सम्बोधने चरितार्थमिति चेत्सत्यम्। अहन्नित्यावर्त्यैकेन नलोपोभावनिपातनात्सिद्धामिति दिक्। स्यादेतत्। परमवाचा परमगोदुहा परमलिहा परमदण्डिना परमदिवा परमकुमार्येत्यत्रान्तर्वर्त्तिनीं विभक्तिमाश्रित्योत्तरखण्डस्य पदसंज्ञा स्यात्। ततश्च चोःकुः, दादेर्धातोर्घः, होढः, नलोपः प्रातिपदिकान्तस्य, दिवउत्, इकोस-

वर्णेशाकल्यस्यह्रस्वश्चेत्येते विधयः प्रसज्येरन् । न च भसंज्ञया पदसंज्ञाया बाधः । भिन्नावधिकत्वात् । भसंज्ञा हि समस्तस्य प्राप्ता पदसंज्ञा तूत्तरखण्डस्य । अत्र भाष्यम् । भसंज्ञासूत्रे सुप्तिङन्तमिति सूत्रात्सुबन्तमित्यनुवर्त्तनीयम् । तदयं सूत्रार्थः । यजादौ असर्वनामस्थाने परे यस्मात्प्रत्ययविधिस्तथाभूतः पूर्वः समुदायो भसंज्ञो भवति । तदवयवभूतं सुबन्तं यद्यस्ति तर्हि तदपि भसंज्ञं स्यात् यजादावनन्तर इति । इह च समुदायस्य भसंज्ञा प्रधानशिष्टा । अवयवस्य त्वन्वाचयशिष्टा कर्तुःक्यङ्सलोपश्चेतिवत् । तेन राज्ञ इत्यादौ सुबन्तावयवाभावेपि भवति, सुबन्तावयवसत्वे तु तस्य समुदायस्य चेत्युभयोरपि भवतीति विवेकः। नन्वेवमपि परमवाचौ परमवाच इत्यादौ भत्वाभावात्पदकार्यं स्यादेवेति चेन्न । तत्र भत्वाभावेप्यसर्वनामस्थानइति पदसंज्ञानिषेधात् । स्वादिष्वसर्वनामस्थानइत्यत्रापि हि सुबन्तमित्यनुवर्तते । प्रसज्यप्रतिषेधश्चायम् । तत्सामर्थ्यादनन्तरस्य विधिर्वेति न्यायो नाश्रीयते । तदयमर्थः । सर्वनामस्थाने परतः पूर्वः समुदायः पदं न स्यात् । तदवयवभूतं सुबन्तं च पदं न स्यादिति । तत्र समुदायस्य स्वादिष्वाति प्राप्ता अवयवस्य तु सुबन्तमिति प्राप्ता पदसंज्ञानेन निषिद्धेति परमवाचावित्यादि सिद्धम् । नन्वेवं सुवाक् सुराजेत्यादौ कुत्वादि न स्यात् । सावपि समुदायस्यावयवस्य च प्राप्तयोर्द्वयोरपि पदसंज्ञयोर्निषेधादिति चेन्न । असर्वनामस्थानइत्यत्रोत्तरसूत्राद्यचीत्यपकृष्य यजादौ सर्वनामस्थाने उभयविधपदसंज्ञानिषेधात् । सौ तु द्विविधापि पदसंज्ञा भवत्येव । नन्वेवं श्रूयमाणे सौ पूर्वस्य पदसंज्ञा स्यादिति चेत् । इष्टापत्तेः । नन्वेवमेचोऽप्रगृह्यस्यादूराद्भूतेपूर्वस्यार्द्धस्यादुत्तरस्येदुतावितिसूत्रे भद्रङ्करोषि गौरित्यत्रातिप्रस-

ङं वारयितुं पदान्तग्रहणं कर्त्तव्यमिति वार्त्तिककृता वक्ष्यमाणं विरुध्येत। क्रियमाणेपि पदान्तग्रहणे दोषतादवस्थ्यादिति चेन्न। तत्रान्तग्रहणमात्रं कृत्वा वाक्यस्य टेरित्यतो वाक्यग्रहणमनुवर्त्त्य वाक्यान्तस्येति व्याख्यानसम्भवात्। तदेवं समासे चरमभागस्य पदसंज्ञा यजादौ क्वापि नास्तीति स्थितम्। क्व चिन्निषेधात्क चित्तु भत्त्वेन बाधादिति विशेषः। नन्वेवं दूरान्मुक्तमित्यादावलुङ् न स्यात्। होता पोतारावित्यत्रानङ् न स्यात्। उत्तरपदे तद्विधानादिति चेन्न। उत्तरपदशब्दस्य समासोत्तरावयवे रूढतया पदसंज्ञाविरहेपि तत्प्रवृत्तेः। सर्वान्तएव चेयं रूढिः। तेन होतृपोतृनेष्टोद्गातार इत्यत्र मध्यमानामुत्तरपदत्वाभावात्ततः पूर्वस्यानङ् नेति दिक्। नन्वेवं दधिसेचौ दधिसेच इत्यत्र सात्पदाद्योरिति षत्वनिषेधो न स्यादिति चेन्न। पदादादिः पदादिस्तस्य षत्वं नेति व्याख्यानात्। न चैवं रामेषु हरिष्वित्यत्रापि निषेधः स्यादिति वाच्यम्। स्वादाविति या पदसंज्ञा तामुपजीव्य पदादेर्नेति निषेधाप्रवृत्तेः। एतच्च सात्प्रतिषेधेन ज्ञाप्यते। उक्तं च पदादादेर्नेत्येव व्याख्यानं न तु पदस्यादेरिति। तथा सति गतिकारकोपपदानामिति सुबुत्पत्तेः प्रागेव समासे दधिसेगित्यादौ षत्वस्य दुर्वारतापत्तेः। नन्वेवमपि बहुसेचौ बहुसेच इत्यत्र षत्वं स्यादेव। बहुचो ऽपदत्त्वेन षत्वप्रतिषेधाप्राप्तेरिति चेत्। सत्यम्। वचनमेवेह कर्त्तव्यम्। बहुच्पूर्वस्य नेति। अत्रायं सूत्रन्यासः। सातेः सः, षत्वं न स्यात्। ततः बहुच्पदाभ्याम्। आभ्यामुत्तरस्य सस्य षत्वं न स्यात्। आदिग्रहणं न कर्त्तव्यम्। तस्मादित्युत्तरस्येत्येव सिद्धेः। तदिदं बहुज्ग्रहणमादिग्रहणेन निमातव्यमिति। वार्त्तिके तूत्तरपदत्वे चापदादिविधाविति वचनेनैव परमवाचेत्यादि साधि-

तम् । उत्तरस्य समासोत्तरभागस्य पदत्वे कर्त्तव्ये लुमता लुप्ते प्रत्ययलक्षणं न स्यात् । अतो न कुत्वादि । पदादिविधौ तु प्रत्ययलक्षणं स्यादेव । तेन षत्वनिषेधाद्दधिसेचेत्यादिसिद्धिः । अस्मिंश्च पक्षे प्राक् सुबुत्पत्तेः समासोत्र नाभ्युपगन्तव्यः । धनक्रीतेत्यादिसिद्धये तस्यानित्यताया वक्ष्यमाणत्वात् । कैयटस्त्वाह दध्नः सेचाविति विग्रहे षष्ठीति समासः न त्वयमुपपदसमासः । सोपपदात्तु विच् नास्ति । अनभिधानात् । अतो दधिषेचावित्यादि न भवत्येव । अस्मिन्नपि पक्षे बहुच्पूर्वस्य चेति वचनं कर्त्तव्यमेव । कृते हि बहुचि विशिष्टस्यार्थवत्त्वेन प्रातिपदिकत्वे सुपो लुकि च कृते पुनर्विशिष्टात्सुबन्तरमुत्पद्यतइत्यर्थवत्सूत्रे वक्ष्यते । तत्रान्तर्वर्तिनीं विभक्तिमाश्रित्य प्राप्तं पदत्वं तत्कुत्वादौ कर्त्तव्ये मा भूत्, षत्वनिषेधएव यथा स्यादिति । अत्रायं निष्कर्षः । पूर्वसूत्रे एव स्थित्वोत्तरपदत्वे च पदादिविधौ बहुच्पूर्वस्येति पाठ्यम् । पदादिविधावेव प्रत्ययलक्षणं भवति न तु पदान्तविधाविति नियमार्थं चेदं वचनद्वयमिति व्याख्येयम् । एवं च नञ् न कर्त्तव्य इति लाघवम् । अस्मिन्पक्षे सौ पदत्वं नास्ति । प्रागुक्तकुसृष्टेरभावात् । तदेतत्पक्षद्वयमभिप्रेत्य हल्ङ्यादिसूत्रे भाष्यकारैरुक्तम् । अथ सावाप पदं भवति । एवमप्युभयतस्पाशा रज्जुरिति । नन्वङ्गाधिकारग्रहणपक्षे वस्तोङ्गस्येति पक्षे चाभूवन्नित्यत्र जुस् प्राप्नोतीति चेत् । सत्यम् । आत इति नियमान्न भवति । ननु देवदत्तं याजयाञ्चकारेत्यत्र लुकं बाधित्वा परत्वात्तिबादिषु कृतेष्वाम इति तेषां लुकि प्रत्ययलक्षणेन तिङन्तत्त्वादामन्तस्य निघातः स्यात्ततः परस्य च न स्यादिति चेन्न । लावस्थायामेव येन नाप्राप्तिन्यायेन तिबादीन्बाधित्वा लुक्प्रवृत्तेः । तदुक्तम् । आमिसिलोपा-

त्तस्य चानिघातस्तस्माच्च निघात इति । ननु देवदत्तो युष्मत्पुत्र इत्यादौ षष्ठ्यन्तस्य विधीयमाना युष्मदस्मदोरादेशाः प्राप्नुवन्तीति चेत् । सत्यम् । स्थग्रहणान्न भवन्ति । न च विभक्तौ परतः पूर्वभागमात्रस्य मा भूत्किन्तु विभक्तिविशिष्टस्येत्येतदर्थं स्थग्रहणं स्यादिति वाच्यम् । षष्ठीचतुर्थीद्वितीयानामिति निर्देशनापि गतार्थत्वात्सर्वस्य पदस्येत्यनुवृत्तेश्च । तस्माद्विभक्तिलोपे कृते मा भूदित्येतदर्थमेव स्थग्रहणम् । अवस्थानं हि श्रूयमाणस्वेव संभवति । यद्वा । तिष्ठतिरहानौ वर्त्तते । यथा समये तिष्ठ मुग्रीवेति । समयं माहासीरित्यर्थः । तथा चापरित्यक्तविभक्तिकयोरित्युक्त्या श्रूयमाणविभक्तिकत्वं स्पष्टमेव लभ्यते । इदन्त्ववशिष्यते । वस्तुतोऽङ्गस्येति सिद्धान्ते चिणो लुगिति तलोपे कृते हनिणिङादेशा न स्युः । अवधि भवतादस्युः । अगायि भवता ग्रामः । अध्यगायि भवतानुवाक इति । लुङि परतो ह्येते विधीयन्ते इति चेत् । मैवम् । लुङि यदार्द्धधातुकं तत्र हनि णिङादेशविधानात् । तस्माद्वस्तुतोऽङ्गस्येति पक्षो निर्दुष्ट इति स्थितम् ॥

अचोन्त्यादि टि ॥ अच इति निर्द्धारणे षष्ठी । जातौ एकवचनम् । अचां मध्ये योन्त्यस्तदादिशब्दरूपं टिसंज्ञं स्यात् । टिप्रदेशाष्टित आत्मनेपदानां टेरित्यादयः । पचते । पचेते इत्यादि । अन्ते भवोन्त्यः । दिगादित्वाद्यत् । अन्त्य आदिर्यस्येति बहुव्रीहिः । नित्यसापेक्षत्वात्समासः ॥

अलोन्त्यात्पूर्व उपधा ॥ अन्त्यादलःपूर्वो वर्ण उपधासंज्ञः स्यात् । उपधागुणः । चेतति । च्योतति । वर्द्धतइत्यादि । ननु पूर्वस्याविशेषितत्वाच्छासिधातौ शा इति समुदायस्य संज्ञा स्यादिति चेत् । अस्तु । नचैवं शासइदङ्हलोरितीत्वंशा इति समुदायस्य स्यादि-

ति वाच्यम् । अलोन्त्यपरिभाषयेष्टसिद्धेः । स्यादेतत् । नानर्थकेलोन्त्यविधिरनभ्यासविकारेष्विति निषेधः प्राप्नोति । इह च बिभर्त्तीत्यत्र भृञामित् अन्त्यस्य यथा स्यादित्येतदर्थमनभ्यासविकारेष्वित्युक्तम् । विकारो नाम वर्णात्मक आदेशः । अत एव देहीत्यत्र लोपः सर्वादेश एव भवतीति । अत्रोच्यते । न तावदेषा परिभाषा सूत्रकृतः सम्मता । तस्यलोप इति सूत्रे ञ्नित्कृतूनां सर्वलोपार्थं तस्य ग्रहणात् । नापि भाष्यकारस्य सम्मता । एतत्प्रयोजनानामन्यथोपपत्तेर्भाष्ये उक्तत्वात् । तथाहि । अव्यक्तानुकरणस्येति तावदन्तादेशो न भवति । नामेडितस्यान्त्यस्यतुवेति ज्ञापकात् । इतरथा ह्यामेडितस्य वेत्येव ब्रूयात् । घ्वसोरेद्धावित्यत्रापि लोपोयीति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशः । तथा चेत्थं सूत्रन्यासः । घोरभ्यासस्य लोपः । लोपशब्दान्तरस्यानुवृत्त्या सर्वलोपः स्यात् । अस्तेश्चैत् । अस्तेर्घोश्चैद्भवति ह्यावितीति । अथवा लोपश् इतिच्छेदः । संज्ञायां कृतो ऽनुबन्धः संज्ञिनि फलति यथा ङ्मुटि । भाष्ये तु द्विशकारकोनिर्देश इत्युक्तम् । तत्र लोप इति भिन्नं पदम् । श् इत्यस्य चोपदेशएवेत्संज्ञा तत्फलं तु प्रयोगे । सर्वत्रानुबन्धानां काकादिवदनवयवीभूयैव व्यावर्त्तकत्वादिति भावः । अस्मिन्नपि पक्षे झलि परे यः संयोगस्तदादित्वात्सोर्लोपे एकशकारक एव पाठः सुवचः । स्पष्टार्थमनउपधालोपिन इत्यादावकारस्येवेहापि सकारस्य लोपो मास्त्विति तु भाष्याशयः । आभ्यामित्यादौ हलि लोप इति सूत्रेणाककारस्येदम इदो विधीयमानो लोपोपि तद्वन्त्यस्य स्या दिति चेन्न । अनाप्यक इति सूत्रादनित्यनुवर्त्य तस्य हलीति सप्तम्या षष्ठीं प्रकल्प्य अन एव लोपविधानात् । तथा च त-

त्रालोन्त्यपरिभाषया नकारलोपे अतोगुणइति पररूपे च कृते आभ्यामेषामित्यादि सिद्धम् । अत्रलोपोभ्यासस्येति सूत्रेपि अत्राभ्यासत्वाश्रये न तु तदेकदेशइति व्याख्यानादत्रग्रहणसामर्थ्यात्सर्वलोपः । यद्यपि सनीत्यपेक्षितं ददौ दधावित्यादिवारणाय, सादाविति च जिज्ञपयिषतीत्येतद्वारणाय, प्रकृतयोपि पिपक्षतीत्यादिवारणाय, विषयोप्यपेक्षितः मुचोऽकर्मकस्यगुणोवेति मुमुक्षतिगामित्यादिवारणाय तथापीदं सर्वमनुवृत्त्यैव सुलभमिति सर्वलोपार्थमेवात्रग्रहणं बोध्यम् । नन्वेवमपि विभाषाभवद्भगवदघवतामोच्चावस्येति वार्त्तिकेन विधीयमान ओकारोन्त्यस्य स्यादिति चेन्न । वस्येति सिद्धे अवस्येति गुरुकरणसामर्थ्यात्सर्वादेशसिद्धेः । तस्मान्नानर्थक इति परिभाषा निष्फला सूत्रभाष्यासम्मता चेति स्थितम् । एवञ्च शासेः शाशब्दस्योपधात्वेपि शिष्ट इत्यादि सिध्यति । संयोगोपधग्रहणं कुत्रर्थमित्यादिव्यवहाराश्चास्मिन्पक्षे संगच्छन्तइति दिक् । यद्वा । अवध्यवधिमद्भावः सजातीयानामेवेत्युत्सर्गः । लोके ह्यमीषां ब्राह्मणानामन्त्यात्पूर्वमानयेत्युक्ते एक एवाऽन्त्यादव्यवहितपूर्व आनीयते न तु समुदायः । एवं चेहाप्यलो ऽव्यवहितपूर्वोऽलेव संज्ञी न तु समुदायः, न वा व्यवहितोल् । संयोगोपधव्यवहारस्तु भाक्तः । अवयवधर्मस्य समुदाये उपचारात् । एवं स्थिते ऽल इति जसन्तमपि सुबचम् । जात्याख्यायामिति बहुवचनम् । पूर्वे इत्यपि जसन्तम् । अन्त्योप्यलेव साजात्याल्लभ्यते । यद्वा । अल इति निर्धारणे षष्ठी । जातौ चैकवचनम् । अलां मध्ये ऽन्यात्पूर्व इत्यर्थः । तथा चेहाल इति जस्ङसिङ्स् वेति पक्षत्रयमपि स्थितम् ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ सप्तमीनिर्देशेषु पूर्वस्यैव कार्यं स्यात्तच्च निर्दिष्टे ऽव्यवहितोच्चारिते सतीत्यर्थः ॥ निःशब्दो नैरन्तर्ये दिशिरुच्चारणक्रियः । निरन्तरं दिष्टो निर्दिष्टः । नियमार्थमिदं सूत्रम् । तथाहि । इकोयणचीत्यत्राचीति यस्यचभावेनभावलक्षणामिति सप्तमी । अश्रूयमाणाक्रियत्वाच्चान्तरङ्गस्यास्त्यर्थस्य लाभः । तेनाचि सति यण् भवतीत्यर्थः । यद्वा सङ्ज्ञायां घोष इतिवद्दौपश्लेषिके ऽधिकरणे सप्तमी तत्र सत्त्वं परस्येव पूर्वस्यापि सम्भवति । एवमुपश्लेषोपि । तत्र युगपदेकस्य कार्यित्वनिमित्तत्वयोरसंम्भवाद्ध्युदकं मध्विदमित्यादाविकारोकारयोः पर्यायेण यण् प्राप्तः पूर्वस्यैवेति नियम्यते । तथा अग्निचिदत्रेति व्यवहितस्यापि यण् प्राप्तः, अनन्तरस्यैवेति नियम्यते । ननु गवित्ययमाहेत्यादौ स्वरूपपदार्थकतामितिशब्दः करोति तथेहापि एवं च तस्मिन्निणीत्यत्रैवेयं परिभाषा प्रवर्त्तेत । अस्ति हि तत्र व्यवच्छेद्यम् । हे यौष्माकीण अस्मभ्यं देहि हे आस्माकीन युष्मभ्यं ददामीत्यादौ खञ्णभ्यां परस्याप्यादेशप्रसङ्गसत्त्वात् । सत्यम् । इतिकरणः पदार्थविपर्यासकृत् । लोके ऽर्थपरतायां औत्सर्गिकत्वात्तत्र शब्दपरतां करोति । शास्त्रे तु विपरीतम् । किञ्च यदि तस्मिन्निणीत्यत्रैवेयं प्रवर्त्तेत तर्हि तत्रैव पूर्वग्रहणं कुर्यात् । तस्मान्नेदं तस्मिन्नित्यनुकरणम् । किन्त्वचि हलीत्यादिसकलविशेषसंग्रहार्थं स्वतन्त्रस्य सर्वनाम्नोयं निर्देशः । तस्यापत्यं तत्रभव इत्यादिवत् ॥

तस्मादित्युत्तरस्य ॥ पञ्चमीनिर्देशेषूत्तरस्यैव कार्यं स्यात्तच्चाव्यवहितोच्चारिते । तिङ्ङतिङः । अग्निर्माळे । इह न भवति । ईळे ऽग्निम् । इह कारकविभक्ते-

रसम्भवादिग्योगलक्षणा पञ्चमी । तत्र दिक्शब्दो ऽध्याह्रियमाणा उत्तरशब्दवत्पूर्वशब्दोप्यविशेषादध्याह्रियेत । व्यवहितोपि च गृह्येत । तथा चोत्संस्थाता इत्यत्राप्युदः स्थास्तम्भोरित्यस्य प्रसङ्गः । तदेवं पूर्वसूत्रमेतत्सूत्रं चेति द्वयमपि नियमार्थमिति स्थितम् । तथा च वार्त्तिकम् । तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनमिति । इहापि तस्मादिति स्वतन्त्रस्य सर्वनाम्नो निर्देशः प्राग्वत् । न त्वनुकरणम् । तथाहि सति यद्यपि तस्मान्नुड्द्विहल इत्यत्रात आदेरिति दीर्घात्पूर्वस्याङ्गस्यासम्भवात्प्रयोजनाभावान्नैतत्परिभाषोपस्थितिस्तथापि तस्माच्छसोनः पुंसि तस्मान्नुडचीति योगद्वये स्यात् । उच्चरत आनुपलभते गौरनश्व इत्यादेर्व्यावर्त्यस्य तत्र सम्भवादिति दिक् । स्यादेतत् । एतत्सूत्रं नियमार्थमस्तु । पूर्वसूत्रमप्यौपश्लेषिकसप्तमीपक्षे नियामकमस्तु । सत्सप्तमीपक्षे तु नियामकत्वमयुक्तम् । षाष्ठभाष्यकैयटविरोधात् । तथाहि । श्नान्नलोप इत्यत्र भाष्यम् । नैषा परसप्तमी । का तर्हि, सत्सप्तमी कृङिति सतीति । तथा तत्रैव कैयटः । कथं पुनः सम्भवत्यां परसप्तम्यां सत्सप्तम्याश्रयितुं युक्ता । यथेष्टं वाक्याध्याहारादोषः । कृङिति सतीत्येव हि विज्ञायमाने पौर्वापर्यानाश्रयणान्नास्ति तस्मिन्नित्यस्याः परिभाषाया उपस्थानम् । यदा ह्यौपश्लेषिके ऽधिकरणे सप्तमी तदा किं पूर्वस्य कार्यमथ परस्येत्यनियमे नियमाय परिभाषोपस्थानमिति । अत्रोच्यते । षाष्ठग्रन्थस्य प्रकृतमात्रपरत्वादविरोधः । तथाहि । श्नान्नलोप इति सूत्रे शकारवतो ग्रहणं मास्तु नादित्येवास्त्विति प्रश्ने नन्दनादावतिप्रसङ्ग इत्युत्तरितम् । अनिदितामित्यस्यानुकर्षणे तु हिनस्तीत्यत्र न स्यात् । ततः कृङितीत्यनुवर्त्य श्नमेव कृङित-

माश्रित्य हिनस्तीत्यत्र लोपोस्त्विति शङ्क्यते। यदि चास्यामवस्थायान्तस्मिन्निति परिभाषोपतिष्ठेत तदा नन्दमानादौ चानशो ङित्त्वाल्लोपः प्रवर्त्तेत। श्नमः शित्करणं चानर्थकं स्यात्। तद्धि शित्वात्सार्वधातुकतया ङितमिममेवाश्रित्य हिनस्तीत्यत्र नलोपे क्रियमाणे सार्थकं न त्वन्यथा। नन्वार्द्धधातुकसंज्ञानिवृत्त्या शित्त्वं सार्थकम्। तस्यां हि सत्यामनक्ति भनक्तीत्यत्रातो लोपः स्यात्। रुणद्धि भिनत्तीत्यत्र गुणः स्यात्। तृणेढीतीडागमः स्यात्। नेड्वशीति तु न प्रवर्त्तते अकृत्त्वादिति चेन्न। श्नमः पूर्वभागस्यानङ्गतयोक्तविधीनामप्राप्तेः। कथमनङ्गतेति चेत्। इत्थम्। प्रत्ययविधौ यत्पञ्चमीनिर्दिष्टं धातोः प्रातिपदिकादित्यादि तदादि तस्मिन्प्रत्यये परतोङ्गमिति हि सूत्रार्थः। इह तु यत्पञ्चमीनिर्दिष्टं रुधादिभ्य इति नास्मात्प्रत्ययः परः। यस्माच्च परः पूर्वभागान्नासौ तस्मिन्विधीयमाने पञ्चमीनिर्दिष्टः। अत एव भनक्तीत्यादावतोदीर्घोयञ्ञीति न प्रवर्त्तते। न च श्नसोरल्लोप इत्यत्र विशेषणार्थं शित्करणं स्यादिति वाच्यम्। नसोरल्लोप इत्युक्तेपि दोषाभावात्। नन्वेवं नान्तास्त्योर्ग्रहणं स्यात्। तथा च कनेर्यङ्लुकि चङ्कान्त इत्यत्रापि स्यादिति चेन्न। सिद्धान्तेपि श्नप्रत्ययसान्तयोर्ग्रहणापत्तौ वस्त इत्यादावतिप्रसङ्गसाम्यात्। साहचर्यात्प्रत्ययधात्वोर्ग्रहणमिति तु तुल्यम्। ननु नसोरल्लोप इत्युच्यमाने यत्र नप्रत्ययस्य कृङित्यानन्तर्यं तत्रैव भविष्यति यत्न इवाचरतः यत्नतः पामनत इति। मैवम्। अनुवर्तमानेन सार्वधातुकग्रहणेन प्रत्ययो विशेष्यते। तथा च विध्यसंस्पर्शान्निर्दिष्टपरिभाषानुपस्थितौ निमित्तसप्तमी। सार्वधातुकनिमित्तस्य नप्रत्ययस्यास्तेश्चाल्लोपः कृङित्यनन्तरइति। ननु चातउत्सार्वधातुकइति सूत्रे सार्वधातुकग्रहणं प्रत्याख्यातमि-

ति चेन्न। सति शित्त्वे प्रत्याख्यानात्। तदेवं श्नमः शित्त्वकरणसामर्थ्यात् कुङितीति सत्सप्तम्यामपि परिभाषा नोपतिष्ठतइति स्थितम्। पूर्वपक्षत्वादनास्थया तथोक्तमिति वा वर्णनीयम्। इह सूत्रद्वये षष्ठीप्रकल्पितपक्षोपि भाष्ये स्थितः। तथाहि। षष्ठीस्थानेयोगेति सूत्रात्षष्ठीत्यनुवर्त्तते सप्तम्यर्थनिर्देशे पूर्वस्याव्यवहितस्य षष्ठी स्यात्। पञ्चम्यर्थानिर्देशे उत्तरस्याव्यवहितस्य षष्ठी स्यादिति। तत्रेकोयणचीत्यादौ सूत्रएव षष्ठीश्रवणात्तां षष्ठीमनूद्य पूर्वस्यानन्तरस्यैषा न तूत्तरस्य न वा पूर्वस्यापि व्यवहितस्येत्येतावन्मात्रमुच्यते। आनेमुगित्यादौ तु षष्ठ्या अश्रवणात्सापि प्रकल्प्यतइति विशेषः। सा चानियतयोगत्वात्स्थानषष्ठी यस्य च स्थानषष्ठी तस्यैव कार्यनियम इति सोप्यर्थात्सिद्ध्यति। यत्र तूभयनिर्देशस्तत्रोभयं तावन्न प्रकल्पकं कार्यित्वनिमित्तत्वयोरेकत्र युगपदसम्भवाज्ज्ञापकाच्च। तथा चैकः पूर्वपरयोरिति सूत्रे कैयटः। सूत्रद्वयप्रमाणत्वाद् द्वे भवेतां प्रकल्पिके। षष्ठ्या विभक्ती तेनात्र ज्ञापनार्थत्वमाश्रितामिति। न च पर्यायेणोभयकल्पनम्। अतुल्यबलत्वात्। तथाहि। आनेमुगित्यत्र सप्तमीनिरवकाशा सा पूर्वत्र चरितार्थाया अतोयेय इति पञ्चम्याः षष्ठीं कल्पयति। एवमीदास इति पञ्चमी आन इति सप्तम्याः, तथा तास्यनुदात्तेत्सूत्रे अभ्यस्तसिजर्थं सार्वधातुकइति सप्तमीनिर्देशं वक्ष्यति सा च सप्तम्युत्तरत्र चरितार्थेति तस्या एव षष्ठी कल्प्यते। तथा बहोर्लोप इत्यत्र बहोरिति पञ्चमी अकृतार्थाया इष्टेमेयःस्विति सप्तम्याः षष्ठीं कल्पयति। अत एव भूचबहोरिति पृथक् षष्ठीनिर्देशः। तथा गोतोणिदिति पञ्चमी सर्वनामस्थानइति सप्तम्याः षष्ठीं कल्पयति। गोशब्दस्य

णित्वे प्रयोजनाभावाच्च । न च तिष्ठति गौरित्यादौ पूर्वस्य वृद्धिः फलमिति वाच्यम् । गोशब्दं प्रति तिष्ठतेरनङ्गत्वात् । एवं प्रायेण पञ्चम्या अकृतार्थतेति भाष्ये स्पष्टम् । आमिसर्वनाम्नः सुडित्यत्रापि पञ्चम्यनवकाशा । आमीति सप्तमी तूत्तरार्थतया सावकाशा । यदि त्विह आदित्यनुवृत्तया पञ्चम्या सामानाधिकरण्यं सम्पाद्य सर्वनाम्न इति पञ्चम्यपि कृतार्थेति ब्रूयात्तर्हि यथोद्देशपक्षाश्रयणेन परत्वात्तस्मादित्युत्तरस्येति भविष्यति। तदुक्तम्। उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्देश इति । वस्तुतस्तु नेह सामानाधिकरण्यम् । वर्णाश्रमेतराणामित्यस्य सिद्धये सर्वनाम्नो विहितस्येति व्याख्यानात् । येषां तेषामित्याद्यर्थमकारात्परस्येति व्याख्यानाच्च । दीर्घाच्छे तुग् भवतीत्यत्र तु षष्ठ्याः स्थाने पञ्चमी । तेन दीर्घस्यैव तुग् भवति न तु छकारस्य, सुराच्छायेति निर्देशश्चेह लिङ्गम् । अन्यथा हि खरिचेति चर्त्वेन सुराच्चायेति चकारद्वयं निर्दिशेत्। प्रत्ययविधौ तु पञ्चम्यो न प्रकल्पिकाः । षष्ठ्या अनुवादविभक्तित्वात् । अप्रसिद्धस्य चानुवादासम्भवात् । तत्रानियमाप्रसङ्गेन नियमकारिण्याः परिभाषाया अप्रवृत्तेश्चेति दिक् ॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना । अग्नेर्ढक् । आग्नेयम् । आङो यमहनः। आयच्छते । आहते । इह अग्नि आङ् यम् हन् एषामेतत्सूत्रोपात्तानां प्रयोगसमवायिनस्त एव संज्ञिनः। अशब्दसंज्ञेति किम्। उपसर्गे घोः किः । दाधाभ्यो यथा स्यात् । घुधातोः शब्दार्थान्मा भूत् । शब्दः, शब्दशास्त्रं तत्र । संज्ञेति सप्तमीसमासः । न तु शब्दस्य संज्ञेति । कर्म करण-

मित्यादिष्वर्थसंज्ञासु स्वरूपग्रहणापत्तेः । स्यादेतत् । रूपग्रहणं विनापि स्वशब्देन तदेव ग्रहीष्यते । प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वादन्तरङ्गत्वान्नियतोपस्थितिकत्वाच्च । अर्थो हि प्रतीतौ सम्बन्धग्रहणमपेक्षते साधारणश्च । पर्यायैरपि प्रत्यायनात् । बहिरङ्गश्च पदज्ञानजन्यबोधविषयत्वात् । अनियतोपस्थितिकश्चानुकरणदशायामप्रतीतेः । तत्किं रूपग्रहणेनेति चेत् । अत्राहुः । इह शास्त्रे अर्थोपि विवक्षितो रूपवदिति ज्ञापनार्थं रूपग्रहणम् । तेनार्थवद्ग्रहणे नानर्थकस्येत्युपपन्नं भवति । तत्रोक्तज्ञापकादर्थो ग्राह्यः स्वंरूपमिति वचनाद्रूपं चेति सामर्थ्यादर्थवतो रूपस्य ग्रहणम् । तेन काशे कुशे इत्यत्र शे इति प्रगृह्यसंज्ञा न भवति । एतत्सूत्रं भाष्ये प्रत्याख्यातम् । तथाहि । आरभ्यमाणेपि सूत्रे पशुरपत्यं देवता प्राञ्च उदञ्चो भरता इत्यादयस्तावल्लोकवदर्था एव गृह्यन्ते । अग्नेर्ढगित्यादौ तु शब्द एव ग्रहीष्यते । अर्थस्य प्रत्ययेन पौर्वापर्यासम्भवात् । ङ्याप्प्रातिपदिकादित्यधिकाराच्च । उपसर्गे घोः किरित्यादौ तु घुधातुर्न ग्रहीष्यते । दाधाघ्वित्यारम्भात् । उक्तं हि । व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचिदिति। अर्थवद्ग्रहणपरिभाषापि व्रश्चादिसूत्रे राजिं पठित्वा पुनर्भ्राजिपाठात्सिद्धा न्यायासिद्धा च । अग्नेर्ढगित्यादौ हि शब्दविशिष्टस्यार्थस्योत्सर्गत उपस्थितौ विशेष्ये कार्यबाधाद्विशेषणीभूते शब्दे प्रवर्तमानं कार्यमुपस्थितार्थोपहितएव न त्वनर्थकेपि । अर्थस्य विशेषणविशेष्यभावव्यत्यासमात्रेणोपपत्तौ सर्वात्मना त्यागायोगात् । गौणमुख्यन्यायोप्येतन्मूलः गौणस्य प्रथमतोऽनुपस्थितेः । एतेनाभिव्यक्तपदार्था यइत्यपि व्याख्यातम् । तस्मान्न्यायत एव सकलनिर्वाहे सूत्रं नारम्भणीयमिति । ननू-

त्तरत्र चतुःसूत्र्यामनुवृत्तये स्वंरूपमित्यवश्यं वाच्यमेवेति चेन्न । अनुवृत्तेरनावश्यकत्वात् । तथाहि । अणुदित्सूत्रे तावत्स्वस्यापि स्वसावर्ण्यादेव सिद्धम् । कथमन्यथा अवत्तामित्यत्र झरोझरीति लोपः । तत्र व्यक्तिभेदात्सावर्ण्यमिति चेत्, इहापि बोध्यबोधकव्यक्त्योर्भेदात् । तथा तपरस्तत्कालस्येत्यत्रापि । आदिरन्त्येनेत्यत्राप्यादिग्रहणावृत्त्या सिद्धम् । आवृत्तौ लिङ्गं तु नादिचीत्यादि । येनविधिरित्यत्र तु वार्त्तिककारस्तस्य चेति वक्ष्यत्येव । वस्तुतस्तु तदपि न वाच्यम् । व्यपदेशिवद्भावेनैव सिद्धेः । अप्रातिपदिकेनेति तु तत्रैव प्रत्याख्यास्यामः । अत एव येनविधिस्तदाद्यन्तत्वे प्रयोजनमित्याद्यन्तवत्सूत्रस्थं वार्त्तिकं सङ्गच्छतइति दिक् । सित्तद्विशेषाणां वृक्षाद्यर्थम् । अत्र सिदित्युपलक्षणं किञ्चिल्लिङ्गमासज्य इत्थंलिङ्गा विशेषाणां संज्ञेति वक्तव्यं, तच्च लिङ्गं वृक्षादावासज्जनीयमित्यर्थः । एवमग्रेपि । तेन विभाषावृक्षमृगेति सूत्रे विशेषाणामेव ग्रहणात्प्लक्षन्यग्रोधं प्लक्षन्यग्रोधा इति सिद्ध्यति । पित्पर्यायवचनस्य च स्वाद्यर्थम् । चकाराद्विशेषाणां स्वरूपस्य च ग्रहणम् । स्वेपुषः । रैपोषं पुष्टः । अश्वपोषम् । स्वपोषम् । जित्पर्यायवचनस्यैव राजाद्यर्थम् । सभाराजामनुष्यपूर्वा । इनसभम् । ईश्वरसभम् । नेह राजसभा । हरिश्चन्द्रसभा । पर्यायेण यो वक्ति स हि पर्यायवचनः।न च स्वस्य स्वेन सह विकल्पः। नापि विशेषेण,सामान्यविशेषयोर्भिन्नप्रकारकबोधजनकतया तुल्यार्थत्वाभावात् । तुल्यार्थास्तु विकल्पेरन्निति न्यायात् । इनशब्दो राजशब्दपर्याय इत्यादिव्यवहारास्तु भीमो भीमसेन इतिवत् । क्षित् तस्य तद्विशेषाणां च मत्स्याद्यर्थम् । पक्षिमत्स्यमृगान्हन्ति । मात्सिकः शाफरिकः । पर्यायवचनानां न । अनिमिषान् हन्ति । मी-

नस्येष्यतइति भाष्यम् । मैनिकः । मृगपक्षिणोस्तु पिञ्चिर्देशः कर्त्तव्यः । तेन स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणमिति व्याख्यातारः । इह वृक्षादौ राजादौ च न्यायेनैवाभिमतं सिध्यतीति तत्रैव वक्ष्यते । इतरत्तु सर्वं वाचानिकमेवेत्यवधेयम् ॥

अणुदित्सवर्णस्य चाप्रत्ययः॥अत्राण् परेण णकारेणेत्युक्तम्। अणुदिच्च सवर्णस्य संज्ञा स्यात् विधीयमानं विना । चकारात् स्वरूपस्य । अस्य च्वौ । शुक्ली स्यात् । माली स्यात् । एरनेकाचो ऽसंयोगपूर्वस्य । चिच्यतुः । निन्यतुः । ऋदोरप् । यवः । स्तवः । लवः । पवः । उरण्रपरः । कर्त्ता । किरति । न चैवम् ऋदोरप् हूस्वान्तेभ्यः कृत्रादिभ्योपि स्यादिति वाच्यम् । दीर्घोच्चारणवैयर्थ्यापत्तेः । नन्वेवमप्यष्टनआविभक्ताविति्त्र सवर्णग्रहो दुर्वारः । नहि तत्रापि सामर्थ्यम् । हूस्वोच्चारणे ह्यर्धमात्रिकस्य मात्रिक एव यथा स्यादिति दीर्घग्रहणस्योभयार्थतोपपत्तेरिति चेन्न । अप्रत्ययइति निषेधात् । दीर्घाणामनणत्वेन सवर्णग्राहकता नास्तीति प्रागेवोक्तत्वाच्च । ननु दीर्घाश्चेदनणस्तर्हि कारको हारक इत्यादौ रपरत्वं न लभ्येतेति चेत् । भ्रान्तोसि । नहि दीर्घाः काप्यणग्रहणेन नोपस्थाप्यन्तइति ब्रूमः । किन्तु ग्रहणकशास्त्रे तदुपजीव्येषु वर्णोपदेशादिषु च, इतरत्र तु वाक्यापरिसमाप्तिन्यायानवतारादस्त्येवाणग्रहणेन दीर्घग्रहणमिति तत्त्वम् । उदित् । कुहोश्चुः । चकार । जगाद । अप्रत्यय इति निषेधस्तु उगित्सु न प्रवर्त्तते उगित्करणसामर्थ्यात् । अत एवाहुः । भाव्यमानोण् सवर्णान्न गृह्णातीति । तुक् लुक् नुक् तुडादयस्तु नोदितः । प्रतिज्ञानुनासिक्याः पाणिनीया इत्यभ्युपगमात् । अप्रत्यय इति किम् । विधीयमानानां प्रत्ययागमादेशानां सवर्णग्राह-

कर्त्वं मा भूत् । अतइञ्,इदमइश्, आर्द्धधातुकस्येड्, भुवोवुक्, अमसम्बुद्धौ । इह हि सर्वत्रोपदेशइति वचनात्सूत्रान्तर्गतेष्वेव इञ्आदिशब्देष्वित्संज्ञा प्रवर्त्तते । लोपस्तु तत्रानुपूर्व्याङ्गाधितोपि पदस्वरूपपर्यालोचनायां प्रवृत्तः । ततः स्वंरूपमिति संज्ञाबलात् ज्ञायमाना पदार्थोपस्थितिरनुबन्धाविनिर्मुक्तस्यैव भवति । तथा चोपस्थापकस्याण्त्वात्सवर्णग्रहणं प्राप्तं निषिध्यतइत्युचितम् । अत एव चतुर्दशसूत्र्यामुच्चारणार्थस्याकारस्येवेत्संज्ञाकानामपि णकारादीनां लण्मध्याकारस्य च पदपर्यालोचनायामेव लोपश्च बलवत्तर इति न्यायेनापहारादितरान्तर्भावेणैव संज्ञा प्रवर्त्ततइति सिद्धान्तः । इदं चालोन्त्यात्पूर्वउपधेति सूत्रे तस्मिन्निितिनिर्दिष्टइत्यत्र च कैयटग्रन्थे स्पष्टम् । इद् अक इकोचीत्यादौ सानुबन्धाद्विभक्तिस्तु प्राथमिकबोधे विशिष्टस्य विषयतया तस्यैवार्थवत्त्वमादाय । अन्यो हि पश्चादुपतिष्ठते न तु प्रयुज्यतइति कथं ततो विभक्तिः क्रियताम् । इत्संज्ञाकार्यं त्वानर्थक्यात्तदङ्गेष्विति न्यायेन प्रत्याय्ये प्रवर्त्तते । विभक्त्यर्थान्वयोप्येवम् । दृष्टं हि ङमुडादावुपस्थापके कृतस्य लिङ्गस्य तद्बोध्ये फलप्रवर्त्तकत्वमिति दिक् । स्यादेतत् । उक्तरीत्या उदोष्ठ्यपूर्वस्येति सूत्रे उच्छब्दे प्रवृत्ता इत्संज्ञा लक्ष्ये तित्स्वरं प्रवर्त्तयेदिति चेत् । सत्यम् । अत एवैतत्समाधानाय पूर्वाचार्यैः पराक्रान्तामिति गृहाण । कथं तर्हि एओङ्सूत्रे तद्दुषणाय प्रवृत्तमिति चेत् । तत्कालावधारणेन कृतार्थस्य तकारस्यानुबन्धान्तरवैषम्यादिति गृहाण । अत एव वैयाकरण इत्यत्र ऐचश्चित्स्वरो न भवति । पचस्वेति शपोप्येवम् । नव्वाभ्यामिति सूत्रे अचः परस्य द्वे इत्यत्र च ऐचोश्चकारस्य प्रत्याहारे उपक्षयात् । यद्वा । इञ्शादिष्वपि

मास्तु सूत्रान्तर्गतेष्वित्संज्ञा, किं तु फलप्रत्यासत्तेः पदार्थेष्वेव सास्तु। नैते उपदिष्टा इति चेन्न ते फलभाज इति तुल्यम्। सामर्थ्यात्परंपरासम्बन्धे फलमिति चेत्संज्ञापि तत्रैवास्तु सामर्थ्यादिति तुल्यम्। उपदेशेन्त्यत्वं हि प्रायोगिकेष्वसम्भवात्तत्प्रत्यायकनिष्ठमानुपूर्वीसाजात्यादाश्रीयते। न चैतत्तपरेष्वस्ति। प्रत्याय्ये तकाराभावादिति दिक्। प्रकृतमनुसरामः। भाव्यमानोप्युकारादेशः सवर्णान् गृह्णाति। ऋतउदिति तपकरणाल्लिंगात्। तेनामुना अमूभ्यामित्यत्र ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घः सिद्ध्यति। न चैवं सनाशंसेत्युप्रत्ययोपि सवर्णं गृह्णात्विति वाच्यम्। आदेशविषयकं ज्ञापकमित्युक्तत्वात्। यद्वा। अदसोसेरिति सूत्रएव उश्च ऊश्चेति समाहारद्वन्द्वोस्तु। अत एव सोर्लुका निर्देशः कृतः। अत एव च ऊदुपधाया इति सूत्रे गोह इति विकृतनिर्देशं प्रत्याख्यातुं भाष्यकारैरुकारान्तरश्लेष उक्तः। नन्वेवमप्यकः सवर्णइत्यत्र अकारो ऽष्टादशानां ग्राहकोस्तु अणत्वात्। अस्तु च स एव इकारादीनामपि ग्राहक आदिरन्त्येनेत्युक्तेः, ईकारादयस्तु कथं ग्राह्याः। नहि तद्वाचकः शब्दस्तास्मिन्सूत्रे उपात्तोस्ति। नन्वक्शब्देन इकारादयोप्युपस्थिता इति चेत्तर्हि वाक्यार्थे ते नयन्तु नाम पदार्थसंसर्गस्य वाक्यार्थत्वात्। न तु तेपि स्वार्थोपस्थापका, अनुच्चारितत्वादित्युक्तम्। अत एव ऋचं वेत्तीत्यादौ शब्दविशेषं वेत्तीत्येवार्थो न तु तदर्थं वेत्तीति। तदुक्तं वार्त्तिककृता। तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात्। ह्रस्वसम्प्रत्ययादिति चेदुच्चार्यमाणसम्प्रत्यायकत्वाच्छब्दस्यावचनमिति। शब्दस्य प्रतीयमानस्य। अवचनम्। अर्थाप्रतिपादकत्वमित्यर्थः। अत्रोच्यते। प्रत्याहारग्रहणे सर्वत्र

स्ववाच्यवाच्ये विरूढा लक्षणा दीर्घाज्जसिचेति ज्ञापकात्। प्रथमयोः पूर्वसवर्ण इत्यत्र हि अक इत्यनुवर्त्तते। न चाक्शब्दवाच्यो दीर्घोस्ति योस्य निषेधस्य विषयः स्यात्। नन्वाकारोस्तीति चेन्न। नादिचीत्यनेनैव तत्र निषेधसिद्धेः। ष्णादीनामित्यादिनिर्देशा अपीह लिङ्गम्। नन्वेवमिकोयणचीति सूत्रे ईदातोर्ग्रहणं न स्यात्। युगपद्वृत्तिद्वयविरोधात्। तथा च सुध्युपास्यो दध्यानयेत्यादि न सिद्ध्येदिति चेन्न। सति तात्पर्ये युगपद्वृत्तिद्वयस्य स्वीकारे बाधकाभावात्। इह चान्नद्या इत्यादिनिर्देशानां तात्पर्यग्राहकत्वात्। यदि तु प्राचां मते श्रद्धावशाद्युगपद्वृत्तिद्वयं नाभ्युपैषि, तर्हीह ईदातोरपि इगच्छब्दयोर्लक्षणैवास्तु। स्ववाच्यह्रस्ववाच्यत्वाविशेषात्। स्ववाच्यतापि परमस्तीत्यन्यदेतत्। नन्वेवमपि शरीरमित्यादौ शकारस्य स्थानसाम्याच्चकारादेशः प्राप्नोति। इकारवाच्यो हि दीर्घः तत्सवर्णश्च शकार इति तस्यापीग्रहणेन ग्रहणात्। तथा शीतलमित्यादावपि यण्प्रसङ्गः, दीर्घः परं न भवति। अक्शब्दवाच्यवाच्यतायाः दीर्घे विश्रान्त्यातत्सम्बन्धग्रहे मानाभावादिति। अत्रोच्यते। भवेदयं शकारस्य यकारादेशरूपो दोषः। यदि स्ववाच्यसवर्णे लक्षणां वदाम। वयन्तु स्ववाच्यवाच्ये सत्येव ब्रूमः। न च ईकारः शकारस्य वाचकः। दीर्घाणामनण्त्वेन सवर्णाग्राहकताया असकृदावेदितत्वात्। भाष्यते त्वज्झलोः सावर्ण्यमेव नास्तीत्युक्तम्। तदयमिह निर्गलितोर्थः। अकारोष्टादशानां संज्ञा। एवमिदुदौ। ऋ ॡ इत्येतौ तु पर्यायशब्दौ त्रिंशतः संज्ञे। ऋॡवर्णयोः सावर्ण्यस्योपसंख्यातत्वात्, ऋलृक्सूत्रे ऋत्यक इति प्रकृतिभावदर्शनेनैव ज्ञापितत्वाद्वा। न च तुल्यव्यक्तिकसंज्ञाद्वयप्रणयनवैयर्थ्यं, तदर्थमिह सूत्रान्तराप्रणय-

नात् । एचस्तु द्वादशानां संज्ञाः । यवला द्वयोः । रहौ तु स्वस्यैवेति । यद्यपि हकार आकारस्य संज्ञेति प्राप्तं तथापि तत्परिहाराय नाज्झलाविति यत्नैव यत्नः कृतो न विस्मर्त्तव्यः । वार्त्तिककारास्त्वहाणग्रहणं प्रत्याचख्युः । तन्मते ऽस्यच्चाविल्यादौ जातिनिर्देशात्सिद्धम् । अनुवाद्यविशेषणस्य च ह्रस्वत्वस्य ग्रहैकत्ववदविवक्षा । विधिमदेशे तु पञ्चैकत्ववद्विवक्षेति सर्वेषूसिद्धिः । यद्यप्यस्मिन्पक्षे ऋकारेण लृकारग्रहणं दुःसाध्यं तथापि ऋलृक्सूत्रोक्तरीत्या समाधेयमिति दिक् ॥

तपरस्तत्कालस्य ॥ तः परो यस्मात्स तपरः । तात्परोपि तपरः । द्विविधोप्ययं स्वसमानकालस्य ग्राहकः स्यात् । तेन अत् इत् उदिति षण्णां संज्ञाः । ऋदिति द्वादशानाम् । अत एवोपसर्गादतिधातावित्यत्र सावर्ण्यात् लृवर्णस्य ग्रहणन्तपरत्वादीर्घे नेति सिद्धान्तः । पञ्चमीसमासोदाहरणन्तु वृद्धिरादैजिति । इह हि संज्ञायां कृतं तात्परत्वं संज्ञिनोः फलति ङ्मुट्ष्टित्वमिवेत्युक्तम् । परम्परासम्बन्धेन लाक्षणिकस्य स्मारकतेति पक्षे तु न कश्चिद्दोषः । आदेङ्गुण इत्यत्राप्येवं सिद्धम् । तत्र तकारस्योभयार्थतया सामर्थ्याविरहात् । यदि तूकालसूत्रे वक्ष्यमाणरीत्याणुदित्सूत्रे ऽशब्दसंज्ञायामित्यनुवर्तते । यदि वा कार्यकालपक्षमाश्रित्य भाव्यमानत्वादेव सवर्णग्रहणं वार्यते । तदा वृद्धिसूत्रे तपरकरणं स्पष्टार्थम् । इह तु पञ्चमीसमासो नाश्रयणीयः । अत एव शास्त्रान्ते अददिति भाष्यं सङ्गच्छते । गुणा भेदका इति पक्षे तु वृद्धिसूत्रे तपरकरणमुभयार्थम् । गुणान्तरयुक्तस्य ग्राहकत्वात् । भेदकत्वे ज्ञापकत्वणुदित्सूत्रस्थमण्ग्रहणमिति हल् इति सूत्रएवोपपादितम् । तथैतत्सूत्रस्थं तत्कालस्येति पदमपीह ज्ञापकम् । अन्यथा हि स्वस्य रूप-

स्येत्यनुवृत्त्यैव सिद्धे किं तेन । न च सावर्ण्याल्लृवर्णग्रहणार्थं तत् । एवं हि तत्रैव लृग्रहणं कुर्यात् । ऋति ऋ वोति किहितं रेफद्वयमध्यं वोच्चारयेत् । आ इत्येव सिद्धे ऽतोदीर्घोयञीति सूत्रे दीर्घग्रहणमपीह लिङ्गमिति दिक् । अत एवैतत्सूत्रं भाष्यादौ द्वेधा व्याख्यातं विध्यर्थं नियमार्थं चेति । तथाहि । अणिति नानुवर्त्तते । तेनाकारादावनाणि तत्कालानां सवर्णानां गुणभेदेप्यनेन ग्रहणम् । अतोभिसऐसित्यादौ तूभयप्रसङ्गे परत्वादस्यैव प्रवृत्तिः । ननु संज्ञानां बाध्यबाधकभावो नेत्युक्तमिति चेत् । सत्यम् । अविरोधे फलभेदे च भवत्येव समावेशः । इह तु विरोध एवास्ति । अष्टादश ग्राह्याः षड् ग्राह्या इति हि विरुद्धम् । संख्याकृतव्यवहारस्य परस्परपरिहारेणैव दृष्टत्वात् । अत एव छादेर्घइति सूत्रे ऽद्विप्रभृत्युपसर्गस्येति वक्तव्यमिति वार्त्तिकं सङ्गच्छतइत्याहुः । वस्तुतस्तु नेह संज्ञासूत्रद्वये संख्योपात्ता येन विरोधः स्यात् । किन्त्वतोभिस इत्यादौ तपरकरणसामर्थ्याद्बाध्यबाधकभावोनुमीयतइति तत्त्वम् । वस्तुतस्तु तकारविशिष्टेयं संज्ञा न त्वण्मात्रम् । तत्कालस्येति तच्छब्दस्तु विशेष्यमात्रं परामृशति । न तु विशिष्टम् । तदुच्चारणकालसदृशे लक्षणा तु प्राचां मतेप्यस्त्येव । सर्वनामपदेप्येतस्यैव वारवन्तीयं, तत्त्वमसीत्यादौ लक्षणायाः पूर्वोत्तरतन्त्रयोः स्थितत्वात् । तथा च टिद्गुभाद्यन्तर्गताण्वदिह पदैकदेशत्वेनानर्थक्याद्ग्राहकताप्रसङ्ग एव नास्ति । विभक्त्युत्पत्तिरप्येवं सति सङ्गच्छते । वृद्धिसूत्रे अत्राकारः प्रयोगस्थौकारैकारैरर्थवानिति हरदत्तग्रन्थस्तु प्राचां रीत्या नेतव्य इति निष्कर्षः । सोयं विध्यर्थतापक्षः । यदा त्वणित्यनुवर्त्तते तदा नियमार्थमिदं तपरोण् तत्कालस्यैवेति, गुणानामभेदकत्वादनण्सु न कश्चिद्दो-

षः। अस्मिंश्च पक्षे तत्कालत्वग्रहणं शक्यमकर्तुम्। अण्ग्रहणानुवृत्तिश्चानावश्यकी। तपरः स्वरूपस्यैवेति नियमेनापीष्टसिद्धेः। दिवऔदित्यत्र तपरकरणं स्वरार्थं न तु कालावधारणार्थं भाव्यमानतया सवर्णग्रहणाप्रसक्तेः। तथा च स्वरितः प्रयुज्यते। द्यौः पितः पृथिवि मातर ध्रुगिति। पृथिवी उत द्यौरित्युदात्तप्रयोगस्तु द्योशब्दस्य बोध्यः। औदञ्चेरित्यत्र तु मुखसुखार्थं तपरकरणम्। व्याख्यानात्। तेन समिधाने अग्नावित्यादौ तित्स्वरो नेति वृत्तिकारहरदत्तादयः। यत्तु नविभक्तौतुस्मा इत्यत्र जयादित्यादिभिरुक्तम्। इटोदित्यत्रायं निषेधो न भवति। इदमस्थमुरित्युकारानुबन्धकरणादनित्यत्वादस्येति तदभ्युपगमवादमात्रम्। तित्स्वप्रसङ्गात्। न चेष्टापत्तिः। भक्षीयतवराधसइत्यादावन्तोदात्तश्रवणात्। तस्मादिद्योदित्यत्रापि मुखसुखार्थस्तकारः। एतईद्धहुवचने, उर्ऋदित्यादिष्वप्येवमेवेति दिक्। वस्तुतस्तु दिवऔदित्यत्राप्येवमेव। हलः खंसनभर्धिणोनुदात्ते कृते उदात्तस्वरितयोर्यण इत्येव स्वरितसिद्धेः। स्यादेतत्। द्रुता मध्यमा विलम्बिता चेति तिस्रो वृत्तयः। तदुक्तम्। अभ्यासार्थे द्रुता वृत्तिः प्रयोगार्थे तु मध्यमा। शिष्याणां तूपदेशार्थे वृत्तिरिष्टा विलम्बितेति। ताश्च क्रमेण त्रिभागाधिकाः। तथाहि। द्रुतवृत्त्या यस्याम् ऋचि पठ्यमानायां नव पानीयपलानि स्रवन्ति तस्यामेव ऋचि मध्यमवृत्त्या पठ्यमानायां द्वादश। विलम्बितायान्तु षोडश। एवं स्थिते यदि सूत्रकृद्विलम्बितायां तपरकरणमकार्षीन्मध्यमायां द्रुतायां वा तर्हि वृत्त्यन्तरेण पाठकाले ऽतोभिसऐस् न स्यात्। कालावधारणेन दीर्घप्लुतयोरिव वृत्त्यन्तरस्यापि वारणादिति। तथा च वार्त्तिकम्। द्रुतायां तपरकर-

ये मध्यमविलम्बितयोरुपसंख्यानं कालभेदादिति। अत एव निपातनान्मध्यशब्दे ह्रस्व इति संहितासंज्ञासूत्रे कैयटः। अत्र सिद्धान्तवार्तिककारा एवाहुः। सिद्धन्त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्तइति। अस्यार्थः। व्यञ्जकीभूतो ध्वनिर्यद्यपि बहुकालानुवर्त्ती। तथापि कश्चिन्मात्रापर्य्यन्तमेवाभिव्यनक्ति। तदुत्तरकालोपहितस्तु स्वयमेवानुवर्त्तते न तु परमभिव्यनक्ति। यद्वा। ह्रस्वस्य व्यञ्जको ध्वनिर्वृत्तित्रयेपि मात्राकाल एव। मध्यमविलम्बितयोः प्रथमगृहीतध्वन्यनुनिष्पादिना ततोन्यूनकालेन ध्वन्यन्तरेणाभिव्यक्त्यन्तरं जन्यते अभिव्यङ्ग्यस्तु न भिद्यते। एवं दीर्घव्यञ्जकोपि सर्वत्राद्यो ध्वनिर्द्विमात्र एव। अनुनिष्यादी तु ततो न्यून इत्याद्यूह्यम्। व्यङ्ग्यास्तु स्वत एव परस्परविलक्षणाः। एतच्च सर्वं कैयटेन ध्वनितम्। तस्मादुच्चारणं तेषां मात्राकालं प्रतीयतेऽद्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयमिति। शब्दान्तराधिकरणस्थराणककारोक्तिस्तु कथं नेयेति सूरिभिश्चिन्त्यम्। वर्णास्तु नित्या एव। वर्णोत्पत्तिपक्षे तु तदनुनिष्पादी दूरादपि ग्राह्यः कश्चिद् ध्वनिरवश्याभ्युपेयः। तस्यैव कालभेदाद्वृत्तित्रैविध्यम्। वर्णास्तु वृत्तिभेदेप्येकरूपा एव। कैश्चिद्व्यक्तय एवास्य ध्वनित्वेन प्रकल्पिता इति पक्षे तु कालरूपोपाधिविशेषावच्छिन्नस्यैव व्यक्तित्वमिति दिक्। उक्तं च भाष्ये। ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषां चिदुभयं तत्स्वभावत इति। अस्यार्थः। शब्दो द्विधा। व्यञ्जको व्यङ्ग्यश्च। शब्दानां व्यङ्ग्यानां व्यञ्जकत्वेन सम्बन्धी यो ध्वनिः स एव महानल्पश्च लक्ष्यते। तदुभयं व्यङ्ग्यं

व्यञ्जकरूपं केषां चिदेव तालवादिव्यापारजन्यानामेव न तु भेर्यादिजन्यानामपि । कुतः । स्वभावतः । कारणवैलक्षण्यात् । अत्रोभयमिति भावप्रधानो निर्देशः । उभयरूपतेत्यर्थः ॥

आदिरन्त्येन सहेता ॥ अन्त्येनेता सहोच्चार्यमाण आदिर्वर्णो वर्णसङ्घातो वा मध्यगानां संज्ञा स्यादादेः स्वरूपस्य च । वर्णो यथा अल् । सङ्घातस्तु कुञ् । इह ह्यभूततद्भावे कृभ्वस्तीत्यतः कृञो द्वितीयेति ञकारेण प्रत्याहारः । आद्यन्तौ तावदवयवौ । ताभ्यामवयवी समुदाय आक्षिप्यते । तस्य च युगपल्लक्ष्ये प्रयोगाभावात्तदवयवेषु संज्ञावतरन्ती मध्यमेषु विश्राम्यति न त्वाद्यन्तयोः संज्ञास्वरूपान्तर्भावेण तयोः पारार्थ्यनिर्णयात् । अतः स्वंरूपमित्यनुवर्त्तते । स्वं रूपं चादेरेव गृह्यते नान्त्यस्य । अप्राधान्यात् । अन्त्येनेति ह्यप्रधाने तृतीया । तेन दध्यत्रेत्यादौ केवल एव यकारः प्रवर्त्तते न णकारसहित इति कैयटादयः । अत्रेदं वक्तव्यम् । प्रत्याहारेष्वाद्या वाचकास्तत्र ग्रहणकशास्त्रं सावकाशमिति ग्रहणकशास्त्रस्थभाष्यादिपर्यालोचनया वाचकत्वं तावदाद्यवर्णे विश्रान्तमन्त्यस्तु तात्पर्यग्राहकः । सहग्रहणात्तु विशिष्टाद्विभक्तुत्पत्तिरिति द्योतकान्तरवैषम्यमिति स्थितम् । तत्रान्त्यस्येत्संज्ञयापत्तेतस्य कथं संज्ञित्वप्रसक्तिः । अन्यथाजादिसंज्ञानामपि णकारादावतिप्रसक्तेः क उद्धारः । किञ्चास्तु विशिष्टस्य यण्संज्ञा तथापि दध्यत्रेत्यत्र यण्शब्दापादनमसङ्गतमेव । न्यायसाम्येनेक्शब्दस्यैव स्थानित्वप्रसक्त्या इकारस्य स्थानित्वासम्भवात् । अन्त्येनेति किम् । सुडिति तृतीयैकवचनावयवेन मा भूदिति वृत्तिकाराः । टाङसिङसामित्यादिनिर्दे-

शैष्टकारो न पूर्वान्त इति निर्णयादिति भावः। नन्वेवमपि टकारान्तस्य सङ्घस्य टाटकारोन्त्यो भवत्येवेति चेन्न। व्यवसितान्त्यताविरहात्। इह हि अन्त्यत्वप्रयुक्ता यस्येत्संज्ञा तेन प्रत्याहार इति सुडनपुंसकस्येतिसूत्रे हरदत्तः। न चैवं रप्रत्याहारासिद्धिः। लण्सूत्रे ऽनुनासिकप्रतिज्ञासामर्थ्यादनन्त्येनापि प्रत्याहारात्। इदं तु वक्तव्यम्। औटष्टित्वस्यानन्यार्थतया तेनैव सुट्प्रत्याहारः। प्रत्यासत्तेश्च। तथा चान्त्यग्रहणं मास्त्विति। अत्रेदं समाधानम्। मध्यमेनेता सहित आदिस्तदुत्तरेषामपि ग्राहको मा भूत्। एवमन्त्येन सहितो मध्यमः पूर्वेषां संज्ञा मा भूदित्यादिग्रहणम्। इतेति किम्। रप्रत्याहारो यथा स्यात्। स ह्यनन्त्येनाप्यनुनासिकप्रतिज्ञासामर्थ्याद्भवतीत्युक्तम्। न चैतदितेत्यस्य विरहे लभ्यते। नवीनास्तु सहासमन्तादेतीति सहेता मध्यमो वर्णः। अन्त्येनादिः अणित्यादिसंज्ञको भवतीत्यर्थः। आद्यन्तसमभिव्याहाराच्च। सहेता मध्यमो वर्णो लभ्यते। स्वंरूपमिति चानुवर्तते। वृद्धिगुणादिसंज्ञास्विवेहापि सामानाधिकरण्यात्संज्ञात्वावगतिः। अस्मिंश्च व्याख्याने हलन्त्यमित्यत्रेतरेतराश्रयशङ्कापि नास्तीत्याहुः। आद्यन्तावयवद्वारा समुदायानुकरणेन सिद्धेन्त्यव्यावृत्तये इदम्॥

येनविधिस्तदन्तस्य॥ विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्य। एरच्, चयः। जयः। अयः। औरावश्यके, अवश्यलाव्यम्। इह येनेति करणे तृतीया न तु कर्त्तरि कृद्योगलक्षणषष्ठ्या बाधितत्वात्। विधिरिति हि कर्मणि किप्रत्ययः। तेन कर्मणोभिहितत्वादुभयप्राप्ताविति नियमस्य नायं विषयः। करणं च परतन्त्रं कर्त्राधिष्ठितस्यैव

करणत्वात् । एवं चेह तृतीयया पारतन्त्र्यं लक्ष्यते सुब्विभक्तौ न लक्षणेति नैयायिकोद्घोषस्तु निर्मूलः । न च प्रत्ययानुशासनवैयर्थ्यापत्तिस्तन्मूलम् । तिङ्क्ष्वपि तस्य तुल्यत्वात् । रथो गच्छतीत्यादौ व्यापारे लक्षणायास्त्वयापि स्वीकारात् । अत एव प्रयाजशेषेण हवींष्यभिघारयतीत्यत्र प्रयाजशेषं हविष्युक्षारयेदिति मीमांसका व्याचख्युरिति दिक् । न च एराजित्यादाविकारादीनां पारतन्त्र्यं धात्वादीनां च स्वातन्त्र्यं वास्यादीनामिव तक्षादीनामिव च स्वरूपतः सम्भवति किं तु वैवक्षिकम् । तेन विशेषणमप्रधानं तच्चात्मान्तस्य विशेष्यस्य संज्ञेति फलितम् । विशेष्यसन्निधौ च विशेषणत्वं भवति सन्निधिस्तु क्वचित्साक्षान्निर्देशेन यथा ईदूदेद्द्विवचनम्प्रगृह्यमिति द्विवचनस्य, क्व चिच्छब्दाधिकारात् । यथा एराजित्यत्र धातोः, क्व चिदाक्षेपाद्यथा इकोझलित्यत्र सना धातोः । इकोयणचि, एचोयवायाव इत्यादौ तु न कथं चिदपि विशेष्यसन्निधिः । अतो नेदं प्रवर्त्तते । स्यादेतत् । उदोष्ठ्यपूर्वस्येत्यत्र ओष्ठ्यपूर्वकत्वं धातोरेव विशेषणं स्यान्न तु ऋकारस्य । स हि विशेषणत्वाद्दन्तस्य संज्ञा । संज्ञा च संज्ञिनं प्रत्याययति न तु स्वयं विशेषणादियोगमनुभवति । ततश्च सङ्कीर्णमित्यादावतिव्याप्तिः । पूर्त्तमित्यादावव्याप्तिश्च । एवमुतश्चप्रत्ययादित्यत्राप्यसंयोगपूर्वत्वमङ्गस्य प्रत्ययस्य वा विशेषणं स्यान्न तूकारान्तस्य ततश्चाश्नुहीत्यादावतिव्याप्तिः । विशेषणं च यद्यङ्गस्य तदा तक्ष्णुहि इत्यादावतिव्याप्तिः । अथ प्रत्ययस्य, तर्हि तक्ष्णुहीत्यादि सिद्ध्यतु अश्नुहीत्यादौ तु दोष एवेति । अत्राहुः । गुणप्रधानभावसापेक्षेयं संज्ञा । तथा च उतश्चप्रत्ययादित्यादौ विशेषणसम्बन्धवेलायां गुण-

भावास्फुरणात्तमनुसृत्य पश्चाद्विशेष्यसम्बन्धे विशिष्टा संज्ञा भवति । इह हि विशिष्टस्य वैशिष्ट्यम् । न तु विशेष्ये विशेषणमिति । व्याख्यानात् । अत एव न विशिष्टे वैशिष्ट्यं नाप्येकत्र द्वयमिति दिक् । तथा च वार्तिकम् । येन विधिस्तदन्तस्येति चेत्, ग्रहणोपाधीनां तदन्तोपाधितापसङ्गः । सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वादिति । ग्रहणोपाधीनां गृह्यमाणविशेषणत्वेन सम्मतानामोष्ठ्यपूर्वत्वादीनामित्यर्थः । यथेष्टत्वादित्यननेनेदं दर्शयति । चतुर्विधेषु विशिष्टवैशिष्ट्यबोधेषु मध्ये विशिष्टस्य वैशिष्ट्यमेवेह सम्मतं न त्वितरत्त्रिकं व्याख्यानाल्लक्ष्यानुरोधाच्च । इह सिद्धान्ताभिमतं विशेषणविशेष्यभावं स्फुटीकर्तुं बहूनि वार्त्तिकानि प्रवृत्तानि । तद्यथा । समासप्रत्ययविधौ प्रतिषेधः । द्वितीयाश्रितेत्यादौ श्रितादयो विशेष्यास्तद्विशेषणं च सुप् । एवं नडादिभ्यः फगित्यादौ नडादि विशेष्यं प्रातिपदिकं विशेषणमिति फलितोर्थः । एतेन ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीत्यपि व्याख्यातम् । तस्याप्युदात्तप्रतिषेधसमानविषयकत्वस्य दिवउत्सूत्रे कैयटादिभिरुक्तत्वात् । अत एव गोस्त्रियोरिति सूत्रे गोन्तं यत्प्रातिपदिकमिति व्याख्यातम् । एतेन शेषोध्यसखीत्यादौ ग्रहणवतेति प्रतिषेधं सञ्चारयन्तो हरदत्तादयः प्रत्युक्ताः।प्रकृतमनुसरामः, श्रितादयो विशेष्या इत्युक्तम् । तेन द्वितीयाश्रितेति समासः कृष्णश्रित इत्यत्रैव भवति न कृष्णं परमश्रित इत्यादावपि । तथा नडादिभ्यः फक्, नाडायनः, नेह सूत्रनडस्यापत्यं सौत्रनाडिः । अनुशतिकादित्वादुभयपदवृद्धिः । ननु कृष्णंपरमश्रित इत्यत्र समासप्राप्तिरेव नास्ति । अत्र हि समासात्सुब् विहितः तेन श्रितान्तं सुबन्तमेव भवति । अत्र कैयटहरदत्तौ । स-

म्बुध्यन्तमुदाहर्त्तव्यं कृष्णंपरमाश्रित इति, एतद्धि प्रत्ययलक्षणेन सुबन्तं भवति श्रितान्तं च श्रूयतइति । स्यादेतत् । सिद्धान्ते श्रितादीनां विशेष्यत्वेपि तत्र सुबन्तत्वं बाधितम् । न चात एवान्वयानुपपत्त्या श्रितादिशब्दानां तत्प्रकृतिके लक्षणेति वाच्यम् । सम्बुध्यन्तएव मुख्यार्थपुरस्कारेणावकाशलाभात् । तथा च कृष्णश्रितमित्यादि न सिद्ध्येदिति । उच्यते । समासतद्धितप्रकरणे सर्वत्र श्रितादीनां नडादीनां च तत्तत्प्रकृतिके लक्षणैव खट्वाक्षेपे नदीभिश्चेत्यादावभेदस्य बाधात् । न हि तत्र सम्बुद्ध्यन्तता सम्भवति । पूर्वकालैकेत्यादौ सम्बुद्ध्यन्ततासम्भवेप्येकविभक्ताविति सौत्रनिर्देशो न सिध्येत् । तस्मात्सामान्यापेक्षज्ञापकबलेनैकरूप्याय सर्वत्र तत्तत्प्रकृतिके लक्षणेति स्थिते इहत्यभाष्यवृत्त्योः कैयटहरदत्तकृतं भंक्त्वा व्याख्यानमनादेयमित्यवधेयम् । अस्यापवादमाह । उगिद्वर्णग्रहणवर्जमिति । उगिता वर्णेन च प्रातिपदिकं विशेष्यतइति फलितोर्थः । महान्तमतिक्रान्तातिमहती उपसर्जनत्वाद्गौरादिलक्षणस्य ङीषो ऽभावे उगिदन्तत्वान्ङीप् । बृहन्महतोर्गौरादित्वं नास्तीत्यपि के चित् । युक्तं चैतत् । महतेसौभगायेत्यादौ विभक्तेरुदात्तत्वसिद्धये शतुरनुम इति सूत्रे नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमिति वार्त्तिकस्यारभ्यमाणत्वान्ङीपोप्युदात्तत्वसिद्धेः । अत इञ् । दाक्षिः । न चेह सामर्थ्यात्तदन्तविधिः । अस्यापत्यमिः काम इत्यत्र चरितार्थत्वात् । न चैवमिञो ञित्वं व्यर्थं स्यादिति वाच्यम् । बाह्वादिभ्यश्चेत्यत्र यथायथं वृद्ध्याद्युदात्ताभ्यां चरितार्थत्वात् । नन्वेवमस्यौपगविरित्यादावेव स्यान्न तु दाक्षिरिति । अकारस्येहानर्थकत्वादिति चेन्न । वर्णग्रहणे अर्थवत्परिभाषाया अप्रवृत्तेः । तथा चैतत्सूत्रशेषे

वार्तिकम् अलैवानर्थकेनेति । अत एव संघातेनार्थवतैव । तेन स्त्रिया इतीयङ् इहैव भवति स्त्रियौ परमस्त्रियौ, नेह शस्त्र्यौ शस्त्र्यः । तथा इन्हन्पूषार्यम्णांशौ, सौचेत्यत्र हन् इत्यत्र संघातग्रहणे प्लीहन्ग्रहणं न तेन प्लीहानावित्यादौ सौ चेति नियमाप्रवृत्तेः दीर्घः सिद्ध्यति । उदस्थास्तम्भोरित्यत्र वापदान्तस्येत्यतः पदग्रहणानुवृत्तिपक्षेप्युदेव विशेष्यः । अननुवृत्तौ तु न का चित् क्षतिः । उभयथाप्यनर्थकस्याग्रहणान्नेह गर्मुत्स्थास्यति गर्मुत्सुवर्णतृणयोः । ननु शस्त्र्यौ प्लीहानावित्यत्र प्राप्तिरेव नास्ति पदाङ्गाधिकारे तस्य तदुत्तरपदस्येति वचनान्नहीदन्तमपि तदुत्तरमिति चेत् । सत्यम् । पदाङ्गाधिकारइति वचनसत्त्वे तथैव किन्त्वेतद्दूषितं भाष्ये सौत्रेण तदन्तविधिनैव गतार्थत्वात् । अत एव परमश्चासावतिमहांश्चेति विग्रहे परमातिमहानिति सिद्ध्यति वचनाश्रयणे तु नैतत्सिद्ध्येत् । अतिमहच्छब्दस्य महदुत्तरपदत्वेप्यनङ्गत्वात् । परमविशिष्टस्याङ्गत्वेपि महदुत्तरपदत्वाभावात् । सौत्रेण तदन्तविधिना तु सान्तमहत इति दीर्घमुगिल्लक्षणो नुमागमश्चेह सिद्ध्यति । न चेह ग्रहणवतेति निषेधः शङ्क्यः । समासप्रत्ययविधावित्यनेन सह समानविषयः स इत्युक्तत्वात् । एतेन वीतजन्मजरसः परं शुचि ब्रह्मणः पदमुपैतु मिच्छतामिति भारविप्रयोगो व्याख्यातः । अलैवेत्यस्यापवादः पठ्यते भाष्ये, अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति । अन्, राज्ञेत्यर्थवता साम्नेत्यनर्थकेन । इन्, दण्डीत्यर्थवता वाग्मीत्यनर्थकेन । अस्, सुपया इत्यर्थवता सुस्रोतेत्यर्थकेन । मन्, सुशर्मेत्यर्थवता सुप्रथिमेत्यनर्थकेन । तक्वेणःषीध्वमिति सूत्रेङ्ग्रहणेनार्थवद्ग्रहणपरिभाषाया अनित्यत्वज्ञापनात्सिद्धम् । परिवेविषीध्वमित्यत्र हि षीध्वंशब्दस्या-

नर्थकत्वादेवाग्रहणे सिद्धे किं तन्निवृत्त्यर्थेनाङ्ग्रहणेनेति दिक्। सूत्रस्योदाहरणान्तराण्याह वार्त्तिककारः। प्रयोजनं सर्वनामाव्ययसंज्ञायाम्। अन्वर्थसंज्ञयाक्षिप्तः संज्ञी सर्वादिभिर्विशिष्यतइति फलितोर्थः। उपपदविधौ भयाढ्यादिग्रहणम्। भयञ्च आढ्यादयश्चेति द्वन्द्वः। तेन खच्प्रकरणे मेघर्त्तिभयेषु कृञ इति सूत्रे वाक्यं भित्वा उपपदेन मेघर्त्ती विशेष्येते भयेन तूपपदम्। यदि तु भयाढ्यशब्दयोर्द्वन्द्वं कृत्वा आदिशब्देन बहुव्रीहिः क्रियेत तदा क्षेमप्रियमद्रैरप्युपपदं विशेष्येत सिद्धान्ते तु क्षेमादय उपपदेन विशेष्यन्ते भयङ्करः अभयङ्करः आढ्यंकरणं स्वाढ्यंकरणम्। ङीप्प्रतिषेधे स्वस्रादिग्रहणम्। स्वसा परमस्वसा। अपरिमाणबिस्तादिग्रहणं च। प्रतिषेधे प्रयोजनमित्यनुवर्त्तते। द्विगुना सन्निधापितमुत्तरपदं विस्तादिभिर्विशेष्यतइति भावः। द्विबिस्ता द्विपरमबिस्ता। द्व्याचिता द्विपरमाचिता। दितिः। दैत्यः आदित्यः। दित्यदित्यादित्यपत्युत्तरपदण्ण्यः सूत्रे ऽदितिग्रहणं न कर्त्तव्यं परमदित्यादिभ्यस्त्वनभिधानान्न भवतीति भावः। रोण्या अण्। रौणीति सूत्रेण चातुरर्थिकः रौणः आजकरोणः सैंहकरोणः। तस्य च। तस्य चेति वक्तव्यम्। उक्तानां वक्ष्यमाणानां च सर्वेषामयं शेषः। तथा चेह सूत्रे स्वंरूपमित्यनुवर्त्ततइति फलितोर्थः। ननु व्यपदेशिवद्भावेन रौण इति सिद्धामिति चेन्न। व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति निषेधादिति भाष्यकाराः। यद्यपि रोणीशब्दो न प्रातिपदिकं तथाप्यप्रातिपदिकेनेत्यत्र वाक्ये प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्स्त्रीप्रत्यान्तैरपि व्यपदेशिवद्भावो नास्तीति भावः। यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टग्रहणमिति हि ङ्याप्सु-

त्रे वक्ष्यते । ननु यदि तस्य चेत्युच्यते स्वरूपग्रहणं चानुवर्त्यते तर्हि व्यपदेशिवद्भावो ऽप्रातिपदिकेनेत्यस्य निर्विषयत्वं स्यादिति चेन्न । सूत्रान्ताट्ठक् दशान्ताड् इत्यादौ सावकाशत्वात् । न च तत्रान्तग्रहणसामर्थ्यादेव व्यपदेशिद्भावो न भविष्यतीति वाच्यम् । समासप्रत्ययविधौ प्रतिषेध इत्येतद्बाधेनान्तग्रहणस्य चरितार्थत्वाज्ज्ञापकसिद्धेयं परिभाषा । पूर्वात्सपूर्वादिनिरिति वक्तव्ये पूर्वादिनिः सपूर्वाच्चेति योगविभागश्चेह ज्ञापकः । वस्तुतस्तु भयाढ्यादाविव सूत्रान्ताट्ठक् दशान्ताड् इत्यादावपि विशेषणविशेष्यभावव्यत्यासमात्रेण सिद्धे अन्तग्रहणसामर्थ्यमपि सूपपादमिति परिभाषाश्रयणं व्यर्थम् । न चैवं गोकुलमित्यत्र ह्रस्वः स्यादिति वाच्यम् । उपसर्जनं यो गोशब्दस्तदन्तस्य प्रातिपदिकस्य ह्रस्वविधानात् । सन्निधानाच्च प्रातिपदिकं प्रत्येव विशेषणताश्रयणात् । गोशब्दे च तदभावात् । अत एव राजकुमारीपुत्र इत्यत्र न ह्रस्वः । उपसर्जनं यत्स्त्रीप्रत्ययान्तं तदन्तस्य प्रातिपदिकस्येत्यत्रापि सन्निधानाश्रयणात् । एषैव तवापि गतिः । न ह्युक्तपरिभाषेह सम्भवति व्यपदेशिवद्भावो ऽप्रातिपदिकेन ग्रहणवतेति च परिभाषाद्वयमपि प्रत्ययविधिविषयकमिति दिवउत्सूत्रे कैयटहरदत्ताभ्यामुक्तत्वात् । एवं च पूर्वादिनिरिति योगविभागो व्यर्थः । किम्बहुना पूर्वादिनिरित्यत्र तदन्तग्रहणसम्भवात्सपूर्वाच्चेति सूत्रं व्यर्थं व्यपदेशिवद्भावेन सिद्धे तस्येति प्रकृतवार्त्तिकमपि न कर्त्तव्यम् । स्वंरूपामिति तु प्रागेव प्रत्याख्यातमिति दिक् । रथसीताहलेभ्यो यद्विधौ । तद्वहतीति यत् । रथ्यः परमरथ्यः । सीत्यं परमसीत्यं क्षेत्रम् । सीतया सम्मितं संमतमित्यर्थः । नौवयोधर्मेति यत् । हलस्य कर्षो हल्यः

मतजनहलात्करणजल्पकर्षेष्विति यत् । यद्विधाविति किम् । हलसीराद्वगिति ठग्विधौ तदन्तग्रहणं मा भूदिति कैयटः । अत्रेदं वक्तव्यम् । हलसीरादिति द्विः पठ्यते । तस्येदमित्यधिकारे तद्वहतीत्यधिकारे च तत्रोभयत्रापि तदन्तविधिरिष्ट एव । आद्यस्य प्राग्दीव्यतीयत्वाल्लुक् । द्विहलः । अपरस्य श्रवणम् । द्वैहलिकः । स्पष्टं चेदं चतुर्थे हरदत्तग्रन्थे । युक्तं चैतत् । रथाद्यत् तद्वहतीति रथशब्दस्य द्विरुपादानमेतदर्थमिति भाष्येप्युक्तत्वात् । वहत्यधिकारस्थरथहलयोरुपादानसामर्थ्याल्लुग्भ्यो हि तदन्तविधिरविशेषादुभयत्रापि स्यादेव। न चैवमिह यद्विधावित्यसङ्गतमिति वाच्यम् । तस्योपलक्षणत्वात् । यद्वा । रथाद्यदिति सूत्रे रथाद्रथाङ्गे इतिवद्वोढरीत्युक्तौ तत्प्रकारकशाब्दबोधस्योपपादयितुं शक्यत्वेपि हलग्रहणे तदुपपादनस्य वक्तुमशक्यत्वेन हलग्रहणेन न तदन्तविधिः । अस्तु वा संख्यापूर्वपदएवेति कैयटाशयः । तस्मैहितमिति प्रकरणे शरीरावयवाद्यदिति सूत्रे रथाच्चेति वार्तिकम् । तत्रापयं तदन्तविधिर्बोध्यः । यत्तु तत्र कैयटो वक्ष्यति । हलसीताशब्दाभ्यां साहचर्याच्चतुर्थाध्यायविहित एव यदिति तदन्तविधिमाहुरिति । तत्राहुरित्यस्वरसोद्भावनम् । असमासेनिष्कादिभ्य इत्यसमासग्रहणेन तस्मिन्प्रकरणे विशिष्यापि तदन्तविधेर्ज्ञापिततया साहचर्याश्रयणेपि तदन्तविधेर्दुर्वारत्वादित्यवधेयम् । सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य । सुपाञ्चालकः । सुमागधकः । सर्वपाञ्चालकः । अर्द्धपाञ्चालकः । अवृद्धादपिबहुवचनविषयादिति वुञ् । सुसर्वार्द्धाज्जनपदस्येत्युत्तरपदवृद्धिः । दिक्शब्दः । पूर्वपाञ्चालकः । अपरपाञ्चालकः । पूर्ववद् वुञ् । दिशोमद्राणामित्युत्तरपदवृद्धिः ।

ऋतोर्वृद्धिमद्विधावयवानाम् । ऋतुवाचिनः शब्दाद्यो वृद्धिमान् वृद्धिनिमित्तः प्रत्ययस्तद्विधाने अवयवानां पूर्वपदत्वमिति शेषः । तदन्तविधिरिह वाचनिक एव । शरदः पूर्वो भागः पूर्वशरत् । पूर्वापराधरोत्तरमित्येकदेशिसमासः । तत्र भवं पूर्वशारदं । सन्धिवेलाद्यृतुनक्षत्रेभ्योण् । अवयवाद्तोरित्युत्तरपदवृद्धिः । वृद्धिमदिति किम् । प्रावृषण्य इत्यत्र तदन्तविधिर्मा भूत् । तेन तत्र ऋत्वणेव भवति । पूर्वप्रावृषमिति । अवयवानां किम् । पूर्वस्यां शरदि भवं पौर्वशारदिकमित्यत्राण् न भवति किं तु कालाट्ठञेव भवति । तत्र हि यथाकथञ्चित्कालवाचिनो गृह्यन्ते न तु रूढ्यैवेत्याग्रहः । उत्तरत्र संधिवेलाद्यृतुनक्षत्रेभ्य इति विशेषणात् । अत एव सायम्प्रातिकः । पौनःपौनिक इत्यादि सिद्ध्यति । ठञ्विधौ संख्यायाः । द्वे षष्ठी परिमाणमस्येति विग्रहे तद्धितार्थेत्यनेन समासे कृते आर्हादिति ठक् न भवति। संख्यायास्तदन्तविधौ सति संख्यान्तादपि ठक्प्रतिषेधात् । तेन प्राग्वतोरिति ठञेव भवति । अध्यर्द्धपूर्वेति लुक्तु न भवति । सोस्यांशवस्नभृतय इत्यतः सोस्येत्यनुवर्त्तमाने तदस्यपरिमाणमित्यत्र पुनः प्रत्ययार्थस्य समर्थविभक्तेश्च निर्देशात् । पुनर्निर्देशेन हि प्रकृताल्लुक्समवद्धादिलक्षणमिदमिति सूच्यते । यद्वा । अनुवर्तमानेन सोस्येत्यनेन सहितं परिमाणं संख्याया इत्येतत्तावत्प्रत्ययं विधत्ते । क्तस्तस्य लुकि कृते पुनस्तदस्यपरिमाणमिति वचनसामर्थ्यात्स्वार्थे तज्जातीयः प्रत्ययः । तस्य विधानसामर्थ्याद्द्विगुनिमित्तत्वाभावाद्वा लुग् न भविष्यति । एतच्च वृत्तिकारमतमाश्रित्योक्तम् । भाष्यकारमते तु तमधीष्ट इति सूत्रेण भूतार्थे प्रत्ययं कृत्वा द्विषाष्टिक इत्यादि साध्यम् । न ह्यत्राध्यर्द्धेति लुक्

प्राप्नोति । अनार्हीयत्वात् । यद्यपि तमधीष्टइत्यत्र काला-दिति वर्तते । तथापि काले संख्येये वर्तमानात् षष्टिश-ब्दादुत्पत्तिर्न विरुध्यते रमणीयादिभ्यस्त्वनभिधानान्न भवति । परिमाणार्थे तु लुक् दुर्वारः । तथाहि । प्राग्वतेष्ठञिति ठञ् तदर्हतीत्यतः प्राक् तेनक्रीतमित्येवमाद्या येर्थास्तेषु भवति । अर्ह-त्यर्थेच । ततः परेपि येर्था वर्त्तयतीत्यादय आकालिकडाद्य-न्तवचनइत्येवमन्तास्तेष्वपि भवति । एवञ्च ठञ आर्हीया-नार्हीयार्थसाधारणत्वेपि परिमाणस्य तदर्हतीत्यतः प्राङ् नि-र्देशात्तत्रोत्पन्नष्ठञ् आर्हीय एव । न च तदस्येति पुनरुपादा-नमात्रेणार्हीयत्वमपगच्छति । न हि काको वाश्यतइत्यार्हीय-त्वं निवर्त्तते । किञ्च यद्यार्हीयत्वं निवर्त्तेत । तर्हि जीवितप-रिमाणादन्यत्रापि लुङ् न स्यात् । द्वौ निष्कौ परिमाणमस्य द्विनिष्कः । न च द्वित्रिपूर्वान्निष्कादिति वचनसामर्थ्यात्स्या-दिति वाच्यम् । परिमाणातिरिक्तेष्वार्हीयार्थेषु वचनस्य सा-वकाशत्वात् । तस्माद्यस्य षष्टिर्जीवितपरिमाणं षष्टिमसौ भूतो भवतीति तमधीष्टोभृत इत्येव द्विषाष्टिकः साधनीयः । तदस्येति तु त्यक्तव्यम् । सोस्येत्यनुवृत्त्यैवेष्टसिद्धेरिति स्थि-तम् । धर्मान्नञः । धर्मं चरति धार्मिकः । अधर्मं चरति आधर्मिकः । अधर्माच्चेत्येतन्न वक्तव्यम् । पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च, प्रयोजनम् । इष्टकेषीकामालानाञ्चिततूलभा-रिषु । इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलेन । मुञ्जेषीकतूले-न । मालभारी । उत्पलमालभारी । इहोत्तरपदाधिकारे प्रयो-जनस्योदाहरणात्पदाङ्गेति पदशब्द उत्तरपदपर इति कैयटादयः । अत एव परममहत्परिमाणमित्यत्र परममहतो द्रव्यस्य परिमा-णमिति षष्ठीतत्पुरुषः । सामानाधिकरण्ये ह्यान्महत इत्या-

त्वं स्यादित्युदयनाचार्या व्याचख्युः। यत्तु तत्र वर्द्धमानेनोक्तम्। पदाङ्गाधिकारइत्यत्र केवलपदाधिकारो गृह्यते न तूत्तरपदाधिकारः। अन्यथेष्टकेषीकामालानामित्यत्र पुनस्तदन्तविध्युपसंख्यानं व्यर्थं स्यात्। तथा च परममहत्परिमाणमित्यत्र कर्मधारयपक्षेष्यात्वप्रसक्तिर्नास्त्येवेति,तदेतदनवहिताभिधानम्। इष्टकेषीकेत्यस्य प्रयोजनत्वेनोदाहरणात्। उपसंख्यानान्तरस्य गगनकुसुमायमानत्वात्। तस्मादाचार्योक्तमेव सम्यक्। एतेन सततनैशतमोवृतमन्यतइति भारविप्रयोगे ओजःसहोम्भस्तमसस्तृतीयाया इत्यलुक् कुतो नेत्याशंक्य वर्धमानोक्तरीत्योत्तरपदाधिकारे तदुत्तरपदग्रहणं नास्तीति दुर्घटवृत्तिकारोक्तिरप्यपास्ता। यदप्योजःसह इति सूत्रे हरदत्तेनोक्तम्। ओजः प्रभृतीनामुत्तरपदाक्षिप्तं पूर्वपदं प्रति विशेष्यत्वादिति, तदपि वार्तिकविरोधादुपेक्ष्यम्। विशेष्यविशेषणभावनिर्णयायैवेहत्यवार्त्तिकानां प्रवृत्तिरिति कैयटवदेव स्वयमपि व्याख्यातत्त्वात्। भारविप्रयोगस्त्वित्थं समाधेयः। वृतं वृत्तिः नैशतमसो वृतमिति षष्ठीतत्पुरुषः। नपुंसके भावे क्तस्य योगे शेषत्वविवक्षायां षष्ठी। ततः सततं नैशतमसो वृतं यस्मिन्निति बहुव्रीहिः। यद्वा। वृतु वर्तने, घञर्थे कविधानमिति भावे कः। सततं नैशतमसो वृतं वृत्तिर्यस्मिन्निति प्राग्वत्। अङ्गाधिकारे प्रयोजनान्याह। प्रयोजनं महदप्स्वसूनप्तृणां दीर्घविधौ। महान्। परममहान्। आपस्तिष्ठन्ति। स्वापः। नपूजनादिति समासान्तनिषेधः। नन्वेवमपि द्व्यन्तरुपसर्गेभ्योपईदितीकारः प्राप्नोति। न ह्ययं समासान्तः येन ऋक्पूरित्यप्रत्ययइव निषिध्येत इति चेत्सत्यम्। द्व्यन्तरुपसर्गेभ्य इत्यत्राप इति कृतसमासान्तस्यानुकरणं प्रथमान्तम्। अन्हो ऽदन्तादितिवद्व्यत्ययेन षष्ठ्यर्थे प्र-

थमा । इहत्यं स्वाप इति भाष्यं चास्मिन् व्याख्याने प्रमाणमित्यवधेयम् । स्वसारौ । परमस्वसारौ । नप्तारौ । परमनप्तारौ । पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् । पद्भावः प्रयोजनम् । द्विपदः पश्य । केवलस्योदाहरणं तु पादयतेरप्रत्ययः,पात् । पदः । पदेत्यादि । इह कौ लुप्तत्वाण्णिलोपो न स्थानिवत् । उत्तरपदाधिकारे तु पादशब्दो विशेष्य एव । तेन पादस्यपदाज्यातिगोपहतेष्विति पदभावः । पादेनोपहतं पदोपहतमित्यत्रैव भवति। इह तु न दिग्धपादेनोपहतं दिग्धपादोपहतमिति । उत्तरसूत्रेष्येवम् । तेन पद्यत्यतदर्थे, हिमकाषिहतिषुचेति पद्भाव इहैव भवति । पादौ कषतीति पत्काषी । इह तु न, परमपादकाषी । यस्तु परमपत्काषीति प्रयोगः । स परमश्वासौ पत्काषी चेति विग्रहेण समाधेय इति भाष्यकैयटयोः स्थितम् । यूयं वयम्, अतियूयम् अतिवयम् । अस्थ्ना परमास्थ्ना । अनड्वान् परमानड्वान् । द्युपथिमथिपुंगोसखिचतुरनडुदित्रिग्रहणम् । द्यौः सुद्यौः । पंथाः सुपन्थाः । नपूजनादिति समासान्ताभावः । मन्थाः परममन्थाः । पुमान् परमपुमान् । गौः सुगौः । सखा सुसखा । सखायौ सुसखायौ । चत्वारः परमचत्वारः । अनड्वाहः परमानड्वाहः । त्रयाणां परमत्रयाणाम् । भाष्ये तु परमपन्थाः परमगौरित्युदाहृतम् । तत्र समासान्तापत्तिः । नपूजनादिति निषेधस्तु नास्ति स्वतिभ्यामेवेति वक्ष्यमाणत्वात् । अत एव काचित्कोयमपपाठ इति कैयटः । समासान्तविधेरनित्यतया वा समाधेयम् । यद्वा परमुदाहरणान्तरमित्यर्थः । अपन्था, अगौरित्यत्र नञ्तत्पुरुषात्पथोविभाषेति साधुत्वम् । यत्तु परमसखायाविति पठितं भाष्ये । तत्र बहुव्रीहिर्बोध्यः । गौणत्वे ऽपि ह्यनङ्णित्त्वे इष्येते एवास्थ्याद्यनङ्वत् । एतच्च मिदचोन्त्यादित्यत्र द्वितीया-

श्रितेत्यत्र च स्पष्टम् । अरुद्युक्षोवरुण इन्द्रसखा, आग्नेयाहिमरुत्सखेत्यादि प्रयोगाश्चैवमेव सङ्गच्छन्ते । एतेन घिसंज्ञासूत्रे शोभनः सखा अस्य सुसखिरित्युदाहरन् हरदत्तो न्यासकारश्चापास्तः । त्रेस्त्रय इति तु त्रिशब्दार्थसमवेतसंख्याद्यभिधायिन्यामिपरे इति व्याख्यानाद्द्वौणे न भवति, प्रियत्रीणाम् अतित्रीणाम् । प्राधान्ये तु स्यादेव, परमत्रयाणामित्याहुः । अत्र व्याख्याने प्रमाणं मृग्यम् । इह पदाङ्गाधिकारइति न कर्त्तव्यम् । तदन्तग्रहणेनैव सकलेष्टसिद्धेरित्युक्तं न विस्मर्त्तव्यम् । प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम् । इह प्रत्ययाक्षिप्तस्य धातुप्रातिपदिकाद्यवयवकसमुदायस्य प्रत्ययेन विशेषणात्तदन्तविधिर्लभ्यते । अङ्गसंज्ञासूत्रे यस्मात्प्रत्ययविधिस्तदादिप्रत्यये इति योगं विभज्य परिभाषात्वेन व्याख्यानादंशान्तरलाभः । इदं च संज्ञाविधौ न प्रवर्त्तते, सुपूतिङन्तंपदमिति ज्ञापकात् । उत्तरपदाधिकारेपि न प्रवर्त्तते, हृदयस्यहृल्लेखयदण्लासेष्विति सूत्रे लेखग्रहणाज्ज्ञापकादिति वक्ष्यते । अस्यापवादमाह । प्रत्ययग्रहणं चापञ्चम्या इति । यत्र पंचम्यन्तं प्रत्ययस्य विशेषणं तत्र तदन्तग्रहणं नेत्यर्थः । यथा रदाभ्यांनिष्ठात इत्यत्र । तेन दृषत्तीर्णेत्यत्र तृधातोस्तकारस्य निष्ठान्तप्रत्ययावयवीभूतस्य नत्वं न भवति । इह घट्टके संज्ञाविधावुत्तरपदाधिकारे रदाभ्यां स्यतासलिलुटोरित्यादौ च प्रत्ययो विशेष्यतयाश्रीयते,इतरत्र तु विशेषणतयेति फलितोर्थः । तदिदं सकलं सूत्रेणैव सिद्ध्यतीति स्थितम् । सौत्रस्य तदन्तविधेर्वाचनिकमपवादमाह वार्तिककारः । यस्मिन् विधिस्तदादावल्ग्रहणे । अचिश्नुधातुभ्रुवांय्वोरियङुवङौ च यथेह भवति । श्रियौ भ्रुवावित्येवमिहापि सिद्ध्यति श्रियः भ्रुव इति । तदन्तविध्यपवादस्तदादिविधि-

रतो विशेषणेनैव ॥

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥ यस्य समुदायस्यावयवानामचां मध्ये प्राथमिकोऽ् वृद्धिसंज्ञकः स वृद्धसंज्ञकः स्यात्। आमूगुप्तीयः। वृद्धाच्छः। अचामिति जातौ बहुवचनं तेन द्वयोरपि भवति। शालीयः। एकस्यापि च भवति व्यपदेशिवद्भावात्। ज्ञा ब्राह्मणी तस्या अयं ज्ञीयः। वा नामधेयस्य। पौरुषेयं नाम तस्य वृद्धसंज्ञा वा स्यादित्यर्थः। उभयत्राविभाषेयम्। देवदत्तादीनामप्राप्ते वामनादीनां च प्राप्ते आरम्भात्। देवदत्तीयाः। दैवदत्ताः। विधाय मूर्तिं कपटेन वामनीमिति श्रीहर्षः। गोत्रोत्तरपदस्य च। नित्यं वृद्धसंज्ञा वक्तव्येति शेषः। कम्बलचारायणीयाः। ओदनपाणिनीयाः। घृतरौढीयाः। कम्बलप्रियस्य चारायणस्य शिष्या इत्यादिरर्थः। पणनं पणः। घञर्थे कविधानमितिकः। सोस्यास्तीति पणी। पणिनो गोत्रापत्यं पाणिनः। अण्। गाथिविदथिकेशिगणिपणिनश्चेति प्रकृतिभावः। ततो यूनीञ्। पाणिनिः। स्यादेतत्। ण्यक्षत्रियार्षञित इति सूत्रेणेह इञो लुक् प्राप्नोति। आर्षाद्यून्युत्पन्नत्वादिति चेन्न। आर्षग्रहणेन ऋष्यन्धकेति सूत्रविहितस्य ऋष्यण एव ग्रहणात्। अस्य चौत्सर्गिकत्वात्। यद्वा। पणिन्शब्दो यौगिको न तु ऋषौ गूढः। लुग्विधौ तु रूढस्यैव ग्रहणम्। एतच्च शास्त्रान्तएकशेषनिर्देशाद्वा भगवतः पाणिनेः सिद्धामिति वार्त्तिकनिर्देशादाक्षीपुत्रस्य पाणिनेरिति भाष्यकारव्यवहाराच्च निर्णीयते। नन्वेवमपि पाणिनेश्छात्राः पाणिनीया इति न सिध्यति। वृद्धाच्छं बाधित्वा इञश्चेत्यणः प्रसङ्गात्। न च छे विवक्षिते यूनिलुगितीञो लुकि सति नायमिञन्त इति वाच्यम्। प्रत्ययलक्षणेन इञन्तत्वानपायात्। अत्राहुः। इञश्चेत्यत्र कण्वादिभ्योगोत्रइत्यतो

गोत्रग्रहणमनुवर्त्तते तच्च पूर्वसूत्रएव स्वर्यते । तेनापत्याधिकारादन्यत्वेन प्राप्तं लौकिकं गोत्रं विहाय गोत्राधिकारो गृह्यते स्वरितेनाधिकार इति वचनात् । कण्वादिश्च गर्गाद्यन्तर्गणः । ततो गर्गादिभ्यो यञिति विधीयमानो यत्र पारिभाषिक एव गोत्रे भवति तत्रापत्याधिकारसत्त्वात् । तेन इञश्चेत्यत्रापि पारिभाषिके गोत्रे य इञ् तदन्ताच्छेषेऽणित्यर्थः फलितः । यद्वा । लक्षणप्रतिपदोक्तपरिभाषया कण्वादिसूत्रे यञेव गृह्यते स च पारिभाषिके विहितत्वात्तस्यैव प्रत्यायकः । एवं चार्थाधिकारादिञश्चेत्यत्रापि तथा । पाणिनिरिति तु यूनि इञ् न तु गोत्रे । तेनाणोऽप्राप्तेर्निर्बाधश्छप्रत्यय इति स्थितम् । रूढस्यापत्यं रौढिः । अतइञ् । अनन्तरे गोत्रे वा । न चैवमिञश्चेत्यण् प्रसङ्गः । नड्यचः प्राच्यभरतेष्विति निषेधात् । स्यादेतत् । यदि गोत्रोत्तरपदस्य वृद्धसंज्ञा विधीयते । तर्हि पिङ्गलकाण्व्यस्य छात्राः पैङ्गलकाण्वा इत्यत्र वृद्धाच्छः स्यात् । इष्यते तु कण्वादिभ्योगोत्रइत्यण् । सत्यम् । अत एवापरितोषादुक्तं वार्त्तिककृता गोत्रान्ताद्वासमस्तवदिति । शैषिकाधिकारे प्राग्दीव्यतोणित्यत्र वा इत्थमतिदेशः कर्त्तव्य इत्यर्थः । अपत्याधिकारादन्यत्वाच्च लौकिकगोत्रग्रहणादोदनपाणिनीया इत्यादि सिद्ध्यतीति भावः । किमविशेषेण, नेत्याह । जिव्हाकात्यहरितकात्यवर्ज्जम् । कतशब्दो गर्गादिः । जिव्हा चपलो, हरितवर्णश्च कात्यः । तस्य छात्रा इत्यर्थे ऽणेव भवति जैव्हाकाताः हारितकाताः ॥

त्यदादीनि च ॥ एतानि वृद्धसंज्ञानि स्युः । त्यदीयम् । अदसीयम् । इदमीयम् । किमीयम् । त्वादायनिः । मादायनिः । उदीचांवृद्धादिति फिञ् । प्रत्ययोत्तरपदयोश्चेति त्वमा-

वादेशौ ॥

एङ्प्राचां देशे ॥ यस्यचामादिरिति मण्डूकप्लुत्या ऽनुवर्त्तते । एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्यादेशाभिधाने । एणीपचनीयः । गोनर्दीयः । भोजकटीयः । एङिति किम् । आहिच्छत्रः । कान्यकुब्जः । विधेयसंज्ञासम्बन्धबलेन पृथग्विभक्त्युच्चारणाच्च प्राग्ग्रहणमाचार्यनिर्देशार्थम् । व्यवस्थितविभाषा चेयम् । तेन क्रोडदेवदत्तशब्दयोरप्राग्देशवाचिनोर्न वृद्धसंज्ञा तेन क्रौडो दैवदत्त इत्यणेव भवति । प्राग्देशवाचिनस्तु देवदत्तशब्दस्य भवत्येव वृद्धसंज्ञा । ततः काश्यादित्वाद्वृद्धलक्षणौ ठञ्ञिठौ भवतः । शैषिकेष्विति वक्तव्यम् । सैपुरिकी । सैपुरिका । स्कौनगरिकी । स्कौनगरिका । सेपुरं स्कोनगरं च वाहीकग्रामौ । तत्र वृद्धत्वाद्वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ भवतः शैषिकेष्विति वचनादपत्ये वृद्धलक्षणः फिञ् न । विकारे च नित्यं वृद्धेति मयण् न । तदेवं कुणिमतं भाष्यमतं चानुसृत्य प्राग्ग्रहणमाचार्यनिर्देशार्थमिति व्याख्यातम् । जयादित्यस्तु प्राचि देशे ये सन्ति ते प्राचः पुरुषास्तेषां यो देश स्तदभिधानइति व्याचख्यौ । प्राचामित्यस्य च श्रूयमाणदेशविशेषणत्वे सम्भवति अध्याहर्त्तव्येन मतेनेत्यनेनान्वयो न कल्प्य इति तस्याशयः । अस्मिन् पक्षे वाहीकग्रामे दैवदत्त इत्यत्र क्रौड इत्यत्र वा ऽवृद्धत्वादेव ठञ्ञिठौ न भवत इति स्पष्टम् । किं तु सैपुरिकीत्यादिभाष्योदात्तं वचनेनैव साधनीयं स्यादिति दिक् । देशइति किम् । गोमती नाम प्राग्देशनदी तत्र भवा मत्स्याः गौमताः । देशग्रहणेन नदी न गृह्यते नदीदेशो ऽग्रामा इति पृथगुपादानालिङ्गात् । प्रागादिदेशविभागस्त्वित्थम् । शरावती नाम न

दी उत्तरपूर्वाभिमुखी तस्या दक्षिणपूर्वस्यां दिशि व्यवस्थितो देशः प्राग्देशः । उत्तरापरस्यामुदग्देशः । उक्तञ्च । प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा । विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावतीति ॥ अमरसिंहोप्याह । लोकोयं भारतं वर्षं शरावत्यास्तु योऽवधेः । देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तर इति ॥ अमरव्याख्यातारस्तु ऐशानीतो नैर्ऋत्यां पश्चिमाब्धिगामिनी शरावतीति वदन्ति । उभयथापि प्रागुदक्स्वरूपे न विवादः । वाहीकदेशस्तु प्रागुदग्बहिर्भूतः । बहिषष्टिलोपो यञ्चेति व्युत्पादनादिति विवरणम् । तच्चिन्त्यम् । अव्ययात्त्यबिति सूत्रे काश्यादिभ्यष्ठञ्ञिठाविति वार्तिकं व्याचक्षणेन भगवता शाकलनाम्नो ग्रामस्योदीच्यवाहीकोभयरूपताभ्युपगमात् । तत्र हरदत्तादिभिस्तथैवानुवादाच्च । तस्माद्वाहीको देशविशेष इत्येव तत्त्वम् । तथा च कर्णपर्वणि । पञ्चानां सिन्धुषष्ठानामन्तरं ये समाश्रिताः । वाहीका नाम ते देशा न तत्र दिवसं वसेदिति ॥ एतेन धर्मबहिर्भूतत्वाद्वाहीका इत्युक्तं भवति । शतद्रूर्विपाशा इरावती वितस्ता चन्द्रभागेति पञ्च नद्यः, सिन्धुनदस्तु षष्ठः, तन्मध्यदेशो वाहीक इति तद्व्याख्यातारः । व्युत्पत्त्यन्तरं तु तत्रैव दर्शितम् । वहिकश्च वहीकश्च विपाशायां पिशाचकौ । तयोरपत्यं वाहीका नैषा सृष्टिः प्रजापतेरिति ॥ एतच्च विवेचनं वाहीकग्रामेभ्यश्चेत्यादावुपयोक्ष्यतइति सर्वं सुस्थम् ॥

इति श्रीविद्वन्मुकुटरत्नस्य लक्ष्मीधरसूरेः सूनुना भट्टोजिभट्टेन कृते शब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे नवममाह्निकम् ॥ पादश्चायं प्रथमः समाप्तः ॥

गाङ्कुटादिभ्यो ञ्णिन्ङित्। गाङादेशात्कुटादेश्च परे ञ्णितः प्रत्यया ङिद्वत्स्युः ॥ अध्यगीष्ट। विभाषालुङ्लृङोरितीङो गाङ्। इह विशेषणार्थ एव हि गाङादेशे ङकार इति गाङ्लिटीति सूत्रे वक्ष्यते। कुटिता। कुटितुम्। अञ्णित्किम्। कोटः। घञ्। चुकोट। व्यचेः कुटादित्वमनसीति वक्तव्यम्। एतच्च षष्ठे लिट्यभ्यासस्येति सूत्रे भाष्ये पठितमपि सन्दर्भशुद्ध्यर्थं वृत्तिकृतेह पठितम्। तुदादिगणे कुटादिभ्यः प्राक् पठितस्य व्यचेः कुटादित्वं वार्तिकेनातिदिश्यते। विचितुम्। विचिता। अनसि किम्। उरुव्यचाः। अत्र हरदत्तः। अनसीति पर्युदासात्कृत्येवेदम्। तेनेह न। विव्याचिथ। अव्याचीत्। अव्यचीत्। के चित्तु प्रसज्यप्रतिषेधमाश्रित्य थलादिष्वपि ङित्त्वमाहुः। तत्तु वाक्यभेदादसमर्थसमासाच्चायुक्तमिति माधवादयः। अथ कथं लिखितुं स्वयमेव लिखिष्यते इति। अत्र दुर्घटादयः, कण्वादिभ्य इत्यत्रैव षष्ठीतत्पुरुषबहुव्रीह्योः सहविवक्षया बहुव्रीहिशेषोयम् कुटादिभ्य इति। तेन लिखेरपि कुटस्यादितयात्र सङ्ग्रह इति। तन्न। शकुनिष्वालेखनइति सौत्रप्रयोगविरोधापत्तेः। रलोव्युपधा, दीश्वरेतोसुनित्यत्र वृत्तिग्रन्थविरोधाच्च। तत्र हि लिखित्वा लेखित्वा लिलिखिषति लिलेखिषति विलेखितुमिति प्रदर्शितम्। तस्मात्संज्ञापूर्वकतया समाधेयमिति हरदत्तः। कथं चुकुटिषतीति सनो ङित्त्वाद्यङन्तादिव तङ्प्रसङ्गात्। मैवम्। उपदेशग्रहणानुवृत्त्योपदेशे यो ङित्तदन्तादात्मनेपदमिति व्याख्यानात् ॥

विज इट् ॥ विजेः पर इडादिः प्रत्ययो ङित्स्यात्। उद्विजितुम्। इट् किम् ॥ उद्वेजनम्। इह वृद्धिर्यस्येतिसूत्रान्मण्डूकप्लुत्या यस्यादिरित्यनुवर्तते तेनेडादिः प्रत्ययो लभ्यते न तू-

त्तमेकवचनमिट् । तथाहि सति विजिषीयेत्यत्रैव स्यात् । ओ-विजीभयचलनयोरिति विजिरिह गृह्यते न तु पृथग्भावार्थ इ-रित् तस्यानिदित्त्वादिति हरदत्तः । न च क्रादिनियमाल्लिटीट् संभवत्येवेति वाच्यम् । तत्र किन्त्वेन गतार्थत्वादिति तस्य भा-वः । वस्तुतस्तु नेदं युक्तम् । विवेजिथेति थलीट्सम्भवात् । त-त्र च किन्त्वेन गतार्थत्वादिति तस्य भावः । वस्तुतस्तु नेदं युक्तम् । पित्त्वेन कित्त्वाभावात् । तस्मात्कुटादिसाहचर्यात्तु-दादेरेव ग्रहणं न तु जुहोत्यादेरिति बोध्यम् । नन्वेवं रुधादेर-पि ङित्त्वादुद्विजितेत्याद्युदाहरता माधवेन सह विरोध इति चे,त्तर्हि व्याख्यानादेव जुहोत्यादेरग्रहणमित्यस्तु । हरदत्तोक्ति-स्तु दुष्टैवेति दिक् ॥

विभाषोर्णोः ॥अस्मादिडादिप्रत्ययो ङिद्वा स्यात् । ऊर्णुविता ऊर्णविता । इडिति किम् । ऊर्णवनीयम् ॥

सार्वधातुकमपित्॥ अपित्सार्वधातुकं ङिद्वत्स्यात्। विनुतः । इ-ह परत्र परशब्दप्रयोगात्कल्प्यमानो वतिः सप्तम्यन्तान्न कल्प्यो ङि-तीव ङिद्वदिति । तथासति प्रतियोगिनि सप्तमीप्रसङ्गात् ,सार्वधातुके ऽपितीति । पूर्वत्राप्येवमेव अञ्जिनतीति । इटीति च । सप्तमी स्यात् । श्रूयते तु सर्वत्र प्रथमा । तस्माच्चतुर्थीयान्तादेव वतिर्ङि-ता तुल्यं ङिद्वदिति । अत एव पचेते इत्यादौ ङितो यत्कार्य-मातोङित इतीय् सोपि भवति । नन्वेवं यादम्पतीसमनसा सु-नुत इत्यत्र तास्यनुदात्तेन्ङिदिति ङसार्वधातुकानुदात्तत्वं स्यादि-ति चेन्न । उपदेशग्रहणस्योभयसम्बन्धेन ङिदुपदेशाददुपदेशा-च्चेति षाष्ठभाष्ये व्याख्यातत्वात् । अन्हिङोरिति पर्युदासे-नोपदेशे ङकारवतो ग्रहणाद्वा । सप्तम्यन्ताद्वतिरित्येव परः षा-ष्ठवृत्तिग्रन्थस्त्वापातत इत्येष निष्कर्षः । अत्र पिच्च ङिन्न ङिच्च

पिन्न भवतीति वाक्यार्थद्वयं क्ङितीतिचेति सूत्रे वर्णितस्माभिः। भाष्ये तु हलश्नः शानाजिति सूत्रे स्थितमेतत् ॥

असंयोगाल्लिट् कित् ॥ असंयोगात्परोपिल्लिट् कित् स्यात्। निन्यतुः बिभिदतुः। अपित्किम्। बिभेद। असंयोगात्किम्। सस्रंसे। ङित्त्वे प्रकृते कित्करणं यजादीनां कितीति सम्प्रसारणार्थम्। ईजतुः ईजुः। पूर्वत्रापि कित्त्वं कुतो न कृतमि चेत्, वक्तो वक्य इत्यत्र सम्प्रसारणापत्तेः। जाग्रतः जाग्रतीत्यत्र गुणापत्तेश्च। ङित्त्वे तु वच्यादीनां कितीत्युक्तेर्न सम्प्रसारणम्। अजाग्रोविचिण्णल्ङित्स्विति पर्युदासान्न गुणः। ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन। कित्त्वस्यावकाशः ईजतुः ईजुः। गुणस्यावकाशः चेतति वेत्ति ववृधे इत्यत्र पूर्वविप्रतिषधात्कित्त्वम् ॥

इन्धिभवतिभ्यां च ॥ आभ्यां लिट् कित्स्यात्। समीधे दस्युहन्तमम्, पुत्रईधे अथर्वणः। बभूव। बभूविथ। इन्धेः संयोगार्थं ग्रहणं भवतेस्तु पिदर्थम्। इन्धीत्युच्चारणार्थेनकारेण निर्देशः। सुट्तिथोरिति वत्। नत्विक्श्तिपावितीका, नलोपापत्तेः। अत्र वार्तिकम्। इन्धेश्छन्दोविषयत्वाद्भुवोवुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यामिति। अयमर्थः, इन्धेर्भाषायामिजादेश्चेत्यामा भाव्यम्। छन्दसि तु अमन्त्रइति प्रतिषेधाद्यद्यप्याम्नास्ति तथापि छन्दस्युभयथेति लिटः सार्वधातुकत्वे ङित्त्वात्समीधे इति नलोपः। श्रमभावस्त्वार्धधातुकत्वात्। व्यत्ययाद्वाभुवोपि वुङ् नित्यत्वादेव गुणवृद्धी बाधिष्यते। न च शब्दान्तरप्राप्त्या वुगनित्य इति वाच्यम्। कृताकृतप्रसङ्गित्वमात्रेणापि लक्ष्यानुरोधान्नित्यत्वस्याश्रयणात्। शब्दान्तरप्राप्त्या स्वरभिन्नस्य प्राप्त्या चानित्यतायाः सिद्धान्ते व-

हुधा त्यक्तत्वात् । एषैव सूत्रकृतोपि गतिः बभूवेत्यत्र वृद्धेर-निग्लक्षणतया कृतिचेति निषेधासम्भवेन वुको नित्यताया एव शरणीकरणीयत्वात् । न च किच्चसामर्थ्यादनिग्लक्षणाया अपि वृद्धेर्निषेधः । अहं बभूवेत्यत्र णित्वाभावपक्षे तथा थलि चरितार्थत्वात् । अत एव यङ्लुकि णल्थलोर्बभूव बोभूविथेति नित्यत्वाद्वुकि सिद्धम् । न हि तत्र किच्चं प्राप्नोति ङितपा निर्देशात् । तस्मादेतत्सूत्रं न कर्तव्यमिति भाष्ये स्थितम् । अत्र काशिका, श्रन्थिग्रन्थिदम्भिस्वञ्जीनां वक्तव्यमिति । यद्यप्येतदिह सूत्रे भाष्ये नास्ति तथापि मणीवादेर्नेति वचनप्रामाणिकम् । तथा चात एकहल्मध्यइत्येत्वाभ्यासलोपौ प्रति न-लोपस्याभीयत्वेनासिद्धौ सत्यां दम्भेश्चेतिवार्तिकमारब्धम् । आभात्सूत्रस्य प्रत्याख्यानाच्छसोरल्लोप इति तपरकरणेनानित्यत्वाद्वा नेदं वार्तिकमावश्यकमिति तु षष्ठे वक्ष्यते । तथा सदेः परस्य लिटीति सूत्रे स्वञ्जेरुपसंख्यानमिति वार्तिकस्य भाष्यकृता परिषस्वजइत्युदाहरणं दत्तम् । प्रयुज्यते च । तमिन्दुः परिषस्वजइति । एतच्च किच्चं पिदर्थमपिदर्थं चेति सुधाकरः । अपिदर्थमेवेति न्यासकारात्त्रेयादयः । हरदत्तस्तु सन्दिदेह । वस्तुतस्तु न्यासाद्युक्तमेव ज्यायः इह वृत्तौ षाष्ठभाष्ये चापित एवोदात्तत्वात् । श्रन्थ ग्रन्थ सन्दर्भे श्रेथतुः श्रेथुः । ग्रेथतुः ग्रेथुः । देभतुः देभुः । सस्वजे । सस्वजाते । के चित्तु श्रन्थिग्रन्थिदम्भिस्वञ्जीनां वेति पठन्तः कित्वं विकल्पयन्तीति हरदत्तमाधवौ । तन्मते ददम्भतुः शश्रन्थतुरित्याद्यपि । सुधाकरमते तु णल्यपि श्रेथग्रेथदेभेति । स्यादेःतत् । सर्वमतेषु श्रेथतुर्ग्रन्थतुरित्यादि दुर्लभम् । सस्वजइतिवत्संयुक्तहल्मध्यस्थत्वादिति चेत् । सत्यम् । अत एव एत्वाभ्यासलोपावप्यत्र वक्तव्या-

विति हरदत्तः। अत्र मूलं मृग्यम्। तथा सुधाकरमते श्रेथिथ, न्यसादिमते शश्रन्थिथेति वदतो माधवस्याप्युक्तौ मूलं मृग्यम्। कित्त्वे विप्रतिपत्तावपि थलि चसेटीत्यस्याप्राप्तेरविशेषात्। तथा नलोपस्यासिद्धत्वादेत्वाप्राप्तौ वचनमिति माधवोक्तिरपि शिथिलमूला। श्रन्थेतिप्राग्भागे संयोगसत्त्वाद्ग्रन्थेरादेशादित्वाच्चैत्वाप्राप्तेरुद्भटतया नलोपसिद्धत्वासिद्धत्वविचारस्य काकदन्तपरीक्षाप्रायत्वादिति दिक्। कौमाराणां तु सर्वमिदं सूत्रारूढम्। तथा च शर्ववर्मणा सूत्रितम्। अनिदनुबन्धानामगुणेनुषङ्गलोपः। परोक्षायामिन्धिश्रन्थिग्रन्थिदम्भीनामिति। अस्यैकव्यञ्जनमध्येनादेशादेः परोक्षायाम्। थलि च सेटि। तृफलभजत्रप्श्रन्थिग्रन्थिदम्भीनां चेति। अत्र निरनुषङ्गैः साहचर्याच्छश्रन्थिथेत्यादीति दुर्गसिंहः। एवं स्थिते दम्भेश्चेति वार्तिकभाष्ययोः सामान्यापेक्षज्ञापकतामाश्रित्य दम्भिप्रभृतीनामन्यत्रोक्तं पाणिनीयेपीष्टमिति कथञ्चित्समर्थनीयम्॥

मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥ गुधकुषक्लिशिभ्यः क्त्वोरलोव्युपधादिति विकल्पे प्राप्ते इतरेभ्यो नक्त्वासेडिति निषेधे प्राप्ते कित्त्वं विधीयते। मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा क्लिशित्वा। उदित्वा। उषित्वा। वसतिक्षुधोरिट्। यजादित्वात्संप्रसारणम्॥

रुदविदमुषग्रहिस्वपिप्रच्छस्संश्च॥ एभ्यस्संश्च क्त्वा च कितौ स्तः। रुदविदमुषाणां रलोव्युपधादिति विकल्पे प्राप्ते ग्रहेस्तु विध्यर्थमेव। स्वपिप्रच्छयोस्तु सन्नर्थम्। तावतैव चरितार्थत्वादनिटः क्त्वः कित्त्वविधानं नियामकं स्यादिति न शङ्कनीयम्। रुदित्वा। रुरुदिषति। विदित्वा। विविदिषति। मुषित्वा। मुमुषिषति। गृहीत्वा। जिघृक्षति। सुप्त्वा। सुषुप्सति।

पृष्ट्वा । पिपृच्छिषति । कित्त्वाद्ग्रहादीनां सम्प्रसारणं किरश्च-पञ्चभ्य इति प्रच्छेः सन इट् ॥

इको झल् ॥ इकः परो झलादिः सन् कित्स्यात् । चिचीषति । तुष्टूषति । चिकीर्षति । ननु चिस्तुकृञ्भ्यः सनि कृते गुणं बाधित्वाज्झनेति दीर्घोस्तु किं कित्त्वेन । न च पिपविषतीत्यादावपि तथा स्यादिति वाच्यम् । अनुनासिकस्यकीति सूत्राज्झलनुवृत्त्या झलादौ सनि दीर्घविधानात् । न चेह गुणमिव ज्ञीप्सतीत्यत्र णिलोपमप्यविशेषादीर्घो बाधेत । कित्त्वे तु सति चिचीषतीत्यादौ कृतार्थो दीर्घो ज्ञीप्सतीत्यत्र परत्वाण्णिलोपेन बाध्यतइति वाच्यम् । येन नाप्राप्तिन्यायेन दीर्घस्य गुणापवादत्वात् । न च पुरस्तादपवादन्यायेन णिलोप एव बाध्य इति भ्रमितव्यम् । उभयापवादतासंभावनायामेव तदवतारात् । इह तु णिलोपेन सह येन नाप्राप्तिविरहात् । न च बाध्यसामान्यचिन्तायां णिलोपबाधो दुर्वार इति वाच्यम् । स्थाशपां ज्ञीप्स्यमान इति निर्देशालक्ष्यानुरोधाच्चेह बाध्यविशेषचिन्ताया एव युक्तत्वात् । न च कुटादौ गुपूरीषोत्सर्गे धुगतिस्थैर्ययोरिति पाठाज्जुगूषति दुधूषतीत्यत्र कृतार्थो दीर्घः परेण गुणेन बाध्येतेति वाच्यम् । उहनेति वक्तव्ये अज्झनेति प्रत्याहारग्रहणस्य निरवकाशत्वात् । न च गमेरिङादेशस्येति वार्तिकं प्रत्याख्यातुं तन्त्रादिना सम्भवव्यभिचाराभ्यां गमेरचा विशेषयिष्यमाणत्वादज्ग्रहणसार्थक्यं शङ्क्यम् । एवं हि उतो दीर्घ इत्युक्त्वा इङ्हनोरिति सूत्रयेत् । इणिकोरादेशस्यापि ग्रहणमिति पक्षेपीहनोरिति ब्रूयात् । हना साहचर्याच्चेधातुरेव ग्रहीष्यते न त्विवर्णान्तः । यथान्यासपाठेपि हनिसाहचर्याल्लुग्विकरणस्यादेशगमेर्ग्रहणसम्भवाच्च ।

तस्मादीर्घविधिना गुणबाधार्तिक कित्त्वेनेति । उच्यते । उत्तरार्थमवश्यमिकोझलिति कर्तव्यम् । योगविभागः किमर्थ इति परमवशिष्यते । तत्राज्ग्रहणसामर्थ्यस्य ज्ञीप्स्यमान इत्यादेर्ज्ञापकस्य च पर्यालोचनाक्लेशपरिहारार्थं लक्षणैकचक्षुषो बाध्यसामान्यचिन्ताभ्रमं वारयितुं योगविभाग इति निष्कर्षः । वार्त्तिकं तु यथाश्रुताभिप्रायकम् । तद्यथा, इकः कित्त्वं गुणो मा भूदीर्घारम्भात्कृते भवेत् । अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥ सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम् । दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम् ॥ अस्यार्थः । इक उत्तरस्य सनः कित्त्वं विधीयते गुणो मा भूदित्येवमर्थम् । दूषयति । दीर्घारम्भादिति । गुणो न भविष्यतीति शेषः । आरम्भवाद्याह । कृते भवेदिति । अयं भावः । सनिमीमेत्यत्र मीग्रहणेन मिनोतिमपि ग्राहयित्वा दीर्घः कृतार्थ इति चिचीषतीत्यादौ कृतेपि दीर्घे गुणः स्यात् । दूषयति । अनर्थकं त्विति । मीनातिमिनोतीत्यात्वे कृते गामादाग्रहणेष्वविशेषान्मा ग्रहणेनैव मिनोतिमीनात्योरपि सिद्धे मीग्रहणं तत्र मास्तु । तथा च दीर्घविधानं न कृतार्थमिति भावः । ह्रस्वार्थमिति । ह्रस्वेषु दीर्घः प्रवर्त्तताम् , न तु दीर्घेषु । अप्राप्ते शास्त्रमर्थवदिति न्यायात् । ततश्च बुभूषतीत्यादौ गुणः प्रसज्यतएवेत्यर्थः । दूषयति । सामर्थ्यादिति । गुणनिवृत्तिरूपप्रयोजनसद्भावादीर्घाणां दीर्घैर्भाव्यमेव , मोराजीतिवदिति भावः । न चैवं दीर्घेण गुणस्येव ऋदित्त्वस्यापि बाधः स्यात्तथा च चिकीर्षतीति न सिध्येदत आह । ऋदित्त्वमिति । यं विधिं प्रतीति न्यायाद् गुण एव बाध्यो न तु ऋदित्त्वमित्यर्थः । ननु तितीर्षतीत्यादौ तर्हि इत्वं बाध्यतां, तत्राह । दीर्घाणामिति । इत्वोत्वयो-

र्हि गुणवृद्धी परत्वाद्बाधिके । ततश्चाज्झनेति दीर्घेण गुणबाधे सत्येवेत्वं लभ्यं न तु ततः प्राक् । एवं च यस्य तु विधेरित्यंशो ह्रस्वइव दीर्घेष्वविशिष्ट इति भावः । एवं प्राप्ते सिद्धान्तमाह । णिलोपस्त्विति ॥

हलन्ताच्च ॥ कर्मधारयोयम् । अन्तशब्दः समीपे परभूते वर्तमानो विशेषणमपि निपातनान्न पूर्वनिपतितः । इक इति पञ्चम्यन्तमपीह षष्ठ्या विपरिणम्यते तत्सापेक्षोप्यन्तशब्दो नित्यसापेक्षत्वात्समस्यते । इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् । बिभित्सति । इकः किं । यियक्षते । झल् किम् । विवर्धिषते । कथं विप्सतीति, हल्ग्रहणस्य जातिपरत्वात्सिद्धमित्युपपादितं निपातएकाजिति सूत्रे ॥

लिङ्सिचावात्मनेपदेषु ॥ इक्समीपाद्धलः परौ झलादी लिङ् तिङ्परःसिचेत्येतौ कितौ स्तः । भित्सीष्ट । अभित्त । इकः किम् । यक्षीष्ट अयष्ट । सम्प्रसारणं मा भूत् । आत्मनेपदेष्विति किम् । अस्राक्षीत् । अद्राक्षीत् । अकितीत्युक्तेरम् न स्यात् । सिच एवेदं विशेषणं नतु लिङो ऽसम्भवात् । झलनुबृत्त्यैव लिङः परस्मैपदस्य व्यावर्त्तितत्वाच्च । हलः किम् । चेषीष्ट । अचेष्ट । झल् किम् । वर्त्तिषीष्ट । अवर्त्तिष्ट ॥

उश्च ॥ ऋवर्णात्परौ झलादी लिङ्सिचौ कितौ स्तस्तङि । कृषीष्ट । अकृत । झलादौ किम् । वरिषीष्ट । अवरिष्ट । लिङ्सिचोरितीट् । तङि किम् । अकार्षीत् । ऋ इति वर्णग्रहणं व्याप्तिन्यायात् ॥

वा गमः ॥ गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः । सङ्गसीष्ट । सङ्गंसीष्ट । समगत । समगंस्त । कित्त्वपक्षे ऽनुदात्तोपदेशवनतीत्यादिनानुनासिकलोपः ॥

हनः सिच् ॥ हन्तेः परः सिच् कित्स्यात् । आहत । आहसाताम् । आहसत । सिचः कित्त्वादनुनासिकलोपः । यद्यपि सिजन्तस्याङ्गस्यात्मनेपदं ङित्परमस्तीत्यनिदितामित्येव सिद्धं तथापि सिजन्तस्योपधालोपो नेति ज्ञापनार्थमिदन्तेनामंस्तेत्यादि सिद्धम् । न चानिदितामिति पर्युदासः शङ्क्यः । सिच इकारस्योच्चारणार्थत्वात् । अन्यथा नुमापत्तेः । न च धातुग्रहणेन तद्व्युदासः । धातुग्रहणमुपदेशे नुम्प्रवृत्त्यर्थमिति कुण्डा हुण्डेत्यादिसिद्धये भाष्यएव वक्ष्यमाणत्वात् । न च तासेर्व्यावृत्तये तत् । तत्रापीकारस्योच्चारणार्थत्वात् । न चैवं मन्ता हन्तेत्यादावात्मनेपदे उपधालोपापत्तिः । आभीयस्य तासेष्टिलोपस्यासिद्धत्वात् । आभात्मूत्रप्रत्याख्यानपक्षे तु विकरणप्रयुक्तमुपधात्वमाश्रित्य लोपो नेति सामान्यापेक्षं ज्ञापकमस्तु । अङ्गवृत्तपरिभाषया वा मन्ता हन्तेति साध्यताम् । न न्वाहतेत्यत्रातो लोपं व्यावर्तयितुं समानाश्रयत्वप्रयुक्ता ऽसिद्धतापेक्ष्यते , सा च सिचः कित्त्वं विना न निर्वहतीति कथं ज्ञापकतेति चेन्न । आर्धधातुकोपदेशे यदकारान्तमिति व्याख्यानादेव लोपाप्रवृत्तेः । जयादित्यस्तु सिच्नास्योरिदित्करणमनुनासिकलोपप्रतिषेधार्थमित्याह । तन्मते धातुग्रहणस्य तद्व्यावृत्त्या कृतार्थत्वान्नुम्विधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्थमिति वचनमेव शरणीकरणीयमिति दिक् । यद्यपीह लिङ्सिचावित्यनुवृत्त्या सिद्धं तथाप्युत्तरार्थमवश्यकर्तव्यं सिज्ग्रहणं स्पष्टत्वार्थमिहैव कृतम् । अन्यथा हि लिङि वधादेशो नित्यः घानिषीष्टेति चिण्वदिटि स्थानिवत्सूत्रोक्तरीत्या वधादेशाभावेपि अञ्जलादित्वान्न कित्त्वमित्यादि व्युत्पादनीयं स्यात् ॥

यमो गन्धने ॥ सूचनार्थोयमेः सिच् कित्स्यात् । उदाय-

त। उदायसाताम्। उदायसत। धातूनामनेकार्थत्वात्सूचनेत्र यमिर्वर्त्तते। तच्च परदोषाविष्करणम्। आङोयमहन इत्यात्मनेपदं धात्वर्थेनोपसङ्ग्रहादकर्मकत्वात्। सिचः कित्त्वादनुनासिकलोपः। गन्धने किम्। उदायंस्त पादम्। आकृष्टवानित्यर्थः। स्वाङ्गकर्मकत्वात्तङ्। उदायंस्त कूपाद्रज्जुम्। उद्धृतवानित्यर्थः। सकर्मकत्वेपि समुदाङ्भ्यो यमोऽग्रन्थइत्यात्मनेपदम्॥

विभाषोपयमने॥ यमेः सिच् किद्वा स्याद्विवाहे। रामः सीतामुपायत उपायंस्त वा। उदवोढेत्यर्थः। उपाद्यमः स्वकरणइति तङ्। गन्धनाङ्गे तूपयमने पूर्वविप्रतिषेधेन नित्यं कित्त्वमिति नवेतिविभाषेति सूत्रे भाष्ये स्थितम्॥

स्थाघ्वोरिच्च॥ अनयोरिदादेशः स्यात्सिच्च कित्स्यात्॥ उपास्थित। उपास्थिषाताम्। उपास्थिषत। उपान्मन्त्रकरणे अकर्मकाच्चेति तङ्। घोः। अदित अधित। द्युस्थोरितीह वक्तुं युक्तम्। यद्यपि जयादित्येन वागम इत्यारभ्य पञ्चसूत्र्यामात्मनेपदेष्वित्यनुवर्त्तितं तथापि निष्फलत्वादुपेक्ष्यम्। तथाहि। गमेः परस्मैपदे सिज्नास्ति। अङ्ग बाधात्। लिङ् तु न झलादिः। न चात्मनेपदमेवानुवर्त्य झल्ग्रहणं त्याज्यमिति वाच्यम्। उत्तरसूत्रस्याघानिषातामिति चिण्वदिटि अतिव्याप्त्यापत्तेः। हन्तेस्तु परस्मैपदे वधादेशो नित्यो यमेस्तु यमरमेतीदसकोः सतोर्झलादिः सिच् परस्मैपदे नास्ति। उपयमे तु नित्यमात्मनेपदम्। स्थाघ्वोः परस्मैपदे सिचो लुक्। एवं स्थिते हनः सिच्सूत्रे यदुक्तं वृत्तिकृता आत्मनेपदग्रहणमुत्तरार्थमनुवर्त्ततइति। तदप्यापातरमणीयमेव। तस्माद्यथाव्याख्यानमेव साधु। स्यादेतत्। भाव्यमानस्य सवर्णा-

ग्राहकत्वादिति तपरकरणं व्यर्थम् । सत्यम् । इश्चेत्युक्तेपि लाघवे विशेषाभावादिच्चेत्युक्तमिति तत्त्वम् । भाव्यमानोपि क चित्सवर्णान् गृह्णातीति कुशकाशावलम्बनेन तु वार्त्तिकम् । इच्च कस्य तकारेत्वं दीर्घो मा भूदृतेपि सः । अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृत इति ॥ अस्यार्थः । इच्चेति तकारेत्वं कस्य चित् सिद्धये इति प्रश्नः । हेतोरपि सामान्यतः सम्बन्धित्वेनैव विवक्षायां षष्ठी, अन्यथा हेताविति तृतीया स्यात् । अत्र तकारस्येत्वोक्तिरापातत इत्युक्तमेओङ्सूत्रे । यद्वा । तकारमेतीति तकारेत् । तपर इति व्याख्येयम् । तथा च भाष्यम् । कस्य हेतोरिकारस्तपरः क्रियतइति । अमूभ्यामित्यादाविव भाव्यमानोप्यान्तरतम्याद्दीर्घो मा भूदित्युत्तरम् । कृतेपीति । इच्चेत्यंशादृतेपि स्याद्घोरिति किच्चे सति घुमास्थेतीत्वेन सिद्धे विधानसामर्थ्यादनन्तरतमोपि ह्रस्वः सिद्धस्तर्हि तपरेणेति पुनः प्रश्नः । अनन्तरे इति । असदृशे आदेशे क्रियमाणे ह्रस्व इव प्लुतोपि स्यात्स मा भूदित्यर्थः । प्लुतश्चेति । विषयविशेषे वाक्यस्य टेरित्यधिकृत्य हि प्लुतो वक्ष्यते । अत एव कुरूनगमन्नित्यादौ स्मृतो, न त्वास्थितेत्यादौ । आटित्वात् । तथा चेष्टापत्तिर्न कार्येति तपरत्वं समर्थितम् । प्राञ्चस्तु अनन्तरे ऽविद्यमानेपि विशेषे, घुमास्थेतीत्वेन सिद्धेपीति यावत् । प्लुतो मा भूदित्येतदर्थं दीर्घः स्यान्मोराजीतिवत् । अस्त्वेवमिति चेन्न । प्रश्नाख्यानादिरूपे विषये प्लुतस्येष्यमाणत्वात् । तदेवं स्थलान्तरे भिन्नकालनिवृत्त्यर्थमपि तपरत्वमिह दीर्घनिवृत्तिद्वारा प्लुतसिद्ध्यर्थं पर्यवस्यतीति व्याचख्युः । अपरे तु यद्यनेन प्लुतो विधीयते तर्हि यत्राष्टमिकस्य विषयस्तत्राप्यनेनैव स्यात् तस्यासिद्धत्वात् । ततश्च पक्षे ऽनुवाददोषः स्यात् । अतो ह्रस्व एव

भविष्यतीति तपरकरणप्रत्याख्यानपरश्चतुर्थचरण इति व्याचख्युः । एतच्च मतद्वयमप्ययुक्तम् । अनन्त्यस्यापीत्यादीनां टिसंज्ञा विरहादिहाप्रवृत्तेः । कैयटोपि मतद्वयखण्डनपरतयैव नेयः । न्यासहरदत्तादयस्तु आष्टमिकग्रन्थैर्वृत्त्यादिभिश्च विरोधादुपेक्ष्यः भाष्यं त्वस्मदुक्तव्याख्यानुगुणमेव । यदा विषयस्तदैव प्लुतेन भवितव्यमिति योजनया नेह प्लुतस्य विषयोस्तीति ध्वनितत्वादिति दिक् ॥

न क्त्वा सेट् ॥ सेट् क्त्वा किन्न स्यात् । देवित्वा । सेट् किम् । कृत्वा । क्त्वाकिम् । निगृहीतिः । अत्र वार्त्तिकं, नसेडिति कृते ऽकित्त्वे निष्ठायामवधारणात् । ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ॥ इत्त्वं कित्संनियोगेन रेण तुल्यं सुधीवनि । वस्वर्थं किदतीदेशाद् गृहीतिः क्त्वा च विग्रहात् ॥ अस्यार्थः । पूर्वार्द्धमेको ग्रन्थः । तत्रोत्तरार्धान्नेत्यपकृष्यते । क्त्वाग्रहणं त्यक्त्वा, नसेडित्येतावतापि योगेनाकित्त्वे कृते गुधित इत्यादौ निष्ठायां नाकित्त्वम् । कुतः । अवधारणात् । निष्ठाशीर्ङित्स्वनेन । शीङादिभ्य एव निष्ठा न किदिति नियमादित्यर्थः । विपरीतनियमस्तु लक्ष्यानुरोधान्न व्याख्यास्यते । न चैवं लिटि प्रतिषेधाज्जग्मिवेत्यादावुपधालोपो न स्यादत आह । ज्ञापकादिति । किं त, त्तत्राह सनीति । शिशयिषतइत्यत्र कित्त्वं वारयितुं क्रियमाणमिकोझलिति झल्ग्रहणं ज्ञापयति आतिदेशिकस्य कित्त्वस्य नायं निषेध इति । ननूत्तरार्थं झल्ग्रहणं स्या, न्नेत्याह । इत्त्वमिति । उपास्थायिषातां हरिहरौ भक्तेनेत्यत्र अस्था स आत्तामिति स्थिते इत्वम्प्राप्तञ्चिण्वद्भावश्च । परत्वाच्चिण्वद्भावे कृते युक् च प्राप्तइद्विधिश्च । अपवादत्वाद्युकि कृते यकारस्येत्त्वप्रसङ्गः । तं वारयितुं झल्ग्रहणमिति ज्ञापकभङ्गवादिनो म-

मतम्। तन्न। न सेडिति सिचोपि किन्त्वे निषिद्धे तत्संनियोगशिष्टतया इन्त्वस्याप्रवृत्तेः। अत्र दृष्टान्तमाह। रेणेति। शोभना धीर्वानोस्यां सुधीवेत्यत्रानोबहुव्रीहेरिति ङीपो निषेधे वनोरचेति रेफोपि न भवति, तथेत्यर्थः। भाष्ये त्वभ्युपेत्यापि समाहितमिन्त्वे कृतेपि वृद्धिर्भविष्यतीति। युका हि आकारस्य वृद्धिर्बाध्यते न त्विकारस्यापीति भावः। जग्मिवानित्यत्र कसोः किन्त्वनिषेधं वारयितुं त्काग्रह इति शङ्कते। वस्त्वर्थमिति। दूषयति। किदतिदेशादिति। औपदेशिकस्य निषेधेप्यातिदेशिकेन सिद्धं, तदनिषेधस्य ज्ञापितत्वादिति भावः। स्यादेतत्। संयोगान्तेष्वातिदेशिककित्त्वाभावादौपदेशिकमेव शरणम्। अञ्जेराजिवानिति यथा। अत्राहुः। आनुपूर्व्यातिसिद्धम्। नलोपे कृते द्विर्वचने एकादेशे च वस्वेकाजितीट्। कृताद्विर्वचनानामेकाचामिति सिद्धान्तात्। न चेदानीं किन्त्वप्रतिषेधः। उपजीव्यविरोधात्। किन्त्वे हि प्रतिषिद्धे नलोपनिवृत्तौ द्विर्हल्त्वान्नुटि एकाच्त्वाभावादिडेव नावतिष्ठेत। किञ्च कसोश्छान्दसत्वात्सार्वधातुकत्वे सार्वधातुकमपिदिति ङित्त्वातिसिद्धम्। एवं स्थिते सिद्धान्तमाह। गृहीतिरिति। किन्निवृत्त्यर्थं क्त्वाग्रहणमित्यर्थः। तितुत्रेष्वग्रहादीनामितीट्। कित्त्वात्संप्रसारणम्। एवं कुंचकौटिल्याल्पीभावयोः। निकुचितिः। कित्त्वान्नलोपः। उपस्निहितिः। कित्त्वान्न गुणः। इदानीं क्त्वाग्रहणं प्रत्याचष्टे। क्त्वाचेति। विग्रहादिति। योगविभागादित्यर्थः। अयं भावः। न सेण्निष्ठाशीङित्यादित्रिसूत्रीं पठित्वा पूङः क्त्वाचेत्यत्र योगो विभज्यते। पूङः परा सेण्निष्ठा किञ्च स्यात्। ततः त्का च, सेट् किन्नेत्यनुवर्तते पूङ इति निवृत्तम्। एवं चैकं क्त्वाग्रहणं प्रत्याख्यातम्। योगविभागस्तु पू-

र्वमेकसूत्रेण सह निपातव्यः ॥

निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः ॥ एभ्यः परा सेण्निष्ठा किन्न स्यात् । शयितः शयितवान् । अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः । शेश्यितः । शेश्यितवान् । एरनेकाच इति यण् । ष्विदा स्नेहनमोचनयोः । भ्वादिः । प्रस्वेदितः प्रस्वेदितवान् । यस्तु ष्विदा गात्रप्रक्षरणइति दिवादिरञित् स नेह गृह्यते । ञिद्भिः साहचर्यात् । ञिमिदा स्नेहने । प्रमेदितः । प्रमेदितवान् । ञिक्ष्विदा स्नेहनमोचनयोरिति दिवादिर्गृह्यते न तु ञिक्ष्विदा अव्यक्ते शब्दइति भ्वादिरपि, मिदिना साहचर्यादिति हरदत्तस्तच्चिन्त्यम् । भ्वादिष्वपि मिदेः पठ्यमानत्वात् । तस्मादविशेषादुभयोर्ग्रहणं न्याय्यम् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रधर्षितः । प्रधर्षितवान् । सेट् किम् । स्विन्नः स्विन्नवान् । आदितश्चेतीण्निषेधः । विभाषाभावादिकर्मणोरिति पक्षेभ्यनुज्ञायते । स किित्त्वप्रतिषेधस्य विषयः ॥

मृषस्तितिक्षायाम् ॥ सेण्निष्ठा किन्न स्यात् । मर्षितः मर्षितवान् । क्षमायां किम् । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः । तितिक्षाग्रहणं ज्ञापकं भीमसेनादिकृतोर्थनिर्देश उदाहरणमात्रं न तु परिसंख्येति ॥

उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ॥ उकारोपधाद्धातोः परा भावादिकर्मणोर्विहिता सेण् निष्ठा वा किन्न स्यात् । द्युतितम् । द्योतितम् । मुदितं, मोदितं साधुना । प्रद्युतितः । प्रद्योतितः । प्रमुदितः, प्रमोदितस्साधुः । उदुपधात्किम् । किटितम् । खिटितम् । भावेत्यादि किम् । रुचितङ्कार्षापणम् । सेट् किम् । कुष्टम् । उदुपधाच्छप इति भाष्यं, शब्विकरणेभ्य एवेष्यतइत्यर्थः । नेह गुधपरिवेष्टने दिवादिः । गुथितम् ॥

पूङः क्त्वा च ॥ पूङः परे सेट्क्त्वानिष्ठे कितौ न स्तः । नित्योयं योगः । विभाषयोर्मध्ये पाठात् । पवितः । पवितवान् । पवित्वा । क्लिशः क्त्वानिष्ठयोः, पूङश्चेतीट् । नक्त्वासेडिति सिद्धे क्त्वाग्रहणं प्रागुक्तरीत्या योगविभागेन तत्प्रत्याख्यानार्थम् । सूत्ररीत्या तूत्तरार्थम् । तथा च भारद्वाजीयाः पठन्ति, नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थमिति । कात्यायनस्तु, इह सेडिति निवर्त्य विकल्पं चानुवर्त्य अनिट एव किन्त्वं विकल्प्य किन्त्वाभावे पवितः पवित्वेत्यादिसिद्धौ किन्त्वपक्षे श्न्युकः कितीतीण्निषेधात् पूतः पूतवानित्यादिसिद्धौ सत्यां पूङश्चेति सूत्रं प्रत्याचख्यौ उत्तरसूत्रे वाग्रहणं च । किं त्वस्मिन्पक्षे उत्तरत्र सेड्ग्रहणं मण्डूकप्लुत्यानुवर्तनीयमिति क्लेशः । पूर्वकृतं क्त्वाप्रत्याख्यानं त्विदानीं न सङ्गच्छते मृडमृदेति ज्ञापकाद्वा नक्त्वासेडित्यर्थः साधनीयः । न च स्वपिप्रच्छिग्रहणादनिट्कस्याप्यकित्त्वं स्यादिति वाच्यम् । तस्य सनर्थत्वात् । अन्यथा क्त्वः किन्त्वस्य वैयर्थ्यापत्तेश्चेति दिक् । इदं त्ववधेयम् । पूङः क्त्वाचेत्यत्र सानुबन्धनिर्देशः स्पष्टार्थो न तु पूञो निवृत्त्यर्थः । तत्रेटो दुर्लभत्वात् । इड्विधौ पूङ एव निर्दिष्टत्वात् । नापि यङ्लुङ्निवृत्त्यर्थः । इड्विधावनुबन्धनिर्देशेन यङ्लुकि पूङोपीडभावात् । यत्तु यङ्लुक्यार्धधातुकस्येडितीडस्त्येव । न च श्न्युकः कितीतीण्निषेधः । तत्रैकाच इत्यनुवर्तनात् । उक्तं हि यङ्विधौ वार्त्तिककृता, एकाचश्चेदुपग्रहादिति । एवं यङ्लुङ्निवृत्त्यर्थमनुबन्धोच्चारणमिति मतम् । अस्मिन् पक्षे पोपुवितः पोपुवितवानिति निष्ठायां भवति क्त्वायां तु गुणे पोपवित्वेत्येव । नक्त्वासेडिति किन्त्वप्रतिषेधः । न च क्त्वाग्रहणसामर्थ्यात्तस्यापि यङ्लुकि प्रतिषेधः । तस्योत्तरा-

र्थत्वात् । अनुबन्धनिर्देशस्य च निष्ठायां चरितार्थत्वादत एव क्त्वा च विग्रहादिति वार्तिकं सङ्गच्छते । इह किञ्चित्त्रपोइतीति न्यायेन प्रकृतेष्युपयोगे हि तद्विरुध्येत। अत एव क्त्वाग्रहणमुत्तरार्थमिति भारद्वाजीयोक्तिरपि सङ्गच्छतइति दिक् ॥

नोपधात्थफान्ताद्वा ॥ निष्ठेति निवृत्तं चानुकृष्टत्वात् । नकारोपधात् थान्तात् फान्ताच्च परः सेट् क्त्वा किन्न स्याद्वा । ग्रथित्वा । ग्रन्थित्वा । गुफित्वा । गुम्फित्वा । नोपधात् किम् । रिफ कत्थनादौ, रेफित्वा । इह रलोव्युपधादिति विकल्पोपि न प्रवर्तते । नोपधग्रहणसामर्थ्यात् । ननु तृफतृम्फ हिंसायाम् । अत्राद्य ऋकारोपधत्वात् नोपधग्रहणस्य व्यावर्त्योस्तीति चेत्, मैवम् । अर्पित्वा तृफित्वा तृम्फित्वेति त्रैशब्द्यस्य नोपधग्रहणसत्वासत्वयोरविशिष्टत्वात् । सति हि तस्मिन् नक्त्वासेडिति प्रवृत्ते ऋदुपधस्यार्फित्वेति भवति । नोपधस्य त्वस्मिन विकल्पे तृफित्वा तृम्फित्वेति । असत्यपि नोपधग्रहणे सर्वत्र प्रकृतविकल्पप्रवृत्तौ सत्यां तदेव रूपत्रयम् ।

वञ्चिलुञ्च्यृतश्च ॥ एभ्यः सेट् क्त्वा न कित् स्याद्वा । वञ्चु गतौ भ्वादिः । वञ्चु प्रलम्भने चुरादिः सोपि गृह्यते चुरादीनामनित्यण्यन्तत्वात् । वञ्चित्वा । वञ्चित्वा । उदितोवेति वेट् । इडभावे तु कित्त्वमस्त्येव वक्त्वा । लुञ्च अपनयने । लुञ्चित्वा लुञ्चित्वा । ऋतेरीयङार्धधातुके विकल्पितः । तदभावे ऋतित्वा अर्तित्वा । सूत्रे उच्चारणार्थ इकारो वञ्चिलुञ्चीति न त्विक् । नलोपप्रसङ्गात् । ऋदिति धातुरेव गृह्यते । न तु ऋदन्ताः । पूर्वसूत्रेन्तग्रहणेनेह प्रकरणे यत्नं विना तदन्तविधिर्नेति ज्ञापितत्वात् ॥

तृषिमृषिकृषेः काश्यपस्य ॥ एभ्यः सेट् क्त्वा किद्वा स्या-

त् । काश्यपग्रहणं पूजार्थं , वेतिप्रक्रमात् । नक्त्वासेडिति निषेधे प्राप्ते विकल्पोयम् । तृष पिपासायाम् । तृषित्वा । तर्षित्वा । मृष तितिक्षायाम्, मृषित्वा । मर्षित्वा । कृश तनूकरणे । कृशित्वा । कार्शित्वा । न्यासग्रन्थे तु कृष विलेखनइति क्वाचित्कः प्रमादपाठः । अनिदित्वात् ॥

रलो व्युपधाद्धलादेः संश्च ॥ उश्च इश्च वी ते उपधे यस्य तस्माद्धलादेरलंतात् परौ क्त्वासनौ सेटौ वा कितौ स्तः । द्युतित्वा द्योतित्वा दिद्युतिषते दिद्योतिषते । द्युतिस्वाप्योरिति संप्रसारणम् । रलः किं, देवित्वा दिदेविषति । व्युपधात् किं, वार्तित्वा विवर्त्तिषते । हलादेः किम् । एषित्वा । एषिषिषति । इह नित्यमपि द्वित्वं गुणेन बाध्यते ओर्णेर्ऋदित्करणेन सामान्यत उपधाकार्यस्य द्वित्वात्प्राबल्यज्ञापनात् । सेट् किम् । भुक्त्वा बुभुक्षते । आदिग्रहणं स्पष्टार्थम् । व्युपधस्य हलन्तत्वाव्यभिचारात् ॥

ऊकालोज्झ्रस्वदीर्घप्लुतः ॥ ह्रस्वदीर्घप्लुत इति समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् । ऊ इति त्रयाणां प्रश्लेषेण निर्देशः । तत्र न तावदन्ते मात्रिकः । विभाषा पृष्टप्रतिवचनेहेरिति हेः प्लुतविधानात् । नापि मध्ये । सुपिचेति दीर्घविधानात् । द्विमात्रिकस्तु नान्ते । ओमभ्यादानइति प्लुतविधानात् । परिशेषादेकमात्रद्विमात्रत्रिमात्राणां क्रमः सिद्धः । यत्तु, घित्त्वात्पूर्वम्भवेद् ह्रस्वः प्लुतोन्ते सन्धितो मत इति मैत्रेयः । तद्भाष्यादर्शनप्रयुक्तम् । यतः व्यत्यासे एकमात्रस्य ह्रस्वत्वं त्रिमात्रस्य प्लुतत्वमित्येव दुर्लभमिति भगवतैव दूषितम् । ईचाक्रवर्मणस्येत्यत्रेवेहापि सूत्रे के चिदू ई इति प्लुतद्योतिकां लिपिं लिखन्ति । तत्प्रामादिकं, दीर्घस्यैवौचित्यात् । तदयमर्थः । उश्च ऊश्च उ ३ श्च

वः, वः कालः परिच्छेदको यस्य सोऽक्रमाद्ह्रस्वादिसंज्ञः स्यात् । संज्ञाप्रदेशः ह्रस्वस्य गुणः । हे हरे दीर्घो कितः । पापच्यते । वाक्यस्यटेः प्लुतः । एहि कृष्ण ३ । स्यादेतत् । उकालोऽच् ह्रस्व इति वाक्यार्थे ह्रस्वेनोकारेणाण्त्वात्सवर्णग्रहः स्यात् । मैवम् । एवं सति ह्रस्वसंज्ञां न विदध्यात् । अच्संज्ञयैव सिद्धेः । तस्मात्संज्ञारम्भसामर्थ्यान्नेह सवर्णग्रहः । महासंज्ञाया अन्वर्थत्वाच्च कालशब्दसामर्थ्याच्च । उरजित्युक्तेपि यथाश्रुते ऽज्ग्रहणं व्यर्थम् । उकारस्याच्त्वाव्यभिचारात् । तेन सामर्थ्यादुसदृश इत्यर्थः । सादृश्यं च न स्थानतः । असम्भवात् । न यत्नतः । अव्यभिचारात् । परिशेषात्कालत एवेति सिद्धे कालग्रहणं गृह्यमाणेनैव परिच्छेदलाभार्थम् । ह्रस्वनद्याप इत्यादिलिङ्गाच्च । यदि हि लुमत्संज्ञानां लोपसंज्ञेव दीर्घप्लुतसंज्ञयोर्ह्रस्वसंज्ञा व्यापिका तर्हि किं नद्याब्ग्रहणेन । न च नियमार्थः सः । विध्यर्थत्वे लाघवादिति दिक् । यद्वा । अशब्दसंज्ञेत्यनुवर्त्य सप्तम्या विपरिणम्य शब्दसंज्ञायां सवर्णग्रहणं नेति व्याख्येयम् । न चैवमुदात्तादिसंज्ञाविधानेऽच्शब्दो न सवर्णं गृह्णीयादिति वाच्यम् । वाक्यस्यटेः प्लुत उदात्त इति लिङ्गेनाशब्दसंज्ञायामित्यस्यानित्यत्वात् ॥

अचश्च ॥ यत्र ह्रस्वो दीर्घः प्लुत इति शब्दैरज्विधीयते तत्राच इति पदं पूरणीयम् । इकोगुणवृद्धीत्यनेन तुल्यमेतत् । न त्वलोन्त्यस्य शेषोपवादो वा । तेन शमामष्टानां दीर्घ इत्यत्र शमादिभिरचो विशेषणात् शाम्यतीत्यादि सिद्धम् । ह्रस्वोनपुंसकइत्यत्र त्वजन्तस्य प्रातिपदिकस्येति व्याख्यानात् । अलोन्त्यस्य ह्रस्वः । अतिरि, अतिनु । नेह सुवाक् ब्राह्मणकुलम् । वाक्यस्य टेः प्लुतउदात्तः अत्र टेरच इति व्याख्यानात् । अग्नेचित् । सोमसुत् । अजित्यनुवृत्तिसामर्थ्यात्स्वसंज्ञया विधाने

इति लभ्यते । नेह, द्यौः पन्थाः सः ॥

उच्चैरुदात्तः ॥ तालवादिषु भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते तत्र ऊर्ध्वभागे निष्पन्नो ऽनुदात्तसंज्ञः स्यात् । प्रदेशा आद्युदात्तश्चेत्येवमादयः ॥

नीचैरनुदात्तः ॥ स्पष्टम् । प्रदेशा अनुदात्तौ सुप्पितावित्यादयः ॥

समाहारः स्वरितः ॥ समाहृतिः समाहारः । उदात्तत्वानुदात्तत्वयोरज्धर्मयोर्मेलनम् । तद्वान् स्वरितसंज्ञः स्यात् । सूत्रे अर्शआद्यच् ॥

तस्यादित उदात्तमर्धह्रस्वम् ॥ अर्द्धह्रस्वशब्देनार्द्धमात्रा लक्ष्यते । प्रकृतत्वादेव सिद्धे तस्येति वचनेन दीर्घस्यापि स्वरितस्य ग्रहणात् । यद्वा । ह्रस्वग्रहणमविवक्षितम् । तेन स्वरितस्यादौ अर्द्धमात्रा अर्द्धं वा उदात्तं बोध्यम् । शिष्टं तु अनुदात्तं परिशेषात् । क्व चित्तु तस्य वाचनिकी एकश्रुतिः । तथा च बह्वृचप्रातिशाख्यम् । एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः । तस्योदात्ततरोदात्तादर्धमात्रार्द्धमेव वा ॥ अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत् । उदात्तं वोच्यते किञ्चित् स्वरितं वाक्षरं परमिति ॥ पूर्वयोः, उदात्तानुदात्तयोः । तस्य, स्वरितस्य । अर्द्धमात्रा उदात्तादुदात्ततरा स्वतन्त्रोदात्तादुच्चतरेत्यर्थः । अर्द्धमेव वेति द्वितीयव्याख्याभिप्रायम् । दीर्घप्लुतयोरनुरोधेनेदम् । सः शेषः, उदात्तश्रुतिः स्यात् । किमविशेषेण । नेत्याह । नचेदिति । उदात्तस्वरितपरं विहायेत्यर्थः । अत्रायं निष्कर्षः । स्वरितो द्विधा । प्राकृतोप्राकृतश्च । तत्राद्य उदात्तादनुदात्तस्येति विहितः । तच्छेषस्यैकश्रुतिर्नीयता । अग्निमीळे प्रत्यग्ने इत्यादि । गार्ग्यादिमते तु अत्राप्यनुदात्तः शेषः ।

द्वितीयस्तु सूत्रान्तरैर्विहितः। तस्याप्युत्सर्गत एकश्रुतिः शेषः। व्यचक्षयत्स्वः, तेवर्धन्तइति यथा। उदात्तस्वरितपरत्वे तु शेषोनुदात्तः। क्व बोश्वाः३न्यद्यन्यस्य। उदात्तपूर्वस्याप्राकृतस्य पूर्वरूपनिष्पन्नस्य दीर्घस्याप्येवम्। न ये राः। उदात्तपूर्वस्य किम्। पुनस्तेमैषाम्। अत्र विशेषमनुपदं वक्ष्यामः। पूर्वरूपनिष्पन्नस्य किम्। अस्मिन्त्स्वे एतत्। अप्राकृतदीर्घान्तरे तु, मध्ये तु कम्पयेत्कम्पमित्यादिवचनात् पूर्वोत्तरभागौ नीचौ मध्ये तूदात्तः। रथी२वेति। पुनस्ते२मास्वेए२तत्। सर्वत्र च समाहारः स्वरित इति पाणिनीयं लक्षणं निर्बाधम्। तस्यादित इति विषयविवेकस्तु प्रायोवादो विशेषे शिक्षादिभिर्बाध्यतइति दिक्। एवं स्थिते अर्धह्रस्वमित्यर्द्धमात्रोपलक्ष्यते। ह्रस्वग्रहणमतन्त्रमिति वृत्तिग्रन्थः पूर्वापरितोषेणोत्तरवाक्यमवतार्य व्याख्येयः। अर्द्धमात्रादित उदात्ता अर्द्धमात्रा तु अनुदात्ता एकश्रुतिर्वेति वृत्तिग्रन्थोपि विषयभेदेन व्यवस्थया बोध्यः। उभयत्रापि हरदत्तग्रन्थो मूलापर्यालोचननिबन्धन इति सुधीभिराकलनीयम्। इत आरभ्य नवसूत्री इत उत्कृष्योदात्तादनुदात्तस्य स्वरित इत्यस्मादुतरत्र पाठ्येति प्राञ्चः। तत्राव्यवधानपर्यन्तं नार्थः किं तूत्तरत्वमात्रम्। नोदात्तस्वरितोदयमित्यत्र निषेध्यलाभानुरोधेन तदुत्तरत्र अअइत्यतः प्रागियं नवसूत्रीति फलितोर्थः। तेनाष्टमिकस्यापि स्वरितस्येदं विभागकथनम्, न्य२ग्निं, ये२राः। उत्तरत्राप्युत्कर्षस्य प्रयोजनं तत्तत्सूत्रे वक्ष्यामः। उत्कर्षे लिङ्गं तु देवब्रह्मणोरिति सूत्रम्। नह्युत्कर्षं विना देवब्रह्मणोः स्वरितो लभ्यते त्रिपादीस्थत्वेनासिद्धत्वात्। ततः स्वरितात्परमिदङ्काण्डमिति स्थितम्॥

एकश्रुतिदूरात्संबुद्धौ। सम्बुद्धिः सम्बोधना अन्तर्भावितण्यर्थाद् बुधेः क्तिन्। दूरत्वं च प्राकृतप्रयत्नाधिकयत्नसापेक्षोच्चार-

णवत्त्वम्। दूरादनुष्ठेयतया बोधनायां करणीभूतं वाक्यमेकश्रुतिः स्यात्। आगच्छ भो माणवक देवदत्ता ३। स्वराणामविभागेनावस्थानमेकश्रुतिः। अन्त्यस्य तु वाक्यस्यटेरिति प्लुतेनापवादत्वादेकश्रुतिर्बाध्यते। एकश्रुतिप्लुताभ्यामवयवभेदेन वाक्ये समुच्चिताभ्यां दूरात्सम्बोधना द्योत्यते। दूरात्किम्। त्रैस्वर्यमेव। तत्राङुदात्त उपसर्गाश्चाभिवर्जमिति फिट्सूत्रात्। गच्छेति तिङ्निघातः। भोशब्दो निपातत्वादाद्युदात्तः शेषयोरामन्त्रितनिघातः। एकवचनंसम्बुद्धिरिति कृत्रिमा सम्बुद्धिर्नेह गृह्यते। दूरादित्यपादानकारकान्वयाय क्रियाया एवाकांक्षितत्वात्। तेन आगच्छत ब्राह्मणा इत्यादावपि भवति॥

यज्ञकर्मण्यजपन्यूङ्खसामसु॥ यज्ञक्रियायां मन्त्रएकश्रुतिः स्यात् जपादीन्वर्जयित्वा। अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्या अयम्। अपांरेतांसि जिन्वतोम्। यज्ञकर्मणीत्युक्तेः स्वाध्यायकाले त्रैस्वर्यमेव। अजपेत्यादि किम्। ममाग्नेवर्चोविहवेष्वस्तु। जपो नाम उपांशुप्रयोगो यथा जले निमग्नस्येत्याहुः। युक्तं चैतत, जपमानसे चेति धातोर्व्यधजपोरनुपसर्गे इत्यपि जपशब्दनिष्पत्तेः। रूढश्चायमकरणमन्त्रेषु यत्रजपतीति कल्पसूत्रकृतां व्यवहारः। अत एव याजुषत्वादुपांशुप्रयुज्यमानानामपि इषेत्वेत्यादीनां जपत्वाभावादेकश्रुतिर्भवत्येव। शाखाछेदनादिकं प्रति तेषां करणत्वात्। अकरणीभूतो मन्त्र इत्यन्ये। न्यूङ्खानाम षोडश ओकाराः तेषु प्रथमसप्तमत्रयोदशास्त्रय उदात्ताः त्रिमात्राश्च। इतरे त्रयोदशानुदात्ता अर्धोकाराः। एतच्चाश्वलायनेन चतुर्थेहनीति खण्डे स्फुटीकृतम्। वृत्तौ तु षडोङ्कारा इति प्रायिकः पाठः तत्र षट्त्वे मान्तत्वे च मूलान्तरं मृग्यम्। गीतिषु सामाख्येति जैमिनिः। एविश्वं समित्रिणं दह। विश्वमित्रिणं पाप्मानं सन्दहेति सम्बन्धः।

एशब्दो गीतिपूरणः। निपात इत्यन्ये।

उच्चैस्तरां वा वषट्कारः। यज्ञकर्मणि वषट्कार उच्चैस्तरां वा स्यादेकश्रुतिर्वा। वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते। तुल्यार्थत्वात्। द्वावपि हि देवतासम्प्रदानस्य दानस्य द्योतकौ। वौषडित्येव तु नोक्तम्। प्रतिपत्तिलाघवेपि मात्रागौरवात्। कारग्रहणं ज्ञापकं समुदायादपि कारप्रत्ययो भवतीति तेन एवकार इत्यादि सिद्धम्। उच्चैःशब्दोधिकरणप्रधानोपि तद्विशिष्टभवनक्रियायां वर्त्तते। तेन क्रियाप्रकर्षादामुप्रत्ययः। उदात्ततरो भवतीति फलितोर्थः। ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेरिति सूत्रेण वौषट्शब्दस्यादेः प्लुत उदात्तो विहितस्तदपेक्षया अयमुदात्ततरोन्त्यस्य विधीयते। द्वयोरप्ययमुदात्ततर इत्येके। तदा याज्यान्तापेक्षः प्रकर्षः। अन्ये तु स्वार्थिकस्तरबित्याहुः। तत्रोदात्तमात्रं प्रथमस्य सिद्धं द्वितीयस्यानेन विधीयते। अत्र प्रकर्षाविवक्षापक्ष एव प्रबलः। वषट्कारोन्त्यः। सर्वत्रोच्चैस्तराम्बलीयान् याज्याया इति सूत्रितत्वात्। सोमस्याग्ने विही वौषट्॥

विभाषा छन्दसि॥ छन्दसि एकश्रुतिर्वा स्यात्। पक्षे त्रैस्वर्यम्। सम्प्रदायाव्यवस्थितो विकल्पस्तेन बव्हृचानां स्वाध्यायकाले संहितायान्त्रैस्वर्यमेव। ब्राह्मणे त्वेकश्रुतिः। शाखान्तरेष्वपि यथासम्प्रदायं व्यवस्था। अत्र तन्त्रावृत्त्यादिना अछन्दसीति नञ्प्रश्लेषाद्भाषायामपि ऐच्छिको विकल्पो बोध्यः। तथा च दाण्डिनायनादिसूत्रे भाष्यम्। एकश्रुतिर्हि स्वरसर्वनामेत्यादि। अत एवाभियुक्तानां च विरुद्धस्वरकतत्पुरुषबहुव्रीह्याद्याश्रयणेन श्लिष्टकाव्यादिनिर्माणं सङ्गच्छते। अलं बुसानांयातेति, श्वेतो धावती तिच द्व्यर्थ वाक्य मिति पस्पशान्ते।

भाष्यमपि । काव्यप्रकाशेपि वेदइव लोके स्वरो न विशेषाध्यवसायहेतुरिति । किमर्थं तर्हि झल्युपोत्तमं विभाषाभाषायामिति सूत्रमिति चेत्, त्रैस्वर्येण प्रक्रमे पाक्षिकानुदात्तलाभायेति गृहाण । वेति प्रकृते विभाषाग्रहणं कुर्वन्सूत्रकारोपि तन्त्रादिकमभिप्रैति । यत्तु वृत्तिकृन्मतं विभाषाग्रहणं यज्ञकर्मणीत्यस्य निवृत्त्यर्थमिति,तच्चिन्त्यम् । छन्दसीत्युक्तेपि तन्निवृत्तिसिद्धेः । अन्यथा पूर्वसूत्रस्य निर्विषयत्वापत्तेः । न च जपादिषु सावकाशस्य परस्य पूर्वोपवाद इति वाच्यम् । एवं हि सति परत्रैव जपादिग्रहणं कुर्यात् किं नत्रा किञ्च छन्दोग्रहणेन । एतेन ऊहितानामच्छन्दस्त्वात्तत्र सावकाशस्य मन्त्रेषु परेण बाधः स्यादिति हरदत्तोक्तं प्रत्युक्तम् । सिद्धान्तेपि अनूहितेषु परत्वादस्य प्राप्तिमाशङ्क्य यज्ञकर्मणीति कर्मग्रहणसामर्थ्यात्पूर्वस्यैव प्रवृत्तिरिति स्वोक्तिविरोधात् । यदपि हरदत्तेनोक्तम्, जपादिपर्युदासेन मन्त्राणामेव ग्रहणमिति पक्षे विभाषाग्रहणं व्यर्थं स्यादिति । तदपि इन्द्रशत्रुप्रस्तावे दूषितमस्माभिः । यदपीह वृत्तिकृता अग्निमीळइत्याद्यप्येकश्रुतावुदात्तं तत्सकलाध्यापकसम्प्रदायविरुद्धं, छन्दोग्रहणवैयर्थ्यापादकञ्च । छन्दसि व्यवस्थितो ऽन्यत्रैच्छिक इति विकल्पयोर्वैषम्यं सूचयितुं हि तत् । न च लोके विकल्पस्य वृत्तिकृतानुक्तत्वादसाम्प्रदायिकत्वं वाच्यम् । भाष्यादिसम्मतेरुक्तत्वात् श्वेतइत्यादेर्वृत्तिकृतापि तत्रतत्रोदात्तत्वाच्च । इत इत्यस्य ह्यूडिदमित्यन्तोदात्तता श्वेत इति तु एकोदात्तमिति कथं स्वरानुसरणे तन्त्रं स्यादिति दिक् ॥

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ सुब्रह्मण्याख्ये निगदे यज्ञकर्मणीति विभाषाछन्दसीति च प्राप्ता एकश्रुतिर्न स्या-

त्स्वरितस्योदात्तश्च स्यात् । नितराङ्गच्यतइति निगदः । परप्रत्यायनार्थमुच्चैः पठ्यमानः पादबन्धरहितो यजुर्मन्त्रविशेषः । अपादबन्धे हि गदिर्वर्त्तते यथा गद्यमिति, नौगदनदेति कर्मण्यण् । सुब्रह्मण्याशब्दो परित्यक्तस्वलिङ्ग एव तद्वति निगदे निरूढः । सुब्रह्मण्योम् इन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्यमेने गौरावस्कन्दिन्नहल्यायै जार कौशिक ब्राह्मण गौतमब्रुवाण शवः सुत्यामागच्छ मघवन्त्सुब्रह्मणि साधुरिति यत् । तित्स्वात् स्वरितः तस्य टापा सहैकादेशः स्वरितानुदात्तयोरान्तर्यात्स्वरितः । ततो निपातेन ओंशब्देन ओमाङोश्चेत्युदात्तस्वरितयोरेकादेशः स्वरित एव । एकादेशउदात्तेनोदात्त इत्युदात्त विधिस्तु नेह प्रवर्त्तते अनुदात्तस्येत्यनुवृत्तेः । ततः स्वरितस्य तूदात्त इति प्रकृतसूत्रेणैवोदात्त इति वृत्तिकारकैयटहरदत्तादयः । वस्तुतस्तु नेदं युक्तम् । एकादेशउदात्तेनेत्यत्रानुदात्तानुवृत्तौ प्रमाणाभावात् । क्वावरम्मरुत इत्यत्रोदात्तपाठाच्च । अत एव प्रातिशाख्ये उदात्तवत्येकीभावे उदात्तं सन्ध्यमक्षरमनुदात्तोदये पुनः स्वरितं स्वरितोपधे इत्युक्तम् । इह हि पूर्वार्द्धे अनुदात्तग्रहणमकुर्वत उत्तरत्र च कुर्वतः पुनःशब्देन पूर्वान्वयभ्रमं वारयतः स्पष्ट एवोक्त आशयः । यत्तु तस्यादित इति सूत्रे स्वरितोदात्तार्थञ्चेति वार्त्तिके यः सिद्धः स्वरितः सुब्रह्मण्योम् इति भाष्यं, तत्प्रौढिवादमात्रं निष्कर्षे तु देवब्रह्मणोरितिवत् स्वरितस्यतूदात्त इत्यपि नवसूत्र्युत्कर्षज्ञापकमेवेत्यवधेयम् । इन्द्रेत्यामन्त्रितमाद्युदात्तम् । आष्टमिको निघातस्तु भिन्नवाक्यत्वान्न भवति । द्वितीयो वर्णोनुदात्तः । उदात्तादनुदात्तस्य स्वरितः तस्यानेनोदात्तः । न चास्मिन् कर्त्तव्ये स्वरितस्यासिद्धत्वम् । एतत्काण्डमुत्कृष्यतइत्युक्तत्वात् । अत एवास्मिन्नुदात्ते कृते शेष-

निघातोपि न । यथोद्देशपक्षेप्यनुदात्तपरिभाषायां कर्तव्यायामसिद्धत्वेन वर्ज्यमानाभावात् । तेन द्वावप्युदात्तौ । आङुदात्तः ततः परस्योदात्तादनुदात्तस्य स्वरित इति स्वरितस्यानेनोदात्तः। छकाराकारोनुदात्तः । न च तस्योदात्तादनुदात्तस्येति स्वरितः शंक्यः । प्रकरणोत्कर्षेणास्यासिद्धत्वात् । हरिवआगच्छेत्यत्रोक्तप्रक्रियया चत्वार उदात्ताः । वकारच्छकारावनुदात्तौ । मेधातिथेरिति षष्ठ्यन्तस्य पराङ्गवद्भावः । आमन्त्रिताद्युदात्तः । धाशब्दस्योदात्तादिति स्वरितत्वे ऽनेनोदात्तः । ततश्चत्वारोनुदात्ताः वृषेति पूर्ववद् द्वावुदात्तौ पञ्चानुदात्ताः । इत्याधीवतमिति अददाअभार्मिति च ऋङ्मन्त्रावत्रानुसन्धेयौ । तेन पराङ्गवद्भावउपजीव्यं सामर्थ्यं स्फुटीभवति । गौरेत्यत्र गौरवदवस्कन्दतीति विग्रहः । सरो गौरो यथा पिबेति मन्त्रवर्णात् । पूर्ववद् द्वावुदात्तौ ततस्त्रयोनुदात्ताः । अहेत्युदात्तौ । चत्वारोनुदात्ताः । कौशीत्युदात्तौ । चत्वारोनुदात्ताः । गौतेत्युदात्तौ । चत्वारोनुदात्ताः । श्व इत्युदात्तम् । सुत्यामित्यन्तोदात्तम् । संज्ञायां समजेति क्यपो विधाने उदात्त इत्यनुवृत्तेः । आगेति द्वावुदात्तौ चत्वारोनुदात्ताः । अत्र वार्त्तिकानि । असावित्यन्तः । तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः स्यात् । गार्ग्यो यजते । ञित्स्वरेण प्राप्त आद्युदात्तोनेन बाध्यते । अमुष्येत्यन्तः । षष्ठ्यंतस्यापि प्राग्वत् । दाक्षेः पिता यजते । स्यान्तस्योपोत्तमंच । चादन्तः । तेन द्वावुदात्तौ । गार्ग्यस्य पिता यजते । वा नामधेयस्य । स्यान्तस्य नामधेयस्य उपोत्तममुदातं वा स्यात् । देवदत्तस्य पिता यजते ॥

देवब्रह्मणोरनुदात्तः ॥ स्वरितस्य तूदात्त इति पूर्वसूत्रशेषस्यायमपवादः । देवब्रह्मणोः स्वरितस्यानुदातः स्यात् सु-

ब्रह्मण्यायाम् । देवा ब्रह्माण आगच्छत। द्वयोरप्यामन्त्रितादुदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः । तस्यानेनानुदात्तः । द्वितीयस्य आष्टमिको निघातस्तु न भवति आमन्त्रितं पूर्वमविद्यमानवदिति पदात्परत्वाभावात् । ततः प्राचीनपदस्य तु भिन्नवाक्यस्थत्वात् । ये तु देवा ब्रह्माण इति सामानाधिकरण्येन व्याचक्षते । तन्मते विभाषितं विशेषवचने बहुवचनमिति पक्षे विद्यमानतया द्वितीयस्य निघातः । प्रकृतसूत्रेण स्वरितनिघातस्तु वकारस्यैव । तथा च भाष्यं, देवब्रह्मणोरनुदात्तत्वमेके इच्छन्ति । देवा ब्रह्माणः इति द्विः पाठः । उदात्तौ द्वावेको वेति विकल्पाभिप्रायेण । तत्र द्वितीयपक्षे प्रकृतसूत्रे ब्रह्मग्रहणं न कर्तव्यम् ॥

स्वरितात्संहितायामनुदात्तानाम् ॥ स्वरितात्परेषामनुदात्तानामेकश्रुतिः स्यात्संहितायाम् । इमं मे गङ्गे यमुने सरस्वति । अनुदात्तानामिति जातौ बहुवचनम् । तेनैकस्य द्वयोश्च भवत्येव । संहिताग्रहणं ज्ञापकमन्यत्र पञ्चमीनिर्देशे कालो न व्यवधायक इति तेन तिङ्ङतिङ इति निघातः पदपाठेपि भवति । अग्निमीळे,पुरोहितमित्यादौ त्ववग्रहेपि भवत्येकश्रुतिः । यथा सन्धीयमानानामित्यतिदेशात् । इतिशब्दात्परस्य तु पुरुहूत इति पुरुहूत इत्यादौ न भवति परिग्रहे त्वनार्षान्तादिति प्रातिशाख्ये विशेषवचनात् । एवमन्वेतवाइत्यादावपि । पद्यदींस्तु द्व्युदात्तानामिति निषेधादिति दिक् ॥

उदात्तस्वरितपरस्य सन्नतरः ॥ उदात्तस्वरितौ परौ यस्मात्तथाभूतस्यानुदात्तस्य अनुदात्ततरः स्यात् । अग्निम् । कन्या । स्यादेतत् । इमं मे इति मंत्रे शुतुद्रि शब्दस्य पादादित्वेन निघाताभावादाद्युदात्ततया तस्मिन्परे सरस्वतीतीकारस्य

सन्नतर इष्यते एकश्रुतिरेव तु प्राप्नोति । नवसूत्र्या उत्कर्षेणासिद्धतया सन्नतरायोगात् । उक्तं हि । पूर्वत्रासिद्धे नास्ति विप्रतिषेधो ऽभावादुत्तरस्येति । सत्यम् । नमुने इत्यत्र नेति योगविभागान्न दोषः।देवदत्तन्यङ्ङित्यत्र तु न्यधीचेति पूर्वपदप्रकृतिस्वरे उदात्तस्वरितयोर्यण इत्यञ्चत्यकारस्य स्वरितः पूर्वस्य सन्नतरं प्रति नासिद्धः । प्रकरणे उत्कर्षात् ॥

स्वरसूत्रप्रसङ्गात्फिट्सूत्राणि व्याख्यायन्ते ॥

फिषोन्त उदात्तः ॥ फिष् इति प्रातिपदिकस्य प्राचां संज्ञा। फिषोन्त उदात्तः स्यात् । उच्चैः ॥

पाटलापालङ्काम्बासागरार्थानाम् ॥ एतदर्थानामन्त उदात्तः स्यात् । पाटला । लघावन्त इति प्राप्ते । अपालङ्कः वृक्षविशेषः । इहापि प्राग्वत् । अम्बार्थः, माता। उनर्वन्नन्तानामित्याद्युदात्ते प्राप्ते । सागरः समुद्रः, लघावन्तइति प्राप्ते ॥

गेहार्थानामस्त्रियाम् ॥ गेहं गृहम् । नञ्विषयस्येति प्राप्ते। अस्त्रियां किम् । शाला। अत एव पर्युदासाज्ज्ञापकाच्छालाशब्द आद्युदात्तः ॥

गुदस्य च ॥ अन्त उदात्तः स्यान्न तु स्त्रियाम् । गुदम् । अस्त्रियां किम् । आन्त्रेभ्यस्ते गुदाभ्यः । स्वाङ्गशिटामदन्तानामित्यन्तरङ्गमाद्युदात्तत्वम् । ततष्टाप् ॥

ध्यपूर्वस्य स्त्रीविषयस्य ॥ नित्यस्त्रीलिङ्गस्य धकारयकारपूर्वो योन्त्योच् स उदात्तः । अन्तर्धा । स्त्रीविषयवर्णनान्नामिति प्राप्ते । छाया। माया। जाया। यान्तस्यान्त्यात्पूर्वमित्याद्युदात्तत्वे प्राप्ते । स्त्रीति किम् । बाह्यम् । बहिषष्टिलोपो यञ् चेति यञन्तत्वादाद्युदात्तत्वम्।विषयग्रहणं किम् ।इभ्या क्षत्रिया। यतोनाव इत्याद्युदात्त इभ्यशब्दः । क्षत्रियशब्दस्तु यान्तस्यान्त्यात्पूर्वमि-

ति मध्योदात्तः ॥

खान्तस्याश्मादेः ॥ नखम् । उखा । सुखम् । दुःखम् । नखस्य स्वाङ्गशिटामित्याद्युदात्ते प्राप्ते । उखानाम यवाग्वादि पाकार्थं याज्ञिकैर्निर्मितो भाण्डविशेषः । तस्य कृत्रिमत्वात् खय्युवर्णकृत्रिमाख्याचेदित्युवर्णस्योदात्तत्वे प्राप्ते । सुखदुःखयोर्नञ्विषयस्येति प्राप्ते । अश्मादेः किम् । शिखा मुखम् । मुखस्य स्वाङ्गशिटामिति नञ्विषयस्येति वा आद्युदात्तत्वं शिखायास्तु दीर्घान्ततया स्वाङ्गशिटामित्यस्याप्राप्तावपि अश्मादेरिति पर्युदासेनाद्युदात्तत्वं ज्ञाप्यते । तथा च शीङः खो निङ्स्वश्चेति उणादिषु नित्त्वमुक्तम् । वस्तुतस्तु तदेव शरणम् । शङ्खो निधौ ललाटास्थनीति कोशादस्थिवाचकस्य स्वाङ्गशिटामित्याद्युदात्तस्याव्यावृत्त्या चरितार्थस्याश्मादेरित्यस्य ज्ञापकत्वायोगात् ॥

हिष्ठवत्सरतिशत्थान्तानाम् ॥ एषामन्त उदात्तः स्यात् । अतिशयेन बहुलो बंहिष्ठः । नित्त्वादाद्युदात्ते प्राप्ते । बंहिष्ठैरश्वैः सुवृता रथेन, यद्बंहिष्ठं नातिविधे इत्यादौ व्यत्ययादाद्युदात्तः । संवत्सरः । अव्ययपूर्वपदप्रकृतिस्वरो बाध्यते । सप्ततिः । अशीतिः । लघावन्ते इति प्राप्ते । चत्वारिंशत् । इहापि प्राग्वत् । अभ्यूर्ण्वानाप्रभृथस्यायोः । अव्ययपूर्वपदप्रकृतिस्वरोत्र बाध्यते ॥

दक्षिणस्य साधौ ॥ अन्त उदात्तः स्यात् । साधौ किम् । व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तो यथा स्यात् । अर्थान्तरे तु लघावन्तइति गुरुरुदात्तः । दक्षिणः सरलोदारपरच्छन्दानुवर्त्तिष्विति कोशः ॥

स्वाङ्गाख्यायामादिर्वा ॥ इह दक्षिणस्याद्यन्तौ पर्यायेणो-

दात्तौ स्तः। दक्षिणो बाहुः। आख्याग्रहणं किम्। प्रत्यङ्मुखमासीनस्य वामपाणिर्दक्षिणो भवति॥

छन्दसि च॥ अस्वाङ्गार्थमिदम्। दक्षिणः। इह पर्यायेणाद्यन्तावुदात्तौ॥

कृष्णस्यामृगाख्या चेत्॥ वर्णानान्तणेत्याद्युदात्ते प्राप्तेन्तोदात्तो विधीयते। कृष्णानां व्रीहीणाम्। कृष्णो नोनाव वृषभः। मृगाख्यायान्तु। कृष्णो रात्र्यै॥

वा नामधेयस्य॥ कृष्णस्येत्येव। अयं वा कृष्णो अश्विना। कृष्ण ऋषिः॥

शुक्लगौरयोरादिः॥ नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्त्ततइति तु युक्तम्। सरो गौरो यथा पिबेत्यत्रान्तोदात्तदर्शनात्॥

अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः॥ अङ्गुष्ठस्य स्वाङ्गानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्तेन्तोदात्तार्थ आरम्भः। वशाग्रहणं नियमार्थम्। छन्दस्येवेति। तेन लोके आद्युदात्ततेत्याहुः॥

पृष्ठस्य च॥ छन्दस्यन्त उदात्तः स्यात् वा भाषायाम्। भाषामात्रविषयं सूत्रमिदं प्रागेकादशभ्योच्छन्दसि झल्युपोत्तमं विभाषाभाषायामित्यादिवत्। पृष्टम्॥

अर्जुनस्य तृणाख्या चेत्॥ उनर्वन्नन्तानामित्याद्युदात्तस्यापवादः॥

अर्यस्य स्वाम्याख्या चेत्॥ यान्तस्यान्त्यात्पूर्वमिति यतोनाव इति वाद्युदात्ते प्राप्ते वचनम्॥

आशाया अदिगाख्या चेत्॥ दिगाख्याव्यावृत्त्यर्थमिदम्। अत एव ज्ञापकादिक्पर्यायस्याद्युदात्तता। इन्द्र आशाभ्यस्परि॥

नक्षत्राणामाब्विषयाणाम् ॥ अन्त उदात्तः स्यात् । आश्लेषानुराधादीनां लघावन्तइति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानां इष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् ॥

न कुपूर्वस्य कृत्तिकाख्या चेत् ॥ अन्त उदात्तो न । कृत्तिका नक्षत्रम् । के चित्तु कुपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्यिका बहुलिकेत्यत्राप्यन्तोदात्तो नेत्याहुः ॥

घृतादीनाञ्च ॥ अन्त उदात्तः । घृतं मिमिक्षे । आकृतिगणोयम् ॥

ज्येष्ठकनिष्ठयोर्वयसि ॥ अन्त उदात्तः स्यात् । ज्येष्ठ आह चमसा । कनिष्ठ आह चतुरः । वयसि किम् । ज्येष्ठः, श्रेष्ठः । कनिष्ठोल्पिष्ठः । इह नित्त्वादाद्युदात्त एव ॥

बिल्वतिष्ययोः स्वरितो वा ॥ अनयोरन्तः स्वरितो वा स्यात् । पक्षे उदात्तः ॥

इति फिट्सूत्रेषु प्रथमः पादः ॥

अथादिः प्राक् शकटेः ॥ अधिकारोयम् । शकटिशकट्योरिति यावत् ॥

ह्रस्वान्तस्य स्त्रीविषयस्य ॥ आदिरुदात्तः स्यात् । वलिः तनुः ॥

नब्विषयस्यानिसन्तस्य ॥ वनेन वा यः । इसन्तस्य तु सर्पिः । नब् नपुंसकम् ॥

तृणधान्यानाञ्च द्व्यषाम् ॥ द्व्यचामित्यर्थः । कुशाः । काशाः । माषाः । तिलाः । बह्वृचान्तु गोधूमाः ॥

त्रः संख्यायाः ॥ पञ्च चतस्रः ॥

स्वाङ्गशिटामदन्तानाम् ॥ शिट् सर्वनाम । कर्णः । ओष्ठः । विश्वः ॥

प्राणिनां कुपूर्वम् ॥ कवर्गात् पूर्वमादिरुदात्तः । काकः, द्रु-

कः । शुकेषु मे । प्राणिनां किम् । उदकम् ॥

खय्युवर्णं कृत्रिमाख्या चेत् ॥ खयि परे पूर्वमादि उवर्णमुदात्तं स्यात् । कन्दुकः ॥

ऊनर्वन्नन्तानाम् ॥ उन, वरुणं बोरिशादसम् ॥ स्वसारं त्वा कृणवै । वन् । पीवानं मेषम् ॥

वर्णानान्तर्णतिनितान्तानाम् ॥ आदिरुदात्तः । एतः । हरिणः । शितिः । पृश्निः । हरित् ॥

ह्रस्वान्तस्य ह्रस्वमनृत्तात्छील्ये ॥ ऋद्वर्जं ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः ॥

अक्षस्यादेवनस्य ॥ आदिरुदात्तः । तस्य नाक्षः । देवने तु अक्षैर्मा दीव्यः ॥

अर्धस्यासमद्योतने ॥ अर्द्धो ग्रामस्य । समेंशके तु अर्द्धं पिप्पल्याः ॥

पीतद्रुवर्थानाम् ॥ आदिरुदात्तः । पीतद्रुः सरलः ॥

ग्रामादीनाञ्च । ग्रामः ॥ सोमः । यामः ॥

लुबन्तस्योपमेयनामधेयस्य ॥ स्फिगन्तस्येति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा । चञ्चेव चञ्चा ॥

न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम् ॥ एषामुपमेयनाम्नां नादिरुदात्तः । ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः ॥

राजविशेषस्य यमन्वा चेत् ॥ यमन्वा वृद्धः । आङ्ग उदाहरणम् । अङ्गाः प्रत्युदाहरणम् ॥

लघावन्ते द्व्योश्च बव्हषो गुरुः ॥ अन्ते लघौ द्व्योश्च लघ्वोः सतोः बव्हषकस्य गुरुरुदात्तः । कल्याणः । कोलाहलः । इह गुरूणां मध्ये य आदिरित्यर्थोभिप्रेतः । तेन वृषाकपिरि-

त्यत्र व्यपदेशिवद्भावेनादिभूते सिद्धम् । तेन वृषाकप्यर्क्षीत्यादिसूत्रस्था वृत्त्यादिग्रन्था न विरुध्यन्ते ॥ क्रीतवत्परिमाणादित्यादिसूत्रस्थभाष्यादिग्रन्थाश्च सङ्गच्छन्ते । नन्वेवमप्यन्यतोङीषिति सूत्रे सारङ्गकलमाषशब्दौ लघावन्त इत्यादिना मध्योदात्ताविति हरदत्तग्रन्थो विरुध्यतइति चेत् । सत्यम् । आदिशब्द इह नान्वेतीत्येव सारम् ॥

स्त्रीविषयवर्णाक्षुपूर्वाणाम् ॥ एषां त्रयाणामादिरुदात्तः । स्त्रीविषयः । मल्लिका । वर्णः । श्येनी । हरिणी । अक्षुशब्दात् पूर्वोस्त्येषान्तेक्षुपूर्वाः । तरक्षुः ॥

शकुनीनाञ्च लघुपूर्वम् ॥ पूर्वं लघूदात्तं स्यात् । कुक्कुटः । तित्तिरिः ॥

नर्तुप्राण्याख्यायाम् ॥ यथालक्षणं प्राप्तमुदात्तत्वं न । वसन्तः । कृकलासः ॥

धान्यानां च वृद्धक्षान्तानाम् ॥ आदिरुदात्तः । कान्तः । श्यामाकाः । षान्तः । माषाः ॥

जनपदशब्दानामषान्तानाम् ॥ केकयः ॥

हयादिनामसंयुक्तलान्तानामन्तः पूर्वं वा ॥ हयिति हलः संज्ञा । पललम् । शललम् । हयादीनां किम् । एकलः । असंयुक्तेति किम् । मल्लः ॥

इगन्तानाञ्च द्व्यषाम् ॥ आदिरुदात्तः । कृषिः ॥

इति द्वितीयः पादः ॥

अथ द्वितीयं प्रागीषात् ॥ ईषान्तस्य हलादेरित्यतः प्राक् द्वितीयाधिकारः ॥

व्यचां प्राङ् मकरात् ॥ मकरवरूढेत्यतः प्राक् व्यचामित्यधिकारः ॥

स्वाङ्गानामकुर्वादीनाम् ॥ कवर्गरेफवकारादीन्वर्जयित्वा ऽयचां स्वाङ्गानां द्वितीयमुदात्तम् ॥ ललाटम्। कुर्वादीनान्तु, कपोलः। रसना। वदनम् ॥

मादीनाञ्च ॥ ऽयचां द्वितीयमुदात्तम्। मलयः। मकरः ॥

शादीनां शाकानाम् ॥ शीतन्या। शतपुष्या ॥

पान्तानां गुर्वादीनाम् ॥ पादपः। आतपः। लघ्वादीनान्तु। अनूपम्। ह्रस्वान्तु नीपम् ॥

युतान्यण्यन्तानाम् ॥ युतादित्रितयान्तानां द्वितीयमुदात्तम्। युतं, अयुतम्। आनि, धमानिः। अणि, विपणिः ॥

मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा ॥ एषामादिर्द्वितीयो वोदात्तः।मकरः। वरूढ इत्यादि॥

छन्दसि च ॥ अमकराद्यर्थ आरम्भः। लक्ष्यानुसारादादिर्द्वितीयं वोदात्तं ज्ञेयम् ॥

कर्दमादीनाञ्च ॥ आदिर्द्वितीयं वोदात्तम्। कर्दमः ॥

सुगन्धितेजनस्य ते वा ॥ आदिर्द्वितीयन्तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः। सुगन्धितेजनाः ॥

नपः फलान्तानाम् ॥ आदिर्द्वितीयं वोदात्तम्। राजादनफलम् ॥

यान्तस्यांत्यात् पूर्वम् ॥ कुलायः ॥

आन्तस्य च नालघुनी ॥ नाशब्दो लघु च उदात्ते स्तः। सनाथा सभा ॥

शिशुमारोदुंबरबलीवर्दोष्ट्रारपुरूरवसाञ्च ॥ अन्त्यात् पूर्वमुदात्तं द्वितीयं वा ॥

साङ्काश्यकापिल्यनासिक्यदार्वाघाटानाम् ॥ द्वितीयमुदात्तं वा। साङ्काश्यमित्यादि ॥

ईषान्तस्य हयादेरादिर्वा ॥ हयादेर्हलादेः । हलीषा । लाङ्गलीषा ॥

उशीरदाशेरकपालपलालशैवालश्यामाकशरीरशरावत्हृदय-हिरण्यारण्यापत्यदेवराणाम् ॥ एषामादिरुदात्तः स्यात् ॥

महिष्यषाढयोर्जायेष्टकाख्या चेत् ॥ आदिरुदात्तः । महिषी जाया । अषाढा उपधाति ॥

इति तृतीयः पादः ॥

शकटिशकट्योरक्षरमक्षरं पर्यायेण ॥ उदात्तम् ॥ शकटिः । शकटी ॥

गोष्ठजस्य ब्राह्मणनामधेयस्य ॥ अक्षरमक्षरं क्रमेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपद-प्रकृतिस्वरेणान्तोदात्तः ॥

पारावतस्योपोत्तमवर्जम् ॥ शेषं क्रमेणोदात्तम् । पारावतः ॥

धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम् ॥ एषाञ्चतुर्णां धूम्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥

कपिकेशहरिकेशयोश्छन्दसि । कपिकेशः । हरिकेशः ॥

न्यङ्स्वरौ स्वरितौ ॥ स्पष्टम् । न्यङ्ङुत्तानः । व्यचक्षयत्स्वः ॥

न्यर्बुदव्यलकशयोरादिः ॥ स्वरितः स्यात् ॥

तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः ॥ स्वरितः स्यात् । तिलानां भवनं क्षेत्रं तिल्यम् । यतोनाव इति प्राप्ते ॥

बिल्वभक्ष्यवीर्याणिच्छन्दसि ॥ अन्तस्वरितानि ॥

त्वत्त्वसमसिमेत्यनुच्चानि ॥ स्तरीरुत्वत् । उत त्वः पश्यन् । नभन्तामन्यके समे । सिमस्मै ॥

सिमस्याथर्वणेन्त उदात्तः॥आथर्वणइति प्रायिकम्।तत्र दृष्टस्येत्येवंपरं वा। तेन वासस्तनुते सिमस्माइत्यृग्वेदेपि भवत्येव ॥

निपाता आद्युदात्ताः ॥ स्वाहा ॥

उपसर्गाश्चाभिवर्जम् ॥

एवादीनामन्तः ॥ एवमादीनामिति पाठान्तरम्। एव एवं नूनम्। सह। ते पुत्र सूरिभिः सह। षष्ठस्य तृतीये सहस्यस इति प्रकरणे सहशब्द आद्युदात्त इति तु प्राञ्चः। तच्चिन्त्यम् ॥

वाचादीनामुभावुदात्तौ ॥ उभौग्रहणमनुदात्तंपदमेकवर्जमित्यस्य बाधाय ॥

चादयोनुदात्ताः ॥ स्पष्टम् ॥

यथेति पादान्ते ॥ तन्नेमिमृभवो यथा। पादान्ते किम्। यथा नो अदितिः करत् ॥

प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः ॥ पटुपटुः।

शेषं सर्वमनुदात्तम् ॥ शेषं नित्यादिद्विरुक्तस्य परमित्यर्थः। प्रप्रायंम्। दिवेदिवे ॥

इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पदम् ॥ प्रासङ्गिकं समाप्य प्रकृतमनुसरामः ॥

अपृक्त एकाल् प्रत्ययः ॥ एकाल् प्रत्ययो यः सोपृक्तसंज्ञः स्यात्। संज्ञाप्रदेशा वेरपृक्तस्येत्यादयः।एकेति व्यर्थम्।निपातएकाजित्येकग्रहणेन वर्णग्रहणेजातिग्रहणमिति ज्ञापनेपि अल्ग्रहणसामर्थ्यादेवेह व्यक्तिपरत्वात्। किञ्च सूत्रमेवेदं व्यर्थम्। अपृक्तप्रदेशेष्वल्ग्रहणेनैव सिद्धेः। न च सुरां सुनोतीति सुरासुत् तमाचक्षाणः सुरा इत्यत्र धात्ववयवस्य सस्य लोपः स्यादिति वाच्यम्। प्रत्ययाप्रत्ययपरिभाषया गतार्थत्वात्। विभक्तिसाहचर्याच्च। यथासूत्रारम्भेपि तिसाहचर्यात्सेरपि तिङ एव ग्र-

हणादमैत्सीदिति सिचो न भवति। बेरपृक्तस्येत्यत्र तु वकारेकारयोरन्यतरमनुनासिकमाश्रित्यापृक्तग्रहणं प्रत्याख्यास्यतएव ॥

तत्पुरुषः समानाधिकरणः कर्मधारयः॥ समानाधिकरणावयवस्तत्पुरुषः कर्मधारयसंज्ञः स्यात्। संज्ञाप्रदेशाः पुंवत्कर्मधारयेत्यादयः। समानाधिकरणे पदे आश्रयत्वेन स्तोस्येत्यर्शआद्यच्। यदि तु पूर्वकालैकेति प्रकरणस्यान्ते कर्मधारयश्चेति कृत्वा तत्पुरुषानुवृत्त्या पर्याये लब्धे चकाराद्गतिश्चेत्यादाविव समुच्चयः साध्यते तदेदं सूत्रं शक्यमकर्तुम् ॥

प्रथमानिर्दिष्टं समासउपसर्जनम् ॥ समासविधायकं शास्त्रं समासः। तादर्थ्यात्। समस्यतेनेनेति व्युत्पत्त्या वा। तत्र प्रथमया यन्निर्दिश्यते तदुपसर्जनं स्यात्। द्वितीयाश्रितादिभिः कृष्णाश्रितः। महासंज्ञाकरणमन्वर्थसंज्ञार्थम्। लोके ह्यप्रधानमुपसर्जनमाहुः। तेन राज्ञः कुमार्या राजकुमार्या इत्यत्रोभयोः षष्ठीति सूत्रे प्रथमानिर्दिष्टत्वाविशेषेपि राजैवोपसर्जनं न तु कुमारी। तेन कुमारीशब्दस्य न पूर्वनिपातो न वा गोस्त्रियोरिति ह्रस्वः। न च राज्ञः कुमारीति प्रथमान्तेनैव विग्रह इति भ्रमितव्यम्। मूलाभावात् तथा च तत्पुरुषेतुल्यार्थतृतीयासप्तमीति सूत्रे परमे कारके परमेण कारकेणेत्यादावतिप्रसङ्गमाशंक्य लक्षणप्रतिपदोक्तपरिभाषाबलेन समाहितं भाष्ये। अनेकमन्यपदार्थइति सूत्रेपि भाष्यकैयटयोः स्पष्टमेतत्। प्रथमान्तेनैव विग्रह इति नियमो नास्तीति परिनिष्ठितविभक्तेरेव विग्रहस्योचितत्वाच्च। अत एव पूरणगुणेति समानाधिकरणेन षष्ठीसमासनिषेधोपि सङ्गच्छते। अत एव चैकविभक्तिचापूर्वनिपातइत्यस्य विषयलाभः। स्यादेतत्। उक्तरीत्या सूत्रभाष्यादिस्वरसान्यायाच्च द्वितीयाद्यन्ततया परिनिष्ठितस्य प्रथमान्तेन विग्रहो

नास्तीत्येवोच्यताम् तत्किमुच्यते नियमो नास्तीति। सत्यम्। अस्ति तत्राप्यालम्बनम्। तथाहि। राजकुमार्या इत्यादेः परिनिष्ठितस्यार्थप्रदर्शनपरे लौकिके विग्रहवाक्ये प्रकृतिभागमात्रं व्याख्येयं न तु समासोत्तरविभक्तिरपि। नहि षष्ठी षष्ठ्या व्याख्येया किन्त्वनुवादमात्रं तत्। तत्र प्रातिपदिकार्थमात्रव्याचिख्यासायां प्रथमया विग्रहः केन वार्यते। अत एव हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीमित्यादिप्रयोगाः सङ्गच्छन्ते। मातेति प्रथमान्तेन समासे बाधकाभावात्। अत एव पचतीति पाचकस्तं पाचकमित्याद्यपि सम्यगेवेति दिक्। तस्माद् द्वितीयाद्यन्तस्य परिनिष्ठितस्य प्रथमया परिनिष्ठितया वा विग्रहो न तु तदुभयभिन्नयेति निष्कर्षः। स्यादेतत्। यद्यन्वर्थसंज्ञेयं याचकवृन्दारको गोगर्भिणीत्यादिषु विशेष्यस्य पूर्वनिपातो न स्यादिति चेत्। वृन्दारकनागकुञ्जरैः पूज्यमानं चतुष्पादोगार्भिण्येत्यादौ विधिवाक्ये प्रथमानिर्देशस्यानन्यार्थत्वाददोषः। तस्मात्सति सम्भवे व्यवस्थापकमन्वर्थत्वमिति स्थितम्॥

एकविभक्ति चापूर्वनिपाते॥ अर्थाधिकारादिह समासार्थमलौकिकं विग्रहवाक्यं समासः। तत्र विशेष्यसमर्पके पदे प्रयोगभेदादनेकविभक्तियुक्तेपि यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्पूर्वनिपातेतरस्मिन्कार्ये। अतिक्रान्तो मालामतिमालः। इहातिकान्तमतिक्रान्तेनेत्यादिक्रमेण सकलविभक्तियोगेपि मालाशब्दस्य द्वितीयानियमात् संज्ञायां सत्यां गोस्त्रियोरिति ह्रस्वः। एवं निष्कौशांबिरित्यादि। एकविभक्तावषष्ठ्यन्तवचनम्। नेह। अर्द्धं पप्पल्या अर्धपिप्पली। नन्वेवं पञ्चखट्वी न सिध्येत्। सत्यम्। अत एव संज्ञापूर्वकतया व्यवस्थितविभाषाश्रयणेन वार्द्धपिप्पलीं साधयित्वा षष्ठ्यन्तेति वार्त्तिकं नारब्धव्यमिति प्रा-

माणिकाः । वस्तुतस्तु एकदेशिसमासविषयकोयं निषेधः । न चात्र प्रमाणाभावः।पञ्चखट्वीति द्वितीयभाष्यस्य प्रमाणत्वात्॥

इति शब्दकौस्तुभे प्रथमस्याध्यायस्य द्वितीये पादे प्रथममान्हिकम् ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ डित्थादीन्यव्युत्पन्नान्युदाहरणम् । अव्युत्पत्तिपक्षस्य चेदमेव ज्ञापकम् । यत्तु व्युत्पत्तिपक्षेपि निपातार्थमनुकरणार्थं चेदमिति हरदत्तेनोक्तम् । तन्न । तत्रापि प्रकृत्यादिकल्पनसम्भवादिति बोध्यम् । वस्तुतस्तु बहुपटव इत्याद्यर्थमिदम् । न च तद्धितग्रहणे मत्वर्थलक्षणया निर्वाहः । पचतकीत्यादावतिव्याप्तेः । अव्युत्पत्तिपक्षस्तु कमिग्रहणेन सिद्धे कंसग्रहणेनैव ज्ञाप्यः । ज्ञापिते च तत्राप्यनेनैव संज्ञा सिध्यति । नन्वेतदेव ज्ञापकम् । बहुच्पूर्वे कृतार्थत्वादित्यवधेयम् । अर्थवत्किम् । धनं वनमित्यादौ प्रतिवर्ण संज्ञा मा भूत् । स्यादेतत् । विशिष्टरूपोपादानविषयतया अर्थवत्परिभाषाया इहाप्रवृत्तावपि अधातुरप्रत्यय इति पर्युदासादेव सिद्धम् । न चाधीते यावक इत्यादौ इङ्कनौ निरर्थकावपि धातुप्रत्ययौ स्त इति वाच्यम् । अडादिव्यवस्थायै इङ एवार्थवत्त्वस्वीकारात् । स्वार्थिकानाञ्च प्रकृत्यर्थेनार्थवत्त्वात् । न चेदं कल्पनामात्रमिति वाच्यम् । डित्थादावपि तथात्वात् । उक्तं हि । अर्थवत्ता नोपपद्यते केवलेनावचनात् सिद्धं त्वन्वयव्यतिरेकाभ्यामिति । कल्पिताभ्यामिति हि तदर्थः । वस्तुतः पदस्फोटवाक्यस्फोटयोरेवार्थवत्त्वात् । सत्यम् । उत्तरार्थमर्थवद्ग्रहणं इह तु स्पष्टार्थम् । अधातुः किम् । अहन् । नलोपो मा भूत् । न च सुपोधात्विति धातुग्रहणात् धातोर्नेयं संज्ञेति वाच्यम् । श्येनायते इत्यादौ प्रत्ययान्ते धातुग्रहणस्य चरितार्थत्वात् । अप्रत्ययः किम् । पच-

तीति तिपो मा भूत्। सुपोप्येवम्। न चैवन्तदन्तेषु अतिव्याप्तिरतादवस्थ्यम्। उत्तरसूत्रे तद्धितग्रहणस्य नियमार्थत्वात्। तद्धितान्तानामेव नत्वन्यप्रत्ययान्तानामिति। न च तत्रापि संज्ञाविधित्वेन तदन्तग्रहणं दुर्लभमिति वाच्यम्। अर्थवदित्यनुवृत्तिसामर्थ्यात्तत्सिद्धेः। प्रशंसायां हि मतुप्। एकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वञ्च प्रशंसार्थः। अधातुप्रत्ययाविति सिद्धे नञ्द्वयोपादानं स्पष्टार्थम्। महासंज्ञाकरणं प्रावामनुरोधात्॥

कृत्तद्धितसमासाश्च ॥ अर्थवन्त एते प्रातिपदिकसंज्ञाः स्युः। विशेषणसामर्थ्यात्तदन्तविधिः। न हि जहत्स्वार्थायां वृत्तौ कृतान्ताद्धितानां चार्थोस्ति। भूतपूर्वगतिलभ्यस्तु न प्रशस्तः सः। भित्। छित्। अत्राधातुरिति पर्युदासे प्राप्ते कर्त्ता हर्त्ता, अत्र तद्धितान्तानामेवेति नियमेन निरासे प्राप्ते, सन्निहितत्वाच्च कृद्ग्रहणेन प्रागुक्तमेव बाध्यते नतु समासग्रहणकृतो नियमोपि। तेन कृद्ग्रहणपरिभाषानुपस्थानात् मूलकेनोपदंशमिति वाक्यस्य न भवति। ननु बाध्यसामान्यचिन्तायां समासनियमोपि बाध्येत। विशेषचिन्तायां तु मध्येपवादन्यायावतारात्तद्धितनियमोपि न बाध्येतेति चेत्। सत्यम्। आद्ये एवेह पक्षः। न च वाक्येतिप्रसङ्गः। शब्दाधिकारमाश्रित्येहार्थवच्छब्देनैकार्थीभावविवक्षणात्। अतिशये मतुप्स्मरणात्। वक्ष्यमाणरीत्या अप्रत्यय इति निषेधः प्रत्ययान्तपर इति पक्षे तु मध्येपवादन्यायात् सर्वेष्टसिद्धिः। अप्रत्यय इत्यस्य प्रत्याख्यानपक्षेपि पुरस्तादपवादन्यायादिष्टसिद्धिरिति दिक्। तद्धितः। औपगवः। अत्रानेन पूर्वेण वा संज्ञा नियमविधीनां विधिरूपेण निषेधरूपेण वा प्रवृत्तिरिति मतभेदस्योक्तत्वात्। एवं समासेपि। न चासमर्थसमासेषु विध्यर्थं समासग्रहणमिति वा-

च्यम्। अर्थवद्ग्रहणानुवृत्तेरुक्तत्वात्। असमर्थानां तर्हि कथं संज्ञेति चेत्, धर्मिग्राहकमानादेवेति गृहाण। असूर्यललाटयोरित्यादिना हि समासउपपदे कृद्विधीयते। उपपदञ्च महासंज्ञाकरणबलाद्विभक्त्यन्तमेव। न चैवमपि स्त्रीप्रत्यये तदादिनियमाभावाद्राजकुमारीत्यादौ प्रत्ययान्ते विध्यर्थं तदिति वाच्यम्। अन्तरङ्गस्यापि हल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्या श्रूयमाणएव सुपि समासप्रवृत्तेः। अत एव गोमत्प्रिय इत्यादौ नुमादयो नेति वक्ष्यते। तस्मात्प्रकृते समासग्रहणं नियमार्थं सद्वाक्यस्य संज्ञां निवर्तयतीति स्थितम्। नियमश्च सजातीयापेक्षः। यत्र पूर्वो भागः पदमुत्तरश्च प्रत्ययभिन्नः तादृशस्य समुदायस्य चैत्स्यात्तर्हि समासस्यैवेति। षड्विधेपि समासे पूर्वभागस्य पदत्वाव्यभिचारात्। तेन बहुच्पूर्वस्यास्त्येव संज्ञेति बहुपटव इति टकारस्योदात्तता लभ्यते। प्रथमस्य जसो लुकि चितः सप्रकृतेर्बव्हकजर्थमिति चित्स्वरे कृते पुनर्विभक्त्युत्पत्तेः। अन्यथा तु जसेवोदात्तः स्यात्। उत्तरश्चेत्यादि किम्। हरिष्वित्यादेरनेन व्यावृत्तिर्मा भूत्। एवमस्तु, को दोष इति चेत्। शृणु। तथासति जन्मवानित्यादौ तद्धितान्ते विध्यर्थं तद्धितग्रहणं स्यात् राजानावित्यादेस्तु प्रातिपदिकत्वं केन वार्यताम्। न तावदनेन नियमेन, पूर्वभागस्यापदत्वात्। नापि तद्धितग्रहणेन, तस्योक्तरीत्या नियमार्थत्वायोगात्। न च सुपोधातुप्रातिपदिकयोरिति धातुग्रहणं प्रत्ययान्तानां प्रातिपदिकसंज्ञा नेति ज्ञापकमिति वाच्यम्। तस्य प्रासादीयतीत्यादौ हरिष्वातिवदप्रातिपदिके चरितार्थत्वात्। नापि ङ्याब्ग्रहणं ज्ञापकम्। लिङ्गविशिष्टपरिभाषया सिद्धौ तस्यान्यार्थतायां एव सिद्धान्तयिष्यमाणत्वात्। तस्मादुक्तमेव साधु। यद्यपि प्रकृतिप्रत्ययभा-

वानापन्नसंघातविषयको नियम इत्यपि सुवचं तथापि सरूपसूत्रे समुदायाद्विभक्त्युत्पत्तिरिति ग्रन्थं योजयितुमिदं गौरवमाहृतम् । निष्कर्षे तु तथैवास्तु । तथा च तद्धितग्रहणं नियमार्थमेव । भेदसंसर्गद्वारकमर्थवत्त्वमिति कैयटस्याप्ययमेव भावः । भेदे परस्परपरिहारेण प्रयोगे सति यः संसर्गस्तद्द्वारकमित्यर्थात् न तु भेदः संसर्गो वा द्वयं वा वाक्यार्थ इत्याशयेन तद्ग्रन्थः । बहुच्समासयोर्वैरूप्याभावात् । यद्वा । सात्पदाद्योरिति सातिग्रहणात्प्रत्ययो न प्रातिपदिकमिति सिद्धे पूर्वसूत्रस्थं प्रत्ययग्रहणं सामर्थ्यात्तदन्तपरम् । तद्धितग्रहणन्तु विध्यर्थमेव । स्यादेतत् । पक्षत्रयेपि राजपुरुषावित्यादौ पुरुषावित्यादेः संज्ञा दुर्वारेति प्रातिपदिकावयवत्वात्सुपो लुक् स्यादिति चेन्मैवम् । जहत्स्वार्थायामानर्थक्यात् । अजहत्स्वार्थायामपि पूर्वपदविनिर्मुक्तस्य विशिष्टार्थविरहेण तत्सहितस्यैव विशिष्टार्थगमकत्वात् । प्रशंसायां हि मतुबित्युक्तम् । एवं घटपटावित्यादावपि मिलितयोरेव पदयोः सहभूतार्थता । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वाच्च । घटावित्यंशो नार्थवानिति । एतेनासमर्थसमासे दशदाडिमादिवदनर्थके विध्यर्थं समासग्रहणं किं न स्यादिति चोद्यं प्रत्युक्तम् । अर्थवद्ग्रहणस्येहार्थताया एवोक्तत्वादिति दिक् । यदि तु नैयायिकरीत्या अर्थवत्त्वं वृत्तिमत्त्वं तच्च समासस्य नास्तीत्याश्रित्य समासग्रहणं विध्यर्थम् । तद्धितग्रहणमपि तथा । अप्रत्यय इति तु प्रत्ययवारणार्थमित्याश्रीयते तथापि न क्षतिः । तद्धितग्रहणस्य तद्विशिष्टपरतामाश्रित्य बहुपटव इत्यस्य सुसाधत्वात् । किन्त्वस्मिन्पक्षे सिद्धान्तविरोधः मूलकेनोपदंशं पचतकीत्यत्रातिप्रसङ्गश्चेति यथास्थितमेवास्तु । इह प्रकरणे यथाश्रुताः प्राचां ग्रन्था दुष्टा एवेत्यवधेयम् । नि-

पातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या येषां द्योत्योऽप्यर्थो नास्ति तदर्थमिदम्। अवद्यति। अनुक्तसमुच्चयार्थाच्चकारात्सिद्धमिदम्। अनुकरणेषु तु अनुकरणेन सहाभेदविवक्षायामर्थवत्त्वाभावान्न प्रातिपदिकता, भूसत्तायामिति यथा। भेदविवक्षायां तु संज्ञा स्यादेव। भुवोवुगिति यथा। न चाधातुरिति पर्युदासापत्तिः। प्रकृतिवदनुकरणमित्यातिदेशस्यानित्यतयोवङंशे प्रवृत्तावपि संज्ञांशे अप्रवृत्तिसम्भवात्। एतच्च ऋलृक्सूत्रे उपपादितम्॥

ह्रस्वो नपुंसके प्रातिपदिकस्य॥ क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्। श्रीपं कुलम्। प्रातिपदिकग्रहणसामर्थ्यान्नेह। काण्डे। कुड्ये। इह त्वन्तादिवच्चेत्यतिदेशेनास्ति प्राप्तिः। न च द्विकपक्षे वारिणीइति व्यावर्त्य कृतार्थतेति वाच्यम्। तत्रापि प्रातिपदिकमित्यस्यानुवृत्त्या सिद्धे सामर्थ्यस्य सुवचत्वात्। लक्ष्यानुरोधेन पक्षान्तरस्यैव सुग्रहत्वाच्च। यद्वा कार्यकालपक्षं प्रत्ययान्तस्य नेति प्रसज्यप्रतिषेधं चाश्रित्य समाधेयम्। न चैवं ब्रह्मबन्धुरित्यत्र स्वादयो न स्युरिति वाच्यम्। लिङ्गविशिष्टपरिभाषया श्वश्रूरित्यत्रेव तत्सिद्धेः॥

गोस्त्रियोरुपसर्जनस्य॥ उपसर्जनं यो गोशब्दस्तादृगेव च यत्स्त्रीप्रत्ययान्तन्तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। चित्रगुः। निष्कौशाम्बिः। उपसर्जनस्य किम्। सुगौः। राजकुमारी। स्त्रीशब्दः स्वर्यते। तेन स्त्र्यधिकारोक्तप्रत्ययग्रहणान्नेह। अतिलक्ष्मीः। अतिश्रीः। कथं गोकुलं राजकुमारीपुत्र इति चेत्। शृणु। उपसर्जनस्य ससंबन्धिकतया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रति यद्युत्तरपदभूतयोर्गोस्त्रियोर्गुणीभावस्तदेदं ह्रस्वत्वम्। न चेह तदस्ति। गोः कुलं

प्रति गुणीभावेपि गां प्रत्यतथात्वात्। कुमार्याश्च पुत्रं प्रति गुणीभावेपि राजानं प्रत्यतथात्वात्। शास्त्रीयं चेहोपसर्जनं गृह्यते। कृत्रिमत्वात्। अत एव प्रत्ययमात्रस्य तथात्वासम्भवात्तदन्तलाभः। यदि तु लौकिकमुपसर्जनत्वं गृहीत्वा प्रत्यय एव विशेष्येत तदा हरीतक्याः पलानि हरीतक्य इत्यत्राति-व्याप्तिः स्यात्। स्पष्टञ्चेदमुपमानानिसामान्यवचनैरिति सूत्रे भाष्ये। अथ कथं राजकुमारीमतिक्रान्तोतिराजकुमारिति। अनुपसर्जने स्त्रीप्रत्यये तदादिनियमो नेत्युक्ततया राजकुमारीशब्दस्य स्त्रीप्रत्ययान्तत्वादित्यवेहि। अतिक्रान्तम्प्रति ह्यसावुपसर्जनं न तु राजानम्प्रतीति विवेकः। अत्रत्यः कैयटस्त्वापातत इत्यवधेयम्। अत्र वार्त्तिकम्। ईयसो-बहुव्रीहौ पुंवद्वचनमिति। ईयसन्ताद्यः स्त्रीप्रत्ययस्तदन्तान्तो यो बहुव्रीहिस्तत्र ह्रस्वो नेत्यर्थः। गोस्त्रियोरिति ह्रस्वो विहितः। तत्र पुंसि यथा स्त्रीप्रत्ययान्तता नास्ति तथेह बोध्यमित्येवं वचनव्यक्त्या ह्रस्वाभावः पर्यवस्यति। बव्हयः श्रेयस्यो यस्य स बहुश्रेयसी। ईयसश्चेति कब्निषेधः। बहुव्रीहौ किम्। अतिश्रेयसि॥

लुक्तद्धितलुकि॥ तद्धितलुकि सति उपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात्। लुक् तावत्प्रत्ययस्यैव सम्भवति। न तु तदन्तस्य। अत एवोपसर्जनमिह लौकिकम्, न तु पूर्ववच्छास्त्रीयम्। असम्भवात्। न हि प्रत्ययमात्रं शास्त्रीयमुपसर्जनम्। आमलक्याः फलमामलकम्। नित्यंवृद्धशरादिभ्य इति मयटः फले लुक्। ततोनेन गौरादिङीषो लुक्। इह पूर्वसूत्रस्यावकाशो निष्कौशाम्बिः। अस्यावकाश आमलकम्। पञ्च इन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्र तु परत्वाल्लुगेव॥

इद्वोण्याः ॥ गोण्या इत्स्यात्तद्धितलुकि । लुकोपवादः । पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः । दशगोणिः । गोणीशब्दः परिमाणवचन आवपनवचनश्च । तत्राद्यात्प्राग्वतेष्ठञ् । द्वितीयादार्हीयष्ठक् । तयोरध्यर्धेति लुक् ॥

लुपि युक्तवद्व्यक्तिवचने ॥ प्राचामिदं सूत्रं दूषणार्थं पाणिनिरनुवदति । लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालाः क्षत्रियाः पुल्लिङ्गबहुवचनविषयाः । तेषां निवासो जनपदः पञ्चालाः । पञ्चालस्यापत्यानि बहूनि । जनपदशब्दात् क्षत्रियादञ् । ते तद्राजाः । तद्राजस्य बहुषु । ततस्तस्यनिवास इत्यणो जानपदे लुप् । लुपि किम् । लवणस्सूपः । संसृष्टे । लवणाल्लुक् । व्यक्तिवचने किम् । हरीतकी पञ्चाला इत्यादिषु षष्ठ्या अतिदेशो मा भूत् । समासे उत्तरपदस्य बहुवचनस्य लुपः । नियमार्थमिदम् । मथुरा पञ्चालाः । उत्तरपदस्यैवेति नियमान्नेह । पञ्चालमथुरे । बहुवचनस्य किम् । गोदौ ग्रामो मथुरा च गोदमथुराः । पूर्वपदस्य द्वित्वातिदेशः स्यादेव ॥

विशेषणानाञ्चाजातेः ॥ लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा । पञ्चाला रमणीयाः । गोदौ रमणीयौ । अजातेः किम् । पञ्चाला जनपदः । गोदौ ग्रामः । कथं तर्हि पञ्चाला जनपदो रमणीय इति । जातिविशेषणत्वादिति गृहाण । पञ्चालविशेषकत्वे तु रमणीया इति भवत्येव । स्यादेतत् । लुपोन्यत्रापीदं तुल्यम् । बदरीवृक्ष इत्यत्र सूक्ष्मकण्टका सूक्ष्मकण्टक इति प्रयोगयोर्विशेष्यभेदेन व्यवस्थास्वीकारात्, तात्कं सूत्रेण । सत्यम् । गुणवचनानामाश्रयतो लिङ्गवचनानीति सूत्रार्थः । तथाहि । जातिभिन्नानि यानि विशेषणानि तेषां युक्तवत् विशेष्यवदित्यर्थः । गुणवचनानामित्यु-

द्यघोषेपि जातिभिन्नं गुणशब्दार्थः। तदुक्तममरेण। स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः। गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदका इति ॥ सामान्ये नपुंसकस्य न्यायप्राप्तस्यापवादोयम्। तेन शुक्लं पटा इति न भवति। अनित्यश्चायमतिदेशः। संस्कृतंभक्षा इत्यादिलिङ्गात्। लक्ष्यानुरोधाद्व्यवस्था। हरीतक्यादिषु व्यक्तिः ॥ नियमार्थमिदम्। तेन वचनं न युक्तवत्। हरीतक्याः फलानि हरीतक्यः। गौरादिङीषन्तादनुदात्तादेश्चेति लुप्। खलतिकादिषु वचनम् ॥ अयमपि नियम एव। खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं वनानि। खलतिको वरणादिः। मनुष्यलुपि प्रतिषेधः ॥ मनुष्यलक्षणे लुबर्थे विशेषणानां प्रतिषेधः। लुबन्तस्य तु भवत्येव। चञ्चा तृणमयः पुमान्। स इव चञ्चाभिरूपः। संज्ञायामिति कन् लुम्मनुष्यइति लुप्। चर्मविकारविशेषोवध्रिका। स इव वध्रिका दर्शनीयः। तदिह द्वे वार्त्तिके आद्यस्य तृतीयन्तु द्वितीयस्यापवाद इति स्थितम्। इदं त्ववधेयम्। इहाभिरूपदर्शनीयपदयोर्विशेष्यलिङ्गे प्रतिषिद्धे नपुंसकत्वं प्राप्नोति। भाष्यकारीयोदाहरणसामर्थ्यान्न भवतीति ॥

तदशिष्यं संज्ञाप्रमाणत्वात् ॥ तत् युक्तवद्वचनम्। अशिष्यम्, अकर्तव्यम्। कुतः। संज्ञानां प्रमाणत्वात्। अयं भावः। पञ्चाला वरणा इत्यादयो न यौगिकाः। तन्निवासेपि देशान्तरे अप्रयोगात्। देशे तन्नाम्नीत्यधिकृत्यादूरभवे प्रत्ययविधानाच्च। किन्तु संज्ञाशब्दा एते। ते च यल्लिङ्गसङ्ख्यतया लोके प्रसिद्धास्तत्र प्रमाणभूता एव। तदर्थप्रमाणका इत्यर्थः। यथा आपो दारा वनं गृहाः सिकता वर्षा इत्यादौ नेह शास्त्रेनुशासनमारभ्यं तदर्थमपि मास्तु। किञ्च ॥

लुब्योगाप्रख्यानात् ॥ लुबप्यशिष्यः। जनपदेलुप् वरणादिभ्यश्चेति। कुतः, योगस्यावयवार्थस्येह अप्रख्यानात्, अप्रतीतेः। तथा चात्र तस्यनिवासो ऽदूरभवश्चेति तद्धितो नैवोत्पद्यते किं लुपो विधाननेनेत्यर्थः ॥

योगप्रमाणे च तदभावे ऽदर्शनं स्यात् ॥ चकारो ह्यर्थे। यदि हि योगस्यावयवार्थस्येदं प्रमाणं बोधकं स्यात्तदा तदभावे न दृश्येत। दृश्यते च सम्प्रति। विनैव क्षत्रिययोगं जनपदे पञ्चालशब्दः। न च भूतपूर्वगतिः। क्षत्रिययोगादेशे देशयोगाद्वा क्षत्रिये शब्द इत्यत्र विनिगमकाभावेन वैपरीत्यस्यापि सुवचत्वापत्तेरिति भावः। अतोक्षादिवन्नानार्था एवैते इति तत्त्वम् ॥

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ प्रत्ययार्थः प्रधानमित्येवंरूपं वचनमपि अशिष्यं कुतः अर्थस्य लोकत एव सिद्धेः। आख्यातस्य क्रियाप्रधानतया व्यभिचाराच्चेत्यर्थः ॥

कालोपसर्जने च तुल्यम् ॥ अतीताया रात्रेः पश्चार्द्धेन आगामिन्याः पूर्वार्द्धेन च सहितो दिवसो ऽद्यतनः। विशेषणमुपसर्जनमित्यादिक्रमेण काल उपसर्जनं च पूर्वाचार्यैः परिभाषितं तत्रापि तुल्यम्। अशिष्यत्वं समानमित्यर्थः। लोकप्रसिद्धत्वादेवेति भावः ॥

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ॥ ब्राह्मणाः पूज्याः। ब्राह्मणः पूज्यः। एकोप्यर्थो वा बहुवदित्यतिदेशाद्विशेषणादपि सिद्धम्। बहूनां वचनं बहुवचनं प्रतिपादनमिति व्याख्यानाच्चातिदेशः फलितः ॥

अस्मदो द्वयोश्च ॥ एकत्वे द्वित्वे च विवक्षिते ऽस्मदो बहुवचनं वा स्यात्। वयं ब्रूमः। पक्षे अहं ब्रवीमि। आवां ब्रूव इति

वा। सविशेषणस्य प्रतिषेधः। पटुरहं ब्रवीमि। कथं तर्हि त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इति भर्तृहरिः। अत्रोन्नतत्वस्य विधेयत्वाद्भवत्येव। अनुवाद्यविशेषणपरत्वात्प्रतिषेधस्येति हरदत्तः। भाष्ये त्वेतत्सूत्रं प्रत्याख्यातम्। तथाहि। अहंकारावच्छिन्नेभ्यस्तानाञ्चक्षुरादीन्द्रियाणां तत्तादात्म्याद्हमुल्लेखगोचरता भेदाभेदप्रतीतिश्च। अहं शृणोमीति वन्मम श्रोत्रं शृणोतीत्यपि व्यवहारात्। तत्र चक्षुरादीनां बहुत्वाद्भेदस्वातन्त्र्ययोर्विवक्षायां वयं ब्रूम इति सिद्धम्। अभेदमात्रविवक्षायां तु एकवचनम्। न च गौणता। गौरोहमित्यादीनां यावद्व्यवहारं बाधाभावात्। एतेन पुष्यादिगुरावेकेषामिति वृत्तिकारेण पठितमपि गतार्थम्। त्वं गुरुर्यूयं गुरव इत्यस्योक्तरीत्या सिद्धेः। अत एवाचार्याः कथयन्तीत्यादिलौकिकप्रयोगोपि सङ्गच्छते॥

फल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे॥ द्वयोरित्यनुकर्षाद् द्वित्वे बहुत्वप्रयुक्तं कार्यं वा विधीयते। तेन विशेषणेपि सिद्धं, पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदाः। नक्षत्रे किम्। फल्गुन्यौ माणविके। फल्गुन्योर्जाते इत्यर्थः। फल्गुन्यषाढाभ्यां टाणाविति टः। टित्त्वान्ङीप्। एकस्यान्तु तारायां नेमौ शब्दौ प्रयुज्येते। उद्भूतावयवभेदे समुदायएव निरूढत्वात्। सूत्रे तु नक्षत्रे इति प्रथमाद्विवचनं नक्षत्रे यद्यभिधीयेते इत्यर्थात्॥

छन्दसि पुनर्वस्वोरेकवचनम्॥ द्वयोरेकवचनं वा स्यात्। पुनर्वसुर्नक्षत्रमदितिर्देवता। पुनर्वसू वा। लोके तूद्भूतावयवसमुदाये निरूढत्वाद्द्विवचनमेव। गाङ्गताविव दिवः पुनर्वसू॥

विशाखयोश्च॥ प्राग्वत्। विशाखा नक्षत्रमिन्द्राग्नी देवता।

पक्षे विशाखे। छन्दसीत्यनुवृत्तेर्लोके विशाखेइत्येव। अमरस्तु राध विशाखेति प्रयुञ्जानो द्विवचननियमं नेच्छति। सूत्रं तूदासीनम् ॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ छन्दसीति न सम्बध्यते पूर्वत्र चकारेणानुकृष्टत्वात्। एतदर्थ एव हि पूर्वत्र योगविभागः। तिष्य एकः। पुनर्वसू द्वौ। तेषां द्वन्द्वो बव्हर्थः। तत्र बहुत्वं द्वित्ववद्भवतीत्यतिदेशोऽयम्। तिष्यपुनर्वसू उदितौ। तिष्यपुनर्वसू इति किम्। विशाखानुराधाः। नक्षत्रेति किम्। तिष्यपुनर्वसवो माणवकाः। तिष्यपुनर्वसुशब्दाभ्यां नक्षत्रेण युक्तः काल इत्यण् लुबविशेषे। ततो जातार्थे सन्धिवेलादिसूत्रेणाण्। तस्य श्रविष्ठाफल्गुन्यनुराधेत्यादिना लुक्। माणकवृत्तिरयं द्वन्द्वो न तु नक्षत्रवृत्तिः। न चायं गौणः। यौगिकत्वात्। ननु नक्षत्रइत्यनुवृत्त्या सिद्धमेतत्। किं पुनर्नक्षत्रग्रहणेन। अत्र भाष्यम्। पर्यायाणामपि यथा स्यादिति। तस्यायं भावः। तिष्यपुनर्वस्वोः शब्दयोरभिधेये नक्षत्रे वर्त्तमानो यो नक्षत्रशब्दानां द्वन्द्व इति व्याख्यानात्। पुष्यपुनर्वसू सिध्यपुनर्वसू इत्यपि सिध्यतीति। स्यादेतत्। यथा भावेचाकर्मकेभ्य इत्यकर्मकश्रुत्यान्तरङ्गं द्रव्यकर्म निषिध्यते न तु बहिरङ्गं कालादि कर्म तथान्तरङ्गस्य कालस्य व्यावृत्त्या बहवस्तिष्यपुनर्वसवोतिक्रान्ता इत्यादेः सिद्धावपि माणवकस्य बहिरङ्गस्य व्यावृत्तये पुनर्नक्षत्रग्रहणमस्तु। यद्वा। तिष्यपुनर्वस्वोरिति योगं विभज्य देशान्तरस्थमपि तिष्यस्य कार्यं नक्षत्रएवेति व्याख्यास्यते। तेन तिष्यपुष्ययोर्नक्षत्राणि यलोप इति सिद्धम्। तस्माद्बहिरङ्गव्यावृत्त्या योगविभागेन वा कृतार्थे नक्षत्रग्रहणं कथं पर्यायग्रहणार्थं स्यात्। उच्यते। अकर्मकशब्दः श्रुत्यैव कर्म व्यावर्त्तयन् मुख्यमन्तरङ्गमेव व्यावर्त्त-

यतीति युक्तम् । नक्षत्रशब्दस्तु स्वार्थार्पणप्रनाड्या अर्थान्तरं व्यावर्त्तयन्नविशेषादुभौ व्यावर्त्तयतीति नाद्यं फलम् । नापि द्वितीयम् । पुष्यार्थवचनस्यावश्यकत्त्वात् । अत एव पक्षद्वयेऽप्यपरितोषाद्भाष्ये पक्षान्तरमुक्तम् । द्वन्द्वइति किम् । यस्तिष्यस्तौ पुनर्वसू येषान्ते तिष्यपुनर्वसवः । तिष्यादय एव विपर्ययविषया इह बहुव्रीहिणोच्यन्ते । अतो भवत्ययं नक्षत्रसमासः न तु द्वन्द्वः । बहुवचनस्य किम् । इदं तिष्यपुनर्वसु । सर्वो द्वन्द्वो विभाषयैकवत् । न्यायासिद्धं चेदम् । प्राण्यङ्गादीनां समाहार एवेति हि नियमः । न तु विपरीतः । चार्थेद्वन्द्व इति पृथग्विधानात् । प्रकृतसूत्रे बहुवचनग्रहणाच्चेति दिक् ॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥

सरूपाणामेकशेष एकविभक्तौ ॥ समानायां विभक्तौ यानि सरूपाण्येव दृष्टानि तेषां मध्ये एक एव शिष्यते । अनैमित्तिकत्त्वेनान्तरङ्गोयमेकशेषः सुब्उत्पत्तेः प्रागेव ङ्यन्ताबन्तप्रातिपदिकानां प्रवर्त्तते । हरिणी मृगी हरितवर्णा च । तयोः सहविवक्षायां हरिण्यौ हरिण्यः । क्षितिक्षान्त्योः क्षमा । वासोन सम्यक् क्षमयोश्च तस्मिन्निति श्रीहर्षः, श्रियौ नरेन्द्रस्य निरीक्ष्य तस्येति च । सकृच्छ्रुतात्सकृदर्थः प्रत्यय इति मते शब्दसारूप्येपि द्वन्द्वः स्यात् । अथापि तन्त्रेणानेकार्थताभ्युपगम्यते एवमपि सर्वत्र तन्त्रेणैव बोधनीयमिति नियमाभावात् पाक्षिको द्वन्द्वो दुर्वारः । आरब्धे त्वेकशेषे सुबन्तद्वयविरहात् द्वन्द्वस्याप्राप्तिरेव फलिता भवति । अत एव एकशेषस्य द्वन्द्वापवादकतेत्युद्घोषः । इकोगुणवृद्धीत्यस्य अलोन्त्यापवादकतोते पक्षे ऽपवादशब्दस्येत्थमेव व्याख्यातत्त्वात् । अत एव घटौ घटा

इत्यादीन्यपीहोदाहरणानि । तत्रापि ऐच्छिकस्यानेकव्यक्तिबोधोद्देश्यकस्यानेकविशकलितशब्दप्रयोगस्य घटोयं घटोयमिति बहुशो दर्शनेन तद्वदेव सहविवक्षायां घटावित्यादिद्वन्द्वस्य दुर्वारत्वात् । एतेन व्यर्थेषु च मुक्तसंशयमिति वार्त्तिकं दृष्ट्वा नानार्था एवेहोदाहरणमिति भ्राम्यन्तः परास्ताः । न च पदार्थतावच्छेदकभेदाभावाद्घटावित्यादौ द्वन्द्वप्रसक्तिर्नेति वाच्यम् । चार्थेद्वन्द्व इति सूत्रेण साहित्यमात्रे तद्विधानात् । तस्य चेतरेतरयोगद्वन्द्वे एकशेषे च विशेषणत्वं प्रयोगोपाधित्वं वा । समाहारद्वन्द्वे तु प्राधान्येन भानमित्यन्यदेतत् । न चैमपि घटकलशावित्यादिद्वन्द्वापत्तिः । विरूपाणामपि समानार्थानामिति वार्त्तिकेन एकशेषात् । वस्तुतस्तु सौत्र एवायमर्थः । रूप्यते बोध्यते इति रूपम्, अर्थः समानं रूपं येषामिति सरूपाः । ज्योतिर्जनपदेति समानस्य सभावः । सरूपाश्च सरूपाश्च तेषामिति एकशेषेण व्याख्यानात् । न च स्वाङ्गे स्वव्यापारायोगः व्याक्यापरिसमाप्तिन्यायादिति वाच्यम् । उद्देश्यतावच्छेदकरूपाक्रान्ततया तुल्यास्यप्रयत्नमिति वत्स्वस्मिन्नपि प्रवृत्तेः । एतद्विषयविवेचनं तु अइउणित्यत्रैव कृतम् । अत एव जननीवाचिनो मातृशब्दस्य धान्यमापवाचिनस्तृजन्तस्य च एकशेषं निषेद्धुं प्रवृत्ते मातृमात्रोः प्रतिषेधः सरूपत्वादिति वार्त्तिके स्वान्तर्गते मातृमात्रोरित्यत्रापि निषेधप्रवृत्तिः । नन्वर्थविशेषोपहितयोरेव तत्रानुवादः । अन्यथा जननीवाचिनोरपि निषेधापत्तेः, तत्कथं शब्दरूपपरे स्वान्तर्गते निषेधप्रवृत्तिरिति चेत् । प्रकृतिवदनुकरणमित्यतिदेशादिति गृहाण । सूत्रमते तूत्तरसूत्रादेवकारोत्रानुकृष्यते । तेन एकविभक्तौ यानि सरूपाण्येवेति व्याख्यानात्परिच्छेतृवाचिनश्चाप्तृन्निति सर्वनामस्था-

ने दीर्घविधानादसारूप्यादेकशेषाभावः । न च वाचार्नैकैकशेषविरहेपि श्लिष्टरूपकस्थलइव तन्त्रन्यायाश्रयेण पाक्षिक एकशेषो मातृमात्रोः स्यादेवेति वाच्यम् । यान्येकविभक्तौ सरूपाण्येव तेषामेवैकशेष इति नियमात् । न चैवं घटघटाविति पापाक्षिकं दुर्वारमिति वाच्यम् । तन्त्रावृत्त्याद्याश्रयणेन सरूपाणामेकशेष एवेत्यपरानियमाश्रयणात् । तस्मात् घटकुम्भौ कुम्भकुम्भौ मातृभ्यां चेति पाक्षिकमनिष्टत्रितयं प्राप्तं सूत्रेणानेन वार्यते । घटावित्यादिसिद्धिस्तु स्यादेवैतद्विनापि हि । जातिपक्षे व्यक्तिपक्षेपीति निष्कर्षसंग्रहः । स्यादेतत् । देवदेव इत्यादावपि तर्त्येकशेषः प्राप्नोति । न चैकविभक्ताविति्यनेन तद्वारणम् । तस्य सारूप्योपलक्षणत्वादेकशेषस्य चानैमित्तिकत्वात् । अथ वक्ष्यमाणरीत्या एकशेषविशेषणतां ब्रूषे, तथाप्यनिस्तारः । देवदेव इत्यत्रापि षष्ठीसमासादुपरि एकविभक्तेः सत्वात् । अन्तर्वर्तिन्योस्तु लुका लुप्तत्वेन प्रत्ययलक्षणाभावात् । अत्राहुः । सहविवक्षायामेव एकशेषः । इतरेतरयोगद्वन्द्वस्य विषये इति यावत् । यत्र ह्यनेकस्यार्थस्य मिलितस्येतरान्वयः स तथाभूतो विषयः । उक्तञ्च । अनुस्यूतेव भिन्नानामेका प्रख्योपजायते । यदा सहविवक्षान्तामाहुर्द्वन्द्वैकशेषयोरिति ॥ अयञ्च विषयनियमो ऽभिधानबलाल्लभ्यते वृद्धोयूनेत्यादिसूत्रेषु सहयोगे तृतीयायाः प्रयोगाच्च । यद्वा । पूर्वसूत्रात् द्वन्द्वे इत्यनुवर्त्तते । अर्थाधिकाराच्चेतरेतरयोगद्वन्द्वावगमः। तेन द्वन्द्वे प्रसक्ते सतीति व्याख्यानादुक्तविषयनियमसिद्धिः । न च द्वन्द्वे कृतइत्येव व्याख्यायतामिति वाच्यम् । स्वरसमासान्तादिदोषप्रसङ्गेन कृतद्वन्द्वानामेकशेष इति पक्षस्य दूषयिष्यमाणत्वात् । एतेन सारवसारवोर्मीज इति श्रीहर्षप्रयोगोपि

ख्यातः । सरव्यां भवाः सारवाः । ते च ते आरबसहिताश्चेति कर्मधारये सहविवक्षाविरहात् । विद्वन्मानसराजहंसेत्यादिश्लिष्टरूपके तु मानसमेव मानसमिति तन्त्रेण प्रयोगो न तु सौत्र एकशेषः । सहविवक्षाविरहात् । सारव इत्यत्रापि तथा स्यादिति चेत् । पक्षे एवमेव । तावतापि उभयप्रयोगस्य निर्वाह्यत्वात् । न चैवं समाहारद्वन्द्वविषये एकशेषानुशासनात्पाक्षिकं घटघटमित्यादि दुर्वारमेवेति वाच्यम् । तत्रानभिधानस्यैव शरणीकरणीयत्वात् । अस्तु वा तत्राप्येकशेषप्रवृत्तिः । न चैवं नपुंसकतापत्तिः । समाहारद्वन्द्व एव तदनुशासनात् । तथा च प्रत्यर्थं शब्दनिवेश इति पक्षे न ब्राह्मणं हन्यादित्यादौ सकलव्यक्तिसङ्ग्रहो भविष्यतीति प्रतिव्यक्तिलक्षणं नावर्तनीयम् । एकवच्चास्यान्यतरस्यामिति ज्ञापकादेकशेषे कृते एकवद्भावो नेति तु तत्त्वम् । एकश्च एकश्च द्वौ च द्वौ चेत्यादौ तु द्वन्द्वैकशेषौ उभावपि अनभिधानेनैव वारणीयौ । उत्सर्गतः संख्याशब्देष्येवमेवेति बोध्यम् । विंशतीत्यादौ त्वेकशेष इष्ट एवेति दिक् । एवं स्थिते सूत्रारंभपक्षेपि बहुशोऽनभिधानस्यैवाश्रयणाद् घटघटावित्यादावपि तथैवास्तु किं तन्निरासार्थं सूत्रारम्भेणेत्याशयेन भगवता एकशेषप्रकरणं प्रत्याख्यातम् । न चैवं पितराविति मातुः श्वशुराविति श्वश्वादेश्च प्रतीतिः कथं स्यादिति वाच्यम् । एकशेषारम्भेपि तौल्यात् । यः शिष्यते स लुप्यमानार्थाभिधायीति चेत्, तर्हि द्विवचनाद्युपाधिविशेषपुरस्कारेण पित्रादिशब्दानामेव मात्रादौ शक्तिर्निरूढलक्षणा चेति फलितोर्थः । तथा च लोकव्यवहारादेव तद्ग्रहसम्भवे न किञ्चिदनुपपन्नम् । न चैवमग्निचिदित्यादौ किबादयोपि प्रत्याख्यायतामिति वाच्यम् । प्रत्ययलक्षणेन तुगाग-

मप्रातिपदिकसंज्ञाद्यर्थं तदारम्भात्। तदेवं सरूपाणां विरूपाणां च सर्वमेकशेषं प्रत्याचक्षाणेनापि भगवता सरूपसूत्रमात्रं तु शास्त्रीये व्यवहारे संज्ञापरिभाषादिवद्विनापि सहविवक्षामेकशेषं विधातुं भविष्यतीत्याशयेन द्विर्वचनेचीत्यत्र एकशेष इति भाष्येभिहितमिति दिक्। आरभ्यमाणे तु सूत्रे यद्यपि षट् पक्षाः सम्भवन्ति तथापि तत्र त्रयो दुष्टा एव त्रयस्तु निर्दोषा इत्यवधेयम्। तथाहि। पृथक्सर्वेभ्यो विभक्तौ परत एकशेषः। एकवचनान्तानाञ्चाकृतद्वन्द्वानां वा समुदायादेकविभक्तौ वा युगपदधिकरणवचने वा अनैमित्तिको वेति षट् पक्षाः। तत्राद्ये एकशब्दः समानपर्यायस्तथा च वृक्ष स् वृक्ष स् इति स्थिते आद्ययोर्निवृत्तौ स् स् वृक्ष स् इति स्थिते संयोगान्तस्य पदान्तस्य लोप इति व्याख्याने मध्यमस्य सोर्लोपः। संयोगान्तं यत्पदं तदन्तस्येति व्याख्याने तु हल्ङ्यादिलोपः तत्रापि सुतिसीति प्रत्ययैः प्रकृतेराक्षेप इति पक्षे तु न कस्य चिल्लोपः। सर्वथापीष्टरूपं न सिध्यत्येव। आद्यन्तयोर्निवृत्तौ तु स् वृक्ष स् स् इति स्यात्। परयोर्निवृत्तौ तु वृक्ष स् स् इति स्यात्। तथा वृक्षा अनित्या इत्यादावन्तसुप्रत्ययश्रवणं स्यादिति दुष्ट एव प्रथमः पक्षः। द्वितीये तु वृक्ष स् इति सविभक्तिकस्यावस्थानात्। द्विवचनबहुवचनयोरनुत्पत्तिरेकवचनश्रवणञ्च स्यात्। तृतीये तु द्वन्द्वे इति अनुवर्त्य अभिमतवाक्यार्थो यद्यपि लब्धुं शक्यते तथापि अश्व अश्व औ इति स्थिते विभक्त्यपेक्षाच्छेषात्पूर्वमन्तरङ्गत्वात्समासान्तोदात्ते कृते यदि पूर्वशेषस्तार्हि सर्वानुदात्तं पदं स्यात्। परशेषे त्वन्तोदात्तं स्यात्। इष्यते त्वाद्युदात्तम्। अशेः कनिब्व्युत्पादनात्। यो अश्वेभिर्वहतेविभवोद्यश्वा इत्यादौ तथैव प्रयोगाच्च। किञ्च ऋक्च ऋक्च ऋचावि-

त्यत्रान्तरङ्गत्त्वादकूपूरिति समासान्ते कृते विभक्तेरकारेण व्यवधानादेकशेषो न स्यात् । समासान्तो हि समासभक्तस्तमेव न व्यवदध्यात् । स्वरूपं तु व्यवदधात्येव । समासार्थोत्तरपदस्यावयव इति भाष्यमतेपि विरूपत्त्वादेकशेषो दुर्लभः । विरूपाणामपि समानार्थानामिति तु यद्यपि प्राप्नोति तथापि पक्षे ऋच इत्यस्य शेषे टापि ऋचे ऋचा इत्याद्यपि स्यात् । एवं पथा पथौ इत्याद्यपि पक्षे स्यात् । अपि च करौ करा इत्यादि न सिध्येत् । प्राण्यङ्गानां समाहार एवेति नियमात् । अपि च सर्वेषामित्यादौ द्वन्द्वेच विभाषाजसीति प्रवर्त्तेत । अत एव विरूपैकशेषो न कृतद्वन्द्वानां तेषामित्यादौ त्यदादीनिसर्वैरित्येकशेषे सर्वनामत्वाभावप्रसङ्गात्तदेवं त्रयः पक्षा दुष्टा इति स्थितम् । सिद्धान्तस्तु त्रेधा । तथाहि । राम राम राम इत्यत्रावयवानामिव समुदायस्याप्येका प्रातिपदिकसंज्ञा तावदस्ति । मिलितेनार्थवत्त्वात् । न चार्थवत्समुदायानां समासग्रहणं नियमार्थमित्युक्तेः कथमेतदिति वाच्यम् । नियमस्य सजातीयविषयकत्त्वेन यत्र समुदाये पूर्वो भागः पदं तत्रैव प्रवृत्तेः । अत एव बहुपटव इत्यत्र प्रातिपदिकत्त्वं भवत्येवेत्युक्तमर्थवत्सूत्रे । तथा चैकाज्द्विर्वचनन्यायेन समुदायप्रातिपदिकादेव द्विवचनबहुवचनयोरुत्पत्तिः । तावताप्यवयवानां संख्यान्वयेनानुग्रहसम्भवात् । तथा च समुदायादेकविभक्तौ परत एकशेषः । रामकृष्णावित्यादौ तु यद्यप्युक्तरीत्या समुदायादेकविभक्तिः प्राप्ता तथापि द्वन्द्वविधावनेकं सुबन्तमित्यस्यानुवृत्त्या बाध्यते । अस्मिन्पक्षे मातृमात्रोरपि एकशेषः प्राप्तः । एकविभक्ताविति स्यावृत्त्या एवकारस्य चानुकर्षणेन एकविभक्तौ यानि सरूपाण्येवेति व्याख्यानान्न भवति । यद्वा युगपदधिकरणवचनतायां द्विवचनबहुवचना-

न्तानामेकशेषः। द्वन्द्वोप्येवम्। अजहत्स्वार्थायां हि वृत्तौ रामकृष्णावित्यादौ पूर्वपदमप्युभावभिधत्ते तावेवोत्तरपदमपि। न चान्यतरवैयर्थ्यम्। परस्परसमभिव्याहारेणैवोभयार्थताध्यवसायात्। तथा च द्वन्द्ववृत्तेः प्रागेकैकार्थतावगमेपि वृत्तावुभयाभिधानात्प्रत्येकं द्विवचनाद्युत्पत्तिः। एवमेकशेषवृत्तावपि परार्थाभिधानं वृत्तिरिति सिद्धान्तात्। तथा च रामश्च कृष्णश्चेति लौकिकवाक्यस्यादूरविप्रकर्षेण विग्रहतया प्रदर्शनेपि अलौकिकद्वन्द्वैकशेषयोः प्रक्रियावाक्ये राम औ कृष्ण औ इति प्रविशति। तथा च विभक्त्यन्तानामेकशेषोपि निर्बाध एव। अथ वा उपक्रमएव यथा व्याख्यातं तद्रीत्या अनैमित्तिक एवैकशेषः। तथा च पक्षत्रयं स्थितं सिद्धान्ते। अत्रेदमवधेयम्। उक्तपक्षत्रयमध्येपि समुदायादेकविभक्ताविति पक्षस्तावत् दुष्ट एव मातृमातारावित्यत्रातिप्रसङ्गं वारयितुं एकविभक्ताविति्यस्य सरूपाण्येवेत्येतद्विशेषणतया आवश्यकत्वे स्थिते एकशेषविशेषविशेषणत्वायोगात्। आवृत्तौ मानाभावात् फलाभावाच्च। न च पयः पयो जरयतीत्यादिव्यावृत्तिः फलम्। सहाविवक्षायामित्यस्य द्वन्द्वग्रहणबलेनावश्यवाच्यत्वात्। अन्यथा पयः पयो नयतीत्यत्र गौणमुख्यकर्मणोरेकशेषापत्तेः। देवदेव इत्यादावतिप्रसङ्गाच्च। प्रत्युत आवृत्त्योभयविशेषणत्वे भिक्षमिति न सिध्येत्। तथा हि। भिक्षा ३ आम् अ इति स्थिते अन्तरङ्गानपि विधीन्बहिरङ्गोपीति लुकि कृते लुका लुप्ते प्रत्ययलक्षणविरहादेकशेषो न स्यात् तथा युगपदधिकरणवचनतापक्षोपि दुर्बलः। जहत्स्वार्थायां वृत्तौ तदयोगात्। तथा च द्वितीये भाष्यम्। सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा चेति। तच्च तत्रैव स्फुटीकरिष्यामः। तस्मात्प्रागुक्तपट्पक्षीमध्ये ऽनैमित्तिकत्वपक्ष

एव प्रबलः । इतरे पञ्चापि हेया इति तदभिप्रायकतयैव सूत्रं व्याख्यातम् । पचतीत्यादौ तु धातोर्द्वन्द्वादिप्रसक्तिरेव नास्ति यद्वाक्यशेषो मृग्येत । न च मिलिताल्लडादिप्रसङ्गः । धातोरित्येकत्वस्य विवक्षितत्वात् । न चैकस्मादेव कर्तृद्वये लद्वयं कर्तृबहुत्वे लकारबहुत्वञ्च स्यादिति वाच्यम् । इष्टापत्तेः । लस्येत्यत्र जातिविवक्षया लद्वयस्य तसादयः बहूनान्तु झिथादय इति सुवचत्वात् । वस्तुतस्तु वर्तमामाने लडित्यादौ व्यक्तिनिष्ठैकत्वस्य विवक्षणान्न कश्चिद्दोषः । अत एव वृक्षंवृक्षं सिञ्चतीत्यादौ नानैकत्वाभिधानार्थं विभक्तिपरम्परा नेति दिक् । गर्गावित्यादावपि पितुरेकत्वात्प्रकृतिरेकाप्रत्ययास्तु बहवः । सर्वेषां प्रकृत्यर्थान्विताभिधायितया विरूपाणामपि समानार्थानामिति गर्गयशब्दस्य शेषः । न च पक्षे यशब्दमात्रस्यापि तदापत्तिः । विकल्पस्याष्टदोषदुष्टत्वात् । न च विनिगमकाभावः । अणुरपीति न्यायेन स्पष्टप्रतिपत्तिसामर्थ्यस्यैव विनिगमकत्वात् । यद्वा । यञ इत्यपि व्यक्तयैक्यं विवक्षितम् । प्रतिप्रधानञ्च गुणावृत्तिः । गार्ग्यशब्दत्रयस्य चैकशेषः । उभयथा यञन्तं यद्बहुष्विति लुक् । न चैवं काश्यपस्य प्रतिकृतिः काश्यपः । ततः प्रतिकृतीनां सहविवक्षायां काश्यपा इत्यत्रापि अजन्तं बहुषु वर्त्ततइति लुक् स्यादिति वाच्यम् । यस्कादिभ्योगोत्रइत्यतो गोत्रइत्यनुवृत्तेः । यद्यप्यपत्याधिकारादन्यत्र लौकिकं गोत्रं तथापहि ऋषिप्रजन एव गोत्रं विवक्षितमिति स्त्रीपुंसाभ्यांनञ्स्नञावितिसूत्रे कैयटः । तेन पौत्रा दौहित्रा इत्यत्र न लुगित्यवधेयम् । एतेन संख्यया कर्मभेद इत्यस्य व्युत्पादनाय प्रवृत्ते पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यादित्यधिकरणे सप्तदश प्राजापत्यानित्युदाहृत्य, किं त्वयं तद्धितान्ता-

नामेकशेषः कृतो भवेत् । किं वा कृतैकशेषाणां पश्चात्तद्धित-सङ्गतिरिति वदतां भट्टानां ग्रन्थोपि व्याख्यातः । ण्यप्रत्ययान्तानामेकशेषः । ण्यप्रत्ययान्तानामेव वेति तदाशयात् । कृतैकशेषाणां प्रजापतिर्देवता येषामिति कृतैकशेषयच्छब्देनोपस्थापितानां तद्धितसङ्गतिस्तद्धितवाच्यता । तथा च मिलितानां देवतासम्बन्धं बोधयितुं लौकिकविग्रहे येषामिति निर्देशः । वृत्तौ तु देवतावद्वाचकस्य तद्धितस्यैकशेष इति मिलितेषु पशुषु देवतान्वयादेको यागः । अग्नीषोमीय इत्यादौ मिलितयोर्देवतायामभेदान्वये यथेत्युदात्तवार्त्तिकस्योत्तरार्धेर्थोध्यवसेयः । युक्तं चैतत् । प्रत्ययार्थबहुत्वं हि प्रत्यक्षमुपलभ्यते । तत्कृतं चैकशेषत्वमिति न प्रकृतौ भवेदित्युत्तरवार्त्तिकस्यानुगुण्यात् । स्यादेतत् । प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् । अभेदश्चेह सम्बन्ध आग्नेयादावियं स्थितिरिति पक्षे देवतावतां साहित्यं लभ्यते न तु सहितानां देवताकत्वे देवतायां प्रदेये च खण्डशः शक्तिरिष्यतइति पक्षेपि एकप्रत्ययोपात्तदेवतान्वयस्यान्तरङ्गत्वादेवमेवेति चेत्सत्यम् । प्रदेयएव शक्तिः प्रकृतेस्तु प्रत्ययसमभिव्याहारादेवतायां निरूढलक्षणेत्याशयेनायं ग्रन्थो नेयः । केवलादेवतावाची तद्धितोग्नेः समुच्चरन्नित्यादिग्रन्थास्तु मतान्तराभिप्रायेण नेयाः । न चैवमपि विरूपैकशेषपक्षे समानार्थतालाभार्थं प्रकृत्यर्थान्वयस्य प्राथमिकत्वं स्वीकार्यमेवेति वाच्यम् । ययय इत्येषा मेकविभक्तिं प्रति प्रकृतित्वाभावे ऽपि-विभक्तौ परतः सारूप्यसम्भवेन सरूपैकशेष एवेत्याशयात् । प्रकृतमनुसरामः । स्वरभिन्नानां यस्योत्तरः स्वरविधिः स शिष्यतइति वक्तव्यम् । तेन पूर्वोदात्तते हरिण्यावित्यत्र ङीवन्तस्य पित्त्वादनुदात्तप्रत्ययकस्य शेषः । न तु जातौ पुंयोगे वा

यों ङीष् तदन्तस्य प्रत्ययस्वरेणान्तोदात्तस्य। ननु वर्णादनुदात्तादिति ङीषन्तस्यापि उदात्तनिवृत्तिस्वरेणान्तोदात्तता स्यादेवेति चेत्। भ्रान्तोसि। उदात्तनिवृत्तेरेवाभावात्। वर्णानान्तणातिनितान्तानामिति फिट्सूत्रेण प्रकृतेरनुदात्तत्वात्। तदुक्तं वर्णादनुदात्तादिति। तथा मीमांसते इति मीमासकः। लित्स्वरेण मध्योदात्तः। मीमांसामधीते मीमांसकः। क्रमादिभ्यो वुन्। नित्स्वरेणाद्युदात्तः। उभयोः सहविवक्षाया माद्युदात्तः। उभयोः सहविवक्षायामाद्युदात्तः शिष्यते नित्स्वरस्य परत्वात्। अक्षौ अक्षाः। अक्षस्यादेवनस्येति फिट्सूत्रेण शकटाक्षे आद्युदात्तः। देवनाक्षे तु फिष इत्यन्तोदात्तः। यद्वा। अशेर्देवने इति प्रत्ययान्तत्वादन्तोदात्तः। शकटावयवविभीतकयोस्तु घञन्तत्वादाद्युदात्तः। अत एव प्राचेयामेति सूक्ते अक्षकितवनिन्दाप्रस्तावअक्षस्याहमेकपरस्येत्यादयाक्षेशब्दा बहवोन्तोदात्ता एव प्रयुज्यन्ते। तस्य नाक्ष इत्यादौ तु रथावयवपरत्वादाद्युदात्तः। उभयोः सहविवक्षायान्तु आद्युदात्तस्य शेषः। इन्द्रियवाचिना क्लीबेन सहविवक्षायान्तु नपुंसकमनपुंसकेनेति अक्षमक्षाणीत्याद्यूह्यम्। नन्वचेतनानां देवतानां कथं पुंनपुंसकादिव्यवस्थेति चेत्। उच्यते। लोकप्रसिद्धमवयवसंस्थानविशेषात्मकलिङ्गं तावन्न व्याकरणे आश्रीयते। दारान् इत्यादौ नत्वाभावप्रसङ्गात्। तटस्तटीतटमित्यादौ यथायथं लिङ्गात् त्रितयनिबन्धनकार्याणामसिद्धिप्रसङ्गाच्च। किन्तु पारिभाषिकमेव लिङ्गत्रयम्। तच्च केवलान्वयि। अयमर्थः इयं व्यक्तिरिदं वस्त्विति शब्दानां सर्वत्राप्रतिबद्धप्रसरत्वात्। तत्र कश्चिच्छब्दः एकस्मिन्नेव लिङ्गे शक्तः कश्चित्तु द्वयोः कश्चित् त्रिष्विति लिङ्गानुशासनादिभ्यो निर्णेयम्। कुमारब्राह्मण-

दिशब्दास्तु लौकिकपुंस्त्वविशिष्टे शास्त्रीये पुंस्त्वे शक्ताः लौकिकस्त्रीत्वविशिष्टे च शास्त्रीयस्त्रीत्वे । कथमन्यथा कुमारी कुमार इत्यादयः प्रयोगा व्यवतिष्ठेरन् । करेणुरिभ्यां स्त्रीनेभइत्यमरस्याप्ययमेवार्थः । नन्वेवं पशुनेतिपुंस्त्वं विवक्षितमिति मीमांसकोद्घोषः कथं योज्यः । पारिभाषिकस्याव्यावर्त्तकतया तद्विवक्षाया अकिञ्चित्करत्वात् । लौकिकस्य तु पशुशब्दादप्रतीतेरिति चेत् । सत्यम् । छागो वा मन्त्रवर्णादिति षष्ठ्यन्त्याधिकरणन्यायेन पुंस्त्वस्य नियमो बोध्यः । छागशब्दस्य लौकिकपुंस्त्वविशिष्टपारिभाषिके शक्तत्वादिति दिक् । तच्च जातित्रयमित्येके । उक्तं च हरिणा । तिस्रो जातय एवैताः केषां चित्समवस्थिताः । अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिरिति भाष्ये तु स्त्रियामितिसूत्रे प्रकारान्तरमुक्तम् । संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः । संस्त्याने स्त्यायतेर्डट् स्त्रीसूतेः सप्रसवे पुमान् ॥ उभयोरन्तरं यच्च तदभावे नपुंसकमिति ॥ अयमर्थः । संस्त्यानं स्त्री । सत्वरजस्तमोलक्षणानां गुणानामपचयः । प्रसवो गुणानामुपचयः । स एव पुमान् । सूतेर्धातोः सप्सकारस्य पकारादेश इत्यर्थः । सूङो डुमसुञ्निति माधवः । यत्तूज्ज्वलदत्तेन यातेर्डमसुञ्नित्युक्तम् । यच्च पुंसोसुङितिसूत्रे न्यासरक्षिताभ्यां पुनातेर्मकसुन् ह्रस्वश्चेति सूत्रं पठितं तदुभयमपि भाष्याननुगुणन्तयोरुपचयापचययोरभावे सति यदुभयोरन्तरसदृशं तन्नपुंसकम् । नभ्राण्नपादिति निपातनादिति भावः । तथा च स्थितिमात्रं नपुंसकम् । अत एवाविर्भावतिरोभावयोरपि स्थितिसामान्यविवक्षासम्भवान्नपुंसकलिङ्गसर्वनामेति सिद्धान्तः । स्त्रीपुमान्नपुंसकमितिशब्दाश्च शुक्लयादिशब्दवद्धर्मे धर्मिणि वर्त्तन्तइत्यवधेयम् । स्वकृतान्त इति । कृता-

न्तौ यमसिद्धान्ताविति मरः । वैय्याकरणसिद्धान्ते इत्यर्थः ॥

वृद्धोयूनातल्लक्षणश्चेदेवविशेषः ॥ वृद्धो गोत्रम् । अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यैः सूत्रितत्वात् । यूना सहोक्तौ वृद्धः शिष्यते गोत्रयुवप्रत्ययमात्रकृतञ्च तयोर्वैरूप्यं कृत्स्नं स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । तल्लक्षणं किम् । भागवित्तिभागदित्तिकौ । कृत्स्नं किम् । गार्ग्यवात्स्यायनौ ॥

स्त्रीपुंवच्च ॥ यूना सह विवक्षायां वृद्धा स्त्री शिष्यते तदर्थश्च पुंवद्भवति । स्त्रीत्वस्य वैरूप्यकारणस्याधिक्यात्पूर्वेणाप्राप्तौ वाच्यम्, पुंवदिति विधातुञ्च । गार्गी च गार्ग्यायणौ च गर्गाः । अस्त्रियामित्यनुवर्त्तमाने यञञोश्चेति लुक् । दाक्षी च दाक्षायणश्च दाक्षी ॥

पुमान् स्त्रिया ॥ सरूपाणां मध्ये स्त्रिया सहोक्तौ पुमान् शिष्यते स च पुंवदेव स्यात्तल्लक्षणएव विशेषश्चेत् । सम्पृक्ता च सम्पृक्तश्च सम्पृक्तौ । यः शिष्यते स लुप्यमानार्थाभिधायीति सिद्धान्तात्स्त्रीत्वस्यापि सत्वेन टाप् प्राप्तः पुंवदेवेत्यनुवृत्तेर्न भवति । हंसश्च वरटा चेत्यादौ हंसजातिसाम्येपि शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वादेकशेषः प्राप्तः रूपग्रहणानुवृत्त्या वार्यते तदनुवृत्तौ च भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति सूत्रं ज्ञापकम्, अन्यथा एकापत्यत्वस्य अपत्यत्वस्य वा साम्यात्तत्रापि पुमान्स्त्रियेत्येव सिध्येत् । नन्वेवमपि गौरीयं गौश्चायं तयोः सहोक्तौ एतौ गावाविति नियमतो न स्यात् । नैष दोषः । इयमयमिति पदान्तरगम्योपि तल्लक्षणविशेषे पुमान्स्त्रियेत्यस्य प्रवृत्तिसंभवादिति कैयटः । स्यादेतत् । तल्लक्षणविशेषरूपो विशिष्टाभावोऽत्र हेतुः । स च किन्नरैरप्सारोभिश्च क्रीडद्भिरित्यादौ विशेषणाभावात् । गावावित्यत्र तु विशेष्याभावादित्यन्यदेतत् । तथा च किमर्थं

पदान्तरगम्यत्वपर्यन्तमुक्तमिति चेत्। उच्यते। नेह विशिष्टाभावः प्रयोजकः किन्तु तन्मात्रप्रयुक्तो विशेषः प्रयोजकः। अन्यथा भागवित्तंभागवित्तिकावित्यत्र वृद्धोयूनेति स्यात्। इह हि कुत्सासौवीरत्वाभ्यां प्रयुक्तोपि ठकि युवप्रयुक्ततास्त्येवेति विशिष्टाभावो निर्बाधः। एवमिन्द्रेन्द्राण्यावित्यत्र प्रकृतसूत्रं प्रवर्त्तते। हिमहिमान्यावित्यादौ चोत्तरसूत्रमिति दिक्। नन्वेवं गार्ग्यवात्स्यायनयोरतिप्रसङ्ग इति चेत्। योसौ विशेषः स तल्लक्षणश्चेदिति वचनव्यक्त्या पाठादुद्देश्यविधेयान्वयलाभात्। एवञ्च कृत्स्नस्य विशेषस्य तन्मात्रप्रयुक्तत्वं फलितम्। तेन पदान्तरपर्यन्तानुसरणं कैयटादीनां युक्तमेवेति दिक्। तदितरप्रयुक्तविशेषविरहरूपविशिष्टाभावाविवक्षायान्तु सर्वं सुस्थम्। एतेन सा च स च तावितिव्याख्यातम्। अनैमित्तिकस्यैकशेषस्य तद् तद् इत्यवस्थायां प्रवृत्तावपि पुंस्त्वनियमस्यैतेन लभ्यत्वात्। ब्राह्मणवत्सश्च ब्राह्मणीवत्सा चेत्यत्र तु न भवति। स्त्रीपुंसयोः सहविवक्षायामेकशेषः। सहविवक्षा च प्रधानयोरेव। तेन यत्र प्रधानयोरेव स्त्रीपुंसयोर्विशेषप्रयोजकता तत्रैव एकशेषप्रवृत्तेः। इह वा प्रधानकृतस्यापि विशेषस्य सत्त्वात्। एवकारानुवृत्तेर्नेह। इन्द्रेन्द्राण्यौ। इह हि पुंयोगकृतोपि विशेषः। आरण्यारण्यान्यौ। इह महत्त्वकृतोपि विशेषः।पुमानीतिकिम्। प्राक् च प्रतीची च प्राक्प्रतीच्यौ स्तः। प्रपूर्वादञ्चेः क्विबन्तादस्तातेरंचेर्लुगिति तद्धितश्चासर्वविभक्तिरित्यव्ययत्वादलिङ्गः प्राक्शब्दः॥

भातृपुत्रौ स्वसृदुहितृभ्याम्॥ यथासख्यं शिष्येते। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ॥

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्॥ अक्लीबेन स-

होक्तौ क्लीबं शिष्यते तच्च वा एकवत् स्यात्। तल्लक्षण एव चेद्विशेषः। शुक्लः कम्बलः शुक्ला बृहतीका शुक्लं वस्त्रं तदिदं शुक्लम्। तानीमानि शुक्लानि। अनपुंसकेनेति किम्। शुक्लश्च शुक्लश्च शुक्ले। एकवच्चेति न भवति। अस्येति किम्। उत्तरसूत्रे एकवद्भावानुवृत्तिर्मा भूत् ॥

पिता मात्रा ॥ मात्रा सहोक्तौ पिता वा शिष्यते। पितरौ। मातापितरौ। अयं योगः शक्योकर्तुम्। तथाहि यः शिष्यते स लुप्यमानार्थाभिधायीतिन्यायेनास्मिन्विषये पितृशब्द एव मातरमपि वक्तीति निर्विवादम्। तत्र च निरूढलक्षणा वा शक्तिरेव वेत्यन्यदेतत्। न च द्वन्द्वनिवृत्त्यर्थं सूत्रम्। तस्यापि पक्षे इष्टत्वात्। एवं श्वशुरः श्वश्वेत्यत्रापि बोध्यम्। एतेन पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथेत्यस्य व्याख्यावसरे विग्रहे क्रमप्रतीतेः प्रथमं माता धनभाक् तदभावे तु पितेति विज्ञानेश्वरग्रन्थश्चिन्त्यः। एकपदजन्ये बोधे क्रमाभावात्। सूत्रारम्भेप्येवमेव। प्रत्युत मुख्यार्थस्य प्रथमप्रतीतिरुचिता ॥ न तु लक्ष्यायां मातुः। यत्तु विग्रहे क्रमप्रतीतिरिति। तन्न। वृत्तिविग्रहयोः सहाप्रयोगात्। वृत्तेरेवेह व्याख्येयश्लोके प्रयोगात्। किं च वृत्तावपि प्रयुक्तायां विग्रहोपि स्मर्यतां कथञ्चित्। न तु तत्रापि पूर्वापरिभावे किञ्चिन्नियामकमस्ति। तस्मात्क्रमनिर्णये प्रमाणान्तरं मृग्यम् ॥

श्वशुरः श्वश्रूः ॥ श्वश्रूः सहोक्तौ श्वशुरो वा शिष्यते। श्वशुरौ। श्वश्रूश्वशुरौ। श्वश्वेति सौत्रनिर्देशादेव प्रत्ययान्तस्यापि प्रातिपदिकत्वम्। अन्यथा हि प्रकृतिवदनुकरणमिति ऊङन्ततृतीया न स्यात् ॥

त्यदादीनि सर्वैर्नित्यम् ॥ सर्वैस्त्यदादिभिरन्यैश्च सहोक्तौ

त्यदादीनि नित्यं शिष्यन्ते । प्रत्यासत्तेस्त्यदादिभिरेव सहोक्ताविति्यर्थो मा भूदिति सर्वग्रहणम् । स च देवदत्तश्च तौ । द्वन्द्वनिवृत्त्यर्थं वचनम् । ताविति तु सरूपसूत्रेणैव सिद्धं देवदत्तस्यापि तच्छब्देनैव निर्देष्टुं शक्यत्वात् । त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते शब्दपरविप्रतिषेधात् । स च यश्च यौ । पूर्वशेषोपि दृश्यतइति भाष्यम् । स च यश्च तौ । अहं च भवांश्चावाम् । त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि । आद्यादित्त्वात्तसिः । त्यदादीनां शेषे सहविवक्षितो योर्थः पुमान् यश्च नपुंसकं तद्वशेन लिङ्गवचनानि भवन्तीत्यर्थः । सा च देवदत्तश्च तौ । तच्च देवदत्ता च यज्ञदत्ता च तानि । पुंनपुंसकयोस्तु सहविवक्षायां नपुंसकवशेन व्यवस्थापरत्वात् । तच्च देवदत्तश्च ते । अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम् । कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्द्धे पिप्पल्यास्तत् । अर्धपिप्पली च सा अर्धपिप्पल्यौ ते । इह परवल्लिङ्गमिति समासार्थस्य लिङ्गातिदेशे कृते तद्विशेषणस्य सर्वनाम्नस्तदेव लिङ्गम् । भाष्ये तु एतत्सूत्रं प्रत्याख्यातम् । यदाह । सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात्सिद्धमिति । विशेषसन्निधौ हि प्रयुक्तः सामान्यशब्दो विशेषान्तरे वर्त्तते । ब्राह्मणा आगता वसिष्ठश्चेति यथा । तथाविधे विषये वाचनिकोयं द्वन्द्वनिषेधः । तेनैव तदेवदत्तावित्यादिनिवृत्तेः सिद्धत्वादयमेकशेषो न वक्तव्य इत्यर्थ इति कैय्यटः । कथं तर्हि शूद्राभीरङ्गो बलीवर्दं तृणोपलमिति । अत्राहुः । आभीरी जात्यन्तराणि । ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते । माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपादिति स्मृतेः ॥ शोशब्दस्तु स्त्रीगवीपरोयं स्त्रीलिङ्गः । अपामुलप इति नामधेयमिति । अनित्योयं निषेधः । प्राच्यभरतेष्वितिसूत्रनिर्देशाल्लिङ्गात् । तेन

प्रमाणप्रमेयेत्यादिषु द्वन्द्वः सिद्धः । एतेनाविद्या तच्चितो योगः षडस्माकमनादयः । मत्स्यादौ तद्विशेषयेरित्यादिप्रयोगा व्याख्याताः । सूत्रारम्भे त्वेतेन सिद्धयेयुरेवेति सत्हृदयैराकलनीयम् ॥

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ॥ एषु सहविवक्षायां स्त्री शिष्यते । पुमान् स्त्रियेत्यस्यापवादः । गाव इमाः । ग्राम्यग्रहणं किम् । रूरव इमे । पशुग्रहणं किम् । ब्राह्मणाः । सङ्घेषु किम् । एतौ गतौ चरतः । एकशेषस्यानेकविषयत्वे लब्धे सङ्घग्रहणसामर्थ्याद्बहूनां सङ्घो गृह्यते । अतरुणेषु किम् । वत्सा इमे । बकेरा इमे । अनेकशफेष्विति वक्तव्यम् । अश्वा इमे । गर्दभा इमे । एकशफत्वात्पुंशेष एव । शफं क्लीबे खुरः पुमानित्यमरः । हरदत्तस्तु शफाः खुरा इति प्राधुक्त । तत्र शफशब्दस्य पुंस्त्वे मूलान्तरं मृग्यम् । उष्ट्राणां त्वारण्यत्वात् स्त्रीशेषाभावः ॥

इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य द्वितीये पादे तृतीयमान्हिकम् ॥ पादश्च समाप्तः ॥

भ्वादयो धातवः । क्रियावाचिनो गणपठिता धातुसंज्ञाः स्युः । धातुत्वाल्लडादयः । भवति एधते । क्रियावाचिनः किम् । याः पश्येत्यादौ धातुत्वं मा भूत् । सति हि तस्मिन्नातोधातोरित्यालोपः स्यात् । न च याप्रापणइत्याद्यर्थनिर्देशो नियामकः । तस्यापाणिनीयत्वात् । भीमसेनादयो ह्यर्थं निर्दिदिशुरिति स्मर्यते । पाणिनिस्तु भ्वेध इत्याद्यपाठीदिति भाष्यवार्त्तिकयोः स्पष्टम् । किञ्च । अभियुक्तैरपि कृतोर्थनिर्देशो नार्थान्तरनिवृत्तिपरः सुखमनुभवतीत्यादावधातुत्वप्रसङ्गात् । उक्तञ्च । क्रियावाचित्वमाख्यातुमेकैकोर्थः प्रदर्शितः । प्रयोगतोनुसर्त्तव्या अनेकार्था हि धातव इति ॥ अत एव कुर्द खुर्द गुर्द गुद क्रीडायामेवेत्येव-

कारः। पच्यते श्लिष आलिङ्गनइत्यादिसूत्राण्यपीह ज्ञापकानि। तस्माद्याः पश्येत्यादिव्यावृत्तये क्रियावाचिन इति विशेषणं स्थितम्। गणपठिता इति किम्। हिरुक् पृथक् ऋते इत्याद्यव्ययानां शिष्ये इति भावार्थतिङन्तस्य च मा भूत्। न चैवं सौत्रेष्वव्याप्तिः। स्तम्भ्वादीनामुदित्करणेन धात्वधिकारीयकार्यविधानेन च धातुत्वानुमानात्। न चैवमपि लौकिकानां चुलुम्पादीनामसङ्ग्रहापत्तिः। भ्वाद्यन्ते यजादिसमाप्त्यर्थं वृत्करणेपि भ्वादीनामसमाप्तेः। धातुवृत्तिषु तथैव व्याख्यातत्वात्। कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति कात्यायनवचनेनाप्येतल्लभ्यते। एवं भ्वाद्यन्ते वृत्करणस्य पुषादिसमाप्त्यर्थतया दिवादीनामपरिसमाप्तेर्मृग्यतीत्यादिसिद्धिः। वस्तुतस्तु चुरादीनामन्ते बहुलमेतन्निदर्शनमिति गणसूत्रेण सकलेष्टसिद्धिः। तद्धि धातुवृत्तिषु द्वेधा व्याख्यातम्। भ्वादिगणपठितेभ्योपि णिच् प्रयोगानुसाराज्जप इति। दशगणीपाठो दिङ्मात्रप्रदर्शनार्थस्तेनान्येपि शिष्टप्रयुक्ता धातवः सङ्ग्राह्या इति च। स्यादेतत्। भूरादिर्येषामिति विग्रहे यणि सति भ्वादय इति स्यात्। क्रियावाचित्वञ्च सूत्रानारूढमेवेति। उच्यते। भवनं भूः क्रियासामान्यम्। वदन्तीति वादयः वदेरौणादिक इञ् इति भाष्यम्। यद्यपि वसि वपि यजि राजि व्रजि सहि हनि वासि वादि वारिभ्य इञित्यौणादिकसूत्रेण वदेर्ण्यन्तादिञ् विहितस्तथापि बहुलग्रहणात् केवलादपि भविष्यतीति न्यासकारादयः। वस्तुतस्तु वदन्तीति वादय इतिभाष्यमर्थकथनपरम्। ण्यन्तादेव त्विञ्। न चेह ण्यर्थानन्वयः। पचतिपाचयत्योस्तुल्यार्थत्वात्। भुवो वादय इति विग्रहः। तथाच क्रियावाचित्वं तावत्सूत्रारूढम्। निरनुबन्धानां शब्विकरणानां भूप्रभृतीनां पाठसामर्थ्यात्पठितानामेव संज्ञेत्यनुमीयते। सनाद्य-

न्ता धातव इति सूत्रारम्भाच्च । अथ वा भूरादिर्येषामिति विग्रहः । निपातनाद्गुणागमः महासंज्ञाकरणं तु दधति क्रियामिति धातव इत्यन्वर्थसंज्ञाविज्ञानार्थम् । यद्वा । भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोस्तु व्यवस्थाप्रकारवाचिनोरेकशेषः । ततो भूवौआदी येषामिति बहुव्रीहिः । भूप्रभृतयो वासदृशाः क्रियावाचिन इति यावत् । अथ वा वाइत्ययमादिर्येषामिति बहुव्रीहिः वाइत्यस्यादय इति तत्पुरुषः । तयोरेकशेषे स्वरभिन्नानामिति बहुव्रीहिशेषः । भुवो वादय इति षष्ठीतत्पुरुषः । वाच्यवाचकभावश्च षष्ठ्यर्थः । द्विर्वचनेचीतिवत्तन्त्रावृत्त्यादिना वा उभयलाभः । सर्वथापि क्रियावाचिनो भ्वादय एव धातव इति स्थितम् । का पुनः क्रिया । उच्यते । करोत्यर्थभूता उत्पादनापरपर्याया उत्पत्त्यनुकूलव्यापाररूपा भावनैव क्रिया । तथाहि । अभवतो गगनादेरक्रियमाणतया भवतश्च घटादेः क्रियमाणतया भवत्यर्थकर्तुः करोतिकर्मत्वम् । तथा च करोत्यर्थकर्तुर्भवितृप्रयोजकतया भवतेरुत्पत्त्यर्थाप्रयोजकव्यापारे णिजुत्यद्यमानः करोत्यर्थमवलम्बते । उक्तञ्च । करोतिक्रियमाणेन न कश्चित्कर्मणा विना । भवत्यर्थस्य कर्त्ता च करोतेः कर्म जायते ॥ करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः । भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते ॥ प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः । ण्यन्ता एव प्रयुज्यन्ते तत्प्रयोजककर्मसु ॥ तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः । प्रयोजककृियामाहुर्भाविनां भावनाविद इति ॥ सा च सकलधातूनां वाच्या । अत एव किं करोतीति प्रश्ने पचतिपठतीत्याद्युत्तरं सङ्गच्छते । न चासौ मीमांसकोक्तरीत्या प्रत्ययवाच्यैवास्तामिति वाच्यम् । भोक्तव्यमित्यादावाख्यातं विनापि तत्प्रतीतेः । तथा च तत्रापि कारकापेक्षा दृश्यते । अस्ति च तत्रापि करो-

तिसामानाधिकरण्यं, किं कर्त्तव्यं, भोक्तव्यम्, किं कृतवान्भुक्तवानिति। किञ्च। भावयति घटमिति वर्त्तमाने भवति घटमित्यपि स्यात्। तुल्यार्थत्वात्। दृष्टान्ते कर्तुः कुम्भकारस्य व्यापारं णिजाचष्टे दार्ष्टान्तिके त्वाख्यातप्रत्ययः। ननु प्रयोजकव्यापारो णिजर्थः कर्तृव्यापारस्त्वाख्यातार्थ इति वैषम्यमिति चेत्। कारकचक्रप्रयोक्तुः कर्तृत्वे घटस्यातथात्वात्। यदि तु धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यतइतिभर्तृहरिप्रतिपादितरीत्या प्राधान्येन धातूपात्तव्यापारत्वरूपं कर्तृत्वं तवापि सम्मतं कस्तर्हीदानीमाख्यातार्थः। व्यापारस्य धातुनैवाभिहितत्वात्। अपि च। धातोः सकर्मकाकर्मकत्वविभाग उच्छिद्येत। अकर्मकाच्चेत्यादिसूत्राणि च विरुध्येरन्। ननु सिद्धान्तेऽपि क्रियायाः कर्मापेक्षानियमात्कथमकर्मकतेति चेत्। न। फलव्यापारयोः सामानाधिकरण्यवैयधिकरण्याभ्यां सकर्मकाकर्मकविभागस्य वक्ष्यमाणत्वात्। किञ्च। ज्योतिष्टोमयाजीत्यादौ करणे यज इति णिनिरस्मत्पक्षे सङ्गच्छते। धातुत्वेन धातूपात्तां भावनां प्रति यजित्वेन तदुपात्तस्यांशान्तरस्य करणत्वात्। पच्यादयो हि धातुत्वेन भावनामाहुः। विक्लित्याद्यंशान्तरे तु पाचित्वादिना प्रातिस्विकरूपेणाहुः। तच्चांशान्तरभावतां प्रति प्रायेण भाव्यतया सम्बध्यते। ज्योतिष्टोमयाजीत्यादौ तु करणतया ज्योतिष्टोमाख्येन यागेन स्वर्गं भावितवानित्यर्थप्रतीतेः। स्पष्टं चेदं णिनिविधौ हरदत्तग्रन्थे। एतेन द्व्यर्थः पचिरिति भाष्यं व्याख्यातम्। भट्टिश्चाह, विभज्यसेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोथ। नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातूनिति॥ ननु क्रियाया धात्वर्थत्वे पचतीत्यादौ एककर्तृका वर्त्तमाना पचिक्रियेति क्रियाविशेष्यको बोधो न स्यात्। प्र-

त्ययार्थे मति प्रकृत्यर्थस्य विशेषणतायां औपगवादौ कृलृप्तत्वादिति चेन्न । प्रत्ययार्थः प्रधानमिति न्युत्सर्गः स चेह त्यज्यते । क्रियाप्रधानमाख्यातमिति स्मरणात् । पाचिकेत्यादौ स्त्रीत्वस्य विशेषणत्वाभ्युपगमाच्च । प्रत्युत तवैव पचतीत्यादावनुपपत्तिः । पचन्तं तं पश्येत्यादौ शतृशानचोः कर्तृप्रधान्यस्य सर्वसम्मततया तिङ्ष्वपि तथात्वापत्तेः । शत्रादीनां तिङाश्च लादेशत्वस्याविशिष्टत्वात् । आदेशानाञ्च स्थानिस्मारकत्वे स्थान्यर्थाभिधायित्वे वार्थैक्यप्रौढ्यात् । अत एव हि युष्मदि समानाधिकरणे मध्यमः अस्मद्युत्तम इत्यादिपुरुषव्यवस्था सङ्गच्छते । अभिहिते कर्तरि प्रथमेत्यादि च । न च समानाधिकरणइत्यनेन स्वाभिधेयसंख्यान्वयित्वमभिहितशब्देन चाभिहितसङ्ख्याकत्वं विवक्षितमिति वाच्यम् । सूत्रानुगुणत्वात् । कृत्तद्धितसमासैः संख्याया अभिधानात्तदभिहितेपि तृतीयाप्रसङ्गाच्च । न च कृत्यनभिधानमेव कर्तुरनभिधानमिति वाच्यम् । भावार्थलकारोपि कर्तरि प्रथमापत्तेरिति दिक् । स्यादेतत् । अस्तिभवतिविद्यतिषु क्रियावाचिलमव्याप्तम् । नहि तत्रोत्पादः प्रतीयते । एवन्तिष्ठतावपि तथा जायतउत्पद्यते इत्यत्राप्यव्याप्तिः उत्पत्तिर्हि आद्यक्षणसम्बन्धः । तदनुकूलव्यापारश्चोत्पादना । तदनुभवश्चास्त्यादिभ्यो नास्त्येष । अत एव किं करोतीति प्रश्ने पचतीत्यादिवदस्तीति न प्रतिब्रुवतइति चेत् । उच्यते । अस्तीत्यादेः स्वरूपधारणं करोतीत्यर्थः । धारणञ्चोत्तरकालसम्बधः । तथासत्यपि करोत्यर्थे धात्वर्थान्तर्गतेन धारणेनैव भाव्यकाङ्क्षायाः पूरणात् जीवतिनृत्यत्यादिवदकर्मकता क्रिया हि व्यापारव्यधिकरणैवोत्पत्तिरुच्यते । अत एव तत्र घटादीनां कर्मता । परसमवेतव्यापारफलीभूतोत्पत्तिशालित्वात् । जनि-

प्रभृतिभिस्तु व्यापारसमानाधिकरणैवोच्यते। अत एवाकर्मकता तेषाम्। सोत्पत्त्यनुकूलव्यापारभाजामपि सूक्ष्मरूपापन्नघटादीनां परसमवेतत्वघटितकर्मताविरहात्। उक्तञ्च हरिणा। आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यतइति॥ अन्येप्याहुः। अस्त्यादावपि धर्म्यंशे भाव्येस्त्येव हि भावना। अन्यत्राशेषभावात्तु सा तथा न प्रकाशतइति॥ तथा पचौ विक्लित्तिर्यद्यपि साधारणी तथापि पचौ व्यापारव्याधिकरणा विक्लित्तौ तु तत्समानाधिकरणा सेति सकर्मकाकर्मकविभागः। नहि धात्वर्थभूतफलशालित्वमात्रं कर्मत्वं किन्तु व्यापारवैयधिकरण्यमपि फलेपेक्ष्यते। यत्तूक्तं किं करोतीति प्रश्ने इत्यादि। तदसिद्धम्। आसन्नविनाशं कञ्चिदुद्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पाकादिविशेषगोचर एवेत्यवधारणादस्तीति नोत्तरम्। एतेन यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयतइत्यपि व्याख्यातम्। पूर्वापरीभावापन्नानेकक्षणविशिष्टस्योत्पत्तिरात्मास्तीत्यादावपि सुलभैवेति भावः। पचत्यादावपि हि अधिश्रयणादिरधःश्रयणान्तो व्यापारकलापः क्रिया। अत एव तस्य युगपदसन्निकर्षान्न प्रत्यक्षता। किन्तु एकैकस्याधिश्रयणादिव्यापारस्य क्रमेणानुभवे सति मनसा सङ्कलना क्रियते। तदुक्तं भाष्ये। क्रिया नामेयमत्यन्तापरिदृष्टा अशक्या पिण्डीभूता निदर्शयितुमिति। ऐक्यमपि पारिभाषिकम्। एकफलावच्छिन्नत्वात्। उक्तं च। गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यतइति॥ तदेवं भवत्यादौ क्रियावाचकत्वं सुवचम्। अत एवाभूदस्तिभविष्यतीति का-

लयोगः। न हि क्रियात्वं विनासौ सम्भवति। तदुक्तम्। क्रिया-भेदाय कालस्तु सङ्ख्या सर्वस्य भेदिकेति॥ कालानुपातियद्भू-षन्तदस्तीति प्रतीयतइति च॥ भाष्ये तूक्तार्थसाधनाय निरुक्त-कारवचनमुदाहृतम्। षड्भावविकारा इति ह स्माह भगवान्वार्षा-पणिरिति। भावस्य क्रियायाः षट् प्रकारा इत्यर्थः। तेषु च जायते ऽस्तीति पाठात्सर्वक्रियान्वयः सिद्ध इत्यर्थः। कैयटस्तु प्रकारा-न्तरेणापि व्याचख्यौ। भावास्य सत्ताया एते प्रकाराः सप्तैवा-नेकक्रियात्मिका साधनसंबन्धादवसीयमानसाध्यस्वरूपा जन्मा-दिरूपतयावभासतइति। तथा च। जातिसमुद्देशेपि सम्बन्धिभे-दत्सत्तैवेत्युपक्रम्योक्तम्, प्राक्रमविशेषेषु क्रिया सैवाभिधीयते। क्रमरूपस्य संहारे तत्सत्वमिति कथ्यतइति॥ व्यापारविशेषाणां साध्यत्वात् क्रमिकत्वाच्च तदुपहितायास्ते भवत इत्यर्थः। पाक इत्यादौ तु प्रकृत्या साध्यावस्थाया असत्वरूपाया उपस्थितिः। घञा तु सिद्धरूपायाः। उक्तञ्च। क्रियायाः सिद्धतावस्था सा-ध्यावस्था च कीर्त्तिता। सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छीन्त घञ्विधिम्॥ आख्यातशब्दे भागाभ्यां साध्यसाधन व-र्तिता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥ साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सत्व-भावस्तु यस्तस्याः स घञादि निबन्धन इति॥ लिङ्गसङ्ख्या-कारकाद्यन्वययोग्येनावस्थाविशेषेण घञादिभ्य उपस्थितिरि-त्यर्थः। एतेन कृदभिहितो भावो द्रव्यवत्प्रकाशतइति तृतीया-ध्याये भाष्यमपि व्याख्यातम्। प्रकल्पितेत्यनेन पदस्फोट-स्यैव वास्तवतां ध्वनयति। साध्यत्वेनेति। अत एव तम्प्रति कारकतया ओदनादेरन्वय इति भावः। अत एव भोक्तुं पा-को भुक्त्वा गमनमित्यादौ तुमुनादयः सिद्धाः। क्त्वोर्थास्त्व-

नभिधानान्नेत्येव शरणम्। अत एव क्व चिद्दृश्यतेपि द्विर्वचनम्। द्विरणिविधिरिति सूत्रवार्त्तिकयोः प्रयोगात्। सत्त्वभावस्त्विति। अत एव पाकं करोतीत्यादौ कारकत्वेन सान्वेतीत्यर्थः। नन्वेवं पश्य मृगो धावतीत्यादौ मृगकर्तृकशीघ्रगतेर्दर्शनम्प्रति कर्मता न स्यात्। न च संसर्गमर्यादयेह कर्मताभानेपि प्रकारत्वेनाभानान्नोक्तदोष इति वाच्यम्। एवमपि पचतिभवतीत्यादावसङ्गतेः। एककर्तृका वर्त्तमाना पचिक्रिया एककर्तृका वर्तमाना भवनक्रियेति हि तत्र वाक्यार्थः। तत्र च भवतीति लकारार्थस्य कर्तुर्देवदत्तकर्तृकपचिक्रियां प्रत्यभेदेन संसर्गेण विशेष्यत्वस्यावश्यकत्वात्। तथा च देवदत्तवत्पचिक्रियायाः सत्त्वधर्मो दुर्वारः। अत्राहुः। कर्तृत्वकर्मत्वयोरनुभवबलाद्भानं स्वीक्रियते। कारकान्तराभावमात्रे तु तात्पर्यमिति। आख्यातशब्दे भागाभ्यामित्युदाहृतश्लोकोप्येतदभिप्रायक एव। तत्र यं प्रतीत्युत्तरश्लोकानुरोधादिति तृतीये स्फुटीकरिष्यामः। एतेन अपाक्षीदपाक्षीः पचतः पचन्ति पक्ष्यति पक्ष्यत इत्यादावपि भवतीत्यनेन कर्तृत्वेनान्वयो व्याख्यातः। भावी वर्त्तते ध्वस्तोस्तीत्यादाविव सूक्ष्मावस्थस्य वर्त्तमानसत्तासम्भवात्॥

उपदेशेजनुनासिक इत्॥ उपदेशेनुनासिकोजित्संज्ञः स्यात्। उपदिश्यतेनेनेत्युपदेशः। कृत्यल्युटो बहुलमिति बाहुलकात्करणे घञ्। अन्यथा ल्युट् स्यात्। स च धातुपाठप्रातिपदिकपाठौ सूत्रवार्त्तिके च। एतौहि शब्दा उपदिश्यन्ते। तत्र शास्त्रकृता पठितस्याप्यनुनासिकस्य पाठ इदानीमप भ्रष्टः। अत एवाहुर्वृत्तिकाराः। प्रतिज्ञानुनासिक्याः पाणिनीया इति। तत्र एधस्पर्धेत्यादावनुदात्तेत्वादात्मनेपदम्। एधते। स्पर्धते। भवत्वित्यत्रो-

गित्त्वान्नुम्। भवान्। लण्सूत्रे अकारस्येत्त्वाद्रप्रत्याहारसिद्धिः। आचारेवगलभक्लीबहोढेभ्य इति वार्त्तिके ऽवगलभोदेरनुनासिकस्त्वेनानुदात्तेत्त्वात्तङ्। अवगलभतइत्यादि। उपदेशे इति किम्। अभ्रञाँअपः। आङोनुनासिकश्छन्दसीत्यनुनासिकः। नासौ शास्त्रे पठितः। नन्वेवं उञ ऊँ इत्यत्रातिप्रसङ्गः। विधानसामर्थ्यान्नेति तु प्रकृतेपि तुल्यम्। अथानुबन्धा अनेकान्ता इति पक्षे अभूञाँ अटित इत्यादावादितश्चेतीण्निषेधार्थमित्संज्ञा किन्न स्यादिति चेन्न। एवमपि आङ इदिति वक्तव्ये अनुनासिकविधानस्य वैयर्थ्यापत्तेः। एतेन दधि इच्छतीति दधि ब्राह्मणकुलं दधीयतेः किप्यल्लोपयलोपयोर्ह्रस्वत्वे चाणोप्रगृह्यस्येत्यनुनासिकः। अत्रेदितोनुम्धातोरिति नुम् स्यात्। दधि मध्वित्यादिषु प्रातिपदिकेषु भवतिपचतीत्यादिषु च इत्कार्यं लोप एव स्यात्। तस्मादुपदेशग्रहणं कर्त्तव्यमिति परास्तम्। अणोप्रगृह्य इदिति वक्तव्ये ऽनुनासिकविधानसामर्थ्यादित्संज्ञाविरहोपपत्तेः। सत्यम्। उत्तरार्थमुपदेशग्रहणम्। आजीति किम्। मनिन्प्रत्यये मकारस्य मा भूत्। सत्यां हि तस्यामन्येभ्योपि दृश्यन्तइति हलन्तेष्वित्यादचः परः स्यात्। अनुनासिकः किम्। चिरिणोति जिरिणोति॥

हलन्त्यम्॥ उपदेशेन्त्यं हलित्स्यात्। यद्यपि सर्वो हल् तन्तमवधिं प्रत्यन्त्यो भवति तथापि धातुप्रातिपदिकत्वाद्युपाधिपरिच्छिन्नसमुदायं प्रत्यन्त्य इह गृह्यते। अन्त्यग्रहणसामर्थ्यात्। शीङ् स्वप्ने ङित्त्वात्तङ्। शेते। उपदेशे किम्। अग्निचित्। श्रोत्रियञ्छन्दोधीते क्षत्रियच् परक्षेत्रे चिकित्स्य इत्यादौ तु वाक्यार्थे पदवचनामिति पक्षे ऽविद्यमानप्रकृतिप्रत्ययविभागेप्युपदेशेन्त्यत्त्वाद्भवत्येवेत्संज्ञा। सनुत इत्यस्य स्वरादिपाठा-

दित्संज्ञा प्राप्ता उच्चारणसामर्थ्यान्न भवति । न च रित्स्वरः प्रयोजनम् । अन्तोदात्तनिपातनवैय्यर्थ्यापत्तेः । स्यादेतत् । हल्प्रत्याहारसिद्धेरेतत्सूत्रसापेक्षत्वादन्योन्याश्रयः । पदार्थबोधं विना वाक्यार्थज्ञानासम्भवात् । अत्राहुः । हल् च ल् चेति समाहारद्वन्द्वे संयोगान्तलोपेन लकारोप्यत्र निर्दिश्यते । तेन लस्येत्संज्ञायां सत्यामादिरन्त्येनेति हल्संज्ञा । ततोन्त्यं हलिदिति वाक्यार्थबोधः । यद्वा । हल् इति तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणाद्धस्य समीपवर्त्ती लकारो हल् स इदिति । सम्पूर्णसूत्रावृत्त्या हल्सूत्रस्यान्त्यं हलन्त्यमिति वा । इह पक्षत्रये पूर्वः पूर्वः प्रबलो लाघवादिति तत्त्वम् । यद्वा । हल्सूत्रे लृकारस्यैव तवल्कार इतिवद् गुणभूतस्य निर्देशः । तस्य च पुषादिद्युताद्यृलृदित इति ज्ञापकादित्संज्ञा । न तूपदेशेजनुनासिक इति। अच्संज्ञाया अद्याप्यनिष्पादात् । यत्तु णलो लित्करणं ज्ञापकमिति । तच्चिन्त्यम् । लित्त्वस्याद्याप्यसिद्धेः । न च बिभेदेत्यत्र लोपाभावार्थं हल्ङ्यादिसूत्रे ऽपृक्तं हलिति द्वितीयहल्ग्रहणं तत्र ज्ञापकमिति वाच्यम्। भवितेत्यादौ डानिवृत्त्यर्थं हल्ग्रहणोपपत्तेः। न च सुतिसीतिप्रत्ययैः प्रकृतेराक्षेपान्नैवमिति वाच्यम् । यासेत्यादौ सुलोपानापत्तेः । न चैकदेशविकृतस्यानन्यत्वादेकादेशस्य च पूर्वान्ततया ग्रहणाद्धलन्तायाः प्रकृतेः परत्वेनेष्टसिद्धिः । यः स इत्यत्रातिप्रसङ्गात् । तस्माल्लोपप्रवृत्तिकाले हलन्तत्वं वाच्यम् । तच्च यासेत्यत्रापि नास्ति किं त्वाबन्तात्परत्वमाश्रित्य लोपः कार्यः । न च तत्राबन्ता प्रकृतिः । उभयत आश्रयणेन्तादिवद्भावायोगात् । अथ तदस्यांग्रहरणमिति निर्देशादाबन्तस्थले उभयतआश्रयेप्यन्तादिवद्भावं ब्रूषे तथापि हल्शब्दस्यैवाद्यापि शक्त्यग्रहे कथं हल्ग्रहणसमार्थ्याण्णलो लित्वं

निश्चेयम्। न च लितीति ज्ञापकम्। ल्युडादौ चरितार्थत्वात्। तस्मादुक्तमकारचतुष्टयमेव शरणम्। स्यादेतत्। आद्ये हल्संज्ञातः पूर्वं कथं संयोगान्तलोपः। संयोगसंज्ञाया अनिष्पत्तेः। द्वितीये हस्य ल् इति कथं सवर्णसः। सुप्संज्ञाया श्रानिष्पादात्। एवं तृतीये हलोन्त्यमिति तत्पुरुषः कथम्। चतुर्थे च लृदित इति बहुव्रीहिः कथम्। उच्यते। साधुत्वज्ञानोपयोगिनः शास्त्रस्याप्यर्थबोधो यदि तद्बोध्यसाधुत्वानां पदानां स्वार्थानुभावकतायामुपयुज्येत तदैष दोषः स्यात्। स च नोपयुज्यते। प्रमाणाभावात्। शतशो व्यभिचाराच्च। यथा चैतत्तथा अइउणित्यत्रैव प्रतिपादितम्॥

न विभक्तौ तुस्माः॥ विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। रामान्। पचेरन्। ब्राह्मणाः। पचतः। रामम्। अद्राक्षम्। विभक्तौ किम्। अचो यत्, ऊर्णाया युस्, रुधादिभ्यः श्नम्, प्राग्दिशोविभक्तिरिति यत्र विभक्तिसंज्ञा तत्रायं निषेधो न भवति।इदमस्थमुरिति मकारपरित्राणार्थमुकारानुबन्धासञ्जनाज्ज्ञापकात्। तेन किमोत्, क्व इति सिद्धम्। स्यादेतत्। तदानीमित्यादौ दानीमोपि तर्हि मित्त्वं स्यादिति चेन्न। यान्तत्वात्तस्य। यकारोहंत्यत्वमनुभवन्मकारस्येत्संज्ञां प्रतिबन्धाति। संयोगान्तस्य लोप इति यलोपस्येत्संज्ञां प्रत्यसिद्धतया मकारस्यान्त्यत्वाभावात्। यद्वा। इदमस्थमुरित्यनेनानित्यत्वमात्रं ज्ञाप्यते। न तु प्राग्दिशीयेष्वप्रवृत्तिः। औत्, इटोदित्यत्र तु सुखमुखार्थस्तकारः। न त्वित्संज्ञकः। तित्स्वरापत्तेः। न चेष्टापत्तिः। उरौवाये। भक्षीयतवराधारा इत्यादौ उरौभक्षीयेत्यनयोरन्तोदान्ततादर्शनात्। आद्युदात्तश्चेति सूत्रे भविषीयेत्यत्र भाष्यकारैरेवान्तोदात्तत्वस्य सिद्धान्तितत्वाच्च। यत्त्विह वृत्तिकृतोक्तम्, किमोत्,

इटोत् इत्यत्रायं निषेधो न भवति अनित्यत्वादस्य विधेरिति। तत्स्वोक्तिविरुद्धम्। इटोदिति सूत्रे तकार उच्चारणार्थ इति तेनैवोक्तत्वात्। तस्मादभ्युपेत्यवादमात्रम्। यद्वा। इटोदित्यत्रास्य अकारमात्रस्य विधेः। अनित्यत्वादिति तु किमोदित्येतत्परमिति व्याख्येयम्॥

आदिर्ञिटुडवः॥ उपदेशे आदिभूताः ञि टु डु एते इतः स्युः। ञिइन्धी। इद्धः। टुवेपृ। वेपथुः। डुवप्। उप्त्रिमम्। उपदेशइति किम्। ञिकारीयति। आदिः किम्। पटूयति। अस्ति हि पृथ्वादिषु पटुशब्दस्योपदेशः। अत्रेत्संज्ञायां सत्यामथुच् स्यात्। अवयवे ह्यचरितार्थं द्वित्वं समुदायस्य विशेषकं स्यात्॥

षः प्रत्ययस्य॥ प्रत्ययस्यादिः ष इत्स्यात्। शिल्पिनि ष्वुन्, नर्त्तकी। प्रत्ययस्येति किम्। षोडश। षषउत्वमित्यत्रोपदेशस्थोयं षकारः। आदिः किम्। अविषः। महिषः। अविमहिभ्यां टिषच्। नन्वत्र प्रयोजनाभावादेव षकारस्येत्संज्ञा न भविष्यति ईकारस्य टित्वादेव सिद्धेः। न च पक्षे ङीषर्थः षकारः। ङीषोपि चितः परस्योदात्तनिवृत्तिस्वरेणोदात्तत्वात्। सत्यम्। विनिगमकाभावेन पक्षे टकारस्यापि श्रवणं स्यात्॥

चूटू॥ प्रत्ययाद्यौ चुटू इतौ स्तः। गोत्रे कुञ्जादिभ्यश्चफञ्। कौञ्जायन्यः। छस्य ईयादेशं वक्ष्यति। जस्। ब्राह्मणाः। झस्यान्तादेशो वक्ष्यति। सोस्याभिजन इत्यधिकारे शण्डिकादिभ्यो ञ्यः। शाण्डिक्यः। चरेष्टः। कुरुचरी। ठस्येकादेशं वक्ष्यति। सप्तम्यां जनेर्डः। उपसरजः। ठस्यैकादेशं वक्ष्यति। धनगणंलब्धेत्यतो लब्धेत्यनुवर्तमाने, अन्नाण्णः। अन्नं लब्धा आन्नः। टुटुषाः प्रत्ययस्येति कर्त्तव्ये योगविभागादनित्यमिदम्। तेन केशचुञ्चुः केशचण इत्यत्र

चकारस्येत्संज्ञा न। सत्यां हि तस्यां चित इत्यन्तोदात्तः स्यात्। चित्करणं तु पर्यायार्थं स्यात्। अवात्कुटारच्चेत्यतोऽवादित्यनुवर्त्तमाने नतेनासिकाया इति टीटच्। अवटीटः। यद्वा। चुञ्चुप्चणप्टीटचोयादयः। लोपोव्योरिति यलोप इति व्याख्येयम्॥

लशकतद्धिते॥ तद्धितभिन्ने प्रत्यये आदिभूता लशकवर्गा इतः स्युः। ल्युट् च। भवनम्। कर्त्तरि शप्। भवति। क्तक्तवतू निष्ठा। भूतः भूतवान्। प्रियवशेवदः खच्। प्रियंवदः। वशंवदः। ग्लाजिस्थश्चग्स्नुः। जिष्णुः। भञ्जभासमिदो घुरच्। भङ्गुरम्। ङे। हरये। अतद्धिते किम्। चूडालः। प्राणिस्थादातो लजन्यतरस्याम्। लोमशः। अत्र प्रयोजनाभावान्नेत्संज्ञेत्यपि सुवचम्। कर्णिका। कर्णललाटात्कनलङ्कारइति भवार्थे कन्। अत्र कितिचेति वृद्धिः स्यात् रूपञ्च न सिध्येत्। इर उपसङ्ख्यानं, रुणद्धि। अयं वा रेफो हलन्त्यमितीत्संज्ञः। इकारस्तूपदेशेजनुनासिक इति। स्यादेतत्। एवं सतीदित्त्वान्नुम् स्यात्। न च तक्रकुम्भीधान्यन्याय आश्रयितुं शक्यः नन्दतीत्याद्यव्याप्तेः। सत्यम्। स्कन्दिरप्रभृतीनां नकारपाठो ज्ञापकः अन्तेदितामेव नुमिति। यद्वा। गोः पादान्तइति सूत्रादन्तग्रहणमनुवर्त्तयिष्यते। तच्चावश्यमनुवर्त्यम्। चक्षिङो नुम्मा भूदिति। अथवा न दृश इति ज्ञापकान्न भविष्यति सति हि नुमि इगुपधत्वाभावादेव क्सस्याप्राप्तेः किं तन्निषेधेन। यद्वा। इरितोवेति ज्ञापकात्समुदायस्येत्संज्ञा। अवयवे अचरितार्थस्य स्वरितत्वस्य समुदायविशेषकत्वात्स्वरितेत्वप्रयुक्तमात्मनेपदम्। तेन रुन्ध इत्यादि सिद्धम्॥

तस्य लोपः॥ तस्येतो लोपः स्यात्। तस्यग्रहणं सर्वलोपार्थम्।

त्रिटुडूनामलोन्त्यस्य मा भूत् । नानर्थकेलोन्त्यविधिरिति तु नास्ति । अलोन्त्यात्पूर्व उपधेति सूत्रे तस्य प्रत्याख्यानात् ॥

यथासङ्ख्यमनुदेशः समानाम् ॥ समसङ्ख्यानां सम्बन्धो यथाक्रमं स्यात् । नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः । नन्दनः । ग्राही । पचः । समूलाकृतजीवेषु हनकृञ्ग्रहः । समूलघातं हन्तीत्यादि । अत्रानुवाद्ययोरपि धातूपपदयोर्यथाक्रमं बोध्यम् । स्यादेतत् । विदिभिदिछिदेः कुरजित्यादौ तच्छीलाद्यर्थत्रयेण यथासङ्ख्यं प्राप्नोति । एवं रुयत्यान्ङसिङसोरित्यादावपीति चेत् । अत्र भाष्यम् । स्वरितेनेत्यपकृष्यते । तेन स्वरितत्वाभावान्नेह यथासङ्ख्यमिति । प्रतिज्ञास्वरिताः पाणिनीयाः । स्वरितत्वाभावादेव कर्तृकर्मणोश्चभूकृञोरिति सूत्रे न यथासंख्यं नाडीमुष्ट्योश्चेति सूत्रे यथासंख्यं च भवत्येवेति भाष्यम् । वृत्तिकारस्तु कर्तृकर्मणोश्च नाडीमुष्ट्योश्चेति सूत्रद्वयेपि भाष्यं विपरीतं वदन्नुपेक्ष्यः । नाडीमुष्ट्योश्चेति सूत्रे यथासङ्ख्याभावपरं भाष्यमपि पूर्वापरविरोधाच्चिन्त्यम् । एतदेव वा मतान्तरपरं सत्तत्रत्यवृत्तेरालम्बनमस्तु । कर्तृकर्मणोरित्यत्र तु वृत्तिश्चिन्त्यैव । वेशोयशआदेर्भगाद्यल्लावित्यत्राप्यस्वरितत्वादेव न यथासङ्ख्यम् । इह सूत्रे भाष्ये वृत्तौ चेत्थं स्थितम् । चतुर्थे तु वृत्तिकारो योगं व्यभजत् । भगाद्यलिति खचेति च ॥

स्वरितेनाधिकारः ॥ इत्थंभूतलक्षणे तृतीया । अधिकारो विनियोगः स्वरितत्वयुक्तशब्दस्वरूपमधिकृतं बोध्यम् । प्रत्ययः परश्चेत्यादि । यथा प्रायेणोत्तरत्रोपस्थितिः । क्व चित्तु पूर्वस्थत्रापि । तदुक्तम् । अतिङित्युभयोर्योगायोः शेष इति । कियदूरमाधिकार इत्यत्र व्याख्यानं शरणम् । यथा आतृतीयाध्यायान्तं धात्वाधि-

कारो न तु प्राग्लादेशेभ्य एव । तथा आसप्तमाध्यायपरिसमाप्तेरङ्गाधिकारो न तु प्रागभ्यासविकारेभ्य एवेत्यादि । यद्वा । स्वरिते इति सप्तम्यन्तम् । तेन तस्मिन्दृष्टे अधिकारो निवर्त्तत इत्यर्थः । कः स्वरिताधिकारार्थः कश्च तन्निवृत्त्यर्थ इत्यत्र तु व्याख्यानमेव शरणम् । नन्वेवं व्याख्यानादेवानुवृत्त्यननुवृत्ती स्तां किमनेन सूत्रेण । सत्यम् । अर्थान्तराणि सङ्गृहीतुं सूत्रं कृतम् । तथाहि । स्वरितेनाधिकाररूपोर्थो ग्राह्यः । गोस्त्रियोरित्यत्र च स्त्रीशब्दः स्वर्यते । तेन गोटाङ्ग्रहणं कृन्निवृत्त्यर्थमिति न वक्तव्यम् । किञ्च अधिकं कार्यमधिकारः । गौणेपि शास्त्रप्रवृत्तिरित्यर्थः । तथा च गौणमुख्यन्यायो यत्र नेष्यते । अपादानाधिकरणादौ तत्र स्वरितः पाठ्यः । अपि च अधिकः कारः कृतिरियम् । यत्पूर्वः सन् परं बाधते । तथा च पूर्वविप्रतिषेधाः संगृहीता भवन्ति । तत्रतत्र स्वरितपाठेनैव गतार्थत्वादिति दिक् ॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य तृतीये पादे प्रथममान्हिकम् ॥

अनुदात्तङित आत्मनेपदम् ॥ अनुदात्तेत्क उपदेशे यो ङित्तदन्ताद्धातोर्लस्थाने आत्मनेपदमेव स्यात् । एधते । स्पर्धते । बोभूयते । ऋतीयते । कथं तर्हि शेतइत्यादि, ङिदेव त्वयमिति चेत् । सत्यम् । व्यपदेशिवद्भावो बोध्यः । उपदेशे किम् । चुकुटिषति । गाङ्कुटादिभ्य इति सन आतिदेशिकं ङित्त्वम् । धातोरिति किम् । अत्युतत् अदुद्रुवदिति ङिदभ्यामङ्चङ्भ्यां मा भूत् । कथं पुनर्धातोरिति लभ्यतइति चेत् । भूवादिसूत्रान्मण्डूकप्लुत्यानुवृत्तस्य धातव इत्यस्य विभक्तिविपरिणामात् । सादृश्यमात्रेण परिणामव्यवहारो वस्तुगत्या तु योग्यशब्दान्तरमेव सन्निहितं भवतीति कैयटः । यद्वा । आत्मनेपदेनैव लका-

रस्य धातोश्चाक्षेपः। इकोझलित्यत्र सना धातोराक्षेपवत्। अत एव ङिता तस्य विशेषणात्तदन्तविधिर्व्याख्यातः। चित्रीयतइत्यादौ तु अवयवे ऽचरितार्थेन ङकारेण क्यजन्तस्य विशेषणं ततो व्यपदेशिवद्भावान्ङिदन्ततेति दिक्। एतेन चिनुतः सुनुत इति व्याख्यातम्। यत्तु तत्र ङितीव ङिद्वदिति व्याख्यानमाश्रित्य समाधानं, तदापाततः। पचेतेइत्यादावातोङित इति इयादेशाभावप्रसङ्गात्। ननु वृद्भ्यः स्यसनोरिति सूत्रे स्यग्रहणेन विकरणेभ्यो नियमो बलीयानिति ज्ञापितत्वाच्चङन्ङोश्चिनुत इत्यादौ चानुपपत्तिरेव नास्तीति चेत्। उपजनिष्यमाणेनापि ङिता उपसञ्जातनिमित्तस्यापि परस्मैपदस्य बाधापत्तेः। नियमो बलीयानित्यस्यापि पाक्षिकत्वाच्च। वृद्भ्यः स्यसनोरित्यस्य विकरणव्यवधानेपि नियमप्रवृत्तिरिति ज्ञापकताया अपि सुवचत्वात्। शदेः शित इति सूत्रे भाष्यकैयटयोरिदं स्पष्टम्। तस्माद्यथाव्याख्यानमेव मनोरमम्। हरदत्तस्तु ङित इत्येव व्याख्यत्। धातोरिति नापेक्ष्यते। नियमो बलीयानित्याश्रयणाच्चङादौ न दोषः। न च भाविना ङिता बाधः। परत्वात्परस्मैपदस्यैवोचितत्वादिति तस्याशयः। उभयथापि यङीयङोर्ङित्वस्य गुणनिषेधे चरितार्थतामाशङ्क्य यङः प्रागनुदात्तमकारं प्रश्लिष्य जुचङ्क्रम्यदन्द्रम्येति ज्ञापकाद्युजभावं वदन्तः ईयङः प्रागिकारमीकारं वा प्रश्लिष्य आद्ये अन्तोदित्त्वाभावान्न नुम्, द्वितीये एकाच इत्यनुवृत्तेः श्वीदितोनिष्ठायामिति नेण्निषेध इति कल्पयन्तः परास्ताः। स्यादेतत्। यङ्लुक्यपि सर्वत्रातिव्याप्तिः। प्रत्ययलक्षणेन ङिदन्तत्वात्। सत्यम्। ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणतया सुट्पदित्यत्र सोर्मनसीतिस्वरस्येवात्त्वसन्तस्येति दीर्घ-

स्येव चेहात्मनेपदस्याप्रवृत्तेरिति निष्कर्षः । प्राञ्चस्तु बोभूतुतेतिक्तइत्यत्र तिजेर्यङ्लुगन्तादात्मनेपदविधानं ज्ञापकं यङ्लुगन्तात्प्रत्ययलक्षणेनात्मनेपदं नेति । अत एव चर्कर्तीतं चेत्यदादौ पठितस्य चकारात्परस्मैपदमिति व्याख्यानं ज्ञापकसिद्धार्थानुवाद इति सिद्धान्तः । नन्वेवमपि पास्पर्धीतीत्यादावात्मनेपदं दुर्वारम् । स्पर्द्धेरनुदात्तेत्त्वात् । न चेदं प्रकृत्यन्तरमिति वाच्यम् । द्विःप्रयोगो द्विर्वचनं षाष्ठमिति वक्ष्यमाणत्वात् । सत्यम् । श्तिपाशपेत्यादिना निषेधो बोध्यः । अनुबन्धेन निर्देशो हि द्विधा । क चित्साक्षात् । शीङः सार्वधातुके गुणः । दीङोयुडिति यथा । अनुदात्तेत इत्यादौ त्वनुबन्धत्वेन । यत्र तु नोभयथापि निर्देशस्तद्भवत्येव । आङोयमहनः भावकर्मणोरित्यादि यथा । नन्वाङ इति कथं नानुबन्धनिर्देश इति चेत् । न । प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणमित्यस्य ह्ययमपवादः । तेन प्रकृतेर्यत्रानुबन्धेन निर्देशः स एवास्य विषयः । अत एव चेचितः मरीमृष्ट इत्यादौ क्ङितिचेति प्रवर्ततएवेति दिक् । अथ कथं स एवायं नागः सहति कलभेभ्यः परिभवमिति । अत्राहुः । आधृषाद्वेति विकल्पितणिचः सहेरिदं रूपम् । यद्वा । चक्षिङो ङित्करणमनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यतां ज्ञापयति । स हि अनुदात्तेत् । विचक्षणः प्रथयन्नित्यादावनुदात्तेतश्चहलादेरितियुचो दर्शनात् । न चायं ल्युट् । लित्स्वरापत्तेः । अन्तोदात्तस्य च पाठ्यमानत्वादिति । एतेन स्फायन्निर्मोकसन्धीति मुरारिप्रयोगो व्याख्यातः । स्यादेतत् । लस्य तिबादयः । लटः शतृशानचौ । लिटः कानज्वा । क्वसुश्च । लृटः सद्वेत्यात्मनेपदपरस्मैपदयोर्विहितत्वादित आरभ्यापादपरिसमाप्तेः प्रकरणं कि-

मर्थमिति चेत् । नियमार्थमित्यवेहि । अत एवानुदात्तङित आत्मनेपदमेवेति व्याख्यातम् । सोयं प्रकृतिनियमः । उत्तरसूत्रे च भावकर्मणोरात्मनेपदमेवेति अर्थनियमः । यत्रैवकारस्ततोन्यत्रावधारणमिति सिद्धान्तात् । तथाहि । तदसम्बन्ध्यसम्बन्धो व्याप्तिः सैवावधारणम् । व्यापकत्वद्योतकैवशब्दसम्बद्धभिन्नजम् ॥ न चास्मिन्पक्षे अनुदात्तेत्प्रभृतिभ्यः परस्मैपदं मा भूत् आत्मनेपदं त्वनियतत्वादर्त्तीत्यादावपि स्यादिति वाच्यम् । शेषात्परस्मैपदमेवेति नियमात् । ननु तत्र कर्त्तरीत्युक्तेः कर्त्तरि परस्मैपदमेवास्तु । भावकर्मणोस्तु जागर्यते अद्यतइत्यादौ परस्मैपदं दुर्वारमेवेति चेन्न । भावकर्मणोरात्मनेपदमेवेति नियतत्वात् । अस्तु वा प्रत्ययनियमः । आत्मनेपदमनुदात्तङित एवेति । भावकर्मणोरेवेति । नचैवमनुदात्तेत्प्रभृतिभ्यः पस्मैपदप्रसङ्गः । परस्मैपदस्यापि शेषात्कर्त्तरीति नियतत्वात् । ननु कीदृशस्तत्र नियमः कर्त्तरि यदि परस्मैपदं भवति शेषादेवेति, शेषाद्यदि भवति कर्त्तर्येवेति वा, आद्ये अशेषात्कर्त्तरि मा भूत् । भावकर्मणोस्तु शेषादशेषाच्च परस्मैपदं दुर्वारम् । अन्त्ये शेषाद्भावकर्मणोर्मा भूत्, अशेषात्तु भावकर्मकर्तृषु त्रिष्वपि प्राप्नोति । सत्यम् । योगविभागेन नियमद्वयं बोध्यम् । शेषादेव तत्रापि कर्त्तर्येवेति । तस्मादिह प्रकरणे प्रकृत्यर्थनियमः प्रत्ययनियमो वेति पक्षद्वयमपि स्थितम् । स्यादेतत् । विकरणव्यवधाने नियमो न प्राप्नोति । तथाहि । विकरणानामवकाशो लादेशभिन्नाः । इक्ष्टितपौ धातुनिर्देशइति श्तिप् । पाघ्राध्माधेट्दृशः शः । ताच्छील्यादिषु चानश् । नियमस्यावकाशः लिट्लिङौ लुक्श्लुश्नमश्च । पस्पर्धे, स्पर्धिषीष्ट, आस्ते, शेते, अत्ति, जुहोति, भिनत्ति, भूयादित्यादि । एधते,

स्पर्धते, कुरुते, निविशतइत्यादावुभयप्रसङ्गे परत्वान्नित्यत्वाच्च विकरणेषु तैर्व्यवधानान्नियमो न स्यात् । ततश्च प्रकृतिनियमपक्षे विकरणान्तादुभयप्रसङ्गः । प्रत्ययनियमेपि तुल्यजातीयस्यैव नियमेन व्याट्टाचिः धातोरनन्तरस्य लस्य यद्यात्मनेपदमनुदात्तङित एव यदि तु परस्मैपदं शेषादेवेत्यादि । तथा च धात्वन्तरात्तव्यावृत्तावपि विकरणव्यवधाने नियमाप्रवृत्तेः पदद्वयमपि स्यादेव । सत्यम् । विकरणेभ्यो नियमो बलीयानिति वृद्ध्यः स्यसनोरितिस्यग्रहणेन ज्ञाप्यते । अतो नियमद्वयेप्यदोषः । तत्रापि प्रकृत्यर्थनियमपक्षो बलीयानित्यवधेयम् । तत्र हि शेषात्कर्त्तरीति न वाच्यम्, किन्तु परस्मैपदमित्येव यत्र तच्चान्यच्च प्राप्तं तत्र परस्मैपदमेव स्यात् । प्रत्ययनियमपक्षे तु शेषादिति कर्त्तरीति वाच्यम्, योगश्च विभजनीय इति दोषत्रयमधिकं स्यात्। तिबादिवाक्येन सह वाक्यभेदः परिसङ्ख्याप्रयुक्तत्रिदोषता चेति दोषचतुष्कन्तु पक्षद्वयेप्यस्त्येव । यदि तु तदपि किमर्थं सोढव्यमिति बुद्धिस्तार्हि लस्य तिबादय इत्यनेनसहेदं प्रकरणमेकवाक्यतया विधायकमिति व्याख्येयम् । अस्मिन्पक्षे शेषात्कर्त्तरीति कर्त्तव्यमेव । परस्मैपदमात्मनेपदमिति च सूत्रशाटकवद्द्वाविनी संज्ञाश्रयणीया । अन्यथा विहितानां संज्ञा संज्ञया च विधानमित्यन्योन्याश्रयः स्यात् । अस्मिंश्च पक्षे विकरणेषु न कश्चिद्दोषः । लादेशेषु कृतेषु सार्वधातुकमाश्रित्य विकरणप्रवृत्तेः । न च स्यादिषु दोषस्तदवस्थ एवेति वाच्यम् । लमात्रापेक्षयान्तरङ्गेषु तिबादिषु कृतेषु लकारविशेषापेक्षतया बहिरङ्गाणां स्यादीनां प्रवृत्तेः ॥

भावकर्मणोः ॥ अनयोर्विहितस्य लस्यात्मनेपदं स्यात् । सुप्यते । क्रियते । प्राग्वदेकवाक्यतया विधिः भिन्नवाक्यतया नि-

यमो वेति बोध्यम्। नियमोपि द्विधा। प्रत्ययनियमो ऽर्थनियमश्चेति। न चान्त्यपक्षे कर्मणि यञ् न स्यात् को भवता लाभो लब्ध इति, अकर्त्तरिचेत्यस्य त्वपादानादिरवकाश इति वाच्यम्। तुल्यजातीयस्य परस्मैपदस्यैव नियमेन व्यावर्त्तनात्। स्यादेतत्। लूयते केदारः स्वयमेवेत्यत्र परस्मैपदं प्राप्नोति। कर्मवत्कर्मणेत्यनेन हि शास्त्रं व्यपदेशो वातिदिश्यते। तथा च तेन तेन शास्त्रेण तत्तत्कार्यं कर्त्तव्यम्। तत्र कर्मण्यात्मनेपदमित्यस्यावकाशः शुद्धं कर्म, कर्त्तरि परस्मैपदमित्यस्य शुद्धः कर्त्ता। कर्मकर्त्तर्युभयप्रसङ्गे परत्वात्परस्मैपदमिति। सत्यम्। प्राधान्यात्कार्यातिदेश एवेत्यात्मनेपदमेव परं बोध्यम्। पक्षान्तरे तु शेषात्कर्त्तरीत्यत्र कर्त्तरिकर्मेत्यतः कर्त्तरीत्यनुवर्त्त्य कर्त्तैव यः कर्त्ता तत्र परस्मैपदं न तु कर्मकर्तरीति व्याख्यातम्॥

कर्त्तरि कर्मव्यतिहारे॥ विनिमयविषयीभूतायां क्रियायां वर्त्तमानाद्धातोः कर्तर्यात्मनेपदं स्यात्। व्यतिलुनीते। अन्यस्य योग्यं लवनं करोतीत्यर्थः। परस्परकरणमपि कर्मव्यतिहारः। सम्प्रहरन्ते राजानः। व्यात्युक्षीमभिसरणग्लहामदीव्यन्। कर्त्तृग्रहणमुत्तरार्थम्॥

न गतिहिंसार्थेभ्यः॥ एभ्यः कर्मव्यतिहारे आत्मनेपदं न स्यात्। व्यतिगच्छन्ति। व्यतिसर्पन्ति। व्यतिघ्नन्ति। प्रतिषेधे हसादीनामुपसङ्ख्यानम्। हसादयो हसप्रकाराः शब्दक्रियाः। व्यतिहसन्ति। व्यतिजल्पन्ति। हरतेरप्रतिषेधः। सम्प्रहरन्ते राजानः। अर्थग्रहणसामर्थ्याद्ये शब्दान्तरनिरपेक्षा गतिहिंसयोर्वर्तन्ते तइह गृह्यन्ते। हरतिस्तूपसर्गवशाद्धिंसायां वर्त्तत इति न तस्यायम्प्रतिषेध इत्याहुः। ततः सम्प्रहरिष्यन्तौ दृष्ट्वा कर्णधनंजयावित्यत्र तु योत्स्यमानाविति विवक्षितं न तु

कर्मव्यतिहारः । वहेस्तु नायं प्रतिषेधः । अगत्यर्थत्वात् । प्रापणं हि वहेरर्थः । गतिप्रतीतिस्त्वाक्षेपात् ॥

इतरेतरान्योन्योपपदाच्च ॥ आत्मनेपदं न स्यात् । परस्परोपपदाच्चेति वक्तव्यम् । इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनन्ति । लौकिके शब्दव्यवहारे लाघवं प्रत्यनादरादितरेतरादिशब्दा व्यतीत्युपसर्गौ च कर्मव्यतिहारद्योतनाय समुच्चीयन्ते । तथात्मनेपदमपि समुच्चीयेतेति निषेधोयमारभ्यते । न त्वेवं सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयमित्यत्र तङ् कथं नेति चे, त्करणविनिमये सत्यपि क्रियाविनिमयस्याविवक्षितत्वात् ॥

नेर्विशः ॥ निपूर्वाद्विश आत्मनेपदं स्यात् । निविशते । नेः किम् । प्रविशति । कथं तर्हि न्यविशत न्यविक्षतेति, अटा व्यवधानात् । न च स्वाङ्गमव्यवधायकमिति वाच्यम् । अङ्गभक्तस्याटो विकरणानां प्रत्ययवत्वेपि धातुम्प्रत्यनवयवत्वेन व्यवधायकत्वादिति । अत्राहुः । तिबादिविधेः प्राग्लावस्थायां धातोरेवाडागमः । लुङ्लङित्यत्र द्विलकारकनिर्देशस्य भाष्यकृता ऽसिद्धवत्सूत्रप्रत्याख्यानावसरे वक्ष्यमाणत्वात् । मतान्तरेपि लकारविशेषापेक्षत्वाद्बहिरङ्गमडागमं बाधित्वा लमात्रापेक्षत्वादन्तरङ्गेषु । तिबादिषु कृतेषु नियमो भविष्यति । विकरणेभ्यो नियमो बलीयानिति सिद्धान्तात् । अत्र च वृद्भ्यः स्यसनोरिति स्यग्रहणं ज्ञापकमिति बोध्यम् । अथेदं ज्ञापकं विकरणव्यवधानेपि नियमः प्रवर्त्ततइत्येवंपरतयानीयेत तथाप्यदोषः । अन्तरङ्गत्वात्तिबादिषु सत्सु शब्दान्तरप्राप्त्याऽनित्ययोरङ्विकरणयोर्मध्ये परत्वादङ्प्रवृत्तेः । ननु विकरणः शब्दान्तरात्प्राप्तो न तु शब्दान्तरस्येति चेत्, किन्ततः । न हि शब्दान्तरस्येति वाचनिकम् । किन्तु न्यायोयम् । तथा च शब्दा-

न्तरस्य प्राप्नुवत इव तस्मात्प्राप्नुवतोप्यनित्यत्वम्। यद्यक्ति-सम्बधितया पूर्वं प्राप्नोति तद्व्यक्तिसम्बन्धितया पुनरप्राप्तेस्तुल्यत्वात्। अत एवोपसर्गनियमे ऽङ्व्यवायउपसङ्ख्यानमिति वार्त्तिकं प्रत्याख्यातम्। शदेःशित इति सूत्रे भगवता भाष्यकारेणेति दिक्। अर्थवद्ग्रहणपरिभाषया नेरुपसर्गस्य ग्रहणं तेनेह न। मधूनि विशन्ति भ्रमराः। कथं तर्हि इत्युक्त्वा मैथिलीं भर्तुरङ्के निविशन्ति भयादिति कालिदास इति चेत्। अङ्गानि विशतीमिति पाठ इति प्रामाणिकाः। यत्तु पदसंस्कारपक्षेण समाधानं दुर्घटवृत्तौ कृतम्। तन्न। अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः। अन्यथा ऽतिप्रसङ्गात्। वालिप्सायामित्यादेर्वैयर्थ्यापत्तेश्चेति दिक्॥

परिव्यवेभ्यः क्रियः॥ एभ्यः क्रीणातेरात्मनेपदं स्यात्। त्रित्वादेव सिद्धे सत्यकर्त्रभिप्रायार्थोयमारम्भः। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। पर्यादय उपसर्गा इह गृह्यन्ते। तन्त्रावृत्त्याश्रयणेन क्रीणातेर्ये पर्यादयस्तेभ्यः क्रिय इति व्याख्यानात्। परस्परसाहचर्याद्वा। तेनेह न। विक्रीणासीति। अत्र त्वेकदेशविकृतस्यानन्यत्वात्प्राप्नोति। न चायं विभक्तिविशिष्टस्य विरित्यस्य विकारो न तु विशब्दस्येत्युत्तरसूत्रस्थकैयटवाक्याद् भ्रमितव्यम्। विभक्तेर्लोपात्। प्रकृतिभागस्यैव विकारात्। कैयटस्याप्ययमपरितोषोस्त्येव। अत एव वक्ष्यति पक्षिवाचिनो विशब्दस्य सम्भवे तु साहचर्यादुपसर्गग्रहणं व्याख्येयमिति॥

विपराभ्याञ्जेः॥ स्पष्टोर्थः। विजयते। पराजयते। प्राग्वदुपसर्गग्रहान्नेह। विजयति पराजयति सेना। परा उत्कृष्टा। ननु जेरिति कथं निर्देशः। प्रकृतिवदनुकरणमित्यतिदेशेन

धातुतया इयङि क्षिय इति वक्तव्यत्वात् । न च नियः क्रिय इति दीर्घे सावकाशमियङं परत्वाद् घेर्ङितीति गुणो बाधतइति युक्तम् । ह्रस्वेष्वपि पूर्वविप्रतिषेधेनेयङ इष्टत्वात् । अत एव क्षिय इति निर्देश्यते । किञ्च क्षियोदीर्घादिति सूत्रे दीर्घग्रहणमपीह ज्ञापकम् । अन्यथा क्षिय इति निर्देशादेव दीर्घस्य निर्णये किं तेन । उच्यते । अनित्योयमतिदेशः । अतो नेयङ् ॥ अनित्यतायां प्रमाणन्तु ऋलृक्सूत्रएवोक्तम् । अविवक्षितार्थरूपमात्रानुकरणाद्वा।यत्तु पराजेरसोढ इति सूत्रे इयङः परत्वाद्घरिति गुण इति हरदत्तेनोक्तम् । तच्चिन्त्यम् । क्षियोदीर्घादित्येतत्सूत्रस्थभाष्यकैयटवृत्तिग्रन्थैस्तत्रत्यैरित्यस्वग्रन्थाभ्याञ्च सह विरोधात् ॥

आङो दोनास्यविहरणे ॥ आङ्पूर्वाद्दातेर्मुखविकसनादन्यत्रार्थे वर्त्तमानादात्मनेपदं स्यात् । विद्यामादत्ते । अनास्यविहरणे किम् । मुखं व्याददाति । आस्यग्रहणमविवक्षितम् । उपेयिवाननाश्वानित्यत्रोपशब्दवत् । तेनेहापि न विपादिकां व्याददाति । पादस्फोटो विपादिका । नदीकूलं व्याददाति । पराङ्गकर्मकादनास्यइति निषेधो नेष्यते । तथा च वार्त्तिकम् । स्वाङ्गकर्मकाच्चेति । स्वमङ्गमिह स्वाङ्गं न त्वद्रवं मूर्त्तिमादिति परिभाषितम् । व्याददते पिपीलिकाः पतङ्गस्य मुखम् । कथन्तर्हि व्यादत्ते विहगपतिर्मुखं स्वकीयम् । कर्त्रभिप्राये भविष्यति । अकर्त्रभिप्रायार्थो ह्ययमारम्भः । एतेन मुखं व्यादाय स्वपितीत्यत्र सुप्त्वा व्यादत्तइति व्यत्यासेन प्रयोग इति प्रेत्य भावपरीक्षायां वाचस्पतिग्रन्थोपि व्याख्यातः । आङो ङिद्विशिष्टस्य ग्रहणान्नेह, भिक्षामाददाति । अत्र स्मृतावाकार इति हरदत्तः ॥

क्रीङोनुसम्परिभ्यश्च ॥ क्रीङ् विहारे । अस्मादात्मनेपदं

स्यात्। अनुसम्परिभ्यः। चकारादाङः। अनुक्रीडते। सङ्क्रीडते। परिक्रीडते। आक्रीडते। उपसर्गेण समा साहचर्यादनोः कर्मप्रवचनीयान्न। माणवकमनुक्रीडति। माणवकेन सहेत्यर्थः। तृतीयार्थइत्यनोः कर्मप्रवचनीयसंज्ञा। समो ऽकूजने॥ सङ्क्रीडति शकटम्। मयास्य सङ्क्रीडति चक्रिचक्र इति श्रीहर्षः। कथं तर्हि क्रीडते नागराज इति। अपप्रयोग एवायमित्याहुः। आगमेः क्षमायाम्॥ ण्यन्तस्येदं ग्रहणम्। आगमयस्व तावत्। सहस्व काञ्चित्कालम्। मा त्वरिष्ठा इत्यर्थः। एतेन यावदागमयतेथ नरेन्द्रानिति श्रीहर्षप्रयोगो व्याख्यातः। यावत्प्रतीक्षते इत्यर्थात्। शिक्षेर्जिज्ञासायाम्॥ धनुषि शिक्षते। शिक्ष विद्योपादानइत्यस्य नेह ग्रहणम्। अनुदात्तेत्त्वादेव सिद्धत्वात् किन्तु शकेः सन्नन्तस्य। सनिमीमेतीस्। धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः। क्रियैव हि शकेरर्थं प्रति विषयतयैवान्वेति। भोक्तुं शक्नोतीत्यादिदर्शनात्। भोजनाविषयकशक्तिमानिति हि तदर्थः। शकधृषज्ञाग्लाघटरभेति तुमुन्। इह तु ज्ञानं विषयः। ज्ञातुमिति तु न प्रयुज्यते अत्मनेपदेनैव ज्ञानविषयकताया गमितत्त्वात्। न चैवं जिज्ञासायामित्यसंगतम्। ज्ञानेच्छा हि तदर्थः। लक्ष्ये तु ज्ञानं शक्तो विषयः। शक्तिस्तु सनर्थभूतायामिच्छायामिति व्याख्यानात्। सत्यम्। ज्ञानविशिष्टायाः शक्तेरिच्छाविषयतया ज्ञातस्यापि विषयतानपायात्। एतावानेव परम्भेदः। इच्छा सन्वाच्या शक्तिस्तु प्रकृत्यर्थः। तस्यास्तु ज्ञानविषयकत्वमात्मनेपदेन द्योत्यतइति। आशिषि नाथः॥ अनुदात्तेत्त्वादेव सिद्धे नियमार्थं वार्त्तिकम्, अशिष्येवेति। न चैवमनुदात्तेत्त्वं व्यर्थमिति वाच्यम्। तस्य नाथनइति युजर्थत्वात्। सर्पिषो नाथते। आशिषि नाथ इति कर्मणि

षष्ठी।सर्पिर्मे भूयादित्याशास्तइत्यर्थः।कथं तर्हि नाथसे किमु पतिं न भूभृतामिति भारविः। उच्यते। नाधसइति पाठः। तवर्गचतुर्थस्थाने लिपिप्रमादाद् द्वितीयः पठ्यते। अत एव काव्यप्रकाशे च्युतसंस्कृतेरुदाहरणम् तत्पल्लीपतिपुत्रिकुञ्जरकुलं कुम्भाभ्याभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथा इति॥ अनुनाथति स्तनयुगमिति तु पठनीयमिति तत्रैवोक्तम्। अत्रापि धकारो वा पाठ्यः। हरतेर्गतताच्छील्ये॥ गतं प्रकारः। पैतृकमश्वा अनुहरन्ते। मातृकं गावो ऽनुहरन्ते। पितुर्मातुश्चागतं प्रकारं सततं परिशीलयन्तीत्यर्थः। ऋतष्ठञ्। इसुसुक्तान्तात्कः। गतताच्छील्ये किम्। मातुरनुहरति। सादृश्यमात्रमिह विवक्षितं न तु प्रकारताच्छील्यम्। किरतेर्हर्षजीविकाकुलायकरणेषु॥ विक्षेपार्थः किरतिः। हर्षादयस्तु विषयत्वेनोपात्ताः। तत्र हर्षो विक्षेपस्य कारणं जीविकाकुलायकरणे तु फलम्। एष्वेवार्थेष्वपाच्चतुष्पादिति सुड्विधीयते। अपस्किरते वृषो वृष्टः कुक्कुटो भक्षार्थी श्वा आश्रयार्थी च। हर्षादिष्विति किम्। अपकिरति कुसुमम्। इहात्मनेपदसुडागमौ न भवतः। हर्षादिमात्रसत्वे तु यद्यपि तङ् प्राप्नोति। तद्विधौ चतुष्पाच्छकुनिकर्तृकत्वस्य निमित्तत्वेनानुपादानात्। तथापि शब्दशक्तिस्वाभाव्यात्सुटा सह समानविषयोयं तङ्। तेन गजोपकिरतीत्येव भवतीत्याहुः। आङि नुप्रच्छ्योः॥ आनुते। उत्कण्ठापूर्वं शब्दं करोतीत्यर्थः। णु स्तुतौ, अदादिः। आपृच्छते। प्रच्छ ज्ञीप्सायाम्, तुदादिः। ग्रहिज्येति सम्प्रसारणम्। शप उपालम्भने॥ शप आक्रोशइति स्वरितेत्। तस्मादात्मनेपदमकर्तृगेपि फले वक्तव्यं शपथरूपेर्थे। देवदत्ताय शपते त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येकं रूपं शपथं करोतीत्यर्थः।

श्लाघन्हूङ्स्थाशपामिति सम्प्रदानसंज्ञा। ज्ञीप्स्यमाने, विवदन्ते। तद्यथा। यस्माआख्यायते स सम्प्रदानमित्येके। य आख्यायते स इत्यन्ये। कथं तर्हि नीवीम्प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामीति॥ अत्राहुः। स्वाशयं प्रकाशयामीत्येतादृदिह विवक्षितं न तु शपथ इति॥

समवप्रविभ्यः स्थः॥ एभ्यस्तिष्ठतेः प्राग्वत्। सन्तिष्ठते। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। आङः प्रतिज्ञायामुपसंख्यानम्। शब्दं नित्यमातिष्ठते नित्यत्वेन प्रतिजानीतइत्यर्थः। वृत्तौ तु अस्तिसकारमातिष्ठतेगुणवृद्धीआगमौ वा तिष्ठतइत्युदाहृतम्। अस्यार्थः। आपिशलिर्हि अस भुवीति न पठति किं तु सकारमात्रम्। स्तः सन्तीत्युदाहरणम्। अस्ति आसीदित्यादि सिद्धये तु अडाटावागमौ प्रतिजानीते। तावेव गुणवृद्धीति॥

प्रकाशनस्थेयाख्ययोश्च॥ तिष्ठतेरेतयोरर्थयोरात्मनेपदं स्यात्। गोपी कृष्णाय तिष्ठते। स्वाभिप्रायं प्रकाशयतीत्यर्थः। श्लाघह्नूङिति सम्प्रदानत्वम्। संशय्य कर्णादिषु तिष्ठते यः। कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः। स्थेयो विवादपदनिर्णेता तिष्ठतेस्मिन्निति व्युत्पत्तेः। वृत्तौ तु तिष्ठन्त्यस्मिन्निति प्रयुक्तम्। तत्र प्रकरणाच्छिादिना विवादपदनिर्णेतुः प्रतीतिर्न तु शाब्दीत्यभिप्रायेण परस्मैपदं बोध्यम्। कृत्यल्युटोबहुलमिति अधिकरणे अचो यत्॥

उदोनूर्ध्वकर्मणि॥ उत्पूर्वात्तिष्ठतेरनूर्ध्वत्वविशिष्टे परिस्पन्दे वर्त्तमानादात्मनेपदं स्यात्। उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। अनूर्ध्वेति किम्। जवेन पीठादुदतिष्ठदच्युतः। इह क्रियाया अनूर्ध्वत्वं नाम उपरिदेशसंयोगफलकत्वाभावः। यद्यपि उदोनूर्ध्वेइत्युक्तेरनूर्ध्वताविशिष्टक्रियावा-

चकत्वं लभ्यतएव धातोः । क्रियावाचित्वाव्यभिचारात्तथापि लोकप्रसिद्धपरिस्पन्दात्मककर्मपरिग्रहार्थं कर्मपदम् । तेनेह न । अस्माद् ग्रामाच्छतमुत्तिष्ठति । उत्पद्यतइत्यर्थः । तथा च उद ईहायामिति वार्त्तिकं सौत्रकर्मपदासिद्धार्थकथनपरम् ॥

उपान्मन्त्रकरणे ॥ मन्त्रकरणं कारकविशेषो यत्र तस्मिन्नर्थे वर्त्तमानादुपपूर्वकात्तिष्ठतेरात्मनेपदं स्यात् । आग्नेय्याग्नीध्रमुपतिष्ठते ऐन्द्र्या गार्हपत्यमुपतिष्ठते । मन्त्रकरणे किम् । भर्त्तारमुपतिष्ठति यौवनेन । उपादेवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम् ॥ देवपूजायां, आदित्यमुपतिष्ठते । कथं तर्हि स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति । देवतात्वारोपाद्भविष्यति । महीपतेर्दैवतांशत्वाद्वा । सङ्गतकरणे, रथिकानुपतिष्ठते । उपश्लिष्यतीत्यर्थः । एवं गङ्गा यमुनामुपतिष्ठतेइति । मित्रकरणन्तूपश्लेषं विनापि भवति । रथिकानुपतिष्ठते । अयं पन्थाः सुघ्नमुपातिष्ठते । प्राप्नोतीत्यर्थः ॥ वा लिप्सायामिति वक्तव्यम् । भिक्षुको ब्राह्मणमुपतिष्ठते उपतिष्ठति वा । लिप्सया हेतुभूतया उपगच्छतीत्यर्थः ॥

अकर्मकाच्च ॥ उपपूर्वकात्तिष्ठतेरकर्मकादात्मनेपदं स्यात् । भोजनकाले उपातिष्ठते । सन्निधत्तइत्यर्थः ॥

उद्भ्यां तपः ॥ आभ्यां तपतेरकर्मकादात्मनेपदं स्यात् । उत्तपते वितपते । दीप्यतइत्यर्थः । स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ स्वमङ्गं स्वाङ्गम् । न त्वद्रवमिति परिभाषितम् । उत्तपते वितपते पाणिम् । अकर्मकात्स्वाङ्गकर्मकादित्युक्तेः स्वमङ्गं स्वाङ्गमिति व्याख्यानाच्च नेह देवदत्तो यज्ञदत्तस्य पाणिमुत्तपति । सन्तापयतीत्यर्थः । सुवर्णमुत्तपति । सन्तापयति विलापयति वेत्यर्थः । उद्भ्यां किम् । निष्टपति । निसस्तपतावनासेवनइति मूर्धन्यः ॥

आङो यमहनः ॥ आङ्पूर्वाभ्यामकर्मकाभ्यां स्वाङ्गकर्मकाभ्याञ्च यमिहनिभ्यामात्मनेपदं स्यात् । आयच्छते । आहते । आयच्छते पाणिम् । अहते शिरः । नेह । परस्य शिर आहन्ति । कथं तर्ह्याजघ्ने विषमविलोचनस्य वक्ष इति भारविः । अत्र के चित् । आजेति पदं छित्वा घ्न इति भावे किपि चतुर्थ्येकवचनान्तमुक्त्वा घ्ने हन्तुं आजजगामेति व्याचख्युः । तन्न । अजेर्लिटि वीभावेन विवायेति सिद्धान्तात् । अन्ये तु विषमविलोचनस्य समीपमेत्य स्वं वक्षमास्फालितवानित्यर्थः । मल्लो ह्युत्साहाविष्करणाय स्वं वक्षमास्फालयतीत्याहुः । भागवृत्तौ तु प्रमाद एवायमित्युक्तम् । एवञ्च मोहादाहध्वंमा रघूत्तममिति भट्टिप्रयोगोपि चिन्त्यः ॥

समो गम्यृच्छिभ्याम् ॥ सम्पूर्वाभ्यामकर्मकाभ्यां गम्यृच्छिभ्यामात्मनेपदं स्यात् । सङ्गच्छते । समृच्छिष्यते । अकर्मकाभ्यां किम् । ग्रामं सङ्गच्छति । कथन्तर्हि तच्चैक्यं समगच्छतेति । आर्षत्वात् । यद्वा । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । एकं समपद्यतेत्यर्थः । विदिपृच्छिस्वरतीनामुपसङ्ख्यानम् ॥ विदेर्ज्ञानार्थस्येह ग्रहणम् । परस्मैपदिभ्यां साहचर्यात् । न लाभार्थस्य । स हि स्वरितेत्त्वादुभयपदी । सत्ताविचारणार्थयोस्त्वनुदात्तेत्त्वादात्मनेपदं सिद्धमेव । संवित्ते संविदाते संविद्रते । सम्पृच्छते संस्वरते । आर्त्तिश्रुदृशिभ्यश्चेति वक्तव्यम् ॥ अर्त्तीतिभ्वादिजुहोत्यादी द्वावपि गृह्येते । सार्त्तिशास्तीत्यङ्विधौ तु शास्तिना लुप्तविकरणेन साहचर्याज्जुहोत्यादेरेव ग्रहणम् । परस्मैपदेष्विति तूत्तरार्थमनुवर्तमानमपि योगविभागसामर्थ्यादङ्विधौ न सम्बध्यते । तेन मासमृत मासमृषातां मासमृषतेति भाष्यं भ्वाद्यभिप्रायेण । समारत समारेतां समारन्तेति वृत्तिस्तु जुहोत्या-

ध्यभिप्रायेण योज्या। संशृणुते सम्पश्यते। रक्षांसीति पुरापि संशृणुमहे इति मुरारिप्रयोगस्तु चिन्त्यः। अकर्मकादित्यनुवृत्तेः। वृत्तिकारस्तु समो गम्यृच्छिप्रच्छिस्वरत्यर्त्तिश्रुविदिभ्य इति पठित्वा दृशेश्चेति वक्तव्यरूपेण पपाठ। तत्र वार्त्तिकानुपूर्वीभङ्गे केषाञ्चिदेव सूत्रे प्रक्षेपे दृशेश्च तद्वहिष्कारे बीजं न पश्यामः। अथास्मिन्नकर्मकाधिकारे ये सकर्मका हनिगामिप्रभृतयस्तेषां कथमकर्मकता। उच्यते। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोकर्मिका क्रिया॥ वहति भारमिति प्रापणे सकर्मको वहिः। स्पन्दने त्वकर्मकः। वहन्ति नद्य इति। प्राणविशिष्टं धारणं जीवतिराह। गात्रविशिष्टं विक्षेपञ्च नृत्यतिः। अतो द्वावप्यकर्मकौ। प्रसिद्धेर्यथा। मेघो वर्षतीति। कर्मणो ऽविवक्षातो यथा। हितान्न यः संशृणुते स किंप्रभुः। उपसर्गादस्यत्यूह्योर्वेति वक्तव्यम्। इत आरभ्याकर्मकादिति न सम्बध्यते। निरस्यति निरस्यते। समूहति समूहते। ऊपसर्गात्किम्। अस्यति। ऊहते। अनुदात्तेत्त्वादात्मनेपदी। कथन्तर्हि अनुक्तमप्यूहति पण्डितो जन इत्यादि। चक्षिङो ङित्करणेनानुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यताज्ञापनात्समाधेयम्॥

निसमुपविभ्यो ह्वः॥ स्पष्टोर्थः। निह्वयते। अकर्त्रभिप्रायार्थं सूत्रम्। स्यादेतत्। निह्वास्यते इत्याद्युदाहरणमस्तु न तु निह्वयते इति। आकारान्तस्य सूत्रे उपादानात्। एकारान्तस्य ग्रहणाभावात्। नहि विकृतिः प्रकृतिं गृह्णातीति चेत्। उच्यते। आकारान्तादपि कथमभ्युपैषि। नहि ह्व इति सूत्रे आकाराविशिष्टः पठितः। प्रयोगसमवायिनां वाचकतेति सिद्धान्तरीत्या ह्व इति वान्तस्य आकारान्तमर्थः। दध्नेत्यत्र नान्तस्य दधी वेति यदि तर्हि वान्तस्यैव एकारान्तमर्थ इत्यपि

तुल्यम् । प्रक्रियादशायां हि एकारान्तानुकरणे लक्षणवशादात्वं न तु आकारान्त इहानुकार्यः । तस्मान्न किञ्चिदिहानुपपन्नम् । यत्तु न्यासकृतोक्तं नव्योलिटीत्यात्वनिषेधके सूत्रे कृतात्वस्य व्य इत्यस्य निर्देशाज्ज्ञापकाद्विकृतिरपि प्रकृतिं गृह्णातीति । सोयमस्थाने संरम्भः । उक्तरीत्या पूर्वपक्षस्य शिथिलत्वात् । एरनेकाच ओःसुपीत्यादावपि विकृतिग्रहणे शिशयिषतइत्यादावपि यणापत्तेः । विकृतेः प्रकृतिग्राहकत्वे विश्वराजावित्यत्रापि विश्वस्यवसुराटोरिति दीर्घप्रसङ्गात् । तुरासाहमित्यादौ मूर्धन्यप्रसङ्गाच्चेति दिक् ॥

स्पर्धायामाङः ॥ आङ्पूर्वात् ह्वयतेरात्मनेपदं स्यात्स्पर्धाया विषये । मल्लमाह्वयते । स्पर्धमानस्तस्याह्वानङ्करोतीत्यर्थः । स्पर्धायां किम् । पुत्रमाव्हयति । यद्यपि स्पर्धायामप्ययं धातुः पठ्यते तथापि आङ्पूर्वकस्तत्र न वर्त्तते किं तु शब्दने । अत एव स्पर्धायां विषये अयं विधिरिति व्याख्यातम् ॥

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ सप्तस्वर्थेषु कृञ आत्मनेपदं स्यादकर्तृगेपि फले । गन्धनमिह सूचनम् । तथाहि । गन्ध अर्दने अर्द हिंसायामिति च चुरादौ पाठाद्गन्धनं हिंसा । सूचनमपि वधबन्धादिकरणत्वाद्धिंसेति स एवेह गन्धनशब्दार्थः । उत्कुरुते । सूचयतीत्यर्थः । अवक्षेपणं भर्त्सनम् । श्येनो वर्तिकामुदाकुरुते भर्त्सयतइत्यर्थः । हरिमुपकुरुते । सेवतइत्यर्थः । सहसा वर्त्तते साहसिकः । ओजःसहोम्भसा वर्त्ततइति ठक् । तस्य कर्म साहसिक्यम् । ष्यञ् । परदारान्प्रकुरुते । तेषु सहसा प्रवर्त्ततइत्यर्थः । प्रतियत्ने, एधो दकस्योपस्कुरुते । अवोदैधौद्म्येति निपातः । समाहारद्वन्द्वः । कृञः प्रतियत्नइति षष्ठी ।

उपात्प्रतियत्नेत्यादिना सुट् । तस्य गुणान्तराधानं करोत्यर्थः । गाथाः प्रकुरुते । प्रकर्षेण कथयतीत्यर्थः । उपयोगः समीचीनो विनियोगः । शतं प्रकुरुते । धर्मार्थं विनियुङ्क्तइत्यर्थः । एषु किम् । कटं करोति ॥

अधेः प्रसहने ॥ अधिपूर्वात्कृञः प्राग्वदभिभवे क्षमायाञ्च । षह मर्षणे ऽभिभवे चेति पाठात् । ये त्वभिभवे छन्दसीति पठन्ति तेषामपि छन्दसीति प्रायोवाद इति हरदत्तः । तमधिचक्रे । अभिभूतवान् सोढवान्वेत्यर्थः । एतेन भवादृशाश्चेदधिकुर्वते परानिति भारविप्रयोगोपि व्याख्यातः । क्षमन्तइत्यर्थात् ॥

वेः शब्दकर्मणः ॥ विपूर्वात्कृञ आत्मनेपदं स्यात् शब्दश्चेत्कर्म कारकं भवति । स्वरान्विकुरुते । उच्चारयतीत्यर्थः । शब्दकर्मणः किम् । चित्तं विकरोति कामः ॥

अकर्मकाच्च ॥ वेः कृञोकर्मकात्प्राग्वत् । हीनान्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते ॥

सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ एषु बोधनीयेषु नयतेरात्मनेपदं स्यात् । तत्रोत्सञ्जनज्ञानविगणनव्यया नयतेर्वाच्याः । इतरे प्रयोगोपाधयः । तथाहि । आचार्यः शास्त्रे नयते । शास्त्रीयसिद्धान्तानुपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयतीत्यर्थः । ते च शिष्या युक्तिभिर्निश्चाय्यमानाः सम्मानिता भवन्ति तदीयाभिलषितार्थसम्पादनात् । तथा चात्र नयतेः प्रापणमेवार्थः । शिष्यसम्माननन्तु तदीयं फलं सत्प्रयोगोपाधिः । उत्सञ्जने दण्डमुन्नयते । उत्क्षिपतीत्यर्थः । आचार्यकरणे, माणवकमुपनयते । विधिना आत्मसमीपप्रापणीमह नयतेरर्थः । तत्फलं माणवकसं-

स्कारः । तस्य कर्तृगामित्वाभावादप्राप्तमात्मनेपदं आचार्यकरणे विधीयते उपनयनपूर्वकेणाध्यापनेन हि कश्चिदतिशयोध्यापके जन्यते । स एवाचार्यशब्दप्रवृत्तिनिमित्तम् । उपनीय यदद्वेदमाचार्यः स उदात्तत इत्यपि अतिशयविशेषपरिचायकपरम् । तथा चाचार्यकरणं फलीभूतं प्रयोगोपाधिः । न च तस्य कर्तृगामित्वादात्मनेपदं सिद्धमेवेति वाच्यम् । नहि तदुपनयनक्रियायाः साक्षात्फलं किन्तूपनयनपूर्विकाया अध्यापनक्रियायाः । प्रयोगोपाधित्वं तु परम्परया फलीभूतस्याप्यस्तीति दिक् । विनिन्युरेनं गुरवो गुरुप्रियमित्यत्र तु आचार्यकरणस्याविवक्षितत्वान्न तद् । विवक्षा हि स्वायत्तेत्युपज्ञोपक्रमं तदाद्याचिख्यासायामितीच्छासना ज्ञापितम् । ज्ञाने, तत्त्वं नयते । निश्चिनोतीत्यर्थः । भृतिर्वेतनम् । कर्मकरानुपनयते । भृतिदानेनात्मसमीपं प्रापयतीत्यर्थः । विगणनमृणादेर्निर्यातनम् । करं विनयते, राजदेयं भागं शोधयति निर्यातयतीत्यर्थः । व्ययो, धर्मादौ विनियोगः । शतं विनयते । धर्मार्थं विनियुङ्क्तइत्यर्थः । एषु किम् । घटं नयति ॥

कर्तृस्थे चाशरीरे कर्मणि ॥ नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्ने एव स्यात् । शरीरशब्देन तदवयवो लक्ष्यते । शरीरतादात्म्यापन्नस्य कर्तृतया शरीरस्य तत्स्थत्वासम्भवात् । अवयवानान्तु सम्बन्धविशेषेण तत्स्थत्वस्यानुभवात् । अत एव हि करादि पुरुषत्वव्याप्यमित्युद्घोषः । क्रोधं विनयते । स्वकीयं क्रोधमपगमयतीत्यर्थः । क्रोधापनयनफलस्य चित्तप्रसादादेः कर्तृगतत्वात्स्वरितञित इति सूत्रेण सिद्धे नियमार्थमिदम् । तेनेह न । गडुं विनयति । कथन्तर्हि विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषव

इति भारविः । कर्त्रभिप्रायत्वाविवक्षायां भविष्यति । के चित्तु अपनयने वर्त्तमानादनेनात्मनेपदं विधीयते । इह तु करोत्यर्थे प्राप्तयर्थे वा वर्त्तते । धातूनामनेकार्थत्वादित्याहुः ॥

वृत्तिसर्ग तायनेषुक्रमः ॥ क्रमआत्मनेपदं स्यादप्रतिबन्धोत्साहस्फीततासु । वृत्तौ । ऋच्यस्य क्रमते बुद्धिः । न प्रतिहन्यतइत्यर्थः । सर्गे । व्याकरणाध्ययनाय क्रमते । उत्सहतइत्यर्थः । सृजतेरुत्साहार्थतायेनेन्द्रलोकावजयाय सृष्ट इत्यादौ प्रसिद्धा । तायने । क्रमन्तेस्मिन् शास्त्राणि । स्फीतीभवन्तीत्यर्थः । तायृसन्तानपालनयोरित्यस्माल्ल्युटि तायनमिति रूपम् ॥

उपपराभ्याम् ॥ वृत्त्यादिषूपपराभ्यामेव क्रमेरात्मनेपदं स्यान्न तूपसर्गान्तरपूर्वात् । उपक्रमते । आभ्यामेवेति नियमान्नेह । सङ्क्रामति । वृत्त्यादिष्वित्येव । नेह । उपक्रामति पराक्रामति ॥

आङ उद्गमने ॥ आङ्पूर्वात्क्रमेरुद्गमने वर्त्तमानादात्मनेपदं स्यात् । आक्रमते आदित्यः । उदयतइत्यर्थः । ज्योतिरुद्गमन इति वाच्यम् ॥ नेह, आक्रामति धूमो हर्म्यतलात् । भाष्ये तु हर्म्यतलमिति पठ्यते । तत्रोद्गमनपूर्विकायां व्याप्तौ क्रमिर्द्रष्टव्यः न तूद्गमनमात्रे अकर्मकतापत्तेः । कथन्तर्हि नभः समाक्रामति चन्द्रमाः क्रमादिति । उच्यते । व्याप्ताविह क्रमिर्वर्त्तते न तूद्गमने ॥

वेः पादविहरणे ॥ विपूर्वात्क्रमेः पादविहरणे वर्त्तमानादात्मनेपदं स्यात् । साधु विक्रमते वाजी । पादविहरणं पादविक्षेपः । यद्यपि क्रमिस्तत्रैवार्थे पठ्यते तथापि धातूनामनेकार्थत्वात्सूत्रेर्थोपादानम् । तेनेह न विक्रामत्यजिनसन्धिः, द्विधाभवति स्फुटतीत्यर्थः ॥

प्रोपाभ्यां समर्थाभ्याम् ॥ तुल्यार्थाभ्यां प्रोपाभ्यां क्रमेरात्मनेपदं स्यात्। समस्तुल्योर्थो ययोरिति विग्रहे शकन्ध्वादित्वात्पररूपं संशब्द एव वा तुल्योर्थो बोध्यः। प्रारम्भेनयोस्तुल्यार्थता। प्रक्रमते। उपक्रमते। आरभतइत्यर्थः। समर्थाभ्यां किम्। प्रक्रामति। गच्छतीत्यर्थः। उपक्रामति। आगच्छतीत्यर्थः। उपपराभ्यामिति तु नेह प्रवर्त्तते। तत्र वृत्त्यादिग्रहणानुवृत्तेरुक्तत्वात्। इह च वृत्त्यादेरविवक्षणात् ॥

अनुपसर्गाद्वा ॥ अनुपसर्गात्क्रमेरात्मनेपदं वा स्यात्। क्रामति। क्रमते। उपपराभ्यामित्यस्य नियमार्थत्वाद्वृत्त्यादिसूत्रमनुपसर्गविषयकमेव। तेन वृत्त्यादौ नायं विकल्पः। तस्मादप्राप्तविभाषैवेयम् ॥

अपन्हवे ज्ञः ॥ अपलापे वर्त्तमानाज्जानातेरात्मनेपदं स्यात्। शतमपजानीते। अपलपतीत्यर्थः ॥

अकर्मकाच्च ॥ अकर्मकाज्जानातेरात्मनेपदं स्यात्। सर्पिषो जानीते। सर्पिषा उपायेन प्रवर्त्ततइत्यर्थः। ज्ञोविदर्थस्येति करणे षष्ठी। अकर्मकादित्यस्य स्थाने सकरणादित्येव तु नोक्तम्। स्वरेण पुत्रं जानातीत्यत्राव्याप्तेः ॥

सम्प्रतिभ्यामनाध्याने ॥ आभ्यां जानातेरात्मनेपदं स्यादनाध्याने। शतं सञ्जानीते। अवेक्षतइत्यर्थः। शतम्प्रतिजानीते। अङ्गीकरोतीत्यर्थः। अनाध्याने किम्। मातुः सञ्जानाति। उत्कण्ठापूर्वं स्मरतीत्यर्थः। अधीगर्थेति कर्मणि षष्ठी। ननु तत्र शेष इत्यनुवर्त्तते। तेनात्र कर्मणः शेषत्वेन विवक्षितत्वादकर्मकाच्चेति पूर्वेण प्राप्नोति। अत्राहुः। अनाध्यानइति विभज्यते। स चोभयोर्योगयोः शेषः तेनाध्याने पूर्वेणापि न भवतीति ॥

भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ एष्वर्थेषु वदेरात्मनेपदं स्यात् । अत्रोपसम्भाषोपमन्त्रणे धातोर्वाच्ये । इतरे प्रयोगोपायवः । भासनन्दीप्तिः । शास्त्रे वदते । भासमानो ब्रवीतीत्यर्थः । भासनं हेतुभूतं सद्विशेषणं शिष्यैः स्तूयमानो हि भासते । तथा चोपर्युपरि शास्त्रार्थप्रतिभासात्सुष्ठूक्तिर्निर्वहति । तेजोभङ्गे तु न शक्नुयाद्वदितुमिति भावः । उपसम्भाषोपसान्त्वनम् । कर्म्मकरानुपवदते उपसांत्वयतीत्यर्थः । ज्ञाने, शास्त्रे वदते । उक्तिविषयकज्ञानवानिति फलितोर्थः । यत्न उत्साहः । क्षेत्रे वदते । तद्विषयकमुत्साहमाविष्करोतीत्यर्थः । अत्राविष्करणरूपस्य वदत्यर्थस्य यत्नः कर्मेत्याहुः । विशिष्टोत्र वदतेरर्थ इत्यपि सुवचम् । विमतौ, क्षेत्रे विवदन्ते । विमत्या हेतुभूतया नानाविधं भाषन्तइत्यर्थः । उपमन्त्रणमुपच्छन्दनम् । कुलभार्यामुपवदते । स्वापिलषिते प्रवर्त्तयितुं प्रार्थयतइत्यर्थः । एतेष्विति किम् । यत्किञ्चिद्वदति ॥

व्यक्तवाचां समुच्चारणे ॥ मनुष्यादीनां सम्भूयोच्चारणे वदेरात्मनेपदं स्यात् । सम्प्रवदन्ते ब्राह्मणाः देवा वा । यद्यपि वद धातुर्व्यक्तायामेव पठ्यते । तथापि व्यक्तवाचामित्युपादानसामर्थ्याद्येषां प्रसिद्धतरं व्यक्तवाक्यन्तदेवेह गृह्यते । तेन शुकसारिकादीनां समुच्चारणे न भवति । वरतनु सम्प्रवदन्ति कुक्कुटाः । नन्विह तनुशब्दस्य ह्रस्वान्तत्वे सम्बुद्धौ चेति गुणेन भाव्यं दीर्घान्तत्वे नदीलक्षणः कप् प्राप्नोति । सत्यम् । तनुशब्दः स्त्रीजातौ कविभिः प्रयुज्यते । तस्मादूङुत इत्यूङि कृते कर्मधारयोयमिति हरदत्तः ॥

अनोरकर्मकात् ॥ अनुपूर्वाद्वदेरकर्म्मकाद्व्यक्तवाग्विषयकादात्मनेपदं स्यात् । अनुवदते कठः कलापस्य । अनुः सादृश्ये

तेन कलापस्येति तुल्यार्थयोगे शेषलक्षणा षष्ठी। अकर्मकादिति किम्। पूर्वोक्तमनुवदति। व्यक्तवाचामित्येव। अनुवदति वीणा॥

विभाषा विप्रलापे। विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्त्तमानाद्वदेरात्मनेपदं वा स्यात्। विप्रवदन्ते विप्रवदन्ति वा वैद्याः। युगपत्परस्परविरोधेन वदन्तीत्यर्थः। विप्रलापे किम्। सम्प्रवदन्ति ब्राह्मणाः। व्यक्तवाचामित्येव। विप्रवदन्ति शकुनयः। समुच्चारणइत्येव। क्रमेण विप्रवदन्ति॥

अवाद्गः॥ अवपूर्वाद्गिरतेरात्मनेपदं स्यात्। अवगिरते। अवात्किम्। गिरति। गृणातेस्त्ववपूर्वस्य प्रयोगो नास्ति अनभिधानादिति भाष्यम्॥

समः प्रतिज्ञाने॥ सम्पूर्वाद्गिरतेः प्रतिज्ञाने वर्त्तमानादात्मनेपदं स्यात्। शब्दं नित्यं सङ्गिरते। प्रतिजानीतइत्यर्थः। प्रतिज्ञाने किम्। सङ्गिराति ग्रासम्॥

उदश्चरः सकर्मकात्॥ उत्पूर्वात्सकर्म्मकाच्चरतेरात्मनेपदं स्यात्। धर्म्ममुच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः। सकर्मकात्किम्। बाष्पमुच्चराति। उपरिष्टाद्गच्छतीत्यर्थः॥

समस्तृतीययुक्तात्॥ सम्पूर्वाच्चरतेस्तृतीयान्तेन युक्तादात्मनेपदं स्यात्। रथेन सञ्चरते। तृतीययुक्तात्किम्। उभौ लोकौ सञ्चरसि इमं चामुञ्च देवल॥

दाणश्च सा चेच्चतुर्थ्यर्थे॥ सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादात्मनेपदं स्यात्सा चेत्तृतीया चतुर्थ्यर्थे। दास्या संयच्छते। कामुकः संस्तस्यै ददातीत्यर्थः। आशिष्यव्यवहारे चतुर्थ्यर्थे तृतीया वक्तव्या॥ एतच्चानेनैव ज्ञाप्यते। यद्वा, इह सूत्रे चेच्छब्दश्चशब्दार्थे। निपातानामनेकार्थत्वात्। सा च चतुर्थ्यर्थे भवतीत्य-

र्थः । अशिष्टव्यवहारइति तु वक्तव्यमेव । भाष्ये त्विदं सूत्रमपि प्रत्याख्यातम् । तथाहि । यो दास्या सह भुञ्जानस्तया दत्तं स्वयं भुंक्ते स्वयञ्च तस्यै ददाति तद्विषयेयं प्रयोग इष्यते । तत्र सहयुक्तइत्येव तृतीया । कर्मव्यतिहारे च तङ् । दानपूर्वके भोगे दाण्धातुर्बोध्य इति । नन्वारभ्यमाणे सूत्रे सम्प्रयच्छतइत्यत्र कथं तङ् सम इति पञ्चम्या आनन्तर्यलाभात् । अत्राहुः । सम इति विशेषणषष्ठी तेन पूर्वसूत्रमप्यश्वेन समुदाचरतइत्यादौ प्रवर्त्ततइति दास्या सम्प्रयच्छतइत्युदाहृत्य शिष्टव्यवहारे तु ब्राह्मणीभ्यः सम्प्रयच्छतीति प्रत्युदाहरन् भाष्यकारश्चेह व्याख्याने प्रमाणम् ॥

उपाद्यमः स्वकरणे ॥ उपपूर्वाद्यमेः प्राग्वत् स्वीकारेर्थे । भार्यामुपयच्छते । यत्स्वस्य सतो रूपान्तरेण करणं तदिह न गृह्यते किं न्त्वस्वस्य सतो यत्स्वत्वसम्पादनं तदेव । त्विप्रत्ययस्तु सूत्रे न कृतः समर्थानां प्रथमाद्वेति विकल्पितत्वात् । तेनेह न । स्वं शाटकमुपयच्छतीति । अत्र वृत्तिकारः पाणिग्रहणएवेष्यते । तेनेह न । देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति । दासीत्वेन रूपेण स्वीकरोतीत्यर्थ इति । एतच्च भाष्यविरुद्धम् । तत्र स्वीकारमात्रे आत्मनेपदस्योक्तत्वात् । तथा च भट्टिः प्रायुङ्क्त । उपायंस्त महास्त्राणि शस्त्राण्यपायंसत जित्वराणि । नोपायंस्त दशाननः । उपायंसत नासवामित्यादि ॥

ज्ञाश्रुस्मृदृशां सनः ॥ सन्नन्तानामेषामात्मनेपदं स्यात् । अपन्हवे ज्ञ इत्यादिभिः सूत्रैर्ज्ञानातेरात्मनेपदं विहितं श्रुदृशोरपि समोगम्यृच्छिभ्यामित्यत्रोपसङ्ख्यानम् । तस्मिंश्च विषये पूर्ववत्सन इत्येव सिद्धम् । विषयान्तरेनेन विधीयते स्मरतेस्तु अप्राप्त एव विधानम् । धर्मं जिज्ञासते । शुश्रूषते । सुस्मूर्षते ।

दिदृक्षते ॥

नानोर्ज्ञः ॥ अनुपूर्वाज्ज्ञातेः सन्नन्तादात्मनेपदं न स्यात् । पुत्रमनुजिज्ञासति । अनोः किम् । धर्मं जिज्ञासते । पूर्वसूत्रेण प्राप्तस्यायं निषेधः । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायात् । तथा च सकर्मकस्यैव प्रतिषेध इति फलितम् । पूर्वसूत्रस्य सकर्मकविषयत्वादकर्मकात्तु पूर्ववत्सन इत्यात्मनेपदं भवत्येव । अकर्मकाच्चेति सूत्रेण केवलाद्विधानात् । औषधस्यानुजिज्ञासते । औषधेन प्रवर्त्तितुमिच्छतीत्यर्थः ॥

प्रत्याङ्भ्यां श्रुवः ॥ आभ्यां श्रुवः सन्नन्तादात्मनेपदं न स्यात् । प्रतिशुश्रूषति । आशुश्रूषति । उपसर्गग्रहणं चेदम् । परस्परसाहचर्यात् । तेनेह न । देवदत्तं प्रति शुश्रूषते । लक्षणेत्थंभूतेत्यादिना प्रतिः कर्मप्रवचनीयो नोपसर्गः ॥

शदेः शितः ॥ शितः प्रकृतिभूतो यः शदिस्तस्मादात्मनेपदं स्यात् । शीयते शीयेते शीयन्ते । शितः किम् । शत्स्यति । अशत्स्यत् । शेषात्कर्त्तरीति परस्मैपदम् ॥

म्रियतेर्लुङ्लिङोश्च ॥ शितो लुङ्लिङोश्च प्रकृतिभूतो यो म्रियतिस्तत एवात्मनेपदं स्यान्नान्यस्मात् । तत्र शित्प्रकृतित्वं पूर्ववच्छिदुत्पत्तेः प्रागेव योग्यतया बोध्यम् । लुङ्लिङोस्तु सत्यामेवोत्पत्तौ बोध्यम् । म्रियते । म्रियताम् । अम्रियत । अमृत । मृषीष्ट । नियमः किम् । ममार । मर्त्तासि । मरिष्यति । अमरिष्यत् । ङित्त्वं तु स्वरार्थम् । मा हि मृत । लुङि तास्यनुदात्तेदिति ङिल्लक्षणः सार्वधातुकनिघातः हि चेति तिङि निघातप्रतिषेधः ॥

पूर्ववत्सनः ॥ सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्म-

नेपदं स्यात्। येन निमित्तेन सनः प्रकृतेरात्मनेपदं विधीयते तदेव निमित्तं सना व्यवहितं सदप्यात्मनेपदं प्रवर्त्तयतीत्यर्थः। इह सूत्रे तेनतुल्यमिति तृतीयान्ताद्वतिर्न तु षष्ठ्यन्तात्। लक्षणाभावात्। यथा च ब्राह्मणेन तुल्यं वैश्यादधीत इत्यत्र ब्राह्मणादिवेति गम्यते तथेहापि पूर्वस्मादिवेति गम्यते। ब्राह्मणापादानकेध्ययने ब्राह्मणशब्दस्य लक्षणया ब्राह्मणापादानकाध्ययनसादृश्यं वैश्यापादानकाध्यापनमिति क्रियासाम्यं दृष्टान्ते निर्वाह्यम्। अन्यथा वतिप्रत्ययायोगात्। यदाह तेन तुल्यं क्रिया चेदिति। एवञ्च प्रकृतेपि आत्मनेपदभावनस्य तुल्यत्वं बोध्यम्। तदपि निमित्तस्य तुल्यत्वात्तद्द्वारकमिति फलितोर्थः। एतेन शब्दो नित्यः कृतकत्वात् घटवदित्यादि व्याख्यातम्। तत्रापि भवनक्रियायाः साम्यात्। अन्यथा वत्प्रत्ययासाधुतापत्तेः। अत एवानित्यो भवितुमर्हतीति प्राञ्चः प्रयुञ्जते। साध्यपदस्य ज्ञाने लक्षणया ज्ञानयोः साम्यं वाक्यार्थ इति वास्तु। सर्वथापि शब्दघटयोः साम्यमार्थं न तु शाब्दमिति दिक्। आसिसिषते। शिशयिषते। निविविक्षते बुभुक्षतइत्यादि। इह तु न भवति। शिशत्सति मुमूर्षति। न ह्येषा शदिस्रियतिव्यक्तिः शितः प्रकृतिः अतो नात्मनेपदनिमित्तम्। कृते हि सनि सन्नन्तमेष शितः प्रकृतिः। शिशयिषतइत्यादौ तु प्रकृतौ ङित्त्वानपायान्निमित्तातिदेशः सम्भवत्येवेति वैषम्यात्। नन्वेवमनुचिकीर्षतीत्यत्रातिप्रसङ्गः। गन्धनादेरर्थस्य ञित्वस्य चात्मनेपदनिमित्तस्यातिदेशापत्तेरिति चेन्न। अनुपराभ्याङ्कृञ इति वचनपर्यालोचनया अनुपूर्वकत्वाभावविशिष्टस्यैवात्मनेपदनिमित्तताध्यवसायात्। अस्तु वा प्राधान्यात्कार्यस्यैवातिदेशः प्राक्सनो येभ्य आत्मनेपदं दृष्टं तेभ्यः सन्नन्तेभ्योपि भवतीति। न

चैवं शिशत्सति मुमूर्षतीत्यत्रातिप्रसङ्गः शदेःशितो म्रियतेर्लुङ्लिङोश्चेति सूत्रद्वयेपि सनो नेत्यनुवर्त्य वाक्यभेदेन सन्नन्तान्निषेधात्। जुगुप्सतइत्यादौ तु यद्यप्ययमतिदेशो न प्राप्नोति। नित्यसन्नन्ततया प्राक् सन आत्मनेपदादर्शनात्। तथाप्यनुदात्तङित इत्यनेनैवात्मनेपदम्। अत्रयवे ह्याचारितार्थं लिङ्गं समुदायं विशिनष्टि सामर्थ्यात्। न चैवं जुगुप्सतीत्यादावतिप्रसङ्गः। सन्पर्यन्ताविशेषणेन चारितार्थ्ये सति ततोप्यधिकविशेषणे प्रमाणाभावात्। नन्वेवं गोपयति तेजयतीत्यादावतिप्रसङ्गः। सन्णिचोर्मध्ये कतरद्विशेषणीयं कतरन्नेत्यत्र विनियामकाभावादिति। अत्राहुः। यत्र निन्दादौ सन्निष्यते तदर्थका एवानुदात्तेतः नित्यसन्नन्ताश्चैते। अर्थान्तरे त्वननुबन्धका एव चुरादौ पाठ्याः। अन्यथा निन्दाक्षमादिभ्योन्यत्र यथा णिच् भवति तथा लडादिरपि स्यात्॥

आम्प्रत्ययवत्कृञोनुप्रयोगस्य॥ आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृतिभूतस्य धातोरिवानुप्रयुज्यमानात्करोतेरात्मनेपदं स्यात्। ञित्त्वादेव सिद्धे ऽकर्त्रभिप्रायार्थं सूत्रम्। ईहाञ्चक्रे। नन्वस्य विध्यर्थत्वादिन्दाञ्चकारेत्यादावपि कर्त्रभिप्राये तङ् प्राप्नोति। सत्यम्। पूर्ववदित्यनुवर्त्तते। तत्सामर्थ्याद्वाक्यभेदेन नियमोपि क्रियते पूर्ववदेवात्मनेपदं न तु पूर्वविपरीतमपीति। कृञः किम्। ईहामास। ईहाम्बभूव। इह कृञ्ग्रहणसामर्थ्यान्न प्रत्याहारग्रहणम्। अत एव च ज्ञापकादनुप्रयोगविधौ प्रत्याहारग्रहणम्॥

प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ प्रोपाभ्यां युजेरयोगइत्यस्यादात्मनेपदं स्यादयज्ञपात्रेषु। प्रयुङ्क्ते। उपयुङ्क्ते। युजिरः

स्वरितेतो रुधादेरकर्त्रभिप्रायार्थोयं विधिः । युज समाधाविति दिवादेस्तु नेह ग्रहणम् । अनुदात्तेत्त्वादेव सिद्धेः । सूत्रे युजेरितीकारस्य विवक्षितत्वाच्च । यज्ञपात्रविषयतायास्तत्रासम्भवाच्च । स्वराद्यन्तोपस्टष्टादिति वक्तव्यम् ॥ स्वरोच्चादिरन्तो वा यस्य तादृशेनोपसर्गेण सम्बद्धादित्यर्थः । सम् निस् निर् दुस् दुर् एतद्भिन्नाः सर्वेप्युपसर्गाः सङ्गृहीताः । उद्युंक्ते नियुङ्क्ते । अयज्ञपात्रेषु किम् । द्वन्द्वं न्यञ्चिपात्राणि प्रयुनक्ति ॥

समः क्ष्णुवः ॥ सम्पूर्वात्क्ष्णुधातोः प्राग्वत् । समोगम्यृच्छिभ्यामित्यतो विच्छिद्य पाठः सकर्मकादपि विधानार्थः । संक्ष्णुते शस्त्रम् ॥

भुजो ऽनवने ॥ रक्षणातिरिक्तेर्थे वर्त्तमानाद् भुजेः प्राग्वत् । भुजो ऽभक्षणइति वक्तव्ये ऽनवनइति वचनमर्थान्तरेष्वपि यथा स्यात् । भुजेर्हि पालनाभ्यवहारादिवोपभोग आत्मसात्करणं चार्थः । ओदनम्भुंक्ते । अभ्यवहरतीत्यर्थः । बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् । दिवं मरुत्वानिव भोक्षते महीम् । नेह पालनमर्थः किन्तूपभोग आत्मसात्करणं वा । एतेन बद्धो जनो दुःखशतानि भुङ्क्तइति व्याख्यातम् । अनवने किम् । महीं भुनक्ति । रुधादेरेवेह ग्रहणम् । अवनप्रतिषेधात् । पठन्ति हि । संयोगो विप्रयोगश्चेत्युपक्रम्य विशेषस्मृतिहेतव इति । यथा दोग्ध्रीपर्यायो धेनुशब्दः संसर्गिभिर्विशेषेवस्थाप्यते । सवत्सा धेनुरानीयतां साकिशोराः सवर्करेति तथा वत्सा किशोराऽवर्करेति गौर्धेनुर्वडवा अजा च क्रमेणानीयते नान्या तथेहापि । तेन भुज कौटिल्यइत्यस्य तुदादेरग्रहणान्नेह बिभुजति पाणिमिति ॥

णेरणौ यत्कर्मणौ चेत्स कर्त्तानाध्याने ॥ ण्यन्तादात्मनेपदं

स्यादनाध्याने । अणौ यत्कर्म णौ चेदिति द्वितीयं वाक्यम् । कर्मेह क्रिया णिच्प्रकृत्युपात्ता या सैव चेण्यन्तेनोच्येतेत्यर्थः । सकर्तेति तृतीयं वाक्यम् । अणावित्याद्यनुवर्तते कर्मेह कारकं शब्दाधिकाराश्रयणात् । णिच्प्रकृतेरर्थं प्रति यत्कर्म कारकं स चेण्यन्ते कर्त्तेत्यर्थः । णिचश्चेत्यात्मनेपदे सिद्धेपि अकर्त्रभिप्रायार्थमिदं सूत्रम् । कर्त्रभिप्रायेपि विभाषोपपदेनप्रतीयमानइति विकल्पबाधनार्थञ्च । अणावकर्मकादिति परस्मैपदबाधनार्थञ्च । न चाकर्त्रभिप्राये चरितार्थस्यास्य विकल्पपरस्मैपदाभ्यां पराभ्यां बाधः स्यादिति वाच्यम् । पूर्वविप्रतिषेधाश्रयणात् । अत्र च प्रमाणं दर्शयते राजेति भाष्योदाहरणमिति दिक् । उदाहरणन्तु कर्तृस्थभावकाः कर्तृस्थक्रियाश्च । तत्र हि कर्मवद्भावो नास्तीति वक्ष्यते । प्रकृतसूत्रेणैव त्वात्मनेपदम् । तथाहि विषयत्वापत्त्युपसर्जनाविषयत्वापादनवचनो वृशिः सकर्मकाणामशब्दाभिधायितानियमात् । तत्र धातूपात्तव्यापाराश्रयः कर्त्ता धात्वर्थभूतव्यापारव्यधिकरणफलशालिकर्म तथा च पश्यन्ति भवं भक्ता इति प्रयोगः चाक्षुषज्ञानेन विषयीकुर्वन्तीत्यर्थः । यदा तु सौकर्यातिशयविवक्षया प्रेरणांशस्त्यज्यते तदा पश्यति भव इति प्रयोगः, विषयीभवतीत्यर्थः । उक्तञ्च । निवृत्तप्रेषणं कर्म स्वक्रियावयवैः स्थितम् । निवर्त्तमाने कर्मत्वे स्वेकर्तृत्वेवतिष्ठतइति ॥ ततः पश्यन्तं प्रेरयन्तीति णिचि दर्शयन्ति भवं भक्ता इति प्रयोगः । पश्यन्तीत्यर्थः । उक्तञ्च । निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजुच्यतइति ॥ ततः पुनर्ण्यर्थस्य सौकर्यद्योतनार्थमविवक्षायां दर्शयते भवः विषयीभवतीत्यर्थः । तादिह पश्यतिदर्शयत्योः समानार्थतया कर्तृस्थभावकत्वाच्च कर्मवद्भावविरहे प्रकृतसूत्रेणात्मनेपदम् । इह हि

णिच्प्रकृतिभूतेन दाशिना य एवार्थो द्वितीयकक्षायामुपात्तः स एव चतुर्थ्यामिति सामानक्रियत्वमस्ति अणौ यत्कर्म प्रथमकक्षायां तदेव कर्तृ। एवं आरोहयते हस्तीत्यप्युदाहरणम् । आरोहन्ति हस्तिनं हस्तिपकाः । न्यग्भावयन्तीत्यर्थः । आरोहति हस्ती न्यग्भवतीत्यर्थः । ततो निवृत्तप्रेषणाण्णिचि आरोहयन्ति । आरोहन्तीत्यर्थः । ततः पुनर्ण्यर्थत्यागे आरोहयते । न्यग्भवतीत्यर्थः । इहापि प्राग्वत्प्रथमतृतीययोर्द्वितीयचतुर्थ्योश्चार्थसाम्याच्चतुर्थी कक्षा उदाहरणम् । सोयं निवृत्तप्रेषणपक्षः । आह च । न्यग्भावनं न्यग्भवनं रुहौ शुद्धे प्रतीयते । न्यग्भावनं न्यग्भवनं ण्यन्तेपि प्रतिपद्यते ॥ अवस्थां पञ्चमीमाह ण्यतन्तत्कर्मकर्त्तरि । निवृत्तप्रेषणाद्धातोः प्राक्तेर्थे णिजुच्यतइति ॥ इह विशिष्टवाचकयोः शुद्धण्यन्तयोर्वाच्यावंशौ वाचकभेदात् द्वेधा गणयित्वा पूर्वोक्तप्रथमतृतीयकक्षायामवस्थाचतुष्टयञ्चतुर्थकक्षायान्तु पञ्चमी अवस्थेति श्लोकार्थोभिप्रेतः । यद्वा । पश्यन्ति भवं भक्ताः । आरोहन्ति हास्तिनं हस्तिपका इति प्राग्वदेव प्रथमकक्षा । ततः सौकर्यद्योतनार्थं कर्मणा एव प्रेषणमध्यारोप्य णिच् क्रियते । दर्शयति भवः आरोहयति हस्तीति पश्यत आरोहतश्च प्रेरयतीत्यर्थः । ततो णिच्प्रकृतिभ्यां णिज्भ्याञ्चोपात्तयोर्द्वयोरपि प्रेषणयोर्युगपत्त्यागे दर्शयते आरोहयतइत्युदाहरणम् । विषयीभवति न्यग्भवतीति च पूर्ववदेवार्थः । सोयमध्यारोपितप्रेषणपक्ष इहाध्यारोपितप्रेषणपक्षे दर्शयति भव आरोहयति हस्तीति द्वितीयकक्षायामतिव्याप्तिं वारयितुं समानक्रियत्वपरं द्वितीयं वाक्यम् । तेन प्रेषणाधिक्यान्नातिव्याप्तिः । निवृत्तप्रेषणपक्षे दर्शयन्ति भवमारोहयन्ति हस्तिनमित्येवंरूपं तृतीयकक्षायामतिव्याप्तिं वारयितुमणौ

यत्कर्म स चेण्णौ कर्त्तेत्येवंरूपं तृतीयं वाक्यम्। इह तु अ-
णौ कर्मणोर्भवहस्तिनोः कर्मत्वमेव न तु कर्तृतेति नातिव्याप्तिः।
अत्र प्राञ्चः। अणौ यत्कर्मेति वाक्यं कर्मान्तरनिवृत्तिपरम्।
तथा हि। यत्तदोर्नित्यसम्बन्धादिह यच्छब्देन तच्छब्द आ-
क्षिप्यते। धर्मान्तरस्य चानिर्देशादुद्देश्यतयापि श्रुतं कर्मत्वमेव
विधीयते। तच्च विधीयमानं सामर्थ्याण्णेरित्यस्य सन्निहितत्वा-
च्च ण्यन्तावस्थायामेव विधीयते। न ह्यणौ तद्विधानं सम्भव-
ति अणौ यत्कर्मेत्यनुवादसामर्थ्यादेव तत्सिद्धेः। तदेवमणौ
यत्कर्मेत्येतावत एवाणौ यत्कर्म णौ चेत्तत्कर्मेत्यर्थः फलितः।
अनेन च कर्मान्तरनिवृत्तिः क्रियते। न त्वणौ कर्मणो णौ क-
र्मत्वं प्रतिपाद्यते। स कर्मेत्युत्तरवाक्येन तस्य कर्तृत्वप्रतिपा-
दनात्। एकस्य युगपदेकस्यां क्रियायां कर्मकर्तृत्वयोरसम्भवा-
त्तस्मात्। उद्देशप्रतिनिर्देशालब्धे यत्सङ्ग्रहे पुनः। तद्ग्र-
हो वाक्यभेदेन कर्मान्तरनिवृत्तये॥ ततो णौ चेदिति वाक्या-
न्तरम्। अणौ यदित्येव, अणौ यत्प्रतिपाद्यं वस्तु तदेव णौ
प्रतिपाद्यश्चेदित्यर्थ इति व्याचख्युः। अत्रेदं चिन्त्यम्। क-
र्मान्तरनिवृत्तिपरं व्याख्यानं यद्यपि कर्तुं शक्यं तथापि तस्य
फलं दुर्लभम्। आरोहयमाणो हस्ती स्थलमारोहयति मनुष्या-
नित्यस्य व्यावृत्तिः फलमिति चेन्न। तत्र समानक्रियत्वाभावा-
ण्णौ चेदिति वाक्यं हि प्रतिपाद्यसाम्यार्थमिति वृत्तिपदमञ्जर्योः
स्थितम्। न चेह तदस्ति। न चास्तु वृत्त्यादिमते दोषोयं भाष्यकैयट-
योस्तु समानक्रियत्वस्यानुक्तत्वाकर्मान्तरव्यावृत्तिफलकं वा-
क्यं सार्थकमेवेति चेत्। न। भाष्यमतेपि स्वमानक्रियत्वस्य
व्याख्येयत्वात्। तस्यानुक्तत्वेप्यप्रत्याख्यानततया सम्मतत्वा-
त्। अन्यथा अध्यारोपितप्रेषणे द्वितीयकक्षायामतिप्रसङ्गात्।

भाष्यवार्त्तिकयोः कर्मशब्दस्य क्रियापरतयैव व्याख्यातुं शक्यत्वाच्च । अभ्युपेत्यापि ब्रूमः । मास्तु भाष्यमते समानक्रियत्वं तथापि दर्शयते भृत्यान् राजेत्युदाहरणं व्याचक्षाणेन कैयटेन अणौ ये कर्तृकर्मणी तच्छिन्नं कर्म व्यावर्त्यते इति तावत्स्पष्टीकृतम् । तथा च मनुष्यानित्यस्याणौ कर्तृतया गत्यर्थाद् द्रुहेर्णौ कर्मत्वेपि दुर्वारमात्मनेपदम् । मनुष्यस्थलयोरणौ कर्तृकर्मणोरेवेह कर्मतया तदितरकर्माभावात् । अपि च । सकर्त्तेत्यंशोपीह नास्ति । हस्तिन एव कर्तृत्वात् । स्यादेतत् । आरोहयमाण इत्यत्राणौ कर्मणो हस्तिन एव कर्तृत्वं स एव च स्थलमारोहयतीत्यत्रापि कर्त्तेति । तदपि न । प्रत्यासत्तिबलेनैवातिप्रसङ्गभङ्गात् । तथाहि । ण्यन्तादात्मनेपदं स्यादणौ यत्कर्म स चेत्कर्त्तेत्युक्ते प्रत्यासत्तेरेतद्भम्यते । येन णिचा ण्यंतादात्मनेपदं विधित्सितं तत्प्रकृतौ यत्कर्म स चेत्कर्त्तेति । इह तु यत्रायमुपाधिः कृतमेव तत्रात्मनेपदम् । आरोहयमाण इति यत्र तु न कृतं स्थलमारोहयतीति न तत्रायमुपाधिरस्ति, येनातिव्याप्तिः स्यात् । यत्तु हरदत्तेनोक्तम् । हस्तिपकानारोहयति हस्तीत्यत्र मा भूदिति । तत्रेदं वक्तव्यम् । किमिदमध्यारोपितप्रेषणपक्षे द्वितीयकक्षायामुदाहरणं किं वा निवृत्तप्रेषणपक्षइति । नाद्यः । णिज्वाच्यव्यापारभेदेन समानक्रियत्वाभावात् । न द्वितीयः । तत्राद्ययोः कक्षयोरण्यन्तत्वात् । तृतीयस्यान्तु हस्तिनः कर्तृत्वायोगात् । हस्तिपकानां कर्मत्वासम्भवाच्च । तस्माच्चतुर्थी परिशिष्यते । तत्रापि न्यग्भवतीत्यर्थापर्यवसानेन कर्मणो नान्वयः स्पष्ट एव । स्यादेतत् । दर्शयते भृत्यान् राजेति तावद्भाष्ये स्वीकृतं तत्समर्थनाय आणौ ये कर्तृकर्मणी तदितरकर्मव्यवच्छेदोभिप्रेत इत्याह कैयटः । तस्याप्ययमाशयः ।

अणौ यत्कर्मेत्यत्र कर्त्तरिकर्मेत्यतोनुवृत्तं कर्त्तरीत्येतत्प्रथमया विपरिणम्यते । यश्च यच्च यादिति नपुंसकमनपुंसकेनेत्येकशेषः । तेन कर्मकर्त्रोर्णौ कर्मत्वेप्यदोषः । एवञ्च करेणुरारोह्यते निषादिनमिति माघप्रयोगोप्युपपद्यतइति एवं स्थिते निवृत्तप्रेषणाध्यारोपितप्रेषणपक्षयोर्द्वयोरपि चरमकक्षायामकर्मकतया भाष्यकैयटादिग्रन्थाः सर्वएवानन्विताः स्युस्तार्किं हरदत्तं प्रत्येव पर्यनुयोगेन । एतावानेव हि भेदः भाष्यमते ऽणौ ये कर्तृकर्मणोरिति व्याख्यानादुदाहरणमिदं वृत्तिकारहरदत्तादिमते तु प्रत्युदाहरणम् । अणौ यत्कर्मेत्येव व्याख्यानादिति । अत्रोच्यते । अनन्वयस्तावदुरुद्धरः । बाधे दृढेन्यसाम्यात्किं दृढेन्यदपि बाध्यतामिति न्यायात् । गम्भीरायां नद्यां घोष इत्यत्र गम्भीरनदीपदार्थयोरभेदबोधानन्तरं तीरलक्षणायामपि प्राथमिकबोधमादाय गम्भीरपदसार्थक्यवादिहाप्यध्यारोपितप्रेषणपक्षे द्वितीयकक्षायां कर्मण्यन्विते ततो णिजर्थस्येव कर्मणोपि त्यागे णिचः कर्मपदस्य च प्राथमिकबोधमादाय कथं चित्सार्थक्यम् । स्वज्ञाप्यसम्बन्धो लक्षणेत्यभ्युपगमात् । एषैवार्थवादैः प्राशस्त्यलक्षणायां गतिरिति कैयटस्योक्तिसम्भवो बोध्यः । निष्कर्षस्तु कर्मण्यवच्छेदवाक्यार्थो भाष्यवार्त्तिकयोरनभिमत एव । उक्तरीत्या प्रयोजनाभावात् । ग्रन्थस्तु कर्मपदस्य क्रियापरतायां सुस्थ एव । उदाहरणेषु तु भृत्यानित्यादेराविवक्षायां कर्मव्यापारमात्रे विवक्षिते सिद्धं भवतीत्येवाशयो बोध्यः । स्मरयत्येनं वनगुल्मः स्वयमेवेति भाष्यवृत्त्योर्व्याख्यावसरे एनमिति कर्मणो विवक्षायाः कैयटहरदत्ताभ्यामुभाभ्यामपि शरणीकृतत्वाच्च । यत्तु सूत्रशेषे कैयटेनैनमित्यस्य विवक्षेति पुनः प्रतिपादितं तदेव त्वापातत इति दिक् । तस्मात्, भृत्यादीनां परित्यागाच्छब्दभेदात्परिग्रहात् ।

कर्मवाक्ये च तादर्थ्यवर्णनात्सर्वमुज्ज्वलम् ॥ स्यादेतत् । सकर्मकाणांसर्वेषामशद्वयाभिधायितया कर्मकर्तरि कर्मवद्भावातिदेशादेव सिद्धानीह मूलोदाहरणानि । न चाध्यारोपितप्रेषणपक्षे आरोहयतौ हस्तिनः कर्मत्वाभावात्समानधातौ च कर्मत्वाभावेन पचत्योदनं देवदत्तो राध्यत्योदनः स्वयमेवेतिवत्कर्मवद्भावो न प्राप्नोतीति वाच्यम् । निवृत्तप्रेषणप्रक्रिययैव सकललक्ष्यसङ्ग्रहात् । अध्यारोपितप्रेषणपक्षपरित्यागेपि क्षत्यभावात् । न च दृशेः कर्तृस्थभावकतया रुहेश्च कर्तृस्थक्रियतया कर्मवद्भावो न प्राप्नोतीति वाच्यम् । पचिभिद्यादिभ्यो वैलक्षण्यस्य दुरुपपादत्वात् । विक्लेदनद्विधाभवनयोरपि कर्तृस्थतापत्तौ कर्मवद्भावातिदेशस्य निर्विषयतापत्तेः । तत्र व्यापारांशस्य कर्तृस्थत्वेपि विक्लित्तिद्विधाभवनरूपे फले कर्मस्थे इति । यदि तर्हि दृशिरुह्योरपि विषयत्वन्यग्भावौ कर्मस्थाविति तुल्यम् । तस्मादिह वैषम्ये बीजं वक्तव्यमिति चेत् । अत्राहुर्भर्तृहरिः । विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता । क्रियाव्यवस्थात्वन्येषां शब्दैरेव प्रकल्पितेति ॥ अस्यार्थः । यत्र क्रियाप्रयुक्तो विशेषो दृश्यते यथा पक्वेषु तण्डुलेषु यथा वा छिन्नेषु काष्ठेषु । तत्र क्रिया स्थिता । तेन पच्यते ओदनः छिद्यते काष्ठमिति कर्म्मवद्भावः सिद्धः । अन्येषां मते । अन्येषां धातूनां वाशब्दैरेव क्रियाव्यवस्था । शब्देन कर्तृव्यापारस्यैव प्राधान्येनावगमात्कर्तृस्थतेत्यर्थः । उद्देशतापि क्व चित्कर्मस्थांशस्य क्व चित्तु व्यापारांशस्येति औत्सर्गिकं नियामकं बोध्यं तदिह दर्शनरोहणाभ्यां विषये न्यग्भूते च विशेषानुपलम्भात्कर्तृस्थ एवेह भावः क्रिया च । उद्देशानुरोधाच्च । अहं पश्येयमिति ह्युद्देशः न तु अयं विषयो भवत्वित्येवमहमुपरि गच्छेयमित्युद्देशो न तु हस्तिनो न्यग्भावो भवत्विति ।

उपरिगमनरूपएव च व्यापारविशेषो रुहेरर्थो न तु न्यग्भावनमात्रम्। भूमिष्ठे वृक्षस्य शाखां हस्ताभ्यामवनमयत्यपि आरोहतीत्यप्रयोगात्। अत एव यद्धितुपरं छन्दसीत्यत्र भाष्यं रुहिर्गत्यर्थ इति। अत एव चाणौ कर्तुर्णौ कर्मत्वम्। पचिच्छिद्योस्तु विक्लित्तिद्विधाभवनरूपो विशेषः कर्मणि दृष्टः तदुद्देशेनैव च कारकव्यापार इति महद्वैषम्यम्। एवञ्चारुह्यते हस्तीति कर्मवद्भावं प्रदर्शयन्तो भाष्यन्यायाविरोधादुपेक्ष्या इति कैयटः। एतेन, अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च। यत्कृपावशतस्तस्मै नमोस्तु गुरवे सदेति प्रयोगो व्याख्यातः। न चैवं क्रियतइति न स्यादिति वाच्यम्। यत्नार्थतावादिनामेतद्दोषप्रसङ्गेपि भूवादिसूत्रस्थभाष्यानुसारेण करोतेरभूतप्रादुर्भावार्थतामभ्युपगच्छतामस्माकं सर्वसामञ्जस्यात्। एवञ्च कर्तृस्थभावक्रियेषु कर्मवद्भावाप्राप्तेर्विध्यर्थमिदं सूत्रमिति स्थितं भाष्ये। लावयते स्वयमेवेत्यादौ तु कार्यातिदेशपक्षे परत्वात्कर्मवत्कर्मणेत्येवात्मनेपदम्। शास्त्रातिदेशे तु भावकर्मणोरित्येतदपेक्षया परत्वाण्णेरणादिसूत्रेणेत्यवधेयम्। यदि त्वणौ ये कर्तृकर्मणी तद्भिन्नकर्मनिवृत्तिर्भाष्यकृतोभिप्रेता स्यात्तर्हि सकर्मकाणां मध्ये तत्सूत्रोदाहरणतापत्तौ कर्मस्थक्रिया अप्युदाहरणं स्युः। न हि तत्रातिदेशः सुलभः। कर्मवदकर्मकाणामिति वक्ष्यमाणत्वात्। तथा नियमार्थत्वपराणां यक्चिणोः प्रतिषेधार्थं त्वित्यादिभाष्यवार्त्तिकग्रन्थानामप्यसामञ्जस्यं स्यादिति दिक्। तस्मादिहास्मदुक्तमेव वाक्यार्थत्रयं मुनित्रयसंमतम्। जयादित्यन्यासकारहरदत्तकैयटादिसकलग्रन्थकाराणामिह महानेव पूर्वापरविरोधो विपश्चिद्भिरुद्धर्त्तव्यः। अस्मदुक्तिस्तु मात्सर्यमुत्सार्य परिभावनीयेत्यलं बहुना। यत्तु करेणुरारोहयते निषादिनमिति माघे

प्रयुक्तं तण्णिचश्चेति सिद्धम् । एतेन स सन्ततं दर्शयते गतस्मयः कृतधिपत्यामिव साधु बन्धुतामिति व्याख्यातम् । बन्धुता तं पश्यति तां दर्शयते । यद्वा । बन्धुतां कृताधि पत्यामिव लोकः पश्यतितां दर्शयते इत्यर्थः । आद्ये बन्धुता अणौ कर्त्री । द्वितीये त्वणौ सा कर्म । उभयथापि णौ कर्मत्वं निर्विवादमेवेति दिक् । णेरिति किम् । आरोहतीति निवृत्तप्रेषणान्मा भूत् । न च णौ चेदिति वाक्यशेषे श्रुतत्वाण्णेरेव भविष्यतीति वाच्यम् । अणावित्यस्यापि श्रुतत्वात् । किं चोत्तरार्थमवश्यं णेरिति वाच्यमेव । तदिहैव स्पष्टार्थमुक्तम् । हेतुमणिजग्रहणार्थं च । भीस्म्योस्तस्यैव सम्भवात् । तेन गणयते गणः स्वयमेवेति सिद्धम् । गणयतिर्हि विभज्य भागशोवस्थापने वर्त्तते । तथा च कर्मस्थभावकादस्मान्निवृत्तप्रेषणाद्धेतुमण्णौ पुनः प्रेषणांशत्यागे सत्यात्मनेपदमिष्टम् । णेरिति हेतुमण्णिचा सन्निधानादणावित्यत्रापि तस्यैव ग्रहणाच्चुरादिणौ यत्कर्म तत्कर्तृकाद्धेतुमण्ण्यन्तादपि सिध्यतीति । यन्तु वृत्तिकृता गणयतीत्येव रूपमवस्थाचतुष्टयेप्युदाहृयते । तत्र सङ्ख्यानिमित्तस्य परिच्छेदस्य ज्ञानविशेषात्मकतया कर्तृस्थस्य धातुवाच्यतामाश्रित्य कर्मवद्भावाप्रवृत्त्या द्वितीयावस्थायां परस्मैपदमुपपादनीयम् । चतुर्थावस्थायां तु परस्मैपदमशुद्धमेव । णेरणावित्यत्रापि अणावकर्मकादित्यत्रैव हेतुमण्णिच एव ग्रहणस्य न्याय्यत्वात् । तथैव भाष्ये स्थितत्वाच्च । भागशोवस्थापनपरत्वे तु द्वितीयावस्थायामप्यात्मनेपदमिति विशेषः । कर्मवद्भावस्य दुर्वारत्वात् । यक्किणौ तु णिश्रन्थीत्यादिनिषेधान्न स्त इति दिक् । णौ चेदिति किम् । निवृत्तप्रेषणाण्णौ आरोहयन्ति हस्तिपका इति तृतीयकक्षायां मा भूत् । असति हि णौ चेद्भ-

हणे श्रुतत्वादणावेव कर्मत्वं कर्तृत्वञ्च लभ्येत । न चैकस्योभयरूपता बाधितेति वाच्यम् । प्रथमावस्थायां कर्मणो द्वितीयावस्थायां कर्तृत्वस्य निर्विवादत्त्वात् । अनाध्याने किम् । स्मरति वनगुल्मङ्कोकिलः । ततश्चतुर्थावस्थायां स्मरयति वनगुल्मः । उत्कण्ठापूर्वकस्मृतौ विषयो भवतीत्यर्थः । स्मृ आध्याने, घटादिः॥

भीस्म्योर्हेतुभये ॥ आभ्यां ण्यन्ताभ्यामात्मनेपदं स्यात्प्रयोजकादेव चेद्भयविस्मयौ स्तः । सूत्रे भयग्रहणं विस्मयस्याप्युपलक्षणम् । मुण्डो भीषयते । भियो हेतुभये षुगिति षुक् । बिभेतेर्हेतुभयइति वैकल्पिकत्वपक्षे तु भापयते अत्र षुङ्न । तद्विधावीकारप्रश्लेषात् । जटिलो विस्मापयते । नित्यंस्मयतेरित्यात्वम् । अर्त्तिह्रीति पुक् । हेतुभये किम् । कुश्चिकया भाययति । रूपेण विस्माययति । इह करणाद्भयविस्मयौ न तु हेतोः । यद्यपि हेतोर्व्यापारे णिज्विधानात्प्रयोजकसाध्यता दुर्वारा तथापि हेतुस्वरूपमेवान्यनिरपेक्षं धात्वर्थप्रयोजकञ्चेदितीत्थम् । विशेषणोपादानसामर्थ्यात् । अत एव मौंड्येन भापयतीत्यत्र न, मौंड्याख्यधर्मस्य भेदेन विवक्षणात् । उदाहरणे तु तादात्म्यस्य विवक्षणाद्धेतोरेव भयम् । एतेन मनुष्यवाचा मनुवंशकेतुम्, विस्माययन्निति, व्याख्यातम् । इह हि न सिंहाद्विस्मयः किन्तु मनुष्यवाचेति कारणात । अत एवात्र नित्यंस्मयतेरित्यात्वं न । तद्विधाने बिभेतेर्हेतुभयइत्यतो हेतुभयानुवृत्त्या भयग्रहणस्य च स्मयोपलक्षणतया व्याख्यानात् । क चित्तु विस्मापयन्निति पुगागमपाठः प्रामादिकः । यद्वा । वाक् विस्मापयते सिंहस्तु विस्मापयमानां वाचं प्रयुङ्क्ते विस्मापयति । ण्यन्ताण्णिच् । वाचेति तु प्रयोज्ये कर्त्तरि तृतीया न तु करणे इति समाधेयम् ॥

गृधिवञ्च्योः प्रलम्भने ॥ प्रतारणार्थाभ्यामाभ्यां ण्यन्ताभ्यामात्मनेपदं स्यात् । माणवकं गर्धयते वञ्चयते वा । प्रलम्भने किम् । श्वानङ्गर्धयति । अभिकांक्षामस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । वर्जयतीत्यर्थः ॥

लियः सम्माननशालिनीकरणयोश्च ॥ सम्माननशालिनीकरणयोश्चकारात्प्रलम्भने च वर्त्तमानाण्ण्यन्ताल्लीधातोरात्मनेपदं स्यात्। लीङ् श्लेषणे दिवादिः, ली श्लेषणे क्र्यादिः, उभयोरपि ग्रहणम् । निरनुबन्धकपरिभाषा तु प्रत्ययविषयिणी । वामदेवाड्ड्यड्ड्याविति डित्करणेन ज्ञापिता हि सा । ज्ञापकञ्च सजातीयविषयकमेवेत्युत्सर्गः । सम्माननं, जटाभिरालापयते । पूजां समधिगच्छतीत्यर्थः । अकर्मकश्चायम् । धात्वर्थेन क्रोडीकृतकर्मत्वात् पुत्रीयतीत्यादिवात् । शालिनीकरणे, श्येनो वर्त्तिकामुल्लापयते । न्यक्करोतीत्यर्थः । प्रलम्भने, बालमुल्लापयते । विभाषालीयतेरिति णावात्वं विधीयते । तदस्मिन्विषये नित्यम् । अन्यत्र तु विकल्पः । व्यवस्थितविभाषा हि सा । न च लीयतेरिति विहितमात्वं कथं लीनातेः स्यादिति वाच्यम् । लीनातिलीयत्योर्यका निर्देशोयमिति सिद्धान्तात् । संमाननादिष्विति किम् । बालकमुल्लापयति । आश्लेषयतीत्यर्थः ॥

मिथ्योपपदात्कृञोभ्यासे ॥ ण्यन्तात्कृञो मिथ्योपपदादात्मनेपदं स्यात्पौनःपुन्ये । पदं मिथ्या कारयते । सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः । नित्यवीप्सयोरिति द्वित्वं तु न भवति । आत्मनेपदेनैवाभ्यासस्य द्योतितत्वात् । करोतिश्चेहोच्चारणवृत्तिरकर्मकः । ण्यन्तस्तूच्चारणवृत्तिः सकर्मकश्च । मिथ्योपपदात्किम् । पदं सुष्ठु कारयति । कृञः

किम्। पदं मिथ्या वाचयति। अभ्यासे किम्। सकृत्पदं मिथ्या कारयति॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्क्रियाफले कर्तृगामिनि सति। यजते। सुनुते। कर्त्रभिप्राये किम्। यजन्ति याजकाः। सुन्वन्ति। दक्षिणादि तु न फलम्। उक्तं हि हरिणा। यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत्प्रधानफलं तेषां न लाभादि प्रयोजनमिति। पचा, पाकः। षित्त्वादङ्। के चित्तु प्रयोजकव्यापारवृत्तिभ्यो धातुभ्यस्तद्द्योतकमात्मनेपदमनेन विधीयते। कुरुते। कारयतीत्यर्थः। कारयतइत्यत्र तु प्रयोजकव्यापारद्वयमर्थः। णिजन्ताण्णिचि यथा कर्त्रभिप्रायइति सूत्रांशोपि कर्तृपदस्याहेतुकर्तृपरत्वादुक्तार्थतात्पर्यक एवेत्याहुः। उक्तञ्च हरिणा, क्रियाप्रवृत्तावाख्याता कैश्चित्स्वार्थपरार्थता। असती वा सती वापि विवक्षितनिबन्धना॥ येषाञ्चित्कर्त्रभिप्राये णिचा सह विकल्प्यते। आत्मनेपदमन्येषां तदर्थाप्रकृतिर्यथा॥ क्रीणीष्व पचते धत्ते चिनोति चिनुतेपि च। आत्मप्रयोगा दृश्यन्ते येषु ण्यर्थोभिधीयतइति॥ असती चेत्यनेन कमलवनोद्घाटनं कुर्वते यइत्यादयः प्रयोगाः समर्थिताः। तत्रापि स्वार्थताविवक्षायाः सम्भवात्। ण्यर्थस्य वाचकं द्योतकं वा आत्मनेपदमिति मतद्वयं सङ्गृहीतं केषां चिदित्यादिना श्लोकेन। चिनोति चिनुत इति, चिनोति चापयति चेति क्रमेणार्थः॥

अपाद्वदः॥ अपपूर्वाद्वदतेरात्मनेपदं स्यात्कर्तृगामिनि फले संविधाने च। न्यायमपवदते। कर्त्रभिप्राये किम्। अपवदति॥

णिचश्च॥ णिजन्तादात्मनेपदं कर्तृगे फले संविधाने च।

कटं कारयते । कथं कृतश्मश्रुरपि श्मश्रूणि कारयतीति भाष्यम् । संविधानइति व्याख्याने भविष्यति । आद्यपक्षे तु कर्तृगामित्वाविवक्षायां भविष्यति । अत्र कश्चित् लक्षयतेः स्वरितेत्करणाज्ज्ञापकाच्चुरादिणिजन्तादात्मनेपदं न भवतीति । आह च स्वरितेत्स्याद्ग्रहिः क्रयादौ लक्षिश्चैकश्चुरादिष्विति । चन्द्रस्तु णिजभावपक्षे स्वरितेत्त्वस्य सार्थकत्वान्नोक्तज्ञापकता अतश्चुरादेरप्ययं विधिर्भवत्येवेत्याह । मैत्रेयस्तु स्वरितेत्त्वमस्यानाकरमित्याह । तदेतद्धरदत्तोपि सञ्जग्राह । एष विधिर्न चुरादिणिजन्तात्स्यादिति कश्चन निश्चिनुते स्म । आप्तवचोत्र न किं चन दृष्टं लक्षयतेः स्वरितेत्त्वमनार्षमिति ॥

समुदाङ्भ्यो यमोऽग्रन्थे ॥ एभ्यो यमः प्राग्वत्कर्तृगे फले संविधाने च न तु ग्रन्थे विषये । आङ्पूर्वकस्य वचनं सकर्मकार्थम् । अकर्मके त्वाङोयमहन इत्येव सिद्धम् । व्रीहीन्संयच्छते भारमुद्यच्छते वस्त्रमायच्छते । अग्रन्थे किम् । उद्यच्छति चिकित्सां वैद्यः । इहाधिगमपूर्वकमुद्यमं क्रमेरर्थः । चिकित्साशास्त्रमधिगन्तुमुद्यमं करोतीत्यर्थः । कर्त्रभिप्रायइत्येव । संयच्छति उद्यच्छति आयच्छति ॥

अनुपसर्गाज्ज्ञः ॥ अस्मात्प्राग्वत्कर्तृगे फले संविधाने च । अकर्मकाच्चेत्येव सिद्धे वचनमिदं सकर्मकार्थम् । गाञ्जानीते । अनुपसर्गात्किम् । स्वर्गं लोकं न प्रजानाति । कथं तर्हि भट्टिः, इत्थं नृपः पूर्वमवालुलोचे ततोनुजज्ञे गमनं सुतस्येति । कर्मण्ययं लिट् । नृपेणेति तृतीयान्तस्य विपरिणामादिति जयमङ्गला ॥

विभाषोपपदेन प्रतीयमाने ॥ स्वरितेत्प्रभृतिभ्य आत्मनेपदं वा स्यात् समीपोच्चारितपदेन क्रियाफलस्य कर्तृगत्वे

प्रतीते । स्वरितञित इत्यादि पञ्चसूत्र्या यदात्मनेपदं विहितन्तत् क्रियाफलस्य कर्तृगत्वे उपपदे न द्योतिते न प्राप्नोति । उक्तार्थानामप्रयोगात् । तत्राप्राप्तिविभाषेयम् । उपपदं चेह समीपे श्रूयमाणं पदं न तु पारिभाषिकम् । असम्भवात् । इह च पञ्चसूत्री अनुवर्त्तते । स्वं यज्ञं यजति यजते वा । स्वं कटं करोति कुरुते वा । स्वं पुत्रमपवदति अपवदते वा । स्वं व्रीहिं संयच्छति संयच्छते वा । स्वाङ्गं जानाति जानीते वा ॥

शेषात्कर्त्तरि परस्मैपदम् ॥ आत्मनेपदानिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं स्यात् । याति वाति । कथं तर्हि स्मराग्नौ जुव्हानाः सुरभिघृतधाराहुतिशतैरिति सौन्दर्यलहरी । सत्यम् । नायं शानच् किन्तु चानश् । एतेन रसमानसारसेनेतिमाघो व्याख्यातः ॥

अनुपराभ्यां कृञः ॥ आभ्यां कृञः परस्मैपदं स्यात् कर्तृगेपि फले गन्धनादावपि । अनुकरोति पराकरोति । ननु कर्मकर्तर्यपि प्राप्नोति । अनुक्रियते स्वयमेवेति । नैष दोषः । कार्यातिदेशपक्षे कर्मवत्कर्मणेत्यात्मनेपदेन परेणास्य बाधात् । शास्त्रातिदेशे तु भावकर्मणोरित्यस्य पूर्वत्वात्परेणानेन यद्यपि भाव्यं तथापीह कर्त्तरिकर्मेत्यतः शेषात्कर्तरीत्यतश्च कर्तृग्रहणद्वयमनुवर्त्तते तेन कर्तैव यः कर्ता तत्रायं विधिर्न तु कर्मकर्त्तरीति बोध्यम् ॥

अभिप्रत्यतिभ्यः क्षिपः ॥ क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति । प्रतिक्षिपति । अतिक्षिपति । एभ्यः किम् । आक्षिपते । कर्त्तरीत्येव । नेह । आक्षिप्यते सूत्रम् । द्वितीयकर्तृग्रहणानुवृत्तेः कर्मकर्त्तर्यपि न ॥

प्राद्वहः ॥ वह प्रापणे स्वरितेत् । प्रवहति । प्रात्किम् ।

आवहते ॥

परेर्मृषः ॥ मृष तितिक्षायां स्वरितेत् । परिमृष्यति । परेः किम् । आमृष्यते । इह परेरिति योगं विभज्य वहइत्यनुवर्त्तनात्परिवहतीति के चिदिच्छन्ति ॥

व्याङ्परिभ्यो रमः ॥ रमक्रीडायाम् । अनुदात्तेत् । विरमति । आरमति । परिरमति । एभ्यः किम् । अभिरमते ॥

उपाच्च ॥ उपपूर्वाद्रमेः प्राग्वत् । सकर्मकार्थोयमारम्भः । अकर्मकान्तु विभाषां वक्ष्यति । स्यादेतत् । उपपूर्वको रमिर्निवृत्तिविनाशयोर्वर्तते । उपरतोध्ययनात् । उपरता निधनानीति यथा । न चानयोरर्थयोः सकर्मकता सम्भवति । सत्यम् । अन्तर्भावितण्यर्थोत्रोदाहार्यः । तद्यथा । यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः ॥

विभाषाकर्मकात् ॥ उपाद्रमेरकर्मकात्परस्मैपदं वा स्यात् । उपरमति उपरमते वा । निवर्त्ततइत्यर्थः ॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात् । णिचश्चेत्यस्यापवादः । बोधयति पद्मम् । योधयति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् । इहाणावकर्मकादिति न सिध्यति । अचित्तवत्कर्तृकत्वात् । इङ्, अध्यापयति । प्रुद्रुस्रूणां निगरणचलनार्थेभ्यश्चेत्येव सिद्धे यदा न चलनार्थस्तदर्थं वचनम् । प्रावयति । प्रापयतीत्यर्थः । द्रावयति । विलापयतीत्यर्थः । स्रावयति । स्यन्दयतीत्यर्थः । स्यन्दनं द्रवत्वजन्यचलनम् । न चैवं चलनार्थत्वात्सिद्धमिति वाच्यम् । द्रवत्वजन्यतावच्छेदकचलनत्वव्याप्यजातिविशेषे शक्तत्वास्य विशेषशब्दत्वेप्यपर्यायत्वात् ॥

निगरणचलनार्थेभ्यश्च ॥ अभ्यवहारार्थेभ्यः कम्पनार्थेभ्य-

श्रण्यन्तेभ्यः परस्मैपदं स्यात्। निगारयति। आशयति। भोजयति। चलयति। चोपयति। कम्पयति। सकर्मकार्थोऽचित्तवत्कर्तृकार्थश्चायमारम्भः। आदेः प्रतिषेधो वक्तव्यइति काशिका। भाष्यकारस्तु गतिबुद्धीति सूत्रे इममर्थं वक्ष्यति। आदयते देवदत्तेन। गतिबुद्धीत्यादिना णौ कर्तुः कर्मसंज्ञा प्राप्ता आदिखाद्योः प्रतिषेध इति वचनान्न भवति। कथं तर्ह्यादयत्वन्नं बटुनेति। अकर्त्रभिप्राये भविष्यति। कर्त्रभिप्राये प्राप्तस्य निगरणचलनेत्यस्य ह्ययं निषेधो न तु शेषात्कर्त्तरीत्यस्य। कथं तर्हि श्रीहर्षः, इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशीति। न च नायं भक्षणार्थः, न पीयतां नाम चकोराजिव्हया कथं चिदेतन्मुखचन्द्रचन्द्रिकेति पूर्वार्धानुरोधेन पानार्थत्वादिति वाच्यम्। पानस्यापि भक्षणविशेषात्मकत्वात्। सामान्यग्रहेण विशेषस्यापि ग्राह्यत्वात्। अन्यथैव सूत्रे चोपयतीत्युदाहरणासङ्गतेः। चुपेर्मन्दगत्यर्थकत्वात्। इमामित्यस्याकर्मकत्वासङ्गतिप्रसङ्गाच्च। गत्यादिसूत्रेण ह्यस्य कर्मसंज्ञा सा च प्रत्यवसानार्थतां विना दुरुपपादेति। अत एव नपादमीति सूत्रे पाग्रहणं धेट उपसङ्ख्यानञ्च सङ्गच्छते। अन्यथा पाधेटोरप्याचामित्वत्पानार्थत्वेन निषेधो व्यर्थः स्यात्। न चैवं बुधयुधादित्सूत्रे द्रवतिग्रहणं व्यर्थं चलनविशेषवाचकस्यापि चलनवाचकतानपायादिति वाच्यम्। चलनत्वव्याप्याया अखण्डाया एव जातेः प्रवृत्तिनिमित्तताया उक्तत्वात्। पानन्तु द्रवद्रव्यस्य गलादधः करणम्। तत्र द्रवद्रव्यांशस्याधःकरणे कर्मीभूतस्याधिकस्य भानेपि भक्षयतेरर्थस्य भानं निर्विवादम्। यथा मन्दगतौ भासमानायां गतेर्भानम्। अधिकं प्रविष्टं न तु तद्धानिरिति न्यायात्। न च पानत्वमप्यखण्डस्यन्दन-

त्ववदिति वाच्यम् । तत्साधकानिरुक्तेः । दृष्टान्ते तु कार्यतावच्छेदकतया तत्सिद्धेरिति । उच्यते । आचामयेति लोडन्तं छित्वा किं नाचामयेरिति व्याख्येयम् । से इति तु सम्बोधनं दमयन्त्याः । तथाहि । अस्य स्त्री ई लक्ष्मीः तया सह वर्तमाना सेः तस्याः सम्बोधनं से । सलक्ष्मीके इत्यर्थः ॥

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ णेःपूर्वमकर्मकाच्चित्तवत्कर्तृकाण्ण्यन्तात्परस्मैपदं स्यात् । शेते कृष्णस्तं शाययति गोपी । अणौ किम् । आरोहयमाणं प्रयुङ्क्ते आरोहयते । णेरणाविति सूत्रे उदाहरणत्वेन योकर्मको निर्णीतस्तस्माद् द्वितीये णौ मा भूत् । स हि णावकर्मकः निवृत्तप्रेषणाध्यारोपितप्रेषणयोरुभयोरपि न्यग्भवतीत्यर्थे पर्यवसानस्योक्तत्वात् । अकर्मकात्किम् । कटं कुर्वाणं प्रयुङ्क्ते कारयते । चित्तवत्कर्तृकात्किम् । व्रीहीन् शोषयते । अत्र केचित् । चुरादिण्यन्ताद्धेतुमण्णावणावित्यस्य प्रत्युदाहरणमाहुः । तच्च भाष्यादिविरुद्धम् । तथाहि । बुधादिसूत्रादिह णेरित्यनुवर्तते । बुधादिभ्यश्च हेतुमण्णिरेव सम्भवतीति निषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्यः । तेन चुरादिण्यन्तादपि हेतुमण्णौ भवत्येवेदं परस्मैपदमिति भाष्ये स्थितम् । यत्तु रूपयन्तं प्रयोजयति रूपयतइति केन चित्प्रत्युदाहृतं तच्चुरादिण्यन्ताद्धेतुमण्णिचं विधाय तस्य च सौकर्यातिशयात्मयोजकव्यापाराविवक्षायां प्रयोज्यव्यापारमात्रस्य अकर्मकतामाश्रित्य ततो द्वितीये हेतुमण्णिचि बोद्धव्यम् । अत एव प्रयोजयतीत्याह । इह हि युजिना णिचा च प्रयुक्तिद्वयं वदता हेतुमण्णिद्वयं सूच्यते । अन्यथा प्रयुङ्क्तइत्येवादर्शयिष्यत् । एवञ्च चेतयमानं प्रयुङ्क्ते चेतयतइति केषां चित्प्रत्युदाहरणं यद्वृत्तिकृता दूषितं तत्समर्थितं भवति । स्वार्थण्यन्तादेकस्मिन्ने-

व हेतुमण्णौ तु रूपयति चेतयतीत्येव बोध्यम् ॥

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ एभ्यो ण्यन्तेभ्यः परस्मैपदं न स्यात् । तत्र पिबतिर्निगरणार्थः । इतरे चित्तवत्कर्तृकाः । नृतिश्चलनार्थोऽपि । तेनाणावकर्मकादिति निगरणचलनेति प्राप्तमिह निषिध्यते । पा पाने पाययते । पा रक्षणइत्ययन्तु न गृह्यते । लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति परिभाषणात् । तेनाणावकर्मकत्वाविवक्षायां परस्मैपदं भवत्येव । पालयति । पातेर्लुग्वक्तव्य इति लुगागमः । दमु उपशमे । दमयते । आङ्पूर्वो यम उपरमे । आयामयते । नकम्यमिचमामित्यतो नेत्यनुवर्तमाने यमोपरिवेषणइत्यनेन मित्संज्ञाप्रतिषेधः । ङकारविशिष्टस्योपादानमुपसर्गप्रतिपत्त्यर्थम् । तेनान्यान्वितादाकारात्परस्य न । आङ्पूर्वो यसु प्रयत्ने । आयासयते । परिपूर्वो मुह वैचित्ये । परिमोहयते । रोचयते । नर्तयते । वादयते । वासयते । वस आच्छादनइत्यस्य लुग्विकरणत्वाद्ग्रहणम् । पादिषु धेट उपसङ्ख्यानम् ॥ धापयेते शिशुमेकं समीची । प्रत्यवसानार्थत्वाच्छिशुमित्यस्य कर्मत्वम् । समीचीति प्रथमाद्विवचनम् । बाछंदसीतिपूर्वसवर्णदीर्घः । स्यादेतत् । यत्सान्पाययति पयः । दमयन्ती कमनीयतामदम् । अवीवदद्वीणां परिवादकेन । भिक्षा वासयती, त्यादिप्रयोगास्तर्हि कथमिति चेत् । अत्राहुः । कर्तृगे फले प्राप्तस्यात्मनेपदस्यापवादो यद्विहितं परस्मैपदं तस्यैवायं निषेधः । यत्त्वकर्त्रभिप्राये शेषादिति परस्मैपदं तन्निर्बाधमेवेति ॥

वा क्यषः ॥ क्यषन्तात् परस्मैपदं वा स्यात् । लोहितायति लोहितायते । नन्विह परस्मैपदाभावपक्षे लकार एव श्रूयेत न त्वात्मनेपदम् । तस्य प्रकृतिविशेषेर्थविशेषे च

नियतत्वात् । सत्यम् । पूर्वसूत्रे तावदपवादमपनयता प्रतिषेधेनात्मनेपदं प्रवर्त्यतइति निर्विवादम्। स एव च प्रतिषेध इहानुवर्त्यते । तदनुवृत्तिसामर्थ्याच्चेहात्मनेपदविकल्पः सिध्यति । आत्मनेपदप्रवृत्त्यविनाभूतेन निषेधेनात्मनेपदस्य लक्षणया उपस्थितौ तस्यैव विकल्पनात् । तेन मुक्ते शेषात्कर्त्तरिपरस्मैपदं भविष्यति । प्रकृत्यर्थनियमपक्षे एकवाक्यताविधिश्चेति पक्षे च परस्मैपदविकल्पेपि न काश्चिद्दोष इत्यवधेयम् ॥

द्युभ्यो लुङि ॥ द्युतादिभ्यः परस्मैपदं वा स्याल्लुङि । अद्युतत् । अद्योतिष्ट । अलुठत् । अलोठिष्ट । लुङि किम् । द्योतते । लोठते । अनुदात्तेच्चान्नित्यं तङ् । नन्विह विकल्पानुवृत्तिर्व्यर्था । अनुदात्तेत इत्यनेन प्रतिषिद्धस्य परस्मैपदस्यानेन प्रतिप्रसवे कृते लक्ष्येत्युत्सर्गेणैव पाक्षिकस्यात्मनेपदस्य सिद्धेः । सत्यम् । परस्मैपदे प्रतिप्रसूते आत्मनेपदं न भवतीति ज्ञापयितुं वानुवृत्तिः । तेनानुकरोतीत्यादौ पाक्षिकमात्मनेपदं न भवति । यदात्वनुदात्तङित इत्यादिप्रकरणेनात्मनेपदमेव विधीयते शेषादित्यादिना च परस्मैपदम् । तदानुकरोतीत्यादौ परस्मैपदेनात्मनेपदं बाध्यते येन नाप्राप्तिन्यायात् । पक्षे आत्मनेपदप्रवृत्त्यर्थं चेह वाग्रहणमित्यवधेयम् । पक्षद्वयमपीदमनुपराभ्यामिति सूत्रे भाष्ये स्थितम् । प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे नियमसूत्राणां विधिरूपेण निषेधरूपेण वा प्रवृत्तिरिति पक्षद्वयस्यापि तत्त्वं निरूपितमस्माभिः । तदप्येतस्माद्भाष्यादुत्थितमित्यवधेयम् ॥

वृभ्यः स्यसनोः ॥ वृतुवृधुशृधुस्यन्दूभ्यः परस्मैपदं वा स्यात्स्ये सनि च । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति न वृभ्यश्चतुर्भ्य इतीण्निषेधः । पक्षे वर्त्तिष्यते । अवर्तिष्यत ।

विवर्तिषते। स्यसनोः किम्। वर्त्तते। ननु द्युतादिष्वेव वृतादयः पठ्यन्ते। तथा च तक्रकौण्डिन्यन्यायेनेयं प्राप्तिर्वृभ्यः पूर्वा प्राप्तिं बाधेत। ततश्चावृतदवर्तिष्टेति लुङि पूर्वेण विकल्पो न सिध्येत्। तथा चोत्तरसूत्रे चकारः क्रियते। लुटीति विशेषविधिना स्यसनोरियं प्राप्तिर्मा बाधीति। अन्यथा कृपेरपि वृताद्यन्तर्भावादनेनैव सिद्धे किञ्चकारेणेति चेत्। सत्यम्। द्युतादिपाठसामर्थ्याद्वृतादिभ्यो लुङि भविष्यति यद्वा लुङीति स्वरयिष्यते॥

लुटि च क्लृपः॥ लुटि स्यसनोश्च कृपेः परस्मैपदं वा स्यात्। कल्प्तासि। कल्प्स्यति अल्प्स्यत्। चिक्लृप्सति। तासिचक्लृप इतीड्प्रतिषेधः। पक्षे कल्पितासे। कल्पिष्यते। अकल्पिष्यत। चिकल्पिषते। इहेण्निषेधो नास्ति। तत्र हि गमेरिट्परस्मैपदेष्वित्यतः परस्मैपदेष्वित्यनुवर्त्तते। ऊदित्वात्पाक्षिक इडभावस्त्वस्त्येव। स्यादेतत्। स्यसनोरित्यस्य स्वरितत्वमेवास्तु वाक्यष इति वाशब्दस्य यथा। तथाच स्वरितेनाधिकार इत्येव सिद्धे किञ्चकारेण। सत्यम्। स्पष्टार्थश्चकारः। अतएवानुकर्षणार्थाः सर्वे चकारा भाष्ये प्रत्याख्याताः॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमान्हिकम्॥ पादश्च समाप्तः॥

आकडारादेका संज्ञा॥ इत ऊर्ध्वं कडाराः कर्मधारयइत्यतः प्रागेकस्य एकैव संज्ञा स्यात्। तत्रोभयोः सावकाशत्वे विप्रतिषेधेपरमिति परैव। निरवकाशत्वे तु सैवेति विवेकः। तत्र परस्या उदाहरणं धनुषा विध्यतीति। शराणामपायं प्रत्यवधिभूतस्यैव धनुषो व्यधनं प्रति साधकत्वमित्युभयप्रसङ्गे परत्वात्करणसंज्ञा अपादानसंज्ञां बाधते। तथा कांस्यपात्र्याम्भुङ्क्ते

इत्यधिकरणसंज्ञा धनुर्विध्यतीति कर्तृसंज्ञा च। तदुक्तम्। अपादानमुत्तराणीति। निरवकाशायास्तूदाहरणमततक्षदिति। अत्र हि संयोगेगुरिति गुरुसंज्ञा लघुसंज्ञां बाधते। तेन सन्वल्लघुनीत्येतन्न प्रवर्त्तते। स्यादेतत्। भपदसंज्ञाभ्यां तर्हि अङ्गसंज्ञा बाध्येत। तथा च गार्ग्य इत्यत्र यस्येतिचेति लोपो न स्यात्। धानुष्क इत्यत्राङ्गस्योच्यमाना वृद्धिर्न स्यात्। अङ्गसंज्ञा तु कर्त्तव्यमित्यादौ सावकाशा। न हि धातुप्रत्यये पूर्वस्य भपदसंज्ञेस्तः। अत्राहुः। सुपिच बहुवचनेझल्येत् तद्धितेष्वचामादेरित्यादौ स्वादिषु तद्धितेषु चाङ्गस्य कार्यविधानं समावेशस्य ज्ञापकम्। द्विविधा हि स्वादयः। यजादयो वलादयश्च तत्र यथाक्रमं भपदसंज्ञाभ्यां भाव्यम्। ताभ्यां चाङ्गसंज्ञा बाधे निर्विषया एव तत्तद्विधयः स्युः। गुरुलघुसंज्ञे वर्णमात्रस्य विधीयेते नदीघिसंज्ञे तु तदन्तस्येति ताभ्यां समाविक्षतः। तेन वात्सीबन्धुरित्यत्र नदीबन्धुनीति पूर्वपदान्तोदात्तत्वं हे वात्सीबन्धो इत्यत्र गुरोरनृत इति प्लुतश्च सिध्यति। तथा विश्व ना च विनरौ द्वन्द्वेघीति पूर्वनिपातः। विनरावाचष्टे विनयति प्रविनय्य गतः। ल्यपिलघुपूर्वादिति णेरयादेशः। यथा चायादेशे कर्त्तव्ये टिलोपो न स्यानिवत्तथा ऽचःपरस्मिन्नित्यत्र व्युत्पादितम्। यत्तूक्तं विन्त्रोर्भावो वैन्त्रम्। इगन्ताच्चलघुपूर्वादित्याणिति, तच्चिन्त्यम्। द्वन्द्वमनोज्ञादिभ्यश्चेति वुञ्प्रसङ्गादिति कैयटः। पुरुषसंज्ञा तु परस्मैपदसंज्ञां न बाधते णलुत्तमोवेति ज्ञापकात्। अन्यत्रापि यत्र समावेश इष्टस्तत्र चकारादिना स्वस्थाने साधयिष्यते। भाष्ये तु पाठान्तरमप्युपन्यस्तम्। प्राक्कडारात्परं कार्यमिति। अस्यार्थः प्राक्कडारात्संज्ञारूपं कार्यं परं स्यादिति। संज्ञाप्रकरणाद्धि संज्ञारूपमेवेह कार्यम्। परा

संज्ञेत्येव तु न सूत्रितम् । विप्रतिषेधे इत्युत्तरसूत्रे परङ्कार्यमित्यस्यानुवृत्तिर्यथा स्यात् । तत्र यस्याः संज्ञायाः परस्याः पूर्वेयानवकाशया बाधः प्राप्तः सा परा ऽनेन विधीयते । एतदेव च ज्ञापकमिह प्रकरणे संज्ञानां बाध्यबाधकभावस्य तेन परयानवकाशया सावकाशा पूर्वा बाध्यते द्वयोस्तु सावकाशयोर्विप्रतिषेधे परया पूर्वा बाध्यतइति। अस्मिन्पक्षे अङ्गसंज्ञा परा कर्त्तव्या भपदसंज्ञे तु पूर्वे, एवं यत्रयत्र समावेश इष्टस्तत्र सर्वत्र बोद्धव्यम्। अस्मिन्पक्षे ऋत्विय इति न सिध्यति । तथाहि । ऋतोरण् छन्दसिघस् । सितिचेति पदसंज्ञैवेष्टा । तेन तत्र परं कार्यमिति वचनाद्घसंज्ञापि स्यात् । ततश्च ओर्गुणः प्रसज्येत । पदत्वप्रयुक्तेनावग्रहेण सित्करणं सार्थकं स्यात् । शेषोबहुव्रीहिः शेषोध्यसखीति शेषग्रहणं चास्मिन्पक्षे कर्त्तव्यं स्यात् । अन्यथा हि उन्मत्तगङ्गमित्यादावन्यपदार्थेचसंज्ञायामिति सत्यामव्ययीभावसंज्ञायां परङ्कार्यमिति वचनाद्बहुव्रीहिसंज्ञापि स्यात्। मत्वै इत्यत्र नदी संज्ञापर्याये घिसंज्ञापि स्यात् ततश्च गुणप्रसङ्गः । वस्तुतो बहुव्रीहौ शेषग्रहणं पाठद्वयेपि कर्तव्यं घिसंज्ञायान्तु पाठद्वयेपि न कर्तव्यमिति तत्रैव वक्ष्यामः। इदंत्व वधेयम् । एका संज्ञेति पाठेपि संज्ञाग्रहणं न कर्तव्यम् । एकेत्युक्तेपि संज्ञाधिकारादेव तल्लाभात् । स्यादेतत् । आद्वन्द्वादित्येवोच्यताम् । न हि चार्थेद्वन्द्व इत्यतः परत्रेदमुययुज्यते । सत्यम् । तथा सति द्वन्द्वश्चप्राणितूर्यत्यस्याप्यवधित्वं सम्भाव्येत । ततश्च सम्बुद्धिसंज्ञामन्त्रितसंज्ञयोः समावेशो न स्यात् । नन्वाकडारादित्युक्तेपि प्राक्कडारात्समास इत्यस्यावधित्वं कुतो न स्यादिति चेत्। व्याप्तिन्यायाल्लिङ्गाच्च । यदयं तत्पुरुषो द्विगुश्चेत्यारभते। समावेशार्थं हि च तत्। वस्तुतस्तु सङ्ख्यापूर्वोद्विगुरित्यत्रैव चकारः पाठ्यः।

तावतैव दिवः कर्मच तत्प्रयोजकोहेतुश्चेत्यादाविव समावेशसिद्धेः। द्विगुश्चेति सूत्रान्तरं तु न कर्तव्यमेव। एवं समानाधिकरणसमासप्रकरणं समाप्य कर्मधारयश्चेत्येव पाठ्यम्। तत्पुरुषः समानाधिकरणः कर्मधारय इति सूत्रं तु मास्त्विति दिक्॥

विप्रतिषेधे परङ्कार्यम्॥ विरोधे सति कृत्यैर्ह यत्परन्तत्स्यात्। विप्रतिपूर्वात्सेधतेर्घञ्। उपसर्गात्सुनोतीति षत्वम्। उपसर्गवशाच्च विरोधार्थकत्वम्। कार्यमित्यत्रार्हेकृत्यतृचश्चेत्यर्हार्थे कृत्यप्रत्ययः। तेन तुल्यबलविरोध इति पर्यवस्यति। नञपवादादीनां सन्निधौ उत्सर्गादीनां कृत्यर्हत्वं तैर्बाधितत्वात्। तत्र नित्यमावश्यकत्वाद्बाधकम्। अन्तरङ्गन्तु लाघवात्। अपवादस्तु वचनप्रामाण्यात्। तद्भिन्नस्तु प्रकृतसूत्रस्य विषयः। तदुक्तम्। परनित्यान्तरङ्गापवादानामुत्तरोत्तरस्य बलवत्त्वमिति। जातिपक्षे विध्यर्थं सूत्रम्। वृक्षेषु वृक्षाभ्यामित्यत्र हि लब्धावकाशयोरेत्वदीर्घत्वशास्त्रयोर्वृक्षेभ्य इत्यत्र युगपत्प्रसङ्गे सति गमकाभावादप्रतिपत्तिरेव स्यात्। तदुक्तम्। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति। तत्रास्माद्वचनात्परस्मिन्कृते यदि पूर्वस्यापि निमित्तमस्ति तर्हि तदपि भवति यथा भिन्धकीत्यत्र परत्वाद्धिभावे कृतेप्यकच्। तदुक्तं, पुनः प्रसङ्गविज्ञानात्सिद्धमिति। व्यक्तिपक्षे तु तव्यक्तिविषयकयोर्लक्षणयोरन्यत्र चरितार्थत्वासम्भवात्तव्यत्तव्यानीयरामिव पर्याये प्राप्ते नियमार्थमिदं सूत्रम्। विप्रतिषेधे परमेव न तु पूर्वमिति। एतल्लक्षणारम्भाच्च तत्र पूर्वस्यानारम्भोनुमीयते। तथा च जुहुतात्त्वमित्यत्र परत्वात्तातङि कृते स्थानिवद्भावेन धित्वं न भवति। तदुक्तं सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। जातिव्यक्तिपक्षयोश्च लक्ष्यानुरोधाद्व्यवस्थेत्युक्तं *पस्पशायाम्। नित्यादिषु तु नास्य प्रवृत्तिरित्युक्तम्। तेन रथे-*

र्णाचे श्नतउपधाया इति वृद्धिं परामप्यनित्यां बाधित्वा रधि-जभोरिति नुमेव । न च सोपि शब्दान्तरप्राप्त्यानित्य एवेति वाच्यम् । कृताकृतप्रसङ्गित्वमात्रेणापि क्वचिन्नित्यताभ्युपगमात्। तेन रन्धयतीति सिद्धम् । तथादुद्रुवादित्यादावन्तरङ्ग उवङ् परमपि लघूपधगुणं बाधते। तथा शुन इत्यत्रान्तरङ्गत्वात्सम्प्रसारणाच्चेति पूर्वत्वम् । अल्लोपे तु सति तस्य स्थानिवत्त्वाद्यण् स्यात् । बहुश्वा नगरीत्यत्रानउपधालोपिन इति ङीप् स्यात्। सिद्धान्ते गौरादिलक्षणो ङीष् तु न । उपसर्जनत्वात् । यत्त्विहत्यभाष्यं बहुशुनीति तत्सिद्धान्तेन स्थितम् । अल्लोपाभ्युपगमपक्षे प्रवृत्तत्वात्। एतच्चेहैव कैयटे आभात्सूत्रीयभाष्यकैयटयोश्च स्पष्टं न्यायसिद्धञ्च । यत्तु बहुश्वेत्येव भवितव्यमिति डाप्सूत्रे भाष्यम्, तदिह साधकतया न ग्राह्यम्। डाप्पक्षमेवोपक्रम्य बहुशूकेति रूपं तिरस्कर्तुं तस्य प्रवृत्तत्वात्। वृक्ष इहेत्यादौ त्वन्तरङ्गेण गुणेन दीर्घो बाध्यते । न चासौ अपवादः कथं बाध्यतामिति वाच्यम् । समानाश्रये तस्य चरितार्थत्वात् । तथा च वार्त्तिकम्, इण्ङिशीनामादगुणः सवर्णदीर्घत्वादिति । इह शीनामिति नदीत्वान्नुट् । विभक्तिपरतया नित्यस्त्रीत्वात् । अत एव औङः श्यामिति प्रयोगः । उदाहरणन्तु अयजे इन्द्रं वृक्षे इन्द्रं सर्वे इहेति बोध्यम् । इहान्तरङ्गं बलवादिति लाघवन्यायमूलकमिति कैयटः । अचःपरस्मिन्नितिसूत्रे भाष्यमप्येवम् । असिद्धं बहिरङ्गमिति तु वाहऊडित्यूठ्ग्रहणेन ज्ञापितम् । षत्वतुकोरित्यनेन तु तदपवादभूतं नाजानन्तर्यइति । तत्रासिद्धमित्यनया पचावेदमित्यादावैत्वाभावार्थमवश्याश्रयणीयया गतार्थत्वादन्तरङ्गं बलीय इति न कर्तव्येतीहत्यं भाष्यं विरुद्धम् । न्यायसिद्धतायां उक्तत्वात् । किञ्च

सापवादया ऽसिद्धपरिभाषया कथं निरपवादाया गतार्थता। अथ षत्वतुकोरित्यनेनासिद्धं बहिरङ्गमित्यस्या अनित्यतैव ज्ञाप्यते लाघवात् न तु नाजानन्तर्यइति, गौरवात्। तर्हि प्रबलमिदं भाष्यं, स्फुटीकृतं चेदमचः परस्मिन्निति सूत्रे ऽस्माभिः। एवञ्चाचोरानन्तर्यमिति द्वित्वं विवक्षितम्। नचेत्यादयोपि प्राचाङ्कलहा मुधैव। एवञ्चान्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधतइत्यपि गतार्थम्। षत्वतुकोरिति वा कृतितुग्ग्रहणेन वा ऽनित्यताज्ञापनात्। अश्विमानण् श्वयुवेत्यादिनिर्देशाच्च। तेन गोमत्प्रिय इत्यादि सिद्धम्। आचारक्विपि तवममादिबाधे च क्रमेण प्रत्ययोत्तरपदग्रहणस्य कृतार्थत्वात्तदीयज्ञापकतापवादोपि यथाश्रुताभिप्रायेणैवेति दिक्॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य चतुर्थे
पादे प्रथममान्हिकम्॥

यूस्त्र्याख्यौ नदी॥ इवर्णोवर्णान्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। दीर्घान्तयोरेषा संज्ञा व्यवतिष्ठते। अण्त्वेन सवर्णग्रहणात्। ह्रस्वान्तयोस्तु प्राप्ताप्येषा परया घिसंज्ञया बाध्यते। तेन मते धेनो इत्यादौ अम्बार्थनद्योरिति ह्रस्वो न भवति। ननु शेषग्रहणाद् घिसंज्ञा कथं भवेदिति चेन्न। शेषग्रहणस्य प्रत्याख्यातत्वात्। तथाहि। एका संज्ञेति पाठे तावच्छेषस्यग्रहणं व्यर्थमिति स्पष्टमेव। अपरङ्कार्यमिति पाठे तु दीर्घान्ते सावकाशां नदीसंज्ञां पुन्नपुंसकयोः सावकाशा घिसंज्ञा हे मतइत्यादौ परत्वाद्बाधिष्यते। मत्यै धेन्वै इत्यादौ तु निरवकाशापि ङितिह्रस्वश्चेति नदीसंज्ञा घिसंज्ञां न बाधेत। अतः शेषग्रहणं कृतम्। तदपि वस्तुतो व्यर्थमेव। नदीसंज्ञावचनसामर्थ्यादेव घिसंज्ञाबाधोपपत्तेः। ह्रस्वलक्षणा हि नदीसंज्ञा। सा च

प्रत्ययापेक्षत्वाद्बहिरङ्गा तत्रान्तरङ्गायां घिसंज्ञायां घेर्ङितीति च गुणे कृते ह्रस्वाभावान्नदीसंज्ञा निर्विषया स्यात्। तदुक्तम्। तत्र वचनप्रामाण्यान्नदीसंज्ञायां घिसंज्ञाभाव इति। यद्वा। ईश्च ऊश्च यू वाछन्दसीति पूर्वसवर्णः। तेन दीर्घयोरेवेयं नदीसंज्ञा। न चैवं ङितिह्रस्वश्चेति सूत्रे ह्रस्वांशे ऽनन्वयः स्यादिति वाच्यम्। विभक्तिविपरिणामेन यवोः सवर्णो यो ह्रस्व इति व्याख्यानात्। उदाहरणन्तु गौर्यै वध्वै इत्यादि। यू इति किम्। मात्रे स्वस्रे। स्त्र्याख्यौ किम्। वातप्रम्ये। स्यादेतत्। स्त्रियमाचक्षाते इति विग्रहे स्त्र्याख्यायाविति प्राप्नोति। आतश्चोपसर्गइति कप्रत्ययस्य सुग्ल इत्यादौ सावकाशस्य परेण कर्मण्यणा बाधितत्वात्। सत्यम्। मूलविभुजादित्वात्कः। यद्वा। विच्प्रत्ययो भविष्यति। एतेन तत्प्रख्यञ्चान्यशास्त्रमिति जैमिनिसूत्रमपि व्याख्यातम्। नन्वेवमपि स्त्रियामित्येवास्तु किमधिकेन। मैवम्। आसमन्ताच्चक्षाते इति व्युत्पत्त्या नित्यस्त्रीत्वलाभार्थं तदुपादानात्। तेन ग्रामण्ये सेनान्ये स्त्रियै इत्यत्र न भवति। ग्रामं सेनाञ्च नयतीति हि क्रियाशब्दावेतौ लिङ्गत्रयसाधारणौ। अत एव आध्यै ब्राह्मण्यै इति भाष्योदाहरणं चिन्त्यमिति कैयटः। आध्यानकर्तृत्वस्यापि लिङ्गत्रयसाधारणत्वात्। स्यादेतत्। आसमन्ताद्धीर्यस्या इति विग्रहउत्तरपदस्य नित्यस्त्रीत्वात् नदीत्वमस्तु। प्रथमलिङ्गग्रहणं चेति वक्ष्यमाणत्वात्। अतिलक्ष्म्यै ब्राह्मणायेतिवत्। तत्कुतो भाष्यस्य चिन्त्यतेति चेन्न। तथा सति यणो दुर्लभत्वात्। गतिकारकपूर्वस्येष्यते इत्यत्र हि गतिसाहचर्यात्कारकपूर्वस्यापि नित्यसमासस्य ग्रहणं, गतिसमासश्च प्रतिपदोक्त एव गृह्यते। तेन दुर्धियः निर्भियः वृश्चिकभिया पलायमानस्येत्यादावनित्यसमासत्वान्न यणिति पुरुषोत्तम-

प्रभृतयः। अत एव कृन्मेजन्त इति सूत्रे मानः समस्यदूढ्य इति मन्त्रव्याख्यायां दुर्धिय इति कैयटेनेयङ् प्रयुक्तः। अदूरविप्रकर्षेण बहुव्रीहिणेदमप्यर्थकथनम्। व्याख्येयमन्त्रे तु दुष्टं ध्यायतीति विग्रहे नित्यसमास एव बोध्यः। ततो यण्। दुरो नाशदाशदभध्येष्विति पृषोदरादिसूत्रस्थवार्त्तिकेन उत्वष्टुत्वे। यत्तु तद्वार्त्तिकव्याख्यावसरे दुष्टं ध्यायतीति विगृह्य आतश्चोपसर्गइति कप्रत्यय इति कैयटहरदत्तादिभिरुक्तम्। तच्चिन्त्यम्। अन्तस्वरितानुरोधेन अर्थानुरोधेन च ल्यत्यादितिवत्कृतयणादेशानुकरणतयैव वार्त्तिकस्य व्याख्येत्वात्। सर्वस्य दुर्वधेः अंहतिरुपद्रवः नोस्मान् मा वधीदिति तृतीयचरणस्थेन सहान्वयः। अमेरतिरित्यनुवर्तमाने हन्तेरंहचेत्यंहादेशोतिश्च प्रत्ययः। अंहतिशब्दस्य प्रादेशनं निर्वपणमपवर्जनमंहतिरित्यमरकोशादिबलादाने रूढौ तु प्रद्वेषयुक्तमाभिचारिकाद्यङ्गभूतमेव तादिह ग्राह्यम्। उणादीनामव्युत्पत्तिपक्षाश्रयणादन्तोदात्तता। वहिवस्यर्तिभ्यश्चिदिति चिद्ग्रहणानुवृत्तेरिति तु तत्त्वम्। एतेन मानो गर्व इति व्याचक्षाणा अपि प्रत्युक्ताः। पदद्वयत्वस्याध्यापकसम्प्रदायसिद्धत्वात् वाक्यशेषानुगुण्याच्च। तस्मादाध्यै ब्राह्मण्यै इति भाष्योदाहरणं चिन्त्यमिति स्थितम्। प्राक्सुबुत्पत्तेर्यत्र समासस्तत्रैव गतिकारकपूर्वस्येष्यत इति यण् प्रवर्त्तत इति वदतां श्रीपतिदत्तादीनामपि मते कैयटोक्तं चिन्त्यं दृढमेव। वस्तुतस्तु आध्यानमाधीरिति व्युत्पाद्य गुणगुणिनोरभेदविवक्षयैव प्रयोगोयमिति चिन्त्योद्धारो ऽवधेयः। हरदत्तस्त्वाह। नित्यस्त्रीत्वं नाम न लिङ्गान्तरानभिधायकत्वं किन्तु शब्दान्तरसमभिव्याहारं विनैव स्त्रियां वर्त्तमानत्वं तत्। वृत्तिस्वरसोप्येवम्। कथन्तर्हि ग्रामण्ये खलप्वइत्यादि प्रत्युदाह्रियतइति चेत्। शृणु।

क्रियाशब्दत्वेप्यनयोः पुंसि मुख्या वृत्तिः। पुंसामेव त्वयमौत्सर्गिको धर्मः यद्ग्रामनयनं खलपवनं वा आध्यानं तु स्त्रीपुंससाधारणमेवेति वैषम्यं तस्माद्युक्तमेवेदं भाष्यमिति। अत्र वार्त्तिकम्। प्रथमलिङ्गग्रहणञ्च। प्रयोजनं क्विब्लुक्समासाः। अस्यार्थः। यः पूर्वं स्त्र्याख्यः पश्चादुपसर्जनतया लिङ्गान्तरविशिष्टं द्रव्यान्तरमाह तस्य नदीसंज्ञा वक्तव्या। क्विपि कुमारीमिच्छति कुमारीयति ततः क्विप् अल्लोपयलोपौ क्वौ लुप्तस्य स्थानिवत्त्वनिषेधान्न यण्। यद्वा कुमारयतीति कुमारी आचारक्विबन्तात्कर्त्तरि क्विप्। कुमारी ब्राह्मणः। ङ्यन्तत्वात्सुलोपः। तस्मै कुमार्यै ब्राह्मणाय। स्यादेतत्। इह क्यच्क्विपोः प्रकृतिभूतस्य ङीबन्तस्यापि नित्यस्त्रीत्वं दुर्लभं पुंलिङ्गात्क्यच्क्विपोः निर्वृत्तेन त्रिलिङ्गेन समानाकारत्वादिति चेन्न। अर्थभेदेन शब्दभेदाश्रयणात्। तत्र प्रथमोदाहृतस्येत्थं रूपाणि कुमारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी ङ्यन्तत्वात्सुलोपः। कुमार्यौ। कुमार्यः।न चेह अचिश्नुधातुभ्रुवांय्वोरियङुवङौ। एरनेकाच इति यणा बाधितत्त्वात्। अत एव अमि शसि च कुमार्यं कुमार्यः प्रध्यं प्रध्य इतिवत्। न च गतिकारकपूर्वस्यैवेति निषेधः शङ्क्यः। तदितरपूर्वस्य नेत्यर्थात् विशिष्टाभावस्यापूर्वेपि सत्वात्। ङयि कुमार्यै कुमार्याः कुमारीणां कुमार्यां ब्रह्मणे। हे कुमारि ब्राह्मणेत्यादि। पत्न्यादेस्तु संयोगपूर्वकत्वादियङ्। पत्न्यौ पत्नय इत्यादि। शेषं प्राग्वत्। पुंलिङ्गात्क्यच्क्यङोर्निष्पन्नस्य तु अङन्तत्वात्सुलोपो न। कुमारीः। हे कुमारीः। अनदीत्वाद्भस्वो न। कुमार्यं कुमार्याः कुमार्यौ ब्राह्मणानां कुमार्यै ब्राह्मणे इत्यादि। कुमारमात्मनमिच्छन्ती ब्राह्मणी कुमारीरित्यत्रापि कैयटमते नित्यस्त्रीत्वाभावात्पुंवदेव रूपम्। हरदत्तमते तुलक्ष्मीवत्।

अमि ङसि च यण्विशेषः। प्रकृतमनुसरामः। लुम्मनुष्यइति लुप्। स्वरकुट्यै ब्राह्मणाय। यद्यप्यत्र युक्तवद्भावात्स्त्रीत्वमस्ति तथापि स्वाश्रयस्य पुंस्त्वस्यापि सत्वान्नित्यस्त्रीत्वं नास्तीति कैयटहरदत्तादयः। तच्चिन्त्यम्। चश्वाः पश्येत्यादौ शसो नत्वापत्तेः। तस्माल्लुबन्तैः स्वरकुटीचश्वादिशब्दैः शास्त्रीयस्त्रीत्वाविशिष्ट एव लौकिकः पुमानभिधीयतइत्येव तत्त्वम्। एवञ्च लुपः प्रयोजितत्वेन कथं गणनेत्यपि चिन्त्यम्। समासे अतिलक्ष्मीः बहुश्रेयसी। इयसश्चेति कप्निषेधः। ईयसो बहुव्रीहेर्नेत्युपसर्जनह्रस्वो न। उभयत्रापि सम्बुद्धौ ह्रस्वः ङित्सु आडागमादिकञ्च नदीसंज्ञाकार्यं बोध्यम्॥ अवयवस्त्रीविषयत्वात्सिद्धम्॥ समासे तावदवयवो लक्ष्म्यादिशब्दः स्त्रियामेव वर्त्ततइति तदानीमेव संज्ञाः। ततश्च वर्णसंज्ञापक्षे समुदायस्य नद्यन्तत्वात्कार्यसिद्धिः। तदन्तस्य संज्ञेति पक्षे तु अङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वचनात्। वस्तुतस्तूक्तवचनस्य प्रागेव दूषितत्वात्तदन्तत्वेनैव सिद्धिर्बोध्या। अतितन्त्रीबन्धुरित्यत्रापि नदीबन्धुनीति पूर्वपदान्तोदात्तत्वं सिध्यति। पूर्वपदस्य नद्या विशेषणात्। किञ्चुपोरपि अन्तरङ्गत्वात्किबादेः प्रागेव प्रवृत्ता संज्ञा बहिरङ्गेण लिङ्गान्तरयोगेन न निवर्त्तते त्वकात्पितृकेऽकञ्वत्। अकृतव्यूहा इत्यस्यानित्यताया अचः परस्मिन्निति सूत्रे वर्णितत्वात्। स्यादेतत्। इयङुवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गोऽवयवस्येयङुवङ्स्थानत्वात्। यथा ह्यवयवस्य स्त्रीविषयत्वात्समुदायस्य नदीसंज्ञेत्युक्तम्। तथावयवस्येयङुवङ्स्थानत्वात्समुदायस्य यण्स्थानस्यापि प्रतिषेधः स्यात्। यथा स्त्रियै आध्यै प्रध्यै। अत्राहुः। इङुवङ्भ्यामङ्गमाक्षिप्यते। अङ्गाधिकारे तयोर्विधानात्। तेन यस्याङ्गस्येयङुवङौ

निर्वर्तते तस्य नदीसंज्ञानिषेधः । आध्यै इत्यत्र तु अवयवस्याङ्गत्वं नास्ति अङ्गस्य तु एरनेकाच इति यण्विधानादियङुवङोः स्थानता नास्तीति निषेधाभावः । एतदर्थमेव च तत्र स्थानग्रहणम्, इयङुवङोर्यदा स्थितिस्तदा प्रतिषेधो यथा स्यात् यदा त्वपवादेन बाधस्तदा मा भूदिति । एवं ङिति ह्रस्वश्चेत्यत्राप्यङ्गस्याक्षेपात्सोपि विधिरङ्गस्यैव स्त्रीत्वे भवति नावयवस्य । शक्त्यै । अतिशकटये ब्राह्मणाय । श्रियै अतिश्रिये ब्राह्मणाय । इह तु स्यादेव । अतिश्रिये अतिश्रियै वा ब्राह्मण्यै इति स्थितं भाष्ये । न चेह नित्यस्त्रीत्वं नास्तीति वाच्यम् । हरदत्तमते तत्सत्वात् । कैयटमते तु ङितिह्रस्वश्चेत्यत्र स्त्रीमहणमात्रमनुवर्त्तते न त्वाख्याग्रहणम् । एवञ्च सुधीशब्देपि रूपद्वयं निर्विवादम् । सुध्यादयः पुंवदिति प्रक्रिया तु प्रामादिक्येव । अतिलक्ष्म्यतिचम्वोर्वार्तिकप्रमीहूहूभ्यां साम्योक्तिरप्येवम् । तथा स्वयंभूः पुंवदित्यपि प्रमाद एव । स्यादेतत् । निष्कौशाम्बिः पुमानित्यत्रापि अन्तरङ्गतया नदीसंज्ञा स्यादतिलक्ष्म्यादौ यथा । सत्यम् । सत्यामपि तस्यां न कश्चिद्रूपे दोषः । न च सम्बुद्धिह्रस्वादिप्रसङ्गः । ह्रस्वादेशेन नद्या अपहारात् । वर्णस्य नदीत्वात् । स्त्र्याख्यत्वं तु तस्य शक्त्याश्रयतामात्रेण बोध्यम् । पर्याप्त्यधिकरणताया अविवक्षितत्वात् । तदन्तस्य नदीसंज्ञेति पक्षेपि एकदेशविकारानभ्युपगमेन सर्वादेशस्यैव वक्तव्यत्वात् । न च स्थानिवद्भावः । अल्विधित्वात् । प्रपठ्येत्यत्रेडभावार्थं विशेषणतयाप्यलाश्रयणे निषेधस्य सिद्धान्तितत्त्वादिति दिक् । निष्कौशाम्ब्यै निष्कौशाम्बये ब्राह्मण्यै इत्यत्र तु ङितिह्रस्वश्चेति विकल्पो भवत्येवेति दिक् ॥

नेयङुवङ्स्थानावस्त्री ॥ इयङुवङोः स्थितिः स्थानं निरपवादा प्रसक्तिर्यत्र तावीदूतौ नदीसंज्ञौ स्तः स्त्रीशब्दं विना । हे श्रीः ।

हेभूः ? अस्त्रीति किम् । हेस्त्रि । कथं तर्हि विमानना सुभ्रु कुतः पितुर्गृहे इति कालिदासः । हापितः क्वासि हे सुभ्रु इति भट्टिश्च । एकवंशप्रभवभ्रुव इति श्रीहर्षश्च । प्रमाद एवायमिति हरदत्तः । सामान्ये नपुंसकमिति वा कथंचित्समाधेयम् । के चित्तु तदो दावचनेन सकृद्द्वंद्वमनित्यमिति परिभाषाज्ञापनमाश्रित्यानित्योयं प्रतिषेध इति समादधुः । किन्त्वेतत्सकलप्रमादेषु सुवचम् । तदोदावचनप्रत्याख्यानपरभाष्यादिविरुद्धञ्च । अन्ये तु वामीत्यतो वाग्रहणस्य सिंहावलोकितन्यायेनानुवृत्तस्य व्यवस्थितविभाषापरत्वेनेष्टसिद्धिमाहुः । तदपि न । सिंहावलोकितन्यायस्येहाभिमतत्त्वे नञ्ग्रहणस्य वामीत्युत्तरसूत्रस्य च वैयर्थ्यापत्तेः । यत्तूक्तं दुर्घटवृत्तौ भ्रुशब्दादप्राणिजातेश्चेत्यूङि समासे उपसर्जनह्रस्वत्वे च कृते ऊङुत इत्यूङि तस्य समुदायभक्तत्वान्नोवङ्स्थानत्वमिति । तदतिस्थवीयः । प्रत्ययस्य भक्तताया निष्प्रमाणकत्वात् । तत्स्थानिकस्यैकादेशस्यान्तवद्भावेन भ्रूशब्दावयवताया अनपायात् । अङ्गाधिकारे तदुत्तरपदग्रहणस्य निर्विवादतया समुदायभक्तेप्युवङ्प्रवृत्तेश्च । सुभ्रुवावित्यादिरूपाणां सर्वसम्मतत्वाच्चेति दिक् ॥

वामि ॥ इयङुवङ्स्थानौ वा नदीसंज्ञौ स्तः स्त्रियामामि । श्रीणाम् । श्रियाम् । भ्रूणाम् । भ्रुवाम् । द्वितीयैकवचनं तु नेह सूत्रे गृह्यते । तत्र नदीकार्याभावात् । अस्त्रीत्येव । स्त्रीणाम् । इह वाचि ह्रस्वश्चेत्येव कुतो न कृतम् । एवं हि ङितीति न कर्तव्यमिति चिन्त्यम् । वस्तुतस्तु सन्निपातपरिभाषया भ्रूणामिति नुट् न स्यादत आमीत्युक्तम् । परिभाषा चेयमनेनैव ज्ञाप्यतइति ध्येयम् ॥

ङिति ह्रस्वश्च ॥ इयङुवङ्स्थानौ ह्रस्वौ च यू वा नदी-

संज्ञौ स्तः स्त्रियां ङिति परे। श्रियै, श्रिये, भ्रुवै, भ्रुवे, कृत्यै, कृतये, धेन्वै, धेनवे। अस्त्रीत्येव। स्त्रियै। स्त्रीलिङ्गाविति किम्। अग्नये। वायवे। इह प्रथमलिङ्गग्रहणं नास्ति। तेन निष्कौशाम्बिर्हरिवदित्युक्तम्। स्त्रियमतिक्रान्तो ऽतिस्त्रिरित्यत्र तु विशेषः। अतिस्त्रियौ अतिस्त्रिया इतीयङ्। अयं हि गौणत्वेपि भवति। किन्तु, गुणनाभावौत्वनुङ्भिः परत्वात्पुंसि बाध्यते। क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम्॥ जसिचेति गुणः। अतिस्त्रयः। वामशसोः। अतिस्त्रियम् अतिस्त्रीम्। अतिस्त्रियौ अतिस्त्रियः अतिस्त्रीन्। आङो नास्त्रियाम्। अतिस्त्रिणा। अतिस्त्रिभ्याम्। घेर्ङितीति गुणः। अतिस्त्रये अतिस्त्रेः अतिस्त्रियोः। ह्रस्वनद्यापइति नुट्। अतिस्त्रीणाम्। अच्च घेः। अतिस्त्रौ। सङ्ग्रहश्च, औकारे ओसि नित्यं स्यादमशसोस्तु विभाषया। इयादेशो ऽचि नान्यत्र स्त्रियाः स्यादुपसर्जने॥ एवं क्लीबे नुमा इयङ् बाध्यते। तेनातिस्त्रि अतिस्त्रिणी इत्यादि वारिवत्। स्त्रियान्तु ङिति ह्रस्वश्चेतिह्रस्वान्तत्वप्रयुक्तो नदीसंज्ञाविकल्पः। अस्त्रीति तु इयङुवङ्स्थानावित्यस्यैव विशेषणम्। तत्सम्बद्धस्यैवानुवृत्तेः। न चेहावृत्त्योभयविशेषणता। प्रमाणाभावात्। तेनातिस्त्रियै अतिस्त्रिये। औदिति बाधित्वा इदुद्भ्यामिति ङेरां, अतिस्त्रियाम्। पक्षे अच्चघेः अतिस्त्रौ॥

शेषो घ्यसखि॥ ह्रस्वौ यौ यू तदन्तं सखिभिन्नमनदीसंज्ञं घिसंज्ञं स्यात्। हरये भानवे। ह्रस्वौ किम्। ग्रामण्ये खलप्वे। यू किम्। मात्रे। असखिकिम्। सख्ये। शेषः किम्। मत्यै। शेषग्रहणं व्यर्थमिति नदीसंज्ञामूत्रएवोक्तम्। समासे तु सुसखेरागच्छतीत्यादौ घिसंज्ञा भवत्येव। समुदायस्य सखिशब्दाद्भिन्नत्वात्। तदन्तग्रहणं तु नास्ति। विशेष्यसम्बन्धाभावात्।

यत्तु ग्रहणवतेत्यादि हरदत्तेनोपन्यस्तं ख्यत्यात्सूत्रे च कैयटेन । तत्पूर्वापरविरुद्धमिति येनविधिरिति सूत्रे व्युत्पादितम् । न चैवं यस्येतिचेति सूत्रे इवर्णस्य ईति सखीत्युदाहरणं न युज्यते । सखिशब्दात्सख्यशिश्वीतिभाषायामिति ङीषि सति लोपे सवर्णदीर्घे वा विशेषाभावात् । यत्तु तत्र भाष्ये वृत्तौ चोक्तम्, असति लोपे ऽतिसखेरागच्छतीत्यत्र सवर्णदीर्घस्य पूर्वं प्रत्यन्तवद्भावादसखीति घिसंज्ञाप्रतिषेधः स्यादिति, तदसखीति प्रसज्यप्रतिषेधमाश्रित्येति कैयटादौ स्पष्टम् । अत एवापाततः पर्युदासस्यैवेह स्थितत्वात् । अन्यथा वाक्यभेदादसमर्थसमासात् सुसखेरित्याद्यसिद्ध्यापत्तेश्च । तस्मादीति लोपे फलं दुर्लभमिति चेत्, अत्रोच्यते । सखी सख्यौ सख्य इत्यादावनङ्णित्वे मा भूतामिति इलोप एषितव्यः । न च सिद्धान्तेपि प्रातिपदिकग्रहणे लिङ्गविशिष्टग्रहणाद्दोषतादवस्थ्यम् । विभक्तौ लिङ्गविशिष्टाग्रहणात् । एतेन इकारलोपस्य तद्धितएवोदाहरणं न त्वीति परत इति वदन् हरदत्तोपास्तः ॥

पतिः समासएव ॥ पतिशब्दः समासएव घिसंज्ञः स्यात् । भूपतये । नेह, पत्या पत्ये । विपरीतनियमं वारयितुमेवकारः, दृढमुष्टिना । स्यादेतत् । शेषोध्यसखिपती इत्येवास्तु समस्तस्य तु पूर्वोक्तरीत्या सिद्धम् । न चोत्तरसूत्रे सख्युरपि सम्बन्धापत्तिः । बाधकाभावात् । इष्टरूपस्य तावतापि सिद्धेः । द्वितीयस्य तु साधोरपि छन्दस्यपठितस्यानापाद्यत्वात् । न चैवमुत्तरसूत्रे षष्ठीयुक्तग्रहो व्यर्थः स्यादिति वाच्यम् । इष्टापत्तेः । एवमेव हि श्रीग्रामण्योच्छन्दसीति श्रीग्रहणं नित्यं मन्त्रइत्यादीनि च प्रत्याख्यातानि । सम्बुद्धौ शाकल्यस्येत्यत्रानार्षग्रहणमप्येवम् । सत्यम् । यथा सखिगृहे गृहसखायावित्यत्र पूर्वनिपातानि-

यमस्तथा पतिगृहे इत्यत्र मा भूत् । इह हि घित्वात्पूर्वनिपात एव । बहुच्पूर्वस्य तु सुसखिन्यायेन घित्वाद्बहुपतिनेत्यादि बोध्यम् । अथ कथं सखिना वानरेन्द्रेण, पतिना नीयमानायाः पुरः शुक्रो न दुष्यति, नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतावित्यादि । अत्र हरदत्तः, छन्दोवदृषयः कुर्वन्तीति । अस्यायमाशयः। असाधव एवैते त्रिशङ्कात्र्यरुणयाज्ययाजनादिवत्तपोमाहात्म्यशालिनां मुनीनामसाधुप्रयोगोपि नातीव बाधते अस्मदादीन्प्रति तु स्मृतिपुराणाद्यध्ययनाविधिबलादेव तदन्तर्गततत्पाठो न बाधकः । तथा च स्वातन्त्र्येणेदृशं प्रयुञ्जाना अस्मदादयः प्रत्यवयन्त्येवेति नदीसंज्ञासूत्रे भाष्यकैयटयोरपि स्थितमिदम् । यद्वा सखेत्याख्यातः साखिः पतिरित्याख्यातः पतिः तेन सखिना पतिना आख्यातण्यन्तात्कर्मणि अच इरित्यौणादिक इप्रत्ययः । लाक्षणिकत्वाच्चैतयोर्घिसंज्ञापर्युदासे ग्रहणं नास्तीति दिक् । एतेनार्जुनस्य सखा कृष्णः कृष्णस्य सखिरर्जुन इत्यपि व्याख्यातम् । कथं वचो वाचस्पतेरपीति माघः । न ह्ययं समासः । अलुग्विधायकादर्शनादिति, सत्यम् । तत्पुरुषेकृतीति बहुलग्रहणादलुक् । एतेन दिवस्पतिवास्तोष्पती व्याख्यातौ । षष्ठ्याः पतीत्यादिना सत्वम् । ये तु तत्र छन्दसीत्यनुवर्तयन्ति श्रियःपतिरित्यादिसिद्धये, तन्मते पारस्करादित्वात्सुट् । के चित्तु द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छचेति सामान्यापेक्षज्ञापकात् षष्ठ्या अलुक् । कस्कादित्वात्सत्वम् । इणः परस्य तु षत्वमित्याहुः । पदकारास्तु वाचस्पतिं विश्वकर्माणम्, वास्तोष्पते प्रतीत्यादौ पृथक् पदमधीयते ॥

षष्ठीयुक्तश्छन्दसि वा ॥ षष्ठ्यन्तेन युक्तः पतिशब्दश्छ-

न्दसि घिसंज्ञो वा स्यात्। क्षेत्रस्य पतिना वयम्। इह योगो विभज्यते। षष्ठीयुक्तश्छन्दसीति। ततो, वा। छन्दसीत्येव। सर्वे विधयश्छन्दसि विकल्प्यन्त इत्यर्थः। बहुलञ्छन्दसीत्यादिकस्त्वस्यैव प्रपञ्चः॥

ह्रस्वं लघु॥ ह्रस्वं लघुसंज्ञं स्यात्। लघूपधगुणः, चेतति। न च ह्रस्वप्रदेशेष्वपि लघुसंज्ञयैव व्यवहारः सुकरः। सर्पिष्ट्वमित्यादौ ह्रस्वात्तादौ तद्धित इति षत्वासिद्धिप्रसङ्गात् गुरुसंज्ञया तत्र लघुसंज्ञाया बाधात् तस्मादेकसंज्ञाधिकाराद्धिर्ह्रस्वसंज्ञाप्रणयनं सम्यगेव कृतम्। यद्येवन्तर्हि दीर्घप्लुतसंज्ञायाः समावेशमाशङ्क्य एकसंज्ञाधिकारेयं योगः करिष्यतइति भाष्यं विरुध्यते गुरुसंज्ञाया लघुसंज्ञाया इव गुरुलघुसंज्ञाभ्यां ह्रस्वसंज्ञाया बाधप्रसङ्गात्। न च निरवकाशता। लघुसंज्ञाप्रवृत्त्युपायतामात्रेण सार्थक्यात्, यथा पदं सद्मं भवतीति व्याख्यायां पदसंज्ञायाः। सत्यम्। चकारादिना समावेशः कर्तव्य इत्याशयः। एतदपरितोषादेव वा तत्र पक्षान्तराण्युक्तानीति दिक्॥

संयोगे गुरु॥ ह्रस्वं गुरुसंज्ञं स्यात्संयोगे परे। शिक्षा भिक्षा। गुरोश्च हल इत्यकारप्रत्ययः॥

दीर्घञ्च॥ दीर्घं गुरुसंज्ञं स्यात्। ईहाञ्चक्रे॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्॥ प्रत्ययो यस्माद्विहितस्तदादि शब्दः प्रत्यये परे ऽङ्गसंज्ञं स्यात्। रामेण। विधिरिति किम्। स्त्री ईयती। न चेह वतुपः स्त्रीशब्दादविधानेपि स विधिरस्त्येवेति वाच्यम्। सन्निधानबलेन यस्माद्यः प्रत्ययो विहितस्तस्मिन्त्सोङ्गमिति व्याख्यानात्। तदादि किम्। वदामि वदिष्यामि। अतोदीर्घोयञीति दीर्घः। न चायमारम्भसामर्थ्यादेव भविष्यतीति वाच्यम्। यय गतौ चय गतौ

आभ्यां यङ्लुकि यायामि यायावः यायामः चाचामि चाचावः चाचाम इत्यादौ चरितार्थत्वात्। प्रत्यये किम्। प्रत्ययविशिष्टस्य ततोप्यधिकस्य वा मा भूत्। एवं हि वन्नश्चेत्युरदत्वस्य परनिमित्तत्वं न लभ्येत। तथा च अचःपरस्मिन्निति स्थानिवत्वाभावाद्वकारस्य सम्प्रसारणप्रसङ्गः। न च प्रथममूत्रेण स्थानिवद्भावः। अल्विधित्वात्। अत एव हि सत्यपि प्रथमलिङ्ग ग्रहणे निष्कौशाम्ब्यादौ नदीकार्यं नेत्युक्तम्। इह प्रकृत्यादिप्रत्ययेङ्गमित्येव लाघवाद्वक्तुं युक्तम्। प्रकृतिमात्रस्य तु व्यपदेशिवद्भावात्सिद्धम्। योगविभागेन परिभाषार्थलाभार्थं तथोक्तमिति तत्त्वम्। कर्ता कारकः। इह योगो विभज्यते। यस्मात्प्रत्ययविधिस्तदादिप्रत्यये इतिपरिभाषेयम्। प्रत्यये गृह्यमाणे यस्मात्तस्य विधिस्तदादि गृह्यतइत्यर्थः। तेन ञ्नित्यादिरित्यादौ यत्र प्रत्ययः सप्तम्या निर्दिश्यते तत्र तदादेर्ग्रहणम्। तेन देवदत्तो गार्ग्य इति सङ्घातस्य ञित्स्वरो न भवति। सुप आत्मनः क्यजित्यत्राप्यनेन तदादिनियमः तत्र सुपा कर्मणस्तदादेर्वा। विशेषणात्तदन्तविधिः। तेन महान्तं पुत्रमित्यादावतिप्रसङ्गो न। सति हि वाक्यात्क्याचि महत्पुत्रीयतीति स्यात्, तथा देवदत्तश्चिकीर्षतीति सङ्घातस्य धातुसंज्ञा न देवदत्तो गार्ग्य इति सङ्घातस्य प्रातिपदिकसंज्ञा न देवदत्तो गार्ग्यायण इति सङ्घातात्फङ् नेति दिक्। अस्यापवादः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति। इह च गतिरनन्तर इत्यनन्तरग्रहणं ज्ञापकम्। तद्धि अभ्युद्धृतशब्दे उच्छब्दव्यवहितस्याभिशब्दस्य प्रकृतिस्वरनिवृत्त्यर्थम्। न च परत्वाद्गतिर्गतावितिनिघाते कृते उदात्तग्रहणानुवृत्त्या विधीयमानः पूर्वपदप्रकृतिस्वरो न भविष्यतीति वाच्यम्। अपादादावित्यधिकारात्पादादौ निघाताप्रवृत्तेः। तदा-

दिनियमे तु हृतशब्दस्य क्तान्तत्वेप्युद्धृतशब्दस्याक्तान्तत्वात्प्राप्तिरेव नेति किमनन्तरग्रहणेन । प्रयोजनन्तु समासतद्धितस्वराः । तथाहि । अवतप्तेनकुलस्थितमित्यत्र क्तेनेत्यनुवर्त्तमाने क्षेपे इति समासः । तत्पुरुषेकृतीत्यलुक् । सांकूटिनमित्यत्र अणिनुण इति सोपसर्गादण् । अत एव वादिवृद्धिरुपसर्गांशे पर्यवस्यति । व्यावक्रोशीत्यत्र कर्मव्यतिहारे णचस्त्रियामिति णच् ततो णचः स्त्रियामित्यञ् । न कर्मव्यतिहारे इत्यैजागमनिषेधः । दूरादागत इत्यत्र थाथादिस्वरेणान्तोदात्तत्वम् । ननु परिभाषां विनापि समासस्येत्यन्तोदात्तो भविष्यतीति चेत् । मैवम् । आगम्यते स्मेति हि कर्मणि क्तः । तथा च समासस्वरं बाधित्वा गतिरनन्तर इति मध्योदात्तं स्यात् । सत्यान्तु परिभाषायां थाथघञित्यनेन कृत्स्वरापवादगतिस्वरं बाधित्वा परत्वादन्तोदात्तत्वं भवति । ननु थाथादिस्वरस्याप्यपवादो गतिस्वरः । सत्यम् । गतेरुत्तरस्य क्तान्तस्य यदन्तोदात्तत्वं तस्यैवासावपवादः । कारकादुत्तरस्य तु थाथादिस्वर एव भवतीति वक्ष्यते । नन्वस्तु गतिस्वरेणाद्युदात्त आगतशब्दः ततो दूरशब्दस्य स्तोकान्तिकेति समासः । पञ्चम्याः स्तोकादिभ्य इत्यलुक् । ततः सतिशिष्टत्वात्समासान्तोदात्त एव भविष्यति । सत्यम् । अन्यार्थं कृतया परिभाषया कृदुत्तरपदप्रकृतिस्वरेणाद्युदात्ते आगतशब्दे प्राप्ते सगतेरपि क्तान्तत्वात्स्थानान्तरप्राप्तत्वाद्गतिस्वरस्य बाधकस्यापि बाधेन थाथादिस्वरो भवतीत्येवाभिप्रेतं न तु स्वर एवानन्यथासिद्धं परिभाषोदाहरणं तथा च परिभाषा प्रातिपदिकसंज्ञायां न प्रवर्तते । मध्येपवादन्यायेन कृद्ग्रहणस्याप्रत्यय इति निषेधमात्रबाधकत्वात् । समासेतरपदसंज्ञकपूर्वभागघटितः सङ्घातो न प्रातिपदिकमिति

निषेधस्तु परत्वाद्बाधक एव । तेन मूलकेनोपदंशमित्यत्र न सुपो लुक् । न च समासविकल्पसामर्थ्यम् । न समासइति शाकलनिषेधाप्रवृत्त्या दध्युपदंशादौ तत्सार्थक्यसम्भवात् । एतच्च पुंयोगादाख्यायामिति सूत्रे भाष्यकैयटयोः स्पष्टमिति दिक् । ष्यङः सम्प्रसारणमिति सूत्रे भाष्ये तदादिनियमस्यापवादान्तरं पठितम् । स्त्रीप्रत्यये चानुपसर्जने तदादिनियमो नेति । एतच्च वाचानिकमेवेति सर्वादिसूत्रे व्याख्यातम् । यद्वा इह नेयङुवङ्स्थानावित्यतो ऽस्त्रीत्यनुवर्त्तते । तच्च यद्यपि तत्र स्वरूपपदार्थकन्तथापीहार्थपरं सम्पद्यते । प्रत्ययग्रहणे तदादि ग्राह्यं, स्त्री चेन्नाभिधीयतइत्यर्थः। तेन स्त्रीप्रत्यये तदादिनियमो नास्तीति फलितम् । न चैवमतिकारीषगन्ध्या पुत्र इत्यत्र सम्प्रसारणप्रसङ्गः । अस्त्रीत्यनेन प्रधानस्त्रियामेव प्रतिषेधात् । गौणमुख्ययोरिति न्यायात् । तेन यावान् शब्दः स्त्रियं प्राधान्येनाह तावान् स्त्रीप्रत्ययान्तः न तु ततोधिकोपीति स्थितम् ॥

सुप्तिङन्तं पदम् ॥ सुबन्तं तिङन्तञ्च पदसंज्ञं स्यात् । ब्राह्मणा ऊचुः । अन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनार्थं, गौरब्राह्मणितरा । घसंज्ञायान्तरबन्तग्रहणे हि सति गौरीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावं बाधित्वा पुंवद्भावाद्ध्रस्वत्वं खिद्घादिकोष्विति ह्रस्वः स्यात् पट्वितरेतिवत् । ब्राह्मणीशब्दस्य ह्रस्वो न स्यात् । कथं तर्हि प्रातिपदिकसंज्ञायां कृत्तद्धितशब्दाभ्यां तदन्तग्रहणमिति चेत्, अत्र भाष्यकाराः।अर्थवद्ग्रहणं तत्रानुवर्तते तत्सामर्थ्यात्तदन्तग्रहणमिति। स्यादेतत् । यद्यर्थवत्ता पारमार्थिकी विवक्ष्यते तर्हि सा पदस्य वाक्यस्य वास्ति न तु कृत्तद्धितान्तस्य तथा चार्थवत्सूत्रे वार्त्तिकम्, अर्थवता नोपपद्यते केवलेनावचनादिति । अथ

सिद्धं त्वन्वयव्यतिरेकाभ्यामिति । तत्रत्योत्तरवार्तिकानुरोधेन प्राक्रियादशायां कल्पिता सा विवक्ष्यते, तर्हि कृत्तद्धितयोरपि सास्तीति चेत् । सत्यम् । अत एवार्थवद्ग्रहणसामर्थ्यमुक्तम् । प्रत्ययान्तेन त्वेकार्थीभूतेन प्रतीयमानोर्थ इह गृह्यते तस्य लौकिकार्थं प्रति प्रत्यासन्नतरत्वात् । मतुपः प्राशस्त्यपरतया तस्यैव ग्रहणात् । अत एव च तदुपादानं सार्थकम् । पूर्वसूत्रे ऽधातुरिति पर्युदासबलेनापि तल्लाभसम्भवात् ॥

नः क्ये ॥ क्यचि क्याङि क्यषि च नान्तमेव पदसंज्ञं स्यात् । क्यच् । राजीयति । क्यङ् । राजायते । क्यष् । चर्मायति । चर्मायते । सामान्यग्रहणार्थं क्यषः ककार इति वदतो वृत्तिकारस्य मतेनेदमुदाहृतम् । भाष्ये तु क्यषः ककारस्य प्रत्याख्यानात्क्यच्क्यङोरेवेह ग्रहणम् । चर्मायतीति रूपं चासाधु । क्यङन्ततया नित्यमात्मनेपदाभ्युपगमात् । तथा च वक्ष्यते, लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति । एतच्च तृतीयएव स्फुटीकरिष्यामः । नान्तमेवेति किम् । वाच्यति । स्रुच्यति । तपस्यति । ननु क्य एव नान्तामिति विपरीतो नियमः कुतो नेति चेन्न । ङिसम्बुद्ध्योरिति ज्ञापकात् नलोपः प्रातिपदिकान्तस्येति ज्ञापकाच्च । अन्यथा हि नलोपः क्ये इत्येव सूत्रयेत् ॥

सिति च ॥ सिति प्रत्यये परे पूर्वं पदसंज्ञं स्यात् । भसंज्ञापवादः । भवतष्ठक्छसौ । भवदीयः । ऋतोरण् छन्दसिघस् ऋतुः प्राप्तोस्य ऋत्वियः ॥

स्वादिष्वसर्वनामस्थाने ॥ कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदसंज्ञं स्यात् । राजभ्यां राजभिः । राजत्वं राजता । सर्वनामस्थाने तु राजानौ । राजानः । भुवद्वद्भ्यो धारयद्व-

द्भ्य इति पदसंज्ञाया उपसङ्ख्यानम् । तसौमत्वर्थे इति भसंज्ञाया अपवादः व्यत्ययेन भवतेः शपो लुक् ॥

यचि भम् ॥ यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात् । गार्ग्यः । राज्ञः । वाचिकषडिकयोस्तु यथा भत्वाभत्वे निर्वहतस्तथा पञ्चमे वक्ष्यते । नभोङ्गिरोमनुषां वत्युपसंङ्ख्यानम् । नभसा तुल्यं वर्तते इति नभस्वत् भत्वाद्रुत्वाभावः । मनुष्वदग्ने । अङ्गिरस्वदङ्गिरः । जनेरुसीत्यत्र बहुलग्रहणानुवृत्तेर्मन्यतेरुपिप्रत्ययः आदेशप्रत्यययोरिति षत्वम् । वृषण्वस्वश्वयोः वृष वर्षुकं वसु यस्य सः वृषण्वसुः । एवं वृषणश्वः । कर्मधारये षष्ठीतत्पुरुषादिर्वा यथासम्भवं बोध्यः । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्रसज्येत भत्वात्तु न पदत्वम् । अत एव पदान्तस्येति णत्वनिषेधो न । अल्लोपोन इति तु न भवति अङ्गसंज्ञाया अभावात् अङ्गस्येति तत्राधिकारात् । उपसङ्ख्यानान्येतानि छन्दोविषयाणीति कैयटः ॥

तसौ मत्वर्थे ॥ तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । विद्युत्वान् भत्वाज्जश्त्वं न । उदकेन श्वपतिर्वर्धते उदश्वित् क्विप् उदश्वितोन्यतरस्यामिति निपातनात्सम्प्रसारणाभावः । उदकस्योदः संज्ञायाम् । उदश्वित्वान् घोषः । यशस्वी । मत्वर्थवृत्तित्वं मतुपो विनिप्रभृतीनां चाविशिष्टं, अत उभयत्र भत्वप्रवृत्तिः । यथा देवदत्तशालास्था आनीयन्तामित्युक्ते देवदत्तोप्यानीयते उद्देश्यतावच्छेदकरूपाक्रान्तत्वात् ।

अयस्मयादीनि छन्दसि ॥ एतानि छन्दसि साधूनि । भपदसंज्ञाधिकाराद्यथायोगन्तदुभयद्वारैषां साधुत्वं विधीयते । तथा च वार्त्तिकम्, उभयसंज्ञान्यपीति वक्तव्यमिति । अयस्मयं

पात्रम्। भत्वादुत्वन्न। अयसो विकार इत्यर्थे द्व्यचश्छन्दसीति मयट्। एतेन मयड्वैतयोर्भाषायामित्युक्तेः कथमिह मयडित्याशङ्क्यात एव निपातनादिति वदन् न्यासकृत्परास्तः। ससुष्टुभा सऋक्कता गणेन। इह ऋक्कतेति पदत्वात्कुत्वम्। भत्वाज्जश्त्वाभावः। जश्त्वविधानार्थायाः पदसंज्ञाया भत्वेन प्रतिबन्धात्॥

बहुषु बहुवचनम्॥ बहुत्वे एतत्स्यात्। वृक्षाः। कथन्तर्हि दारा इति। अवयवबहुत्वस्यावयविनि आरोपाद्भविष्यति। न चैवमेकस्मिन्नपि वृक्षे बहुवचनापत्तिः। तत्रारोपे प्रमाणाभावात्। दारादौ तु नित्यबहुवचनान्तत्वग्राहककोशादेर्वृद्धव्यवहारस्य च मानत्वेन वैषम्यात्॥

द्व्येकयोर्द्विवचनैकवचने॥ द्वित्वैकत्वयोरेते स्तः। वृक्षौ। वृक्षः। इह द्व्येकशब्दौ सङ्ख्यापरौ। न तु सङ्ख्येयपरौ। अत एव द्व्येकयोरिति द्विवचनम्। अन्यथा बहुवचनं स्यात्। पूर्वसूत्रेपि बहुष्विति सङ्ख्यापरमेव। बहुवचनन्तु आश्रयगतं बहुत्वं धर्मे आरोप्य कृतम्। तत्फलन्तु बहुः पर्वत इति वैपुल्यवाचिनो नेह ग्रहणमिति सूचनमेव। वस्तुतो व्यर्थं तत्। परत्वादेकवचनसम्भवात्। यत्तु आदशतः सङ्ख्याः सङ्ख्येयइति, तत्प्रायोवादमात्रम्। अत्र श्लोकवार्त्तिकं, सुपाङ्कर्मादयोप्यर्थाः सङ्ख्या चैव तथा तिङाम्। प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा॥ कर्माणि द्वितीयेत्यादेः प्रकरणस्य बहुषुबहुवचनमित्यादेश्च स्वादिसूत्रेण सहैकवाक्यतया विधायकत्वम्। तथा बहुषुबहुवचनमित्यादिसूत्रयोस्तिबादिवाक्येनाप्येकवाक्यतेति पूर्वार्धस्यार्थः। तृतीयचरणेनार्थनियम उक्तः। चतुर्थेन तु प्रकृतार्थापेक्षः प्रत्ययनियम उक्तः एषां पक्षाणां बलाबलचिन्ता

तु तद्धितश्चासर्वविभक्तिरिति सूत्रएवास्माभिः कृता। इह एकद्विबहुष्वेकवचनद्विवचनबहुवचनानीति कर्तुमुचितम्। बहुशब्दश्च सङ्ख्यावाच्येव ग्रहीष्यते द्विशब्दसाहचर्यात्। अत एव हि एकशब्दः सङ्ख्यावाच्येव गृह्यते। वस्तुतस्तु इदं सूत्रद्वयं मास्तु। एकवचनादिसंज्ञानामन्वर्थताश्रयणेन सकलेष्टसिद्धेः॥

इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य चतुर्थे
पादे द्वितीयमान्हिकम्॥

कारके॥ अधिकारोयम्। व्यत्ययेन प्रथमार्थे सप्तमी। तथा च ध्रुवमित्यादौ प्रतिसूत्रं वाक्यं भित्वा कारकसंज्ञा विधीयते। तथाहि। अपाये ध्रुवं कारकसंज्ञं स्यात्। तत अपादानम्। उक्तं कारकमपादानसंज्ञं स्यात्। पुनः कारकशब्दानुवृत्तिसामर्थ्याद्विशेषसंज्ञाभिः सह समावेशो न तु पर्यायः। अनुवृत्तिं विनापि प्रथमवाक्यमात्रात्तत्सिद्धेः। तेन स्तम्बेरम इत्यादौ अधिकरणत्वात्सप्तमी, कारकत्वाद्गतिकारकोपपदात्कृदिति प्रकृतिस्वरश्च सिद्धः। थाथादिस्वरस्तु न भवति। अपासाहचर्यादेरच एव तत्र ग्रहणात्। न चोपपदत्वादेव कृदुत्तरपदप्रकृतिस्वरोस्त्विति वाच्यम्। स्तम्बकर्णयोरिति निर्देशात्प्रातिपदिकयोस्तथात्वेपि सप्तमीविशिष्टयोरतथात्वात्। न हि सप्तमीविशिष्टं सप्तम्या निर्दिष्टम्, येनोपपदसंज्ञां लभेतेति दिक्। अन्वर्था चेयं संज्ञा करोतीति कारकमिति। तेन क्रियानन्वयिनो न भवति। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। इह हि ब्राह्मणः पुत्रविशेषणं न तु क्रियान्वयी। ननु पुत्रोपि कथं कारकम्। प्रश्नो हि जिज्ञासा। तत्र प्रष्टुः कारकत्वेपि यं प्रति प्रश्नस्तस्य जनकत्वायोगादिति चेत्। सत्यम्। मा-

स्तु जनकता । क्रियान्वयमात्रमिह विवक्षितम् । तच्चास्त्येव । एतेन सम्प्रदानस्य कारकत्वं व्याख्यातम् । यद्वा । सम्प्रदानादेरपि प्रथमं बुद्ध्यारोहात्कारकता । एवं ज्ञायते करोतीत्यादौ कर्तृकर्मणोरपि बोध्यम् । कार्याव्यवहितपूर्वक्षणवृत्तीनां कथं कारणतेति चेत् । यथा यागस्येत्यत्रेहि । तत्र व्यापारोस्तीति चेन्न । तावतापि यागस्य पूर्ववर्तितानुपपादनात् । अव्यवहितपूर्ववर्तिस्वस्वव्यापारान्यतरकत्वं कारणत्वमिति चेन्न । व्यापारत्वस्य कारणत्वगर्भतया आत्माश्रयापत्तेः । स्वव्यापारस्येव स्वज्ञानस्यापि प्रवेशसम्भवाच्च । अत एव ज्ञायमानं लिङ्गं पदञ्चानुमितिशब्दज्ञानयोः कारणमिति जरन्नैयायिकाः । ज्ञायमानाः पदार्थाः कारणमिति च मीमांसकाः । अत एव च रथन्तरसामादेरैन्द्रवाय्वाग्नत्वादौ निमित्ततेत्युद्घोषो मीमांसकानाम् । अथ वा उपसर्जनसंज्ञा यथा राज्ञः कुमार्या राजकुमार्या इत्यादौ यथा सम्भवमन्वर्थापि अर्धपिप्पलीत्यादौ वचनाद्भवति तथा कारकसंज्ञापि प्रतिसूत्रं विधीयमाना वचनात्सम्प्रदानादौ भवति । प्रदेशेषु तु संज्ञामात्रकारक एव बोधः । तत्तद्रूपप्रकारको वेत्यन्यदेतत् । स्यादेतत् । वृक्षस्य पर्णं पततीत्यादौ पर्णविशेषणस्यापि वृक्षस्य कारकतापत्तिः । वृक्षात्पततीति प्रयोगानुरोधात् । तर्हि अस्मदीयशब्दप्रयोगवैलक्षण्यमात्रेण एकस्यैव जनकत्वाजनकत्वे व्यवतिष्ठेते इति चेत् । अत्रेदं सिद्धान्तरहस्यम् । कारकत्वं तद्व्याप्यकर्तृत्वादिषट्कञ्च वस्तुविशेषे ऽनवस्थितम् । विशेषणविशेष्यवत् तर्हि गौः सर्वं प्रति गौरेव न तु कं चित्प्रत्यगौरितिवद्विशेषणं विशेषणमेवेति सुवचम् । तथा च किं कारकं कः कर्त्ता किं कर्मेत्यादिप्रश्ने सर्वमित्युत्तरम् । वक्ष्यमाणकर्तृत्वकर्मत्वादेरचेतनेषु अनादिषु च निर्बाधत्वात् कया पचिधातुव्य-

क्त्वा उपस्थापितेर्थे किं कर्त्रादिकमिति प्रश्ने तु प्रकृतपचिव्यक्त्युपात्तव्यापाराश्रयः कर्ता। व्यापारव्यधिकरणफलाश्रयः कर्म। यद्व्यापारोत्तरभावित्वं क्रियाया विवक्ष्यते तत्करणम्। कर्तृकर्मणोराश्रयोधिकरणमित्यादि क्रमेणोत्तरम्। विक्लित्त्यनुकूलव्यापारो हि पच्यर्थः। व्यापारश्चानेकधा। तत्र पचेरधिश्रयणतण्डुलावपनैधोपकर्षणापकर्षणफूत्कारादितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्ता। उच्चलनतात्पर्यकत्वे त्वेधाः कर्तारः। तण्डुलधारणादिपरत्वे स्थाली कर्त्री। अवयवविभागादिपरत्वे तण्डुलाः कर्त्तारः। अत एव कर्मकर्तृकरणकर्तेत्यादिव्यवहारः। एवं स्थाल्या पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयोपि स्थालीकरणमेव न तु तदा कर्त्री। देवदत्तादिव्यापारस्यैव तत्र धातूपात्तत्वात्। तथा आदित्यादिभ्यामुपात्तेर्थे बटुः कर्त्ता। तस्मिन्नेवार्थे भक्षयतिनोपात्ते बटुः कर्म। अधिपूर्वैः शीङ्स्थाप्रभृतिभिरुपात्तेर्थे आधारः कर्म। तत्रैव केवलैरुपात्तेधिकरणमित्यादि। नन्वेवमननुगम इति चेत्, सत्यम्। कस्य कः पिता को भ्रात इत्यत्रेवाननुगतस्यैव लक्ष्यत्वात्। अत एव प्रयोगाणां साध्वसाधुता व्यवतिष्ठते। अन्यथा क्व चित्कर्तुः सर्वत्र कर्तृतापत्तौ सकलप्रयोगाः सङ्कीर्येरन्। उक्तं च हरिणा। वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्। स्थाल्या पच्यतइत्येषा व्यवस्था दृश्यते यत इति॥ अत एव प्रयोजकव्यापारव्याप्यत्वाविशेषेपि पच्यादिधातुषु प्रयोज्यो न कर्म गम्यादिष्वेव तु कर्म तथा पौराणिकाच्छृणोति नटस्य शृणोतीत्यत्र पौराणिकोपादानं कारकञ्च नटस्तु नोभयमित्यादि वक्ष्यमाणं सङ्गच्छते। नन्वेवं लः कर्मणीत्यादिविधिषु किं कर्म ग्राह्यमिति चेत्। विनिगमकाभावात्सर्वमित्यवेहि, यथा भस्येत्यत्र सर्वं भम्। तर्हि टिषु-

भादिवत्पारिभाषिकमेव कारकत्वकर्मत्वादिकं स्यादिति चेत् । को वा ब्रूते नेति । एतावानेव परं भेदः । टिघुभादीनां शब्दसंज्ञात्वमितरेषान्त्वर्थसंज्ञात्वमिति । एवञ्च कर्मणिद्वितीयेत्यनेन यथायथमाधारादावपि द्वितीया विधीयतइति फलितम् । रथेन गम्यते रथो गच्छतीत्यादावपि कर्तृविभक्तिरुत्सर्गेणैव सिद्धेति न तत्र लक्षणाश्रयणमित्यवधेयम् । विभक्तीनां वाच्यांशनिष्कर्षस्तु करिष्यते । एतेन ज्ञानस्य स्वप्रकाशत्वे कर्तृकर्मविरोधमुद्भावयन्तः परास्ताः । शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादावुक्तिसम्भवात् । एतेन परसमवेतक्रियाफलशालित्वं कर्मत्वं चेदपादानेतिव्याप्तिरित्याशङ्क्य धात्वर्थतावच्छेदकफलशालित्वं तदिति परिष्कुर्वन्तोपि परास्ताः । ग्रामं गमयति देवदत्तमित्यादौ गन्तरि अव्याप्तेः । त्वन्मते गमनस्य प्रकृत्यर्थत्वेपि तथात्वानवच्छेदकत्वात् । तत्त्वे वा पाचयत्यादिप्रयोज्यकर्तर्यतिव्याप्तेः । तत्र पारिभाषिकमनुशासनोपयोगिकर्मत्वं वचनबलाद्व्यवस्थितमिति चेत् । अपादानेपि तर्हि तन्नास्तीत्यवेहि । एकसंज्ञाधिकारे ऽनवकाशया बाधात् । अत एवात्मानमात्मा हन्तीत्यादौ परया कर्तृसंज्ञया कर्मसंज्ञाबाधमाशङ्क्याहङ्कारादिविशिष्टात्मभेदमाश्रित्य तत्रतत्र भाष्ये समाहितमिति दिक् । नन्वेवं करणं कारकमिति सामानाधिकरण्यं कथम् । अस्वातन्त्र्येण ण्वुल्प्रत्ययायोगात् । अन्यथा कर्तृसंज्ञापत्तौ करणसंज्ञायाः पर्यायापत्तेरिति चेत् । उच्यते । अधिकारसामर्थ्यात्कारकशब्दोपनीतं स्वातन्त्र्यमवस्थान्तरगतं विज्ञायते । अवस्थान्तरे यत्स्वतन्त्रं तत्साधकतमङ्करणमिति यथा कुरुक्षेत्रस्थाः काश्यां वसन्तीत्यादौ । कर्तुस्तु साम्प्रतिकं स्वातन्त्र्यम् । तच्च कर्तृसंज्ञायामुपयुज्यतइति । यद्वा । कारकशब्दः क्रिया-

परः करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः । तथा च अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञाः स्युः । कारकाद्दत्तश्रुतयोरित्यादौ तु कारकशब्दः स्वर्यते तेनैतदधिकारोक्तं कर्त्रादिषट्कमेव गृह्यतइति ॥

ध्रुवमपाये ऽपादानम्॥अपायो विश्लेषो विभागस्तद्धेतुत्वोपहितो गतिविशेषश्चेह विवक्षितस्तस्मिन्साध्ये ऽवधिभूतमपादानसंज्ञं स्यात् । वृक्षात्पतति । ध्रुवमित्यत्र ध्रु गतिस्थैर्ययोरित्यस्मात्कुटादेः पचाद्यच् । ये तु ध्रुव स्थैर्ये इति पठन्ति । तेषामिमुपधलक्षणः कप्रत्ययः, ध्रुवतीति ध्रुवं स्थिरम् । एकरूपमिति यावत् । ध्रुवमस्य शीलमिति यथा । तथा चापाये साध्ये यदेकरूपमित्युक्ते प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तदुपयोगीति लभ्यते । तच्चार्थादवधिभूतमेव पर्यवस्यति । तेन धावतो ऽश्वात्पततीत्यादौ क्रियाया विशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तक्रियां प्रत्यवधित्वन्न विरुध्यते । तथा परस्परस्मान्मेषावपसरत इत्यत्र सृधातुना गतिद्वयस्याप्युपादानादेकमेषनिष्ठाङ्गतिं प्रत्यपरस्यापादानत्वं सिध्यति । उक्तञ्च हरिणा प्रकीर्णकाण्डे । अपाये यद्दुदासीनं चलं वा यदि वा ऽचलम् । ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥ पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ । तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥ मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् । मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक्पृथगिति ॥ अतदावेशादिति अपायानावेशादित्यर्थः । गतिर्विना त्वधिना नापाय इति कथ्यतइति तत्रैवोक्तेरवधिनिरपेक्षस्य चलनस्यापायत्वाभावादिति भावः । पर्वतात्पततो श्वात्पततीत्यत्र तु पर्वतावधिकपतनाश्रयो योश्वस्त-

दवधिकं देवदत्ताश्रयं पतनमर्थः । पञ्चमी त्ववधौ शक्ता । तत्राभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम् । प्रत्ययार्थस्तु क्रियायां विशेषणम् । कारकाणां क्रिययैव सम्बन्धात् । अन्यथा ऽसाधुत्वात् । क्रियान्वये सत्येव हि कारकसंज्ञा तत्पूर्विका विशेषसंज्ञाश्च स्थिताः । अत एवाहुः । नाम्नो द्विधैव सम्बन्धः सर्ववाक्येष्ववस्थितः । सामानाधिकरण्येन षष्ठ्या वापि क चिद्भवेदिति । सामानाधिकरण्येनेति नीलो घट इत्याद्यभिप्रायम् । नीलं घटमानयेत्यादावप्यन्तरङ्गक्रियान्वयानन्तरमेककियावशीकृतानां पार्ष्णिक्यबोधाभिप्रायञ्च । षष्ठ्येति अकारकविभक्तेरुपलक्षणं हरये नम इति यथा । क चिदिति, अकारकविभक्तेरपि, नटस्य शृणोतीत्यादौ क्रियान्वयदर्शनादिति भावः । एतेन भूतले घटो नेत्यत्र भूतलाधेयत्वाभावो घटे भूतलाधेयत्वं वा घटाभावे विशेषणामिति द्वेधा व्याचक्षणा नैयायिकाः परास्ताः । उभयथापि क्रियानन्वये कारकविभक्तेरसाधुत्वात् । अर्थाभावे ऽव्ययीभावापत्तेश्च । तस्य नित्यसमासत्वात् । नन्वस्मदुक्तोपि बोधोस्मदर्शनव्युत्पन्नानामनुभवसाक्षिक इति चेत् । सत्यम् । न हि वयं बोध एव नादेतीति ब्रूमः । सर्वे सर्वार्थबोधनसमर्था इत्यभ्युपगमात् किन्तु तस्मिन्नर्थे ऽसाधुताम् । तथा च सिद्धे शब्दार्थसम्बन्धइति वार्तिकं व्याचक्षाणा भाष्यकारा आहुः । समानायामर्थावगतौ साधुभिश्चासाधुभिश्च गम्यागम्येतिवन्नियमः क्रियतइति । उक्तञ्च । भेदाभेदकसम्बन्धोपाधिभेदनियंत्रितम् । साधुत्वं तदभावेपि बोधो नेह निवार्यतइति ॥ एवञ्च कस्माद्वाक्यात्कीदृग्बोध इति प्रश्ने यो यथा व्युत्पन्नस्तस्य तादृगेवेति स्थितिः । कीदृशे बोधे साधुत्वं कुत्र नेति परं विचारविषय इति तत्त्वम् । एतेन घटः कर्मत्व-

मानयनं कृतिरित्यादीनां स्वरूपायोग्यतेति परास्तम् । तथा-व्युत्पन्नस्य बोधानुभवात् । अन्यथा व्युत्पन्नस्य व्युत्पत्तिरूप-सहकारिविरहात्कार्यानुदयेपि स्वरूपयोग्यतानपायात् । एतेन प्रकृत्यर्थप्रकारको बोधो यत्र विशेष्यतया तत्र विषयतया प्र-त्ययजन्य इत्यादिकार्यकारणभावं कल्पयन्तोप्यपास्ताः । वि-परीतव्युत्पादिते व्यभिचारस्योद्भवात् । सिद्धान्ते तु घटः कर्मत्वमित्याद्यसाध्येव । तथाहि । अभिहिते प्रथमेति वार्त्तिकं त-त्कथं घटः कर्मत्वमिति प्रथमा । घटानयनयोरानयनकृती प्रति कर्मतया कर्तृकर्मणोरिति षष्ठीप्रसङ्गाच्चेति दिक् । निर्दिष्टवि-विषयं किं चिदुपात्तविषयं तथा । अपेक्षितक्रियश्चेति त्रिधा-पादानमुच्यते ॥ यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्ट-विषयम् । अश्वात्पततीति यथा । यत्र तु धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम् । यथा बलाहकाद्विद्योतत इति, निः-सरणाङ्गे विद्योतने द्युतिर्वर्तते । यथा वा कुसूलात्पचतीति । आदानांगे पाकेत्र पचिर्वर्तते । अपेक्षितक्रियं तु तत् यत्र प्रत्यक्ष-सिद्धमागमनं मनसि निधाय पृच्छति कुतो भवानिति, पाटलि-पुत्रादिति चोत्तरयति । अर्थाध्याहारस्य न्याय्यतया उक्तत्वा-त् । इह सार्थाद्धीयतइत्यपि निर्दिष्टविषयस्योदाहरणम् । स्यादेत-त् । परत्वात्सार्थस्य कर्तृसंज्ञा प्राप्नोति । उक्तं हि, अपादानमुत्त-राणीति । किञ्च सार्थस्य कर्तृत्वाभावे त्यज्यमानस्य कर्मसं-ज्ञा न स्यात् कर्तृव्यापारव्याप्यत्वाभावात् । ततश्च हीयते हीन इति कर्मणि लकारो निष्ठा च न स्यात् । न च कर्मकर्तर्ययं लकार इति वाच्यम् । जहातेः कर्तृस्थक्रियत्वात्कर्मण्येवायं लकार इति इन्दुनोक्तत्वात् । यत्तु त्वपादाने चाहीयरुहो-रिति सूत्रे न्यासकारेण सम्प्रदानसूत्रे कैयटेन चोक्तं कर्मसंज्ञा-

यां कर्तृग्रहणं स्वातन्त्र्योपलक्षणम्। अतो हानक्रियायां स्वतन्त्रेणापादानेनेप्स्यमानस्येह कर्मेतेति। तच्चिन्त्यम्। माषेष्वश्वं बन्धातीत्यत्र कर्मणोप्यश्वस्य वस्तुतो भक्षणे यत्स्वातन्त्र्यं तदाश्रयकर्मसंज्ञापत्तेः। अत एव कर्मसंज्ञाविधायकसूत्रशेषे कैयटेनोक्तम्। प्रयोजकव्यापारस्याशब्दार्थत्वात्तदपेक्षं कर्मत्वमयुक्तमिति। अत्राहुः। सार्थाद्धीयतइत्यत्र कर्मकर्त्तरि लकारः। तथाहि। अपगमना जहातेरर्थः। सा च क्षुदुपघातादिना देवदत्तस्यापगमते तत्समर्थाचरणम्। यदा तु क्षुदुपघातादिना स्वयमेवापगच्छति तदा कर्मकर्तृत्वम्। स्फुटञ्चेदं हरदत्तमाधवग्रन्थयोः। स्यादेतत्। ध्रुवग्रहणं किमर्थम्। न च ग्रामादागच्छति शकटेनेत्यत्र शकटे ऽतिव्याप्तिवारणाय तदिति वाच्यम्। परत्वात्तत्र कारणसंज्ञाप्रवृत्तेः। यथा धनुषा विध्यतीत्यत्र। इह हि शरनिःसरणं प्रत्यवधिभावोपगमेनैव व्यधने करणतेत्युभयप्रसङ्गः। वृक्षस्य पर्णं पततीत्यादौ तु वृक्षः पर्णविशेषणं न त्वपायेन युज्यते। न च संज्ञिनिर्देशार्थं ध्रुवग्रहणम्। अपाये क्रियायां यदन्वेतीत्यस्याक्षिप्तस्य संज्ञिसमर्थकत्वात्। यद्वा कारके इति निर्धारणसप्तम्याश्रयणात्कारकमिति लभ्यते। पूर्वत्रापि प्रथमार्थे सप्तमीत्युक्तत्वाच्च। तस्माद् ध्रुवग्रहणं चिन्त्यप्रयोजनम्। जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्। अधर्माज्जुगुप्सते विरमति प्रमाद्यति वा। संश्लेषपूर्वको विश्लेषो विभागः। स चेह नास्ति। बुद्धिकल्पितस्तु गौणत्वान्न गृह्यतइति वार्त्तिकारम्भः। भाष्यकारास्तु जुगुप्सादयोत्र जुगुप्सादिपूर्विकायां निवृत्तौ वर्तन्तइत्युपात्तविषयमेतत्। कारकप्रकरणे च गौणस्यापि ग्रहणम्। साधकतममिति तमग्रहणाल्लिङ्गात्। अपायादिपदानां स्वरितत्वाद्वा स्वरितेनाधिकारः,

गौणोप्यर्थो गृह्यतइति व्यवस्थापनात् । तेन बुद्धिकल्पितस्याप्यपायस्य सत्वात्सिद्धम् । पूर्वं हि बुद्ध्या ऽधर्मं सम्प्राप्य ततो दोषदर्शनान्निवर्ततइत्यस्त्यपायः । एवमुत्तरसूत्रेष्वपि प्रपञ्चत्वं बोध्यमिति दिक् ॥

भीत्रार्थानां भयहेतुः ॥ भयं भीः त्राणं त्राः भयार्थानां त्राणार्थानाञ्च योगे भयहेतुः कारकमपादानं स्यात् । चोरेभ्य उद्विजते बिभेति रक्षति वा त्रायते भयहेतुग्रहणं चिन्त्यप्रयोजनम् । अरण्ये बिभेतीत्यादौ तु परत्वादधिकरणसंज्ञा । कस्य बिभ्यति देवाश्च जातरोषस्य संयुगइति रामायणश्लोकस्तु कस्य संयुगइति योजनया व्याख्येयः ॥

पराजेरसोढः ॥ परापूर्वस्य जयतेः प्रयोगे ऽसोढोद्योर्थोपादानं स्यात् । अध्ययनात्पराजयते ग्लायतीत्यर्थः । अकर्मकश्चायम् । तत्र षष्ठ्यां प्राप्तायां वचनम् । असोढः किम् । शत्रून्पराजयते । अभिभवतीत्यर्थः । असोढ इति क्तार्थो भूतकालोत्राविवक्षितः तेनाध्ययनात्पराजेष्यतइत्यादि सिद्धम् । वस्तुतस्तु असोढग्रहणं व्यर्थं शत्रून्पराजयतइत्यत्र परत्वात्कर्मसंज्ञासिद्धेः । इह सूत्रे पराजेरिति रूपं विपराभ्याञ्जेरितिवत्समर्थनीयम् । यत्तु परत्वात् घेर्ङितीति गुण इति हरदत्तेनोक्तं तत्सूत्रभाष्यादिविरुद्धमिति प्रागेव प्रपञ्चितम् ॥

वारणार्थानामीप्सितः ॥ वारणार्थानां प्रयोगे क्रियया आप्तुमिष्टं कारकमपादानं स्यात् । यवेभ्यो गां वारयति वृञ् वरणे, चुरादिः । प्रवृत्तिविघातो वारणम् । ईप्सित इति किम् । यवेभ्यो गां वारयति क्षेत्रे। नन्विह परत्वादधिकरणसंज्ञा भविष्यति यथा कृतेपीप्सितग्रहणे गोषु इप्सिततमत्वप्रयुक्ता कर्मसंज्ञा । सत्यम् । चिन्त्यप्रयोजनमेवेप्सितग्रहणम् ॥

अन्तर्धौ येनादर्शनमिच्छति ॥ अन्तर्धाविति सप्तमी येनेति कर्तरि तृतीया । न च कृद्योगे षष्ठीप्रसङ्गः । उभयप्राप्तौ कर्मण्येवेति नियमात् । व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तत्कारकमपादानं स्यात् । मातुर्निलीयते कृष्णः । लीङ् श्लेषणे दैवादिकः । अत्रान्तर्धाविति चिन्त्यप्रयोजनम् । न दिदृक्षते चोरानित्यत्र हि परत्वात्कर्मता सिद्धा । इच्छतीति किम् । इच्छायामसत्यां सत्यपि दर्शने यथा स्यात् ॥

आख्यातोपयोगे ॥ उपयोगो नियमपूर्वकं विद्यास्वीकरणम् । तस्मिन्साध्ये य आख्याता तत्कारकमपादानं स्यात् । उपाध्यायादधीते । उपयोगे किम् । नटस्य शृणोति ॥

जनिकर्तुः प्रकृतिः ॥ जायमानस्य हेतुरपादानं स्यात् । पुत्रात्प्रमोदो जायते । इह जनिरुत्पत्तिः । जनिरुत्पत्तिरुद्भव इत्यमरः । इञजादिभ्य इति जनेर्भावे इञ् जनिघसिभ्यामित्युणादिसूत्रेणेण् वा । जनिवध्योश्चेति वृद्धिप्रतिषेधः । तस्याः कर्तेति षष्ठीतत्पुरुषः । कर्तरि चेति प्रतिषेधस्त्वनित्यः अत एव ज्ञापकात् । यद्वा शेषषष्ठ्या समासोयम् । निषेधस्तु कर्मषष्ठीविषय इति कारकइति सूत्रे कैयटः । तथा चार्थमात्रस्य ग्रहणाद्धात्वन्तरयोगेपि भवति अङ्गादङ्गात्सम्भवतीति यथा । एतेन इक्ङितौ धातुनिर्देशइतीका निर्देशोयमित्याश्रित्य गमहनेत्युपधालोपमर्थासङ्गतिं चोद्भावयन्तो मीमांसावार्तिककाराः समाहिताः । अत्र प्रकृतिग्रहणमुपादानमात्रपरामित्येके । अत एव प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधादित्यधिकरणे ब्रह्मणो जगदुपादानतायां यतो वा इमानि भूतानि जायन्तइति पञ्चमीमुपपृष्टम्भिकामाहुः । अन्ये तु पुत्रात्प्रमोदो जायतइति वृत्तिस्वरसात्प्रकृतिशब्द इह कारणमात्रपर इत्याहुः । अस्मिंश्च पक्षे यतो

वेति सामान्यशब्दोपि उपादानरूपविशेषपरः छागो वा मन्त्रवर्णादिति षाष्ठन्यायात्। अहमेव बहु स्यामिति हि सामानाधिकरण्यं श्रूयते तच्च चतुर्धा भ्रमे, बाधाया, मभेदे, तादात्म्ये च। प्रकृते तादात्म्ये, भिन्नत्वे सत्याभिन्नसत्ताकत्वं आविद्यकः सम्बन्धविशेषो वा तादात्म्यमित्याद्युत्तरमीमांसायां स्पष्टम्॥

भुवः प्रभवः। भूकर्तुः प्रभवः प्राग्वत्। हिमवतो गङ्गा प्रभवति। कश्मीरेभ्यो वितरता प्रभवति। तसु उपक्षये। भावे क्तः। विगतस्ता वितस्ता। अशोष्येत्यर्थः। अत्रोपलभतेः कर्मव्यापारे प्रभवतिर्वर्तते। प्रकाशतइत्यर्थः। भीत्रार्थानामित्यारभ्येयं सप्तसूत्री भाष्ये प्रत्याख्याता। तथाहि चोरेभ्यो बिभेति। भयान्निवर्ततइत्यर्थः। त्रायते रक्षणेन चोरेभ्यो निवर्त्तयतीत्यर्थः। पराजयते। ग्लान्या निवर्ततइत्यर्थः। वारयति। प्रवृत्तिम्प्रति बध्नान्निवर्तयति। निलीयते। निलयनेन निवर्ततइत्यर्थः। अधीते। उपाध्यायान्निःसरन्तं शब्दङ्गृह्णातीत्यर्थः। ब्रह्मणः प्रपञ्चो जायतइत्यत्रापि। ततोपक्रामति। यथा वृक्षात्फलमिति लोकप्रसिध्याश्रयेणापायो बोध्यः। प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थः। अत्रेदं वक्तव्यं, निवृत्तिनिःसरणादिधात्वन्तरार्थविशिष्टे स्वार्थे वृत्तिमाश्रित्य यथाकथंचिदुक्तप्रयोगाणां समर्थनेपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः। नटस्य शृणोतीतिवत्। न ह्युपाध्यायनटयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः। अनभिधानब्रह्मास्त्रमाश्रित्य प्रत्याख्यानन्तु नातीव मनोरमम्। एवञ्च जुगुप्साविरामेत्यादिवार्तिकमप्यवश्यारम्भणीयम्। तथा च सूत्रवार्तिकमतमेवेह प्रबलमिति यावद्बाधं साधु। तथा ध्रुवं भयहेतुरसोढ इत्यादिसंज्ञिनिर्देशोपि

सार्थकः परत्वात्तत्तत्संज्ञाप्राप्तावपि शेषत्वविवक्षायां न माषाणामश्नीयादित्यादाविव षष्ठ्या इष्टतया तत्रापादानसंज्ञाया वारणीयत्वादित्यवधेयम् ॥

कर्मणा यमभिप्रैति स सम्प्रदानम् ॥ कर्मणा करणभूतेन कर्ता यमभिप्रैति सम्बन्धाति ईप्सति वा तत्कारकं सम्प्रदानं स्यात् । न च युगपत्कर्मत्वं करणत्वञ्च कथमिति वाच्यम् । क्रियाभेदेनाविरोधात् । दानक्रियायां हि कर्म अभिप्रापणक्रियायां करणम् । दीयमानया गवा हि शिष्य उपाध्यायमभिप्रैति । उपाध्यायाय गां ददाति । अत्राभिप्रैतीति पदत्रयम् । न तु समासः । उदात्तवता गतिमता च तिङा गतेः समासो वक्तव्य इति वार्त्तिकस्य छन्दोविषयत्वादिति हरदत्तः । भाषाविषयत्वे बाधकं तु तत्रैव वक्ष्यामः । अत्र वृत्तिकाराः । अन्वर्थसंज्ञेयं सम्यक् प्रदीयते यस्मै तत्सम्प्रदानमिति । तेनेह न । रजकस्य वस्त्रं ददाति । घ्नतः पृष्ठं ददाति । इह हि ददातिर्गौणः न तु वास्तवं दानमस्तीत्याहुः । भाष्ये तु नैतत्स्वीकृतं खंडिकोपाध्यायस्तस्मै चपेटां ददाति । न शूद्राय मतिं दद्यादित्यादिप्रयोगात् । रजकस्य ददातीति तु शेषत्वविवक्षायां बोध्यम् । नन्वेवमजान्नयति ग्राममिति नयतिक्रियाकर्मभिरजैः सम्बध्यमानस्य ग्रामस्य सम्प्रदानत्वं स्यादिति चेन्न । यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वं कर्मणेति निर्दिष्टस्य गवादेः शेषत्वं च प्रतीयते । यथा कर्त्राभिप्राये क्रियाफलइति कर्तुः शेषित्वं क्रियाफलस्य शेषत्वं च । न चेह ग्रामं प्रत्यजा शेषभूता तथा च प्रयोजकलक्षणे प्रासनवन्मैत्रावरुणाय दण्डप्रदानामित्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति दण्डदानं न प्रतिपत्तिः । किन्तु द्वितीयापेक्षया बलीयस्या चतुर्थीश्रुत्या ऽर्थ-

कर्मेत्युक्तम् । अत्र वार्त्तिकं, क्रियाग्रहणं कर्तव्यम् । पत्ये शेते । भाष्यकारास्तु सन्दर्शनप्रार्थनाध्यवसायैराप्यमानत्वात्क्रियापि कृत्रिमं कर्म । तथा च सूत्रेणैव सिद्धम् । प्रतीयमानक्रियापेक्षोपि हि कारकभावो भवत्येव । प्रविश पिण्डीमिति वत् । सूत्रकारश्चाह क्रियार्थोपपदस्य च कर्मणि स्थानिन इति । न चैवमप्यददातिकर्मत्वात् क्रियाग्रहणं कर्तव्यमेवेति वाच्यम् । भाष्ये अन्वर्थसंज्ञात्वास्वीकारात् । नन्वेवं कटङ्करोतीत्यादावपि सम्प्रदानत्वं स्यात् । वचनबलाच्च कर्मसम्प्रदानत्वयोः पर्यायप्रसङ्गः । अत्राहुः । नेदं वार्त्तिकं सार्वत्रिकम् । किन्तु प्रयोगानुसाराच्छ्रियतविषयं धातूपात्तफलानाधारएव प्रवृत्तेः । भाष्यमते तु यत्र सम्प्रदानत्वविष्टं तत्र सन्दर्शनादीनां क्रियायाश्च भेदो विवक्ष्यते । ततश्च तैराप्यमाना क्रियापि कृत्रिमं कर्मेति सिद्धन्तयाऽभिप्रेयमाणस्य सम्प्रदानत्वम् । यत्र तन्नेष्टं तत्र भेदो न विवक्ष्यते । ततश्चोत्पत्तिविक्लित्त्याद्येकफलावच्छेदेनैकीकृतया क्रियया व्याप्यमानस्य कर्मत्वमेव भविष्यति। कटङ्करोत्योदनं पचतीति गत्यर्थेषु तु भेदो ऽभेदश्चेत्युभयं विवक्ष्यते तत्र भेदविवक्षायां ग्रामाय गच्छतीति प्रयोगः अभेदविवक्षायान्तु ग्रामं गच्छतीति तथा च गत्यर्थकर्मणीति सूत्रं प्रत्याख्यास्यते । उक्तञ्च हरिणा । भेदस्य च विवक्षायां पूर्वां पूर्वां क्रियां प्रति । परस्याङ्गस्य कर्मत्वात्तत्क्रियाग्रहणं कृतम् ॥ क्रियाणां समुदाये तु पदैकत्वं विवक्षितम् । तदा कर्मक्रियायोगात्स्वाख्ययैवोपचर्यते ॥ भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता । तस्माद्गत्यर्थकर्मत्वे व्यभिचारो न दृश्यते ॥ विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि । आरम्भेण न योगस्य प्रत्याख्यानं सदं भवेदिति ॥ अस्यार्थः । कर्म स्वाख्ययैव क्रियेप्सितत्वप्रयुक्तकर्मसंज्ञयैवोपचर्यते व्यवह्रियते । न

तु सम्प्रदानसंज्ञया गत्यर्थकर्मणि तु भेदाभेदौ द्वावपि विवक्ष्येतइति रूपद्वयसिद्धिः । व्यभिचारो ऽतिप्रसङ्गस्तु न दृश्यते । विवक्षाया व्यवस्थितत्वादेव । एतदेव द्रढयति विकल्पेनेति । समं तुल्यफलकम् । तस्मात्सूत्रं प्रत्याचक्षाणस्य भगवतो विवक्षानियमोभिमतः गत्यर्थेषु विवक्षाद्वयम् । पत्ये शेतइत्यादौ तु भेदविवक्षैव ओदनं पचतीत्यादावभेदविवक्षैव चेष्टायामनध्वनीत्येतत्प्रत्युदाहरणयोरपि अभेदाविवक्षैव मनसा हरिं वृजति अध्वानं गच्छतीति त्रिधा चेदम् । यदाह, अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणोप्सितम् । प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानतामिति । अनिराकर्तृ यथ । सूर्यायार्घ्यं ददाति । नात्र सूर्यः प्रार्थयते न वानुमन्यते न च निराकारोति । प्रेरकं यथा । विप्राय गां ददाति । अनुमन्तृ यथा । उपाध्यायाय गां ददाति । ननु दानस्य तदर्थत्वात्तादर्थ्ये चतुर्थी सिद्धैव तत्किं सम्प्रदानसंज्ञया । मैवम् । दानाक्रियार्थं हि सम्प्रदानं न तु दानक्रिया तदर्था कारकाणां क्रियार्थत्वात् । सम्प्रदानार्थं तु दीयमानं कर्मेति वाक्यार्थभूतापादानाक्रियाया अतादर्थ्यात्तादर्थ्यचतुर्थ्या अप्राप्तौ संज्ञारम्भादिति हेलाराजः । तदेतत्सूचितम् । त्यागाङ्गं कर्मणोप्सितमिति । कर्मसम्प्रदानयोः करणकर्मत्वे वाच्ये । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः । एतच्च वचनं उक्तोदाहरणमात्रविषयम् । अत एव सुब्व्यत्ययेन सिद्धत्वात्प्रत्याख्यायते । लोके तु यजेः पूजार्थत्वात्पशोः करणत्वं सिद्धम् ॥

रुच्यर्थानां प्रीयमाणः ॥ सम्प्रदानं स्यात् ॥ देवदत्ताय रोचने स्वदते मोदकः । अत्राह हरिः । हेतुत्वे कर्मसंज्ञायां शेष-

त्वे वापि कारकम्। रुच्यर्थादिषु शास्त्रेण सम्प्रदानाख्यमुच्यते॥ अस्यार्थः। अन्यसमवेतोभिलाषो रुच्यर्थः। रोचते। अभिलाषविषयो भवतीत्यवगमात्। विषयीभवन्तं मोदकं देवदत्तः प्रयुङ्क्ते। लौल्यात्तदानुगुण्यमाचरतीति देवदत्तस्य हेतुसंज्ञायां प्राप्तायां सम्प्रदानसंज्ञा कथ्यते। तथा च हेतुसंज्ञाविरहे णिजभावाद्धेतुसमवायिन्या द्वितीयस्याः क्रियाया अप्रतीतेर्मोदकः स्वक्रियायां धातुवाच्यायां कर्ता भवति न तु कर्म। यदा तु रोचते प्रीणयतीत्यर्थः तदा कर्मसंज्ञायां प्राप्तायां वचनम्। तथा च प्रीयमाण इति विशेषणम्। प्रीञ् तर्पणइत्यस्मात्सकर्मकात्कर्मणि लट्। दैवादिकस्तु ञिदकर्मकः। तर्प्यमाण इत्यर्थः। यत्तु समर्थसूत्रे रोचयामहइति हरदत्तेन प्रयुक्तं तदस्मिन्नेव पक्षेध्यारोपितप्रेषणपक्षमाश्रित्येत्यवधेयम्। यदा तु देवदत्तस्य योभिलाषस्तद्विषयो भवतीत्यर्थस्तदा शेषत्वात्षष्ठ्यां प्राप्तायां वचनमिति। प्रीयमाणः किम्। देवदत्ताय रोचते मोदकः पथि। कर्मादाविवाधिकरणे मा भूत्। अत एवादित्यो रोचतइत्यत्र दीप्त्यर्थे संज्ञा न भवति॥

श्लाघन्हूङ्स्थाशपां ज्ञीप्स्यमानः॥ एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात्। देवदत्ताय श्लाघते। श्लाघा स्तुतिः। देवदत्तं स्तौतीत्यर्थः। एवं हि देवदत्तः शक्यते ज्ञापयितुम्॥ अन्ये त्वाहुः॥ देवदत्तायात्मानं परं वा। श्लाघ्यं कथयतीत्यर्थ इति। तथा च भट्टिकाव्यम्। श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसाधिप इति। आत्मानं श्लाघ्यं परस्त्रीभ्यः कथयन्नित्यर्थः। तत्राद्ये पक्षे कर्मत्वे प्राप्ते द्वितीये तु कारकशेषत्वात् षष्ठ्यां प्राप्तायां वचनम्। ह्नौतिप्रभृतयोत्रैस्वार्थोपसर्जनज्ञापनावचनत्वात्सकर्मकाः। तथा च ज्ञीप्स्यमान इति सं-

ज्ञिविशेषणमुपात्तमिति हेलाराजः। देवदत्ताय न्हुते देवदत्तं न्हुवानस्तामेव न्हुतिं तमेव बोधयति। सन्निहितमपि देवदत्तं धनिकादेरपलपतीत्यर्थः। अथवा न्होतव्यं देवदत्तं बोधयतीत्यर्थः। देवदत्ताय तिष्ठते, ईदृशोहमित्यवस्थानेन बोधयतीत्यर्थः। देवदत्ताय शपते, शपथेन किञ्चित्प्रकाशयतीत्यर्थः। ज्ञीप्स्यमानग्रहणादेवदत्तः श्लाघते। गार्गीकया श्लाघते पथीत्यादौ कर्त्रादिविषये संज्ञा न भवति। ज्ञीप्स्यमाने विवदन्तइति शप उपालम्भइति वार्त्तिकोदाहरणव्याख्यायां कैयटः। तत्र यस्मा आख्यायते स ज्ञीप्स्यमान इति मते तु यस्मा आख्यायमानः प्रत्युदाहरणं तस्माद् द्वितीया देवदत्तं श्लाघत इति। आख्यायमानो ज्ञीप्स्यमान इति मते तु यस्मा आख्यायते स प्रत्युदाहरणम्। तस्माच्च षष्ठी। देवदत्ताय श्लाघते विष्णुमित्रो यज्ञदत्तस्येति। ज्ञपामिच्चेति चुरादिकात्सनि कर्मणि ज्ञानचि ज्ञीप्स्यमान इति रूपं बोध्यम्। न तु ज्ञाधातोः। तस्य बोधने मित्वाभावात्। तज्ज्ञापयतीत्यादिभाष्यप्रयोगात्। अत एव मारणतोषणेत्यत्र निशानेष्विति पाठो न तु निशामनेष्विति। निशानं तनूकरणम्। श्यतेर्ल्युट्। संज्ञपितः पशुरित्युदाहरणम्। आप्ज्ञाप्यृधामीदित्यत्र तूभयोरपि ज्ञप्योर्ग्रहणमिति सिद्धान्तः। चौरादिकश्च मारणतोषणनिशामनेषु वर्त्ततइति माधवः॥

धारेरुत्तमर्णः॥ अयमुक्तसंज्ञः स्यात्। धृङ् अवस्थाने। ण्यन्तः। उत्तमर्णो धनस्वामी। उत्कृष्टार्थवृत्तेरुच्छब्दात्तमपि द्रव्यप्रकर्षत्वादाधमभावः। अर्तेक्तः। ऋणम्। ऋणमाधमर्ण्यइत्यत्र कालान्तरदेयद्रव्यविनिमयोपलक्षणार्थमाधमर्ण्यग्रहणम्। तेनोत्तमर्णेपि नत्वं भवति। अस्मादेव निपातनान्निष्ठान्तस्य परनिपातो बहुव्रीहौ बोध्यः। देवदत्ताय शतं धारयति। म्रियमाणं

स्वरूपेणावातिष्ठमानं स्वभावादप्रच्यवमानं शतं प्रयुङ्क्तइत्यर्थः। कारकशेषे षष्ठ्यां प्राप्तायामिदं वचनम्। उत्तमर्णः किम्। देवदत्ताय शतं धारयति ग्रामे। परत्वादिहाधिकरणसंज्ञा भविष्यतीति चेत्। उत्तमर्णेपि तर्हि हेतुसंज्ञा स्यात्॥

स्पृहेरीप्सितः॥ स्पृह ईप्सायां चुरादावदन्तः। अस्य प्रयोगे ऽभिप्रेतः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितमात्रे इयं संज्ञा। प्रकर्षे विवक्षायान्तु परत्वात्कर्मसंज्ञा। पुष्पाणि स्पृहयति। यदा त्वीप्सितमीप्सिततमं वा शेषत्वेन विवक्षितं तदा षष्ठ्येवेति हरदत्तादयः। हेलाराजस्तु हेतुत्वे कर्मसंज्ञायामिति प्रागुक्तश्लोकव्याख्यावसरे स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्च बाधिकेयं सम्प्रदानसंज्ञेत्याह। वाक्यपदीयस्वरसोप्येवम्। अस्मिन्पक्षे परस्परेण स्पृहणीयशोभमिति कर्मण्यनीयर् दुर्लभः। दानीयो विप्र इतिवत्सम्प्रदानएव तु व्याख्येयः। तथा कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति चेति षष्ठ्यप्यसङ्गता। विभक्तिविपरिणामेन कान्ताय स्पृहयन्तीति तु व्याख्येयम्। हरदत्तमते तु यथाश्रुतावेव उक्तप्रयोगौ निर्बाधाविति॥

क्रुधद्रुहेर्ष्यासूयार्थानां यम्प्रति कोपः॥ क्रोधाद्यर्थानां धातूनां प्रयोगे यं प्रति कोपस्तत्कारकं सम्प्रदानं स्यात्। देवदत्ताय क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा। वाक्चक्षुरादिविकारानुमेयः प्ररूढः। कोपोत्र क्रोधः। अपकारो द्रोहः। असहनमीर्ष्या। गुणेषु दोषारोपणमसूया। ननु चित्तदोषार्थानामित्येवास्तु किंक्रोधादीनां विशिष्योपादानेनेति चेन्न। द्विषादावतिप्रसङ्गात्। योस्मान्द्वेष्टीत्यादौ ह्यनभिन्दनं द्विषेरर्थः। अत एवाचेतनेष्वपि प्रयुज्यते औषधं द्वेष्टीति। यंप्रतीत्यादि किम्। भार्या-

मीर्ष्यति । मैनामन्योद्राक्षीदिति । नात्र भार्याम्प्रति कोपः किन्तु परैर्दृश्यमानां तां न क्षमतइत्येव । क्रुधद्रुहोरकर्मकतया कारकशेषत्वान्नटस्य शृणोतीतिवत् षष्ठ्यां प्राप्तायां वचनम् । इतरयोस्तु सकर्मकत्वात् द्वितीयायां प्राप्तायाम् ॥

क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् । पूर्वसूत्रापवादः । देवदत्तमभिक्रुध्यति अभिद्रुह्यति ॥

राधीक्ष्योर्यस्य विप्रश्नः ॥ एतयोः कारकं सम्प्रदानसंज्ञं स्यात् । यदीयो विविधः प्रश्नः क्रियते । कृष्णाय राध्यति ईक्षते वा । पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः । शुभाशुभपर्यालोचनमिह धात्वर्थः । शुभाशुभरूपयोः कर्मणोर्धात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ । षष्ठ्यां प्राप्तायां वचनम् । अत एव राध्यतीति श्यन् । अकर्मकादेव तद्विधानात् । तथा च दिवाद्यन्तर्गणसूत्रं राधोकर्मकाद्वृद्धावेवेति । अस्यार्थः । एवकारो भिन्नक्रमः । राधोकर्मकादेव । यथा वृद्धाविति । अत एव कर्मवत्कर्मणेति सूत्रे राध्यत्योदनः स्वयमेवेति भाष्यं सङ्गच्छते । तत्र हि सिध्यतीत्यर्थः । एतेन न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति । क्रियासमभिहारेण विराध्यन्तं क्षमेत क इति माघमयूगौ व्याख्यातौ । एतेनैतयोः कर्मकारकं सम्प्रदानं स्यादिति व्याचक्षाणाः परास्ताः । यस्येत्यनर्थकं यम्प्रतीत्यनुवृत्त्यैवेष्टसिद्धेः ॥

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे वर्त्तते तस्य पूर्वो व्यापारः प्रवर्त्तनक्रिया तस्याः कर्त्ता सम्प्रदानं स्यात् । विप्राय गां प्रतिशृणोति आशृणोति वा । विप्रेण मह्यङ्गां देहीति प्रवर्त्तितः प्रतिजानीतइत्यर्थः । हेतुसं-

ज्ञायां प्राप्तायां देवदत्तेन प्रतिशृणोतीति प्रयोगनिवृत्तये वचनम्। विवक्षान्तरे तु देवदत्तो गां प्रतिश्रावयतीति भवत्येवेति हरदत्तः। अत्रेदं चिन्त्यम्। उक्तरीत्या देवदत्तो रोचयति मोदकमित्यपि प्रयोगो दुर्वारः। न चेष्टापत्तिः। तत्रत्यस्वग्रन्थेन हेलाराजग्रन्थेन च विरोधात्तत्र हेतुत्वबाधान्न णिजिति यदि तर्हि प्रकृतेपि तुल्यम्। तस्मादिह वैषम्यं दुर्वचमिति॥

अनुप्रतिगृणश्च॥ अनुपूर्वस्य प्रतिपूर्वस्य गृणातेः कारकं पूर्वस्य कर्तृभूतं सम्प्रदानं स्यात्। अनुप्रतिभ्यां गृणाः अनुप्रतिगृणाः तस्येति विग्रहः। अनुप्रतिपूर्वश्च गृणातिः शंसितुः प्रोत्साहने वर्त्तते तत्र पूर्वो व्यापारः शंसनम्। होत्रे अनुगृणाति प्रतिगृणाति वा। होता प्रथमं शंसति तमध्वर्युः ओथामोदेवेत्यादिभिः शब्दैः प्रोत्साहयतीत्यर्थः॥

साधकतमं करणम्॥ क्रियायां प्रकृष्टोपकारकं करणसंज्ञं स्यात्। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत्प्रकृष्टम्। उक्तञ्च। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतमिति। काष्ठैः पचति। विवक्ष्यतइत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीत्युक्तम्। आह च, वस्तुतस्तदनिर्देश्यं न हि वस्तुव्यवस्थितम्। स्थाल्यापच्यतइत्येषा विवक्षा दृश्यते यतः॥ ननु कारकाधिकारादेव सिद्धे साधकत्वे पुनः श्रुतिः प्रकर्षार्थास्तु किं तमपा, सत्यम्। अस्मिन्प्रकरणे सामर्थ्यगम्यप्रकर्षो नाश्रीयतइति ज्ञापयितुं तमप्। तेन गङ्गायां घोष इति सिद्धम्। यदा च तीरधर्म आधारत्वं प्रवाहे उपचर्यते तदेदं प्रयोजनं। यदा तु गंगाशब्द एव तीरे वर्त्तते तदा न प्रयोजनम्। तत्राद्ये विभक्तिर्लाक्षणिकी। सुब्विभक्तौ न लक्षणेति तु येनविधिरिति सूत्रएव निराकृतम्। द्वितीये तु प्रकृति-

र्लाक्षणिकी । ननु उभयं मुख्यमस्तु परंपरासम्बन्धस्तु संसर्गः । मैवम् । कारकविभक्त्यर्थानां प्रकृत्यर्थे साक्षात्सम्बन्धेन विशेष्यतायाः व्युत्पन्नत्वात् । अपादानप्रकरणोक्तानि च बहून्युदाहरणानि तमब्ग्रहणस्य प्रयोजनानीति बोध्यम् ॥

दिवः कर्म च ॥ दिवः साधकतमं कर्मसंज्ञं स्यात्, चकारात्करणसंज्ञम् । करणशब्दानुवृत्त्या वक्ष्यमाणस्यान्यतरस्यांग्रहणस्याकर्षणेन वा संज्ञयोः पर्याये लब्धे समावेशार्थश्चकारः । तेन मनसा दीव्यतीति मनसा देव इत्यत्र कर्मण्यण् करणे तृतीया चेत्युभयं सिध्यति । मनसः संज्ञायामित्यलुक् । किञ्च अक्षैर्देवयते यज्ञदत्तेनेत्यत्र सकर्मकत्वादणि कर्तुर्णौ कर्मत्वं न । अणावकर्मकादिति परस्मैपदं च नेति दिक् । स्यादेतत् । यदि समावेशः, तर्हि अक्षान् दीव्यतीत्यत्र परत्वात्तृतीया स्यात् । तथाहि । करणसंज्ञाया अवकाशः देवना अक्षाः । करणे ल्युट् । कर्मसंज्ञाया अवकाशः । दीव्यन्ते अक्षाः । भावकर्मणोरिति यगात्मनेपदे । अक्षानित्यत्र तूभयसंज्ञाप्रयुक्तकार्यप्रसङ्गे परत्वात्तृतीयैव प्राप्नोति । अत्राहुः । कार्यकालपक्षे कर्मणि द्वितीयेत्यत्र पदस्योपस्थानं तस्यानवकाशत्वात् द्वितीयेति । ननु दीव्यन्ते अक्षा इत्यत्र कर्मण्यभिहितेपि करणत्वस्यानभिधानात्तृतीया स्यात् । तथा देवना अक्षा इति ल्युटा करणस्याभिधानेपि कर्मणोनभिधानात् द्वितीया स्यात् । मैवम् । एकैव ह्यत्र शक्तिः संज्ञाद्वययोगिनी । तथा चोभयत्राप्यभिधानमेव न त्वनभिहितत्वम् ॥

परिक्रयणे सम्प्रदानमन्यतरस्याम् ॥ नियतकालं वेतनादिना स्वीकरणं परिक्रयणं तस्मिन् साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात् । शताय शतेन वा परिक्रीतः । परिशब्दः सामीप्यं

द्योतयति । क्रयोनामात्यान्तिकं स्वीकरणं, नियतकालन्तु तस्य समीपामिति भावः ॥

आधारोधिकरणम् ॥ आश्रियन्तेस्मिन् क्रिया इत्याधारः । अध्यायन्यायोद्यावित्यादिना करणे घञ् । क्रियाश्रययोः कर्तृकर्मणोर्द्वारणात् । परंपरया क्रियां प्रति आधारः तत्कारकमधिकरणं स्यात् । कटे आस्ते । स्थाल्यां पचति । स्यादेतत् । साक्षात्क्रियाधारयोः कर्तृकर्मणोरेव कुतो नेयं संज्ञेति चेन्न । पराभ्यां कर्तृकर्मसंज्ञाभ्यां बाधितत्वात् । अत एवाहुः । कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् । उपकुर्वत्क्रियासिद्धौ शास्त्रेधिकरणं विदुरिति ॥ अत एव भूतले घट इत्यादौ अस्तीत्यस्याध्याहारो नियतः । यथापुष्पेभ्य इत्यत्र स्पृहयतेः । अत एव च नञा सह कारकान्वयं वदन्तः परास्ताः । त्रिविधं चैतदधिकरणमिति संहितायामिति सूत्रे भाष्यं, औपश्लेषिकं वैषयिकमभिव्यापकञ्चेति । कटे आस्ते गुरौ वसति तिलेषु तैलामिति ॥

अधिशीङ्स्थासां कर्म ॥ अधिपूर्वाणामेषां आधारः कर्म स्यात् । अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः ॥

अभिनिविशश्च ॥ एतत्पूर्वस्य विशतेराधारः कर्म स्यात् । ग्राममभिनिविशते । अभिनिवेश आग्रहः । तद्वान् भवतीत्यर्थः । अकर्मकोयं तत्राधिकरणस्य कर्मसंज्ञा विधीयते । प्रवेशनार्थे तु सिद्धैव । परिक्रयणेसम्प्रदानमिति सूत्रादिहान्यतरस्यांग्रहणमनुवर्त्तते मण्डूकप्लुतिन्यायेन । व्यवस्थितविभाषा चेयम् । एष्वर्थेष्वभिनिविष्टानामिति समर्थसूत्रस्थभाष्यप्रयोगश्चेह मानम् । तेन पापेभिनिवेश इत्यादि सिद्धम् । इह सूत्रे नेरल्पाच्तरस्य परनिपातकरणमीदृशानुपूर्वीकसमुदायविवक्षार्थम् । तेनेह न । निविशते यादि शूकशिखापदे इति । कर्मत्वविवक्षायान्तु तत्रापि

भवितव्यमेव द्वितीयया ॥

उपान्वध्याङ्वसः ॥ एतत्पूर्वकस्य वसतेराधारः कर्म स्यात् । उपवसति अनुवसति अधिवसत्यावसति वा ग्रामं सेना । वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः ॥ अर्थशब्दो निवृत्तिवचनः । व्यधिकरणे षष्ठ्यौ । वाच्यवाचकभावः षष्ठ्यर्थः । भोजननिवृत्तेर्वाचको यो वसिस्तस्य नेत्यर्थः । ग्रामे उपवसति । कथमुपोष्य रजनीमेकामिति । कालाध्वनोरिति द्वितीया भविष्यति । कथमेकादश्यां न भुञ्जीतेति । उपपदविभक्तेः कारकविभक्तिर्भविष्यति ॥

कर्तुरीप्सिततमं कर्म ॥ कर्त्रा यदाप्तुमिष्यते तमान्तत्कर्मसंज्ञं स्यात् । यद्व्यापाराश्रयत्वादसौ कर्ता तेनैव व्यापारेणाप्तुमिष्टमिति सन्निधानाल्लभ्यते । तेन क्रियाफलशालित्वं पर्यवस्यति । क्रिया हि फलेच्छापूर्वकेच्छाविषयः फलमेव त्विष्टतमम् । तच्च धातुनोपात्तमिति तद्विशिष्टत्वेनेच्छाविषयोत्र संज्ञी । स च त्रिविधः । उत्क्रुञ्च । निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम् । तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् ॥ औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् । संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥ तथा । यदसज्जायते सद्वा जन्मना यत्प्रकाशते । तन्निर्वर्त्यं विकार्यन्तु कर्म द्वेधा व्यवस्थितम् ॥ प्रकृत्युच्छेदसंभूतं किञ्चित्काष्ठादि भस्मवत् । किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ तत्र निर्वर्त्यं यथा । घटं करोतीति । घटोह्यसन्नेव जायते वैशेषिकादिमते । सङ्ख्यादिसत्कार्यवादिमते तु सन्नेवाभिव्यज्यते इत्यस्ति विशेषलक्षणम् । सामान्यलक्षणन्तु कृधातूपात्तोत्पत्त्या-

रूयफलशालित्वात्। एतेन करोतिर्यत्नार्थक इति मतं प्रत्युक्तम्। यततइतिवदकर्मकतापत्तेः। न च जानातिवद्विषयत्वापादनपर्यंतार्थाभ्युपगमेनापि निर्वाहः। लाघवेनोत्पादनमात्रपरत्वात्। कर्तृस्थक्रियतया कर्मवद्भावासिद्धिप्रसङ्गाच्च। प्रकृतेः प्रकृतिभूतस्यात्मन उच्छेदं सम्भूतं प्राप्तम्। तद्यथा, काष्ठं भस्म करोतीति। गुणान्तरोत्पत्त्या यथा, सुवर्णं कुण्डलं करोतीति। इह भस्मकुण्डलयोर्निर्वर्त्यत्वमेवेति बोध्यम्। प्राप्यन्तु आदित्यं पश्यतीति। तथायुक्तमिति द्विविधम्। द्वेष्यमितरच्च। अकथितं चेत्यपरम्। संज्ञान्तरप्रसङ्गे चान्यत्। दिवः कर्मचेत्यादि। तदित्थंसप्त विधं कर्मेति स्थितम्। इह प्राप्ये यद्यपि विषयताख्यः क्रियाकृतविशेषोस्त्येव। अन्यथा कर्मत्वानुपपत्तेः। तथापि प्रतिपत्तृव्यतिरिक्तपुरुषापेक्षया विशेषो न गम्यतइत्युक्तम्। विकार्ये तु काष्ठादौ कथं धातूपात्तफलाश्रयतेत्यवशिष्यते। तत्रेदं तत्त्वम्। प्रकृतिविकृत्योरभेदविवक्षया निरूढया उत्पत्त्याश्रयता। यद्वा। काष्ठानि विकुर्वन् भस्मोत्पादयतीत्यर्थः। तण्डुलान् विक्लेदयन्नोदनं निर्वर्त्तयतीतिवत्। एतच्च व्यर्थः पचिरिति प्रक्रम्य भाष्ये व्युत्पादितम्। तत्र तण्डुलानोदनं पचतीति प्रयोगे तण्डुलनिष्ठविक्लित्तेरोदनोत्पत्तेश्चानुकूलो देवदत्तनिष्ठव्यापार इत्यर्थः। तण्डुलान्पचतीत्यत्र तु विक्लेदयतीत्यर्थः। ओदनं पचतीत्यत्र तु विक्लित्त्या निर्वर्तयतीत्यर्थः। उक्तंच। सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः। तदेकांशनिवेशे तु व्यापारोस्या न विद्यतइति॥ तस्माद्धातुत्वेन धातूपात्तां भावनां प्रति पचित्वेन पच्युपात्ता विक्लित्तिः कर्मतया करणतया वा यथायथं सम्बध्यतइति स्थितम्। इदं त्ववधेयम्। क्रियाया धातुना कर्तुरपि देवदत्तादिशब्देन लाभाद्यथा न द्वितीयार्थेन तथेष्टनप-

त्वादेरपि प्रयोगोपाधिमात्रत्वात् । अधिशीङादिवत् । एवञ्च तथायुक्तस्थलइवेहापि धातूपात्तफलाधारमात्रमर्थः । आधेयमेव वा । तच्चाभेदेन फलेन्वेति । अनन्यलभ्यः शब्दार्थ इति न्यायात् । अन्यथा तथायुक्तत्वानीप्सितत्वयोरपि वाच्यतापत्तौ सकलतान्त्रिकविरोधाच्च । एवन्तु फलाश्रयः कर्मेत्येवास्तां किं द्विसूत्र्येत्यवशिष्यते । तत्रेदमुत्तरम् । अग्नेर्माणवकं वारयतीत्यत्र माणवकस्य अपादानसंज्ञां बाधितुमीप्सिततममिति तावद्वक्तव्यं, तस्मिंश्चोक्ते द्वेष्योदासीनयोः सङ्ग्रहार्थं तथायुक्तमित्यपि सूत्रणीयम् । अनीप्सितग्रहणन्तु शक्यं प्रत्याख्यातुम् । तथा च कर्तृकर्मविभक्त्योरुभयोरप्याधारो वाच्यः । आधेयं वा । व्यापारेण फलेन चान्वय इति तु व्यवस्थया शब्दबोधवैषम्यमिति स्थितम् । गोदोहनी पक्का पक्व इत्यादिकृदन्तानां नामार्थे ऽभेदान्वयानुरोधादाधार एवार्थः फलभावनयोस्तु विशेषणविशेष्यभावो विपरीत इत्यवधेयम् ॥

तथायुक्तञ्चानीप्सितम् ॥ ईप्सिततमक्रियया युक्तमनीप्सितमपि कर्मसंज्ञं स्यात् । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । चौरान् पश्यति ॥

अकथितञ्च ॥ अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् । नटस्य शृणोतीत्यादावतिप्रसङ्गं वारयितुं परिगणनं कर्तव्यम् । दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशासिगुणेन च यत्सचते तदाकीर्तितमाचरितं कविना ॥ नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं कर्तव्यमिति निश्चयः ॥ इह प्रच्छीत्यत्र छेचेति तुङ् न कृतः । आगमशासनस्यानित्यत्वात् सनाद्यन्ताधातव इको यणचीतिवत् । उपयुज्यतइत्युपयोगो मुख्यं कर्म क्षीरा-

दि तस्य निमित्तं गवादि दुह्यादीनां मुख्यकर्मणा सम्बध्यमानमिति यावत्। तथा ब्रुविशास्योर्गुणेन कारकेण कर्मणेति यावत्। कारकाणां क्रियां प्रति विशेषणत्वात्। तत्रापि कर्मण एव प्रकृतत्वात्। यत्सचते सम्बध्यते। षच समवाये। स्वरितेत्। के चित्तु परस्मैपदिभिः सहैनं धातुं पठन्ति। षच समवाये, रप लप व्यक्तायां वाचीति। तन्मते षच सेवनइत्यस्यानुदात्तेतो धातूनामनेकार्थत्वात्समवाये वृत्तिर्बोध्या। उभयथापि सम्बध्नातेः कर्मव्यापारे सचिर्वर्तते। अत एव कर्तृपदस्य कर्मपदेनार्थकथनं न विरुध्यते। राध्यत्योदन इत्यस्य पच्यतइत्यनेन यथा उभयत्राप्योदनानिष्ठाविक्लित्तेर्भानाविशेषात्। कविना मेधाविना सूत्रकारेण तदकीर्तितमित्याचरितं व्यवहृतमित्यर्थः। अपूर्वविधाविति। पूर्वोक्तानामपादानादिसंज्ञानां विषयश्चेन्नास्तीत्यर्थः। न चैवं वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषयेतिप्रसङ्गः स्यादिति वाच्यम्। एकसंज्ञाधिकारेण पराभ्यां हेतुकर्तृसंज्ञाभ्यां कर्मसंज्ञाया बाधात्। प्राञ्चस्तु पूर्वग्रहणमन्यमात्रोपलक्षणं तेन वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषये नातिप्रसङ्गः। सूत्रेष्यकथितमिति कथननिवृत्तिपरायान्नोदनायां भूतकालो न विवक्ष्यते। यथा पराजेरसोढ इत्यत्रासहिष्यमाणस्याप्यपादानसंज्ञा भवति अध्ययनात्पराजिष्यतइति तथेहापीत्याहुः। तच्चिन्त्यम्। उक्तरीत्या यथाश्रुतेपि सर्वसामञ्जस्यात्। नीवह्योरिति श्लोके गत्यर्थानामित्युत्तरसूत्रोपात्तानामुपलक्षणम्। चकारेण जयत्यादयो गृह्यन्तइति कैयटः। माधवोप्याह। जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेःपचेः। तारेर्ग्रहेस्तथा मोचेस्त्याजेर्दण्डेश्च सङ्ग्रहः॥ कारिकायाञ्चशब्देन सुधाकरमुखैः कृत इति। एतान्निष्कर्षस्तु करिष्यते। क्रमेणोदाहरणानि। गान्दो-

ग्धि पयः । अविनीतं विनयं याचते । गामवरुणद्धि व्रजम् । माणवकं पन्थानं पृच्छति । पौरवं गां भिक्षते । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते शास्ति वा । अजां नयति ग्रामं, वहति भारं ग्रामं हरति वा, गमयति ग्राममित्यादि । जयतेः । शतं जयति देवदत्तम् । कर्षति शाखां ग्रामम् । क्षीरधिं सुधां मथ्नाति । मुष्णाति शतं देवदत्तेन । गर्गान् शतं दण्डयति । तण्डुलानोदनं पचति, तारयति कपीन् समुद्रम् । ग्राहयति बटुनेदम् । मोचयति त्याजयति वा कोपं देवदत्तम् । दीपयति शास्त्रार्थं शिष्यान् । स्यादेतत् । दुहादीनामर्थानिबन्धनेयं संज्ञा न तु स्वरूपाश्रया, अहमपीदमचोद्यं चोद्ये इति तद्राजसूत्रभाष्ये पृच्छिपर्यायस्य चुदेरपि द्विकर्मकत्वदर्शनात् । तथा च भट्टिः । स्थास्नुं रणे स्मेरमुचो जगाद मारीचमुच्चैर्वचनं महार्थम् । कालिदासोपि, शिलोच्चयोपि क्षितिपालमुच्चैः । प्रीत्या तमेवार्थमभाषतेवेति भारविश्च । उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्र इति । तथा च भिक्षेरर्थपरत्वाद्याचेरपि सिद्धम् । तुल्यार्थत्वात् । पौरवं गामर्थयतइति यथा, तर्हि पाचेः पृथग्ग्रहणेनेति चेत्, अत्राहुः । अनुनयार्थोत्र याचतिः । विनयं याचते । विनयायानुनयनीत्यर्थात् । अस्तु तर्हि याचेरेव ग्रहणम् । तस्यानेकार्थत्वाद्भिक्षेरपि सिद्धमिति चेन्न । अर्थभेदेन शब्दभेद इति दर्शनमाश्रित्यानुनयार्थस्यैव पाचेरिह ग्रहणात् । अत एव हि नयतिग्रहणेनानुनयार्थस्यापि न गतार्थता । स्पष्टार्थं भिक्षेः पृथग्ग्रहणमित्यन्ये । चकारेण पचेर्ग्रह इति यन्माधवादिभिरुक्तं तन्मतभेदेन । तथा च कर्मवत्कर्मणेति सूत्रे दुहिपच्योर्बहुलं सकर्मकयोरितिवार्तिकव्याख्यावसरे पचेर्द्विकर्मकता कैयटेन स्फुटीकृता । यत्तु कर्तुरीप्सिततममिति सूत्रे द्व्यर्थः पचिरित्यादिभाष्यन्तत्तु

मतान्तरेण । अन्यथा तण्डुलानोदनं पचतीति प्रयोगस्य यथाश्रुतस्योपपत्तौ किं मुधा क्लेशेन । अत एव अकथितशब्दो यद्यप्रधानार्थो गृह्येत तदा पाणिना कांस्यपात्र्यां दोग्धि पय इति पाणिकांस्यपात्र्योरतिप्रसङ्गः करणाधिकरणयोस्तु पचत्यादिरवकाशः, न हि तत्रास्य प्रसङ्गो दुहादिपरिगणनादित्यकथितसूत्रे कथयतः कर्मवत्सूत्रे तु पचेर्द्विकर्मकर्तां ब्रुवतो हरदत्तस्य न पूर्वापरविरोधः । मतभेदपरत्वात् । अत एव पचिधातुनिरूपणे तण्डुलानोदनं पचतीति प्रयोगं द्विकर्मकतयैव माधव उदाहृतवानिति दिक् । तथा ग्राहेर्द्विकर्मकत्वं बहवो न मेनिरे । अत एव तमादौ कुलविद्यानामर्थमर्थविदां वरः । पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पितेति कालिदासश्लोके पूर्वार्धे ग्रहेर्दुह्यर्थतया गतिबुद्धीतिसूत्रेणाणौ कर्तुर्णौ कर्मत्वात्तमिति योजयित्वा उत्तरार्धे तेनेति विभक्तिविपरिणामेन व्याचख्युः । अत एव च अजिग्रहत्तं जनको धनुस्तद्येनार्दैदैत्यपुरं पिनाकी । जिज्ञासमानो बलमस्य बाह्वोर्हसन्नभांक्षीद्रघुनन्दनस्तदित भट्टिप्रयोगो जयमङ्गलायामित्थं व्याख्यातः । अजिग्रहत् । अनेन धनुषा भगवता त्रिपुरदाहः कृत इति बोधितवानिति । युक्तञ्चैतत्, श्रीरघुपतिं प्रति नियोगकथनानौचित्येन स्वरूपोपस्थापनस्यैव कर्तव्यत्वात् । एतेन अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेति व्याख्यातम् । ग्रहेर्बुद्ध्यर्थत्वात् । यद्वा । इषिशक्योस्तुमुनन्तसमभिव्याहृतयोर्द्विकर्मकतायाः भाष्ये स्थितत्वात्सिद्धमेतदिति माधवः । ग्राहेर्द्विकर्मताभ्युपगमपक्षे तु जायाप्रतिग्राहितगन्धमाल्यामिति न सिध्येत् । तत्र हि ण्यन्ते कर्तुश्च कर्मण इति प्रयोज्ये धेनुरूपे कर्मणि क्तः स्यात् । तथा च जायया गन्धमाल्ये प्रतिग्राहिता येति विग्रहे व-

हुव्रीहिरेव न स्यात्। त्रिकतः शेषस्य भाष्ये स्थितत्वात्। सत्यपि वा तस्मिन् पुंवद्भावो दुर्लभः। सिद्धान्ते तु प्रतिग्राहिते गन्धमाल्ये ययेति विग्रहः। जायानिष्ठप्रेरणविषयीभूतं गन्धमाल्यकर्मकं यत्प्रतिग्रहणं तत्कर्त्रीमित्यर्थः। अन्यपदार्थान्तर्भावेणेव विशेषणविशेष्यवैपरीत्येनैवैकार्थीभावकल्पनात्। मासजातादिवत्। व्यपेक्षापक्षे तु अषष्ठीविभक्त्यर्थे बहुव्रीहौ सर्वत्र व्युत्पत्त्यन्तरकल्पनास्त्येव। प्राप्तोदकामित्यस्य हि उदककर्तृकप्राप्तिकर्मीभूतमर्थः। ऊढरथः। रथकर्मकवहनकर्ता। उपहृतपशुः। पशुकर्मकोपहारसम्प्रदानम्। उद्धृतौदनः। ओदनकर्मकोद्धरणापादानम्। वीरपुरुषकः। वीरपुरुषकर्तृकास्थित्यधिकरणमिति दिक्। स्यादेतत्। अपादानाद्यविवक्षायां द्विकर्मकतास्तु तद्विवक्षायान्तु जायाप्रतिग्राहितेत्यादि सेत्स्यति। मैवम्। हरतेश्चेति चकारेण समुच्चितानां जयत्यादीनामकथितसूत्रविषयत्वेपि तथैव चेति समुच्चितानामणौ कर्त्तुर्णौ कर्मताभ्युपगमात्। गत्यर्थैः साहचर्यात्। अत एव तार्यादयः पृथगेव सङ्गृहीताः। युक्तञ्चैतत्। ग्रहणकर्तृत्वस्याविवक्षायां प्रयोजकस्य हेतुत्वाभावे णिचो दुर्लभत्वात्। न चैवं दीपिग्रहणवैयर्थ्यमकर्मकत्वादेवाणौ कर्तुर्णौ कर्मत्वसिद्धेरिति वाच्यम्। ण्यन्ताण्णिचि तत्सार्थक्यात्। शिष्याः तत्त्वं दीपयन्ति तानसौ प्रेरयतीत्यर्थः। नन्वेवं त्याजेः सङ्गृहीतत्वाद्यद्यपि त्याजितैः फलमुत्खातैः, मुक्ताहारश्चिरपरिचितं त्याजितो दैवगत्येत्यादि सिद्धम्। तथापि गवा पयस्त्याजयतीत्यर्थ इति कैयटहरदत्तादिग्रन्थो विरुध्यतइति चैत्रविशेषाविवक्षायां कर्मत्वेपि कर्तृत्वविवक्षायां तस्य निर्बाधत्वात्। स्यादेतत्। कर्तुरीप्सिततमं कर्म तथायुक्तञ्चानीप्सितमिति सूत्राभ्यां सर्वमिदं सिद्धम्। तथाहि

यथा विक्लित्युपसर्जनं विक्लेदनं पचेरर्थः, न्यग्भावनं रुहेः, द्विधाभावनं भिदेः, तथा त्यजनोपसर्जनं त्याजनं दुहेः । दापनं याचेः भिक्षेश्च । अङ्गीकारणमपि याचेः । प्रवेशोपसर्जनमवस्थापनं रुधेः । आख्यापनं पृच्छेः । मोचनं चित्रः । प्रतिवादनं ब्रूञः । तद्विशेषस्तु शासेरित्यादि । एवञ्च धातूपात्तव्यापारविषयाश्रयत्वं गवादेःस्पष्टमेवेति । अत एवाकडारसूत्रे ऽपादानमुत्तराणि, गान्दोग्धीत्यत्र परत्वात्कर्मसंज्ञेति भाष्यं सङ्गच्छते । पञ्चकं प्रातिपदिकार्थ इति पक्षे ऽवधित्वफलाश्रयत्वयोर्युगपद्विवक्षायां चेदम् । अवधिभूता या गौस्तन्निष्ठो यः क्षरणानुकूलव्यापारस्तद्विषयिणी गोपनिष्ठा प्रेरणेत्यर्थात् । अत्रोच्यते । कर्मणः शेषत्वेन विवक्षायां न माषाणामश्नीयादितिवत् षष्ठीं बाधितुं सूत्रम् । अपादानत्वमात्रविवक्षायां तु पञ्चम्येव, गोः क्षीरविशेषणत्वे तु षष्ठी भवत्येवेति न कश्चिद्दोषः तथा चेह षष्ठीसम्बन्धमात्रं द्वितीयार्थ इति स्थितम् । अथेदं विचार्यते । कर्मणि विधीयमाना लकृत्यक्तखलर्थाः किं द्विकर्मकेभ्यो मुख्ये कर्मणि स्युर्गौणे वेति । अत्र भाष्यम् । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मण इति ॥ अभिधाने इति शेषः । अत्र द्विकर्मणामित्यनेन नीवह्योर्हरतेश्चेति चशब्दसमुच्चितः कृषिर्नयत्यादयश्च त्रय उच्यन्ते । अन्येषां विशेषस्य वक्ष्यमाणत्वात् । तथा दुह्यादीनामित्यनेन कारिकोपात्ताः । चशब्दसमुच्चितेष्वहेतुमण्ण्यन्ता दण्ड्यादयश्चोच्यन्ते । ण्यन्तइत्यनेन तु गत्यादिसूत्रोपात्ताश्चशब्दसमुच्चितास्तार्यादयश्च । तत्र अणौ कर्म तस्याभिधाने लादय इत्यर्थः । तत्रापि बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मणीति मतांतरम् । तथा च भाष्यम् । कथितेभिहिते त्वविधिस्त्वमतिगुणकर्म-

णि लादिविधिः सपरे। ध्रुवचेष्टितयुक्तिषु चाथ गुणे तदनल्पमतेर्वचनं स्मरतेति ॥ अत्र प्रधानकर्मणि लादिभिरभिहिते गुणकर्मणि षष्ठीत्येकीयमतदूषणपरः प्रथमः पादः। त्वस्याः षष्ठ्याः विधिरितीयं त्वस्य अन्यस्य मतिर्न तु ममेत्यर्थात्। सपरे गत्यादिसूत्रोपात्तसहिते दुह्यादौ गुणकर्मणि लादयः। गुणकर्मेति। पुरुषप्रवृत्तेः पयःप्रभृत्यर्थत्वाद् दुहादावप्रधानं गवाद्युच्यते। ण्यन्ते तु शब्दतः प्रयोजकव्यापारस्य प्राधान्यम्। प्रयोज्यव्यापारस्य त्वप्राधान्यमिति तदार्थधर्माद्युच्यते। ध्रुवयुक्तयो ऽकर्मकाश्चेष्टितयुक्तयो गत्यर्थाः। एष्वगुणे प्रयोग ज्ये। न च बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु गुणकर्मण्यवे स्यात् ण्यन्ते कर्तुश्चेत्यस्य सपरइत्यनेन बाधादिति वाच्यम्। अपर आहेति भाष्येण मतान्तरताद्यवसायात्। अत्रायं सङ्ग्रहः। गौणे कर्मणि दुह्यादेः प्रधाने नीत्दकृष्वहाम्। बुद्धिप्रत्यवसानार्थशब्दकर्मसु चेच्छया॥ प्रयोज्यकर्मण्यन्येषां ण्यन्तानामिह निश्चितः। लकृत्यक्तखलर्थानां प्रयोगो भाष्यपारगैः॥ तत्र नीप्रभृतीनां प्रधानकर्मसम्बन्धोन्तरङ्गः। दुह्यादीनान्तु विपरीतम्। तेन तदंशे न्यायसिद्धो नियमः। इतरत्तु सर्वं वाचनिकम्। क्रमेणोदाहरणानि। गौर्दुह्यते पयः दोह्या दुग्धा सुदोहा। अजा ग्रामं नीयते नेया नीता सुनया। बोध्यते माणवकं धर्मः माणवको धर्ममिति वा। देवदत्तो ग्रामं गम्यते गमयितव्यः गमितः सुगम इति। यत्तु कौमुद्यां दुह्याच्यर्थेत्यादिना दुह्यादीन् न्यादींश्च द्वैराश्येन पठित्वा न्यादयो मुख्ये दुह्यादयो गौणइत्युक्तम्। तत्र ग्रहेः पाठो निर्मूल एव। जग्राह द्युतरुं शक्रमित्युदाहरणञ्चायुक्तम्। इतरेषान्तु द्विकर्मकतामात्रतात्पर्यकः पाठः। न्यादयो दुह्यादयश्चेत्युभयत्राप्यादिशब्दः प्रकारे इति

सिद्धान्ताविरोधेन व्याख्येयम्। यथाश्रुते हि दण्डिमुषिभ्यां मुख्ये स्यात्। तथा च गर्गाः शतं दण्ड्यन्तामिति भाष्यं विरुध्येत शतं त्वत्र प्रधानं गर्गाः अर्थिनश्च राजानो हिरण्येन भवन्तीति वाक्यशेषात्। दण्डिश्चेह ग्रहणार्थो न तु निग्रहार्थः। अत एव ह्यत्र समुदाये वाक्यसमाप्तिः। गुणानुरोधेन प्रधानावृत्तेः सम्भवात्। तथा मन्थेरपि प्रधाने स्यात्। इष्यते तु गौणे। तथा च भारविः। येनापविद्धसलिलः स्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्मथन्थइति। अमृतं ह्यत्रोद्देश्यतया मुख्यम्। अम्बुनिधिस्तु गौणः। यदपि अन्ये तु यथारुचीत्युक्त्वा गोपीहावमकार्यतभावश्चैनामनन्तेनेत्युदाहृतम्। तदपि न। ण्यन्ते कर्तुश्च कर्मण इति सिद्धान्तात्। यद्वा कृविज्ञाने इतिचुरादावात्मनेपदी बोपदेवेन पठितः। तस्येदमुदाहरणम्। बुद्ध्यर्थेषु पक्षद्वयस्योपपादितत्वात्। यत्तु श्रीहर्षः प्रायुङ्क्त। स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रेति, तच्चिन्त्यम्। शिशुना चन्द्रं प्रार्थितेत्यप्रधाने क्तप्रत्यये बहुव्रीह्ययोगात्। वक्ष्यति हि। अप्रथमाविभक्त्यर्थे चायमिति। न च चन्द्रे क्तः। अप्रधाने द्रुहादीनामित्युक्तेः। अत एव काकपक्षधरमेत्य याचित इति कालिदासः। कृत्षष्ठी गुणमुख्याभ्यां कर्मभ्यां प्राप्यते पृथक्। अविशेषाद् द्वितीयावन्नेता ग्रामस्य गोरिति॥ यत्रत्येकेन शब्देन भिन्नकक्ष्यद्वयाभिधा। न शक्यते तत्र युक्तमेकस्यैवोपजीवनम्॥ प्रधाने नियता षष्ठी गुणे ह्युभयथा भवेत्। इत्याह गोणिकापुत्र इति भाष्याद् गुणद्वयम्॥ नेतास्वस्य सुहृत्तस्य सुहृदं वा। इह प्रधाने कर्मणि नित्या षष्ठी। भाष्यकारवचनात्तु गुणकर्मणि वैकल्पिकीति स्थितम्। नन्वकर्मकाणां प्राकृतकर्माभावात्कथं द्विकर्मकता। तथा च ण्यर्थकर्मणि प्रत्ययोस्तु

आस्यते माणवक इति । मासमिति तु प्रयोगोसङ्गतः । ध्रुवचेष्टितयुक्तिषु वाप्यगुण इति श्लोके ध्रुवग्रहणञ्च व्यर्थमिति चेन्न । कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् । देशश्चाकर्मकाणामिति भाष्याद्गन्तव्योध्वा अद्य गन्तव्यः । अस्मादेव निपातनाद्गन्तव्यशब्दस्य परनिपातः । गन्तव्यतया लोके प्रसिद्धस्य नियतपरिमाणस्य क्रोशयोजनादेरेव ग्रहणम् । तेनाध्वानं स्वपितीति न भवति । मासमास्ते । गोदोहमास्ते । यावता कालेन गौर्दुह्यते तावन्तं कालमास्तइत्यर्थः । क्रोशमास्ते । कुरून् स्वपिति । जन्यमात्रं कालोपाधिरिति पक्षे गोदोहादेर्यद्यपि कालत्वात्सिद्धं तथापि लोके मासादेरेव तथात्वेन प्रसिद्धत्वात्पृथग्भावग्रहणम् । देशशब्देन च ग्रामसमुदायविशेषाः कुरुपञ्चालादयो गृह्यन्ते इति कैयटः । तेनाधिशीङ्स्थासामित्यादेर्वैय्यर्थ्यं नेति ध्येयम् । कालाध्वनोरत्यन्तसंयोगइति तु गुणद्रव्ययोरर्थे आरम्भणीयम् । क्रोशं कुटिला । मासङ्गुडधानाः । सकर्मकार्थश्च । मासं वेदमधीते । यद्वा आस्यादयस्तत्पूर्वके व्यापने वर्त्तन्ते तथा चोत्सर्गेणैव सिद्धम् । मासमासनेन व्याप्नोतीत्यर्थात् । तथा च द्वितीये भाष्यम् । प्राकृतमेवेदं कर्मेति । न चैवं सकर्मकेष्वप्यतिप्रसङ्गः । लक्ष्यानुरोधेनाकर्मकाणामेवोक्तप्रकाराभ्युपगमात् । आह च । कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः । सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते इति ॥ हेलाराजस्त्वाह । सकर्मकेष्वपि मासमोदनं पचतीति भवत्येव । अत एवोक्तं सर्वैरिति । अकर्मकैरिति त्वविवक्षितमिति कैयटोप्येवम् । अस्मिन्पक्षे मासमास्ते कटे इति कटादेरपि द्वितीया प्राप्ता तथापि कालादेरेव व्यापनकर्मत्वं न तु कटादेरिति हेलाराजः । अनभिधानञ्चेह शरणम् । अधिशीङ्स्थेत्यादिज्ञापकं

वा बोध्यम्। इह च कर्मणि भावे च लकारे देवदत्तेनास्यते मासो मासं वेति रूपद्वयमपीष्टम्। स्यादेतत्। भावेचाकर्मकेभ्य इति वचनान्मासादिकर्मकात्कथं भावे ल इति चेत्। उच्यते। अकर्मकेभ्य इत्यनेनान्तरङ्गं द्रव्यकर्म व्युदस्यते न तु बहिरङ्गं कालादिकर्म। कर्मणीत्यत्र तु व्यक्तिपक्षाश्रयणादन्तरङ्गासन्निधौ बहिरङ्गे कालादिकर्मण्यपि प्रतिरविरुद्धा। जातिव्यक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्थेति सिद्धान्तात्। उक्तञ्च हरिणा। शक्तिप्रमाणसंख्यादेर्द्रव्यधर्माद्विशिष्यते। क्रियासु कालयोगोतः प्राग्योगो द्रव्यकर्मणेति॥ अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः। तस्य कर्मणि भावे च निमित्तत्वाय कल्पतइति च॥ एतेन सस्तेमाघमघाभिधानि यमुना गङ्गौघसङ्गे ययेति श्रीहर्षप्रयोगो व्याख्यातः॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता सणौ॥ गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यःकर्ता स णौ कर्मस्यात्। नियमार्थमिदम्। णिजर्थेनाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेवेति। तेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये पूर्वसूत्रप्राप्तकर्तृसंज्ञाया एव निरपवादत्वेनावस्थानात्तृतीया सिद्ध्यति। आह च। गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मताङ्गतः। नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयतइति॥ कर्तुः स्वधर्मेण तृतीययेत्यर्थः। गमयति माणवकं ग्रामं ग्रामकर्मकं यद्गमनं तदनुकूलव्यापाराश्रय इत्यर्थः। नीवह्योः प्रतिषेधो वक्तव्यः॥ यद्यप्येतयोः प्रापणमर्थो न तु गतिस्तथापि विशेषणतया गतिरपि वाच्यकोटिनिविष्टेत्येतावन्मात्रेण प्राप्तिं मत्वा प्रतिषेध उक्तः। नाययति वाहयति वा भारं देवदत्तेन। वहेरनियन्तृकर्तृकस्यैव प्रतिषेधः॥ नियन्तृकर्तृकस्य प्रयोज्यः कर्मेति वक्तव्यमिति फलितोर्थः। वहन्ति वाहाः वा-

हयति वाहान् रथिनं सूतः । या प्रापणइत्यत्र तु गतिरेव प्रापणशब्दार्थः । याति गच्छतीत्येकार्थप्रतीतेः । तेन कालं पाचयतीत्यादौ प्रयोज्यस्य कर्मता बोध्या । बुध्यर्थग्रहणेन ज्ञानसामान्यवाचिन एव गृह्यन्ते न तु तद्विशेषवाचिनः स्मरत्यादयः । अत एव श्रुदृशोरुपसङ्ख्यानं करिष्यते । बोधयति माणवकं धर्मम् । प्रत्यवसानं भक्षणम् । भोजयति आशयति माणवकमोदनम् । आदिखाद्योः प्रतिषेधो वक्तव्यः ॥ आदयति खादयत्यन्नं बटुना । भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः ॥ हेतुमण्णिजन्ते विधिरिति प्रतिषेधोप्यणावित्ययं सन्निधानात्तद्विषयः । तेन चुरादिणिजन्तेपि भक्षयतौ प्राप्तिसत्वात्प्रतिषेध उपसङ्ख्यातः । भक्षयत्यन्नं बटुना । अहिंसार्थस्येति किम् । भक्षयन्ति बलीवर्दाः सस्यम् । भक्षयति बलीवर्दान् सस्यम् । क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा द्रष्टव्या तस्यामवस्थायान्तेषां चेतनत्वाभ्युपगमात् । शब्दः कर्मकारकं येषान्ते शब्दकर्माणः न त्विह कर्तरिकर्मव्यतिहारइत्यत्रैव कर्मशब्दः क्रियापरः । गतिबुद्धिप्रत्यवसानशब्दार्थेति वक्तव्ये ऽर्थशब्दात्कर्मशब्दस्य पृथगुपादानात् अध्याययति पाठयति माणवकं वेदम् । जल्पतिप्रभृतीनामुपसंख्यानम् ॥ जल्पयति विलापयति आभाषयति पुत्रं देवदत्तः । दृशेश्चोपसंख्यानम् ॥ दर्शयति हरिं भक्तान् । यद्यपि दृशेर्ज्ञानसामान्यपरत्वे बुद्ध्यर्थत्वादेव सिद्धं तथापि ज्ञानविशेषार्थतायां न सिध्यतीत्युपसंख्यानमारब्धम् । श्रावयति श्लोकं देवदत्तमिति तु शब्दकर्मत्वात्सिद्धम् । शब्दक्रियाणामिति व्याख्याने तु शृणोतेरुपसंख्येयं स्यात् । व्हयतिक्रन्दत्योश्च प्रतिषेध्यं स्यात् । व्हाययति क्रन्दयति वा देवदत्तेन । दृशेस्तूभयथाप्युपसंख्येयं स्यात् । शब्दायतेश्चोभयथा प्रतिषेध्यम् । अकर्मकत्वादपि ह्यत्र प्रसंगः । शब्दलक्षणस्य कर्म-

णॉतभावात् कर्मान्तरायोगाच्च शब्दाययति देवदत्तेन। अकर्मकग्रहणेन तु येषां कालादिभिन्नं कर्म न सम्भवति ते गृह्यन्ते। न त्वविवक्षितकर्माणोपि। तेन मासमासयति देवदत्तमित्यादौ कर्मत्वं सिद्धम्। देवदत्तेन पाचयतीत्यादौ च न भवति। गत्यर्थाकर्मकेति सूत्रेप्येवम्। अत एवाविवक्षितकर्मकेभ्यः पचिददातिप्रभृतिभ्यः कर्तरि क्तो न। अन्यथा पक्ववान् दत्तवानित्यर्थे पक्वो दत्त इति स्यात्। लःकर्मणीति सूत्रे तु अविवक्षितकर्मणां असम्भवत्कर्मणां वा ग्रहणम्। अत एवाविवक्षितकर्मणां न भावे लादय इतीह सूत्रे वदतो णेरणावित्यत्र तु नेह पच्यतइति भावे लकार इति ब्रुवतो हरदत्तस्य मतभेदपरत्वान्न पूर्वापरविरोध इति दिक्॥

हृक्रोरन्यतरस्याम्॥ हा च क्रा चेति विग्रहः। हुस्व क्रुश्चेति वा। अनयोरणौ कर्त्ता णौ वा कर्म स्यात्। नवेतिविभाषासूत्रे उभयत्रविभाषास्विदं वार्तिककृता पठितम्। तथाहि। अभ्यवहारयति माणवकमोदनं माणवकेन वेत्यत्र प्रत्यवसानार्थत्वात्प्राप्ते विकुर्वते छात्राः विकारयति छात्रान् छात्रैर्वेत्यत्राकर्मकत्वात्प्राप्ते इतरत्र त्वप्राप्ते विभाषेयम्। अभिवादिदृशोरात्मनेपदे वेति वक्तव्यम्॥ अभिवादयतेरप्राप्ते विभाषा। दृशेस्तु बुद्ध्याद्यर्थत्वादुपसङ्ख्यानाद्वा प्राप्ते। आभिवादयते गुरुं देवदत्तः अभिवादयते गुरुं देवदत्ते देवदत्तेन वा। णिचश्चेत्यात्मनेपदम्। परस्मैपदे तु अभिवादयति गुरुं देवदत्तेन। दर्शयते राजानं भृत्यान् भृत्यैर्वा। कर्मसंज्ञाभावपक्षे कर्मान्तरस्याभावाण्णेरणावित्यात्मनेपदमन्यत्र तु णिचश्चेतीति प्राञ्चः। वस्तुतस्तु णिचश्चेत्येव युक्तम्। णेरणावित्यस्य तु नायं विषयः। णिज्वाच्यप्रयुक्तिभेदादिति तत्रैवोपपादितम्॥

स्वतन्त्रः कर्त्ता ॥ क्रियायां स्वातन्त्र्येण विवक्षितोर्थः कर्ता स्यात् । धातूपात्तव्यापाराश्रयत्वं स्वातन्त्र्यम् । आह च । धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यतइति कर्मकर्तर्यप्यस्तादिम् । फलव्यापारयोर्यैर्यैरधिकरण्यमात्रस्य पचावौत्सर्गिकस्य परं त्यागः । विशकलितशक्तिपक्षे विशिष्टशक्तिपक्षे चेदं तुल्यम् । निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितमिति पक्षे तु प्रधानभूतधात्वर्थ एवेह क्रिया धातुत्वं तु भूतपूर्वभावनार्थत्वात् । एतेन कारकाणां क्रियान्वयनियमोपि द्वेधा व्याख्यातः । देवदत्तः पचति । स्थाली पचति । अनन्यलभ्यस्य शब्दार्थत्वादाश्रयो लकारार्थः । देवदत्तेन पच्यते । देवदत्तरूपो य आश्रयस्तद्विशिष्टो विक्लित्यनुकूलव्यापार इत्यर्थः । वैशिष्ट्यं चाधेयतारूपं संसर्गमर्यादया भासते ॥

तत्प्रयोजको हेतुश्च ॥ तस्य कर्तुः प्रयोजको हेतुसंज्ञः स्याच्चात्कर्तृसंज्ञः । संज्ञासमावेशार्थश्चकारः । कुर्वन्तं प्रेरयति कारयति हरिः । हेतुत्वाच्चद्व्यापारे हेतुमतिचेति णिच् । कर्तृत्वात्कर्तरि लकारः ॥

इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य चतुर्थे
पादे तृतीयमान्हिकम् ॥

प्राग्रीश्वरान्निपाताः ॥ अधिरीश्वरइत्यतः प्राक् प्राङ्निपाता इत्यधिक्रियते । तन्त्राद्याश्रयणात् । तेन पूर्वं निपातसंज्ञाः सन्तः पश्चाद्इत्यादिसंज्ञा इत्यर्थात्संज्ञासमावेशः सिध्यति । अन्यथा गत्युपसर्गकर्मप्रवचनीयसंज्ञानां निपातसंज्ञायाश्च पर्यायः स्यात् । तन्त्रादौ प्रमाणं तु प्राग्ग्रहणसामर्थ्यमेव अन्यथा रीश्वरादिति पञ्चम्यैव दिक्शब्दाक्षेपात्किं तेन । न च परशब्दाक्षेपप्रसङ्गः । चादयोसत्त्वे प्रादय इत्येतयोर्विधेययोर्लाभेना-

नन्वयापत्तेः । रेफविशिष्टग्रहणं किम् । ईश्वरेतोसुन्कसुनावित्यस्य व्याप्तिन्यायेनावधित्वं मा भूत् । वस्तुतस्तु मास्तु रेफः प्रत्यासत्त्या ऽभिमतसिद्धेः अव्ययीभावस्याव्ययसंज्ञारम्भाच्च। न चासौ समासेप्यव्ययीभाव एवेति नियमार्थं स्यादिति वाच्यम् । गौरवग्रस्तं व्याप्तिन्यायमाश्रित्य नियमार्थत्ववर्णनापेक्षया प्रत्यासत्तेर्विध्यर्थतायाश्च न्याय्यत्वात् । अत एव नलोकेति सूत्रे अव्ययात्पृथक् लोकादीनां ग्रहणमप्युपपद्यतइति दिक् ॥

चादयोसत्वे ॥ चादयो निपातसंज्ञाः स्युः न तु द्रव्ये । निपातत्वादव्ययत्वम् । च वा इत्यादिवस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते । द्रव्यमित्युच्यते सोर्थो भेद्यत्वेन विवक्षितः । लिङ्गसङ्ख्यान्वयि द्रव्यमिति वा । असत्वे किम् । पशुना यजेत,पशुशब्दश्चादिः । चः समुच्चय इत्यपि प्रत्युदाहरणम् । न चात्र प्रकृतिवदनुकरणमित्यतिदेशात् निपातत्वं दुर्वारमिति वाच्यम् । अतिदेशस्यानित्यतायाः ऋलृक्सूत्रएवोपपादितत्वात् । प्रसज्यप्रतिषेधः किम् । वातीति वाः विप्रातीति विप्रः । इह क्रियाविशिष्टद्रव्यवाचकतया क्रियायाश्चासत्वरूपत्वान्निपातता स्यात् ततश्च विप्रशब्दस्याप्यव्ययसंज्ञा स्यात् । प्रयोजनं सर्वनामाव्ययसंज्ञायामित्युक्तत्वात् । अथ चादयः । च वा ह अह एव एवं नूनं शश्वत् युगपत् भूयस् कूपत् प्रश्नवितर्कप्रशंसास्वयम् । एवं सूपदापि । कुविदिति भूयोर्थे योगप्रशंसास्तिभावेषु च । नेदिति शङ्कायाम् । निज्जिह्मायन्तोनरकंयताम । नेदेवसापुनर्जन्नदेवा इत्यादौ तु न इदिति पदद्वयं पठ्यते । तस्मान्निपातसमुदायोयं बोध्यः । निपातैर्यद्यदीति निघातनिषेधः । प्रतिषेधविचारसमुच्चयेष्वयमिति तु शाकटायनः । चेत् चण् अयं चेदर्थे णित् समुच्चयादौ त्वननुबन्धः । इदं च निपातैर्यद्यदीत्यत्र

स्फुटीभविष्यति । कच्चित् । 'यत्र । नह निश्चितनिषेधे । हन्त हर्षेनुकम्पायां च । माकिः माकीं एतौ निषेधे । माकिर्नैशन्माकींरिषन्माकींसंशारिकेवटेत् किस्सम्भावितनिषेधेन किरिन्द्रत्वदुत्तरः । नाकिरेवायथात्वंहिकंनुकम् । सुकंआकी नकी नाकिः । माकीं मांकिः । आकृतमिति वेदनिघण्टुः । आमिश्राणि नवोत्तराणीति तद्व्याख्यायां यास्कः । माङ् । माङिल्लुङितिविशेषणार्थो ङकारः । मा भवतु मा भविष्यतीत्यत्र निरनुबन्धो माशब्दः । नञ् । अकारो नलोपो नञ इति विशेषणार्थः । नस्येत्युक्ते तु पामनपुत्र इत्यत्रापि स्यात् । न च सिद्धान्तेपि स्त्रैणपुत्रेतिप्रसङ्गं वारयितुं अलुगुत्तरपदइत्युत्तरपदाक्षिप्तेन पूर्वपदेन नञोवश्यं विशेषणीयत्वात्तेनैव पामनपुत्रस्यापि सिद्धेः किं अकारेणेति वाच्यम् । नैकधागमिकमीकृतनैकनीवृतेत्यादौ निषेधार्थेन नशब्देन सहसुपेति समासेतिव्याप्तिं वारयितुं त्रित्वस्याप्यावश्यकत्वात् नञा पूर्वपदस्य विशेषणेपि अनन्यार्थीत्वस्य निपातस्यैव ग्रहणं न तु वृद्ध्यो चरितार्थत्वकारस्य तद्धितस्यापीति तु प्राचां ग्रन्थस्योक्तिसम्भवो बोध्यः । यावत् तावत् । त्वै न्वै एतौ वितर्के । श्रौषट् । वौषट् । स्वाहा । वषट् । स्वधा । ॐ । तथा । हिरुक् । खलु । किल । अथ । सुष्ठु । आदहेति हि सोपक्रमकुत्सनेषु । आदहस्व धामन्नित्यत्र तु पदकारा आदिति पृथक् पठन्ति । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ॥ अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि । सुदत्तमनुदत्तं च निदत्तमिति चेष्यते । अच उपसर्गात्त इति षोस्तत्वं न भवति । उपसर्गप्रतिरूपकत्वेप्यनुपसर्गत्वात् । विभक्तिप्रतिरूपको यथा । अहम् । शुभम् । अहंयुः । शुभंयुः । अहंशुभमोर्युस् । चिरेण । अन्तरेण । चिराय । अचिरात् । अकस्मात् । चिरा-

स्य मम। ममत्वं गतराज्यस्य। वेलायां मात्रायामित्यादि। एतेन गेये केन विनीतौ वामिति व्याख्यातम्। वामित्यस्याव्ययस्य युवामित्यर्थात्। आह आसेत्यादीनि तु तिङन्तप्रतिरूपकाणि। स्वरास्तु सम्बोधनभर्त्सनानुकम्पापादपूरणप्रतिषेधेषु यथासम्भवं बोध्याः। अ अपेहि आ एवं मन्यसे। इ इन्द्रं पश्य। ई ईशः। ऊ ऊपरे बीजं वपति। ए इतो भव। ओश्रावय। ऋ ॠ ऌ ॡ ऐ औ एते मन्त्रस्तोमाः। पश्विति सम्यगर्थे। लोधं नयन्ति पशुमन्यमानाः। शुकमिति शीघ्रत्वे। यथा कथाचेत्यनादरे। पाट् प्याट् अङ्ग है हे भो अये इत्यादयः सम्बोधने। घेति हिंसाप्रातिलोम्यपादपूरणेषु। विषु इति नानार्थे। एकपदे इत्यकस्मादर्थे। निहन्त्यरीनेकपदे। पुतइति कुत्सायाम्। कुत्सितमवयवञ्छादयति इति पुच्छः। डः।पुलिति लान्तामिति शाकटायनः। कुत्सितं कसति गच्छतीति पुल्कसः। अस्मीत्यहमर्थे। त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति। आत इति इतोपीत्यर्थे। इत्यादि। आकृतिगणश्चायम्॥

प्रादयः॥ एते निपातसंज्ञाः स्युर्न तु सत्वे। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः। तत्र निस्दुस् इमौ सान्तौ। निसस्तपतावनासेवनइतिनिर्देशादित्युपसर्गस्यायताविति सूत्रे वृत्तिः। निरः कुषः सुदुरोरधिकरणे इत्याद्यनुरोधाद्रेफान्तावपीति तत्रैव सूत्रे हरदत्तः। अद्रव्ये किम्। विः पक्षी। पराः सेनाः॥

उपसर्गाः क्रियायोगे॥प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः॥

गतिश्च॥ प्रादयो गतिसंज्ञाः स्युः क्रियायोगे। पुल्लिङ्गोयं गतिशब्दः। गतिरनन्तर इति लिङ्गात्। अव्युत्पन्नश्चायं क्तिज-

न्तो वा। नक्तिचिदीर्घश्चेति तु न प्रवर्तते। अत एव निर्देशात्। उपसर्गसंज्ञया सह समावेशार्थश्चकारः। अन्यथा पर्यायः स्यात्। तेन प्रणेयमित्यादौ णत्वं कृदुत्तरपदप्रकृतिस्वरश्च सिध्यति। निपातसंज्ञायास्तु समावेशः प्राग्ग्रहणेन साधित एव। इह यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः। योगग्रहणसामर्थ्यात्। तेन प्रवृद्धं कृतं प्रकृतमित्यत्र गतिरनन्तर इति स्वरो न। कर्मणि क्तान्तं प्रत्यगतित्वात्। कृत्यर्थविशेषकत्वे तु स्यादेव। तथा प्रवृद्धो भावः प्रभाव इत्यत्र श्रिणीभुवोनुपसर्गइति घञ् सिद्धः। एवं प्रणाययत्यभिपाचयतीत्यादौ प्रकृत्यर्थगतप्रकर्षाभिमुख्यद्योतकतायां णत्वषत्वे स्तः। ण्यर्थविशेषकत्वे तु नेति बोध्यम्। निपातसंज्ञा तु क्रियायोगं विनाप्यस्ति। एतदर्थमेव हि प्रादय इति योगो विभक्तः। तेन प्रगत आचार्यः प्राचार्य इत्यत्राव्ययपूर्वपदप्रकृतिस्वरः सिध्यति। उपर्गसंज्ञायां मरुच्छब्दस्योपसंख्यानम्॥ मरुत्तः। उपसर्गसंज्ञाविधानसामर्थ्यादजन्तत्वाभावेप्यचउपसर्गात्त इति तत्वं प्रवर्ततइत्याहुः। एवं च मरुन्मयतीत्यत्र णत्वमपि प्राप्नोति। तस्मात्तत्वएव संज्ञा वक्तव्या। अत एव किं विधिरङ् च न भवति। निपातसंज्ञा तु नास्येष्टा। तेन तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरे कृते मरुत्तब्दो मध्योदात्तः। निपातत्वे त्वाद्युदात्तः स्यात्। न चोपसर्गाश्चाभिवर्जमिति फिट्सूत्राद्दोषत्तादवस्थ्यं शंक्यम्। निपाता आद्युदात्ता इत्येव सिद्धे ऽभेः प्रतिषेधमात्रार्थं तत्सूत्रारम्भादिति हरदत्तादयः। अत एव नाभिरित्येव सूत्र्यताम्। मास्तु वा तदपि। एवादिषु अभेः सुपठत्वादित्यवोचाम। एवं च तप्पर्वमरुद्भ्यामिति मरुतशब्दव्युत्पादने उपायान्तरं बोध्यम्। तत्र च तपः पित्वमेव सम्यक्। तन्निति नित्वपाठस्तु क्वाचित्कः प्रामादिकः। अन्य-

था मरुत्तशब्दस्याद्युदात्ततापत्तौ प्रकृतसूत्रस्थकैयटादिविरोधापत्तेः। मत्वर्थीयप्रकरणे तनो नित्त्वं मरुत्तशब्दस्याद्युदात्ततां चावलम्ब्य प्रवृत्तो हरदत्तग्रन्थस्तु चिन्त्यः। पर्वतश्चिन्महि वृद्धो विभाषेत्यादौ पठ्यमानं पर्वतशब्दस्याद्युदात्तत्वं तु द्वेधापि सिध्यति। नब्विषयस्यानिसन्तस्येति पर्वतशब्दस्याद्युदात्तत्वात्। श्रच्छब्दस्याङ्विधावुपसंख्यानं॥ श्रद्धा। भिदादिपाठात्प्रज्ञाश्रद्धेतिनिपातनाद्वा सिद्धम्। अन्तःशब्दस्याङ्किविधिणत्वेषूपसंख्यानम्॥ एतच्चान्तरपरिग्रहे इत्यत्र भाष्ये स्थितम्। अन्तर्धा। अन्तर्द्धिः। अन्तर्हण्यात्। हन्तेरत्पूर्वस्येति णत्वं। एवं चान्तरदेशइति न कर्तव्यम्। देशे तु क्षुभ्नादित्वाण्णत्वाभावः। अयनं चेत्यपि न कर्तव्यम्। कृत्यच इति सिद्धेः। देशे तु क्षुभ्नादिता बोध्येति कैयटः। देशे निषेधार्थं सूत्रद्वयमिति तु हरदत्तः। पक्षद्वयेपि अन्तर्णयति अन्तर्भवाणीत्यादौ यथायथं णत्वं बोध्यम्। सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु॥ सुलभं। दुर्लभम्। उपसर्गात्खल्घञोरिति नुम् न। एतच्च प्रयोजनमापाततः। नसुदुर्भ्यां केवलाभ्यामिति सूत्रस्यावश्यारभ्यत्वात्। अन्यथा ऽतिसुलभमित्यत्र नुम् न स्यात्। तत्त्वं, सुदत्तम्। अचउपसर्गादिति तत्वं मा भूत्। षत्वं, दुःस्थितिः। प्रक्रियाजालदुःस्थम्। सुसिक्तम्। सुस्तुतम्। सुःपूजायामिति तु कर्तव्यमेव पूजायामिति विशेषणार्थम्। तेन सुषिक्तं किं तवात्रेत्यादौ षत्वं भवत्येव। कथं तर्हि फलवद्भावनोद्भूतकथम्भावातिरोहिताः। नैवाङ्गानां कथं भावाः प्रादुष्यन्ति कथं च नेति। सत्यम्। नेदमुपसर्गत्वप्रयुक्तं किन्तूपसर्गप्रादुर्भ्यामित्यत्र प्रादुसः पृथग्ग्रहणप्रयुक्तम्। एतेन प्रादुष्यन्तीति पठित्वा प्र आङ् दुरु इत्युपसर्गत्रिकपूर्वस्य स्यतेरुपसर्गात्सुनोतीत्यादिना षत्वमिति व्या-

चक्षाणाः परास्ताः। दुर उपसर्गतायाः षत्वविधौ निषेधात्। स्यतेरर्थस्य प्रकृतासम्बन्धाच्च। णत्वम्। दुर्नीतम्। दुर्नयः। एतेन दुरः परस्य णत्वं नेति के चिदिति पठित्वा सिद्धान्ते णत्वमिति भ्राम्यन्तः परास्ताः। गतिसंज्ञायां कारिकाशब्दस्योपसङ्ख्यानम्॥ कारिकाकृत्य। कारिकाकृतम्। यत्कारिकाकरोति। तिङ्चोदात्तवतीति गतेर्निघातः। निपातत्वादव्ययत्वे सति विभक्तेर्लुक्। कारिका क्रिया। मर्यादा स्थितिरित्यर्थः। यत्न इत्यपरे। धात्वर्थनिर्देशइति ण्वुल्। यस्तु कर्तरि ण्वुलन्तः कारिका दासीति। यश्च श्लोकवाची तयोर्नेह ग्रहणम्। क्रियायोगइति कारिकाशब्दस्य विशेषणात्। क्रियावृत्तेरेव ग्रहणात्। पुनश्च न सौ छन्दसि गतिसंज्ञाविति वक्तव्यम्॥ पुनराधेयम्। गतित्वात्समासः। कृदुत्तरपदप्रकृतिस्वरेण यतोनाव इति धेशब्द उदात्तः। पुनरुत्स्यूतं वासः। इहापि गतित्वात्समासः। स्वरस्तु प्रवृद्धादेराकृतिगणत्वादन्तोदात्तत्वम्। काठकेह्यन्तोदात्तः पठ्यते। शेषनिघातेन पुनःशब्दो ऽनुदात्तः। गतिर्गताविति निघातं वदन् वृत्तिकारस्तु परत्वात्तस्य न्याय्यतां मन्यते। चनीहितः॥ चायेरन्ने ह्रस्वश्चेत्यसुन्नन्तत्वान्निपातत्वाद्वा ऽनुदात्तस्य चनःशब्दस्य गतिरनन्तर इति प्रकृतिस्वरः॥

ऊर्यादिच्विडाचश्च॥ एते गतिसंज्ञाः स्युः क्रियायोगे। कृभ्वस्तियोगे च्विडाचौ विहितौ। तत्साहचर्याद्भूपादयोपि तद्योगएव प्रयुज्यन्ते नान्यत्र। अनभिधानाच्च। तत्राप्याविःप्रादुःशब्दौ मुक्त्वा ऽन्येषां करोतिनैव योग इति माधवादयः। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति तथापीह सामर्थ्यात् च्विडाजन्तग्रहणम्। न हि प्रत्ययमात्रस्य क्रियायोगः संभवति। स्वार्थिकत्वेनानर्थकत्वात्। च्वेरश्रावित्वाच्च। ऊरीकृत्य शुक्लीकृ-

त्य पटपटाकृत्य। इहेदमवधेयम्। श्रौषडादीनां स्वाहान्तानां चादिष्वपि पाठादक्रियायोगेपि निपातत्वम्। आविःशब्दस्य साक्षात्प्रभृतिषु पाठात्कृञो योगे विकल्पः। भ्वस्तियोगे त्वनेन नित्यमिति। कथं तर्हि वारुणीमदविशंकमथाविश्वक्ष्युषोभवदसाविव इति माघः। अभवद्युगमद्विलोलजिव्हायुगलीटोभयस्टक्वभागमाविरिति च। निरंकुशाः कवय इति हरदत्तः। वस्तुतस्तु नेह दोषलेशमपि पश्यामः। तथाहि। गतित्वाद्धातोः प्राक् प्रयोगः प्राप्नोतीति त्वदीयपूर्वपक्षसर्वस्वम्। तच्च भाष्यवार्तिकयोरेव निराकृतप्रायम्। तेप्राग्धातोरिति सूत्रं हि द्वेधा व्याख्यातं प्रयोगनियमार्थं संज्ञानियमार्थं चेति। तत्रान्त्यपक्षे प्राक् चाप्राक् च प्रयोक्तव्याः। प्राक्तु प्रयुज्यमानाः संज्ञां लभन्तइति स्थितम्। इममेव च पक्षमाश्रित्यानुकरणं चेति सूत्रे ऽनितिपरमिति प्रत्याख्यातम्। एवमेव छन्दसिपरेपि व्यवहिताश्चेति सूत्रद्वयमपि प्रत्याख्यातम्। अत एव तेप्रागिति सूत्रे सुकटं कराणि वीणानीति भाष्यं कर्तृकर्मणोश्चभूकृञोरिति सूत्रे स्वायम्भवमिति भाष्यवृत्तिग्रथौ। च्व्यर्थयोः किं स्वाढ्येन भूयतइति वृत्तिग्रन्थश्च सङ्गच्छते। एतेन वृत्तेः प्रामादिकतां वदन् आढ्येन सुभूयतइति पाठः कर्तव्य इति शिक्षयन् हरदत्तोप्यपास्तः। पक्षान्तरैरपि परिहारा भवन्तीति न्यायेन संज्ञानियमपक्षे सर्वस्य सामञ्जस्यात्। एतेन पुरोरामस्य जुहवाञ्चकार ज्वलने वपुरिति भट्टिः। तस्य स्थित्वा कथमपि पुर इति कालिदासश्च समर्थितः। न च पुरोव्ययमित्यस्य कृञ्मात्रविषयत्वमिति भ्रमितव्यम्। कृञोनधिकारात्। तुरासाहं पुरोधायेत्यादिप्रयोगाच्चेति दिक्। जरी ऊरी उररी एते त्रयोङ्गीकारे विस्तारे च। विताली भूसी एतौ विस्तारे। शकला संसकला ध्वंसकला भ्रंसक-

ला एते चत्वारो हिंसायाम् । शकला कृतेत्यादि । हिंसित्वेत्यर्थः । गुलुगुधा पीडार्थे । गुलुगुधाकृत्य । पीडयित्वेत्यर्थः । सजूः सहार्थे । फलफली चिक्की आक्की एते विकारे । अलोष्टी केवली सेवाली शेवाली वर्षाली मसमसा भस्मसा एते हिंसायाम् । वषट् वौषट् स्वाहा स्वधा पापी करुणाविलापे । पापीकृत्य । करुणं विलप्येत्यर्थः । प्रादुः प्राकट्ये । श्रत् शीघ्रार्थे । श्रत्कृत्य । आविः प्राकट्ये । आविष्कृत्य । गणरत्ने त्वन्येपि संगृहीताः । तथाहि । पापाली सङ्कला केवासी एते हिंसायाम् । वार्दाली यार्दाली आलम्बी एते प्राकाश्ये हिंसायां च । इत्यूर्यादयः ॥

अनुकरणञ्चानितिपरम् ॥ गतिः स्यात्क्रियायोगे । खाट्कृत्य । अनितिपरं किम् । खाडिति कृत्वा निरष्ठीवत् । सति हि गतित्वे प्रयोगनियमपक्षे धातोः प्राक् प्रयोगः स्यात् । अनुकरणत्वजात्याक्रान्तस्येतिशब्दे परे ऽयंनिषेधः । तेन श्रौषड्वौषडितिकृत्वा निरष्ठीवदित्यत्र श्रौषट्शब्दस्यापि निषेधः । संज्ञानियमपक्षे तु अनितिपरग्रहणं न कर्तव्यमिति । परस्परसंज्ञाप्राप्तेरेवाभावात् ॥

आदरानादरयोः सदसती ॥ क्रमाद्गतिसंज्ञे स्तः । सत्कृत्य । असत्कृत्य । प्रीतिपूर्विका प्रत्युत्थानादिविषया त्वरादराः । अवज्ञया प्रत्युत्थानादावुपेक्षा त्वनादरः । एतयोः किम् । सत्कृत्वा । असत्कृत्वा । शोभनमशोभनं च कृत्वेत्यर्थः ॥

भूषणेऽलम् ॥ गति संज्ञं स्यात् । अलंकृत्य । भूषणे किम् । अलंकृत्वौदनं गतः । पर्याप्तमित्यर्थः । अनुकरणमित्यादयस्त्रयो योगाः स्वभावात्कृञ्विषया इति माधवः ॥

अन्तरपरिग्रहे ॥ स्पष्टम् । अन्तर्हृत्य । मध्ये हृत्वेत्यर्थः ।

अपरिग्रहे किम् । अन्तर्हत्वा मूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः । अत्रेदमवधेयम् । हत्वा गमनं द्विधा । हतं त्यक्त्वा परिगृह्य चेति । आद्यमुदाहरणम् । द्वितीयं प्रत्युदाहरणम् । अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति ॥

कर्णेमनसी श्रद्धाप्रतीघाते ॥ गती स्तः । कर्णेहत्य पयः पिबति । मनोहत्य । कर्णशब्दः सप्तमीप्रतिरूपको निपातोभिलाषातिशये वर्तते । मनःशब्दोप्येवम् । अतिशयेनाभिलष्या तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः । ततश्च श्रद्धाया अपगमात्तत्प्रतीघातो धातुगतिसमुदायगम्यः । श्रद्धाप्रतीघाते किम् । कर्णेहत्वा गतः । मनोहत्वा । सूक्ष्मतण्डुलावयवः कणस्तस्मिन् हत्वेत्यर्थः । मनःशब्दस्तु चेतासि ॥

पुरोव्ययम् ॥ पूर्वाधरावराणामिति व्युत्पादितो ऽसिप्रत्ययान्तोव्ययं तथाभूतः पुरःशब्दो गतिसंज्ञः स्यात् । पुरस्कृत्य । नमस्पुरसोरिति सत्वम् । अव्ययं किम् । पूः पुरौ पुरः कृत्वा ॥

अस्तञ्च ॥ अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात् । अस्तङ्कृत्य । अव्ययमित्येव । अस्तं काण्डम् । क्षिप्तमित्यर्थः ॥

अच्छगत्यर्थवदेषु ॥ अव्ययमित्येव । अच्छगत्य । अच्छोह्य । अभिगत्य । अभिमुखमुक्त्वा चेत्यर्थः । अव्ययं किम् । जलमच्छं गच्छति ॥

अदोनुपदेशे ॥ अदःशब्दस्त्यदादिः सोनुपदेशे गतिः स्यात् । अदःकृत्यादःकृतम् । यदा स्वयमेवेत्थं पर्यालोचयति तदेदमुदाहरणम् । अनुपदेशे किम् । परं प्रति कथने मा भूत् । अदः कृत्वा गतः ॥

तिरोन्तर्धौ ॥ तिरोभूय। अन्तर्धौ किम्। तिरोभूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः ॥

विभाषा कृञि ॥ प्राप्तविभाषेयम् । तिरोन्तर्धावित्यनुवृत्तेः। तिरःकृत्य तिरस्कृत्य । तिरसोन्यतरस्यामिति वा सत्वम् । प्रत्युदाहरणे तु न सत्वम् । तद्विधौ गतिग्रहणानुवृत्तेः । तिरः कृत्वा काष्ठम् । के चित्त्विहापि सत्वमिच्छन्तः पराभवे तिरस्कारशब्दप्रयोगं चानुरुन्धानाः सत्वविधौ गतिग्रहणं निवर्तयन्तीति माधवः ॥

उपाजेन्वाजे ॥ एतौ कृञि वा गतिसंज्ञौ स्तः। विभक्तिप्रतिरूपकौ निपाताविमौ दुर्बलस्य सामर्थ्याधाने वर्तेते । उपाजेकृत्य । उपाजेकृत्वा । अन्वाजेकृत्य । अन्वाजेकृत्वा। उपष्टभ्येत्यर्थः ॥

साक्षात्प्रभृतीनि च ॥ एतानि कृञि वा गतिसंज्ञानि स्युः। च्व्यर्थ इति वक्तव्यम् ॥ साक्षात्कृत्य साक्षात्कृत्वा। असाक्षाद्भूतं साक्षात्क्रियते चेत्तदायं प्रयोगः। न तु साक्षाद्भूतस्यैव रूपान्तरापादने। च्व्यन्तेषु तु पूर्वविप्रतिषेधाद्दूर्यादिच्विति नित्यैव संज्ञा। तेन लवणीकृत्येत्यत्र मान्तत्वं न भवति । तद्विकल्पसन्नियोगेनेह गणे निपात्यते। यद्वा लवणशब्दस्य लवणमिति मान्त आदेशः। तथा च मास्तु पूर्वविप्रतिषेधः। त्रैशव्यं हि नः साध्यम्। लवणंकृत्य लवणंकृत्वा लवणीकृत्येति । तत्र च्व्यन्ताच्व्यन्तयोः पाक्षिके लवणमादेशे समं रूपं। परेणापि विकल्पेन मुक्ते तु च्व्यन्तस्य नित्या संज्ञेति न कश्चिद्दोषः। इहाग्नौ वशेप्रभृतयो विभक्तिप्रतिरूपका निपाताः। प्रादुराविःशब्दयोरूर्यादित्वात्प्राप्ते विभाषा । साक्षात् मिथ्या चिन्तेति मनोव्यापारे। चिन्ताकृत्य । भद्रा आलोचनाप्रशंसासङ्गलेष्वयम्। रोचनेतीति-

श्रद्धोत्पादे प्रशंसायां च । अमेति रहःसाहित्ययोः । आस्था श्रद्धा प्राजर्यावी जर्या जरणक्रियायाम् । प्राजरुहा बीजरुहेति रुहिक्रियायाम् । लवणम् उष्णं शीतम् । उदकम् । आर्द्र, लवणादीनां पञ्चानां गतिसंज्ञासन्नियोगेन मान्तत्वं निपात्यते मान्तादेशो वेत्युम् । अग्नौ । वशे विकम्पने विकसने प्रहसने सन्तपने । प्रादुस् नमस् आविस् । आकृतिगणोयम् ॥

अनत्याधानउरसिमनसी ॥ एतौ निपातौ कृञि वा गतिसंज्ञौ स्तः । उरसिकृत्य । उरसिकृत्वा । अभ्युपगम्येत्यर्थः । मनसिकृत्य मनसिकृत्वा । निश्चित्येत्यर्थः । अत्याधानमुपश्लेषः । तत्र न । उरसिकृत्वा पाणिं शेते ॥

मध्येपदेनिवचने च ॥ एते त्रयः कृञि गतिसंज्ञा वा स्युरनत्याधाने । मध्येकृत्य मध्येकृत्वा । पदेकृत्य पदेकृत्वा । एदन्तावेतौ निपातौ । निवचनं वचनाभावः । अस्याविशेषेण एदन्तन्ता निपात्यते न तु संज्ञासन्नियोगेन । व्याख्यानात् । निवचनेकृत्य निवचनेकृत्वा । वाचं नियम्येत्यर्थः । अनत्याधाने किम् । हस्तिनः पदे कृत्वा शिरः शेते ॥

नित्यं हस्तेपाणावुपयमने ॥ एतौ निपातौ कृञि नित्यं गतिसंज्ञौ स्त उपयमने । दारकर्मण्यित्येके । स्वीकारमात्रइत्यन्ये । हस्तेकृत्य पाणौकृत्य कन्याम् । महास्त्राणि वा । उपयमने किम् । हस्तेकृत्वा सुवर्णं गतो भृत्यः ॥

प्राध्वम्बन्धने ॥ प्राध्वमिति चादिषु पाठान्मान्तमव्ययमानुकूल्ये वर्तते । तत्कृञि नित्यं गतिसंज्ञं स्याद्बन्धनहेतुकं चेदानुकूल्यम् । प्राध्वंकृत्य । बन्धने किम् । प्राध्वंकृत्वा । प्रार्थनादिनानुकूलं कृत्वेत्यर्थः ॥

जीविकोपनिषदावौपम्ये ॥ कृञि नित्यं गतिसंज्ञौ स्तः ।

जीवयतीति जीविका जीवनोपायः । जीविकामिव कृत्वा जीविकाकृत्य । उपनिषदमिव कृत्वा उपनिषत्कृत्य । गतिसमासस्य नित्यत्वेपि स्वार्थमात्रनिष्ठत्वादगतिना विग्रहीत एव तत्र इवशब्दप्रयोगः । औपम्ये किम् । जीविकां कृत्वा ॥

ते प्राग्धातोः ॥ ते गतिसंज्ञा धातोः प्रागेव प्रयोज्याः ॥

छन्दसि परेपि ॥

व्यवहिताश्च ॥ स्पष्टम् । हरिभ्यां याह्योक आ । आमन्द्रैरिन्द्र हरिभिर्याहि । इह संज्ञानियमपक्षोपि भाष्ये स्थितः । ते इत्यनेन प्रादीनुपनिषत्पर्यन्तात् स्वरूपेण परामृश्य धातोः प्राक् प्रयुक्तानामेषां पूर्वसूत्रैकवाक्यतया संज्ञाविधानात् । अस्मिंश्च पक्षे छन्दसिपरेपि व्यवहिताश्चेति सूत्रद्वयम् अनितिपरग्रहणं च न कर्त्तव्यमिति स्थितम् । सुकटङ्करोणीति भाष्यं च सङ्गच्छते । प्रयोगनियमपक्षे तु कृत्यल्युट इति बहुलग्रहणेन समर्थनीयं स्यात् । यत्तु खलः खित्करणसामर्थ्यादनव्ययस्य प्राक् प्रयोगे निर्णीते सोः परिशेषाद्व्यवधानं सिध्यतीति तच्चिन्त्यम् । सामर्थ्याद्व्यवहिते सुमः सम्भवात् । कृद्ग्रहणे गतिपूर्वस्यापि ग्रहणाच्च । ईषच्छब्दस्यागतिसंज्ञकतयेषदाद्यम्भव इत्यत्र खलः खित्त्वस्योपक्षीणत्वाच्चेति दिक् । धातोः किम् । प्रकर्तुमैच्छत् प्राचिकीर्षदित्यत्र सनः प्राक् प्रयोगो मा भूत् ॥

कर्मप्रवचनीयाः ॥ रीश्वरात्प्रागिदमधिक्रियते । कर्म क्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः बाहुलकात्कर्तर्यनीयर्,स च भूते। तेन सम्प्रति क्रियां न द्योतयन्तीति लभ्यते । आह च । क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः । नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदक इति ॥ तथाहि । शाकल्यस्य संहितामनुप्रावर्षदित्यत्रानुना न क्रियाविशेषो द्योत्यते । अनुभूयते सुख-

मित्यादौ यथा। नापि षष्ठ्येव सम्बन्ध उच्यते। द्वितीययैव तस्योक्तत्वात्। नापि प्रादेशं विपरिलिखति विपाय परिलिखतीत्यत्र विशब्देन मानक्रियेव क्रियान्तरमाक्षिप्यते, कारकविभक्तिप्रसङ्गात्। किन्तु संहितासम्बन्धिवर्षणमिति द्वितीयावगतः सम्बन्धो लक्ष्यलक्षणभावरूप एवेत्यवगमात्सम्बन्ध एवानुना विशेषेवस्थाप्यते। क्व चित्तु क्रियागतविशेषद्योतकेपीयं संज्ञा वचनात्प्रवर्तते। सुः पूजायामतिरतिक्रमणे चेति यथा॥

अनुर्लक्षणे॥ लक्षणे द्योत्ये ऽनुः कर्मप्रवचनीयसंज्ञः स्यात्। लक्षणेत्थंभूतेत्यादिना सिद्धे हेतौ तृतीयां बाधितुमिदं सूत्रम्। तथाहि। लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशः। यो न हेतुः, वृक्षमनुविद्योतते विद्युदिति। हेतुतृतीयाया अवकाशो धनेन कुलमिति। संहितामनुप्रावर्षदित्यत्र तु हेतुभूतसंहितोपलक्षितं वर्षणमित्यर्थाद्धेतुभूते लक्षणे परत्वात्तृतीया स्यात्। पुनः संज्ञाविधानसामर्थ्यात्तु द्वितीयैव भवति। आह च। हेतुहेतुमतोर्योगपरिच्छेदेनुना कृते। आरम्भाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणेति। न च तृतीयार्थे इति सूत्रेण गतार्थता शङ्क्या। तस्य पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधानइत्येतन्मात्रबाधकत्वात्॥

तृतीयार्थे॥ अस्मिन् द्योत्ये ऽनुरुक्तसंज्ञः स्यात्। नदीमन्ववसिता सेना। नद्या सह सम्बद्धेत्यर्थः। षिञ् बन्धने ऽस्मात्कर्तरि क्तः॥

हीने॥ हीने द्योत्ये ऽनुः प्राग्वत्। अनु हरिं सुराः। हरिप्रतियोगिकापकर्षरूपसम्बन्धवन्त इत्यर्थः। उत्कृष्टादेव द्वितीया न त्वपकृष्टात्। शक्तिस्वभावात्॥

उपोधिके च ॥ अधिके हीने च द्योत्ये उपः प्राक्संज्ञः । उपखार्यां द्रोणः । खारीतोधिको द्रोणोस्ति । उभयमस्तीति फलितोर्थः । यस्मादधिकमिति सप्तमी । हीने, उपहरिं सुराः ॥

अपपरी वर्जने ॥ एतौ वर्जने द्योत्ये प्राग्वत् । अपविष्णोः परिविष्णोः संसारः । पञ्चम्यपाङ्परिभिरिति पञ्चमी । परेर्वर्जनइति द्विर्वचनम् । तद्धि पञ्चमीसहितेन कर्मप्रवचनीयेन द्योतितेपि वर्जने भवत्येव । उभयोरपि विधानसामर्थ्यात् । वर्जने किम् । परिषिञ्चति । सर्वत इत्यर्थः । अत्रोपसर्गत्वात्षत्वम् ॥

आङ् मर्यादावचने ॥ आङ् प्राग्वत् । मर्यादाशब्दो यस्मिन्सूत्रे उच्यते तत्रत्यश्चेत् । आङ्मर्यादाभिविध्योरित्यत्रोपात्तो द्व्यर्थ इत्यर्थः । आमुक्तेः संसारः । आबालेभ्यो हरिभक्तिः ॥

लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः । लक्षणे । वृक्षं प्रति परि अनु वा विद्योतते विद्युत् । कञ्चित्प्रकारं प्राप्त इत्थंभूतस्तदाख्याने यथा । साधुर्देवदत्तो मातरं प्रति पर्यनु वा । भागे । यदत्र माम्प्रति स्यात् । परिस्यात् । अनुस्यात् । योत्र मम भागः स दीयतामित्यर्थः । स्वस्वामिभावो द्वितीयार्थः । वीप्सा व्याप्तुमिच्छा साकल्यप्रतिपिपादयिषेति यावत् । भूतंभूतं प्रति पर्यनु वा प्रभुः । सकलभूतानामित्यर्थः । न चेत्थंभूताख्यानइत्येव सिद्धम् । इदं तर्ह्युदाहरणं वृक्षंवृक्षं प्रतिसिञ्चति परिसिञ्चति अनुसिञ्चति । इह वीप्सा द्विर्वचनेनैव द्योत्यते । परिशब्दस्तु क्रिययैव सम्बध्यते । न चैवन्तस्य कर्मप्रवचनीयत्वं न स्यादिति वाच्यम् । वीप्सायाः विषयत्वानपायात् । अत एव वीप्सा-

यां विषयभूतायामिति वृत्तिग्रन्थमवतारयन्हरदत्त आह। एते च लक्षणादयो यथा विभक्तिसमीपादयो ऽव्ययार्थाः। नैवं प्रत्यादीनामर्थाः। किन्तर्हि संज्ञायां प्रत्यादीनां विषयत्वेन निर्दिष्टा इत्याहेति। द्वितीया तु कर्मणि। कर्मप्रवचनीयसंज्ञा तूपसर्गत्वनिवृत्त्यर्था। तेनोपसर्गात्सुनोतीति षत्वं न। परिशब्दयोगे पञ्चमी तु न भवति। पञ्चम्यपाङ्भ्यित्यत्र वर्जनार्थेनापेत्यनेन साहचर्यात्॥

अभिरभागे॥ भागवर्जेलक्षणादावभिरुक्तसंज्ञः स्यात्। वृक्षमभिविद्योतते। साधुर्मातरमभि। वृक्षमभिसिञ्चति। अभागे किम्। यदत्र ममाभिष्यात्तदीयताम्॥

प्रतिः प्रतिनिधिप्रतिदानयोः॥ उक्तसंज्ञः स्यात्। अभिमन्युरर्जुनात् प्रति। तस्य प्रतिनिधिरित्यर्थः। तिलेभ्यः प्रतियच्छति माषान्। प्रतिनिधिप्रतिदाने च यस्मादिति पञ्चमी॥

अधिपरी अनर्थकौ॥ उक्तसंज्ञौ स्तः। कुतो ऽध्यागच्छति। कुतः पर्यागच्छति। इहाधिकार्थविरहादनर्थकत्वमधिपर्योः, धात्वर्थमात्रानुवर्तित्वात्तु प्राप्ता गतिसंज्ञा। तद्बाधः संज्ञाफलम्। तेन गतिर्गताविति निघातो न भवति॥

सुः पूजायाम्॥ सुसिक्तम्। सुस्तुतम्। अनुपसर्गत्वान्न षः। पूजायां किम्। सुषिक्तं किन्तवात्र। क्षेपोयं न पूजा। कथं तर्हि सुष्टुतिरिति। अतिशयमात्रं विवक्षितं न तु पूजेत्याहुः। पठन्ति च। प्रशंसानुमते पूजा भृशकृच्छ्रसुखेषु सुरिति॥

अतिरतिक्रमणे च॥ अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयसंज्ञः स्यात्। अतिक्रमणमुचितादधिकस्यानुष्ठानम्। अतिसिक्तं अतिस्तुतम्। बहुतरं समीचीनं वा सिक्तम् स्तुतञ्चेत्यर्थः॥

अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु॥ एषु द्योत्ये-

ऽपिरुक्तसंज्ञः । सार्पिषोपि स्यात् । प्रार्थनायां लिङ् । तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते । अनुपसर्गत्वान्न षः । सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे । इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम । कर्मप्रवनीययुक्ते द्वितीया तु नेह प्रवर्तते । सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात् । सम्भावनं नाम शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः । अपिसिञ्चेन्मूलसहस्रम् । अपिस्तुयाद्विष्णुम् । अन्ववसर्गः कामचारानुज्ञा । अपिसिञ्च । अपिस्तुहि । गर्हायाम् । धिग्देवदत्तमपिस्तुयाद्वृषलम् । समुच्चये । अपिसिञ्च । अपिस्तुहि । सिञ्च च स्तुहि चेत्यर्थः । यथायथमुपसर्गप्रादुर्भ्यामिति उपसर्गात्सुनोतीति च प्राप्तं षत्वं कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधितत्वान्न भवति ॥

अधिरीश्वरे ॥ स्वस्वामिभावे द्योत्ये ऽधिः कर्मप्रवचनीयः स्यात् । इह स्वात्स्वामिनो वा पर्यायेण कर्मप्रवचनीयविभक्तिर्न तु हीने उपोधिकेचेत्यत्रेवान्यतरस्मादेव । अधिभुवि रामः । अधिरामे भूः । एतच्च संज्ञासूत्रं नारम्भणीयम् । उत्तरार्थत्वे तु योगो न विभजनीय इति यस्मादधिकमित्यत्र वक्ष्यामः ॥

विभाषा कृञि ॥ अधिः करोतौ प्राक्संज्ञो वा स्यात् । ईश्वरइत्यनुवर्तते । प्राप्तविभाषेयम् । यदत्र मामधिकरिष्यति । विनियोक्ष्यतइत्यर्थः । इह विनियोक्तुरीश्वरत्वं गम्यते । कर्मत्वाद् द्वितीया । इह तिङिचोदात्तवतीति निघातो न गतिसंज्ञाया बाधितत्वात् । किञ्च मामधिकृत्वेत्यत्र प्रादिसमासो न । कर्मप्रवचनीयानां प्रतिषेध इत्युक्तेः । पक्षे ऽधिकृत्येति बोध्यम् ॥

लः परस्मैपदम् ॥ लकारस्यादेशाः परस्मैपदसंज्ञाः स्युः ।

पचन्तं पश्य ॥

तङानावात्मनेपदम् ॥ तङ्प्रत्याहारो लादेशावानौ च तत्संज्ञाः स्युः । पूर्वसंज्ञापवादः । आस्ते । आसीनः । चक्राणः । शानच्कानचोरेवेह ग्रहणम् । लादेशत्वात् । न तु शानन्चानशोः, तेन पूङ्यजोः शानन् यजेरकर्तृगेपि फले भवति रसमानसारसेनेत्यादौ परस्मैपादिभ्योपि चानश् भवति ॥

तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः ॥ कृतद्वन्द्वानामेकशेषात् प्रथमेत्यादयः षट् संज्ञाःतिङः षट् त्रिकाः क्रमात्प्रथमादिसंज्ञाः स्युः। शतृक्वस्वोः सावकाशापि परस्मैपदसंज्ञा प्रथमादिसंज्ञाभिर्न बाध्यते सिचिवृद्धिःपरस्मैपदेष्विति लिङ्गात्। तथा परस्मैपदे लब्धावकाशापि प्रथमादिसंज्ञा तङ्क्ष्वात्मनेपदसंज्ञया न बाध्यते कृतद्वन्द्वानामेकशेषेण तङ्क्षु प्रतिपदविधेरुक्तत्वात् । न चैवमपि परस्मैपदात्मनेपदसंज्ञाभ्यां पुरुषसंज्ञायाः पर्यायः स्यादिति वाच्यम् । णलुत्तमोवेत्यस्य सामान्यापेक्षज्ञापकत्वात् । इह सूत्रत्रयेपि महासंज्ञाकरणं पूर्वाचार्यानुरोधात् । इह त्रीणित्रीणीत्येकं पदम् । द्वे वेति हरदत्तः । तत्र सत्यामप्यवान्तरपदसंज्ञायां महापदसंज्ञामाश्रित्य संहितैकपदे नित्येत्यस्य प्रवृत्तेः । अन्यथा समासादावपि पृथक्छेदापत्तेः । द्विरुक्तमध्ये पदान्तरप्रयोगापत्तेश्च । अत एव ताता पिण्डानामित्यादौ वेदे ऽवग्रहः क्रियते । यथा च द्विरुक्ते महापदसंज्ञाऽवान्तरसंज्ञा च तथा नित्यवीप्सयोरित्यत्र वक्ष्यामः ॥

तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ तानि लब्धपुरुषसंज्ञानि त्रीणित्रीणि एकशः क्रमेण एकवचनादिसंज्ञानि स्युः । तानीत्युक्तिः समावेशार्था । अन्यथा पुरुषवचनसंज्ञयोः पर्यायः स्यात् ततश्चाङुत्तमस्येत्यादिकार्यं पक्षे न प्रवर्तेत । एकश

इति प्रथमान्ताद्वीप्सायां शस् ॥

सुपः ॥ सुपस्त्रीणित्रीणि क्रमादेकश उक्त संज्ञानि स्युः । इहान्वर्थतामाश्रित्य द्व्येकयोर्द्विवचनैकवचने बहुषुबहुवचनमिति शक्यं त्यक्तुम् । एकवचनस्यौत्सर्गिकत्वेपि उपसर्जनकर्मप्रवचनीयादिसंज्ञावद्यथासम्भवमन्वर्थतायाः सुवचत्वात् ॥

विभक्तिश्च ॥ सुप्तिङौ विभक्तिसंज्ञौ स्तः । चकारः पुरुषवचनसंज्ञाभ्यां समावेशार्थः । तिङां विभक्तिसंज्ञायाः प्रयोजनं नविभक्तौतुस्मा इति, सुपां तु त्यदाद्यत्वादिकमपि ॥

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ लकारेण समानाधिकरणे युष्मदि प्रयुक्ते ऽप्रयुक्तेपि मध्यमः स्यात् । त्वं पचसि दृश्यसे च । समानाधिकरणे किम् । त्वां पश्यति । त्वया दृश्यते । इह युष्मदि मध्यमो ऽस्मद्युत्तम इत्येवास्तु युष्मद्यस्मदि चयो लकार इत्यर्थे सर्वसामञ्जस्यात् । तथा तु न कृतमित्येव । अत्वं त्वं भवति त्वद्भवतीत्यत्र तु न । मध्यमविकृतेरकर्तृत्वात् । प्रकृतिरेव हि विकाररूपापन्नौ कर्त्री । तथा च मन्त्रः । यदग्नेस्यामहं त्वं त्वंबाधास्याअहमिति । अहं त्वं स्याम् । त्वं वा अहं स्या इति प्रकृत्याश्रय एवेह पुरुषः । स्यादेतत् । भवान् करोतीत्यत्रापि स्थानिन्यपीति मध्यमः स्यात् । अत्राहुः । अलिङ्गः सम्बोधनैकविषयश्च युष्मदर्थः । सलिङ्गः सम्बोध्यासम्बोध्यसाधारणश्च भवदर्थ इति । न च युष्मदः सम्बोधनैकविषयत्वे ततः सम्बोधनएव प्रथमा स्यात् । ततश्च आमन्त्रिताद्युदात्तत्वं पदात्परत्वेन निघातश्च स्यादिति वाच्यम् । सम्बोधनस्य प्रातिपदिकार्थएवान्तर्भावात् । सम्बोधनेचेति सूत्रं हि सम्बोधनाधिक्यार्थमिति वक्ष्यते । यत्तु के चिदिष्टापत्तिं कुर्वाणाः पठन्ति । सम्बोधनार्थः सर्वत्र मध्यमे कैश्चिदि-

ष्यते । तथा सम्बोधने सर्वा प्रथमां युष्मदो विदुः ॥ युष्मदर्थस्य सिद्धत्वान्नियता चाद्युदात्तता । युष्मदः प्रथमान्तस्य परश्चेन्न पदादसाविति ॥ तन्न । उक्तन्यायविरोधात् । लक्ष्यविरोधाच्च । दृश्यते हि पादादावप्यन्तोदात्तत्वं पदात्परत्वेप्यनिघातश्च । तद्यथा, युवं ह गर्भञ्जगतीषु धत्थः । यूयं यातस्वस्तिभिः । ह ये देवा यूयमिदापयः स्थेति ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात् परिहासे गम्यमाने मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः स्यात् । द्वयोर्बहुषु च मन्तृषु एकवचनमेव स्यादिति फलितोर्थः । एकवच्चेत्यन्वाचये चकारः । तेनैकवद्भावाभावेपि प्रधानशिष्टौ मध्यमोत्तमौ स्त एव । सत्यप्योदने परिहासशीलः शालकादिः प्रतारयन्प्रयुङ्क्ते । एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोतिथिभिः । एतम् एत वा मन्ये ओदनं भोक्ष्येथे भोक्ष्यध्वे । ओदनं भोक्ष्ये भोक्ष्यावहइत्यादि मन्यसे मन्येथे इत्यादिरर्थः । युष्मद्युपपदइत्याद्यनुवर्त्तते तेनेह न । एतु भवान्मन्यते ओदनं भोक्ष्यइति । श्यना निर्देशान्नेह । एहि मनुषे रथेन यास्यामिति । प्रहासे किम् । यथार्थकथने मा भूत् । एहि मन्यसे ओदनं भोक्ष्यइति भुक्तः सोतिथिभिः ॥

अस्मद्युत्तमः ॥ लकारसमानाधिकरणे ऽस्मदि स्थिते स्थानिन्यप्युत्तमः स्यात् । अहं पश्यामि दृश्ये वा । युष्मदस्मद्भ्यां सामानाधिकरण्ये तु परत्वादुत्तम एव । अहं च त्वं च वृत्रहत्स्वयुज्यावसानिभ्यआ ॥

शेषे प्रथमः ॥ मध्यमोत्तमविषयादन्यत्र प्रथमपुरुषः स्यात् । पचति पचतः पचन्ति ॥

परः सन्निकर्षः संहिता ॥ अतिशयितः सन्निधि
र्णानां यः स संहितासंज्ञः स्यात् । संज्ञाप्रदेशाः संहिताय
मित्यादयः ॥

विरामोवसानम् ॥ वर्णानामभावोवसानसंज्ञः स्यात् । स
ज्ञाप्रदेशा वावसानइत्यादयः । अभावस्यापि बुद्धिकृतं पौर्वा
र्यमस्त्येव । यथोच्चरितप्रध्वंसिनां नित्यविभूनां वा वर्णानाम्
यद्वा । विरम्यते ऽनेनेति करणे घञ् चरमवर्णश्च संज्ञी । अ
स्मिन्पक्षे खरवसानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते । ख
रि परे रेफस्य विसर्गः, अवसाने च रेफे स्थानिनीति । अ
वार्त्तिकम् । संहितावसानयोर्लोकविदितत्वात्सिद्धमिति । तथ
च सूत्रद्वयं मास्तिवत्यर्थः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणस्य लक्ष्मीधरसूरेः
सूनुना भट्टोजीभट्टेन कृते शब्दकौस्तुभे प्रथमस्याध्या-
यस्य चतुर्थे पादे चतुर्थमान्हिकम् ॥
पादश्चाध्यायश्च समाप्तः ॥